| स्वरादयोऽव्ययम् | १।१।३० | १६१ |
| स्वरादुतोगुणादखरोः | २।४।३५ | १९३ |
| स्वरादुपसर्गाद्दस्तिकित्यधः | ४।४।९ | ६६८ |
| स्वरादेर्द्वितीयः | ४।१।४ | ६५९ |
| स्वरादेस्तासु | ४।४।३१ | ५१५ |
| स्वरेऽतः | ४।३।७५ | ६२६ |
| स्वरेभ्यः | १।३।३० | ७६ |
| स्वरेभ्यहः | ६०६ | ९२९ |
| स्वरेवा | १।३।२४ | ६८ |
| स्वरेवाऽनक्षे | १।२।२९ | ६८ |
| स्वर्गस्वस्तिवाचनादिभ्योयलुपौ | ६।४।१२३ | ४१३ |
| स्वसृपत्योर्वा | ३।२।३८ | ३१८ |
| स्वस्नेहार्थात्पुषपिषः | ५।४।६५ | ९७९ |
| स्वाङ्गतश्च्व्यर्थनानाविनाधार्थेन भुवश्च | ५।४।८६ | ९८२ |
| स्वाङ्गान्ङीर्जातिश्चामानिनि | ३।२।५६ | २६४ |
| स्वाङ्गादेरकृतमितजातप्रतिपन्नाद्बहुव्रीहेः | २।४।४६ | १९५ |
| स्वाङ्गाद्विवृद्धात्ते | ७।२।१० | ४५१ |
| स्वाङ्गेनाध्रुवेण | ५।४।७९ | ९८१ |
| स्वाङ्गेषुसक्ते | ७।१।१८० | ४४६ |
| स्वादेः श्नुः | ३।४।७५ | ६९७ |
| स्वाद्वर्थाददीर्घात् | ५।४।५३ | ९७८ |
| स्वान्मिच्चीशे | ७।२।४९ | ४५५ |
| स्वामिचिह्नस्याऽविष्टाऽष्टपञ्चभिन्नच्छिन्नच्छिद्रश्रुवस्वस्तिकस्यकर्णे | ३।२।८४ | २९० |
| स्वामिवैश्येऽर्यः | ५।१।३३ | ९८७ |
| स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैः | २।२।९८ | २४५ |
| स्वाम्येऽधिः | ३।१।१३ | १८६ |
| स्वार्थे | ४।४।६० | |
| स्वेशेऽधिना | २।२।१०४ | २४६ |
| स्वैरस्वैर्यक्षौहिण्याम् | १।२।१५ | ६५ |
| स्सटि समः | १।३।१२ | ६०८ |
| **ह** | | |
| हःकाल्वीह्योः | ५।१।६८ | ८४१ |
| हत्या भूयं भावे | ५।१।३६ | ९८१ |
| हनः | २।३।८२ | ६४९ |
| हनः सिच् | ४।३।३८ | ५९५ |
| हनश्च समूलात् | ५।४।६३ | ९७९ |
| हनियाकृभृपृतृश्नोद्धे च | ७३३ | ९३७ |
| हन्तःस्यस्य | ४।४।४९ | ५११ |
| हनेर्घतजघौ च | २७२ | ९०६ |
| हनो घि | २।३।९४ | १३२ |
| हनो घ्नीर्वधे | ४।३।९९ | ७९६ |
| हनोणिन् | ५।१।१६० | ८५७ |
| हनोऽन्तर्घनान्तर्धणौ देशे | ५।३।३४ | ९५४ |
| हनो वध आशिष्यञौ | ४।४।२१ | ६५० |
| हनो वा वध्च | ५।३।४६ | ९५६ |
| हनोह्नोघ्नः | २।१।११२ | १३२ |
| हन्तेरंहच्च | ६५४ | ९३३ |
| हरत्युत्सङ्गादेः | ६।४।२३ | ४०८ |
| हरितादेरञः | ६।१।५५ | ३४२ |
| हरिपीतामितशतविकुकद्र्वोद्भवः | ७४५ | ९३८ |
| हलक्रोडास्येपुवः | ५।२।८९ | ८८५ |
| हलसीरादिकण् | ६।३।१६१ | ३८३ |
| हलसीरादिकण् | ७।१।६ | ४२० |
| हलस्यकर्षे | ७।१।२६ | ४२३ |
| हवःशिति | ४।१।१२ | ६६२ |
| हविरन्नमेदापूपादेर्योवा | ७।१।२९ | ४२३ |
| हविष्यष्टनःकपाले | ३।२।७३ | २८९ |
| हशश्वद्युगान्तःप्रच्छयेह्यस्तनीच | ५।२।१३ | ४८६ |
| हविटोनाम्युपान्त्याददृशोऽनिटःसक् | ३।४।५५ | ५४१ |
| हस्तदन्तकराज्जातौ | ७।२।६८ | ४५६ |
| हस्तप्राप्येचेरस्तेये | ५।३।७८ | ७०० |
| हस्तार्थाद्ग्रहवर्तिवृतः | ५।४।६६ | ५७१ |
| हस्तिपुरुषाद्वाण् | ७।१।१४१ | ४४० |
| हस्तिबाहुकपाटाच्छक्तौ | ५।१।८६ | ८४४ |
| हाकः | ४।२।१०० | ६६३ |
| हाको हिः क्त्वि | ४।४।१४ | ९६९ |
| हान्तस्थान्ञीड्भ्यां वा | २।१।८१ | ५८१ |
| हायनान्तात् | ७।१।६८ | ४३४ |
| हिण्डिविलेः किम्बोनलुक्च | ३२४ | ९०९ |
| हितनाम्नोवा | ७।४।६० | ३३५ |
| हितसुखाभ्याम् | २।२।६५ | २३९ |
| हितादिभिः | ३।१।७१ | २८० |
| हिमहतिकाषिये पद् | ३।२।९६ | २९२ |
| हिमादेलुः सहे | ७।१।९० | ४३४ |
| हिरण्यपर्जन्यादयः | ८३० | ९१२ |
| हिंसार्थादेकाप्यात् | ५।४।७४ | ९८० |
| हिंसेः सिमु च | ५८८ | ९२८ |
| हीनात्स्वाङ्गादः | ७।२।४५ | ४५४ |
| हुधुटोहेर्धिः | ४।२।८३ | ६३१ |
| हुपूदोचीप्रस्तुप्रतिहप्रतिप्रस्थाभ्य ऋत्विजि | ८६३ | ९४३ |




Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | |
|---|---|---|
| हुयामाश्रुवसिभसिगुवीपचिवचिथृयम्य-मिमनितनिसदिछादिक्षिक्षदिलुपि-पतिधून्यक्तः | ४५१ | ९१९ |
| हूर्णिधूर्णिभूर्णिचूर्ण्यादयः | ६३७ | ९३२ |
| हृक्रोर्नवा | २।२।८ | २१९ |
| हृगईतण् | २१३ | ९०३ |
| हृगोगतताच्छील्ये | ३।३।३८ | ६०९ |
| हृगोवयोऽनुद्यमे | ५।१।९५ | ८४६ |
| हृजनिभ्यामिमन् | ९१७ | ९४६ |
| हृदयस्यहृल्लासलेखाण्ये | ३।२।९४ | २९२; ४३४ |
| हृद्भगसिन्धोः | ७।४।२५ | ३५० |
| हृद्यपद्यतुल्यमूल्यवश्यपथ्यवयस्य-धेनुष्यागार्हपत्यजन्यधर्म्यम् | ७।१।११ | ४२१ |
| हृभूलाभ्य आणकः | ६८ | ८९४ |
| हृरुहिपिण्डिभ्य ईतकः | ७९ | ८९४ |
| हृश्यारुहिशोणिपलिभ्य इतः | २१० | ९०२ |
| हृषिपुषिप्रुषिगदिमदिनन्दिगडिमन्दि-अनिस्तनिभ्योणेरिलुः | ७९७ | ७४० |
| हृषिवृतिचटिपटिशकिशङ्कितण्डि-मन्थ्युत्कण्डिभ्य उलः | ४८५ | ९२२ |
| हृषेःकेशलोमविस्मयप्रतिघाते | ४।४।७६ | ५९८ |
| हृसृफलिकषेराच | १६ | ८८७ |
| हृसृरुहियुषितडिभ्य इत् | ८८७ | ९४४ |
| हेःप्रश्नाख्याने | ७।४।९७ | ८ |
| हेतुकर्तृकरणेत्थम्भूतलक्षणे | २।२।४४ | २३१ |
| हेतुतच्छीलानुकूलेऽशब्दश्लोककलह-गाथावैरचाटुसूत्रमंत्रपदात् | ५।१।१०३ | ८४७ |
| हेतुसहार्थेऽनुना | २।२।३८ | २२८ |
| हेतौ संयोगोत्पाते | ६।४।१५३ | ४१४ |
| हेत्वर्थैस्तृतीयाद्याः | २।२।११८ | २५३ |
| हेमन्ताद्वातलुक्च | ६।३।९१ | ४०१ |
| हेमादिभ्योऽञ् | ६।२।४५ | ३६३ |
| हेमार्थात्माने | ६।२।४२ | ३६२ |
| हेर्हिन्च | ७६० | ९३९ |
| हेहैष्वेषामेव | ७।४।१०० | ८ |
| होजहृच | ७८९ | ९४० |
| होत्राभ्य ईयः | ७।१।७६ | ४३३ |
| होत्राया ईयः | ७।२।१६३ | |
| हो धुट्पदान्ते | २।१।८२ | १४४ |
| होर्मिन् | ९२७ | ९४६ |
| हौदः | ४।१।३१ | ६६८ |
| ह्यस्तनीदिवतांअन्, सिवतंत, अमूव्वम, तआतां अन्त, थास्आथांध्वं इवहिमहि | ३।३।९ | ४८३ |
| ह्योगोदोहादीनञ् हियङ्गुश्चास्य | ६।२।५५ | ३६३ |
| ह्रस्वः | ४।१।३९ | ५०० |
| ह्रस्वस्य गुणः | १।४।४१ | ९९ |
| ह्रस्वस्य तःपित्कृति | ४।४।११३ | ८५७ |
| ह्रस्वान् ङ्णनो द्वे | १।३।२७ | ७६ |
| ह्रस्वाभ्याम्नस्ति | २।३।३४ | ३२१ |
| ह्रस्वापश्च | १।४।३२ | ८९ |
| ह्रस्वे | ७।३।४६ | ४६५ |
| ह्रस्वोऽपदे वा | १।२।२२ | ७२ |
| हियःकिद्रोलश्च वा | ७५० | ९३८ |
| ह्रियोरश्चल्येवा | २५ | ८८८ |
| ह्लादोह्रद्क्तयोश्च | ४।२।६७ | ८६२ |
| ह्वःसमाह्वयाह्वयौ द्यूतनाम्नोः | ५।३।४१ | ९५५ |
| ह्वः स्पर्धे | ३।३।५६ | ६२० |
| ह्वालिप्सिचः | ३।४।६२ | ६१९ |
| ह्विणोरप्विति व्यौ | ४।३।१५ | ६३५ |


Jain Education International For Personal & Private Use Only www.jainelibrary.org

विश्वहितबोधिदायकश्रीअमीविजयगुरुभ्यो नमः ।

महामहोपाध्यायश्रीविनयविजयगणिविरचितं

# श्रीहैमप्रकाशाख्यं महाव्याकरणम्

## ॥ अथ उत्तरार्द्धम् ॥

॥ श्रीजिनाय नमः ॥

॥ ऐँ नमः ॥ ज्योतींषि सर्वाण्यथ सर्वभावा मूकाः स्वमुद्भावयितुं स्वरूपम् ।
सन्तोऽपि पश्यन्ति मुखं यदीयं ज्योतिः स्तुमस्तत्पटुवाङ्मयाख्यम् ॥ १ ॥
आख्याते जगदाख्याते दुष्प्रवेशेऽपि मादृशैः । देदीप्यते गुरुकृपादीपिकैवावलम्बनम् ॥ २ ॥

स्याद्यन्तशब्दप्रक्रियानिरूपणानन्तरमाख्यातप्रक्रियां निरूपयितुकाम आह ।

**अथाख्यातप्रक्रिया निरूप्यते । आख्यातप्रत्ययाश्च धातोर्वक्तव्याः ।**

अथेत्यादि–आख्यातप्रत्ययानां च धातुः प्रकृतिरिति धातुलक्षणमाह ।

### क्रियार्थो धातुः ॥ १ ॥ [ सि० ३।३।३ ]

**कृतिः क्रिया पठनपचनादिरूपा साऽर्थो यस्य स धातुः स्यात् । स च त्रेधा गणजो नामजः सौत्रश्च । आद्यो नवधा । तथाहुः—**

**अदादयः कानुबन्धाश्चानुबन्धा दिवादयः । स्वादयष्टानुबन्धाश्च तानुबन्धास्तुदादयः ॥ १ ॥**
**रुधादयः पानुबन्धा यानुबन्धास्तनादयः । क्र्यादयः शानुबन्धाश्च णानुबन्धाश्चुरादयः ॥ २ ॥**

**उक्तानुबन्धरहिता भ्वादयः । यत्र नामैव प्रत्ययसम्बन्धाद्धातुत्वं याति स नामधातुः । सौत्राश्च कण्ड्वादयो दोलणूप्रमुखाश्च । प्रत्येकमेते त्रिविधाः, परस्मैपदिन आत्मनेपदिन उभयपदिनश्च ।**

**ङनुबन्ध इदनुबन्धः कँर्तर्यप्यात्मनेपदी धातुः । ईगनुबन्धस्तूभयपदी परस्मैपदी शेषः ॥ १ ॥**

**क्रिया०** कृतिः क्रिया प्रवृत्तिर्व्यापार इति यावत् । पूर्वापरीभूता साध्यमानरूपा, साऽर्थो यस्य स धातुः स्यात् । तत्र पूर्वावयवयोगात् पूर्वा, अपरावयवयोगादपरा । पूर्वोऽवयवोऽधिश्रयणादिरऽपर उदकसेकादिस्तौ द्वावपि भागौ पाकक्रियायां स्तः । अस्याश्च पिण्डीभूताया निदर्शयितुमशक्यत्वेऽप्यव-यवशः साक्षात्करोमीति प्रतीतिविषयत्वादध्यक्षैवेयमन्यथा पश्य मृगो धावतीत्यादौ तस्या दर्शनकर्मता न स्यादित्यतथा तथाभूता पूर्वापरीभूता । तथा च **भाष्यम्**—क्रिया नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूता-वयवा न शक्या पिण्डीभूता निदर्शयितुमिति । अन्वयव्यतिरेकाभ्यां च धातोरेव क्रियार्थत्वम् । तथाहि पचतीत्यादौ धातुप्रत्ययसमुदाये संसृष्टक्रियाकालकारकाद्यनेकार्थाभिधायिनि विक्लेदफलावसानं कर्तृव्या-



Jain Education International For Personal & Private Use Only www.jainelibrary.org

काराभिधायी पच् इति प्रकृतिभागः, कर्तृत्वैकत्ववर्त्तमानत्वाभिधायी अतिरिति च प्रत्ययभागः। अथ पठतीत्युक्ते पच्-शब्दो निवर्तते पठ्-शब्दश्चोपजायते अतिरिति चानुवर्त्तते, अर्थोऽपि विक्लित्तिर्निवर्त्तते, पठिश्चोपजायते, कर्तृत्वैकत्वादिकं चानुवर्त्तते, तेन मन्यामहे—पच्शब्दस्य विक्लित्तिरर्थः पठ्शब्दस्य पठिरित्यर्थः, कर्तृत्वादिकं च अतेरर्थस्तदन्वयव्यतिरेकानुविधायित्वात्। **साध्यमानरूपेति** साधनानि कर्तृकर्मादीनि तदायत्तं रूपं यस्याः **तथा चोक्तं** (वैयाकरणभूषणसारे धात्वर्थनिर्णये)। 卐

'फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्' ॥ १ ॥

फलं विक्लित्त्यादि। व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया। उक्तं च **वाक्यपदीये**

'यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते। आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते' ॥ १ ॥ न च साध्यत्वेनाभिधाने मानाभावः। पचति पाकः, करोति कृतिः, इत्यादौ धात्वर्थावगमाविशेषेऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्यैव मानत्वात्। तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपं साध्यत्वम्। तद्रूपवत्त्वमसत्त्वभूतत्वम्। एतदेवादाय 'असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते' इति **वाक्यपदीयमिति** द्रष्टव्यम्। अयं च व्यापारः फूत्कारत्वाधःसन्तापनत्वयत्नत्वादि तत्तद्रूपेण वाच्यः। पचतीत्यादौ तत्प्रकारबोधस्याऽनुभवसिद्धत्वात्। न च नानार्थतापत्तिस्तदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकानामनुगमकस्य सत्त्वात्। आख्याते क्रियैकत्वव्यवस्थाऽप्यवच्छेदकं बुद्धिविशेषैक्यमादायैव। उक्तं च **वाक्यपदीये**

'गुणीभूतैरवयवैः समूहः क्रमजन्मनाम्। बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते' इति।

धात्वर्थं निरूप्य तिङर्थमाह। आश्रये त्विति फलाश्रये व्यापाराश्रये चेत्यर्थः। फलाश्रयः कर्म, व्यापाराश्रयः कर्त्ता। तत्र फलव्यापारयोर्धातुलभ्यत्वान्न तिङस्तदंशे शक्तिरन्यलभ्यत्वात्। शक्यताऽवच्छेदकं चाश्रयत्वं तत्तच्छक्तिविशेषरूपमिति 卐। **ननु** च कृतिः करोत्यर्थः क्रिया, तत्र युक्तं पचादीनां क्रियात्वम्, अयं किं करोति पचतीत्यादि करोत्यर्थगर्भितत्वात्। अस्तिभवत्यादीनां तु तथात्वाभावात्कथं क्रियात्वम्। नह्येवं प्रयुज्यते अयं किं करोति अस्ति भवतीति। **तदयुक्तम्**। न करोत्यर्थः क्रियाशब्दस्य प्रवृत्तिनिमित्तं किन्तु कारकव्यापारविशेषः, व्यापारश्च व्यापारान्तराद्भिद्यते इत्यस्त्याद्यर्थोऽपि क्रियैव। करोत्यर्थस्तु क्रियाशब्दस्य व्युत्पत्तिनिमित्तमेव। एवं भावशब्देऽपि भवत्यर्थो व्युत्पत्तिनिमित्तं प्रवृत्तिनिमित्तं तु कारकव्यापार एवेति। एवं सति क्रियासामान्यवचनाः कृभ्वस्तयः, क्रियाविशेषवचनास्तु पचादय इति सिद्धम्, तथाभावे घञित्युक्त्वा कारः पाक इत्यादयोऽप्युदाह्रियन्ते। क्रियोपपदाद्धातोस्तुमित्युक्त्वा योद्धुं धनुर्भवति द्रष्टुं चक्षुर्जातमित्याद्यप्युदाहरणं युक्तम्। **यदाहुः** यत्राऽन्यत्क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रथमपुरुषे प्रयुज्यते इति। क्रिया च द्वेधा सिद्धसाध्यभेदात्। तत्र सिद्धस्वभावोपसंहृतक्रमा परिच्छिन्ना सत्त्वभावमापन्ना घञादिभिरभिधीयते। **यदाह** 'कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति। **हरिणा**प्युक्तम्,

'आख्यातशब्दे भागाभ्यां साध्यसाधनवर्त्तिता। प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः'॥१॥
'साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना। सत्त्वभागस्तु यस्तस्याः स घञादिनिबन्धनः' ॥ २ ॥

तुमादिभिस्तु सत्त्वभावमनापन्नेति विशेषः। इयमपि सिद्धरूपैव। साध्यमानावस्था च पूर्वापरीभूतावयवा भूतभविष्यद्वर्त्तमानसदसदाद्यनेकावयवरूपाख्यातपदैरुच्यते **यदाह**। 'पूर्वापरीभूतं भावमाख्यातेनाचष्टे'। यथा च पचतीत्यत्र पूर्वापरीभावस्तद्वदेव जायतेऽस्ति विपरिणमते वर्द्धते अपक्षीयते विनश्यति भवति श्वेतते संयुज्यते समवैतीत्यादावपि। साध्यत्वाभिधानेन क्रमरूपाश्रयणात् क्रिया-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

व्यपदेशः सिद्धः । तदुक्तम्—यावत्सिद्धमसिद्धं चेत्यादि । सिद्धं सत्तादि । असिद्धं तु कटादि । **ननु** पचत्यादिष्वस्तु क्रियात्वम्, भवत्यादिषु तु सत्ताया नित्यत्वेन साध्यमानत्वाभावात्तदभावे च पूर्वापरविभागाभावात्तदभावे च क्रियार्थत्वाभावान्न प्राप्नोति धातुसंज्ञा । **सत्यम्** । उपाधिभेदेन सत्तापि पूर्वापरीभूता साध्यमानरूपा भवति यथा चैत्रसत्ता मैत्रसत्ता । सापि कचिद्गमनोपहिता कचिद्भोजनोपहितेत्यादि । यथा कस्तूरिकासामानाधिकरण्यात्पाषाणखण्डमपि सुगन्धीभवति, तथा साध्यमानपूर्वापरीभूतपाकादिक्रियासामानाधिकरण्यात्सत्तायामपि साध्यमानत्वं भवति । किं बहुना, (आ)ख्यातपदेनाभिधीयमानः सिद्धभावोऽपि साध्यरूपतां भजतीति आयादिप्रत्ययान्तानामपि क्रियार्थत्वाद्धातुत्वम्—गोपायति कामयते ऋतीयते जुगुप्सते कण्डूयति पापच्यते चोरयति कारयति चिकीर्षति पुत्रकाम्यति पुत्रीयति अश्वति श्येनायते हस्तयति मुण्डयति । एवं जु-स्तंभू-चुलुम्पादीनामपि-जवनः स्तभ्नाति चुलुपाञ्चकार प्रेङ्खोलयति । शिष्टप्रयोगानुसारित्वाल्लक्षणस्याऽऽणपयत्यादिनिवृत्तिः । शिष्टज्ञानाय चेदं लक्षणम्, एतदसंविवादेन च शिष्टा ज्ञायन्ते इति । यद्येवं पाठ एवास्तु किमनेन लक्षणेनेति चेत् । **मैवम्** पाठपठितानामपि क्रियार्थानामेव धातुत्वज्ञापनार्थत्वात्, तेन या-वाप्रभृतीनां सर्वनाम-विकल्पाद्यर्थानां पाठाविसंवादित्वेऽपि लक्षणविसंवादित्वात्, आणपयत्यादीनां तु क्रियार्थत्वेऽपि पाठविसंवादित्वाद्धातुत्वाभावः । **ननु** 'क्रियार्थो धातु' रित्युक्ते शिश्ये इत्यादिषु भावप्रत्ययस्यापि क्रियार्थत्वाद्धातुसंज्ञायाम् 'आत्सन्ध्यक्षरस्य' ( ४।२।१ ) इत्यात्वं स्यात् । आत्वं हि धातोर्विहितमनैमित्तिकं चेति, ततो 'व्याख्यानतो विशेषार्थप्रतिपत्तिः' इति प्रथममन्येनाऽनभिहितां यः क्रियामाह स धातुरिति विवक्षणीयम् । शिश्ये इत्यादिषु तु शीधातुनाभिहितां क्रियां प्रत्यय आहेति न तस्य धातुसंज्ञा । **न** चैवं चिकीर्षतीत्यत्रापि धातुसंज्ञा न प्राप्नोति यतोऽत्रापि सन्प्रत्ययः कृञाभिहितां क्रियामाहेति । अत्र हि करोत्यर्थोपसर्जनामिच्छामन्येनानभिहितां धातुराहेति स्यादेव धातुसंज्ञेति । **अत्रोच्यते**—यथा प्राथम्यविवक्षया शिश्ये इत्यादिषु धातुसंज्ञा निषिध्यते तथा स्वार्थिकायादिप्रत्ययान्तानामपि न स्यात् । गोपायतीत्यादिष्वपि धातुभिरभिहिताया एव क्रियायाः प्रत्ययेनाभिधानात् । तस्मादेवं व्याख्येयम्—क्रियामेव प्राधान्येन योऽभिधत्ते स क्रियार्थो धातुरिति गोपायतीत्यादावपि तदस्तीति सिद्धा धातुसंज्ञा, शिश्ये इत्यादौ तु भूतानद्यतनपरोक्षत्वादेरप्यभिधानान्न धातुसंज्ञेति ॥

अत्रायं विशेषः **'न प्रादिरप्रत्ययः'** ( ३।३।४ ) प्रादिश्चाद्यन्तर्गणः । स धातुः—धातोरवयवो न स्यात्, तं व्युदस्य ततः पर एव धातुसंज्ञः स्यात्, 'अप्रत्ययः' इति न चेत्ततः परः प्रत्ययः स्यात्, प्रत्ययपरस्तु प्रादिर्धातुसंज्ञः स्यादेवेत्यर्थः । यथा अभीत्यभिमुखं मनो यस्य स अभिमनाः, अनभिमनाः अभिमना अभवत् 'च्व्यर्थे भृशादेः स्तोः' ( ३।४।२९ ) इति क्यङागमे सकारलोपे ह्यस्तन्यास्ते 'कर्त्तर्यनद्भ्यः०' ( ३।४।७१ ) इति शवागमे अभीत्यवयवस्य धातुत्वनिषेधात्ततः परं 'अड्धातोः०' ( ४।४।२९ ) इत्यडागमे अभ्यमनायत, एवमभिमनायितुमिच्छति अभिमिमनायिषते इत्यत्र अभीत्यस्य धातुत्वनिषेधात् 'सन्यङश्च' ( ४।१।३ ) इति न द्वित्वं, ततः परमेव द्वित्वम् । अभिमनाय्य गतः प्रासादीयत् प्रासिसादीयिषति प्रासादीय्य गतः । अभिमनायादिः प्रत्ययान्तः सप्रादिसमुदायः क्रियार्थ इति तस्मिन् धातुसंज्ञे प्राप्ते प्रादिस्ततः प्रतिषेधेन बहिष्क्रियते, तत उत्तर एव धातुरिति तस्याङ् द्विर्वचनं च स्यात् । प्रादेश्चोत्तरेण समास इति क्त्वाया यबादेशः । अप्रत्यय इति किम्? औत्सुकायत उत्सुसुकायिषते 'उदुत्सोरुन्मनसि' ( ७।१।१९२ ) इति कप्रत्ययः । अत्र प्रादेरपि धातुत्वात् 'स्वरादेस्तासु' ( ४।४।३१ ) इति वृद्धिर्द्वित्वं च सिद्धम्, उत्सुकायित्वा—अत्र धातुत्वेन नामत्वाभावात्समा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

साभावे त्त्वाया यबादेशाभावः । असङ्क्रामयत शूर इति नायं 'सम्' प्रादिः किन्तु धात्ववयवो यथा विच्छाद्यवयवो 'विः' 'सङ्ग्रामणि युद्धे' इत्यखण्डस्य चुरादौ पाठात् ।

एवं धातोर्लक्षणमुक्त्वा भेदानाह–स च त्रेधेत्यादि ।

**कँर्त्तर्यपीति** । भावकर्मणोस्तु सर्वेऽप्यात्मनेपदिन एव । ङनुबन्धा ह्रस्वेकारानुबन्धास्तु कर्त्तर्यपि कर्त्तृत्वावप्यात्मनेपदिन इत्यपेरर्थः । यथा 'शीङ्क् स्वप्ने' 'एधि वृद्धौ' । दीर्घेकारानुबन्धो गकारानुबन्धश्चोभयपदी यथा 'डुपचींष् पाके' 'णींग् प्रापणे' । उक्तानुबन्धचतुष्टयरहितः शेषः परस्मैपदी यथा 'भू सत्तायाम्' 'पां पाने' इत्यादि । **अत्रोपयोगिन्यो विभक्तयश्चैवम् ।**

वर्त्तमाना १ सप्तमी च २ पञ्चमी ३ ह्यस्तनी तथा ४ ।
अद्यतनी ५ परोक्षा च ६ स्यादाशीः ७ श्वस्तनीति च ८ ॥ १ ॥
भविष्यन्ती ९ तथा क्रियातिपत्तिः १० परिकीर्त्तिता । दशानामप्यथैतासां विषयः प्रतिपाद्यते ॥ २ ॥
'वर्त्तमाने वर्त्तमाना, विध्यादिषु च सप्तमी । प्रैषादिषु पञ्चमी स्यात् कालेऽतीतेऽग्रिमं त्रयम् ॥ ३ ॥
आशिष्याशीः, श्वस्तनी च भविष्यन्ती च भाविनि । क्रियातिपतने क्रियातिपत्तिः परिकीर्त्तिता ॥ ४ ॥
यश्चोपपदसान्निध्यात्तथा चार्थविशेषतः । अयथाकालमप्यासां विधिः सोऽप्यत्र वक्ष्यते ॥ ५ ॥ ॥ १ ॥

परस्मैपदिनः परस्मैपदमात्मनेपदिन आत्मनेपदमुभयपदिन उभयपदमर्हन्ति इति परस्मैपदादीनि लक्षयति नवाद्यानीत्यादि ।

## नवाद्यानि शतृकसू च परस्मैपदम् ॥ २ ॥ [ सि० ३।३।१९ ]

**सर्वासां त्यादिविभक्तीनामाद्यानि नववचनानि शतृक्वसू च प्रत्ययौ परस्मैपदसंज्ञानि स्युः । ( पराणि कानानशौ चात्मनेपदम् ) ( सि० ३।३।२० ) ॥ २ ॥**

परस्मैपदे आत्मनेपदे च प्रत्येकं त्रींस्त्रीनर्थान्विभजते–त्रीणि त्रीणीत्यादि—

## त्रीणि त्रीण्यन्ययुष्मदस्मदि ॥ ३ ॥ [ सि० ३।३।१७ ]

**सर्वासां विभक्तीनां त्रीणि त्रीण्येकद्विबहुवचनान्यन्यदर्थे युष्मदर्थेऽस्मदर्थे च यथाक्रमं स्युः ॥३॥**

कालस्य निश्चयाद्वर्त्तमानैकसमयात्मकत्वेपि व्यवहारादतीतत्वानागतत्ववर्त्तमानत्वं वस्तुपर्यायविषयमेवेत्याह सतीति—

## सति ॥ ४ ॥ [ सि० ५।२।१९ ]

**आरब्धासमाप्तवस्तुविषयः कालः सन् वर्त्तमानस्तदर्थाद्धातोर्वर्त्तमाना स्यात् ॥ ४ ॥**

| वर्त्तमाना — परस्मैपदानि | आत्मनेपदानि । [सि० ३।३।६] |
|---|---|
| तिव् तस् अन्ति । | ते आते अन्ते । |
| सिव् थस् थ । | से आथे ध्वे । |
| मिव् वस् मस । | ए वहे महे । |

आरब्धासमाप्तवस्तुविषयः कालः सन् इति–आरब्धः साध्यत्वेन प्रस्तुतो न च परिसमाप्तः फलस्यानिष्पत्तेः । फलार्थमुपादीयमानायाः क्रियायाः फलेऽधिगते समाप्तिः स्यादिति ईदृशः क्रियाप्रबन्धः सन् वर्त्तमान इत्यर्थः । जीवं न मारयति, मांसं न भक्षयतीत्यादौ नियमः प्रारब्धोऽसमाप्तश्च प्रतीयते, अन्यथा निषेधस्याभावरूपत्वेन प्रारम्भपरिसमाप्ती न घटेते । इहाधीमहे, इह कुमाराः क्रीडन्ति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यादौ क्रियान्तरव्यवधानेऽप्यध्ययनादिक्रियायाः प्रारम्भापरिसमाप्तिरस्त्येव । चैत्रो भुङ्क्ते इत्यादावपि हि क्रियान्तरव्यवधानमवश्यं भवति स हि भुञ्जानोऽवश्यं जल्पति हसति पानीयं वा पिबतीति । तिष्ठन्ति पर्वताः स्यन्दन्ते नद्य इत्यादौ तु स्फुटैव प्रारम्भापरिसमाप्तिः । **तथोक्तम्**—

'प्रवृत्तोपरतश्चैव १ वृत्ताविरत एव च २ । नित्यप्रवृत्तः ३ सामीप्यो ४ वर्त्तमानश्चतुर्विधः' ॥ १ ॥

क्रमेणोदाहरणानि—सम्प्रति जीवघातं न करोति १ इह कुमाराः क्रीडन्ति २ पर्वतास्तिष्ठन्ति ३ कदा मैत्राऽऽगतोऽसि अयमागच्छामि, कदा मैत्र गमिष्यसि एष गच्छामि ४ । कथं तस्थुः स्थास्यन्ति गिरय इति ? भूतभाविभरतकल्किप्रभृतीनां राज्ञां याः क्रियास्तद्विशिष्टत्वेन पर्वतादिक्रियाणामतीतत्वाऽनागतत्वोपपत्तेर्भूतभाविप्रत्ययोत्पत्तिरिति ज्ञेयम् । एवं च विद्यमानकर्तृकेभ्योऽस्त्यर्थेभ्यो धातुभ्यः सर्वा विभक्तयः स्युः । कूपोऽस्ति भविष्यति भविताऽभूत् आसीत् बभूवेति ॥ ४ ॥

वर्त्तमानाऽऽदिविभक्तिचतुष्टयस्य संज्ञान्तरमाह ।

## एताः शितः ॥ ५ ॥ [ सि० ३।३।१० ]

**वर्त्तमानासप्तमीपञ्चमीह्यस्तन्यः शितो ज्ञेयाः । 'भू सत्तायाम्' । भू तिव् इति स्थिते । वकारो वित्कार्यार्थः ॥ ५ ॥**

**'एताः०'** सूत्रं स्पष्टम् । अथ सर्वेषां धातूनां दशस्वपि त्यादिविभक्तिषु क्रमेण रूपाणि निरूपयितुं प्रक्रमते । तत्रापि स्वरव्यञ्जनक्रमेण धातूपदेशप्रतिज्ञानात् पां पाने इत्यादेः प्रथमं निर्देशे प्राप्ते भूवादयो धातव इति वृद्धसमयानुवर्त्तनात् सत्ताभिधायित्वेन माङ्गलिकत्वाच्च प्रथमं भूधातोर्निरूपणम् । एवमदाद्यादिगणेष्वपि वृद्धसमयानुवर्त्तनायैवादादिधातूनां प्राक्प्रतिपादनम् । **'भू सत्तायाम्'** भू इत्यविभक्तिको निर्देशः सान्तरान्तशङ्कानिरासार्थः, एवं सर्वत्र । भू इत्येषा प्रकृतिः सत्तायां वर्त्तते । अभूद्भूत इत्यादौ प्रयोगित्वदर्शनात् ऊकारस्य 'अप्रयोगीत्' ( १।१।३७ ) इति इत्संज्ञा न स्यात्, एवमन्यत्रापि । सतो भावः सत्ता अस्तित्वं द्रव्यधर्मः धात्वर्थसामान्यमिति यावत् । **यदाहुः**—

'सा नित्या सा महानात्मा तामाहुस्त्वतलादयः । प्राप्तक्रमाविशेषेषु सा क्रियेत्यभिधीयते' ॥ १ ॥
'तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते' इति ॥

**ननु** भुवः सत्तावाचित्वे धातुत्वमनुपपन्नं क्रियार्थो हि धातुः क्रिया च स्पन्दरूपा सत्ता तु द्रव्यादिषु सत्सदित्यनुवृत्तप्रत्ययाभिधानलिङ्गा स्पन्दरूपा न भवति । नैष दोषः । यथा जानाति पश्यति स्मरति श्रद्धत्ते संयुज्यते समवैति वियुज्यते नश्यति श्वेतते इत्यादीनां ज्ञानदर्शनस्मरणश्रद्धानसंयोगसमवायवियोगविनाशवर्णादयो द्रव्यगुणा अपरिस्पन्दात्मका अपि आख्यातप्रकृतिवाच्याः सन्तः क्रियाव्यपदेशमर्हन्ति, एवं सत्तापि द्रव्यधर्मो धातुवाच्यतामापद्यमाना क्रियाव्यपदेशं लभते । मणिमुकुरकृपाणादिज्ञापकवैचित्र्याच्चैकरूपस्यापि मुखादेर्नानात्वोपलब्धेर्धातुवाच्यैव सत्ता क्रियात्वमास्कन्दति न प्रातिपदिकवाच्येति नाव्यवस्था । अत एव वृक्ष इत्यादिप्रातिपदिकवाच्यायाः सत्ताया न क्रियात्वम् । एवं च क्रियावाचित्वमात्रमाख्यातुं सत्तोपात्ता । अर्थान्तराण्यप्यनयोपलक्ष्यन्ते । **यदाहुः**—

'निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः । अनेकार्थाः स्मृतास्सर्वे पाठस्तेषां निदर्शनम्' ॥ १ ॥ इति ।

तथा च भूरयं क्वचिदस्त्यर्थे यथा बहूनि धान्यान्यस्य भवन्ति—सन्तीत्यर्थः । क्वाप्यभूतप्रादुर्भावे यथा यवाक्षीरभोजिन्याः श्रुतधरः पुत्रो भवति—जायते इत्यर्थः । क्वचिदभूततद्भावाख्ये सम्पद्यर्थे यथा अशुक्लः शुक्लो भवति—सम्पद्यते इत्यर्थः । उपसर्गवशाच्च धातोरनेकार्थः प्रकाशते—यथा प्रभवतीति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वाम्यर्थः प्रथमत उपलम्भश्च, पराभवति परिभवत्यभिभवतीति च तिरस्कारः, सम्भवतीति जन्मार्थः प्रमाणानतिरेकेण धारणं च, अनुभवतीति संवेदनम्, विभवतीति व्याप्तिः, आभवतीति भागागतिः, उद्भवतीत्युद्भेदः, प्रतिभवतीति लम्पकत्वमिति । अथवाऽर्थान्तरेष्वपि क्रियासामान्यरूपा सत्तानु(तु ?)-वर्त्तत एवेति सत्ताया एवोपादानं कृतम्, सत्ताव्यतिरेकीण्यर्थान्तराणि खरविषाणायमानानि स्युः । 'षड् भावविकाराः' इति वचनाच्च भावः सत्ता सामान्यरूपा क्रियेत्यवसीयते । **'यदाहुः'** जायते अस्ति विपरिणमते वर्द्धते अपक्षीयते विनश्यतीति षड् भावविकारा इति । अपि च–सर्वेऽपि खलु धातवस्तेन तेनोपाधिना सत्तामेवावच्छिद्य विषयीकुर्वन्तीति क्रियासामान्यमित्युच्यते, तथा च क्रियार्थो धातुरिति भुवो धातुत्वं सिद्धम् । आत्मनेपदोभयपदानुबन्धाभावाच्च 'शेषात्कर्त्तरि' ( ३।३।१०० ) परस्मैपदम् ॥ ५ ॥ अपवादाभावाच्चौत्सर्गिकः शव् भवतीत्याह—

## कर्त्तर्यनद्भ्यः शव् ॥ ६ ॥ [ सि० ३।४।७१ ]

**अदादिवर्जाद्धातोः कर्त्तरि विहिते शिति शव् प्रत्ययः स्यात् । शकारवकारावितौ ॥ ६ ॥**

**'कर्त्त०'** । सूत्रं वृत्तिश्च निगदगम्या ॥ ६ ॥

## नामिनो गुणोऽक्ङिति ॥ ७ ॥ [ सि० ४।३।१ ]

**कित् ङित् वर्जे प्रत्यये परे नाम्यन्तस्य धातोर्गुणः स्यात् । अवादेशे–स धार्मिको भवति । तौ भवतः । 'लुगस्यादेत्यपदे' इत्यकारलोपे ते भवन्ति । त्वं भवसि । युवां भवथः । यूयं भवथ ॥ ७ ॥**

**'नामि०'** । तौ भवत इति । अत्र सूत्रम्–**'शिदवित्'** ( ४।३।२० ) विद्वर्जः शित्प्रत्ययो ङिद्वत्स्यात् । इति तत्प्रत्ययस्य ङित्त्वेऽपि शव्प्रत्ययनिमित्तो गुणः स्यादिति । बहुवचने भव अन्ति इति स्थिते सूत्रम्–'लुगस्यादेत्यपदे' ( २।१।११३ ) अपदादावकारे एकारे च परे अकारस्य लुक् स्यात् । अपदादाविति किम् ? दण्डाग्रम् ॥ ७ ॥ अस्मदर्थैकवचने भव मि इति स्थिते ।

## मव्यस्याः ॥ ८ ॥ [ सि० ४।२।११३ ]

**धातोर्विहिते मादौ वादौ च प्रत्यये परे अत आः स्यात् । अहं भवामि । आवां भवावः । वयं भवामः ॥ ८ ॥**

**अन्यदर्थादिद्वयत्रययोगे पराश्रयमेव वचनम् । स च त्वं च भवथः । स च त्वं चाहं च भवामः ।**

**'मव्य०'** सूत्रं स्पष्टम् ॥ ८ ॥ अन्यदर्थादिद्वयत्रययोगे इत्यादि 'त्रीणि त्रीण्यन्ययुष्मदस्मदि' ( ३।३।१७ ) इति सूत्रोक्तशब्दस्पर्द्धात् पराश्रयमेव वचनमतिदिश्यते । स च त्वं च भवथः । एवं स चाहं च भवावः । कथमत्वं त्वं संपद्यते अनहमहं संपद्यते त्वद्भवति मद्भवति । अयमर्थः प्रकृतिविकृत्योरभेदविवक्षायां च्विस्तत्र किं प्रकृत्याश्रयेण प्रथमत्रिकेण भाव्यमुत विकृत्याश्रयेण द्वितीयत्रिकेणेति । तत्र च प्रकृतेरेव संपत्तौ कर्तृत्वात्प्रथमत्रिकेणैव भाव्यमित्याह–त्वद्भवति मद्भवतीति । अत्र अत्वशब्दस्य भवनक्रियान्वयिनो मुख्यत्वं ततो युष्मदस्मदोर्गौणत्वाद्द्वितीयतृतीयत्रिके न स्यातां त्वमादेशौ तु शब्दमात्राश्रयाद्भवत एव, नहि त्वमादेशविधावर्थचिन्ता कृतेति । एहि मन्ये रथेन यास्यसि नहि यास्यसि यातस्ते पितेति प्रहासे यथाप्राप्तमेव प्रतिपत्तिर्नात्र प्रसिद्धार्थविपर्यासे किञ्चिन्निबन्धनम् । रथेन यास्य-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सीति भावगमनाभिधानात् प्रहासो गम्यते नहि यास्यसीति बहिर्गमनं प्रतिषिध्यते । अनेकस्मिन्नपि च प्रहसितरि प्रत्येकमेव परिहास इत्यभिधानवशान्मन्ये इत्येकवचनमेव । लौकिकश्च प्रयोगोऽनुगन्तव्य इति न प्रकारान्तरकल्पना न्याय्या । **पाणिनीयास्तु** 'प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च' (पा० १।४।१०६ ) मन्यधातुरुपपदं यस्य धातोस्तस्मिन्प्रकृतिभूते सति मध्यमः स्यात्, परिहासे गम्यमाने मन्यतेस्तूत्तमः स्यात्, स चैकार्थवाचकः स्यात्, इत्याहुः । प्रतित्रिकं वचनव्यवस्थां चैवमाहुः–एकद्वि-बहुषु अन्यादिषु यानि यानि त्रीणि त्रीणि वचनान्युक्तानि तान्येकद्विबहुष्वर्थेषु परिभाष्यन्ते । एकस्मिन्नर्थे एकवचनं द्वयोरर्थयोर्द्विवचनं बहुष्वर्थेषु बहुवचनमिति । **इति वर्त्तमानाविभक्तिः ।**

अथ **सप्तमीं** विवक्षुः प्रथमं तस्या अर्थानाह ।

## विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थने ॥ ९ ॥ [ सि० ५।४।२८ ]

विधिः क्रियायां प्रेरणा । विध्यादिषु सप्तमी स्यात् । सँम्भावनादिष्वपि सप्तमी ।

**सप्तमी** **[सि० ३।३।७]**

| परस्मैपदिनः । | आत्मनेपदिनः । |
|---|---|
| यात् याताम् युस् । | ईत ईयाताम् ईरन् । |
| यास् यातम् यात । | ईथास् ईयाथाम् ईध्वम् । |
| याम् याव याम । | ईय ईवहि ईमहि । ॥ ९ ॥ |

**विधिः०** विध्यादिष्विति–विध्यादिविशिष्टेषु कर्तृकर्मभावेषु प्रत्ययार्थेषु धातोः सप्तमीपञ्चम्यौ भवतः । सर्वप्रत्ययापवादौ । विधिरप्राप्ते नियोगः क्रियायां प्रेरणेति यावत्, अज्ञातज्ञापनमित्येके । यथा कटं कुर्यात् करोतु भवान्, प्राणिनो न हिंस्यात् न हिनस्तु भवान् ॥ प्रेरणायामेव यस्यां प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणम्, इच्छामन्तरेणापि नियोगतः कर्त्तव्यमिति यावत् । द्विसन्ध्यमावश्यकं कुर्यात् करोतु भवान्, सामायिकमधीयीत अधीतां भवान् ॥ यत्र प्रेरणायामेव कामचारस्तदामन्त्रणम् । इहासीत आस्तां भवान् यदि रोचते ॥ प्रेरणैव सत्कारपूर्विकाधीष्टम्, अध्येषणम्, तत्त्वज्ञानं नः प्रसीदेयुः प्रसीदन्तु गुरुपादाः–अत्र तत्त्वज्ञानं कर्म्मतापन्नं नोऽस्मभ्यं प्रसादपूर्वकं दद्युरित्यर्थः । व्रतं रक्षेत् रक्षतु भवान् ॥ सँम्प्रश्नः सम्प्रधारणा । किं नु खलु भो व्याकरणमधीयीय अध्ययै उत तर्कमधीयीय अध्ययै । प्रार्थनं याच्ञा । प्रार्थना मे व्याकरणमधीयीय अध्ययै तर्कमधीयीय अध्ययै । **सँम्भावनादिष्वपि** इत्यत्रापिशब्दसूचिताः सप्तम्या अर्थविशेषा एव ज्ञेयाः **'सप्तम्युताप्योर्बाढे'** ( ५।४।२१ ) बाढेऽर्थे वर्त्तमानयोरुताप्योरुपपदयोर्धातोः सप्तमी भवति । सर्वविभक्त्यपवादः । उत कुर्यात् अपि कुर्यात् । बाढं करिष्यतीत्यर्थः । बाढ इति किम् ? उत दण्डः पतिष्यति ? अपिधास्यति द्वारम् । प्रश्नः पिधानं च यथाक्रमं गम्यते । **'सम्भावनेऽलमर्थे तदर्थानुक्तौ'** ( ५।४।२२ ) अलमोऽर्थः सामर्थ्यम्, तद्विषये सम्भावने श्रद्धाने गम्यमाने तदर्थस्यालमर्थार्थस्य शब्दस्यानुक्तावप्रयोगे धातोः सप्तमी भवति । सर्वविभक्त्यपवादः । शक्यसम्भावने–अपि मासमुपवसेत् । अशक्यसम्भावने अपि शिरसा पर्वतं भिन्द्यात् । अपि समुद्रं दोर्भ्यां तरेत् । अलमर्थ इति किम् ? निदेशस्थायी मे जिनदत्तः प्रायेण गमिष्यति । तदर्थानुक्ताविति किम् ? वसति चेत् सुराष्ट्रेषु वन्दिष्यतेऽलमुज्जयन्तम् । शक्तश्चैत्रो धर्मं करिष्यति । अत्र सप्तमीनिमित्तमस्तीति भूते भविष्यति च क्रियातिपतने ( नित्यं ) क्रियातिपत्तिर्भवति । अपि पर्वतं शिरसा अभेत्स्यत् । तथा काकिन्या हेतोरपि मातुः स्तनं छिन्द्यादित्यत्र 'क्षेपेऽपिजात्वो-

१ एवमन्या अपि विभक्तयो द्रष्टव्याः । सन्निहितत्वाच्च भविष्यन्त्येव दर्शिता ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वर्त्तमाना' ( ५।४।१२ ) इति वर्त्तमानां बाधित्वा चित्रमाश्चर्यमपि शिरसा पर्वतं भिन्द्यादित्यत्र तु 'शेषे भविष्यन्त्ययदौ' ( ५।४।२० ) इति भविष्यन्तीं च बाधित्वा परत्वादनेन सप्तम्येव भवति ॥

**'अयदि श्रद्धाधातौ नवा'** ( ५।४।२३ ) श्रद्धा सम्भावना तदर्थे धातावुपपदे अलमर्थविषये सम्भावने गम्ये धातोः सप्तमी वा स्यात्, यच्छब्दश्चेन्न प्रयुज्यते, क्रियाविशेषणत्वेनेति शेषः, हेत्वर्थे तु भवत्येव । पूर्वेण नित्यं प्राप्ते विकल्पः । श्रद्धे सम्भावयामि अवकल्पयामि भुञ्जीत भवान्, पक्षे यथाप्राप्तम्–भोक्ष्यते अभुक्त अभुङ्क्त भवान् । अयदीति किम् ? सम्भावयामि यद्भुञ्जीत भवान् । श्रद्धाधाताविति किम् ? अपि शिरसा पर्वतं भिन्द्यात् । 'सम्भावनेऽलमर्थे' इति नित्यं सप्तमी अत्रापि सप्तमीनिमित्तमस्तीति भूते भविष्यति च क्रियातिपतने क्रियातिपत्तिः । सम्भावयामि नाभोक्ष्यत भवान् ॥

**'सतीच्छार्थात्'** ( ५।४।२४ ) वर्त्तमानेऽर्थे वर्त्तमानादिच्छार्थाद्धातोः सप्तमी वा स्यात् । इच्छेत् इच्छति उश्यात् वष्टि कामयेत कामयते वाञ्छेत वाञ्छति । 'क्षेपेऽपिजात्वोवर्त्तमाना' इत्यादावपि परत्वादयमेव विकल्पः । अपि संयतः सन्नकल्प्यं सेवितुमिच्छेत् अपि संयतः सन्नकल्प्यं सेवितुमिच्छति, धिग्गर्हामहे । भूतभविष्यतोरभावात्सत्यपि सप्तमीनिमित्ते सत्यपि क्रियातिपतने क्रियातिपत्तिर्न स्यात् । **'वत्स्र्यति हेतुफले'** ( ५।४।२५ ) हेतुः कारणम्, फलं कार्यम् । हेतुभूते फलभूते वर्त्स्यत्यर्थे वर्त्तमानाद्धातोः सप्तमी वा स्यात् । यदि गुरूनुपासीत शास्त्रान्तं गच्छेत् । यदि गुरूनुपासिष्यते शास्त्रान्तं गमिष्यति । अत्र गुरूपासनं हेतुः शास्त्रान्तगमनं फलम् । वत्स्र्यतीति किम् ? दक्षिणेन चेद्याति न शकटं पर्याभवति । **केचित्तु** सर्वेषु कालेषु सर्वविभक्त्यपवादं सप्तमीं वा मन्यन्ते दक्षिणेन चेद्यायान्न शकटं पर्याभवेत्, पक्षे यास्यति न पर्याभविष्यति, चेद्याति न पर्याभवति, चेदयासीन्न पर्याभूत् । अत्रापि सप्तमीनिमित्तसत्त्वात् भविष्यति क्रियातिपतने क्रियातिपत्तिः । दक्षिणेन चेदयास्यन्न शकटं पर्याभविष्यत् । कथम् ? 'अमङ्गयद्वसुधा तोये च्युतशैलेन्द्रबन्धना । नारायण इव श्रीमान् यदि त्वं नाधरिष्यथाः' ॥ १ ॥ इति । वर्त्स्यत्येवायं प्रयोगः । **केचित्तु** भूते हेतुफले सप्तमीमिच्छन्ति हनिष्यतीति पलायिष्यते वर्षिष्यतीति धाविष्यतीत्यत्र हेतुफलभावस्येतिशब्देनैव द्योतितत्वात्सप्तमी न स्यात् । सप्तम्या हि हेतुफलभाव एव द्योत्यते स त्वितिनैव द्योतित इति । **'कामोक्तावकच्चिति'** ( ५।४।२६ ) । वेति नास्ति–कामोक्तौ विभक्त्यन्तरप्रयोगादर्शनात् । काम इच्छा तस्या उक्तिः प्रवेदनं तस्यां गम्यायां धातोः सप्तमी स्यात् । न चेत्कच्चिच्छब्दः प्रयुज्यते । सर्वविभक्त्यपवादः । कामो मे भुञ्जीत भवान् । इच्छा मेऽभिप्रायो मे श्रद्धा मेऽभिलाषो मे अधीयीत भवान् । अकच्चितीति किम् ? कच्चिज्जीवति मे माता । अत्र सप्तमीनिमित्तसत्त्वात् भूते भविष्यति च क्रियातिपतने क्रियातिपत्तिः । कामो मेऽभोक्ष्यत भवान् । **'इच्छार्थे सप्तमीपञ्चम्यौ'** ( ५।४।२७ ) इच्छार्थे धातावुपपदे कामोक्तौ गम्यमानायां धातोः सप्तमीपञ्चम्यौ स्याताम् । सर्वविभक्त्यपवादौ । इच्छामि भुञ्जीत भवान् इच्छामि भुङ्क्तां भवान् । कामये प्रार्थये अभिलषामि वश्मि अधीयीत अधीतां भवान् । कामोक्तावित्येव इच्छया इच्छतः कामयमानः कामयमानस्य भुङ्क्ते, नात्र प्रयोक्तुः कामोक्तिः, अत्र सत्यपि सप्तमीनिमित्ते इच्छार्थे उपपदे कामोक्तौ क्रियातिपतनस्यासामर्थ्यात्क्रियातिपत्तिर्न स्यात्, कामप्रवेदनक्रियातिपतनयोर्विरुद्धत्वात् । **केचित्तु** 'सप्तम्युताप्योर्बाढे' ( ५।४।२१ ) इत्यत आरभ्य यत्र केवलायाः सप्तम्या एव निमित्तमस्ति नान्यविभक्तिसहितायास्तत्रैव क्रियातिपतने क्रियातिपत्तिर्भवतीति मन्यन्ते । **'इच्छार्थे कर्मणः सप्तमी'** ( ५।४।८९ ) इच्छार्थे धातावुपपदे तुल्यकर्तृकेऽर्थे वर्त्तमानात्कर्मभूताद्धातोः सम्बन्धे

---

१ बहुलाधिकाराद्धेतुहेतुमद्भावे शत्रानशौ न भवतः । २ नित्यम् । ३ उप समीपे पदमितिकृत्वा इच्छार्थेऽग्रेऽपि स्थिते भवति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सप्तमी स्यात्। कर्मत्वं तुल्यकर्तृकत्वं च धातोः श्रुतत्वादुपपदापेक्षम्। भुञ्जीयेतीच्छति एवं वाञ्छति कामयते—अहं भुञ्जे इति चैत्र इच्छतीत्यर्थः। इच्छार्थ इति किम्? भोजको व्रजति अत्र कर्मतापि नास्तीति व्यावृत्तेर्व्यङ्गवैकल्यमिति न वाच्यम्। यतो व्रजतीति गत्यर्थस्य प्राप्त्यर्थत्वात् व्रजतीति बुद्ध्या प्राप्नोतीति। किं तत्कर्मतापन्नम्, भाविभोजनम्। भोजक इत्यत्र भविष्यदर्थे णकः। कर्मण इति किम्? इच्छन् करोति अत्र करोतीच्छत्योर्लक्ष्यलक्षणभावो न तु कर्मक्रियाभावः। तुल्यकर्तृक इत्येव—इच्छामि भुङ्क्तां भवान्, पूर्वसूत्रेण पञ्चमी॥ **'सप्तमी यदि'** (५।४।३४) यच्छब्दप्रयोगे सति कालवेला-समयेषु उपपदेषु धातोः सप्तमी स्यात्, तुमोऽपवादः। कालो यदधीयीत भवान्। वेला यद्भुञ्जीत भवान्। समयो यच्छयीत भवान्। बहुलाधिकारात्कालो यदध्ययनस्य, वेला यद्भोजनस्य, समयो यच्छयनस्येत्याद्यपि भवति। यच्छब्दप्रयोगेऽनेन सप्तमी विहितेत्यनट् न प्राप्नोति, बाहुलकात्तु सोऽपि भवतीत्यर्थः॥ **'शक्तार्हे कृत्याश्च'** (५।४।३५) शक्ते अर्हे च कर्त्तरि वाच्ये गम्यमाने वा, धातोः कृत्याः सप्तमी च स्युः। भवता खलु भारो वाह्यः वोढव्यः वहनीयः उह्येत। भवान् भारं वहेत् भवान् हि शक्तः। अर्हे, भवता (खलु) कन्या वाह्या वोढव्या वहनीया। भवान् खलु कन्यां वहेत्—अत्रार्हे कर्त्तरि वाच्ये व्यक्तिव्याख्यानादनेन सप्तमी, अन्यथार्हे कर्त्तरि 'अर्हे तृच्' (५।४।३७) इति परत्वात्तृजेव स्यात्, भावकर्मणोरस्य चरितार्थत्वात्। भवता खलु च्छेदसूत्रं वाह्यं वोढव्यं वहनीयम्। भवान् खलु च्छेदसूत्रं वहेत्—भवान् एतदर्हतीति। सप्तम्या बाधो मा भूदिति कृत्यग्रहणम्। बहुवचनमिहोत्तरत्र च यथासङ्ख्यनिवृत्त्यर्थम्[1]॥ ९॥ सप्तमीं निर्दिशति **यः स०—**

## यः सप्तम्याः॥ १०॥ [ सि० ४।२।१२२ ]

आत्परस्य सप्तम्या याशब्दस्य इः स्यात्। शिष्यो गुरुसेवी भवेत्। भवेदसौ भव्यः श्राद्धत्वात्। भवेताम्॥ १०॥

आत्परयोः **'याम्युसोरियमियुसौ'** (सि० ४।२।१२३)। भवेयुः। भवेः भवेतम् भवेत। भवेयम् भवेव भवेम।

आत्परयोरिति वृत्त्यवयवः सापेक्षत्वात्प्रागुपन्यस्तस्ततः सूत्रं **'याम्०'** स्पष्टम्॥ १०॥

अथ पञ्चमीं विवक्षुः पञ्चम्या अर्थानाह—

## प्रैषाऽनुज्ञावसरे कृत्यपञ्चम्यौ॥ ११॥ [ सि० ५।४।२९ ]

**न्यक्कारपूर्विका प्रेरणा प्रैषः। प्रैषादिषु कृत्याः पञ्चमी च स्युः (*विध्यादिषु [1]आशिषि च पञ्चमी वक्तव्या)**

'प्रैषा०'। प्रैषादिष्विति। न्यक्कारपूर्विका प्रेरणा प्रैषः। अनुज्ञा कामचारानुमतिः अतिसर्ग इति यावत्। अवसरः प्राप्तकालता निमित्तकालोपनतिः। भवता खलु कटः कार्यः कर्त्तव्यः करणीयः कृत्यः। भवान् कटं करोतु। भवान् हि प्रेषितोऽनुज्ञातो(भवतो)ऽवसरः कटकरणे। यद्यपि कृत्याः सामान्येन भावकर्म्मणोर्विहितास्तथापि सर्वप्रत्ययापवादभूतया पञ्चम्या बाध्येरन्निति पुनर्विधीयन्ते। अनुज्ञायां केचित्सप्तमीमप्याहुः अतिसृष्टो भवान् ग्रामं गच्छेत्॥ ११॥ २१

---

१ ननु समुच्चीयमानेन सह यथासङ्ख्यस्य 'राष्ट्रक्षत्रिय०' (६।१।११४) इत्यत्रापत्यग्रहणेन निरस्तत्वाद् व्यर्थं बहुवचनम्। सत्यम्। ज्ञापकज्ञापिता विधयो ह्यनित्या इति न्यायज्ञापनार्थम्।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

आदिशब्दसन्निधानात् '**सप्तमी चौर्द्धमौहूर्त्तिके**' (५।३।१२) ऊर्द्धं मुहूर्त्तादुपरि मुहूर्त्तस्य भवोऽर्थ और्द्धमौहूर्त्तिकस्तस्मिन्वर्त्तमानाद्धातोः प्रैषादिषु गम्यमानेषु सप्तमी कृत्याः पञ्चमी च स्युः । ऊर्द्धं मुहूर्त्तात्कटं कुर्याद्भवान् कार्यः कर्त्तव्यः करणीयः कृत्यः कटो भवता । कटं करोतु भवान् । भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे । '**स्मे पञ्चमी**' (५।४।३१) स्मशब्दे उपपदे प्रैषादिषु गम्यमानेषु और्द्धमौहूर्त्तिकेऽर्थे वर्त्तमानाद्धात्तोः पञ्चमी स्यात् । कृत्यानां सप्तम्याश्चापवादः । ऊर्द्धं मुहूर्त्ताद्भवान् कटं करोतुस्म । भवान् प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरण इति । '**अधीष्टौ**' (५।४।३२) और्द्धमौहूर्त्तिक इति निवृत्तम्, पृथग्योगात् । स्मे उपपदे अध्येषणायां गम्यायां धातोः पञ्चमी स्यात्, सप्तम्यपवादः । अङ्ग स्म विद्वन्नणुव्रतानि रक्ष शिक्षाः प्रतिपद्यस्व । *विध्यादिष्विति 'विधिनिमन्त्रणामन्त्रण०' (५।४।२८) इत्यादिसूत्रेऽपि पञ्चम्या विहितत्वात् । †आशिषि चेति 'आशिष्याशीःपञ्चम्यौ' (५।४।३८) इति वक्ष्यमाणसूत्रे निर्देक्ष्यमाणत्वात् ॥ ११ ॥ पञ्चमीं निर्दिशति—

| | परस्मैपदिनः । | आत्मनेपदिनः । | |
|---|---|---|---|
| पञ्चमी | तुव ताम् अन्तु । | ताम् आताम् अन्ताम् । | [सि० ३।३।८] |
| | हि तम् त । | स्व आथाम् ध्वम् । | |
| | आनिव् आवव् आमव् । | ऐव आवहैव् आमहैव् । | |

अध्ययनोद्यतो भवतु चैत्रः । भवताम् । भवन्तु ॥ ११ ॥

'**आशिषि तुह्योस्तातङ्**' (४।२।११९) । वा । आयुष्मान् भवतु भवतात् भवान् ।

## अतः प्रत्ययाल्लुक् ॥ १२ ॥ [ सि० ४।२।८५ ]

धातोः परो योऽदन्तः प्रत्ययस्ततः परस्य हेर्लुक् स्यात् । भव भवतात् भवतम् भवत । आशिषि–श्रेयस्वी भवतात्सौम्य । भवानि भवाव भवाम ॥ १२ ॥

'**आशिषि०**' '**अत०**' सूत्रद्वयं स्पष्टम् ॥ १२ ॥ अथ ह्यस्तनीं विवक्षुस्तस्या अर्थानाह ।

## अनद्यतने ह्यस्तनी ॥ १३ ॥ [ सि० ५।२।७ ]

आन्याय्यादुत्थानादान्याय्याच्च संवेशनादहरुभयतः सार्धरात्रं वाद्यतनः कालस्ततोऽन्योऽनद्यतनस्तस्मिन् भूतार्थाद्धातोर्ह्यस्तनी स्यात् । *ख्याते दृश्ये (५।२।८) लोकविज्ञाते प्रयोक्तुः शक्यदर्शने परोक्षेऽपि भूतानद्यतने ह्यस्तनी स्यात् ।

दिस्योरिकार उच्चारणार्थः ॥ १३ ॥

'**अन०**' न्याय्यादिति न्यायादनपेतं न्याय्यं 'न्यायार्थादनपेते' (७।१।१३) इति यः । संवेशनादिति शयनात् 'संवेशस्वापसंलयाः' (अभिधानचिन्तामणिद्वितीयकाण्डे २२७ तमवृत्ते) इति वचनात् उभयतोऽर्द्धरात्रसहितमहो वाऽद्यतनः कालः । गताया रात्रेः पश्चार्द्धादारभ्यागामिन्या रात्रेः पूर्वार्द्धं यावदित्यर्थः । अत्र विशेषमाह । *'**ख्याते०**' परोक्षापवादोऽयम् । अत्रोदाहरणानि–अरुणत्सिद्धराजोऽवन्तीन्, अजयत्सिद्धः सौराष्ट्रकान् । ख्यात इति किम्? चकार कटं चैत्रः । दृश्य इति किम्? जघान कंसं किल वासुदेवः । अनद्यतन इत्येव उदगादद्यादित्यः ॥ १३ ॥ †ह्यस्तनीमाह । ह्यस्तनीत्यादि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

— ह्यस्तनी — [सि० ३।३।१०]

| | |
|---|---|
| परस्मैपदिनः । | आत्मनेपदिनः । |
| दिव् ताम् अन् । | त आताम् अन्त । |
| सिव् तम् त । | थास् आथाम् ध्वम् । |
| अम्व् व म । | इ वहि महि । |

## अड्धातोरादिर्ह्यस्तन्यां चामाङा ॥ १४ ॥ [ सि० ४।४।२९ ]

ह्यस्तन्यामद्यतनीक्रियातिपत्त्योश्च विषये धातोरादिरट् स्यात्, नतु माङ्योगे । अभवद् द्यो जिनार्चा । 'विरामे वा' ( १।३।५१ ) अभवत् अभवताम् अभवन् । अभवः अभवतम् अभवत । अभवम् अभवाव अभवाम ॥ १४ ॥

'अड्धा०' सूत्रं स्पष्टम् ॥ १४ ॥ अथात्र विशेषमाह

## अविवक्षिते ॥ १५ ॥ [ सि० ५।२।१४ ]

परोक्षत्वेनाविवक्षिते परोक्षे भूतानद्यतने ह्यस्तनी स्यात् । अभवद्वीरः ॥ १५ ॥

'अवि०' एवं परोक्षानद्यतने विवक्षावशादद्यतनी ह्यस्तनी परोक्षास्तिस्रोपि विभक्तयः स्युः । अभवद्वीर इति, एवमभूद् बभूव वीर इत्यपि स्यात् । परोक्षत्वानद्यतनत्वाविवक्षायामद्यतनी, परोक्षत्वाविवक्षायां ह्यस्तनी, उभयसद्भावविवक्षायां परोक्षेति ॥ १५ ॥ अथोपपदविशेषात् भूतानद्यतनकाले विभक्त्यन्तरमाह ।

## स्मे च वर्त्तमाना ॥ १६ ॥ [ सि० ५।२।१६ ]

भूतानद्यतने वर्त्तमानाद्धातोः स्मे पुरादौ चोपपदे वर्त्तमाना स्यात् । शिष्यास्तव भवन्तिस्म । पुरा भवति ते पदम् । अभवदित्यर्थः ॥ १६ ॥

'स्मे च०' स्मशब्दोऽतीतकालद्योतकश्चादिरव्ययः । पुरादयश्च-पुरा तदा अथ यावद्—हशश्वदादयः प्रयोगगम्याः । प्रयोगाश्चैवम्—इति स्मोपाध्यायः कथयति, वसन्तीह पुरा च्छात्राः, भाषते राघवस्तदा, अथाह वर्णी विदितो महेश्वरः, क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति । एवं 'वाद्यतनी पुरादौ' ( ५।२।१५ ) इति सूत्रेण पुरादियोगेऽद्यतनी–ह्यस्तनी–परोक्षा–वर्त्तमानाश्चतस्रो विभक्तयो भवन्ति, स्मसहिते तु पुरादौ परत्वाद्वर्त्तमानैव । नटेन स्म पुराधीयते । एवं ह–शश्वद्योगेऽपि–इति हस्मोपाध्यायः कथयति । हशब्दोऽत्र स्मृत्यर्थे, इतिह इत्यव्ययसमुदायो वा सम्प्रदाये, 'इतिहः स्यात्सम्प्रदाये' इत्यभिधानचिन्तामणौ । शश्वदधीतेस्म वटुः । शेषं सुगमम् ॥ १६ ॥ अथाद्यतन्या अर्थमाह—

## अद्यतनी ॥ १७ ॥ [ सि० ५।२।४ ]

अद्यतनकाले भूतार्थाद्धातोरद्यतनी स्यात् ॥ १७ ॥

'अद्य०' ॥ १७ ॥ अत्र विशेषमाह ।

## विशेषाऽविवक्षाव्यामिश्रे ॥ १८ ॥ [ सि० ५।२।५ ]

अद्यतनादिविशेषाऽविवक्षायां व्यामिश्रणे च सति भूतार्थाद्धातोरद्यतनी स्यात् ।

'विशे०' अद्यतनादिविशेषाविवक्षायामिति यथा अगमाम घोषान् । अपाम पयः । अजैषीज(द्र ?)त्तो हूणान् । रामो वनमगमत् ॥ सतोप्यत्र विशेषस्याविवक्षा यथानुदरा कन्या, अलोमिका एडकेति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

व्यामिश्रे–अद्य ह्यो वा भुञ्ज्महि । विशेषाविवक्षेति किम् ? अगच्छाम घोषान्, अपिबाम पयः, अजयज्ज(द्र ?)त्तौ हूणान्, रामो वनं जगाम । ह्यस्तन्यादिविषयेऽप्यद्यतन्यर्थं वचनम् । आदिशब्दसंसर्गात् **'रात्रौ वसोऽन्त्ययामास्वप्तर्यद्य'** ( ५।२।६ ) रात्रौ भूतेऽर्थे वर्त्तमानाद्वसतेर्धातोर्ह्यस्तन्यपवादोऽद्यतनी स्यात् । अन्त्ययामास्वप्तरि स चेदर्थो यस्यां रात्रौ भूतस्तस्या एवान्त्ययामं व्याप्यास्वप्तरि कर्त्तरि वर्त्तते । अद्य तेनैवान्त्ययामेनावच्छिन्ने अद्यतने चेत्प्रयोगो भवति, नाद्यतनान्तरे । न्याय्ये प्रत्युत्थाने प्रत्युत्थितं कश्चित्कश्चिदाह क भवानुषितः स आह अमुत्रावात्समिति । रात्र्यन्त्ययामे तु मुहूर्त्तमपि स्वापे ह्यस्तन्येव अमुत्रावसमिति । **उपाध्यायस्त्वाह**–रात्रेश्चतुर्थे यामे यदा वाक्यं प्रयुङ्क्ते तदामुत्रावात्समिति, तस्यातिक्रान्तप्रहरत्रयमनद्यतनमिति ह्यस्तनीप्रसङ्गे यदा प्रयोक्ता सकलमतिक्रम्य रात्रिप्रहरत्रयं जागरितवान् तदाद्यतनी, यदा सुप्त्वा प्रयुङ्क्ते तदा ह्यस्तन्येव । यत्सूत्रं **'वसेर्लुङ्'** रात्रिशेषे जागरणसन्तताविति तन्मतसङ्ग्रहार्थमिदं सूत्रमेवं व्याख्येयम् रात्रावस्वप्तर्यद्येति कोऽर्थः अन्त्ययामे प्रयोगे क्रियमाणे अन्त्ययामेति लुप्तसप्तम्येकवचनान्तं पदम् ॥ १८ ॥

अद्यतनीमाह ।

| | | | |
|---|---|---|---|
| अद्यतनी | परस्मैपदिनः । | आत्मनेपदिनः । | [सि० ३।३।११] |
| | दि ताम् अन् । | त आताम् अन्त । | |
| | सि तम् त । | थास् आथाम् ध्वम् । | |
| | अम् व म । | इ वहि महि ॥ १८ ॥ | |

## सिजद्यतन्याम् ॥ १९ ॥ [ सि० ३।४।५३ ]

**अद्यतन्यां परस्यां धातोः परः सिच् स्यात् । इकार उच्चारणार्थः । चकारो विशेषणार्थः ॥१९॥**

**'सिज०'** सूत्रं स्पष्टम् ॥ १९ ॥

## पिबैतिदाभूस्थः सिचो लुप् परस्मै न चेट् ॥ २० ॥ [ सि० ४।३।६६ ]

**देति दासंज्ञाधातवः । एभ्यः परस्य सिचः परस्मैपदे लुप् स्यात्, लुब्योगे न चेट् ॥ २० ॥**

**'पिबै०'** दासंज्ञाधातव इति दा धा इत्येवंरूपौ धातू अवानुबन्धौ दासंज्ञौ भवतः । तत्र दारूपाश्चत्वारः 'दाम् दाने' 'देङ् पालने' 'डुदांगक् दाने' 'दोंच् छेदने' । धारूपौ द्वौ 'ट्धें पाने' 'डुधांगक् धारणे च' एते षट् दासंज्ञा इति ॥ २० ॥

## भवतेः सिज्लुपि ॥ २१ ॥ [ सि० ४।३।१२ ]

**सिचो लुपि भवतेर्गुणो न स्यात् । अड्धातोरित्यडागमे । अभूत अद्य वृष्टिः । अभूताम् । ॥ २१ ॥** अभू अन् इति स्थिते सिज्लोपे 'धातोरिवर्णस्य०' ( २।१।५० ) इत्युवादेशे ।

**'भव०'** अतिस्पष्टम् ॥ २१ ॥

## भुवो वः परोक्षाऽद्यतन्योः ॥ २२ ॥ [ सि० ४।२।४३ ]

**भुवो वन्तस्योपान्त्यस्य परोक्षाद्यतन्योरूत् स्यात् । अभूवन् । अभूः अभूतम् अभूत । अभूवम् अभूव अभूम ॥ २२ ॥**

**'भूवो०'** सूत्रं सुगमम् ॥ २२ ॥ अथ परोक्षां विवक्षुः परोक्षाया अर्थानाह ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## परोक्षे ॥ २३ ॥ [ सि० ५।२।१२ ]

**भूतानद्यतने परोक्षार्थाद्धातोः परोक्षा स्यात् ।**

**'परो०'** अक्षाणां परः परोक्षः, अत एव निर्देशात्साधुः; अव्युत्पन्नो वा असाक्षात्कारार्थः । भूतानद्यतने परोक्षेऽर्थे वर्त्तमानाद्धातोः परोक्षा स्यात् । यद्यपि साध्यत्वेनानिष्पन्नत्वात् सर्वोपि धात्वर्थः परोक्षस्तथापि प्रत्यक्षसाधनत्वेन तत्र लोकस्य प्रत्यक्षाभिमानोऽस्ति । स यत्र नास्ति स परोक्षः । यथा दिदेश धर्मं जिनः ॥ २३ ॥ परोक्षामाह । परोक्षेत्यादि ।

| [परोक्षा] | परस्मैपदिनः । | आत्मनेपदिनः । | [सि० ३।४।१] |
|---|---|---|---|
| | णव् अतुस् उस् । | ए आते इरे । | |
| | थव् अथुस् अ । | से आथे ध्वे । | |
| | णव् व म । | ए वहे महे । | |

**भू णव् इति स्थिते । णकारो वृद्ध्यर्थः ॥ २३ ॥**

## द्विर्धातुः परोक्षा ङे प्राक् तु स्वरे स्वरविधेः ॥ २४ ॥ [ सि० ४।१।१ ]

**परोक्षायां ङे च परे धातुर्द्विः स्यात् । स्वरादौ तु द्वित्वनिमित्ते स्वरस्य कार्यात्प्रागेव ॥ २४ ॥**

**'द्विर्धा०'** धातुर्द्विः स्यादिति धातोरवस्थितस्य द्वितीयमुच्चारणं क्रियते इत्यर्थः । स्वरादौ त्विति—निनाय निनयिथ निन्यतुः चक्रतुः पपौ पपतुः जग्मतुः अदधत् एवमादिषु वृद्ध्यादेः स्वरविधेः पूर्वमेव द्वित्वं स्यात् । स्वरादाविति किम् ? दिदीर्वान् शिशीर्वान् जेघ्रीयते देध्मीयते जेगीयते । स्वरविधेरिति किम् ? श्वि शुशाव । 'तुंक् वृत्तिहिंसापूरणेषु' भावेऽनटि तवनमिच्छति तवनीयति 'अमाव्ययात् क्यन् च' ( ३।४।२३ ) इति क्यनि तवनीयितुमिच्छति तितवनीयिषतीति सनि 'अन्यस्य' ( ४।१।८ ) इति द्वित्वम् । अत्र गुणरूपस्य स्वरविधेर्द्वित्वनिमित्तप्रत्ययाजन्यत्वान्न ततः प्राग् द्वित्वम् । जग्ले मम्ले इत्यनिमित्तकमात्वम् । अधिजगे इति विषये आदेशः । प्राक्तु स्वरे स्वरविधेरिति आद्विर्वचनमधिकारः अन्यथा प्रागेव णेर्लोपे आदिटदित्यादि न सिद्ध्यति ॥ २४ ॥

## भूस्वपोरदुतौ ॥ २५ ॥ [ सि० ४।१।७० ]

**भूस्वपोः परोक्षायां द्वित्वे पूर्वस्य यथासङ्ख्यमदुतौ स्याताम् ॥ २५ ॥**

**'भूस्व०'** सूत्रं सुगमम् ॥ २५ ॥

## द्वितीयतुर्ययोः पूर्वौ ॥ २६ ॥ [ सि० ४।१।४२ ]

**द्वित्वे पूर्वयोर्द्वितीयतुर्ययोर्यथासङ्ख्यमाद्यतृतीयौ स्याताम् ॥ २६ ॥**

'द्विती०' प्रकटार्थम् ॥ २६ ॥

## नामिनोऽकलिहलेः ॥ २७ ॥ [ सि० ४।३।५१ ]

**नाम्यन्तस्य धातोर्नाम्नो वा कलिहलिवर्जस्य ञ्णिति वृद्धिः स्यात् । ततो आवादेशे 'भुवो वः' ( ४।२।४३ ) इत्यूत्वे च बभूव श्रीवीरः । बभूवतुः बभूवुः ॥ २७ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'नामि०' कलिहलिवर्जनान्नाम्नोऽपि । तेन पटुमाख्यातवान् अपीपटत् अलीलघदित्यत्र वृद्धावन्त्यस्वरादिलोपे चासमानलोपित्वात्सन्वद्भावः सिद्धो भवति । कलिहलिवर्जनं किम् ? कलिं हलिं वाग्रहीत् अचकलत् अजहलत् । **अन्ये** तु नाम्नो वृद्धिमनिच्छन्तोऽन्त्यस्वर(स्यो)कारस्यैव णिचि लोपमिच्छन्तः समानलोपित्वात्सन्वद्भावप्रतिषेधे अपपटत् अललघदित्येवाहुः, न चायं राजपथः ॥ २७ ॥

## स्क्रसृवृभृस्तुद्रुश्रुस्रोर्व्यञ्जनादेः परोक्षायाः ॥ २८ ॥ [ सि० ४।४।८१ ]

**स्कृगः स्रादिवर्जेभ्यश्च सर्वधातुभ्यः परस्या व्यञ्जनादेः परोक्षाया आदिरिट् स्यात् । बभूविथ बभूवथुः बभूव । बभूव बभूविव बभूविम ॥ २८ ॥**

'स्क्रसृ०' सृश्च वृश्च भृश्च स्तुश्च द्रुश्च श्रुश्च स्रुश्च सृवृभृस्तुद्रुश्रुस्रु । न सृवृभृस्तुद्रुश्रुस्रु असृवृभृस्तुद्रुश्रुस्रु । स्कृश्च असृवृभृस्तुद्रुश्रुस्रुश्च स्क्रसृवृभृस्तुद्रुश्रुस्रु । तस्मात् स्कृग इति सस्सटः करोतेः, स्रादिसप्तधातुवर्जेभ्यश्च सर्वधातुभ्य इति । स्कृ–संचस्करिव सञ्चस्करिम सञ्चस्करिषे । स्राद्यन्येभ्यः–ददिव ददिम ददिषे । एवं चिच्यिवहे निन्यिवहे जुहुविव लुलुविद्वे लुलुविध्वे जह्रिव तेरिव पेचिषे । स्कृनिर्देशात् केवलस्य माभूत्–चकृव चकृम चकर्थ चकृषे । स्रादिवर्जनं किम् ? 'सृं गतौ' ससृव ससृम ससर्थ । 'वृगट् वरणे' ववृव ववृम ववृवहे ववृमहे । 'डुभृंग्क् धारणे च' बभृव बभृम बभर्थ 'ष्टुंगक् स्तुतौ' तुष्टुव तुष्टुम तुष्टोथ । 'द्रं दुं द्रुं श्रुं स्रुं गतौ' दुद्रुव दुद्रुम दुद्रोथ, शुश्रुव शुश्रुम शुश्रोथ, सुस्रुव सुस्रुम सुस्रोथ । स्तुद्रुश्रुस्रूणां 'सृजिदृशि०' (४।४।७८) इत्यादिनापि थवि विकल्पो न भवति अनेन प्राप्ते हि स विकल्पः । एषां तु प्रतिषिद्धत्वात्प्राप्तिर्नास्ति । ववृषे इत्यत्र तु 'स्तायशित०' (४।४।३२) इत्यादिनापि न भवति 'ऋवर्णश्र्यूर्णुगः कितः' (४।४।५७) इति प्रतिषेधात् ॥ २८ ॥ अथात्र विशेषमाह ।

## कृतास्मरणाऽतिनिह्नवे परोक्षा ॥ २९ ॥ [ सि० ५।२।११ ]

**अनयोरर्थयोरपरोक्षेऽपि भूते परोक्षा स्यात् । सुप्तोऽहं किल विललाप । नाहं कलिङ्गं जगाम ॥२९॥**

**'कृता०'** अनयोरर्थयोरिति कृतस्यापि व्यापारस्य चित्तव्यापेक्षादिनाऽस्मरणेऽत्यन्तनिह्नवे वा गम्यमाने भूतानद्यतनेऽर्थे वर्त्तमानाद्धातोः परोक्षा स्यात् । अपरोक्षकालार्थ आरम्भः । नाहमित्यादि । अतिनिह्नवे–कश्चित्केनचिदुक्तः कलिङ्गेषु त्वया ब्राह्मणो हतः स तदपह्नुवान आह कः कलिङ्गान् जगाम को ब्राह्मणं ददर्श नाहं कलिङ्गान् जगाम इत्यन्तमपह्नुते । अतिग्रहणादेकदेशापह्नवे ह्यस्तन्येव–न कलिङ्गेषु ब्राह्मणमहमहनम् । एवं **'हशश्वद्युगान्तः प्रच्छ्ये ह्यस्तनी च'** (५।२।१३) पञ्चवर्षं युगं तस्यान्तर्मध्यं तत्र पृच्छयते यः स युगान्तःप्रच्छ्यः । हे शश्वति–प्रयुज्यमाने युगान्तः प्रष्टव्ये (च) भूतानद्यतने परोक्षेऽर्थे वर्त्तमानाद्धातोर्ह्यस्तनी परोक्षा च विभक्ती भवतः । इतिहाकरोत् इतिहचकार । इतिहशब्दो निपातसमुदायः पारम्पर्ये वर्त्तते 'इतिहः स्यात् सम्प्रदाये' इति वचनात् । यद्वा इति एतत्, ह इति वाक्यालङ्कारे ॥ शश्वदकरोत् शश्वच्चकार । प्रच्छ्ये–किमगच्छस्त्वं मथुरां किं जगन्थ त्वं मथुराम् । हशश्वद्युगान्तःप्रच्छ्य इति किम् ? जघान कंसं किल वासुदेवः । वेत्येव कृते भूतानद्यतनमात्रभाविन्याः ह्यस्तन्याः पक्षे सिद्धौ ह्यस्तनीविधानं स्मृत्यर्थप्रयोगेऽपि ह्यस्तन्येव यथा स्यान्न भविष्यन्तीत्येवमर्थम्, तेन स्मरसि मित्र काश्मीरेष्वितिहाध्यैमहि, अभिजानासि चैत्र शश्वदध्यैमहीत्यादि सिद्धम्, क्रियान्तराकाङ्क्षायां तु हशश्वत्प्रयोग एव न सम्भवतीति नोदाह्रियते । निपातानां यथादर्शनं प्रयोगात् । **'श्रुसद्वस्भ्यः परोक्षा वा'** (५।२।१) भूत इत्यनुवर्त्तते । शृणोत्यादिभ्यो भूतार्थवृत्तिभ्यः परोक्षा वा स्यात् । उपशुश्राव उपससाद अनूवास । वावचनाद्यथाकालमद्यतनकालेऽ-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ह्यस्तनी अनद्यतने ह्यस्तनी च स्यात् । उपाश्रौषीत् उपाशृणोत् उपासदत् उपासीदत् अन्ववात्सीत् अन्ववसत् । एवं शुश्रुवे अश्रावि अश्रूयतेत्यादि । अन्ये तु श्वादिभ्यो भूतमात्रे कसुमेवेच्छन्ति न परोक्षाम्, ह्यस्तनीमपीच्छत्यन्यः । बहुवचनं व्याप्त्यर्थम्, तेन भूतानद्यतनेपीयं ह्यस्तन्या न बाध्यते । असरूपत्वादेवाद्यतनादिसिद्धौ वावचनं विभक्तिर्ध्वंसरूपोत्सर्गविभक्तिसमावेशनिषेधार्थम् ॥ २९ ॥

अथाशीर्विभक्तेरर्थमाह ।

## आशिष्याशीःपञ्चम्यौ ॥ ३० ॥ [ सि० ५।४।३८ ]

(परस्य १)इष्टाशंसनमाशीस्तदर्थाद्धातोराशीःपञ्चम्यौ स्याताम् ॥ ३० ॥

**'आशि०'** इष्टाशंसनमिति–आशासनमाशीः 'कुत्संपदादिभ्यः क्विप्' ( ५।३।११४ ) **'आङः'** ( ४।४।१२० ) आङः परस्य शासोऽवयवस्यासः स्थाने काविसादेशो भवतीति आशीर्विशिष्टेऽर्थे वर्त्तमानाद्धातोराशीःपञ्चम्यौ स्यातामित्यर्थः । **कश्चित्तु** समर्थनायां पञ्चमीमिच्छति । परैरशक्यस्य वस्तुनोऽध्यवसायः समर्थना । समुद्रमपि शोषयाणि पर्वतमप्युत्पाटयानि ॥ ३० ॥ आशीर्विभक्तिमाह आशीरित्यादि ।

आशीः [सि० ३।३।१३]

| परस्मैपदिनः । | आत्मनेपदिनः |
|---|---|
| क्यात् क्यास्ताम् क्यासुः । | सीष्ट सीयास्ताम् सीरन् । |
| क्याः क्यास्तम् क्यास्त । | सीष्ठास् सीयास्थाम् सीध्वम् । |
| क्यासम् क्यास्व क्यास्म । | सीय सीवहि सीमहि । |

ककारो गुणनिषेधार्थः । भूयाद्भद्रं सङ्घयः । भूयास्ताम् भूयासुः । भूयाः भूयास्तम् भूयास्त । भूयासम् भूयास्व भूयास्म ।

अथ श्वस्तन्या अर्थमाह ।

## अनद्यतने श्वस्तनी ॥ ३१ ॥ [ सि० ५।३।५ ]

अनद्यतने भविष्यदर्थाद्धातोः श्वस्तनी स्यात् ॥ ३१ ॥

**'अन०'** न विद्यते अद्यतनो यत्र तस्मिन् वर्त्स्यति धात्वर्थे वर्त्तमानाद्धातोः श्वस्तनी स्यात् । अत्र बहुव्रीह्याश्रयणाद्व्यामिश्रे मा भूत् । अद्य श्वो वा गमिष्यति । कथं श्वो गमिष्यति । मासेन गमिष्यतीति । अत्र भविष्यत्सामान्ये भविष्यन्ती ततः श्वःशब्दादिना योगः । अत्रायं विशेषः **'परिदेवने'** ( ५।३।६ ) अनुशोचने गम्यमाने वर्त्स्यति धात्वर्थे वर्त्तमानाद्धातोः श्वस्तनी स्यात् । अद्यतनार्थ आरम्भः इयं तु कदा गन्ता यैवं पादौ निदधाति । अयं तु कदाध्येता य एवमनभियुक्तः । विशेषविधानात् कदा-कर्हियोगलक्षणा विभाषा बाध्यते ॥ ३१ ॥ अथ श्वस्तनीमाह–

श्वस्तनी [सि० ३।३।१४]

| परस्मैपदिनः । | आत्मनेपदिनः । |
|---|---|
| ता तारौ तारस् । | ता तारौ तारस् । |
| तासि तास्थस् तास्थ । | तासे तासाथे ताध्वे । |
| तास्मि तास्वस् तास्मस् । | ताहे तास्वहे तास्महे । |

१ तेन विभक्तीनामेवान्योन्यस्वरूपविधिर्नास्ति प्रत्ययेन तु विभक्तीनामस्त्येव तेनोपश्रुतवानित्यादि सिद्धम् । २ तेन 'श्रयदि'–इति सूत्रे वर्त्स्यन्तीविषये ह्यस्तनी न ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## स्ताद्यशितोऽत्रोणादेरिट् ॥ ३२ ॥ [ सि० ४।४।३२ ]

धातोः परस्य सादेस्तादेश्चाऽशित आदिरिट् स्यात्, नतु त्रप्रत्यये उणादिषु च । भविता श्वः पूजोत्सवः । भवितारौ भवितारः । भवितासि भवितास्थः भवितास्थ । भवितास्मि भवितास्वः भवितास्मः ॥ ३२ ॥

'स्ताद्य०' । सादेरित्यस्योदाहरणम्–अटिटिषति अलविष्ट लविष्यति अलविष्यत् । तादेरित्यस्योदाहरणम्–लविता लवितव्यम् लवितुम् । स्तादीति किम् ? त्रप्सुः, स्योमा, भूयात्, ईश्वरः, विद्वान् । अशित इति किम् ? आस्से आस्ते । न तु त्रप्रत्यये इति–शस्त्रं योत्रं पोत्रम् । उणादिषु चेति–वत्सः अंसः दन्तः हस्तः ॥ ३२ ॥ अथ भविष्यन्तीमभिधातुं तस्या अर्थमाह ।

## भविष्यन्ती ॥ ३३ ॥ [ सि० ५।३।४ ]

सामान्यतो भविष्यदर्थाद्धातोर्भविष्यन्ती स्यात् ॥ ३३ ॥

**सामान्यत** इत्यादि स्पष्टम् । आदिशब्दात् **'किंकिलास्त्यर्थयोर्भविष्यन्ती'** ( ५।४।१६ ) यथासङ्ख्यं नास्ति । न श्रद्दधे न मर्षयामि किंकिल नाम तत्रभवान्परदारानुपकरिष्यते, गन्धना-( ३।३।७६ )दिसूत्रेण साहसे आत्मनेपदम् । अस्त्यर्था-अस्ति-भवति-विद्यतयः, न श्रद्दधे न मर्षयामि किंकिल नाम अस्ति नाम भवति ( नाम ) विद्यते नाम तत्रभवान्परदारानुपकरिष्यते, अत्र सप्तमीनिमित्तं नास्तीति क्रियापतने क्रियातिपत्तिर्न भवति । यथा किलशब्दः प्रसिद्धद्योतने वाक्यालङ्कारे अमर्षद्योतने कोमलामन्त्रणे, एवं किंकिलशब्दोऽपि । किंकिलशब्दोऽभिप्रायनिवेदनेऽखण्डोऽव्ययश्चेति **कश्चित्** । **'शेषे भविष्यन्त्ययदौ'** ( ५।४।२० ) शेषे यच्चयत्राभ्यामन्यस्मिन्नुपपदे चित्रे गम्यमाने धातोर्भविष्यन्ती भवति । अयदौ–यदिशब्दश्चेन्न प्रयुज्यते, सर्वविभक्त्यपवादः । चित्रमाश्चर्यमन्धो नाम पर्वतमारोक्ष्यति, बधिरो नाम व्याकरणं श्रोष्यति, मूको नाम धर्मं कथयिष्यति । अत्र सप्तमी–निमित्तं नास्ति इति न क्रियातिपत्तिः । शेष इति किम् ? यच्च–यत्रयोः पूर्वेण चित्रे इत्यनेन सप्तम्येव । अयदाविति किम् ? आश्चर्यं यदि स भुञ्जीत, चित्रं यदि सोऽधीयीत, अत्राश्रद्धाप्यस्ति न केवलं यदिशब्दस्ततो 'जातुयद्यदा०' ( ५।४।१७ ) इति सप्तमी ॥ ३३ ॥ भविष्यन्तीमाह

भविष्यन्ती — [ सि० ५।३।४ ]

| परस्मैपदिनः । | आत्मनेपदिनः । |
|---|---|
| स्यति स्यतस् स्यन्ति । | स्यते स्येते स्यन्ते । |
| स्यसि स्यथस् स्यथ । | स्यसे स्येथे स्यध्वे । |
| स्यामि स्यावस् स्यामस् । | स्ये स्यावहे स्यामहे । |

इडागमे । भविष्यति भविष्यतः भविष्यन्ति । भविष्यसि भविष्यथः भविष्यथ । भविष्यामि भविष्यावः भविष्यामः ।

'भविष्यन्ती'त्यादि स्पष्टम् ॥ अथोपपदविशेषे विभक्तिविशेषमाह ।

## पुरायावतोर्वर्त्तमाना ॥ ३४ ॥ [ सि० ५।३।७ ]

अनयोरुपपदयोर्भविष्यदर्थाद्धातोर्वर्त्तमाना स्यात् । पुरा भवति । यावद्भवति । भविष्यतीत्यर्थः । कदाकर्ह्योर्नवा ( ५।३।८ ) कदा भवति । कदा भविष्यति । कर्हि भवति । कर्हि भविष्यति ॥ ३४ ॥

१ असिद्धं बहिरङ्गमिति स्वरानन्तर्ये नेष्यते तेन यलं सिद्धमन्यथा ऊटोऽसत्त्वात् गुणः स्यात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'पुरा०'** अनयोरुपपदयोरिति अनयोर्निपातयोरित्यर्थः यथा पुरा भुङ्क्ते । यावद्भुङ्क्ते भोक्ष्यते इत्यर्थः । पुरेति क्रियाविशेषणं कालविशेषणे वा सप्तमी 'कालाध्व०' ( २।२।४२ ) इति कर्मसंज्ञायामस्वा । भविष्यदनद्यतनेऽपि परत्वाद्वर्त्तमानैव पुरा श्वो भुङ्क्ते । यावच्छ्वो व्रजति । यावच्छब्दोऽत्रावध्यर्थः, परिमाणार्थे, तु न स्यात् । यावद्दास्यते तावद्भोक्ष्यते यत्परिमाणमित्यर्थः । लाक्षणिकत्वादिह न भवति—महत्या पुरा जेष्यति ग्रामम् ॥ **'कदाकर्ह्योर्नवा'** ( ५।३।८ ) अनयोरुपपदयोर्वर्त्स्यत्यर्थे वर्त्तमाना वा स्यात् । कदा भवतीति, पक्षे भविष्यन्तीश्वस्तन्यावपि भवतः । यथा कदा भुङ्क्ते कदा भोक्ष्यते कदा भोक्ता, कर्हि भुङ्क्ते कर्हि भोक्ष्यते कर्हि भोक्ता । ये कदाकर्हियोगे सर्वेषु कालेषु वर्त्तमानामिच्छन्ति तन्मतमपास्यमित्याह **श्रीसूरिः**—कर्हिशब्दस्यानद्यतनार्थवृत्तित्वात् अनद्यतन एव र्हिप्रत्ययविधानान्न प्राप्नोति । श्वो गमिष्यतीत्यादिवत्तु भविष्यति, भूते तु नित्यं परोक्षादयः । कदा बुभुजे कदा भुक्तवान्, कर्हि बुभुजे कर्हि भुक्तवान् ॥ **'ननौ पृष्टोक्तौ सद्वत्'** ( ५।२।१७ ) ( अनद्यतन इति निवृत्तम् ) ननावुपपदे प्रष्टव्यप्रतिवचने भूतेऽर्थे सद्वद्भवति, सद्वद्वचनाद्वर्त्तमाना शत्रानशौ च भवन्ति । किमकार्षीश्चैत्र कटम् , ननु करोमि भोः ननु कुर्वन्तं कुर्वाणं मां पश्य । किमवोचः किञ्चिच्चैत्र, ननु ब्रवीमि भोः ननु ब्रुवन्तं ब्रुवाणं मां पश्य ॥ **'नन्वोर्वा'** ( ५।२।१८ ) न—नुशब्दयोर्योगे भूते सद्वत् । किमकार्षीः कटं चैत्र, न करोमि भोः, न कुर्वन्तं न कुर्वाणं मां पश्य, पक्षे नाकार्षम् । कस्तत्रावोचत्, अहं नु ब्रवीमि ब्रुवन्तं ब्रुवाणं नु मां पश्य । पक्षे अहं न्ववोचम् ॥ **'क्षेपेऽपिजात्वोर्वर्त्तमाना'** ( ५।४।१२ ) भूते इति निवृत्तम् । क्षेपो गर्हा तस्मिन् गम्यमानेऽपिजात्वोरुपपदयोर्धातोर्वर्त्तमाना स्यात् । कालसामान्ये विधानात् कालविशेषविहिता अपि प्रत्ययाः परत्वादनेन बाध्यन्ते । अपि तत्रभवान् जन्तून् हिनस्ति, जातु तत्रभवान् भूतानि हिनस्ति, अपि संयतः सन्ननागाढे तत्र भवानाधायकृतं सेवते, धिग्गर्हामहे । इह सप्तमीनिमित्ताभावात्क्रियातिपतने क्रियातिपत्तिर्नोदाह्रियते ॥ ३४ ॥

## माङ्यद्यतनी ॥ ३५ ॥ [ सि० ५।४।३९ ]

**माङ्युपपदे धातोरद्यतनी स्यात् । सर्वविभक्त्यपवादः । माङ्योगेऽडागमाभावः । मा भूत् ॥३५॥**

**'माङ्य०'** सर्वविभक्त्यपवाद इति—कथं माभवतु, तस्य पापं मा भविष्यतीति । असाधुरेवायम् , केचिदाहुरङितो माशब्दस्यायं प्रयोगः । स्वमतेप्यङिन्माशब्दप्रयोगोऽस्ति, किन्तु क्रियायोगेऽसौ नेष्यतेऽतः केचिदाहुरित्युक्तम् ॥ ३५ ॥

## सस्मे ह्यस्तनी च ॥ ३६ ॥ [ सि० ५।४।४० ]

**सस्मे माङ्युपपदे ह्यस्तनी अद्यतनी च स्यात् । मास्म भवत् मास्म भूत् ॥ ३६ ॥**

**'सस्मे०'** माशब्देन निषेध उच्यते, स्मशब्देन स एव द्योत्यते, व्यस्तोप्यनयोः प्रयोगः स्यात् । मा चैत्र स्म हरः परद्रव्यम् , मा चैत्र स्म हार्षीः परद्रव्यम् । आदिशब्दसन्निधानात् **'किंवृत्ते लिप्सायाम्'** ( ५।३।९ ) विभक्त्यन्तस्य डतरडतमान्तस्य च किमो वृत्तं किंवृत्तमिति वैयाकरणसमयस्तेन किंतरां किंतमामिति न किंवृत्तम् , तस्मिन्नुपपदे प्रष्टुर्लिप्सायां गम्यमानायां वर्त्स्यत्यर्थे वर्त्तमानाद्धातोर्वर्त्तमाना वा स्यात्, पक्षे भविष्यन्तीश्वस्तन्यावपि स्याताम् । लब्धुमिच्छा लिप्सा । को भवतां भिक्षां ददाति दास्यति दाता वा । कं भवन्तो भोजयन्ति भोजयिष्यन्ति भोजयितारो वा । कतरः कतमो वा भवतो भिक्षां ददाति दास्यति दाता वा । किंवृत्त इति किम् ? भिक्षां दास्यति । लिप्सायामिति किम् ? कः सिद्धपुरं यास्यति ॥ **'लिप्स्यसिद्धौ'** ( ५।३।१० ) 'डुलभिष् प्राप्तौ' लब्धुमिष्यते



Jain Education International For Personal & Private Use Only www.jainelibrary.org

‘तुमर्हादिच्छा०’ (३।४।२१) इति सन् ‘रभलभशकपतपदामिः’ (४।१।२१) न च द्विः, लिप्स्यते इति। लब्धुमिष्यमाण ओदनादिर्लिप्स्यस्तस्मात्सिद्धौ स्वर्गोपवाप्तिलक्षणायां गम्यायां वर्त्स्यत्यर्थे वर्त्तमानाद्धातोर्वर्त्तमाना वा स्यात्, पक्षे भविष्यन्तीश्वस्तन्यावपि स्याताम्। अकिंवृत्तार्थोऽयमारम्भः। यो भिक्षां ददाति दास्यति दाता वा स स्वर्गं याति यास्यति याता वा। लिप्स्याद्भक्तात्स्वर्गसिद्धिमाचक्षाणो दातारं प्रोत्साहयति॥ **‘पञ्चम्यर्थहेतौ’** (५।३।११) पञ्चम्यर्थः प्रैषादिस्तस्य हेतुर्निमित्तमुपाध्यायागमनादिस्तस्मिन्नर्थे वर्त्स्यति वर्त्तमानाद्धातोर्वर्त्तमाना वा स्यात्, पक्षे भविष्यन्तीश्वस्तन्यावपि भवतः। उपाध्यायश्चेदागच्छति आगमिष्यति आगन्ता वा, अथ त्वं सूत्रमधीष्व अथ त्वमनुयोगमादत्स्व। अत्र भविष्यदुपाध्यायागमनमध्ययनादिविषयप्रैषस्यातिसर्गस्य प्राप्तकालतायाश्च हेतुर्भवति। अत्र च न्यत्कारपूर्वकं प्रेषणं प्रैषः, अनुमतादेशदानमतिसर्गः प्राप्तकालता चावसरः। **‘सप्तमी चोर्ध्वमौहूर्त्तिके’** (५।३।१२) ऊर्ध्वं मुहूर्त्ताद्भव ऊर्ध्वमौहूर्त्तिकः ‘नामनाम्ना०’ (३।१।१८) इति समासः उत्तरपदवृद्धिस्त्वऽस्मादेव निर्देशात् पञ्चम्यर्थहेतावूर्ध्वमौहूर्त्तिके वर्त्स्यत्यर्थे वर्त्तमानाद्धातोः सप्तमी, चकाराद्वर्त्तमाना च विभक्तिर्वा स्यात्, पक्षे भविष्यन्तीश्वस्तन्यावपि स्याताम्। ऊर्ध्वं मुहूर्त्तात् उपरि मुहूर्त्तस्य परं मुहूर्त्तादुपाध्यायश्चेदागच्छेत् आगच्छति आगमिष्यति आगन्ता वा, अथ त्वं तर्कमधीष्व॥ **‘क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती’** (५।३।१३) वेति निवृत्तम्। यस्माद्धातोस्तुमादिस्तद्धात्वाच्या या क्रिया, साऽर्थः प्रयोजनं यस्याः सा क्रियार्था, तस्यां क्रियायामुपपदे वर्त्स्यत्यर्थे वर्त्तमानाद्धातोस्तुम्-णकच् भविष्यन्तीप्रत्ययाः स्युः। कर्तुं व्रजति कारको व्रजति करिष्यामीति व्रजति॥ **‘सत्सामीप्ये सद्वद्वा’** (५।४।१) समीपमेव सामीप्यम्, सतो वर्त्तमानस्य सामीप्ये भूते भविष्यति चार्थे वर्त्तमानाद्धातोः सद्वद्वर्त्तमानवत्प्रत्यया वा भवन्ति। ‘सति’ (५।२।१९) इति सूत्रादारभ्यापादपरिसमाप्तेर्विहिताः प्रत्यया भूतभविष्यतोर्वा अतिदिश्यन्ते[1]। कदा चैत्रागतोऽसि अयमागच्छामि आगच्छन्तमेव मां विद्धि। वावचनाद्यथाप्राप्तं च, अयमागमम् एषोऽस्म्यागतः। कदा मैत्र गमिष्यसि एष गच्छामि गच्छन्तमेव मां विद्धि, पक्षे एष गमिष्यामि गन्तास्मि गमिष्यन्तमेव मां विद्धि। वत्करणस्य सादृश्यार्थत्वाद्येनैव प्रकृत्युपपदोपाध्यादिना[2] विशेषेण वर्त्तमाने विहितास्तेनैव भूतभविष्यतोरपि भवन्ति। कदा भवान् सोमं पूतवान् पविष्यते वा एषोऽस्मि पवमानः। कदा भवानिष्टवान् यक्ष्यते वा, एषोऽस्मि यजमानः। पवमानः यजमान इत्यत्र प्रकृतिविशेषः। कदा भवान् कन्यामलङ्कृतवान् अलङ्करिष्यते वा, एषोऽस्म्यलङ्करिष्णुरित्यत्र उपपदविशेषः। शीलाद्युपाधिविशेषश्च। सामीप्य इति किम्? परुदगच्छत् वर्षेण गमिष्यति॥ **‘भूतवच्चाशंस्ये वा’** (५।४।२) अनागतस्य प्रियस्यार्थस्याशंसनं प्राप्तुमिच्छा वा आशंसा तद्विषय आशंस्यस्तस्मिन्नर्थे वर्त्तमानाद्धातोर्भूतवच्चकारात्सद्वच्च प्रत्यया वा भवन्ति। आशंस्यस्य भविष्यत्त्वादयमतिदेशः। वाग्रहणाद्यथाप्राप्तं च। उपाध्यायश्चेदागमत् एते तर्कमध्यगीष्महि। उभयत्राप्याशंस्यस्य विद्यमानत्वादनेनैव भूते प्रत्ययः। उपाध्यायश्चेदागतः एतैस्तर्कोऽधीतः, उपाध्यायश्चेदागच्छति एते तर्कमधीमहे, उपाध्यायश्चेदागमिष्यति एते तर्कमध्येष्यामहे, उपाध्यायश्चेदागन्ता एते तर्कमध्येतास्महे। सामान्यस्यातिदेशे विशेषस्यानतिदेशात् ह्यस्तनीपरोक्षे न भवतः, एतच्च व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायात्। आशंस्य इति किम्? उपाध्याय आगमिष्यति तर्कमध्येष्यते मैत्रः॥ **‘क्षिप्राशंसार्थयोर्भविष्यन्तीसप्तम्यौ’** (५।४।३) क्षिप्रार्थे आशंसाऽर्थे चोपपदे आशंस्येऽर्थे वर्त्तमानाद्धातोर्यथा-

१ अतिक्रम्य निजं कालं दिश्यन्त इत्यर्थः। २ आदिशब्दात् कर्तृविशेषेणापि।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सप्तम्यं भविष्यन्तीसप्तम्यौ स्याताम्, भूतवच्चेत्यस्यापवादः। उपाध्यायश्चेदागच्छति आगमत् आगमिष्यति क्षिप्रमाशु त्वरितमरं शीघ्रमेते सिद्धान्तमध्येष्यामहे। क्षिप्रार्थेनेति वक्तव्ये भविष्यन्तीवचनं श्वस्तनी-विषयेऽपि भविष्यन्ती यथास्यादित्येवमर्थम्। अयमत्राभिप्रायः—यद्यपि 'क्षिप्रार्थे न' इति, 'आशंसार्थे सप्तमी' इति सूत्रद्वये कृते भविष्यन्ती सिद्ध्यत्येव। तथाहि 'भूतवच्चे'त्यनेन साम्यान्यतो भणनात्, क्षिप्रार्थेऽक्षिप्रार्थे चोपपदे भूतवत्सद्भावे प्राप्तानां प्रत्ययानां 'क्षिप्रार्थे न' इति सूत्रेण निषेधे कृते पारिशेष्यात्स्वयमेव भविष्यन्ती सिद्ध्यति। तथापि असति भविष्यन्तीग्रहणे यथाप्राप्तभविष्यत्प्रत्ययप्राप्तौ भविष्यदद्यतने भविष्यन्ती भविष्यदनद्यतने तु श्वस्तनी प्राप्नुयात्। इदानीं पुनर्भविष्यत्यद्यतनेऽनद्यतने च क्षिप्रार्थे उपपदे भविष्यन्त्येव, न तु श्वस्तनी। उपाध्यायश्चेच्छ्वः शीघ्रमागमिष्यति एते श्वः क्षिप्रमध्येष्यामहे। आशंसार्थे खल्वपि-उपाध्यायश्चेदागच्छत्यागमदागमिष्यत्यागन्ता वा आशंसेऽवकल्पये सम्भावये युक्तोऽधीयीय। द्वयोरुपपदयोः सप्तम्येव, शब्दतः परत्वात्। आशंसे क्षिप्रमधीयीय ॥ **'सम्भावने सिद्धवत्'** (५।४।४) हेतोः शक्तिश्रद्धानं सम्भावनम्। तस्मिन् विषये असिद्धेऽपि वस्तुनि सिद्धवत्प्रत्ययाः स्युः 'समये चेत्प्रयत्नो भूदुदभूवन्विभूतयः। इषे चेन्माधवोऽवर्षीत्समपत्स्यन्त शालयः' ॥ १ ॥ 'जातश्चायं मुखेन्दुश्चेद्भ्रुकुटीप्रणयी पुनः। गतं च वसुदेवस्य कुलं नामावशेषताम्' ॥ २ ॥ **'वा हेतुसिद्धौ क्तः'** (५।३।२) वर्त्स्यत्यर्थे धात्वर्थहेतुः कारणं तस्य सिद्धौ सत्यां वा क्तः। किं ब्रवीषि वृष्टो देवः संपन्नास्तर्हि शालयः सम्पत्स्यन्ते वा, प्राप्ता नौस्तीर्णा तर्हि नदी तरिष्यते वा ॥ **'नानद्यतनः प्रबन्धासत्त्योः'** (५।४।५) प्रबन्धः सातत्यम्, आसत्तिः सामीप्यम्, तच्च कालतः सजातीयेन कालेनाव्यवहितकालतेति यावत्, धात्वर्थस्य प्रबन्धे आसत्तौ च गम्यायां धातोरनद्यतनविहितः प्रत्ययो न भवति, भूतानद्यतने ह्यस्तनी, भविष्यदनद्यतने च श्वस्तनी विहिता, तयोः प्रतिषेधः। यावज्जीवं भृशमन्नमदात् यावज्जीवं भृशमन्नं दत्तवान् यावज्जीवं भृशमन्नं दास्यति यावज्जीवं युक्तोऽध्यापिपत् यावज्जीवं युक्तोऽध्यापयिष्यति। आसत्तौ खल्वपि-येयं पौर्णमास्यतीता तस्यां जिनमहः प्रावर्त्तिष्ट, (प्रवृत्तः), येयं पौर्णमास्यागामिनी तस्यां जिनमहः प्रवर्त्तिष्यते। द्वौ प्रतिषेधौ यथाप्राप्तस्याभ्यनुज्ञानाय। **केचित्तु** अनद्यतनविशेषविहितानामपि परोक्षादीनां [1]प्रतिषेधमिच्छन्ति ॥ **'एष्यत्यवधौ देशस्यार्वाग्भागे'** (५।४।६) देशस्य योऽवधिस्तद्वाचिन्युपपदे देशस्यैवार्वाग्भागे य एष्यन्नर्थस्तत्र वर्त्तमानाद्धातोरनद्यतनविहितः प्रत्ययो न स्यात्। अप्रबन्धार्थमनासत्त्यर्थं च वचनम्, यद्यप्यनद्यतन इति प्रकृतं तथापि इहैष्यतीतिवचनात् श्वस्तन्या एव प्रतिषेधः। योऽयमध्वा गन्तव्यः आशत्रुञ्जयात्तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्ष्यामहे द्विः सक्तून् पास्यामः। योऽयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यदवरमर्द्धं तत्रौदनं भोक्ष्यामहे। एष्यतीति किम्? योऽयमध्वातिक्रान्त आशत्रुञ्जयात्तस्य यदवरं वलभ्यास्तत्र युक्ता द्विरध्यैमहि द्विः सक्तूनपिबाम। अवधाविति किम्? योऽयमध्वा निरवधिको गन्तव्यस्तत्र द्विरोदनं भोक्तास्महे द्विः सक्तून्पातास्मः ॥ **'कालस्यानहोरात्राणाम्'** (५।४।७) कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैवार्वाग्भागे य एष्यन्नर्थस्तत्र वर्त्तमानाद्धातोरनद्यतनविहितः प्रत्ययो न स्यात्। अनहोरात्राणाम् न चेत्सोऽर्वाग्भागोऽहोरात्राणां संबन्धी भवति। योऽयमागामी संवत्सरस्तस्य यदवरमाग्रहायण्यास्तत्र जिनपूजां करिष्यामोऽतिथिभ्यो दास्यामहे। एष्यतीत्येव—योऽयं संवत्सरोऽतीतस्तत्र यदवरमाग्रहायण्यास्तत्र युक्ता द्विरध्यैमहि। अवधावित्येव—योऽयमागामी निरवधिकः कालस्तत्र यदवरमाग्रहायण्यास्तत्र युक्ता अध्येतास्महे। अर्वाग्भाग इत्येव—परस्मिन्विभाषां वक्ष्यते। [2]अनहोरात्राणामिति किम्? योऽयं मास

१ स्मरते तु सामान्यातिदेशे विशेषस्यानतिदेशात् परोक्षादीनां न निषेधः। एवं च भूतानद्यतने अद्यतनीक्तप्रत्यययोर्विधिर्भविष्यदनद्यतने च भविष्यन्त्या एव। २ यत्राहःशब्दो रात्रिशब्दो वा प्रयुज्यते तत्राहोरात्रत्वम्।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र युक्त्या द्विरध्येतास्महे । योऽयं त्रिंशद्रात्र आगामी तस्य योऽव[2]रोऽर्धमासस्तत्र द्विरोदनं भोक्तास्महे । योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र[3] द्विः सक्तून्पातास्मः, इति त्रिविधेऽप्यहोरात्रसंबन्धे माभूत् । अत्र प्रथमोदाहरणे अवयवितया द्वितीयेऽवयवतया तृतीये उभयतयाऽहोरात्रसंबन्धः । योगविभाग उत्तरार्थः । बहुवचनं कालस्येति सामानाधि[4]करण्यभ्रमनिरासार्थम् ॥ 'परे वा' (५।४।८) कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैव परस्मिन् विभागेऽनहोरात्रसंबन्धिनि य एष्यन्नर्थस्तत्र वर्त्तमानाद्धातोरनद्यतनविहितः प्रत्ययो वा न भवति । आगामिनः संवत्सरस्य आग्रहायण्याः परस्ताद्द्विः सूत्रमध्येष्यामहे अध्येतास्महे वा । प्रबन्धासत्तिविवक्षायामपि परत्वादयमेव विकल्पः । आगामिनः संवत्सरस्याग्रहायण्याः परस्तादविच्छिन्नं सूत्रमध्येष्यामहे अध्येतास्महे वा । कालस्येत्येव–आशत्रुञ्जयाद्गन्तव्येऽस्मिन्नध्वनि वलभ्याः परस्ताद्द्विरोदनं भोक्तास्महे । प्रबन्धासत्त्योस्तु नित्यं[5] भविष्यन्ती । आशत्रुञ्जयाद्गन्तव्येऽस्मिन्नध्वनि वलभ्याः परस्तादविच्छिन्नं सूत्रमध्येष्यामहे । पर इति किम् ? अर्वाग्भागे पूर्वेण नित्यं प्रतिषेधः । एष्यतीत्येव–अतीते वत्सरे परस्तादाग्रहायण्याः सूत्रं युक्त्या अध्यैमहि । अवधावित्येव–योऽयमागामी निरवधिकः कालस्तस्य यत्परमाग्रहायण्यास्तत्र द्विरध्येतास्महे । अनहोरात्राणामित्येव–योऽयं त्रिंशद्रात्र आगामी, तस्य यः परः पञ्चदशरात्रस्तत्र युक्त्या अध्येतास्महे ॥ ३६ ॥

## अयदि स्मृत्यर्थे भविष्यन्ती ॥ ३७ ॥ [ सि० ५।२।९ ]

**स्मृत्यर्थे धातावुपपदे भूतानद्यतनार्थे भविष्यन्ती स्यात्, न तु यद्योगे । स्मरसि साधो सिद्धाद्रौ तपस्विनो भविष्यामः । यद्योगे तु । स्मरसि यत्तत्र तपस्विनोऽभवाम ॥ ३७ ॥**

**'अय०'** स्मरसि साधो इति । एवं बुध्यसे चेतयसेऽध्येष्यस्यवगच्छसि चैत्र कलिङ्गेषु गमिष्यामः । स्मरसि साधो स्वर्गे स्थास्यामः । यद्योगे त्विति–अभिजानासि मित्र यत्कलिङ्गेष्ववसाम, यद्वसनं तत्स्मरसीत्यर्थः । तथा च **माघे** प्रयोगः 'स्मरस्यथो दाशरथिर्भवन् भवानमुं वनं तद्वनितापहारिणम् । पयोधिमाबद्धचलज्जलाविलं विलङ्घ्य लङ्कां निकषा हनिष्यति' ॥ १ ॥ अत्र जघानेत्यस्य स्थाने हनिष्यतीत्युक्तम् ॥ अत्रायं विशेषः–**'वा काङ्क्षायाम्'** (५।२।१०) अयदीति नानुवर्त्तते । स्मृत्यर्थे धातावुपपदे यद्ययदि वा प्रयुज्यमाने प्रयोक्तुः क्रियान्तराकाङ्क्षायां सत्यां भूतानद्यतनेऽर्थे वर्त्तमानाद्धातोर्भविष्यन्ती वा स्यात् । स्मरसि मित्र कश्मीरेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहे पास्यामः पयांसि च । स्मरसि मित्र कश्मीरेष्ववसाम तत्रौदनमभुञ्ज्महि, स्मरसि मित्र यत्कश्मीरेषु वत्स्यामो यत्तत्रौदनं भोक्ष्यामहे, स्मरसि मित्र यत्कश्मीरेष्ववसाम यत्तत्रौदनमभुञ्ज्महि । अत्र वासो लक्षणं भोजनं पानं च लक्ष्यम्, लक्ष्यलक्षणयोः प्रबन्धे प्रयोक्तुराकाङ्क्षा भवति ।[6]

## धातोः सम्बन्धे प्रत्ययाः ॥ ३८ ॥ [ सि० ५।४।४१ ]

**धात्वर्थानां विशेषणविशेष्यभावे सति यथाकालमपि प्रत्ययाः साधवः स्युः । विश्वदृश्वाऽस्य पुत्रो भविता । भावि कृत्यमासीत् ॥ ३८ ॥**

---

१ अत्र कालसंबन्धी तादात्म्येनाऽहोरात्ररूपोऽर्वाग्भागः । २ अत्र कालोऽहोरात्ररूपस्तस्य संबन्धी अवयवावयविभावेनाऽर्वाग्भागः । ३ अत्र कालोऽर्वाग्भागश्चाहोरात्ररूपः । ४ कालस्य किं भूतस्यानहोरात्रस्येत्येवं सामानाधिकरण्यं निषिध्यते । कालसामानाधिकरण्ये हि व्यावृत्तिप्रथमोदाहरणेऽपि सूत्रप्रवृत्तौ श्वस्तनीनिषेधः स्यात् । अत्रापि कालस्यानहोरात्ररूपत्वात् । वैयधिकरण्ये तु त्रिप्रकारेऽपि कालसंबन्धे व्यावृत्तिर्भवति । ५ न तु 'नानद्यतन' इति नित्यं निषेधः । ६ 'नानद्यतन०' इति श्वस्तन्या निषेधात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'धातोः०'** धातूनां शब्दतः सम्बन्धाभावादत्र धातुशब्देन धात्वर्थ उच्यते । तथैवाह—धात्वर्थानां विशेषणविशेष्यभावे सतीति । विश्वदृश्वेति विश्वं दृष्टवान् विश्वाद् 'दृशः क्वनिप्' (५।१।१६६) इति भूतकाले प्रत्ययः । स भवितेति भविष्यत्कालेन श्वस्तनीप्रत्ययेन सम्बध्यमानः साधुर्भवति । एवं कृतः कटः श्वो भवितेति । भाविकृत्यमासीदिति । नन्वौणादिकानामनुपात्तकालविशेषाणां त्रिष्वपि कालेषु प्रवृत्तेः कथं भविष्यत्वम्, सत्यम्, अस्य गम्यादित्वात् 'वर्त्स्यति गम्यादिः (५।३।१) इत्यनेन भविष्यत्त्वम् । ततश्च भवितेति भविष्यत्कालप्रत्यय आसीदिति भूतकालप्रत्ययेनाभिसंबध्यमानः साधुर्भवति । विश्वदृश्वेत्यादि हि विशेषणम्, भवितेत्यादि च विशेष्यम् । कीदृशोऽस्य पुत्रो भविता ? विश्वदृश्वेति । विशेषणं गुणत्वाद्विशेष्यकालमनुरुध्यते तेन भविष्यत्कालप्रत्ययेन भूतकालप्रत्ययः सम्बध्यते इति विपर्ययो न भवति । तथा त्याद्यन्तमपि यदाऽपरं त्याद्यन्तं प्रति विशेषणत्वेनोपादीयते । तदा तस्यापि समुदायवाक्यार्थापेक्षया कालान्यत्वं भवत्येव । यथा 'साटोपमुर्वीमनिशं नदन्तो यैः प्लावयिष्यन्ति समन्ततोऽमी । तान्येकदेशान्निभृतं पयोधेः सोम्भांसि मेघान्पिबतो ददर्श' ॥ १ ॥ साटोपमनिशं नदन्तोऽमी मेघा यैः समन्तत उर्वीं प्लावयिष्यन्तीत्यवान्तरं वाक्यार्थः । स मेघान् ददर्शेति समुदायवाक्यार्थस्य विशेषणत्वेनोपात्त इति कालान्यत्वम् । तथाहुः **श्रीसूरयः** अत्र प्लावयिष्यन्तीति भविष्यदर्थस्य ददर्शेति भूतानुगमः । यद्यपि 'धातोः कण्ड्वादेर्यक्' (३।४।८) इति सूत्राद्धात्वधिकारस्यानुवृत्तेर्धात्वधिकारविहिता एव प्रत्यया लभ्यन्ते । तथापि सूत्रे बहुवचनोपादानादधात्वधिकारविहिता अपि तद्धितप्रत्यया धातुसम्बन्धे सति साधवो भवन्ति । तथा गोमानासीत् गोमान् भविता । अस्तिविवक्षायां हि मतुरुक्तः स कालान्तरे न स्यादिति ॥ ३८ ॥

## प्रचये नवा सामान्यार्थस्य ॥ ३९ ॥ [ सि० ५।४।४२ ]

**धात्वर्थानां च समुच्चये गम्ये सामान्यार्थस्य धातोः संबन्धे सति धातोः परौ हिस्वौ तध्वमौ च तद्युष्मदि वा स्याताम् । व्रीहीन् वप लुनीहि पुनीहि इत्येवं यतते यत्यते वा । पक्षे वपति लुनातीत्येवं यतते यत्यते वा । सूत्रमधीष्व निर्युक्तिमधीष्व भाष्यमधीष्वेत्येवमधीते । पक्षे सूत्रमधीते निर्युक्तिमधीते भाष्यमधीते इत्येवाधीते । एवं तध्वमोरप्युदाहरणानि ॥ ३९ ॥**

**'प्रच०'** समान एव सामान्यः स्वार्थे घ्यणन्तो **वाचस्पतिना** पुंलिङ्गो निर्णिन्ये । सामान्योऽर्थो यस्य यद्वा समानस्य भावः सामान्यमर्थो यस्येति । भृशाऽभीक्ष्ण्ये यथाविधीति च नानुवर्त्तते प्रचय इति भणनात् सामान्यार्थस्येति भणनाच्च । प्रचयः समुच्चयः स्वतः साधनभेदेन वा भिद्यमानस्य एकत्रानेकस्य धात्वर्थस्याध्यावाप इति यावत् । तस्मिन् गम्यमाने सामान्यार्थस्य धातोः सम्बन्धे सति धातोः परौ हिस्वौ तध्वमौ च तद्युष्मदि वा भवतः । व्रीहीन्वप लुनीहि पुनीहि इत्येव यतते चेष्टते समीहते चैत्रः । यत्यते चेष्ट्यते समीह्यते चैत्रेण । पक्षे व्रीहीन्वपति लुनाति पुनातीत्येव यतते चैत्रः । यत्यते चैत्रेण । वपनलवनपवनादिषु सर्वेष्वपि यत्र चेष्टेहानामनुगतत्वे नयति-चेष्टि-समीहिधातूनां समानार्थत्वम् इति स्वतो भिन्नानामनेकधातूनामेकत्र प्रचय उक्तः । अथ कर्तृकर्मादिसाधनभेदेन भिद्यमानस्यैकस्यापि धातोरनेकत्वे सत्येकत्र प्रचय उच्यते । देवदत्तोऽद्धि गुरुदत्तोऽद्धि जिनदत्तोऽद्धीत्येव भुञ्जते श्रावकाः भुज्यते श्रावकैः पक्षे देवदत्तोऽत्ति गुरुदत्तोऽत्ति जिनदत्तोऽत्तीत्येव भुञ्जते भुज्यते । अत्र कर्तृभेदेन धातुभेदः । ग्राममट वनमट गिरिमटेत्येवाटति घटते अट्यते घट्यते पक्षे ग्राममटति वनमटति गिरिमटति इत्येवाटति घटते अट्यते घट्यते अत्र कर्मभेदेन धातुभेदः । सक्तून् पिब धानाः खाद ओदनं भुङ्क्ष्वेत्येवाभ्यव-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हरति अभ्यवह्रियते अत्र कर्मभेदेन कथञ्चिदर्थभेदेन च भिन्नानां धातूनामेकत्र प्रचयः । अभ्यवहरणस्य सर्वत्रानुगतत्वात्सामान्यार्थस्य सम्बन्धः । पक्षे सक्तून् पिबति धानाः खादति ओदनं भुङ्क्ते इत्येवाभ्यवहरति अभ्यवह्रियते । सूत्रमधीष्व निर्युक्तिमधीष्व भाष्यमधीष्वेत्येव अधीते पठति अधीयते पठ्यते । पक्षे सूत्रमधीते निर्युक्तिमधीते भाष्यमधीते इत्येवाधीते पठति अधीयते पठ्यते वा । **तध्वमौ च तद्युष्मदीति** । तयोस्तध्वमोः सम्बन्धी बहुत्वविशिष्टो युष्मद् तद्युष्मद् तस्मिंस्तद्युष्मदि अभिधेये तध्वमौ चकारात् हिस्वौ भवत इत्यर्थः । व्रीहीन्वपत लुनीत पुनीत इत्येव यतध्वे चेष्टध्वे समीहध्वे । व्रीहीन्वप लुनीहि पुनीहि इत्येव यतध्वे चेष्टध्वे समीहध्वे । पक्षे व्रीहीन्वपथ लुनीथ पुनीथेत्येव यतध्वे चेष्टध्वे समीहध्वे । ग्राममटत वनमटत गिरिमटतेत्येवाटथ घटध्वे । ग्राममट वनमट गिरिमटेत्येवाटथ घटध्वे । पक्षे ग्राममटथ वनमटथ गिरिमटथेत्येवाटथ घटध्वे । सूत्रमधीध्वं निर्युक्तिमधीध्वं भाष्यमधीध्वमित्येवाधीध्वे पठथ । सूत्रमधीष्व निर्युक्तिमधीष्व भाष्यमधीष्वेत्येवाधीध्वे पठथ । पक्षे सूत्रमधीध्वे निर्युक्तिमधीध्वे इत्येवाधीध्वे पठथ ॥ एवं वचनान्तरे त्रिकान्तरे विभक्त्यन्तरेऽप्युदाहार्य्यम्, एतच्च हिस्वौ प्रत्येव ज्ञातव्यं न तध्वमौ तयोरेव घटनात् ॥ सामान्यार्थस्येति किम् ? व्रीहीन्वप लुनीहि पुनीहि इत्येव वपति लुनातीति पुनातीति माभूत् । ग्राममट वनमट गिरिमटेत्येव-ग्राममटति वनमटति गिरिमटतीति च माभूत् । कारकभेदेनाटतीत्यस्य सामान्यार्थत्वाभावात् ॥ अथैतत् प्रकरणं संक्षेपेणाभिधातुं वार्त्तिकमाह ।

**यथाविधि धातोः संबन्धे सति भृशाभीक्ष्ण्येऽप्येवम् । लुनीहि पुनीहीत्येवायं लुनाति । अधीष्वाधीष्वेत्येवायमधीते इत्यादि ।**

यथाविधीत्यादि । अत्रैवं सूत्रपद्धतिः '**भृशाभीक्ष्ण्ये हिस्वौ यथाविधि तध्वमौ च तद्युष्मदि**' ( ५।४।४२ ) गुणक्रियाणामधिश्रयणादीनां क्रियान्तरैरव्यवहितानां साकल्यं फलातिरेको वा भृशत्वम्, प्रधानक्रियाया विच्छेदादेः क्रियान्तरैरव्यवहितायाः पौनःपुन्यमाभीक्ष्ण्यम्, तद्विशिष्टे (सर्व) कालेऽर्थे वर्त्तमानाद्धातोः सर्वविभक्तिसर्ववचनविषये हिस्वौ पञ्चमी संबन्धिनौ भवतः । यथाविधि धातोः सम्बन्धे यत एव धातोर्यस्मिन्नेव कारके हिस्वौ विधीयेते तस्यैव धातोस्तत्कारकविशिष्टस्यैव सम्बन्धेऽनुप्रयोगरूपे सति । तथा तध्वमौ हिस्वसाहचर्यात्पञ्चम्या एव सम्बन्धिनौ, तयोस्तध्वमोः सम्बन्धी बहुत्वविशिष्टो युष्मद्, तस्मिन् तद्युष्मदि अभिधेये भवतः । चकारात् हिस्वौ च । यथाविधि धातोः सम्बन्धे लुनीहि लुनीहीत्येवायं लुनाति । अनुप्रयोगात्कालवचनभेदोऽभिव्यज्यते । लुनीहि लुनीहीत्येवेमौ लुनीतः एवमिमे लुनन्ति, लुनीहि लुनीहीत्येव त्वं लुनासि युवां लुनीथः, यूयं लुनीथ । लुनीहि लुनीहीत्येवाऽहं लुनामि आवां लुनीवः वयं लुनीमः । लुनीहि लुनीहीत्येवायमलावीत् । एवं लुनीहि लुनीहीत्येवायमलविष्टात् । लुनीहि लुनीहीत्येवायं लुलाव । लुनीहि लुनीहीत्येवायं लविष्यति । लुनीहि लुनीहीत्येवायं लविता । लुनीहि लुनीहीत्येवायं लुनीयात् । लुनीहि लुनीहीत्येवायं लुनातु । लुनीहि लुनीहीत्येवायं लूयात् । एवमधीष्वाधीष्वेत्येवायमधीते, इमावधीयाते इमेऽधीयते । अधीष्वाधीष्वेत्येव त्वमधीषे, युवामधीयाथे, यूयमधीध्वे । अधीष्वाधीष्वेत्येत्येवाहमधीये, आवामधीवहे, वयमधीमहे । तथाऽधीष्वाधीष्वेत्येवायमध्यगीष्ट । अधीष्वाधीष्वेत्येवायमध्यैत । अधीष्वाधीष्वेत्येवायमधिजगे । अधीष्वाधीष्वेत्येवायमध्येष्यते । अधीष्वाधीष्वेत्येवायमध्येता । अधीष्वाधीष्वेत्येवायमधीयीत । अधीष्वाधीष्वेत्येवायमधीताम् । अधीष्वाधीष्वेत्येवायमध्येषीष्ट । एवं सर्वविभक्तिवचनान्तरेष्वपि हिस्वावुदाहरणीयौ । एवं भावकर्मणोरपि शय्यस्व शय्यस्वेत्येव शय्यते, अशायि, शयिष्यते भवता । लूयस्व लूयस्वेत्येव लूयते, अलावि, लविष्यते केदारः ॥ **तध्वमौ तद्युष्मदि** लुनीत लुनीहीत्येव यूयं लुनीथ । लुनीहि लुनी-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हीत्येव यूयं लुनीथ । अधीध्वमधीध्वमित्येव यूयमधीध्वे । अधीष्वाधीष्वेत्येव यूयमधीध्वे । तथा लुनीत लुनीतेत्येव यूयमलाविष्ट । लुनीहि लुनीहीत्येव यूयमलाविष्ट । अधीध्वमधीध्वमित्येव यूयमध्यैढ्वम्, अधीष्वाधीष्वेत्येव यूयमध्यगीढ्वम् । एवं ह्यस्तन्यादिष्वप्युदाहार्यम् ॥ यथाविधीति किम्? लुनीहि लुनीहीत्येवायं लुनाति, छिनत्ति लूयते वेति धातोः सम्बन्धे माभूत् । अधीष्वाधीष्वेत्येवायमधीते, पठति अधीयते वेति धातोः सम्बन्धे माभूत् लुनीत लुनीतेत्येव यूयं लुनीथ, छिन्थेति धातोः संबंधे माभूत् । अधीध्वमधीध्वमित्येव यूयमधीध्वे, पठथेति धातोः संबंधे माभूत् ॥ लुनीहि लुनीहीत्यादौ च भृशाभीक्ष्ण्ये द्विर्वचनम् । **ननु** च भृशाभीक्ष्ण्ययोर्यङपि विधीयते नतु तत्र द्विर्वचनमिह तु द्विर्वचनमित्यत्र को हेतुः । **उच्यते** । ;यङ् स्वार्थिकत्वात्प्रकृत्यर्थोपाधी भृशाभीक्ष्ण्ये समर्थोऽवद्योतयितुमिति तदभिव्यक्तये द्विर्वचनं नापेक्षते । हिस्वादयस्तु कर्तृकर्मभावार्थत्वेनास्वार्थिकत्वादसमर्थाः प्रकृत्यर्थोपाधी भृशाभीक्ष्ण्ये अवद्योतयितुमिति तदवद्योतनाय द्विर्वचनमपेक्षन्त । सर्वं चैतदित्यादीति वचनेन संगृहीतं बोद्धव्यम् ॥ ३९ ॥

## सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः ॥ ४० ॥ [ सि० ५।४।९ ]

**सप्तम्या अर्थो निमित्तं हेतुफलकथनादिसामग्री । कुतश्चिद्वैगुण्यात्क्रियानभिनिर्वृत्तौ सत्यामेष्यदर्थाद्धातोः सप्तम्यर्थे क्रियातिपत्तिः स्यात् ।**

'सप्त०' क्रियानभिनिर्वृत्तौ सत्यामिति । कुतश्चिद्वैगुण्यात्क्रियाया अतिपतनमनभिनिर्वृत्तिरनिष्पत्तिरित्यर्थस्तस्यां सत्यामेष्यदर्थे वर्त्तमानाद्धातोः क्रियातिपत्तिः स्यात् । यथा दक्षिणेन चेदयास्यत् अथवा कमलकमाह्वास्यत् न शकटं पर्याभविष्यत् अत्र दक्षिणगमनं कमलकाह्वानं च हेतुरपर्याभवनं फलं तयोः कुतश्चित्प्रमाणाद्भविष्यन्तीमनभिनिर्वृत्तिमवगम्यैवं प्रयुङ्क्ते । एवमभोक्ष्यत भवान् ( घृतेन ) यदि मत्समीपमागमिष्यत् । स यदि गुरुमुपासिष्यत शास्त्रान्तमगमिष्यत् । अत्रायं विशेषः **'भूते'** ( ५।४।१० ) भूतेऽर्थे वर्त्तमानाद्धातोः क्रियातिपत्तौ सत्यां क्रियातिपत्तिः स्यात् । 'सप्तम्युताप्योर्बाढे' ( ५।४।२१ ) इत्यारभ्य सप्तम्यर्थे अनेन क्रियातिपत्तिविधानम्, ततः प्राग् 'वोतात्प्राक्' ( ५।४।११ ) इति विकल्पो वक्ष्यते । दृष्टो मया भवतः पुत्रोऽन्नार्थी चंक्रम्यमाणः अपरश्चातिथ्यर्थी यदि स तेन दृष्टोऽभविष्यत् अत्राश्रद्धाया गम्यमानत्वात् 'जातुयद्यदा' ( ५।४।१७ ) इति सप्तमीनिमित्तत्वम् । उताभोक्ष्यत अप्यभोक्ष्यत नतु दृष्टोऽन्येन पथा गत इति न भुक्तवान् । 'सप्तम्युताप्योर्बाढ' इति सप्तम्यर्थः ॥ **'वोतात्प्राक्'** ( ५।४।११ ) 'सप्तम्युताप्योर्बाढे' इत्यत्र यद् उतशब्दसंकीर्तनं ततः प्राक् सप्तमीनिमित्ते क्रियातिपत्तौ सत्यां भूतेऽर्थे वर्त्तमानाद्धातोः वा क्रियातिपत्तिः स्यात् । कथं नाम संयतः सन्ननागाढे तत्रभवानाधायकृतमसेविष्यत धिग्गर्हामहे । वावचनाद्यथाप्राप्तं च । कथं सेवेत कथं सेवते । उतात्प्रागिति किम्? कालो यदभोक्ष्यत भवान् । अत्र सप्तमी यदीति सप्तम्यर्थता ततो 'भूत' इति नित्यं क्रियातिपत्तिः । भूत इत्येव--एष्यति तु नित्यमेव ॥ सूत्रक्रमेण 'सप्तम्युताप्योर्बाढे' इत्येवं तत्सूत्रात्प्राक् सप्तमीसूत्राणि चैवम् । एषु क्रियातिपत्तिविधानमस्तीति क्रियातिपत्त्यधिकारे एतान्युच्यन्ते । तथाहि **'कथमि सप्तमी च वा'** ( ५।४।१३ ) कथंशब्दे उपपदे क्षेपे गम्यमाने धातोः सर्वेषु कालेषु सप्तमी चकाराद्वर्त्तमाना च विभक्तिर्वा स्याताम् । वावचनाद्यथाप्राप्तं च । कथं नाम तत्रभवान् मांसं भक्षयेत् मांसं भक्षयति धिग्गर्हामहे अन्याय्यमेतत् । पक्षे अबभक्षत् अभक्षयत् भक्षयाञ्चकार भक्षयिता भक्षयिष्यति । अत्र सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः स्यात् । कथं नाम तत्रभवान् मांसमभक्षयिष्यत् भक्षयेत् भक्षयति अबभक्षत् अभक्षयत् भक्षयाञ्चकार । भविष्यति तु

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्रियातिपतने नित्यमेव क्रियातिपत्तिः कथं नाम तत्रभवान् मांसमभक्षयिष्यत्, नतु वर्त्तमानासप्तमी भविष्यन्तीश्वस्तन्यः । क्षेप इत्येव—कथं नाम तत्रभवान् साधूनपूपुजत् । एवं यथाप्राप्तिर्वर्त्तमानादयोऽपि भवन्ति ॥ **'किंवृत्ते सप्तमीभविष्यन्त्यौ'** ( ५।४।१४ ) किंवृत्ते पूर्वोक्तलक्षणे उपपदे सति क्षेपे गम्यमाने धातोः सप्तमीभविष्यन्त्यौ स्याताम्, सर्वविभक्त्यपवादः । किं तत्रभवाननृतं ब्रूयात्, किं तत्रभवाननृतं वक्ष्यति, को नाम कतरो नाम कतमो नाम यस्मै तत्रभवाननृतं ब्रूयात्, अनृतं वक्ष्यति, अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः, किं तत्रभवाननृतमवक्ष्यत्, पक्षे ब्रूयात् वक्ष्यति च । भविष्यति तु नित्यम्—किं तत्र भवाननृतमवक्ष्यत् । क्षेप इत्येव—किं तत्रभवान् देवान् अपूपुजत् इत्यादि । **'अश्रद्धामर्षेऽन्यत्रापि'** ( ५।४।१५ ) क्षेप इति निवृत्तम् । अश्रद्धा असम्भावना, अमर्षोऽक्षमा, अन्यत्राकिंवृत्ते अपि शब्दात्किंवृत्ते चोपपदे श्रद्धामर्षयोर्गम्यमानयोर्धातोः सप्तमीभविष्यन्त्यौ भवतः, सर्वविभक्त्यपवादः । वचनभेदाद्यथासङ्ख्यं नास्ति । अश्रद्धायाम् न श्रद्दधे न सम्भावयामि नावकल्पयामि तत्रभवान् नामादत्तं गृह्णीयात् । किंवृत्तेऽपि—न श्रद्दधे न सम्भावयामि नावकल्पयामि किं तत्रभवानदत्तमाददीत अदत्तमादास्यते । अमर्षे—न मर्षयामि न क्षमे धिग्मिथ्या नैतदस्ति तत्र भवान्नामादत्तं गृह्णीयात् अदत्तं गृहीष्यति । किंवृत्तेऽपि—न मर्षयामि न क्षमे धिग्मिथ्या नैतदस्ति किं तत्रभवानदत्तं गृह्णीयात् अदत्तं ग्रहीष्यति । अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिर्भवति । न श्रद्दधे न मर्षयामि तत्रभवानदत्तमग्रहीष्यत् पक्षे गृह्णीयात् ग्रहीष्यति च । भविष्यति तु नित्यम्—न श्रद्दधे न मर्षयामि तत्रभवानदत्तमग्रहीष्यत् । अन्यत्रापीति किम्? यदार्थात्प्रकरणाद्वाऽश्रद्धामर्षयोर्गम्यमानत्वात् तद्वाचकेनाप्युपपदेन धातोर्न योगस्तदा मा भूत् । **'जातुयद्यदायदौ सप्तमी'** (५।४।१७) एषु चतुर्षूपपदेष्वश्रद्धामर्षयोर्गम्यमानयोर्धातोः सप्तमी स्यात्, भविष्यन्त्यपवादः । न श्रद्दधे न क्षमे जातु तत्रभवान् सुरां पिबेत्, यत्तत्रभवान् सुरां पिबेत्, यदा तत्रभवान् सुरां पिबेत्, यदि तत्रभवान् सुरां पिबेत् । अत्र सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः । न श्रद्दधे न क्षमे जातु तत्रभवान् सुरामपास्यत्, पक्षे पिबेत् । भविष्यति तु नित्यम्—जातु तत्रभवान् सुरामपास्यत् । **'क्षेपे च यच्चयत्रे'** ( ५।४।१८ ) यच्चयत्रशब्दयोरुपपदयोः क्षेपेऽश्रद्धामर्षयोश्च गम्यमानयोर्धातोः सप्तमी स्यात्, अश्रद्धामर्षयोर्भविष्यन्त्याः, क्षेपे तु सर्वविभक्तीनामपवादः कालस्यानिर्देशात् त्रिष्वपि कालेष्वस्य प्रवर्त्तनात् । धिग्गर्हामहे यच्च तत्रभवानस्मानाक्रोशेत्, यत्र तत्रभवानस्मानाक्रोशेत् । न श्रद्दधे न क्षमे यच्च तत्रभवान् परिवादं कथयेत् २ । अत्र सप्तमीनिमित्तसत्त्वाद्भूते क्रियातिपतने वा क्रियातिपत्तिः । धिग्गर्हामहे न क्षमे न श्रद्दधे यच्च यत्र वा तत्रभवानस्मानाक्रोक्ष्यत्, पक्षे आक्रोशेत् । भविष्यति तु नित्यम्—धिग्गर्हामहे न श्रद्दधे न क्षमे यच्च यत्र वा तत्रभवान् परिवादमकथयिष्यत् । **'चित्रे'** ( ५।४।१९ ) चित्रमाश्चर्यम् । तस्मिन् गम्यमाने यच्चयत्रयोरुपपदयोर्धातोः सप्तमी स्यात् । सर्वविभक्त्यपवादः । चित्रमाश्चर्यमद्भुतं विस्मयनीयं च यच्च यत्र वा तत्रभवानकल्प्यं सेवेत । अत्रापि सप्तमीनिमित्तसद्भावात् भूत क्रियातिपतने वा क्रियातिपत्तिः । चित्रं यच्च यत्र वा तत्रभवानकल्प्यमसेविष्यत पक्षे सेवेत । भविष्यति तु नित्यम्—चित्रं यच्च यत्र वा तत्रभवानकल्प्यमसेविष्यत ॥ एवं वोतात्प्रागुक्तानि कथमि सप्तमी चेत्यादीनि सप्तमीविधायकानि षट्सूत्राण्यत्र दर्शितानि । एभिश्च सूत्रैः 'वोतात्प्रागि'ति वचनात् भूते क्रियातिपतने विकल्पेन क्रियातिपत्तिर्भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिर्भवतीति ज्ञेयम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ क्रियातिपत्तिविभक्तिमाह ।

क्रियातिपत्तिः । [सू० ३।३।१६]

| परस्मैपदिनः । | आत्मनेपदिनः । |
|---|---|
| स्यत् स्यताम् स्यन् । | स्यत स्येताम् स्यन्त । |
| स्यस् स्यतम् स्यत । | स्यथास् स्येथाम् स्यध्वम् । |
| स्यम् स्याव स्याम । | स्ये स्यावहि स्यामहि । |

सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत् । अभविष्यताम् अभविष्यन् । अभविष्यः अभविष्यतम् अभविष्यत । अभविष्यम् अभविष्याव अभविष्याम ॥ ४० ॥

क्रियातिपत्तिः स्यत् स्यतां स्यन् इत्यादि स्पष्टम् । सुवृष्टिश्चेदभविष्यदित्यादि स्पष्टम् ।

'अथ इत्यादिविभक्तीनां विविधा विधयः क्रमात् । उक्ता अपि समुच्चित्य दर्श्यन्ते स्मृतिहेतवे' ॥ १ ॥

'[१]सति' (५।२।१९) इति सूत्रेण वर्त्तमानकाले वर्त्तमाना ॥ १ ॥ '[२]स्मे च वर्त्तमाना' (५।२।१६) स्मे पुरादौ चोपपदे भूते वर्त्तमाना स्यात् ॥ १ ॥ पुरा तदा अथ यावद् ह शश्वत् इति षट पुरादयः ॥ ७ ॥ '[३]ननौ पृष्टोक्तौ सद्वत्' (५।२।१७) ननौ उपपदे भूते वर्त्तमाना ॥ ८ ॥ '[४]नन्वोर्वा' (५।२।१८) अनयोरुपपदयोर्भूते वर्त्तमाना । इति भूतकाले दश वर्त्तमानाविधयः । '[५]पुरायावतोर्वर्त्तमाना' (५।३।७) अनयोरुपपदयोर्वर्त्स्यति वर्त्तमाना स्यात् । चैत्र शीघ्रं भुङ्क्ष्व पुरा ग्रामं गच्छसि पश्चाद्गमिष्यसीत्यर्थः, पुराशब्दोऽत्र भविष्यदासन्ने । भोः सत्वरं पुस्तकं गृहाण पुराध्यापक आगच्छति । अयं यावद्भुङ्क्ते तावत्प्रतीक्षस्व । कदा राजभवनं प्रयास्यति यावद्भोज्यं भवति । अयं कियत्कालमध्येष्यते यावत्पाणिग्रहणं सम्पद्यते ॥ २ ॥ '[६]किंवृत्ते लिप्सायाम्' (५।३।९) इति वर्त्स्यति वर्त्तमाना ॥ ३ ॥ '[७]लिप्स्यसिद्धौ' (५।३।१०) वर्त्स्यति वर्त्तमाना ॥ ४ ॥ '[८]पञ्चम्यर्थहेतौ' (५।३।११) वर्त्स्यति वर्त्तमाना ॥ ५ ॥ '[९]सप्तमी चोर्द्ध्वमौहूर्त्तिके' (५।३।१२) इति वर्त्स्यति वर्त्तमाना ॥ ६ ॥ '[१०]भूतवच्चाशंस्ये वा' (५।४।२) वर्त्स्यति वर्त्तमाना ॥ ७ ॥ इति भविष्यत्काले सप्त वर्त्तमाना विधयः । '[११]सत्सामीप्ये सद्वद्वा' (५।४।१) इति भूतभविष्यतोर्वर्त्तमाना विधिः ॥ १ ॥ '[१२]क्षेपेऽपिजात्वोर्वर्त्तमाना' (५।४।१२) '[१३]कथमि सप्तमी च वा' (५।४।१३) इति सर्वेषु कालेषु वर्त्तमाना विधी द्वौ २ इत्येकविंशतिर्वर्त्तमानाविधयः ॥ वर्त्तमाने एकं सूत्रम्, भूते त्रीणि सूत्राणि, भविष्यति षट् सूत्राणि, भूतभविष्यतोरेकं सूत्रम्, सर्वकालेषु सूत्रद्वयम् । एवं वर्त्तमानासूत्राणि त्रयोदश ॥ १३ ॥

'[१]विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थने' (५।४।२८) विध्यादिषु षट्सु सर्वप्रत्ययापवादौ सप्तमीपञ्चम्यौ ॥ ६ ॥ '[२]सप्तम्युताप्योर्बाढे' (५।४।२१) बाढार्थयोरुताप्योर्योगे सप्तमी ॥ ८ ॥ '[३]सम्भावनेऽलमर्थे तदर्थानुक्तौ' (५।४।२२) सप्तमी ॥ ९ ॥ '[४]अयदि श्रद्धाधातौ नवा' (५।४।२३) श्रद्धा सम्भावना तदर्थे धातौ उपपदे अलमर्थविषये गम्ये धातोः सप्तमी ॥ १० ॥ '[५]इच्छार्थे सप्तमीपञ्चम्यौ' (५।४।२७) इच्छार्थे धातावुपपदे कामोक्तौ गम्यमानायां सर्वविभक्त्यपवादौ सप्तमीपञ्चम्यौ ॥ ११ ॥ '[६]इच्छार्थे कर्मणः सप्तमी' (५।४।८९) इच्छार्थोपपदे तुल्यकर्तृकत्वे सप्तमी । भुञ्जीय इतीच्छति चैत्रः ॥ १२ ॥ '[७]कामोक्तावकच्चिति' (५।४।२६) काम इच्छा तस्या उक्तौ कच्चिच्छब्दाप्रयोगे सप्तमी ॥ १३ ॥ '[८]सप्तमी यदि' (५।४।३४) यच्छब्दप्रयोगे कालवेलासमयेषु उपपदेषु सप्तमी ॥ १६ ॥ '[९]शक्तार्हे कृत्याश्च' (५।४।३५) शक्ते अर्हे च कर्त्तरि वाच्ये गम्यमाने वा धातोः कृत्याः सप्तमी च स्युः ॥ १८ ॥ '[१०]किंवृत्ते सप्तमीभविष्यन्त्यौ' (५।४।१४) किंवृत्ते पूर्वोक्तलक्षणे उपपदे क्षेपे गम्ये



Jain Education International For Personal & Private Use Only www.jainelibrary.org

धातोः सप्तमी ॥ १९ ॥ 'अश्रद्धामर्षेऽन्यत्रापि' ( ५।४।१५ ) अकिंवृत्ते किंवृत्तेऽपि अश्रद्धामर्षयोर्गम्ययोः सर्वविभक्त्यपवादौ सप्तमीभविष्यन्त्यौ ॥ २१ ॥ 'जातुयद्यदायदौ सप्तमी' ( ५।४।१७ ) एषु चतुर्षूपपदेषु अश्रद्धामर्षयोः सप्तमी ॥ २९ ॥ 'सतीच्छार्थात्' ( ५।४।२४ ) इच्छार्थाद्धातोर्वर्त्तमानकाले सप्तमी ॥ ३० ॥ **अथ भविष्यति सप्तमी** 'क्षिप्राशंसार्थयोर्भविष्यन्तीसप्तम्यौ' ( ५।४।३ ) क्षिप्रार्थे आशंसार्थे चोपपदे आशंस्येऽर्थे यथासङ्ख्यं भविष्यन्तीसप्तम्यौ स्याताम् । भूतवच्चेत्यस्यापवादः ॥ ३१ ॥ 'वर्त्स्यति हेतुफले' ( ५।४।२५ ) हेतुः कारणं फलं कार्यम् हेतुभूते फलभूते वर्त्स्यति सप्तमी वा ॥ ३२ ॥ 'सप्तमी चोर्ध्वमौहूर्त्तिके' ( ५।४।३० ) इति वर्त्स्यति सप्तमी ॥ ३३ ॥ 'कथमि सप्तमी च वा' ( ५।४।१३ ) इति सर्वेषु कालेषु सप्तमी ॥ ३४ ॥ 'क्षेपे च यच्चयत्रे' ( ५।४।१८ ) यच्चयत्रयोरुपपदयोः क्षेपेऽश्रद्धामर्षयोश्च गम्ययोः सप्तमी स्यात् । अश्रद्धामर्षयोर्भविष्यन्त्याः, क्षेपे तु सर्वविभक्तीनामपवादः कालस्यानिर्देशात्त्रिष्वपि कालेष्वस्य प्रवर्त्तनात् ॥ ४० ॥ 'चित्रे' ( ५।४।१९ ) आश्चर्ये यच्चयत्रयोरुपपदयोः सप्तमी । सर्वविभक्त्यपवादः ॥ ४२ ॥ एवं सप्तम्या द्विचत्वारिंशद्विधयः, एकोनविंशतिश्च सूत्राणि ।

'विधिनिमन्त्रणे'ति सूत्रेण विध्याद्यर्थषट्के पञ्चमी ॥ ६ ॥ 'प्रैषानुज्ञावसरे कृत्यपञ्चम्यौ' ( ५।४।२९ ) ॥ ९ ॥ 'आशिष्याशीः पञ्चम्यौ' ( ५।४।३८ ) ॥ १० ॥ कश्चित्तु समर्थनायां पञ्चमीमिच्छति, परैरशक्यस्य वस्तुनोऽध्यवसायः समर्थना । कश्चिदाह-समुद्रः शोषयितुमशक्यः, स प्राह समुद्रमपि शोषयाणि पर्वतमप्युत्पाटयानि ॥ ११ ॥ 'भृशाभीक्ष्ण्ये हिस्वौ यथाविधि तध्वमौ च तद्युष्मदि' ( ५।४।४२ ) ॥ १२ ॥ 'प्रचये नवा सामान्यार्थस्य' ( ५।४।४३ ) ॥ १३ ॥ इति त्रयोदश पञ्चमीविधयः, पञ्च च सूत्राणि ।

'अनद्यतने ह्यस्तनी' ( ५।२।७ ) ॥ १ ॥ 'ख्याते दृश्ये' ( ५।२।८ ) अरुणत्सिद्धराजोऽवन्तीम्, अख्याते तु परोक्षा—चकार कटं बटुः ॥ २ ॥ 'हशश्वद्युगान्तःप्रच्छ्ये ह्यस्तनी च' ( ५।२।१३ ) चकारात् परोक्षा ॥ ४ ॥ 'अविवक्षिते' ( ५।२।१४ ) भूतानद्यतने परोक्षे परोक्षत्वेनाविवक्षिते ह्यस्तनी ॥ ५ ॥ 'सस्मे ह्यस्तनी च' ( ५।४।४० ) सस्मे माङ्युपपदे ह्यस्तनी ॥ ६ ॥ चकारादद्यतनी । मास्म करोत् मास्म कार्षीत् । माशब्देन निषेध उच्यते स्मशब्देन स एव द्योत्यते । इति षट् ह्यस्तनीविधयः, पञ्च सूत्राणि ।

'अद्यतनी' ( ५।२।४ ) अद्यतनकाले भूतार्थाद्धातोरद्यतनी ॥ १ ॥ 'विशेषाविवक्षाव्यामिश्रे' ( ५।२।५ ) ह्यस्तन्यादिविषयेऽप्यद्यतन्यर्थं वचनम् ॥ ३ ॥ 'रात्रौ वसोऽन्त्ययामास्वप्तर्यद्य' ( ५।२।६ ) ह्यस्तन्यपवादोऽद्यतनी ॥ ४ ॥ 'माङ्यद्यतनी' ( ५।४।३९ ) सर्वविभक्त्यपवादः ॥ ५ ॥ 'सस्मे ह्यस्तनी च' ( ५।४।४० ) चकारादद्यतनी ॥ ६ ॥ इत्यद्यतनीविधयः षट्, सूत्राणि पञ्च ।

'परोक्षे' ( ५।२।१२ ) भूतानद्यतने परोक्षेऽर्थे परोक्षा स्यात् ॥ १ ॥ परोक्षत्वेनाद्यतनत्वेन चाविवक्षिते विशेषाविवक्षेत्यनेनाद्यतनी, परोक्षत्वेन त्वविवक्षिते 'अविवक्षिते' इत्यनेन ह्यस्तनी, परोक्षत्वेनानद्यतनत्वेन च विवक्षिते 'परोक्षे' इत्यनेन परोक्षा । एवं च परोक्षानद्यतने विवक्षावशात् ह्यस्तन्यद्यतनीपरोक्षास्तिस्रो विभक्तयः सिद्धाः । 'कृतास्मरणातिनिह्नवे परोक्षा' ( ५।२।११ ) अपरोक्षकालार्थ आरम्भः ॥ २ ॥ परोक्षाविधी द्वौ, सूत्रे द्वे ।

'आशिष्याशीः पञ्चम्यौ' आशीर्विधिरेकः, सूत्रमेकम् ।

'अनद्यतने श्वस्तनी' ( ५।३।५ ) ॥ १ ॥ 'परिदेवने' ( ५।३।६ ) परिदेवनमनुशोचनं तस्मिन् गम्ये वर्त्स्यति श्वस्तनी ॥ २ ॥ अद्यतनार्थं आरम्भः । श्वस्तनी विधी द्वौ, सूत्रे द्वे ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'भविष्यन्ती' (५।३।४) सामान्यतो भविष्यदर्थाद्धातोर्भविष्यन्ती ॥ १ ॥ 'अयदि स्मृत्यर्थे भविष्यन्ती' (५।२।९) स्मृत्यर्थे धातावुपपदे भूतेऽर्थे भविष्यन्ती ॥ २ ॥ 'क्षिप्राशंसार्थयोर्भविष्यन्ती सप्तम्यौ' (५।४।३) इति क्षिप्रार्थे उपपदे भविष्यन्ती 'भूतवच्चाशंस्ये वा' (५।४।२) इत्यस्यापवादः ॥ ३ ॥ 'वा काङ्क्षायाम्' (५।२।१०) स्मृत्यर्थे धातावुपपदे यद्ययदि वा प्रयुज्यमाने प्रयोक्तुः क्रियान्तराकाङ्क्षायां भूतानद्यतने वा भविष्यन्ती, पक्षे ह्यस्तनी ॥ ४ ॥ 'शेषे भविष्यन्त्ययदौ' (५।४।२०) सर्वविभक्त्यपवादः ॥ ५ ॥ 'किंकिलास्त्यर्थयोर्भविष्यन्ती' (५।४।१६) किंकिलशब्देऽस्त्यर्थे चोपपदेऽश्रद्धामर्षयोर्गम्यमानयोर्भविष्यन्ती ॥ ६ ॥ इति भविष्यन्तीविधयो नव, षट् सूत्राणि।

'सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः' (५।४।९)। सप्तम्या अर्थो निमित्तं हेतुफलकथनादिका सामग्री कुतश्चिद्वैगुण्यात् क्रियाया अतिपतनमनभिनिर्वृत्तिस्तस्यां सत्यामेष्यदर्थे धातोः सप्तम्यर्थे क्रियातिपत्तिः स्यात्। दक्षिणेन चेद्यास्यन्न शकटं पर्याभविष्यत्, यदि कमलकमाह्वास्यन्न शकटं पर्याभविष्यत्। अत्र दक्षिणेन गमनं कमलकाह्वानं च हेतुः, अपर्याभवनं फलम्। तयोः कुतश्चित् प्रमाणाद् भविष्यन्तीमनभिनिर्वृत्तिमवगम्यैवं प्रयुङ्क्ते इति भविष्यति क्रियातिपत्तिः। 'भूते' (५।४।१०) भूतेऽर्थे क्रियातिपत्तौ सत्यां क्रियातिपत्तिः। यद्ययं दानमदास्यत्ततो विश्वेऽपि यशः प्रासरिष्यत्। यदि ग्राममगमिष्यत्तदा चौरा द्रव्यं नाहरिष्यन्। इति भूते क्रियातिपत्तिः। इति क्रियातिपत्तिविधी द्वौ, सूत्रे द्वे।

'विधिस्त्यादिविभक्तीनां प्रागुक्तोऽप्युदितः पुनः। बालबोधप्रवृत्तानां पुनरुक्तिर्न दूषणम् ॥ १ ॥
विभक्तिषु दशस्वेवं भूधातुः प्रतिपादितः। धातवोऽन्येऽथ वक्ष्यन्ते धातुपाठक्रमाश्रिताः ॥ २ ॥ ४० ॥

**'पां पाने', अनुस्वार इड्निषेधार्थः।**

'पां पाने'। अनुस्वार इड्निषेधार्थ इति न 'एकस्वरादनुस्वारेत' इति वक्ष्यमाणसूत्रेण इड्निषेधात्

## श्रौतिकृवुधिवुपाघ्राध्मास्थाम्नादाम्दृश्यर्तिशदसदः शृकृधिपिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छशीयसीदम् ॥ ४१ ॥ [ सि० ४।२।१०८ ]

**श्रौत्यादीनां त्रयोदशानां शिति शृप्रभृतयस्त्रयोदशादेशाः स्युः। पिबति पिबतः पिबन्ति १। पिबेत् पिबेताम् पिबेयुः २। पिबतु पिबतात्, पिबताम् पिबन्तु ३। अपिबत् अपिबताम् अपिबन् ४। पिबैतिदेति सिज्लोपे अपात् २ अपाताम् ॥ ४१ ॥**

'श्रौति०' श्रौतिश्च कृवुश्च धिवुश्च पाश्च घ्राश्च ध्माश्च स्थाश्च म्नाश्च दाम् च दृशिश्च अर्त्तिश्च शदश्च सद् च श्रौति० तस्य श्रौति०। शृश्च कृश्च धिश्च पिबश्च जिघ्रश्च धमश्च तिष्ठश्च मनश्च यच्छश्च पश्यश्च ऋच्छश्च शीयश्च सीदश्च शृधि०। श्रौत्यादीनां त्रयोदशनामिति। 'श्रुंट् श्रवणे' १ 'कृवुट् हिंसाकरणयोः' २ 'धिवुट् गतौ' ३ 'पां पाने' ४ 'घ्रां गन्धोपादाने' ५ 'ध्मां शब्दाग्निसंयोगयोः' ६ 'ष्ठां गतिनिवृत्तौ' 'षः सोऽष्टयैष्ठिवष्वष्क' (२।३।९८) इति षस्य सत्वे निमित्ताभावे नैमित्तकस्याप्यभाव इति ठस्य थत्वे स्था ७ 'म्नां अभ्यासे' ८ 'दाम् दाने' ९ 'दृशृं प्रेक्षणे' १० इति दृशिः, 'ऋं प्रापणे च' ११ इति अर्त्तिः, 'शद्लृं शातने' १२ इति शद्, 'षद्लृं विशरणगत्यवसादनेषु' १३ 'षः सोऽष्ट्यै०' इति सद् 'यथासङ्ख्यमनुदेशः समानाम्' इति न्यायादेतेषां त्रयोदशानां धातूनां शृप्रभृतयस्त्रयोदशादेशा यथासङ्ख्यं भवन्तीति भावः। शितीति शित्प्रत्यये परे। तत्राद्याश्चतस्रो विभक्तयः 'एताः शितः' (३।३।१०) इति परिभाषया शितः, अन्ये शत्रादयश्च प्रत्ययाः शकारानुबन्धत्वात् शित इति ज्ञेयम्। तत्र श्रौतेः शृ शृणोति शृण्वन्। कृवोः कृ कृणोति। धिवोर्धिः धिनोति। पः पिबति शे उत्पिबः, स्वरान्तत्वादुपान्त्यलक्षणो गुणो न भवति। घ्रो

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जिघ्रः जिघ्रति शे उज्जिघ्रः। ध्मो धमः धमति उद्धमः। स्थस्तिष्ठस्तिष्ठति। म्नो मनः मनति। दामो यच्छः यच्छति। दृशः पश्यः पश्यति शे उत्पश्यः। अर्त्तेः ऋच्छः ऋच्छति समृच्छमानः। शदेः शीयः 'शदेः शिति' (३।३।४१) इत्यात्मनेपदे शीयते शीयमानः॥ सदेः सीदः सीदति सीदन्। घ्रादिभिः साहचर्यात्पार्त्योर्भौवादिकयोरेव ग्रहणम्, लाक्षणिकत्वाच्च पैं इत्येतस्य न ग्रहणम्, तेन पाम् इयत् पायति॥ श्रोत्यर्त्तोस्तिव्निर्देशः, कृवुधिवुद्दशृदामामनुबन्धश्च यङ्लुप्यादेशनिवृत्त्यर्थः। शोश्रुवत्। अर्त्तेर्यङ्लुपि द्वित्वे पूर्वस्य 'ऋतोऽत्' (४।१।३८) इत्यत्वे रागमे धातोश्च रत्वे तन्निमित्ते रागमलोपे पूर्वाकारस्य दीर्घे च आरत्, अत्र अरर्तीति वाक्ये शतृः। चरीकृण्वत् अत्र चरीकृणोतीति वाक्ये शतृः, 'उदितः स्वरान्नोऽन्तः' (४।४।९८) इति नागमने वस्य ऊदि गुणे च वाक्यम्, केचिदूटं नेच्छन्ति तन्मते चरिकर्तीति वाक्यम्। देधिन्वदित्यत्रापि नोऽन्ते ऊदि गुणे च देधिनोतीति वाक्यम्, मतान्तरे तु देधिन्वीति। दर्दृशत् इति अत्र दर्द्रष्टीति वाक्ये शतृः। दामस्तु दादेतीतिवाक्ये शतरि दादत्। केचित्तु श्रौतेर्यङ्लुप्यादेशं श्नुप्रत्ययं चेच्छन्ति शृणोति, कृवुधिन्वोस्तु चरीकृणोति देधिनोतीति रूपं मन्यन्ते (ते हि यङ्लुपि उप्रत्ययम्, वकारस्याकारान्तस्य 'अतः' (४।३।८२) इति लोपम्, अकारस्य स्थानिवद्भावादुपान्त्यगुणाभावं मन्यन्ते)। दामो मकारनिर्देशो दासंज्ञशङ्कानिवृत्त्यर्थश्च। अत्यादावित्यनुवृत्तेः पापातीत्यत्र यङ्लुपि अनन्तरे त्यादौ पिबादेशो न स्यात्। एवं च पाधातोः पिबादेशे पिबतीत्यादिरूपनिरूपणं चतसृष्वपि विभक्तिषु भवत्यनुसारेण ज्ञेयम्॥ ४१॥ अद्यतन्याः प्रथमत्रिकबहुवचने सूत्रम्

## सिज्विदोऽभुवः॥ ४२॥ [ सि० ४।२।९२ ]

अभुवः सिच्प्रत्ययान्ताद्विदश्च धातोः परस्यानः पुस् स्यात्। पकार इत॥ ४२॥

'**सिज्वि०**' अभुव इति, न चेत् भुवः परः सिच् भवति। भूवर्जनेन सिच् प्रत्ययो लक्ष्यते, अन्यथा 'षिचींत्' इत्यस्य ग्रहणं स्यात्। 'वा द्विषातोऽनः पुस्' (४।२।९१) इति सूत्रे शितोऽनः पुस्विधानादत्राद्यतन्याः सिच् लक्ष्यते। अभुव इति किम्? अभूवन्॥ ४२॥

## इडेत्पुसि चातो लुक्॥ ४३॥ [ सि० ४।३।९४ ]

**क्ङित्यशिति स्वरे इटि एति पुसि च परे आदन्तस्य धातोरन्तस्य लुक् स्यात्। अपुः। अपाः अपातम् अपात। अपाम् अपाव अपाम ५॥ ४३॥**

'इडे०' किति स्वरे पपतुः पपुः। ङिति स्वरे अदधत् आह्वत्। यान्ति वान्तीत्यादौ 'शिदवित्' (४।३।२०) इति अन्तेः कित्त्वेऽपि शित्त्वादातो लुग् न स्यात्। इटि पपिथ। यङ्लुपि दादितुम् दादितव्यम्। एतीति एकारे परे व्यतिरे व्यतिले रांक् लांक् इत्येतयोः 'क्रियाव्यतिहारे०' (३।३।२३) इत्यात्मनेपदे वर्त्तमानयोः ए परे रूपम्। पुसीति उदगुः अपुः। क्ङितीत्येव-दानम्, ददौ। अशितीत्येव-व्यतिरे व्यतिले, रांकलांकोर्ह्यस्तनी इपरे अडागमे शित्त्वादाकारलोपाभावे 'अवर्णस्ये०' (१।२।६) एत्वे रूपम्। स्वर इत्येव-ग्लायते। अक्ङिदर्थं शिदर्थं चेडादिग्रहणम्॥ ४३॥

## ह्रस्वः॥ ४४॥ [ सि० ४।१।३९ ]

द्वित्वे सति पूर्वस्य ह्रस्वः स्यात्॥ ४४॥

## आतो णव औः॥ ४५॥ [ सि० ४।२।१२० ]

**आतः परस्य णव औः स्यात्॥ ४५॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'ह्रस्व' इति, 'आतो णव०' इति च सूत्रद्वयं स्पष्टम् ॥ ४४ ॥ ४५ ॥

## इन्ध्यसंयोगात्परोक्षा किद्वत् ॥ ४६ ॥ [ सि० ४।३।२१ ]

**इन्धेरसंयोगान्ताच्च परा अवित्परोक्षा किद्वत्स्यादिति किँत्वादिडेत्पुसीत्यालुक् । पपौ पपतुः पपुः ॥ ४६ ॥**

'इन्ध्य०' न विद्यते संयोगो यस्यासावसंयोगः । इन्धिश्च असंयोगश्च इन्ध्यसंयोगं तस्मात् यथा 'ञिइन्धैपि दीप्तौ' इन्ध समूपूर्वः, परोक्षाया ए, 'द्विर्धातुः०' द्वित्वं 'व्यञ्जनस्यानादेर्लुक्' (४।१।४४) इति पूर्वावयवस्य नकारधकारयोर्लोपः, किद्वत्तायाः फलं 'नो व्यञ्जनस्यानुदितः' (४।२।४५) इति द्वितीयावयवस्य नलुक्, ततः 'समानानां तेनेति दीर्घे समीधे । एवं निन्यतुः बिभिदतुः—अत्र किस्त्वाद्गुणाभावः ईजतुः उचुः—अत्र य्वृत्त्वम् । तथाहुः ङिद्वदिति प्रकृते किद्वचनं यजादिस्वपीनां य्वृदर्थं जागर्तेश्च गुणार्थम्, ङित्वे हि ते न स्याताम् यथा स्वपितः स्वपन्ति जागृतः जाग्रति । इन्धिग्रहणं संयोगान्तार्थमिति । प्रकृते च वित्परोक्षायाः किद्वत्तायां फलमाह—किँत्वादित्यादि ॥ ४६ ॥ परोक्षायुष्मदर्थैकवचने सूत्रम् ।

## सृजिदृशिस्कृस्वरात्वतस्तृजूनित्यानिट्-
## स्थवः ॥ ४७ ॥ [ सि० ४।४।७८ ]

**सृजिदृशिभ्यां स्कृगः स्वरान्तादत्वतश्च तृजिनित्यानिटो विहितस्य थव आदिरिड्वा स्यात् । पपाथ पपिथ पपथुः पप । पपौ पपिव पपिम ६ ॥ ४७ ॥**

'सृजि०' सृजिश्च दृशिश्च स्कृश्च स्वरश्च अत्वतश्च सृजि० । तस्मात् । स्कृरिति 'संपरेः कृगः स्सट्' (३।४।९१) इत्यादिविहितेन स्सटा सहितः कृग्धातुरित्यर्थः । न विद्यते इट् यस्य स अनिट्, नित्यमनिट् नित्यानिट् । तृजि नित्यानिट् तृजूनित्यानिट् । तस्मात् । क्रमेणोदाहरणानि—'सृजंत् अतिसर्गे' सस्रष्ठ ससर्जिथ । 'दृश्ं प्रेक्षणे' दृश् दद्रष्ठ ददर्शिथ । स्कृ—सञ्चस्कर्थ सञ्चस्करिथ । स्वर—ययाथ ययिथ, चिचयिथ चिचेथ, निनयिथ निनेथ, जुहोथ जुहविथ । अत्वत्-शशक्थ शशकिथ, पपक्थ पेचिथ, इयष्ठ इयजिथ, जगन्थ जगमिथ । सृज्यादेरिति किम्? 'राधं साधंट् संसिद्धौ' रराधिथ, बिभेदिथ । तृजिति किम्? किति नित्यानिटो मा भूत् लुलविथ । 'उवर्णादि'ति कितीट् निषेधः । नित्येति किम्? तृचि विकल्पितेटो मा भूत् दुधविथ ररन्धिथ 'धूगौदितः' (४।४।३८) इति तृचि इड्विकल्पः । अनिट इति किम्? शिश्रयिथ । थव इति किम्? पेचिव पेचिम । विहितविशेषणं किम्? चकर्षिथ । अदादेशस्य घसेर्वेगादेशस्य वयेस्तृच्यभावान्नित्यमेवेट् भवति जघसिथ उवयिथ । प्रकृत्यन्तरस्य तु घसेः परोक्षायामपि प्रायिक एव प्रयोगः । स्क्रादिसूत्रेण प्राप्ते विभाषा । स्वरान्तत्वेनैव सिद्धे स्कृग्रहणं 'ऋत' (४।४।७९) इति प्रतिषेधबाधनार्थम् ॥ प्रकृते तु इड्विकल्पे पपाथ पपिथेति ॥ ४७ ॥ आशिषि सूत्रम् ।

## गापास्थासादामाहाकः ॥ ४८ ॥ [ सि० ४।३।९६ ]

**एषां क्ङित्याशिष्येः स्यात् । पेयात् पेयास्ताम् पेयासुः । पेयाः पेयास्तम् पेयास्त । पेयासम् पेयास्व पेयास्म ७ ॥ ४८ ॥**

'गापा०' गाश्च पाश्च स्थाश्च साश्च दाश्च माश्च हाक् च गापा० । तस्य । 'कैं गैं रैं शब्दे' 'आत्सन्ध्यक्षरस्य' (४।२।१) इत्यात्वे गा । गास्थोर्मध्ये पाठात्साहचर्याद्भौवादिकयोः 'पैं ओवैं शोषणे' 'पां पाने' इत्येतयोः पाशब्देन ग्रहणम् 'पांक् रक्षणे' इत्येतस्य तु पायादित्येव रूपम्, न तु पेयादिति । 'पैं' इत्यस्या-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ष्येत्वं नेच्छन्त्यन्ये लाक्षणिकत्वादिति । 'ष्ठां गतिनिवृत्तौ' स्था स्थेयात् । 'षोंच् अन्तकर्मणि' 'क्षैं जैं सैं क्षये' आत्वे सा अवसेयात् । 'सैं' इत्यस्य नेच्छन्त्यन्ये सायात् । देति दासंज्ञाधातवः देयात् धेयात् । 'मांक् माने' मेयात् । गाङ्मेङ्माङां यङ्लुबन्तानां ग्रहः अन्यथामीषामात्मनेपदित्वात्किदाशीर्न सम्भवति । 'ओहांक् त्यागे' हेयात् । हाकः ककारो यङ्लुब्निवृत्त्यर्थः 'न हाको लुपि' (४।१।४९) इत्यात्वनिषेधे जहायात् । तथोक्तम् 'तिवा शवानुबन्धेन निर्दिष्टं यद्गणेन च । एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि' ॥ १ ॥ शेषाणां तु यङ्लुप्यपि—जागेयात् पापेयात् तास्थेयात् अवसासेयात् दावेयात् मामेयात् । एषामिति किम् ? यायात् । क्ङितीत्येव गासीष्ट पासीष्ट ॥ ४८ ॥ श्वस्तन्यां सूत्रम् ।

## एकस्वरादनुस्वारेतः ॥ ४९ ॥ [ सि० ४।४।५६ ]

**एकस्वरादनुस्वारेतो धातोः स्ताद्यशित इड् न स्यात् । पाता पातारौ पातारः ८ । पास्यति पास्यतः पास्यन्ति ९ । अपास्यत् अपास्यताम् अपास्यन् १० । घ्रां गन्धोपादाने । जिघ्रति १ । जिघ्रेत् २ । जिघ्रतु जिघ्रतात् ३ । अजिघ्रत् ४ ॥ ४९ ॥**

'एक०' अनिट्—धातुसंग्रहं चैवमाहुः

श्विश्रिडीशीयुरुक्षुक्ष्णुणुस्नुभ्यश्च वृगो वृङः । 'उदृदन्ता युजादिभ्यः स्वरान्ता धातवोऽपरे' ॥ १ ॥
'पाठ एकस्वराः स्युर्येऽनुस्वारेत इमे मताः । द्विविधोऽपि शकिश्चैवं वचिर्विचि-रिची पचिः' ॥ २ ॥

'सिञ्चतिर्मुचिरतोऽपि पृच्छति भ्रस्जि-मस्जि-भुजयो युजिर्यजिः ।
स्वञ्जि-रञ्जि-रुजयो निजि-विजृ-सञ्जि-भञ्जि-भजयः सृजि-त्यजी' ॥ ३ ॥
'स्कन्दि-विद्य-विद्लृ-विन्तयो नुदिः स्विद्यतिः शदि-सदी भिदि-च्छिदी ।
तुद्यदि पदि-हदी खिदि-क्षुदी राधि-साधि-शुधयो युधि-व्यधी' ॥ ४ ॥
'बन्धि-बुध्य-रुधयः क्रुधि-क्षुधी सिध्यतिस्तदनु हन्ति-मन्यती ।
आपिना तपि-शपि-क्षिपि-च्छुपो लुम्पतिः सृपि-लिपी वपि-स्वपी' ॥ ५ ॥
'यभि-रभि-लभि-यमि-रमि-नमि-गमयः क्रुशि-लिशि-रुशि-रिशि-दिशति-दशयः ।
स्पृशि-मृशति-विशति-दशि-शिष्लृ-शुषयस्त्विषि-पिषि-विष्लृ-कृषि-तुषि-दुषि-पुषयः' ॥६॥
मणिगुणनिकरच्छन्दः । 'श्लिष्यतिर्द्विषिरतो-घसि-वसती रोहतिर्लुहि-रिही अनिड् गदितौ ।
देग्धि-दोग्धि-लिहयो मिहि-वहती नह्यतिर्दिहिरिति स्फुटमनिटः' ॥ ७ ॥

एषामयमर्थः 'ट्वोश्वि गतिवृद्ध्योः' 'श्रिग् सेवायाम्' द्वौ ह्रस्वेदन्तौ । 'डीङ् विहायसां गतौ' 'डीङ्च् गतौ' 'शीङ्क् स्वप्ने,' त्रयो दीर्घेदन्ताः । 'युक् मिश्रणे' 'रुक् टुक्षुक् शब्दे' 'क्ष्णुक् तेजने' 'णुक् स्तुतौ' 'स्नुक् प्रस्रवणे' उदन्ताः षट् । 'वृग्ट् वरणे' 'वृङ्ग् सम्भक्तौ' सम्भक्तिः संसेवा । द्वौ ह्रस्वऋकारान्तौ । 'भू सत्तायाम्' 'णूत् स्तुतौ' 'लूग्श् छेदने' 'पूङ् पवने' 'मूङ् बन्धने' इत्यादयो दीर्घोदन्ताः । 'तॄ प्लवनतरणयोः' इत्यादयो ये दीर्घॠकारान्ताः युजादयश्चुराद्यन्तर्गताः अदन्ता धातवः, एभ्यः परे (भ्योऽपरे) ये स्वरान्ता अनुस्वारेतो धातवस्ते सर्वेऽप्यनिटो ज्ञेयाः । यथा 'पां पाने' । धात्वादेशा अपि धातव एवेति तेऽप्यनुस्वारेतोऽनिट एव । 'चक्षो वाचि क्शांग् ख्यांग्' (४।४।४) आक्शाता आख्याता । 'जि ञ्जि अभिभवे' जेता । 'णींग् प्रापणे' नेता । अजेर्वी प्रवेता । 'शुं गतौ' शोता । 'स्मृं चिन्तायाम्' स्मर्ता । तथा व्यञ्जनान्ता अपि पाठे धातुपाठे ये एकस्वरा अनुस्वारेतस्तेप्यनिटस्ते च इमे वक्ष्यमाणा मता

१ शीङ्साहचर्यात् यु-रु इत्येतयोरादादिकयोर्ग्रहणम् न 'रुङ् रेषणे च' 'युंग्श् बन्धने' इत्येतयोः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ज्ञाता वाचार्यैरिति शेषः । द्विविधोऽपि शकिरिति 'शकूंट् शक्तौ' 'शकींच् मर्षणे' द्वौ कान्तौ; शक्ता शक्तुम्, शक्यतेरिटमिच्छन्त्येके शकिता । 'वचंक् परिभाषणे' ब्रूगादेशो वा वक्ता वक्तुम् । 'विचूंपी पृथग्भावे' विक्ता विवेक्तुः । 'रिचूंपी विरेचने' विरेचनं निःसारणं रेक्ता । 'डुपचींष् पाके' पक्ता, 'षिचीत् क्षरणे' सेक्ता, 'मुचूंती मोक्षणे' मोक्ता चान्ताः षट् । 'प्रच्छंत् ज्ञीप्सायाम्' ज्ञीप्सा जिज्ञासा पृष्टा छान्त एकः । 'भ्रस्जींत् पाके' भ्रष्टा भर्ष्टा, 'टुमस्जोंत् शुद्धौ' शुद्धा स्नानं ब्रुडनं च लक्ष्यते, मङ्क्ता, 'भुजोंत् कौटिल्ये' 'भुजंप् पालनाभ्यवहारयोः' भोक्ता, 'युजिंच् समाधौ' 'युजूंपी योगे' योक्ता, 'यजीं देवपूजादिषु' यष्टा, 'ष्वजिंन् सङ्गे' परिष्वङ्क्ता, 'रञ्जीं रागे' रङ्क्ता, 'रुजोंत् भङ्गे' रोक्ता, 'णिजूं शौचे' नेक्ता निर्णेक्ता, 'विजूंकी पृथग्भावे' विवेक्ता, 'षञ्जं सङ्गे' सङ्क्ता, 'भञ्जौप् आमर्दने' भङ्क्ता, 'भजीं सेवायाम्' भक्ता, 'सृजिंच् विसर्गे' 'सृजंत् अतिसर्जने' स्रष्टा, 'त्यजं हानौ' त्यक्ता एकोनविंशतिर्जान्ताः ॥ १९ ॥ 'स्कंदृ गतिशोषणयोः' स्कन्ता, 'विदिंच् सत्तायाम्' सत्ता भावः, 'विदूंती लाभे' 'विदिंप् विचारणे' वेत्ता, विन्दतेरियमिच्छन्त्येके वेदिता धनस्य, 'णुदंत् प्रेरणे' नोत्ता ॥५॥ 'ष्विदांच् गात्रप्रक्षरणे' स्वेत्ता, 'शद्लृं शातने' 'षद्लृं विशरणगत्यवसादनेषु' सत्ता, 'भिदूंपी विदारणे' भेत्ता, 'छिदूंपी द्वैधीकरणे' छेत्ता १० । 'तुदींत् व्यथने' तोत्ता, 'अदंक् भक्षणे' अत्ता, जिघत्सति, 'पदिंच् गतौ' पत्ता, 'हदीं पुरीषोत्सर्गे' हत्ता, 'खिदिंच् दैन्ये' १५ । 'खिदिंत् परिघाते' मुचादिः, 'खिदिंप् दैन्ये' खेत्ता खिदतेरिटमिच्छन्त्येके खेदिता, 'क्षुदृंपी संपेषे' क्षोत्ता अष्टादश दान्ताः ॥ १८ ॥ 'राधंच् वृद्धौ' 'राधंट् संसिद्धौ' राद्धा, 'साधंट् संसिद्धौ' साद्धा, 'शुधंच् शौचे' शोद्धा, 'युधिंच् सम्प्रहारे' योद्धा, 'व्यधंच् ताडने' व्यद्धा, 'बन्धश् बन्धने' सम्बद्धा, 'बुधिंच् ज्ञाने' बोद्धा, 'रुधूंपी आवरणे' रोद्धा, 'कुधंच् कोपे' क्रोद्धा, 'क्षुधंच् बुभुक्षायाम्' क्षोद्धा, 'षिधंच् संराद्धौ' सेद्धा, धान्ता द्वादश । 'हनंक् हिंसागत्योः' हन्ता, 'मनिंच् ज्ञाने मन्ता । नान्तौ द्वौ । 'आप्लृंट् व्याप्तौ' आप्ता 'तपं सन्तापे' तपिंच् ऐश्वर्ये वा । तपं सन्तापे इत्यस्यैव धातोरैश्वर्येऽर्थे दिवादित्वमात्मनेपदं वा विधीयते । तथा 'शपीं आक्रोशे' 'शपींच् आक्रोशे' शप्ता, 'क्षिपंच् प्रेरणे' क्षेप्ता, 'छुपंत् स्पर्शे' छोप्ता, 'लुप्लृंती छेदने' लोप्ता, 'सृप्लृं गतौ' स्रप्ता सर्प्ता, 'लिंपीत् उपदेहे' उपदेहो वृद्धिः लेप्ता, 'डुवपीं बीजसन्ताने' वप्ता, 'ञिष्वपंक् शये' स्वप्ता । पान्तास्त्रयोदश । 'यभं मैथुने' यब्धा, 'रभिं राभस्ये' राभस्यं कार्योपक्रमः आरब्धा, 'डुलभिंष् प्राप्तौ' लब्धा । भान्तास्त्रयः । 'यमूं उपरमे' उपरमो निवृत्तिः यन्ता, 'रमिं क्रीडायाम्' रन्ता, 'णमं प्रह्वत्वे' प्रह्वत्वं नम्रत्वं नन्ता, 'गम्लृं गतौ' गन्ता । मान्ताश्चत्वारः । 'क्रुशं आह्वानरोदनयोः' क्रोष्टा, 'लिशंत् गतौ' लेष्टा, 'रुशंत् रिशंत् हिंसायाम्' रोष्टा रेष्टा, 'दिशींत् अतिसर्जने' अतिसर्जनं त्यागः देष्टा, 'दंशं दशने' दंष्टा, 'स्पृशंत् संस्पर्शे' स्प्रष्टा स्पर्ष्टा, 'मृशंत् आमर्शने' म्रष्टा मर्ष्टा, 'विशंत् प्रवेशने' वेष्टा, 'दृशूं प्रेक्षणे' द्रष्टा । शकारान्ता दश । 'शिष्लृंप् विशेषणे' विशेषणं गुणान्तरोत्पादनं शेष्टा, 'शुषंच् शोषणे' शोष्टा, 'त्विषीं दीप्तौ' त्वेष्टा, 'पिष्लृंप् सञ्चूर्णने' पेष्टा, 'विष्लृंकी व्याप्तौ' वेष्टा, 'कृषं कृषींत् विलेखने' क्रष्टा कर्ष्टा, 'तुषंच् तुष्टौ' तोष्टा, 'दुषंच् वैकृत्ये' दोष्टा, 'पुषंच् पुष्टौ' पोष्टा, 'श्लिषंच् आलिङ्गने' श्लेष्टा, 'द्विषींक् अप्रीतौ' द्वेष्टा । षकारान्ता एकादश । 'घस्लृं अदने' घस्ता, 'वसं निवासे' वस्ता सान्तौ द्वौ । 'रुहं जन्मनि' रोढा, 'लुहं रिहं इति हिंसार्थौ' सौत्रौ, अत एवैतौ अनिङ्गदितौ, धातुपाठे अपठितावित्यर्थः । लोढा रेढा । एतावनिटौ नेच्छन्ति केचित् । 'दिहींक् उपलेपे' देग्धा, 'दुहींक् क्षरणे' दोग्धा, 'लिहींक् आस्वादने' लेढा, 'मिहं सेचने' मेढा, 'वहीं प्रापणे' वोढा, 'णहींच् बन्धने' नद्धा,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'दहं भस्मीकरणे' दग्धा । द्रान्ता दश । एकस्वरादिति किम्? अवधीत् शाशकिता । विहितविशेषणं किम्? (चिकीर्षतेः पश्चादनेकस्वरत्वेऽप्यत्र प्रतिषेधो भवत्येव)। अनुस्वारेत इति किम्? चिरिवाचारीत् अषायीत्, अगावीत् अगवीत् ॥ कारिकायां श्व्यादिवर्जनादनुस्वारेत्त्वाभावेन सेट्त्वं सिद्ध्यति तदेव व्यावृत्तिद्वारेण दर्शयति श्वि श्वयिता, श्रि श्रयिता, डीङ् डीङ्च् वा डयिता, शीङ् शयिता, युक् यविता, रुक् रविता, क्षुक् क्षविता, क्ष्णुक् क्ष्णविता, णुक् नविता, स्नुक् प्रस्नविता, वृग्ट् प्रावरिता, वृङ्श् वरीता वरिता, भू भविता, णूत् नविता, लूगश् लविता, तॄ तरिता तरीता, स्तॄग्श् आस्तरिता आस्तरीता ।

'विज़्प्रभृतिधातूनामनुबन्धयुजामिह । स्विद्यति प्रभृतीनां च श्यादिनिर्देशशालिनाम्' ॥ १ ॥
'पाठे तदन्यतत्तुल्यव्यावृत्तिः फलमुह्यताम् । विज़्ंकी पृथग्भावे ग्राह्यो विज़्रिति श्रुतेः' ॥ २ ॥
'औविजैति भय इति दिवादिः स्विद्यतीति च । तान् व्यावृत्तिमुखेनैव दर्शयन्तीह सूरयः' ॥ ३ ॥

'ओविजैति भयचलनयोः' उद्विजिता, 'विदक् ज्ञाने' वेदिता शास्त्रस्य, 'ञिक्ष्विदाङ् ञिष्विदाङ् मोचने' च चकारात् स्नेहने, स्नेहनं स्नेहप्रयोगः क्ष्वेदिता स्वेदिता, 'ञिक्ष्विदांच् मोचने च' चकारात् स्नेहने, क्ष्वेदिता । अस्मादपीटं नेच्छन्त्येके क्ष्वेन्ता, 'बुधृग् बोधने,' 'षिधू गत्याम्,' 'षिधौ शास्त्र-माङ्गल्ययोः' माङ्गल्यं मङ्गलविषया क्रिया सेधिता, 'मनूयि बोधने' मनिता । कथं मतम्? क्तिवेट्कत्वाद् 'वेटोऽपतः' (४।४।६२) इति भविष्यति । 'लुपच् मोहने' लोपिता । कथं तप्ता दप्ता? औदित्वाद्वि-कल्पेनेट् । 'कष शिष जस झष वष मष मुष रुष रिष यूष जूष शषृ चष हिंसायाम्' शिष शेषिता । 'जिषू विषू मिषू निषू पृषू वृषू सेचने' अयं विषू 'विषश् विप्रयोगे वा' वेषिता । 'पुष् पुष्टौ' 'पुषश् पुष्टौ' वा पोषिता । उषू श्रिषू श्लिषू प्रुषू प्लुषू दाहे,' अयं श्लिषू श्लेषिता वा, केचिद्विषिपुषिश्लिषिमात्रादिड-भावमिच्छन्ति, तत्र 'विष्लृंकी व्याप्तौ' 'विषू' 'विषश्' इति विषयः' । 'पुष पुष्टौ' 'पुषच् पुष्टौ' 'पुषश् पुष्टौ' इति पुषयः । 'श्लिषंच् आलिङ्गने' 'श्लिषू दाहे' 'श्लिषण् श्लेषेणे' इति श्लषयः । एवं भविष्यन्ती–क्रियातिपत्त्योरपि । इड्निषेधे रूपपद्धतिः स्पष्टैव ।

घ्रां० घ्राधातोः शिद्विभक्तिचतुष्टये रूपरचना सुकरैव । अद्यतन्यां सूत्रम् ॥ ४९ ॥

## ट्धेघ्राशाच्छासो वा ॥ ५० ॥ [ सि० ४।३।६७ ]

**एभ्यः पञ्चभ्यः परस्य सिचः परस्मैपदे लुब्वा स्यात् । अघ्रात् । पक्षे सः ॥ ५० ॥**

'ट्धेघ्रा०' *'ट्धें पाने' 'घ्रां गन्धोपादाने' 'शोंच् तक्षणे' 'दों छोंच् छेदने' 'आत्सन्ध्यक्षरस्य' (४।२।१)* इत्यात्वे शा छा इति, 'षोंच् अन्तकर्मणि' 'षः सोऽष्ट्यै०' (२।३।९८) इति षस्य सत्वे आत्वे च, 'षैं जैं सैं क्षये' इत्यस्य आत्वे सा इति रूपम्, तस्यानुकरणमिदम् । अघ्रात् इति ॥ ५० ॥ पक्षे सूत्रम् ।

## सः सिजस्तेर्दिस्योः ॥ ५१ ॥ [ सि० ४।३।६५ ]

**सिजन्ताद्धातोरस्तेश्च परयोर्दिस्योरादिरीत् स्यात् ॥ ५१ ॥**

'सः सि०' सिजन्तादिति सिच्प्रत्ययान्ताद्धातोरस्तेश्च सन्तादिति सकारान्तत्परः परादिरीत्स्यात् । दिस्योः परयोरिति (य) ईत्, तस्य तकारो विशेषार्थ इत्संज्ञकः, ततः अघ्रास् ईत् इति स्थिते ॥ ५१ ॥ सूत्रं

## यमिरमिनम्यातः सोऽन्तश्च ॥ ५२ ॥ [ सि० ४।४।८६ ]

**यम्यादिभ्यस्त्रिभ्य आदन्तेभ्यश्च परस्मैपदे सिच आदिरिट् स्यादेषां च स् अन्तः ॥ ५२ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'यमि०' यम्यादिभ्यस्त्रिभ्य इति 'यमूं उपरमे' 'रमिं क्रीडायाम्' 'णमं प्रह्वत्वे' एभ्य इत्यर्थः ॥५२॥

ततः सूत्रम्—

## इट ईति ॥ ५३ ॥ [ सि० ४।३।७१ ]

**इटः परस्य सिच ईति परे लुक् स्यात् । अघ्रासीत्, अघ्राताम्-अघ्रासिष्टाम्, अघ्रुः अघ्रासिषुः । अघ्राः-अघ्रासीः, अघ्रातम्-अघ्रासिष्टम्, अघ्रात-अघ्रासिष्ट । अघ्राम्-अघ्रासिषम्, अघ्राव-अघ्रासिष्व, अघ्राम-अघ्रासिष्म ५ । परोक्षायां घ्रा घ्रा इति द्वित्वे ॥ ५३ ॥**

'इट०' सुगमं अघ्रासीत् । एवं सर्वत्र द्वे द्वे रूपे निगदसिद्धे । एवं अशात् अशासीत्, अच्छात् अच्छासीत्, असात् असासीत् । परस्मैपद इत्येव-अधिषातां स्तनौ वत्सेन । दृधेर्दासंज्ञत्वात् 'पिबैतिदा०' (४।३।६६) इति नित्यं सिच्लोपे प्राप्ते, शेषेभ्योऽप्राप्ते विकल्पः । ५ ॥ ५३ ॥ परोक्षायां

## व्यञ्जनस्यानादेर्लुक् ॥ ५४ ॥ [ सि० ४।१।४४ ]

**द्वित्वे पूर्वस्यानादेर्व्यञ्जनस्य लुक् स्यात् । द्वितीयतुर्ययोः पूर्वौ इति घस्य गत्वे ॥ ५४ ॥**

## गहोर्जः ॥ ५५ ॥ [ सि० ४।१।४० ]

**द्वित्वे सति पूर्वयोर्गहोर्जः स्यात् । जघ्रौ जघ्रतुः जघ्रुः ६ ॥ ५५ ॥**

'व्यञ्ज०' 'गहो०' इति सूत्रद्वयं स्पष्टम् ६ । ॥ ५४-५५ ॥ आशिषि सूत्रम्—

## संयोगादेर्वाशिष्येः ॥ ५६ ॥ [ सि० ४।३।९५ ]

**संयोगादेरादन्तस्य क्ङित्याशिष्येर्वा स्यात् । घ्रेयात् घ्रायात्, घ्रेयास्ताम् घ्रायास्ताम्, घ्रेयासुः घ्रायासुः ७ । घ्राता ८ । घ्रास्यति ९ । अघ्रास्यत् १० ॥ 'ध्मां शब्दाग्निसंयोगयोः' । धमति १ । धमेत् २ । धमतु धमतात् ३ । अधमत् ४ । अध्मासीत् ५ । दध्मौ ६ । ध्मेयात् ध्मायात् ७ । ध्माता ८ । ध्मास्यति ९ । अध्मास्यत् १० । ॥ ५६ ॥ 'ष्ठां गतिनिवृत्तौ'**

'संयो०' कण्ठ्यं सर्वत्र द्वे द्वे रूपे । अग्रेतनविभक्तित्रये रूपरीतिरविशेषैव । ध्मां शब्दाग्निसंयोगयोरिति शब्दो मुखादिना वादनं यथा शङ्खं धमति वासुदेवः, मुखेन वादयतीत्यर्थः । सुवर्णं धमति सुवर्णकारः, अग्निना संयुनक्तीत्यर्थः । शेषं सर्वं स्पष्टम् ॥ ५६ ॥

'ष्ठां गतिनिवृत्तौ' गतिनिवृत्तिरवस्थानमित्यर्थः । अत्र सूत्रम्—

## षः सोऽष्ट्यैष्ठिवष्वष्कः ॥ ५७ ॥ [ सि० २।३।९८ ]

**पाठे धात्वादेः षः सः स्यान्न तु ष्ट्यैष्ठिवष्वष्काम् । निमित्ताभावे नैमित्तिकस्याप्यभाव इति ठस्य थत्वे स्था । तिष्ठति १ । तिष्ठेत् २ । तिष्ठतु तिष्ठतात् ३ । अतिष्ठत् ४ । अस्थात् अस्थाताम् अस्थुः ५ ॥ ५७ ॥**

'षः सोऽष्ट्यै०' । न त्विस्यादि 'ष्ट्यैं स्त्यैं सङ्घाते' भूवादिः, 'ष्ठिवू क्षिवूच् निरसने' दिवादिः, 'ककुङ्' 'ष्वकुङ्' इत्यादयः सप्तदशात्मनेपदिनो भूवादयो गत्यर्था धातवस्तेष्वष्टमः 'ष्वष्कि गतौ' इति धातुः । तत एतान् त्रीन् धातून् वर्जयित्वा अन्यस्य धातोरादेः षः सः स्यात्, । एषां तु ष्ट्यायति ष्ठीव्यति ष्वष्कते इत्यादिषु षः सो न स्यात् । निमित्ताभावे इति—यथा निमित्तस्याग्नेरभावे नैमित्तिकस्य स्वर्णादिद्रवत्वस्याभावो दृश्यते, तथा षत्वनिवृत्तौ तन्निमित्तस्य ठत्वस्य निवृत्तिः । स्था इति स्थिते



Jain Education International For Personal & Private Use Only www.jainelibrary.org

शिति विभक्तिचतुष्टये तिष्ठादेशे सुगमैव रूपसिद्धिः । अद्यतन्यां 'पिबैतिदा०' ( ४।३।६६ ) इति सिच्लोपे अस्थात् इत्यादि ॥ ५७ ॥ अत्रोपसर्गयोगे विशेषमाह—

## स्थासेनिसेधसिचसञ्जां द्वित्वेऽपि ॥ ५८ ॥ [ सि० २।३।४० ]

**उपसर्गस्थान्नाम्यादेः परेषां स्थादीनां सः षः स्यात्, द्वित्वेऽपि । अध्यष्ठात् अध्यष्ठाताम् अध्यष्ठुः ॥ ५८ ॥**

**'स्था०'** उपसर्गस्थादित्यादि । अयं भावः—उपसर्गस्थान्नाम्यन्तस्थाकवर्गात्परेषां स्थादीनां सकारस्य षो भवति, द्वित्वेऽपि अट्यपि—द्विर्वचनेन अटा द्वाभ्यां च व्यवधाने, अपिशब्दादव्यवधानेऽपीत्यर्थः, यथा अधिष्ठास्यति अधितष्ठौ अध्यष्ठात् । सेनि—सेनया अभियाति अभिषेणयति 'णिज् बहुलं नाम्नः कृगादिषु' ( ३।४।४२ ) इति णिजन्तो नामधातुः । अभिषेणयितुमिच्छति अभिषिषेणयिषति अभ्यषिषेणयिषत्; अत्र द्विर्वचनेन अटाद्वयेनापि व्यवधाने षत्वम् । **'षिधू गत्याम्'** प्रतिषेधति प्रतिषिषेधिषति प्रत्यषेधत् प्रत्यषिषेधिषत्; अत्रोपसर्गयोगेन निषेधार्थत्वात् षत्वम्, गत्यर्थे तु षत्वं न भवति । तथाहुः **'गतौ सेधः'** ( २।३।६१ ) गतौ वर्त्तमानस्य सेधतेर्धातोः सकारस्य षो न स्यात् । अभिसेधति अनुसेधति गाः अभिगच्छति अनुगच्छतीत्यर्थः, अभिसेधयति गमयतीत्यर्थः, अभिसिसेधिषति अनुसिसेधिषति अभिजिगमिषति अनुजिगमिषतीत्यर्थः । **'षिंचीत् क्षरणे'** सिच् अभिषिञ्चति, सुषिक्तं नाम किं तवात्र, अभिषिषिक्षति अभ्यषिञ्चत् अभ्यषिषिक्षत् । **'षञ्जं सङ्गे'** 'दंशसञ्जः शवि' ( ४।२।४९ ) इति नलोपः अभिषजति अभिषषञ्ज अभिषिषङ्क्षति अभ्यषजत् अभ्यषिषङ्क्षत् । ण्यन्तानामपि भवति प्रतितिष्ठन्तं प्रयुङ्क्ते प्रतिष्ठापयति एवं प्रतिषेधयति । उपसर्गादित्येव—अधिस्थास्यति गतार्थत्वान्नात्राधिरुपसर्गः । गतेरुपरिभावोऽर्थः प्रस्तावादेः प्रतीयते परेश्च सर्वतो भावो गतार्थत्वं ततोऽनयोः वृक्षं वृक्षं परि सिञ्चति—अत्र वीप्स्यसम्बद्धस्य परेर्धातुना सम्बन्धाभावान्नोपसर्गत्वम् । निर्गताः सेचका अस्मान्निःसेचको देशः—अत्र तु येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञेति न भवति । सेवेति कृतगुणस्य निर्देशः सिध्यतिनिवृत्त्यर्थः । 'षिधूंच् संराद्धौ' अभिसिद्ध्यति । अकारस्तूच्चारणार्थो नतु शन्निर्देशस्तेन यङ्लुप्यपि भवति । प्रतिषिषेधीति । सेनेरषोपदेशार्थं स्थासञ्जोरवर्णान्तव्यवधानेऽपि विध्यर्थं सिचसञ्जसेधां षणि नियमबाधनार्थं सर्वेषामड्व्यवधानेऽपि पदादौ च षत्वार्थं वचनम् । एवं चात्र अध्यष्ठात् अध्यष्ठातां अध्यष्ठुः, अध्यष्ठाः अध्यष्ठातं अध्यष्ठात, अध्यष्ठाम् अध्यष्ठाव अध्यष्ठाम ५। ॥५८॥

परोक्षायां स्था स्थेति द्वित्वे सूत्रम्—

## अघोषे शिटः ॥ ५९ ॥ [ सि० ४।१।४५ ]

**द्वित्वे पूर्वस्य शिटस्तत्संबन्धिन्येवाघोषे लुक् स्यात् । तस्थौ अधितष्ठौ तस्थतुः तस्थुः ६ । स्थेयात् स्थेयास्ताम् स्थेयासुः ७ । स्थाता अधिष्ठाता ८ । स्थास्यति अधिष्ठास्यति ९ । अस्थास्यत् अध्यष्ठास्यत् १० । 'म्नां अभ्यासे' । मनति १ । मनेत् २ । मनतु मनतात् ३ । अमनत् ४ । अम्नासीत् ५ । मम्नौ ६ । म्नेयात्-म्नायात् ७ । म्नाता ८ । म्नास्यति ९ । अम्नास्यत् १० । 'दाम् दाने' । यच्छति १ । यच्छेत् २ । यच्छतु ३ । अयच्छत् ४ । ॥ ५९ ॥**

**'अघो०'** द्वित्वे इति धातोर्द्वित्वे सति पूर्वस्य शिटस्तत्संबन्धिन्येवाघोषे परे लुक् स्यात् । 'व्यञ्जनस्यानादेर्लुक्' ( ४।१।४४ ) इत्यस्यापवादोऽयम् । अत्र तत्संबन्धिव्याख्यानाभावे नियमार्थमिदमित्याशङ्का स्यात्, अघोष एव शिट इति, ततः चनीकस्यते इत्यादिष्वेव स्यात्, नतु लालस्यते

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यादिषु, परत्राघोषाभावात् । चङ्क्रम्यते इत्यत्र तु अनुस्वारस्य शिट्त्वेऽपि तत्संबन्धिन्येवेत्यत्रैव-कारान्न लुक्, अत्र ह्यानन्तर्येण सम्बन्धमात्रं न तत्सम्बन्धित्वं म्वागमस्य पूर्वभक्तत्वात् । अघोष इति किम् ? सस्नौ । शिट इति किम् ? पप्सौ । एवं चात्र पूर्वस्य स्थाशब्दस्य सकारलोपे ह्रस्वत्वे 'द्वितीयतुर्ययोः पूर्वौ' ( ४।१।४२ ) इति थस्य तत्वे तस्थौ तस्थतुः तस्थुः, अधितष्ठौ अधितष्ठथुः अधितष्ठुः 'सृजिदृशि०' ( ४।४।७८ ) इति वेटि अधितष्ठिथ अधितष्ठाथ अधितष्ठथुः अधितष्ठ, अधितष्ठौ अधितष्ठिव अधितष्ठिम ६ । आशिषि स्थेयादिति–अत्र 'संयोगादेर्वाशिष्येः' ( ४।३।९५ ) इति प्राप्तं द्वैरूप्यं 'गापास्थासादामा०' ( ४।३।९६ ) इति सूत्रेण बाध्यते ७ । शेषं विभक्तित्रयं सुगमम् १० । प्रत्यष्ठात्कठकालापं अत्र 'स्थासेने'त्यादिना अड्व्यवधानेऽपि षत्वं 'चरणस्य स्थेणो-ऽद्यतन्यामनुवादे' (३।१।१३८) इति द्वन्द्वस्यैकार्थत्वम् । ङपरे णौ तिष्ठतेरित्युपान्त्यस्येत्वे अध्यतिष्ठिपत् । 'प्रवचनीयादयः' ( ५।१।८ ) इति वा कर्त्तर्यनीये उपस्थानीयो गुरोश्चैत्रः, पक्षे यथाप्राप्तम्–उपस्थानीयो गुरुश्चैत्रेण, भावे उपस्थानीयं शिष्येण । 'श्लिषशीङ्०' ( ५।१।९ ) इत्यादिना वा कर्त्तरि क्ते उपस्थितो गुरुं शिष्यः, पक्षे कर्मणि उपस्थितो गुरुः शिष्येण भावे उपस्थितं शिष्येण "दोसोमा०" ( ४।४।११ ) इत्यादिनेत्वम् । 'ग्रहादिभ्यो णिन्' ( ५।१।५३ ) स्थायी । 'स्थापास्नात्रः कः' ( ५।१।१४२ ) इति के प्रतिष्ठते प्रष्ठः अत्र 'प्रष्ठोऽग्रगे' ( २।३।३२ ) इति षत्वम् । क्विपि साक्षाद्व्यञ्जन एवेत्यविधानादीत्वा-भावे संस्था । संस्थाशब्दादन्यत्र लुप्तव्यञ्जनेऽपीत्येके । तथा च **जयकुमारः** 'पां पाने' इत्यस्य क्विपि पीरित्याह । 'स्थाग्ला०' ( ५।२।३१ ) इत्यादिना स्नौ स्थास्नुः । 'शृकम०' ( ५।२।४० ) इत्यादिना उकणि स्थायुकः । 'स्थेश०' ( ५।२।८१ ) इत्यादिना वरे स्थावरः । 'स्थादिभ्यः कः' ( ५।३।८२ ) इति के आखूनामुत्थानं आखूत्थो वर्त्तते अत्र 'उदः स्थास्तम्भः सः' ( १।३।४४ ) इति सो लुक् 'स्थो वा' ( ५।३।९६ ) इति क्तौ व्यवस्थितिः, पक्षे 'उपसर्गादातः' (५।३।११०) इत्यङि व्यवस्था । व्यवस्था शीलमस्य 'अङ्स्थाच्छत्रादेरञ्' ( ६।४।६० ) त्यञि वैयवस्थः । उणादौ 'स्थाक्षुतोरूच' ( १८५ ) इति णे ऊदादेशे च स्थूणा । 'शुषीषिबंधी( ४१६ )त्यादिना' किती रे स्थिरः 'स्थविर०' ( ४१७ ) इत्यादि निपातनादिरे स्थविरः । 'स्थाविङेः कित्' ( ४२९ ) इत्यूरे स्थूलः 'स्थो वा' ( ४७३ ) इति अलं स्थलं स्थली अकृत्रिमा चेत्, ङित्त्वाभावे स्थालं स्थाली 'कितिकुडि०' (५१८) इत्यादिना कित्वे स्थवः । अजावृषः 'अजिस्था०' (७६८) इत्यादिना णौ स्थाणुः । 'सव्यात्स्थ' (८५५) इति डिति ऋप्रत्यये सव्ये तिष्ठतीति सव्येष्टा 'सूतः सव्येष्ट्र सारथी' इति कोषः । 'परमात्कित्' ( ९२५ ) इति कितीनि परमे पदे तिष्ठतीति परमेष्ठी भीरुष्ठानादित्वात्षत्वं सप्तम्यलुब्च । प्रस्थास्यते इति प्रस्थायी 'वर्त्स्यति गम्यादिः' ( ५।३।१ ) इति सिद्ध्यति । 'म्नां अभ्यासे' अभ्यासः पारम्पर्येण वृत्तिः । 'स्यात् पारम्पर्यमाम्नायः सम्प्रदायो गुरुक्रम' इति वचनात् 'श्रौति०' ( ४।२।१०८ ) इत्यादिना मनादेशे आमनति इत्यादि । आङ्पूर्वक एवायं प्रयुज्यते । 'आदित्यवर्णं तमसः पुरस्तादामनन्ति यम्' इत्यादिप्रसिद्धेः । शेषं स्पष्टम् । 'दाम् दाने' इत्यत्र मकार इत् अप्रयोगित्वात् स च 'श्रौति०' इत्यादौ विशेषार्थः, तथा च शिति यच्छादेशे यच्छति इत्यादिप्रसिद्धेः ॥ ५९ ॥ अथास्य सिच्लोपाद्युपयुक्तां दासंज्ञामाह । सूत्रम्—

## अवौ दाधौ दा ॥ ६० ॥ [ सि० ३।३।५ ]

अवितौ दाधारूपौ धातू दासंज्ञौ स्यातामिति दासंज्ञत्वात्पिबैतीत्यादिना सिलुप् । अदात् । विद्वर्जनात् दांव् दैव् इत्यादेर्न दासंज्ञा । ददौ ६ । गापास्थासादामेत्येत्वे देयात् ७ । दाता ८ । ३४

दास्यति ९ । अदास्यत् १० । **'जिं ञ्रि अभिभवे'** । जयति १ । जयेत् २ । जयतु जयतात् ३ । अजयत् ४ । ॥ ६० ॥

**'अवौ०'** दाधा इत्येवंरूपौ धातू अवानुबन्धौ दासंज्ञौ भवतः । दारूपाश्चत्वारः, धारूपौ द्वौ । 'दाम् दाने' प्रणिदाता 'देङ् पालने' प्रणिदयते 'डुदांग्क् दाने' प्रणिददाति 'दोंच् छेदने' प्रणिद्यति । 'ट्धें पाने' प्रणिधयति 'डुधांग्क् धारणे' प्रणिदधाति । एषु दासंज्ञायां 'नेर्ङ्मादा०' ( २।३।७९ ) इति नेर्णत्वं सिद्धयति दाधारूपोपलक्षितस्य दासंज्ञावचनात् 'दों' 'दें' 'ट्धें' इत्येषां शिति दाधारूपाभावेऽपि दासंज्ञा सिद्धा । 'दीङ्च क्षये' इत्यस्य 'यबक्ङिति' (४।२।७) इति सूत्रेण दारूपस्य सत्त्वेऽपि बहिरङ्गत्वान्न भवति तेन उपादास्तेत्यत्र 'इश्च स्थादः' ( ४।३।४१ ) इति इत्वं भवति । अवाविति किम् ? 'दांवृक् लवने' दातं बर्हिः, 'दैंवृ शोधने' अवदातं मुखम्, दाप्रवेशा 'हौ दः' ( ४।१।३१ ) इत्यादयः । प्रकृते दासंज्ञाफलमाह दासंज्ञत्वादित्यादि शेषं स्पष्टम् १० । षडेते आकारान्ताः अनिटः । 'जिं ञ्रि अभिभवे' पराभिभवे इत्यर्थः, जयति श्रयति । केचित्तु 'जिं जय' इत्यकर्मकत्वार्थं पृथक् पठन्ति जयः सर्वोत्कर्ष इति च व्याचक्षते, तदयुक्तम् उत्कर्षस्याभिभवविशेषत्वात्सकर्माऽकर्मकत्वयोश्च विवक्षानिबन्धनत्वात्, तथा च जयति जिन इत्यकर्मकः, जयति शत्रूनिति सकर्मकः । **अन्ये** तु ञ्रि स्थाने जॄं इति ऋकारान्तं पठन्ति जरति इत्यादि ॥ ६० ॥ अद्यतन्यां विशेषमाह । सूत्रम्—

## सिचि परस्मै समानस्याङिति ॥ ६१ ॥ [ सि० ४।३।४४ ]

**समानान्तस्य धातोः परस्मैपदविषये सिचि अङिति वृद्धिः स्यात् । अजैषीत् अजैष्टाम् अजैषुः । अजैषीः अजैष्टम् अजैष्ट । अजैषम् अजैष्व अजैष्म ५ । ॥ ६१ ॥**

**'सिचि०'** अङितीत्यस्यायमर्थः 'कुटादेर्ङिद्वदञ्णित्' ( ४।३।१७ ) कुटाद्यन्तर्गणो वृत्पर्यन्तः कुटादिः, कुटादेर्गणात्परो ञित् णित् वर्जितः प्रत्ययो ङिद्वद्भवति, ततश्च कुटादेः समानान्तस्य सिचि परे वृद्धिर्न स्यात् । **तथा चाहुः**—न्यनुवीत् न्यधुवीदिति अत्र ङित्त्वात् 'सिचि परस्मै समानस्याङिती'-त्यनेन वृद्धिरपि न भवति, प्रकृते त्वस्य कुटादित्वाभावेन सिचो ङित्त्वाभावाच्च वृद्धिर्भवति, एवं च अजैषीत् अश्रैषीत् इत्यादि स्पष्टम् ॥ ६१ ॥ परोक्षायां सूत्रम्—

## जेर्गिः सन्परोक्षयोः ॥ ६२ ॥ [ सि० ४।१।३५ ]

**सन्परोक्षयोः परयोर्द्वित्वे सति पूर्वात्परस्य जेर्गिः स्यात् । 'नामिनोऽकलिहलेः' इति वृद्धिः । जिगाय । 'योऽनेकस्वरस्य' । जिग्यतुः जिग्युः । जिगयिथ जिगेथ जिग्यथुः जिग्य ॥ ६२ ॥**

**'जेर्गिः०'** जिगाय 'योऽनेकस्वरस्य' ( २।१।५६ ) इति यत्वे जिग्यतुः जिग्युः । श्रिधातोस्तु 'संयोगात्' ( २।१।५२ ) इतीयादेशे शिश्रियतुः शिश्रियुः 'सृजिदृशि०' ( ४।४।७८ ) इत्यादिना वेटि जिगयिथ जिगेथ, शिश्रियिथ शिश्रेथ, जिग्यथुः शिश्रियथुः, जिग्य शिश्रिय ॥ ६२ ॥ सूत्रम्—

## णिद्वान्त्यो णव् ॥ ६३ ॥ [ सि० ४।३।५८ ]

**परोक्षाया अन्त्यो णव् णिद्वा स्यात् । जिगाय जिगय जिग्यिव जिग्यिम ६ । दीर्घश्च्वीति दीर्घे जीयात् जीयास्ताम् जीयासुः ७ । जेता ८ । जेष्यति ९ । अजेष्यत् १० । 'स्मृं चिन्तायाम्' । स्मरति १ । स्मरेत् २ । स्मरतु स्मरतात् ३ । अस्मरत् ४ । अस्मार्षीत् अस्मार्ष्टाम् अस्मार्षुः । अस्मार्षीः अस्मार्ष्टम् अस्मार्ष्ट । अस्मार्षम् अस्मार्ष्व अस्मार्ष्म ५ । स्मृ स्मृ इति द्वित्वे ॥ ६३ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'णिद्वा०'** स्पष्टम् । जिगाय जिगय जिज्ञाय जिज्ञय जिग्यिव जिग्यिम जिज्ञियिव जिज्ञियिम, शेषं स्पष्टम् । **'परावेर्जेः'** ( ३।३।२८ ) इत्यात्मनेपदे पराजयते विजयते, 'जेर्गिः सन्परोक्षयोः' ( ४।१।३५ ) जिगीषति, 'णौ क्रीजीङः' ( ४।२।१० ) इत्यात्वे जापयति, 'क्षय्यजय्यौ शक्ताविति' ( ४।३।९० ) निपातनात् जेतुं शक्यो जय्यः जेयोऽन्यः । 'जिविपून्योर्हलिमुञ्जकल्के' ( ५।१।४३ ) इति क्यपि जित्या जित्यो वा हलिः महद्धलम्, द्वावपि पुंस्त्रीलिङ्गौ, जेयमन्यत् । 'भृवृजितॄतपदमेश्च नाम्नि' ( ५।१।११२ ) इत्यणपवादे खे धनं जयति धनञ्जयः । 'भूजेःष्णुक्' ( ५।२।३० ) जयतीत्येवं शीलो जिष्णुः । 'जीणदृक्षि०' ( ५।२।७२ ) इत्यादिना इनि जयी । 'सृजीण्नशट्वरप्' ( ५।२।७७ ) जित्वरी, उणादौ 'कृवापाजी' ( १ ) त्यादिनोणि जायुः पित्तम्, 'तॄजि०' ( २२१ ) इत्यादिना अन्ते जयन्तः । 'चिजि०' (३९२) इति रे दीर्घे च जीरः अजाजी, लत्वे जीलः चर्मपुटः । 'ऋशी०' (९०६) इत्यादिना कनिपि जित्वा धर्मः जित्वानौ स्त्रियां 'णस्वराघोषाद्वनो रश्च' ( २।४।४ ) इति ङ्यां रत्वे च जित्वरी । **'क्षिं** क्षये' ऐश्वर्येऽप्ययमित्येके ऋभून् तक्षयति ईष्टे इति ऋभुक्षा इन्द्रः । अक्षैषीत् अक्षैष्टाम् अक्षैषुः । चिक्षाय चिक्षियतुः चिक्षियुः, चिक्षयिथ चिक्षेथ चिक्षियिव चिक्षियिम इत्यादि जिवत्, क्षीयते इति तु कर्मकर्त्तरि । क्षयति कश्चित्स एवं विवक्षते नाऽहं क्षयामि स्वयमेवायं क्षीयते इति । **'इं दुं द्रुं शुं स्रुं** गतौ' पञ्चाप्येतेऽनुस्वारेतः । अयति 'उदयति विततोर्द्धरश्मिरज्जौ' इत्यादिप्रयोगप्रसिद्धिः, 'इंण्क् गतौ' 'इंक् स्मरणे' 'इंङ्क अध्ययने' एषां तु एति ग्रामम्, मातुरध्येति, शास्त्रमधीते इति भवति । **तथा चावोचम्**

> 'इंङ्क अध्ययनेऽधीते अध्येतींक् स्मृतौ पितुः । इं गतौ, ग्राममयति गृहमेती त्विणक् गतौ ॥ १ ॥
> इं गतावित्युदयति उदेतीति त्विणक् गतौ । अयि गतावुदयते ईङ्च गतावुदीयते' ॥ २ ॥

ह्यस्तन्यां शवि 'स्वरादेस्तासु' (४।४।३१) इति वृद्धौ आयत् आयतां आयन् । अद्यतन्यां ऐषीत् ऐष्टाम् ऐषुः, परोक्षायां इयाय अत्र द्वित्वे 'नामिनोऽकलिहलेः' ( ४।३।५१ ) इति वृद्धावायादेशे 'पूर्वस्यास्वे स्वरे य्वोरियुव्' (४।१।३७) इतीयादेशः इयतुः इयुः, अत्र द्वित्वे सति 'योऽनेकस्वरस्य' ( २।१।५६ ) इति यत्वम् इययिथ इयेथ इयथुः इय, इयाय ( इयय ) इयिव इयिम । आशिषि 'दीर्घश्च्वि०' ( ४।३।१०८ ) इति दीर्घे ईयात्, अग्रे विभक्तित्रये एता एष्यति ऐष्यत् । चत्वार एते इदन्ता अनिटः ॥ **दुं** दवति, दवेत्, दवतु, अदवत्, अदौषीत्, दुदाव दुदुवतुः दुदुवुः दुदोथ दुदुविथ दुदुविव दुदुविम । **द्रुं** द्रवति, द्रवेत्, द्रवतु, अद्रवत्, अद्यतन्यां 'णिश्रि०' ( ३।४।५८ ) इति ङे अदुद्रुवत्, परोक्षायां दुद्राव 'स्क्रसृ०' ( ४।४।८१ ) इत्यत्र द्रुवर्जनान्नेद् दुद्रोथ दुद्रुवथुः दुद्रुव दुद्राव दुद्रुव, द्रोता, द्रोष्यति, अद्रोष्यत् । **शुं** शवति दुंवत् । **स्रुं** स्रवति प्रस्रवति, अद्यतन्यां 'णिश्रीति' (३।४।५८) ङे असुस्रुवत्, परोक्षायां सुस्राव सुस्रुवतुः सुस्रुवुः "स्क्रसृ०" ( ४।४।८१ ) इत्यत्र स्रुवर्जनान्नेद् सुस्रोथ, स्रोता, स्रोष्यति, अस्रोष्यत् । 'ध्रुं स्थैर्ये च' चकाराद्गतौ; ध्रवति 'ध्रुंत् गतिस्थैर्ययोः' इत्यस्य तु ध्रुवति, अध्रौषीत्, दुध्राव, दुध्रोथ, दुध्रुविथ । **'सुं** प्रसवैश्वर्ययोः' गतावप्येके; सवति, असौषीत्, अषोपदेशत्वात् षत्वाभावे सुसाव, येषां तु षोपदेशोऽयं तन्मते सुषाव, 'षुंक् प्रसवैश्वर्ययोः' इत्यस्य तु सौति सुतः सुषन्ति इत्यादि । एते षडुदन्ता अनिटो ज्ञेयाः । सर्वे चैते जिग्रहणेनोपलक्षिता ज्ञेयाः । अग्रेऽप्येवं यथासम्भवं ज्ञेयम् । दीर्घेकारान्ता दीर्घोकारान्ताश्चाप्रसिद्धा इति ऋकारान्तानाह **'स्मृं** चिन्तायाम्' । विभक्तिपञ्चकं स्पष्टम् । परोक्षायां सूत्रम् ॥ ६३ ॥

## ऋतोऽत् ॥ ६४ ॥ [ सि० ४।१।३८ ]

द्वित्वे सति पूर्वस्य ऋतोऽत् स्यात् । सस्मार ॥ ६४ ॥

"ऋतो०" । स्पष्टम् ॥ ६४ ॥ द्विवचनादिषु सूत्रम्—

## संयोगादृदर्त्तेः ॥ ६५ ॥ [ सि० ४।३।९ ]

संयोगात्परो य ऋत्तदन्तस्यार्त्तेश्चाकि परोक्षायां गुणः स्यात् । सस्मरतुः सस्मरुः ॥ ६५ ॥

'संयोग०' अयमर्थः संयोगादि–ऋकारान्ताः 'ओस्वृ शब्दोपतापयोः' 'द्वृं वरणे' वरणं स्थगनम्, 'ध्वृं ह्वृं कौटिल्ये' इत्यादीनां अर्त्तेश्च अकि परोक्षायां गुणः स्यात्, अकीति कोपलक्षितायां कसुकानरूपायां न भवति । सस्वरतुः सस्वरुः, दद्वरतुः दद्वरुः, दध्वरतुः दध्वरुः, जह्वरतुः जह्वरुः । अर्त्ति—आरतुः आरुः । संयोगादिति किम् ? चक्रतुः चक्रुः । ऋदर्त्तेरिति किम् ? चिक्षियतुः । गुणप्रतिषेधविषये पुनः प्रसवार्थं वचनम्, वृद्धिस्तु भवत्येव, सस्मार सस्वार । ऋतः संयोगेण विशेषणादर्त्तिग्रहणमिति । अकीत्येव सस्मृवान् ॥ ६५ ॥ युष्मदर्थैकवचने सूत्रम् ।

## ऋतः ॥ ६६ ॥ [ सि० ४।४।७९ ]

ऋदन्तात्तृजि नित्यानिटो विहितस्य थव आदिरिड् न स्यात् । सस्मर्थ सस्मरथुः सस्मर । सस्मार सस्मर सस्मरिव सस्मरिम ६ । ॥ ६६ ॥

'ऋतः०' 'सृजिदृशि०' ( ४।४।७८ ) इत्यादिसूत्रस्यापवादोऽयम्, तेन वेति निवृत्तम् । जहर्थ सस्मर्थ दध्वर्थ । ऋत इति किम् ? बिभेदिथ । तृजि नित्यानिट इत्येव-सस्वरिथ । अत्रापीट् निषेधमिच्छन्त्येके । सस्वर्थ । जजागरिथेत्यत्र त्वनेकस्वरत्वाच्चेड्निषेधो न भवति । थव इत्येव-जह्रिव जह्रिम । ॥ ६६ ॥ आशिषि सूत्रम्—

## क्यङाशीर्ये ॥ ६७ ॥ [ सि० ४।३।१० ]

संयोगात्परो य ऋत्तदन्तस्यार्त्तेश्च क्ये यङ्याशीर्ये च गुणः स्यात् । स्मर्यात् स्मर्यास्ताम् स्मर्यासुः ७ । स्मर्ता ८ ॥ ६७ ॥

'क्य०' प्रागुक्तानां संयोगादि ऋकारान्तानामर्त्तेश्च क्यादिषु गुणः स्यात् । भावकर्मणोः 'क्यः शिति' ( ३।४।७० ) इति विहिते क्ये–यथा स्मर्यते स्वर्यते अर्यते । भृशाभीक्ष्ण्ये विहिते यङि–यथा सास्मर्यते सास्वर्यते अरार्यते । आशीःसंबन्धिनि ये–यथा स्मर्यात् स्वर्यात् अर्यात् । औपदेशिकसंयोगग्रहणादिह न भवति–संस्क्रियते संचेस्क्रीयते संस्क्रियात् । ऋत इत्येव–आस्तीर्यते आतेस्तीर्यते आस्तीर्यात् । आशीर्य इति किम् ? स्मृषीष्ट । अर्त्तेरिति तिवृनिर्देशाद्यङ्लुपि न भवति, आरियात् अर्रियात् । 'ऋक् गतौ' इत्यस्य यङ्लुपि द्वित्वे 'रि रौ च लुपि' ( ४।१।५६ ) इति र् आगमे 'रिः शक्याशीर्ये' ( ४।३।११० ) इति द्वितीयऋकारस्य रित्वे 'ऋतोऽत्' ( ४।१।३८ ) इति प्रथमऋकारस्य अत्वे 'रो रे लुग्०' ( १।३।४१ ) इति रलोपे प्राग् दीर्घे च आरियात् । × × × × 'रिरौ च' इति रिः रीर्वा, तस्य 'इवर्णादेः०' इति यत्वे 'रिः शक्य०' इति द्वितीयऋकारस्य रित्वे पूर्वस्य 'ऋतोऽत्' ( ४।१।३८ ) इति अत्वे अर्रियात् । इयादेशस्तु 'पूर्वस्यास्वरे' 'इत्यत्र य्वोः' पूर्वस्येति समानाधिकरण्यव्याख्यानादिकारोकारमात्रस्यैव । अत्र तु अरि इति समुदायः पूर्व इति न । व्यधिकरणव्याख्याने तु अरिरियादिति भवत्येवेति ॥ ६७ ॥ भविष्यन्त्यां सूत्रम्—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## हनृतः स्यस्य ॥ ६८ ॥ [ सि० ४।४।४९ ]

**हन्तेर्ऋदन्ताच्च परस्य स्यस्यादिरिट् स्यात् । सरिष्यति ९ । असरिष्यत् १० । 'तॄ प्लवनतरणयोः' । तरति ४ । अतारीत् अतारिष्टाम् अतारिषुः ५ ॥ ६८ ॥ ततार ।**

'हनृ०' बाधकबाधनार्थोऽयं योगः । ऋत इति तकारनिर्देशादॄत्तैरेव ग्रहणं न भवति । एवं 'गॄं घॄं सेचने' गरति घरति अगार्षीत् अघार्षीत् अगार्ष्टाम् अघार्ष्टाम् अगार्षुः अघार्षुः जगार जघार जग्रतुः जघ्रतुः अनुस्वारेत्त्वात् गर्त्ता घर्त्ता 'हनृत' इति इटि गरिष्यति घरिष्यति । 'औस्वृ शब्दोपतापयोः' सेट् । स्वरति अस्वारीत् अस्वारिष्टाम् अस्वारिषुः सस्वार 'संयोगादृदर्त्तेः' ( ४।३।९ ) इति गुणे सस्वरतुः सस्वरुः सस्वर्थ औदित्त्वात् 'धूगौदितः' ( ४।४।३८ ) इति वेटि स्वर्त्ता स्वरिता स्वरिष्यति । 'ह्वृं वरणे' 'ध्वृं ह्वृं कौटिल्ये' ह्वरति अह्वार्षीत् दह्वरतुः ह्वरिष्यति । ध्वरति अध्वार्षीत् दध्वार दध्वरतुः दध्वरुः । ह्वरति अह्वार्षीत् जह्वार जह्वरतुः जह्वरुः ह्वरिष्यति । 'सृं गतौ' सरति प्रसरति अनुसरति उपसरति अपसरति संसरति निःसरति अभिसरति । **'वेगे सर्त्तेर्धाव्'** ( ४।२।१०७ ) सरतेर्वेगेगम्यमाने शिति परे धाव् इत्ययमादेशो भवति । अत्यादौ—सरिसर्त्तीत्यादिवत् तिवादिश्चेदनन्तरो न भवति । धावति कतीह धावमानाः । वेग इति किम् ? प्रियामनुसरति । 'धावूग् गतिशुद्ध्योः' इत्यनेन सिद्धे सरतेर्वेगे सरतीतिप्रयोगनिवृत्त्यर्थं वचनम् । तिव्निर्देशाद्यङ्लुपि न भवति सस्रेत् सरिस्रत् सरीस्रत् ॥ अद्यतन्यां 'सर्त्यर्त्तेर्वा' ( ३।४।६१ ) इति वा अङि 'ऋवर्णदृशोऽङि' ( ४।३।७ ) इति गुणे असरत् असरताम् असरन्, पक्षे असार्षीत् असार्ष्टाम् असार्षुः । परोक्षायां ससार सस्रतुः सस्रुः 'स्कसृ०' ( ४।४।८१ ) इत्यत्र सृवर्जनान्नेट् ससर्थ सस्रिव सस्रिम । सर्त्ता, सरिष्यति । 'ऋं प्रापणे च' चकाराद्गतौ । 'श्रौति०' ( ४।२।१०८ ) इत्यादिना ऋच्छादेशे ऋच्छति प्राच्छेति, ह्यस्तन्यां 'स्वरादेस्तासु' ( ४।४।३१ ) इति वृद्धौ आर्च्छेत् आर्च्छेताम् आर्च्छेन् । अद्यतन्यां 'सर्त्यर्त्तेर्वा' इत्यङि 'ऋवर्णदृशोऽङि' इति गुणे 'स्वरादेस्तासु' इति वृद्धौ आरत् आरताम् आरन्, पक्षे आर्षीत् आर्ष्टाम् आर्षुः । परोक्षायां द्वित्वे वृद्धौ च 'ऋतोऽत्' ( ४।१।३८ ) इति पूर्वस्य अत्वे च आर 'संयोगादृदर्त्तेः' ( ४।३।९ ) इति गुणे आरतुः आरुः 'ऋवृव्येऽद इट्' ( ४।४।८० ) इति इटि आरिथ आरथुः आर आर आरिव आरिम । आशिषि 'क्ययङाशीर्ये' ( ४।३।१० ) इति गुणे अर्यात्, श्वस्तन्यामनिट्त्वात् अर्त्ता 'हनृत' इडागमे अरिष्यति । क्रियातिपत्तौ इडागमे 'स्वरादेस्तासु' इति वृद्धौ आरिष्यत् । एवं च स्मृप्रभृतयो नव ह्रस्व ऋकारान्ताः स्मृग्रहणेनोपलक्षणीयाः । अथ दीर्घ-ॠकारान्तमाह 'तॄ प्लवनतरणयोः' इति प्लवनं मज्जनम्, तरणं लङ्घनम् । तरति वितरतीत्यादि विभक्तिचतुष्टयं स्पष्टम् । अद्यतन्यां अस्य सिजागमे 'सिचि परस्मै समानस्य०' ( ४।३।४४ ) इति वृद्धौ 'सः सिजस्तेर्दिस्योः' ( ४।३।६५ ) इतीतागमे अस्य सेट्त्वात्, इडागमे 'इट ईति' ( ४।३।७१ ) इति सिज्लोपे अतारीत् इत्यादि । परोक्षायां ततार ॥ ६८ ॥ द्विवचनादौ सूत्रम्—

## स्कृच्छृतोऽकि परोक्षायाम् ॥ ६९ ॥ [ सि० ४।३।८ ]

**स्कृ–ऋच्छोॠदन्तानां च परोक्षायां गुणः स्यान्न तु कोपलक्षितायां तस्याम् । तर इति जाते ॥ ६९ ॥**

'स्कृ०' स्कृश्च ऋच्छ् च ॠत् च स्कृच्छृत् तस्य । सस्सट् 'डुकृंग् करणे' इति कृः स्कृः । एषां नाम्निनः परोक्षायां गुणः स्यात्, न तु कोपलक्षितायां क्वसुकानरूपायां तस्याम् यथा सञ्चस्करतुः सञ्च-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्करुः । 'ऋछत् इन्द्रियप्रलयमूर्त्तिभावयोः' आनर्च्छ आनर्च्छतुः । ॠत् इति दीर्घॠकारान्ताः यथा 'कॄत् विक्षेपे' विचकरतुः । स्कग्रहणात् चक्रतुः चक्रुरित्यत्र न भवति, 'संयोगादृदर्त्ते'रित्यनेन सिद्धे स्कग्रहणं तत्रौपदेशिकसंयोगग्रहणार्थम् । विचकारेत्यादौ तु परत्वाद्वृद्धिरेव । अकीति किम् ? सञ्च-स्कवान् सञ्चस्काणः आनृच्छ्वान् विचिकीर्वान् ॥ ६९ ॥ प्रकृते तु तर इति जाते इति । तत्र सूत्रम्

## तॄत्रपफलभजाम् ॥ ७० ॥ [ सि० ४।१।२५ ]

**एषां चतुर्णामवित्परोक्षा–सेट्थवोः परयोः स्वरस्य ए स्यान्न च द्विः । तेरतुः तेरुः । तेरिथ ६ ॥ ७० ॥**

'**तॄत्रप०**' एषां चतुर्णामिति एकस्तावत्प्रस्तुतोऽयं तॄः, अन्ये च 'त्रपौषि लज्जायां' अयमात्मनेपदी यथा त्रेपे त्रेपाते 'फल निष्पत्तौ' 'ञिफला विशरणे वा' फेलतुः फेलिथ 'भजीं सेवायाम्' भेजतुः भेजिथ । सूत्रे बहुवचनं ञिफला इत्यस्य ग्रहणार्थं अन्यथा 'निरनुबन्धग्रहणे न सानुबन्धस्य' इत्यस्य ग्रहणं न स्यात् । न च द्विरिति–'प्राक्तु स्वरे स्वरविधे'रिति वचनात् पूर्वं द्वित्वे 'स्कृच्छृतोऽकि०' ( ४।३।८ ) इति गुणे अस्य एत्वे न च द्विरितिवचनात् कृतमपि द्वित्वं निवर्त्तते इत्यर्थः । अविदित्येव–अहं ततर । सेटीत्येव–बभक्थ । अत इत्येव–तितीर्वान् । तरतेरतो गुणरूपत्वात् 'न शसददिवादिगुणिनः' (४।१।३०) इत्येव निषेधः स्यादिति त्रपेरनेकव्यञ्जनमध्यस्वात्फलभजोरादेशादित्वान्न प्राप्नोतीति वचनम् ॥ ७० ॥

आशिषि सूत्रम्—

## ॠतां क्ङितीर ॥ ७१ ॥ [ सि० ४।४।११६ ]

**स्पष्टम् ॥ ७१ ॥**

'**ॠतां०**' स्पष्टत्वादस्य सूत्रस्य वृत्तिर्नास्ति । परमार्थश्चायम्, ॠकारान्तस्य धातोः क्किति ङिति च प्रत्यये परे निर्देशात् ॠकारस्यैव स्थाने इरित्ययमादेशः स्यात् । ॠतामिति बहुवचनं लाक्षणिकस्यापि परिग्रहार्थं तेन 'स्वरहनगमोः सनि धुटि' ( ४।१।१०४ ) इति कृतदीर्घस्यापि इरादेशः सिद्धः, चिकीर्षतीत्यादि । क्ङितीति किम् ? तरति ॥ ७१ ॥ इरादेशे सति । सूत्रम्—

## भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने ॥ ७२ ॥ [ सि० २।१।६३ ]

**भ्वादेर्धातोर्यौ र्वौ तयोः परयोस्तस्यैव नामिनो दीर्घः स्यात्, व्यञ्जने परे । तीर्यात् ७ ॥७२॥**

'**भ्वादे०**' भ्वादेर्धातोर्यौ र्वौ इति भ्वादेर्धातोरवयवभूतौ यौ रेफवकारावित्यर्थः, वकारस्यो-दाहरणं दीव्यतीत्यादि, असद्विधौ स्वरादेशस्य लोपस्य स्थानिवद्भावप्रतिषेधात् प्रतिदीव्ना । भ्वादेरिति किम् ? चतुर्भिः, चतुर्थी, कुर्कुरमिच्छति कुर्कुरीयति, एवं चर्तुर्यति दिव्यति । नामिन इति किम् ? स्मर्यते भव्यम् । र्वोरिति किम् ? बुद्ध्यते । व्यञ्जन इति किम् ? विकिरति । र्वोर्भ्वादिविशेषणं किम् ? दीव्यतेः कनिपि 'व्वोः प्वऽय्व्यञ्जने लुक्' ( ४।४।१२१ ) इति वकारलोपे दिवन् दिव्ना दिव्ने । नामिनो भ्वादिविशेषणं किम् ? दधिव्रज्या । प्रत्यासत्त्या तस्यैवेति विशेषणं किम् ? ग्रामणिव्रज्या 'अस्यदिव्रज्यजः क्यप्' ( ५।३।९७ ) इति क्यप् ॥ ७२ ॥ अस्य सेट्त्वात् श्वस्तन्यां इडागमे सूत्रम्—

## वृतो नवाऽनाशीः सिच्परस्मै च ॥ ७३ ॥ [ सि० ४।४।३५ ]

वृभ्यामृदन्तेभ्यश्च परस्येटो दीर्घो वा स्यात्, न तु परोक्षाशिषोः सिचि परस्मैपदे च । तरिता
३३ तरीता ८ । तरिष्यति-तरीष्यति ९ । अतरिष्यत्-अतरीष्यत् १० । 'ट्वें पाने' । धयति ४ ॥ ७३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'**वृतो०**' वृश्च वृश्च व्रौ 'वृग् वरणे' 'वृङ्श सम्भक्तौ' एतौ धातू इत्यर्थः, व्रौ च ॠत् च वृत् तस्य वृतः। तकाराभावे ॠ इति निर्दिश्यमाने वृ इत्यनेन धातुना साहचर्यात् 'ॠश् गतौ' इत्यस्यैव ग्रहणं स्यान्न ॠकारान्तधातुमात्रस्य ततश्च समरीता समरितेत्यत्रैव स्यात्। तकारे तु सति ॠदित्यस्य धातोरभावात्तकारस्य वर्णनिर्देशेषु प्रसिद्धत्वात् ॠकारवर्णविज्ञानात्तदन्तधातुमात्रप्रतिपत्तिर्भवतीति तकारोपादानम्। सिचः परस्मैपदमिति षष्ठीसमासः यस्मिन् परस्मैपदे सिच् विधीयते तत् सिचः परस्मैपदम्, विशेषणसमासो वा सिच्च तत्परस्मैपदं चेति। परस्मैपदनिमित्तत्वेनोपचारात्सिजपि परस्मैपदेनोच्यते, आशीश्च सिच् परस्मैपदं च आशीःसिच्परस्मैपदम्, न आशीःसिच्परस्मैपदं अनाशीःसिच्परस्मैपदं, तस्मिन्। अनाशीःसिच्परस्मैपदम् (?)। अपरोक्षायामिति च 'गृह्णोऽपरोक्षायां दीर्घ' (४।४।३४) इत्यस्मात् पूर्वसूत्रादनुवर्त्तते। ततश्च परोक्षायामाशिषि परस्मैपदविषये सिचि च एषां धातूनामिटो दीर्घो न स्यात्। अन्यत्र विकल्पेन स्यादित्यर्थः संपन्न इति। यथा प्रावरीता प्रावरिता प्राविवरिषति प्राविवरीषति, वृङ् वरिता वरीता विवरिषते विवरीषते, ॠदन्त—तरिता तरीता, तितरिषति तितरीषति, जरिता जरीता, जिजरिषति जिजरीषति। वृत इति किम्? करिष्यति। परोक्षादिवर्जनं किम्? ववरिथ तेरिथ वरिषीष्ट प्रावरिषीष्ट आस्तरिषीष्ट प्रावरिष्टाम् प्रावरिषुः आस्तरिष्टाम् आस्तरिषुः। सिचः परस्मैपदविशेषणादात्मनेपदे दीर्घो भवत्येव—अवरिष्ट अवरीष्ट प्रावरिष्ट प्रावरीष्ट आस्तरिष्ट आस्तरीष्ट। एवं विभक्तित्रये सर्वत्र द्वैरूप्यं सिद्धम्—तरीता तरितेत्यादि। दीर्घॠकारान्तोऽयं धातुरेकः ॥ ७३ ॥

## आत्सन्ध्यक्षरस्य ॥ ७४ ॥ [ सि० ४।२।१ ]

धातोः सन्ध्यक्षरान्तस्य आः स्यात्, न तु शिति परे। ततश्च दासंज्ञा ॥ ७४ ॥

'**आत्स०**' 'ट्धें पाने' टकार शुनिन्धयीत्यादौ ङ्यर्थ इत्, ततश्च दासंज्ञेति। तत्फलं च 'ईर्व्यञ्जनेऽयपि' (४।३।९७) इति ईत्वे धीयते ॥ ७४ ॥ अद्यतन्यां सूत्रम्—

## ट्धेश्वेर्वा ॥ ७५ ॥ [ सि० ३।४।५९ ]

आभ्यां कर्त्तर्यद्यतन्यां ङो वा स्यात्। द्विर्धातुः०' (४।१।१) इति द्वित्वे पूर्वह्रस्वत्वे दत्वे च। अदधत् अदधताम् अदधन्। 'ट्धेघ्राशाच्छासो वा' (४।३।६७) इति सिज्लोपविकल्पे अधात् अधाताम् अधुः। पक्षे अधासीत् अधासिष्टाम् अधासिषुः ५। दधौ ६। धेयात् ७। धाता ८। धास्यति ९। अधास्यत् १०। 'ध्यैं चिन्तायाम्'। ध्यायति ४। अध्यासीत् ५। दध्यौ दध्यतुः दध्युः। दध्यिथ ६। ध्येयात् ध्यायात् ७। 'अर्च्च पूजायाम्'। अर्चति ॥ ७५ ॥

'**ट्धे०**' कर्त्तरीति किम्? अधिषातां गावौ वत्सेन, एवं चाद्यतन्यां सर्वेषु वचनेषु त्रैरूप्यम्। एकारान्तोऽयमेकः। 'ध्यैं चिन्तायां' 'स्मृत्यर्थदयेशः' (२।२।११) इति कर्मणो विकल्पेन व्याप्यत्वे मातुर्ध्यायति मातरं ध्यायति, 'सृजिदृशि०' (४।४।७८) इति वेटि दध्याथ दध्यिथ। अनिट्त्वात् ध्यातेत्यादि स्पष्टम्। 'दैंव् शोधने' वकारो 'अवौ दाधौ०' (३।३।५) अवेति दासंज्ञानिषेधार्थस्तेन क्ये निदायन्ते भाजनानि अवदातं मुखं अदासीत् दिदासति एषु दासंज्ञाऽभावात् यथाक्रमं इत्वं दत् सिज्लुप् इदादेशश्च न भवन्ति। **ननु** दैधातोस्तिवि शवि ऐकारस्य नामित्वात् 'नामिनो गुणोऽक्ङिति' (४।३।१) इति एकारलक्षणो गुणः कुतो न स्यात्। **उच्यते**। गुण इति सान्वयसंज्ञासमाश्रयणादत्र न गुणः, ऐकारादेकारस्य हीनत्वादिति दायति, एवं सर्वत्र। दायति अदासीत् ददौ ददाथ ददिथ दातेत्यादि स्पष्टम्। 'ग्लैं हर्षक्षये' इह हर्षक्षयो धात्वपचयः। ग्लायति अग्लासीत् जग्लौ जग्लाथ जग्लिथ



Jain Education International For Personal & Private Use Only www.jainelibrary.org

ग्लेयात् ग्लायात् ग्लाता। 'म्लैं गात्रविनामे' विनामः कान्तिक्षयः। म्लायति अम्लासीत् मम्लौ मम्लाथ मम्लिथ म्लायात् म्लेयात् म्लाता। 'द्यैं न्यङ्करणे' कुत्सितमङ्गं न्यङ्गम्। द्यायति अद्यासीत् दद्यौ दद्याथ दद्यिथ द्यायात् द्येयात् द्याता। 'द्रैं स्वप्ने' द्रायति निद्रायति, निद्राति इति तु 'द्रांक् कुत्सितगतौ' इत्यस्य रूपम्। न्यद्रासीत् निदद्रौ निदद्रिथ निदद्राथ निद्रायात् निद्रेयात् निद्राता। 'ध्रैं तृप्तौ' ध्रायति द्रैंवत्। 'कैं गैं रैं शब्दे' कायति गायति रायति, अकासीत् अगासीत् अरासीत्, [कङ्श्चञ् (४।१।४६)] चकौ जगौ ररौ, चकाथ चकिथ जगाथ जगिथ रराथ ररिथ, केयात् गेयात् रेयात्, काता गाता राता, कास्यति गास्यति रास्यति, अकास्यत् अगास्यत् अरास्यत्। 'ष्ट्यैं स्त्यैं सङ्घाते च' चकाराच्छब्दे। ष्ट्यायति 'षःसोऽष्ट्यै०' (२।३।९८) इत्यत्र ष्ट्यैवर्जनात् षस्य सत्वं न स्यात् अष्ट्यासीत् तष्ट्यौ तष्ट्याथ तष्ट्यिथ ष्ट्यायात् ष्ट्येयात् ष्ट्याता। स्त्यैं स्त्यायति ष्ट्यैवत्। 'खैं खदने' खदनं हिंसा स्थैर्यं च। खायति। 'क्षैं जैं सैं क्षये' क्षायति जायति सायति, अक्षासीत् अजासीत् असासीत्, चक्षौ जजौ ससौ, चक्षाथ चक्षिथ जजाथ जजिथ ससाथ ससिथ, क्षेयात् क्षायात्, जेयात्, सेयात्, क्षाता जाता साता। 'स्नैं श्रैं पाके' स्नायति अस्नासीत्, सस्नौ सस्नाथ सस्निथ, स्नाता। श्रैं श्रायति स्नैंवत्। 'पैं ओवैं शोषणे' पायति। अस्य पारूपं लाक्षणिकमिति 'श्रौति०' (४।२।१०८) इति पिबादेशो न भवति। अशित्यात्वे पपौ पपिथ पपाथ, आशिषि 'गापास्था०' (४।३।९६) इत्येत्वे पेयात् पाता। 'ओवैं' वायति ओकार इत् तस्य फलं 'सूयत्याद्योदितः' (४।२।७०) इति क्तयोस्तस्य नत्वे वानः वानवान्। शेषं पैंवत्। 'ष्णैं वेष्टने' 'षः सोऽष्ट्यै०' इति सत्वे स्नायति सस्नौ स्नाता 'ष्णांक् शौचे' इत्यत्र वक्ष्यमाणाः प्रयोगा अत्राप्यूह्याः वेष्टने स्नायतीति प्रयोगार्थत्वादिहैतत्पाठस्य। इत्यैदन्ता अनिटश्चैकविंशतिः। ओदन्तादयोऽप्रसिद्धाः।

### इति स्वरान्ता भ्वादयः परस्मैपदिनो धातवः समाप्ताः

अथ व्यञ्जनान्तानामवसरस्ते च कादिव्यञ्जनक्रमेणैव निर्देष्टव्यास्तत्र 'फक्क नीचैर्गतौ' अकारः श्रुतिसुखार्थः, एवं शेषेष्वप्यदन्तेषु, नीचैर्गतिर्मन्दगमनं असद्व्यवहारो वा। फक्कति अफक्कीत् अफक्किष्टाम् अफक्किषुः पफक्क पफक्किथ पफक्क फक्क्यात् अस्य सेट्त्वात् फक्किता फक्किष्यति अफक्किष्यत्। 'तक-हसने', सहने इत्यन्ये, तकति अताक्षीत् तताक ततकिथ ततकथ तक्यात् तकिता। 'तकु कृच्छ्रजीवने' उकारोऽनुबन्धः स च 'उदितः स्वरान्नोन्तः' (४।४।९८) इति नागमार्थः तङ्कति अताङ्क्षीत् तङ्क्यात् तङ्किष्यति। 'शुक गतौ' शोकति अशोकीत् शुशोक शुशुकतुः शुशोकिथ शुक्यात् शोकिता शोकिष्यति। 'बुक्क भाषणे', भषणे इत्यन्ये, भषणं भर्त्सनं बुक्कति श्वा बुबुक्क बुक्किष्यति। पञ्चैते कान्ताः सेटश्च। 'ओखृ राखृ लाखृ द्राखृ ध्राखृ शोषणालमर्थयोः' ओखति 'उपसर्गस्यानिणेधेदोति' (१।२।१९) प्रोखति औखत् औखीत् 'गुरुनाम्यादे०' (३।४।४८) इत्यामादेशे ओखाञ्चकार ऋदित्वादेव ओतो नेत्संज्ञा प्रयोगित्वाच्च। राखति अराखत् अराखीत् रराख। एवं लाखृप्रभृतयोऽपि। एवं 'शाखृ श्लाखृ व्याप्तौ' एतावपि राखृवत्। 'कक्ख हसने' द्वितीयादिमेन केचिन्मन्यन्ते कक्खति खक्खति चकक्ख चखक्ख। 'उख नख णख वख मख रख लख मखु रखु लखु रिखु इखु ईखु वल्ग रगु लगु तगु श्रगु श्लगु अगु वगु मगु स्वगु इगु उगु रिगु लिगु गतौ' एवं ओखृप्रभृतय ईखुपर्यन्ता द्वाविंशतिः खान्ताः सेटस्तेषु मखप्रभृतीनां ईखुपर्यन्तानां षण्णां उदित्वान्नोऽन्तागमे मङ्खति लङ्खति रिङ्खति इत्यादि, ईखोस्तु 'गुरुनाम्यादे०' रिति परोक्षाया आमादेशे ईखाञ्चकारेति विशेषः। वल्गादयो गत्यर्था गान्ताश्चतुर्दश तेषु रगुप्रभृतयस्त्रयोदश उदितः वल्गति रङ्गतीत्यादि। 'त्वगु कम्पने च' चकाराद्गतौ। स्थितस्यैव चलनं कम्पनम्, गतिर्देशान्तरप्राप्ति-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हेतुः क्रिया, त्वङ्गति । 'युगु जुगु वुगु वर्जने' त्रयोऽप्युदितः युङ्गति जुङ्गति वुङ्गति एवं गान्ता अष्टादश सेटः । 'गग्घ हसने' गग्घति घादिरयमित्येके घग्घति । 'दघु पालने' वर्जनेऽपीत्यन्ये, दङ्घति 'शिघु आघ्राणे' आघ्राणं गन्धोपादानं शिङ्घति । 'लघु शोषणे' लङ्घति अत्र 'मघु मण्डने,' इत्येके पठन्ति मङ्घति, इति घान्ताश्चत्वारः, सेटो गग्घवर्जा उदितश्च । 'शुच शोके' शोचति 'कुच शब्दे तारे' तार उच्च इत्यर्थः शब्दमात्रेऽपीत्यन्ये कोचति चुकोच । 'कुच सम्पर्चने' इति ज्वलादौ पठिष्यमाणोऽपि इहार्थविशेषात्पुनः पठितः । 'क्रुञ्च गतौ' क्रुञ्चति । 'कुञ्च च कौटिल्याल्पीभावयोः । चकार क्रुञ्चोऽनुकर्षणार्थः तेन क्रुञ्चस्यैयर्थ्यं सिद्धम् । संकुञ्चति आकुञ्चति । 'लुञ्च अपनयने' अनुपयुक्तापासने लुञ्चति । इति ॥ ७५ ॥ एतेषु धातुषु प्रायः कांश्चित् काव्यादिषु अप्रसिद्धप्रयोगान् संभाव्य अतिप्रसिद्धप्रयोगान् पाठतो निर्दिशति । अर्चेति–ह्यस्तन्यां सूत्रम्—

## स्वरादेस्तासु ॥ ७६ ॥ [ सि० ४।४।३१ ]

**स्वरादेर्धातोरादेरद्यतनीह्यस्तनीक्रियातिपत्तिषु वृद्धिः स्यात् । आर्चत् ४ । आर्चीत् आर्चिष्टाम् ५ ॥ ७६ ॥**

'स्वरा०' स्पष्टम् । अद्यतन्यां आर्चीत् इत्यादि सुगमम् ॥ ७६ ॥ परोक्षायां सूत्रम् ।

## अनातो नश्चान्त ऋदाद्यशौसंयोगस्य ॥ ७७ ॥ [ सि० ४।१।६९ ]

**ऋदादेरश्नोतेः संयोगान्तस्य च परोक्षायां द्वित्वे पूर्वस्यादेरत आत्स्थानादन्यस्य आः स्यात् कृतातो नोऽन्तश्च । आनर्च आनर्चतुः आनर्चुः ६ । अर्च्यात् ७ । अर्चिता ८ । अर्चिष्यति ९ । आर्चिष्यत् १० । 'त्यजं हानौ' । त्यजति ४ ॥ ७७ ॥**

'अना०' न आत् अनात्, तस्य अनातः, आकारस्थानेऽनिष्पन्नस्येत्यर्थः । तथैवाह–आत्स्थानादन्यस्येति । क्रमेणोदाहरणानि । **ऋदादि** 'ऋधौच् वृद्धौ' द्वित्वे पूर्वस्य 'ऋतोऽत्' ( ४।१।३८ ) इति अत्वे अनेन तस्य आत्वे नोऽन्ते आनर्द्ध आनृधतुः आनृधुः । **अशौ** इति 'अशौटि व्याप्तौ' आनशे आनशाते आनशिरे । **संयोग** 'अञ्जौप् व्यक्तिम्रक्षणकान्तिगतिषु' आनञ्ज आनञ्जतुः । 'ऋच्छत् इन्द्रियप्रलयमूर्त्तिभावयोः' आनर्च्छ आनर्च्छतुः । ऋदादेरिति किम् ? 'ऋंक् गतौ' 'ऋं प्रापणे वा' द्वित्वे पूर्वस्य 'ऋतोऽत्' इति अत्वे 'अस्यादेराः परोक्षायाम्' ( ४।१।६८ ) इत्यात्वे 'नामिनोऽकलिहलेः' ( ४।३।५१ ) इति वृद्धौ आर आरतुः आद्यन्तवदेकस्मिन्नित्यपि ऋदादित्वं न यतो यथान्त्यव्यपदेशे ऋदादित्वमेवमादिव्यपदेशे ऋदन्तत्वमपि तत ऋत् आदिरेव यस्येत्यवधारणेनास्य निरासः । अशौ इत्यौकारः किम् ? अश्नातेर्माभूत् । आश आशतुः । संयोगस्येति किम् ? 'अट गतौ' आट आटतुः । अनात इति किम् ? 'आछु आयामे' आञ्छ आञ्छतुः आञ्छुः, अत्र नोऽन्तागमे संयोगान्तत्वात्प्राप्नोति किन्तु द्वित्वे पूर्वस्य ह्रस्वत्वे अकारस्य आत्स्थाननिष्पन्नत्वादनेन आत्वं नोऽन्तश्च न भवतः किन्तु 'अस्यादेः०' (४।१।६८) इति आत्वम् । **कश्चिद्**त्रापीच्छति आनाञ्छ आनाञ्छतुः आनाञ्छुः ॥ एवं च आनर्च आनर्चतुः आनर्चुः 'स्क्रसृवृ०' (४।४।८१) इति इटि आनर्चिथ आनर्चथुः आनर्च आनार्चिव २ । आनर्चिम । अस्य चोपलक्षणत्वादन्येऽप्यत्र ज्ञेयास्ते चैवम् । 'अञ्चू गतौ च' चात्पूजायाम्, अञ्चति १ अञ्चेत् २ अञ्चतु अञ्चतात् ३ आञ्चत् ४ आञ्चीत् आञ्चिष्टां आञ्चिषुः ५ 'अनात०' ( ४।१।६९ ) इति पूर्वस्यात्वे नान्ते च आनञ्च 'इन्ध्यसंयोग०' ( ४।३।२१ ) इति किस्वाभावेन नलोपाभावे आनञ्चतुः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आनञ्जुः आनञ्जिथ आनञ्जथुः आनञ्ज आनञ्ज आनञ्जिव २। आशिषि **'अञ्चोऽनर्चायाम्'** (४।२।४६) अञ्चेरनर्चायामेव वर्त्तमानस्योपान्त्यनकारस्य लुग् भवति क्यादावेः क्ङित्त्वात्, अनर्चायां गतौ नलोपे अच्यात् अच्यास्तां अच्यासुः, अर्चायां तु नलोपाभावे अञ्च्यात् अञ्च्यास्तां अञ्च्यासुः, अञ्चिता अञ्चिष्यति आञ्चिष्यत् । **'वञ्चू चञ्चू तञ्चू त्वञ्चू मञ्चू मुञ्चू म्रुञ्चू म्रुचू म्लुचू ग्लुंचू षस्च** गतौ'। षस्चवर्जा ऊदितो दश। वञ्चति अद्यतन्यां अवञ्चीत् अवञ्चिष्टां परोक्षायां ववञ्च ववञ्चिव ववञ्चिम, एवं चञ्चू चञ्चति तञ्चू तञ्चति त्वञ्चू त्वञ्चति मञ्चू मञ्चति मुञ्चू मुञ्चति, म्रुचू म्रोचति अद्यतन्यां ऋदिच्छ्वि० (३।४।६५) इत्यादिना वा अङि अम्रुचत् अम्रोचीत्, म्लुचू म्लोचति अम्लुचत्, ग्लुञ्चू ग्लुञ्चति अग्लुञ्चत् अग्लुञ्चीत् । षस्च 'षः स०' (२।३।९८) इति षस्य सत्वे, 'सस्य शषौ' (१।३।६१) इति सस्य शत्वे च सश्चति असश्चीत् ससश्च, **'म्रुचू ग्लुचू** स्तेये' गतावपि केचित्, म्रोचति ग्लोचति 'ऋदिच्छ्वि०' (३।४।६५) इति वा अङि अम्रुचत् अग्लुचत् अम्रोचीत् अग्लोचीत् मुम्रोच जुग्लोच । एवं विंशतिश्चान्ताः सेटः । **'म्लेछ** अव्यक्तायां वाचि' 'स्वरेभ्यः' (१।३।३०) इति छस्य द्वित्वे म्लेच्छति अम्लेच्छीत् मिम्लेच्छ । **'लछ लाछु** लक्षणे' छस्य द्वित्वे लच्छति लक्षयतीत्यर्थः आह्वयतीति वा, अलच्छीत् ललच्छ, लाछु–उदितत्वान्नागमे लाञ्छति स एवार्थः अलाञ्छीत् ललाञ्छ । **'वाछु** इच्छायाम्' वाञ्छति अवाञ्छीत् ववाञ्छ । **'आछु** आयामे' उदित्वान्नोन्त आञ्छति 'अनातो नश्चा०' (४।१।६९) इत्यातो वर्जनादात्वनागमयोरभावे आञ्छ आञ्छतुः । **'ह्रीछ** लज्जायाम्' छस्य द्वित्वे ह्रीच्छति अह्रीच्छीत् जिह्रीच्छ । **'हुर्छा** कौटिल्ये' 'भ्वादेर्नामिन०' (२।१।६३) इति दीर्घे अहूर्च्छीत् जुहूर्च्छ । **'मुर्छा** मोहसमुच्छ्राययोः' मूर्च्छति अमूर्च्छीत् मुमूर्च्छ । **'स्फुर्छा स्मुर्छा** विस्मृतौ' स्फूर्च्छति स्मूर्च्छति अस्फूर्च्छीत् अस्मूर्च्छीत् पुस्फूर्च्छ मुस्मूर्च्छ । **'युछ** प्रमादे' छस्य द्वित्वे युच्छति अयुच्छीत् युयुच्छ । अत्र **'उछु** उञ्छे' **'उछै** विवासे' इति केचित्पठन्ति, तदयुक्तम्, तुदादिपठिताभ्यामेवामूभ्यामभिमतरूपसिद्धेः । इति छान्ता एकादश सेटः । **'ध्रज ध्रजु ध्वज ध्वजु भ्रज भ्रजु व्रज व्रजु षस्ज** गतौ' ध्रजति अध्रजीत् दध्रज दध्रजतुः । इकारोपान्त्योऽयमिति केचित् ध्रेजति । ध्रजु उदित्वान्नागमे ध्रञ्जति अध्रञ्जीत् दध्रञ्ज ध्रञ्ज्यात् । ध्वज ध्वजति 'व्यञ्जनादेर्वोपान्त्यस्या०' (४।३।४७) इति वा वृद्धौ अध्वाजीत् अध्वजीत् । ध्वजु उदित्वान्नागमे ध्वञ्जति अध्वञ्जीत् दध्वञ्ज । भ्रज भ्रजति अभ्राजीत् अभ्रजीत् दभ्राज । भ्रजु भ्रञ्जति अभ्रञ्जीत् दभ्रञ्ज । वज वजति अवाजीत् अवजीत् ववाज । अनादेशादेरित्येत्वे प्राप्ते तत्प्रतिषेधसूत्रं **'न शसददवादिगुणिनः'** (४।१।३०) व आदिर्यस्य स वादिः गुणोऽस्यास्तीति गुणी शसश्च ददिश्च वादिश्च गुणी च शसददवादिगुणी तस्य शसददवादिगुणिनः । शसदद्योर्वकारादीनां गुणीनां च धातूनां स्वरस्य एत्वं न भवति । क्रमेणोदाहरणानि, 'शसू हिंसायां' विशशतुः विशशिथ । 'ददि दाने' दददे दददाते दददिरे । 'वलि वल्लि संवरणे' ववले ववलाते ववलिरे । 'अण रण वणादयो गतौ' ववणतुः ववणिथ । 'शॄश् हिंसायां' विशशरतुः विशशरिथ, चिचयिथ लुलविथ ॥ **प्रकृते** ववजतुः ववजुः ववजिथ । व्रजधातुं प्रसिद्धप्रयोगत्वात्कण्ठत एव वक्ष्यति । षस्ज 'षः स०' (२।३।९८) इति षस्य सत्वे 'सस्य शषौ' (१।३।६१) इति सस्य शत्वे 'तृतीयस्तृतीय०' (१।३।४९) इत्यासन्नत्वात् शस्य जत्वे सज्जति असज्जीत् ससज्ज । क्वचिदस्यात्मनेपदमपि दृश्यते 'प्रकृतेर्गुणसंमूढाः सज्जते गुणकर्मसु' 'सज्जमानमकार्येष्विति' । **अज** क्षेपणे च' चाद्गतौ, अजति अजिति **'अघञ्क्यबलच्यजेर्वी'** (४।४।२)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

घञ् क्यप् अल् अच् वर्जिते अशिति प्रत्यये विषयभूते अजेर्वी इत्यादेशः, अनुस्वार इड्निषेधार्थः । प्रवेयं प्रवयणीयं प्रवायकः प्रवीय प्रवीता प्रवीतिः । घञादिवर्जनं किम् ? समाजः उदाजः समज्या, समजः पशूनाम्, 'समजस्तु पशूनां समाजस्त्वन्यदेहिनामि'ति कोषः । 'उदजः पशूनां' अजतीत्यजः अजा ॥ **'अने वा'** ( ४।४।३ ) तृ अन इत्येतयोर्विषये वी आदेशो वा स्यात्, प्रवेता प्राजिता प्रवयणो प्राजनो दण्डः, 'प्रतोदस्तु प्रवयणं प्राजनं तोत्र तोदने इति कोषः । अन्ये स्वने प्रत्यये व्यञ्जनादौ चाविशेषेण विकल्पमिच्छन्ति । प्रवेता प्राजिता प्रवेष्यति प्राजिष्यति प्रविवीषति प्राजिजिषति प्रवेतव्यं प्राजितव्यं प्रवेतुं प्राजितुम् ॥ इति वी आदेशे अवैषीत् वियाय वीयात् वेता वेष्यति अवेष्यत् । **'कुजू खुजू स्तेये'** कोजति खोजति अकोजीत् अखोजीत् चुकोज चुखोज कोजिता खोजिता । **'अर्ज सर्ज अर्जने'** अर्जति आर्जीत् आनर्ज, सर्जति असर्जीत् ससर्ज । **'कर्ज व्यथने'** कर्जति अकर्जीत् चकर्ज । **'खर्ज मार्जने च'** चात् व्यथने, खर्जति चखर्ज । **'खज मन्थे'** मन्थो विलोडनं, खजति अखाजीत् चखाज चखजतुः खाजिता । **'खजु गतिवैकल्ये'** गतेर्वैकल्यं विकृतत्वम् उदित्वान्नागमे खञ्जति चखञ्ज । **'एजृ कम्पने'** एजति ऐजीत् ऐजिष्टाम् ऐजिषुः एजाञ्चकार एजिता । **'टुओस्फूर्जा वज्रनिर्घोषे'** स्फूर्जति अस्फूर्जीत् पुस्फूर्ज टुकार ओकार आकारश्च इतः टोरित्त्वात् 'ड्वितोऽथुः' ( ५।३।८३ ) 'व्यायामः कुलिशोऽस्यार्चिरतिभीः स्फूर्जथुर्ध्वनिः' इत्यभिधानचिन्तामणौ । ओदित्त्वाच्च 'सूयत्याद्योदितः' ( ४।२।७० ) इति क्तयोस्तस्य नत्त्वे आदित्वाच्चेडभावे स्फूर्णः स्फूर्णवान्, 'भ्वादेर्नामिनः०' ( २।१।६३ ) इति दीर्घे सिद्धे दीर्घोच्चारणं भ्वादेरिति दीर्घत्वस्यानित्यत्वज्ञापनार्थम् तेन कुर्दते कुर्दनमित्यपि सिद्धम् । **'क्षीज कूज गुज गुजु अव्यक्ते शब्दे'** क्षीजति अक्षीजीत् चिक्षीज, कूजति अकूजीत् चुकूज, गुज गोजति अगोजीत् जुगोज, गुजु उदित्त्वान्नागमे गुञ्जति अगुञ्जीत् जुगुञ्ज । **'लज लजु तर्ज भर्त्सने'** लजति अलाजीत् ललाज, लजु उदित्त्वान्नागमे लञ्जति अलञ्जीत् ललञ्ज, तर्जति अतर्जीत् ततर्ज । **'लाज लाजु भर्जने च'** चाद्भर्त्सने, लाजति अलाजीत् ललाज, लाजु लाञ्जति अलाञ्जीत् ललाञ्ज । **'जज जजु युद्धे'** जजति जञ्जति अजाजीत् अजञ्जीत् जजाज जजञ्ज । **'तुज हिंसायाम्'** तोजति अतोजीत् तुतोज । **'तुजु बलने च'** चात् हिंसायाम्, पालनेऽपीत्यन्ये, बलनं प्राणनम्, तुञ्जति अतुञ्जीत् तुतुञ्ज । **'गर्ज गजु गृज गृजु मुज मुजु मृजु मज शब्दे'** गर्जति अगर्जीत् जगर्ज **बहुलमेत**न्निदर्शनमिति वचनाच्चुरादित्वे गर्जयति, यल्लक्ष्यम् 'प्रतिरवपरिपूर्णा गर्जयन्त्यद्रयोऽपि' । गजु गञ्जति अगञ्जीत् जगञ्ज, गृज गर्जति अगर्जीत् जगर्ज जगृजतुः, गृजु गृञ्जति अगृञ्जीत् जगृञ्ज, मुज मोजति अमोजीत् मुमोज, मुजु मुञ्जति अमुञ्जीत् मुमुञ्ज, मृजु मृञ्जति, मज मजति अमाजीत् अमजीत् ममाज मेजतुः, **'गज मदने च'** चकाराच्छब्दे, मदनं मदोत्पत्तिः गजति अगाजीत् अगजीत् जगाज जगजतुः । अथ त्यजधातोः साधने विशेषोऽस्तीति तं पाठतो निर्दिशति **'त्यजं हानौ'** इत्यादि स्पष्टम् ॥ ७७ ॥ अद्यतन्यां सूत्रम्

## व्यञ्जनानामनिटि ॥ ७८ ॥ [ सि० ४।३।४५ ]

**व्यञ्जनान्तस्य धातोः परस्मैपदविषयेऽनिटि सिचि समानस्य वृद्धिः स्यात् । 'चजः कगम्' इति जस्य गत्वे 'अघोषे प्रथमोऽशिटः' इति गस्य कत्वे 'नाम्यन्तस्था' इति सस्य षत्वे, अत्याक्षीत् ॥७८॥**

'व्यञ्ज०' बहुवचनं जात्यर्थं तेनानेकव्यञ्जनव्यवधानेऽपि । रञ्ज अराङ्क्षीत्, सञ्ज असाङ्क्षीत्, भञ्ज अभाङ्क्षीत् । तक्षौ अताक्षीत्, त्वक्षौ अत्वाक्षीत् । औदित्वाद्वेटौ । समानस्येत्येव—उदवोढां पूर्ववृद्धौ एकदेशेति न्यायाद्वहेरोत्वं ततो भूतपूर्वगत्या ढस्य परेऽसत्वाद्वा व्यञ्जनान्तत्वे पुनरप्योकारस्य वृद्धिः प्राप्नोति । अनिटीति किम् ? अतक्षीत् अत्वक्षीत् अवेवीत् अकोषीत् अनर्तीत् ॥ ७८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अद्यतन्यां तकारादौ थकारादौ च सूत्रम्—

## धुड्ह्रस्वाल्लुगनिटस्तथोः ॥ ७९ ॥ [ सि० ४।३।७० ]

**धुडन्तात् ह्रस्वान्ताच्च धातोः परस्यानिटः सिचस्तादौ थादौ च लुक् स्यात् । अत्याक्ताम् अत्याक्षुः । अत्याक्षीः । अत्याक्ष्म ५ ॥ ७९ ॥**

'धुड्०' । क्रमेणोदाहरणानि, अभैत्तां अभैत्त अभित्त अभित्था । वस्–अवात्तां अवात्त अवात्त, ह्रस्व–अकृत अकृथाः, समस्थित समस्थिथाः, आहृत आहृथाः । धुड्–ह्रस्वादिति किम् ? अमंस्त अमंस्थाः अच्योष्ट अच्योष्टाः । लुकः परत्वेऽपि नित्यत्वात्प्रागेव गुणः । तथोरिति किम् ? अभित्सातां अभित्सत, अकृषातां अकृषत । अनिट इति किम् ? व्यद्योतिष्ट व्यद्योतिष्ठाः । ह्रस्वान्ताद्धातोरिति किम् ? प्राज्ञाविष्ट गौः स्वयमेव, अलाविष्टाम् अलाविष्ट, ञेरिटश्च परस्य लोपो मा भूत् , न चात्रानिट इत्यंशेन व्यंगविकलता, अलावि इति ह्रस्वान्तरूपाश्रयणेन ततः परस्यानिटः सिचो विद्यमानत्वात् । लुबधिकारे लुग्ग्रहणं सिज्लुक्यपि स्थानित्वेन तत्कार्यप्रतिपत्त्यर्थं, तेनावात्तामित्यादिषु सिचि विधीयमाना वृद्धिस्तदभावेऽपि सिद्धा भवति । तथासि इत्यनुवर्त्तमाने तथग्रहणं व्याप्तिप्रतिपत्त्यर्थं तेन साहचर्यं नास्ति । तथोरिति द्विवचनं यथासङ्ख्यपरिहारार्थम् ॥ ७९ ॥ परोक्षायां ञ्णिति सूत्रम् ।

## ञ्णिति ॥ ८० ॥ [ सि० ४।३।५० ]

**ञिति णिति च परे धातोरुपान्त्यस्यातो वृद्धिः स्यात् । तत्याज तत्यजतुः । तत्यजिथ तत्यक्थ ६ । त्यज्यात् ७ । त्यक्ता ८ । त्यक्ष्यति ९ । अत्यक्ष्यत् १० । 'व्रज गतौ' । व्रजति ४ ॥ ८० ॥**

'ञ्णिति' क्रमेणोदाहरणानि, अपाचि पाचकः पाकः पाचयति । अत इत्येव–भोगः भोजयति । उपान्त्यस्येत्येव–भञ्जः भञ्जकः चकासयति । ञ्णिति इति किम् ? पचति ॥८०॥ व्रजधातोरद्यतन्यां सूत्रम्

## वदव्रजलः ॥ ८१ ॥ [ सि० ४।३।४८ ]

**वदव्रजोर्लन्तरन्तयोश्चोपान्त्यस्य परस्मैपदे सेटि सिचि वृद्धिः स्यात् । अव्राजीत् अव्राजिष्टाम् अव्राजिषुः । अव्राजीः ५ । वव्राज ६ । व्रज्यात् ७ । व्रजिता ८ । व्रजिष्यति ९ । अव्रजिष्यत् १० । 'पत्लृ पथे गतौ' । पतति ४ ॥ ८१ ॥**

'वद०' उदाहरणक्रमश्चैवम् । अवादीत् अव्राजीत् । लन्त अचालीत् । रन्त अक्षारीत् । उपान्त्यस्येत्येव–अश्वल्हीत् अवभ्रीत् । अत इत्येव–न्यमीलीत् न्यखोरीत् । 'व्यञ्जनादेर्वोपान्त्यस्यातः' (४।३।४७) इति सूत्रस्यापवादोऽयम् । एवं 'षञ्ज सङ्गे' 'षः स०' (२।३।९८) इति षस्य सत्वे 'दंशसञ्जः शवि' (४।२।४९) इति निर्देश्य(क्ष्य)माणसूत्रेण नलोपे सजति 'स्थासेनि०' (२।३।४०) इति उपसर्गात्षत्वे व्यतिषजति अभिषजति अत्यषजत् 'व्यञ्जनानामनिटि' (४।३।४५) इति वृद्धौ असाङ्क्षीत् असाङ्क्ताम् असाङ्क्षुः । संयोगान्तत्वात् 'इन्ध्यसंयोग०' (४।३।२१) परोक्षायाः कित्त्वाभावे ससञ्ज ससञ्जतुः ससञ्जिथ ससङ्क्थ ससञ्जिव ससञ्जिम, सज्यात् । एवं जान्ताश्चतुश्चत्वारिंशत्, त्यजषञ्जवर्जाः सर्वे सेटश्च । 'कटे वर्षावरणयोः' वृष्टौ आवरणे चार्थे यथा कटति वर्षति मदजलं स्रवतीति कटः करिगण्डः, कटति आवृणोतीति कटो वीरणादिमयः, नास्य कटोऽसि निकटः समीप इत्यर्थः यत्तु 'संप्रोन्नेः संकीर्णप्रकाशाधिकसमीपे' (७।१।१२५) इति नेः कटप्रत्यये निकट इति तदपि नैकधा शब्दव्युत्पत्तिरिति ज्ञेयम्, व्यञ्जनादेर्वोपान्त्यस्य' (४।३।४७) इति वा प्राप्ताया

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वृद्धेरेदित्वात् 'न श्विजागृ०' (४।३।४९) इति निषेधे अकटीत् । अस्यादेशादित्वादनादेशादेरित्येत्वाभावे चकाट चकटतुः । 'शट रुजाविशरणगत्यवसादनेषु(--वशातनेषु)' चतुर्ष्वर्थेषु तालव्यादिः, शटति अशाटीत् २ शशाट शेटतुः । 'वट वेष्टने' वटति रज्जुम् अवाटीत् २ ववाट 'अनादेशादे०' (४।१।२४) इत्येत्वेऽस्य 'न शसददि०' (४।१।३०) इति प्रतिषेधे ववटतुः । 'किट खिट उत्त्रासे' उत्त्रासो भयोद्गतिः उत्त्रासनं च, केटति खेटति अकेटीत् अखेटीत् चिकेट चिखेट । 'शिट षिट अनादरे' एतौ तालव्यमूर्द्धन्यादी शेटति अशेटीत् शिशेट । षिट 'षः स०' (२।३।९८) इति सत्वे सेटति षोपदेशत्वात्षत्वे सिषेट । 'जट झट सङ्घाते' जटति अजाटीत् २ जजाट, झटति उज्झटति अझाटीत् २ जझाट आदेशादित्वादेत्वाभावे जझटतुः । 'पिट शब्दे च' चकारात्सङ्घाते, पेटति अपेटीत् पिपेट पिपिटतुः । 'भट भृतौ' भटति अभाटीत् २ बभाट । 'तट उच्छ्राये' तटति अताटीत् २ तताट तेटतुः । 'खट काङ्क्षे' काङ्क्षास्यास्तीति काङ्क्षः अभ्रादित्वादः काङ्क्षाविशिष्टो धात्वर्थः । खटति अखाटीत् २ चखाट चखटतुः । 'णट नृत्तौ' नतावित्यन्ये, हिंसायामप्येके, नटति णोपदेशत्वात् 'अदुरुपसर्गा०' (२।३।७७) इति णत्वे प्रणटति । नायं णोपदेश इत्येके, प्रनटति अनाटीत् २ ननाट नेटतुः । 'नटण् अवस्यन्दने' इत्यस्य तु नाटयति नाटकम् 'जासनाट०' (२।२।१४) इति कर्मणो वा व्याप्यत्वे चौरस्योन्नाटयति । 'हट दीप्तौ' हटति अहाटीत् २ जहाट जहटतुः, णके हाटकम् । 'षट अवयवे' 'षः स०' (२।३।९८) इति सत्वे सटति असाटीत् २ ससाट सेटतुः । 'लुट विलोटने' विलोडन इत्यन्ये, लोटति अलोटीत् लुलोट लुलुटतुः । 'लुटच् विलोटने' इत्यस्य तु लुट्यति, 'लुटण् भासार्थः' लोटयति । 'चिट प्रैष्ये' प्रैष्यं दासत्वं चेटति अचेटीत् चिचेट चिचिटतुः । 'विट शब्दे' आक्रोशे इत्यन्ये, वेटति अवेटीत् विवेट विविटतुः । 'हेट विबाधायाम्' हेटति अहेटीत् जिहेट । डान्तोऽयमित्येके हेडति अहेडीत् जिहेड । 'अट पट इट किट कट कटु कटै गतौ' अटति आटीत् 'अस्यादेराः परोक्षायाम्' (४।१।६८) आट आटतु आटुः, पटति अपाटीत् पपाट पेटतुः, 'पटण् भासार्थः' अस्य तु पाटयति 'पट वटण् ग्रन्थे' अदन्तः पटयति । इट एटति ऐटीत् २ इयेट इयटतुः, किट केटति अकेटीत् चिकेट चिकिटतुः, उत्त्रासे पठितो(तम)ऽप्यर्थभेदात्पुनः पठति । कट कटति अकाटीत् २ चकाट चकटतुः, कटु उदित्वान्नागमे कण्टति अकण्टीत् चकण्ट, कटै कटति ऐदित्त्वात् क्तयोर्नेट् कट्टः कट्टवान् । 'कुटु वैकल्ये' कुण्टति अकुण्टीत् चकुण्ट, डान्तोऽयमित्येके कुण्डति । 'मुट प्रमर्दने' मोटति 'पुट मुटण् संचूर्णने' इत्यस्य तु मोटयति । 'चुट चुटु अल्पीभावे' चोटति अचोटीत् चुचोट । चुण्टति अचुण्टीत् चुचुण्ट । 'वटु विभाजने' विभाजनं विभागीकरणं उदित्वान्ने वण्टति अवण्टीत् ववण्ट । 'वटुण् विभाजने' इत्यस्य तु वण्टयति, 'रुटु लुटु स्तेये' रुण्टति अरुण्टीत् रुरुण्ट, लुण्टति अलुण्टीत् लुलुण्ट, 'लुटण् स्तेये च' लुण्टयति, ठान्तावेताविल्यन्ये । 'स्फट स्फुटृ विशरणे' स्फुटति वस्त्रम् उदिदयमिति केचित् तत्र ने स्फण्टति अस्फाटीत् २ पस्फाट पस्फटतुः, स्फुटृ स्फोटति अद्यतन्यां ऋदित्वादङ् अस्फुटत् पक्षे अस्फोटीत्, 'स्फुटत् विकसने' इत्यस्य तु कुटादित्वात् स्फुटति अस्फुटीत् पुस्फोट, 'वट स्फुटण् भेदे' इत्यस्य तु स्फोटयति । कथं स्फुटयति स्फुटं करोतीति णिचि भविष्यति बहुलमेतदितिवचनात् चुराद्यदन्तो वा 'स्फुटण्' ज्ञेयः । 'लट बाल्ये' बाल्यं बालक्रिया लटति अलाटीत् २ ललाट लेटतुः । 'रट रठ च परिभाषणे' चकारो लटानुकर्षणार्थः तेन लटेरर्थद्वयं सिद्धम्, रटति अराटीत् २ रराट रेटतुः । इत्यष्टात्रिंशत् टान्ताः सेटश्च ३८ । रठति अराठीत् २ रराठ रेठतुः । 'पठ व्यक्तायां वाचि' पठति अपाठीत् २ पपाठ पेठतुः । एवं गदधातोरतिदेशेन तत्र कण्ठतो निर्दे-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्ष्यति । **'वठ स्थौल्ये'** वठति अवाठीत् २ 'अनादेशादे०' (४।१।२४) इत्येत्वस्य 'न शसददि०' (४।१।३०) इति प्रतिषेधे ववठतुः । **'मठ** मदनिवासयोश्च' चकारात्स्थौल्ये, मठति अमाठीत् २ ममाठ मेठतुः । **'कठ** कृच्छ्रजीवने' कठति अकाठीत् २ चकाठ आदेशादित्वात् चकठतुः । **'हठ** बलात्कारे' प्लवनकीलबन्धनयोरित्यन्ये, हठति अहाठीत् २ जहाठ जहठतुः **'उठ रुठ लुठ** उपघाते' उठति औठीत् उवोठ ऊठतुः ऊठुः । रुठ रोठति । लुठ लोठति । 'लुठत् संश्लेषणे' इत्यस्य लुठति । **'पिठ** हिंसासंक्लेशयोः' पेठति अपेठीत् पिपेठ पिपिठतुः । **'शठ** कैतवे च' चकारात् हिंसासंक्लेशयोः । तालव्यादिः, शठति अशाठीत् २ शशाठ शेठतुः । **'शुठ** गतिप्रतीघाते' तालव्यादिः, शोठति शुशोठ उदिदयमित्येके शुण्ठति । 'शुठण् आलस्ये' इत्यस्य तु शोठयति । **'कुठु लुठु** आलस्ये च' चकाराद्गति-प्रतीघाते, उदित्वान्ने कुण्ठति अकुण्ठीत् चुकुण्ठ । लुठु लुण्ठति अलुण्ठीत् लुलुण्ठ । **'शुठु** शोषणे' तालव्यादिः शुण्ठति अशुण्ठीत् शुशुण्ठ कर्मणि घञि शुण्ठी, 'शुठुण् शोषणे' इत्यस्य तु शुण्ठयति उणादौ 'किलिपिलि०'(६०८) इति इः शुण्ठिः नागरमेव । **अठ रुठु** गतौ अठति उदित्वान्ने रुण्ठति, **लुठु**मप्यन्येऽधीयते लुण्ठति अलुण्ठीत् लुलुण्ठ । **के**चिदर्थभेदात् पुनर्लुठमपि पठन्ति । इति ठान्ताः सप्तदश सेटश्च १७ । **'पुडु** प्रमर्दने' पुण्डति अपुण्डीत् पुपुण्ड, **'मुडु** खण्डने च' चकारात् प्रमर्दने, उदित्वान्ने मुण्डति अमुण्डीत् मुमुण्ड, 'मुडुङ् मज्जने' इत्यस्य तु मुण्डते, **'मडु** भूषायां उदित्वान्ने मण्डति अमण्डीत् ममण्ड 'भूषाक्रोधार्थ०' (५।२।४२) इत्यने मण्डनः उणादौ 'मृमन्य-ञ्जि०'(५८)इत्यूके मण्डूकः 'मडुण् भूषायाम्' इत्यस्य तु मण्डयति, 'वडुङ् मडुङ् वेष्टने' इत्यस्य तु मण्डते, **'गडु** वदनैकदेशे' गण्डगतसंहननक्रियायामित्यर्थः गण्डति अगण्डीत्, **'शौडृ** गर्वे' तालव्यादिः, शौडति अशौडत् अशौडीत् शुशौड शुशौडतुः, **'यौडृ** सम्बन्धे' संबन्धः श्लेषः, यौडति अयौडत् अयौडीत् युयौड, **'मेडृ म्रेडृ म्लेडृ लोडृ लौडृ** उन्मादे' मेडति अमेडत् अमेडीत् मिमेड मिमेडतुः, एवं म्रेडति म्लेडति लोडति लौडति पञ्चापि ज्ञेयाः । शौडृादयो लोडृवर्जा-ष्टान्ता इत्यन्ये **'रोडृ रौडृ तौडृ** अनादरे' रोडति अरोडत् अरोडीत् रुरोड, रौडति अरौडत् अरौडीत् रुरौड, तौडति अतौडत् अतौडीत् तुतौड । **'क्रीडृ** विहारे' क्रीडति अक्रीडत् अक्रीडीत् चिक्रीड **'तुडृ तूडृ** तोडने' तोडनं दारणम् । तोडति अतोडत् अतोडीत् तुतोड, दारणस्य हिंसाविशेषत्वाद्धन्त्यर्थाश्चेति चुरादित्वे तोडयति, **संयुक्तडान्तोऽयमित्येके** तुड्डति उभयोर्लक्ष्यं 'तुड्डत्यंहः सकलमचिरात्तोडयत्यश्रियं च' । 'तूड' तूडति अतूडत् अतूडीत् तुतूड । **'हुडृ हूडृ हूडृ हौडृ** गतौ' होडति हूडति हूडति हौडति अहोडत् २ अहूडत् २ अहूडत् २ अहौडत् २ जुहोड जुहूड जुहूड जुहौड । **'खोडृ** प्रतीघाते' गतावित्यनुवृत्तेर्गतिविषये प्रतीघाते खोडति अखोडत् २ चुखोड । **'विड** आक्रोशे' वेडति अवेडीत् विवेड विविडतुः । **'अड** उद्यमे' अडति ऽयडति आडीत् आड । **'लड** विलासे' लडति लत्वे ललति अलडत् ललाड लेडतुः 'लडण् उपसेवायाम्' इत्यस्य तु उपलाडयति 'ललिण् ईप्सायाम्' लालयते 'घुषेरविशब्दे' (४।४।६८) इति विशब्दप्रति-षेधात् णिचो नित्यत्वे उल्ललते । **'कडु** मदे' उदित्वान्ने कण्डति अकण्डीत् चकण्ड, 'कडुङ् मदे' इत्यस्य तु कण्डते । **'कदृड** कार्कश्ये दोपान्त्योऽयं 'तवर्गस्य०' (१।३।६०) इति दस्य डत्वे कड्डति अकड्डीत् चकड्ड । अचि कड्डः कर्कशः । क्विपि 'पदस्य' (२।१।८९) इति संयोगान्तलोपे कद् कत्, अन्ये तु डोपान्त्य-मेनं मन्यन्ते तदा संयोगान्तलोपे कड् कट् । **'अदृड** अभियोगे' 'तवर्गस्य०' इति दस्य डत्वे अड्डति आड्डीत् 'अनात०' (४।१।६९) इत्यात्वे ने च आनड्ड । क्विपि 'पदस्य' इति संयोगान्तलोपे अद् अत् अन्ये तु डोपान्त्यमेनं मन्यन्ते तदा संयोगान्तलोपे अट् अड् । **चुदृड** हावकरणे' हावो भावसूचनम्,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

डोपान्त्योऽयं 'तवर्गस्य०' इति दस्य डत्वे चुड्डति अचुड्डीत् चुचुड्ड अचि चुड्डं भगम्। क्विपि सौ 'पदस्य' इति संयोगान्तलोपे चुद् चुत्। डोपान्त्योऽयमित्यन्ये तत्र संयोगान्तलोपे चुड् चुट्। इति डान्तास्त्रिंशत् सेटश्च। 'अण रण वण व्रण बण भण भ्रण मण धण ध्वण ध्रण कण क्वण चण शब्दे' १४ चतुर्दशैते शब्दे। शब्दः शब्दक्रिया। अणति आणीत् आण आणतुः, रणति अराणीत् २ रराण रेणतुः, वणति अवाणीत् २ ववाण 'अनादेशादे०' (४।१।२४) इत्येत्वस्य 'न शसददि०' (४।१।३०) इति निषेधे ववणतुः ववणुः, व्रणति अव्राणीत् २ वव्राण वव्रणतुः, बणति अबाणीत् २ बबाण 'अनादेशादे०' इत्येत्वे बेणतुः बेणुः पवर्गतृतीयादित्वेन 'न शसददि०' इति प्रतिषेधाभावः, भणति अभाणीत् २ बभाण आदेशादित्वादेत्वाभावे बभणतुः बभणुः। णावचि भाणः प्रबन्धविशेषः। भ्रणति अभ्राणीत् २ बभ्राण बभ्रणतुः, मणति अमाणीत् २ ममाण मेणतुः मेणुः, धणति अधाणीत् २ दधाण दधणतुः, ध्वणति अध्वाणीत् २ दध्वाण, ध्रणति अध्राणीत् २ दध्राण दध्रणतुः दध्रणुः, कणति अकाणीत् २ चकाण चकणतुः, क्वणति अक्वाणीत् २ चक्वाण चक्वणतु चक्वणुः, चणति अचाणीत् २ चचाण चेणतुः चेणुः, इह च शब्दार्थत्वाविशेषेऽपि रणितं नूपुरादौ मणितं सुरतकूजिते कणितमार्त्ते क्वणितं वीणादौ रूढम्, एवमन्यत्रापि कूजितं विहङ्गादौ बृंहितं गजे हेषितं हये वासितं पशुषु गर्जितं मेघादौ गुञ्जितं सिंहादावित्यादिकं लक्ष्यादभ्यूह्यम्। 'ओणृ अपनयने' ओणति औणत् औणीत् 'गुरुनाम्यादे०' (३।४।४८) इति परोक्षाया आमादेशे ओणाञ्चकार ऋदित्वाण्णौ ङे 'उपान्त्यस्यासमानलोपि-शास्वृदितो ङे' (४।२।३५) समानलोपि-शासृ-ऋदनुबन्धवर्जितस्य धातोरुपान्त्यस्य ङपरे णौ परे ह्रस्वो भवति। अस्य च ऋदित्त्वात् ह्रस्वाभावे मा भवानोणिणत्। ननु नित्यत्वादन्तरङ्गत्वाच्च द्वित्वे कृते उपान्त्याभावादेव ह्रस्वो न प्राप्नोति किमृदित्करणेन। सत्यं इदमेव ऋदित्करणं ज्ञापकं नित्यमन्तरङ्गं च द्वित्वमुपान्त्यह्रस्वो बाधते तेनान्यत्रापि पूर्वं ह्रस्वः पश्चाद्द्वित्वम् मा भवानटिटत् मा भवानशिशत् वनि 'वन्याङ् पञ्चमस्य' (४।२।६५) इत्यात्वे अवावा स्त्रियां 'णस्वरा०' (२।४।४) इति ङ्यां नस्य रत्वे अवावरी। 'शोणृ वर्णगत्योः' तालव्यादिः, शोणति अशोणत् अशोणीत् शुशोण शुशोणतुः, 'श्रोणृ श्लोणृ सङ्घाते' तालव्यादी, श्रोणति अश्रोणत् अश्रोणीत् शुश्रोण शुश्रोणतुः अचि गौरादित्वात् ङ्यां च श्रोणी, श्रोणिरिति तु श्रृणौतेरौणादिके णौ, श्लोणृ श्लोणति अश्लोणत् शुश्लोण शुश्लोणतुः, 'पैणृ गतिप्रेरणश्लेषणेषु' पैणति अपैणत् पिपैण। इत्येकोनविंशतिर्णान्ताः सेटश्च। 'चितै संज्ञाने' संज्ञानं संवित्तिः, चेतति अचेतीत् चिचेत ऐदित्त्वात् क्तयोर्नेट् चित्तः चित्तवान् चित्तम्, 'चितिण् संवेदने' इत्यस्य तु चेतयते चेतनः चेतना 'अत सातत्यगमने' गमनं नित्यगतिः अतति आतीत् आत आततुः 'च्युतृ आसेचने' आसेचनमीषत्सेकः च्योतति ऋदित्वात् 'ऋदिच्छ्वि०' (३।४।६५) इति वाङि अच्युतत् अच्योतीत् चुच्योत चुच्युततुः। 'चुतृ स्चुतृ स्च्युतृ क्षरणे' क्षरणं स्रवणं चोतति अचुतत् अचोतीत् चुचोत। स्चुतृ सो दन्त्योऽत्र 'सस्य शषौ' (१।३।६१) इति शत्वे श्चोतति अश्चुतत् अश्चोतीत्। स्च्युतृ सो दन्त्यः, योपान्त्यश्चात्र, 'सस्य शषौ' इति शत्वे श्च्योतति अश्च्युतत् अश्च्योतीत् चुश्च्योत। षट् श्च्योतन्तीति 'ङ्नः सः त्सोऽश्चः' (१।३।१८) इति श्चो वर्जनाच्छः त्सो न भवति। श्चो वर्जनादेव च सकारोपदिष्टं कार्यं तदादेशस्य तालव्यस्यापि विज्ञायते तेन घृतं श्च्योततीति क्विप् घृतश्च्युत्, घृतश्च्युतमाचष्टे णिचि अन्त्यस्वरादिलुकि पुनः क्विप् 'य्वोः०' (४।४।१२१) इति यलुकि घृतश्च् ततः सौ 'संयोगस्यादौ०' (२।१।८८) इति शलुकि सिद्धं घृतक् इति। नन्वत्र 'न सन्धि०' (७।४।१११) इत्यत्रास्लुकि इति वर्जनाण्णिलुकः स्थानित्वप्रतिषेधाभावे णिलुक् स्थानीति पदान्तत्वाभावे



Jain Education International For Personal & Private Use Only www.jainelibrary.org

सलुग् न प्राप्नोत्येव यथा सुकुत्स्यतेः क्विपि सुकूरिति । सत्यं अस्लुकीतिवर्जनस्य प्रायिकत्वादसद्विधौ सलुक्यपि स्थानित्वप्रतिषेधाद् भवत्येव, *स्नु(स्न्यु)तावपि समानमेतत् । आद्यो द्रमिलानामेव, द्वितीयः कौशिकस्यैव सम्मतः, एवमन्यत्राप्याचार्यभेदेन धातुपाठो द्रष्टव्यः । 'जुतृ भासने' जोतति ऋदित्वाद्वाङि अजुतत् अजोतीत् जुजोत जुजुततुः जुजुतुः । 'अतु बन्धने' उदित्वान्ने अन्तति आन्तीत् 'अनातो०' (४।१।६९) इत्यात्वे ने च आनन्त । अन्ये 'अतु इतु बन्धने' इति पेठुः इन्तति ऐन्तीत् इन्ताञ्चकार । 'कित निवासे' केतति अकेतीत् चिकेत चिकिततुः । धातूनामनेकार्थत्वात् 'कितः संशयप्रतीकारे' ( ३।४।६ ) इति स्वार्थे सनि विचिकित्सति मे मनः, चिकित्सत्यातुरं वैद्यः । निग्रह-विनाशावपि प्रतीकारस्यैव भेदौ । परक्षेत्रे विचिकित्स्यः पारदारिकः, विचिकित्स्यानि क्षेत्रे तृणानि । 'ऋत घृणागतिस्पर्द्धेषु' अयं स्वार्थिकप्रत्ययान्ताधिकारे वक्ष्यते । इति तान्ता दश सेटश्च ।

अथात्र तकारान्तधात्वधिकारात् ज्वलाद्यन्तर्गणपठितमपि पतधातुं कण्ठतो निर्दिशति 'पत्लृ इति' पतति सनि 'इवृध०' ( ४।४।४७ ) इति वेट् । अनिट् पक्षे 'रभलभ०' ( ४।१।२१ ) इति स्वरस्येत्वे द्वित्वाभावे च पित्सति, इटि पिपतिषति, यङि 'वञ्चस्रंस०' ( ४।१।५० ) इति पूर्वस्यान्तो नीः पनीपत्यते, भावकर्मणोरेव प्राप्तस्य घ्यणो 'भव्यगेय०' ( ५।१।७ ) इति कर्त्तरि वोत्पत्तौ आपात्यः, पक्षे आपात्यमनेन 'वा ज्वल०' ( ५।१।६२ ) इति णे पातः—राहुः, पक्षे विपतः—पक्षी, वन्धि उत्पातः निपातः 'वेटोऽपतः' ( ४।४।६२ ) इति पतो वर्जनादिट्प्रतिषेधाभावे पतितः पतितवान् । 'उदः पचि०' (५।२।२९) इति इष्णौ उत्पतनशील उत्पतिष्णुः 'लषपत०' (५।२।४१) इत्युकणि प्रपातुकः 'भूषाक्रोधार्थ०' ( ५।२।४२ ) इत्यने पतनः 'नीदाम्व्०' ( ५।२।८८ ) इति त्रटि पत्रम् 'विशपत०' ( ५।४।८१ ) इति णमि गेहानुप्रपातमास्ते उणादौ 'वृमक्षी( ४५६ )त्यत्रे पतत्रं पत्रं' 'पतिकृलु-भ्योणिदि( ४७९ )त्याले पातालं 'पतेः सलः' ( ५७४ ) पत्सलः प्रहारः 'कमिवमिति' ( ६१८ ) णिदिः सम्पातिः गृध्रराजः 'सात्मन्नात्मन्निति ( ९१६ ) मनि निपातनात् णौ पाप्मा 'पतण् गतौ' वा अदन्तः 'शीङ्श्रद्धा०' ( ५।२।३७ ) इत्यालौ पतयालुः । कसौ 'घसेकस्वरातः०' ( ४।४।८२ ) इति इटि पेतिवान् पेतुषः ॥ ८१ ॥ अथास्य उपसर्गयोगे कार्यविशेषमाह सूत्रम्—

## नेर्ङ्मादापतपदनदगदवपीवहीशमूचिग्यातिवातिद्रातिप्सातिस्यति-हन्तिदेग्धौ ॥ ८२ ॥ [ सि० २।३।७९ ]

**अद्रुरुपसर्गान्तस्थाद्रादे परस्यैषां सप्तदशानां सम्बन्धिनो नेरुपसर्गस्य नो णः स्यात् । प्रणिपतति ॥ ८२ ॥**

'नेर्ङ्मा०' ङ्मादीनां सप्तदशानां द्वन्द्वः । 'अद्रुरुपसर्गा०' ( २।३।७७ ) इत्यादि दुर्वर्जोपसर्गस्थेभ्यः अन्तर्शब्दस्थेभ्यश्च (?) रेफषकारऋवर्णेभ्यः परस्य नेरुपसर्गस्य संबन्धिनो नकारस्य ङ्मादिषु ( माङादिषु ) सप्तदशसु धातुषु परेषु णो भवति । ङ्मेति ङकारोपलक्षितयोः 'माङ् मानशब्दयोः' 'मेङ् प्रतिदाने' इत्येतयोर्ग्रहणं न तु 'मांक् माने' 'मींग्श् हिंसायां' 'डुमिंग्ट् प्रक्षेपणे' इति माति-मीनाति-मिनोतीनां ग्रहणम् । क्रमेणोदाहरणानि—प्रणिमिमीते परिणिमिमीते प्रणिमयते परिणिमयते । अनयोर्ङकारनिर्देशश्च नानुबन्धार्थः किन्तु मात्यादिनिवृत्त्यर्थः, तेन यङ्लुप्यपि नेर्णत्वं स्यात् प्रणिपनीपतीति । देति दासंज्ञापरिग्रहात् ददाति-दयति-यच्छति-द्यति-दधाति-धयतीनां ग्रहणम् । 'डुदांग्क् दाने' 'देङ् त्रैङ् पालने' 'दाम् दाने' 'दों छोंच् छेदने' 'डुधांग्क् धारणे' 'ट्धें पाने' एते दासंज्ञा इत्यर्थः । प्रणिददाति प्रणिदयते

* श्रुतावपि इति हैमधातुपारायणे ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रणियच्छति प्रणिद्यति प्रणिदधाति प्रणिधयति । पत प्रणिपतति, पद् प्रणिपद्यते, नद् प्रणिनदति, गद प्रणिगदति, वपी प्रणिवपति, वही प्रणिवहति, शमू प्रणिशाम्यति चिग् प्रणिचिनोति, याति प्रणियाति, वाति प्रणिवाति, द्राति प्रणिद्राति, प्साति प्रणिप्साति, स्यति प्रणिस्यति, हन्ति प्रणिहन्ति, देग्धि प्रणिदेग्धि । दृचि प्रणिमाता प्रणिदातेत्यादि । अन्तरः खल्वपि—अन्तर्णिमिमीते अन्तर्णिदेग्धि, अडागमस्य धात्ववयवत्वेन व्यवधायकत्वाभावात् प्रण्यपतत् प्रण्यमिमीतेत्यादावपि भवति । प्रण्यास्यतीत्यादौ त्वाङा व्यवधानेऽपि 'पदेऽन्तरे०' (२।३।९३) इत्यत्राङो व्यवधायकत्वप्रतिषेधाद्भवति । अदुरित्येव दुर्निमाता । उपसर्गान्तर इत्येव—प्रातर्निमिमीते । वप्यादीनामनुबन्धेन तिवा च निर्देशो यङ्लुब्निवृत्त्यर्थः, तेन प्रनिवावपीत्यादौ न भवति । पूर्वेषु तु भवति—प्रणिमामाति प्रणिमामेतीत्यादि । ङ्मादिष्विति किम् ? प्रनिमाति प्रनिमीनाति प्रनिमिनोति प्रनिदायन्ते व्रीहयः प्रनिदायन्ते पात्राणि ।

अत्रायं विशेषः—**'अकखाद्यषान्ते पाठे वा'** (२।३।८०) पाठे धातूपदेशे ककारखकारादिः षकारान्तश्च यो धातुस्ताभ्यामन्यस्मिन् धातौ परे अदुरुपसर्गान्तःशब्दस्थाद्रषृवर्णात्परस्य नेर्नकारस्य णो वा भवति । प्रणिपचति प्रनिपचति, प्रणिभिनत्ति २ प्रणिपापच्यते २, प्रणिपापचीति २, प्रणिपिपक्षति प्रनिपिपक्षति, प्रण्यपीपचत् २ प्रणिष्टभ्नाति प्रनिष्टभ्नाति । स्तभेः सौत्रेषु पाठात्पाठविषयत्वम् । पूर्वसूत्रारम्भसामर्थ्यात्पूर्वसूत्रविभक्तोऽस्य विषयस्तेन प्रणिमयते इत्यादौ पूर्वेण नित्यमेव णत्वम् । अकखादीति किम् ? प्रनिकरोति प्रनिकिरति प्रनिखनति प्रनिखादयति । अषान्त इति किम् ? प्रनिद्वेष्टि प्रनिपिनष्टि । पाठ इति किम् ? इह च प्रतिषेधो यथा स्यात् प्रनिचकार प्रनिचखाद प्रनिपक्ष्यति, इह च मा भूत् प्रणिवेष्टा प्रनिवेष्टा, प्रणिदेष्टा प्रनिदेष्टा । यङ्लुपि नेच्छन्त्यन्ये प्रनिपापचीत्यादि । एवं प्रणिपततीत्यादि सिद्धम् ॥ ८२ ॥ अद्यतन्यां सूत्रम्—

## लृदिद्द्युतादिपुष्यादेः परस्मै ॥ ८३ ॥ [ सि० ३।४।६४ ]

**लृदितो द्युतादेः पुष्यादेश्च परस्मैपदेऽद्यतन्यामङ् स्यात् ॥ ८३ ॥**

**'लृदि०'** लृ इत् येषां लृदितः, द्युतादयो 'द्युद्भ्योऽद्यतन्याम्' (३।४।४४) इत्यत्र परिगणितास्त्रयोविंशतिः, पुष्यादयो दिवाद्यन्तर्गता 'दिवादेः श्यः' (३।४।७२) इत्यत्र परिगणिष्यते । पुष्यादेरित्यत्र श्यनिर्देशात् पोषति पुष्णात्यादिग्रहणं न स्यात् । शेषं स्पष्टम् ॥ ८३ ॥ पुनरप्यत्र विशेषमाह सूत्रं—

## श्वयत्यसूवचपतः श्वास्थवोचपप्तम् ॥ ८४ ॥ [ सि० ४।३।१०३ ]

**एषां चतुर्णामङि परे यथासङ्ख्यं श्वादयः स्युः । इति पप्तादेशे । अपप्तत् अपप्तताम् अपप्तन् ५ । पपात ६ ॥ ८४ ॥**

**'श्वय०'** एषां चतुर्णामिति श्वयतीति 'ट्वोश्वि गतिवृद्ध्योः' इति असू इति 'असूच् क्षेपणे' इति वच इति 'वचंक् परिभाषणे' इति पत् इति प्रस्तुतोऽयमेव धातुः । श्वश्च अस्थश्च वोचश्च पतश्च श्वास्थवोचपप्तम् चत्वारोऽप्येते यथाक्रममादेशाः । परोक्षायां पपात ॥ ८४ ॥ द्विवचने सूत्रं

## अनादेशादेरेकव्यञ्जनमध्येऽतः ॥ ८५ ॥ [ सि० ४।१।२४ ]

**अवित्परोक्षा—सेट्थवोः परयोर्योऽनादेशादिर्धातुस्तत्संबन्धिनोऽकारस्यासंयुक्तव्यञ्जनमध्यगतस्य एः स्यान्न तु द्विः । प्राक्तु स्वरे स्वरविधेरिति कृतमपि द्वित्वं निवर्तते इत्यर्थः । पेततुः पेतुः । पेतिथ ६ । पप्तात् ७ । पतिता ८ । 'गद व्यक्तायां वाचि' । गदति प्रणिगदति ४ ॥८५॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'अना०' अविद्परोक्षा–सेट्थवोरिति पूर्वसूत्रादनुवर्त्तनीयम् । ननु वित्परोक्षावर्जनं णवर्थं णवि तु णित्त्वाद्वृद्धौ अकारस्यैवाभावात् अनर्थकमिदमिति । नैवम् अन्त्यणवो वा णित्त्वात् अहं पपच पपतेत्यादौ अकारसम्भवात्तद्व्यावर्त्तकत्वेन सार्थकमेवेदमिति । परोक्षायामित्येव–पत्यते । सेट्थवीत्येव–पपक्थ अनादेशादेरिति किम् ? बभणतुः बभणिथ, चकणतुः चकणिथ । एकव्यञ्जनमध्य इति किम् ? ततक्षतुः । अत इति किम् ? दिदिवतुः दिदेविथ । अवित्परोक्षा–सेट्थवृभ्यामनादेशादित्वस्य विशेषणं किम् ? इहापि यथा स्यात्–णम् नेमतुः नेमुः, षहि सेहे सेहाते सेहिरे, युजादौ षहण् सेहिथ । अत्र हि अनिमित्ते एव नत्वसत्वे न तु परोक्षाथवृनिमित्ते इति । इति तकारान्तधातवो दश सेटश्च ॥ १० ॥

'कुथु पुथु लुथु मुथु मन्थ मान्थ हिंसासंक्लेशयोः' हिंसा प्राण्युपघातः, संक्लेशो बाधा । उदित्वान्ने कुन्थति । 'कुथश् संक्लेशे' इत्यस्य तु कुथ्नाति, पुथु पुन्थति, लुथु उदित्वान्ने लुन्थति, मथु मन्थति, मन्थ नोऽपान्त्योऽयं विलोडनेऽयमित्येके मन्थति, 'मन्थश् विलोडने' इत्यस्य तु मथ्नाति मथ्नीतः । मान्थ मान्थति अमान्थीत् ममान्थ । इति थान्ता षट् सेटश्च ॥ ६ ॥ 'खादृ भक्षणे' खादति अखादीत् चखाद चखादतुः । 'बदृ स्थैर्ये' ओष्ठ्यादिः । 'वदृ व्यक्तायां वाचि' इति तु दन्त्योष्ठ्यादिः स च यजादिगणे पठितः, बदति अबादीत् अबदीत् बबाद बेदतुः । 'खद हिंसायां च' चकारात् स्थैर्ये । खदति अखादीत् चखाद चखदतुः । गदधातुं कण्ठतो निर्दिशति–गदति 'नेर्ङ्मादा०' ( २।३।७९ ) इति णत्वे प्रणिगदति ह्यस्तन्यां प्रण्यगदत् । प्राण्यगदत् अत्र 'पदेऽन्तरे०' इत्यत्राङो वर्जनादाङ्व्यवधानेऽपि णत्वं स्यात् ॥ तथाहि 'पदेऽन्तरेऽनाङ्तद्धिते' (२।३।९३) आङन्तं तद्धितान्तं च वर्जयित्वाऽन्यस्मिन् पदे निमित्तनिमित्तिनोरन्तरे व्यवधायके नस्य णत्वं न स्यात् । प्रावनद्धं पर्यवनीतं माषकुम्भवापेन, व्रीहिकुम्भवापेन, चतुरङ्गयोगेन, भर्तृबाहुयुगेन, रोषभीममुखेन । अत्र यदा माषकुम्भस्य वाप इति, माषाः कुम्भवापोऽस्येति वा समासस्तदा 'वोत्तरपदान्त-न-स्यादेरयुवपक्वाह्नः' ( २।३।७५ ) अनेन विकल्पे प्राप्ते निषेधस्तद्यथा–पूर्वपदस्थाद्रषृवर्णात्परस्योत्तरपदान्तभूतस्य नस्य तथा नागमस्य स्यादेश्च नकारस्य णो वा स्यात्, न चेत्स नकारो युवन् पक्वन् अहन् शब्दसंबन्धी भवति । उत्तरपदान्त–व्रीहिवापिणौ व्रीहिवापिनौ व्रीहिवापिणी व्रीहिवापिनी स्त्री कुले वा । माषवापिणौ माषवापिनौ माषवापिणी माषवापिनी स्त्री कुले वा । नागम–व्रीहिवापाणि व्रीहिवापानि माषवापाणि माषवापानि कुलानि । 'इवु व्याप्तौ' चेत्यस्यानटि प्रेण्वनं प्रेन्वनं 'हिवु प्रीणने' 'पिवु सेचने' इत्यनयोः शतरि प्रहिण्वन् प्रहिन्वन् प्रपिण्वन् प्रपिन्वन् । हिनोतेरेव ह्यस्तन्यां प्राहिण्वन् प्राहिन्वन् । बहुलवचनादनाम्नोऽपि समासः, समासे हि पूर्वोत्तरपदव्यवहारः पुरुषश्च वारि च पुरुषवारिणी इत्यत्र तु परमपि विकल्पं बाधित्वाऽन्तरङ्गत्वादेकपदाश्रितं 'रषृवर्ण०' ( २।३।६३ ) इत्यादिना नित्यमेव णत्वम् । स्यादि–व्रीहिवापेण व्रीहिवापेन माषवापेण माषवापेन व्रीहिवापाणां व्रीहिवापानां माषवापाणां माषवापानां । व्रीहिवापान् माषवापानित्यत्र त्वनन्त्यस्येत्यधिकारान्न भवति । उत्तरपदेति किम् ? गर्गाणां भगो गर्गभगः सोऽस्यास्तीति समासपदादिन् गर्गभगिणी अत्रोत्तरपदस्यान्तो नकारो न भवतीति विकल्पो न भवति, एकपदस्थत्वात्तु मातृभोगीण इत्यादिवन्नित्यमेव णत्वं भवति । अन्तादिग्रहणं किम् ? गर्गाणां भगिनी गर्गभगिनी एवं दाक्षिभगिनी । अत्र न नकारोऽन्तः किन्तु ङीप्रत्ययः । यद्येवं माषवापिणी माषवापिनीत्यत्र नकारस्योत्तरपदान्तत्वाभावाद्विकल्पो न प्राप्नोति । उच्यते । 'गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् प्रत्ययोत्पत्तेः' इति न्यायात् प्रागेव स्त्रीप्रत्ययादन्तरङ्गत्वादश्वक्रीतीत्यादावकारान्तेनेव क्रीतशब्देन नकारान्तेन वापिन्-शब्देनोपपदसमासः, पश्चात् स्त्रीप्रत्ययः । विभक्त्य-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न्तत्वाभावेऽपि च रूढत्वादुत्तरपदत्वं ततश्चोत्तरपदस्यान्तो नकार इति णत्वविकल्पो भवति । अयुवपकाह्न इति किम् ? आर्ययूना क्षत्रिययूना प्रपकानि परिपकानि प्रपकेन परिपकेम प्रपकानां परिपकानां दीर्घाह्नी शरत् दीर्घाह्ना निदाघेन ऽयाह्नि चतुरहनि 'सङ्ख्यासायवेरह्नस्याहन ङौ वा' ( १।४।५० ) इत्यह्नस्याहनादेशः । अलचटतवर्गशसान्तरे इत्येव–गर्दभवाहिनौ गर्दभवाहिनः ॥ यदा तु माषस्य कुम्भवाप इति तदा 'कवर्गैकस्वरवति' ( २।३।७६ ) इति नित्यं प्राप्ते । एवं शेषेष्वपि यथासम्भवं वाच्यम्, अन्ये तु माषाणां कुम्भवाप इति व्यवधायकस्योत्तरपदावयवत्वे प्रतिषेधं नेच्छन्ति, तन्मते माषकुम्भवापेणेत्यादौ नित्यमेव णत्वम्, अपरे तु माषकुम्भस्य वाप इति व्यवधायकस्य पूर्वपदावयवत्वेऽपि प्रतिषेधं नेच्छन्ति, तन्मते माषकुम्भवापेन माषकुम्भवापेणेत्यादौ विकल्प एव भवति । अनाङीति किम् ? प्राणद्धं पर्याणद्धं प्रण्यास्यति प्रण्यापचति । अतद्धित इति किम् ? आर्द्रगोमयेण शुष्कगोमयेण । एवं च आङो व्यवधायकत्वाभावात् ह्यस्तन्यां प्रण्यागदत् इति सिद्धम् ॥८५॥ अद्यतन्यां सूत्रम्—

## व्यञ्जनादेर्वोपान्त्यस्यातः ॥ ८६ ॥ [ सि० ४।३।४७ ]

**व्यञ्जनादेर्धातोरुपान्त्यस्यातः सेटि सिचि परस्मैपदे वृद्धिर्वा स्यात् । अगादीत्–अगदीत् अगादिष्टाम्–अगदिष्टाम् अगादिषुः–अगदिषुः ५ । जगाद ६ । गद्यात् ७ । गदिता ८ । गदिष्यति ९ । अगदिष्यत् १० । 'अर्द गतियाचनयोः' । अर्दति ४ । आर्दीत् ५ । आनर्द ६ । अर्द्यात् ७ । अर्दिता ८ । अर्दिष्यति ९ । आर्दिष्यत् १० । 'णिदु कुत्सायाम्' । 'पाठे धात्वादेर्णो नः' ॥८६॥**

'व्यञ्ज०' सेटि सिचीति परस्मैपदविषये इति शेषः । अगादीत् अगदीत् । एवं गौरिवाचारीत् अगावीत् अगवीत् । व्यञ्जनादेरिति किम् ? मा भवानटीत् मा भवानशीत् । उपान्त्यस्येति किम् ? अरक्षीत् अपिपठिषीत् अवधीत् । अत इति किम् ? अदेवीत् । सेटीत्येव अघाक्षीत् । एवं '**पठ** व्यक्तायां वाचि' इति **ठकारान्तस्यापि पठधातोर्लाघवार्थमत्र निर्देशः** । एवं च 'रद विलेखने' विलेखनमुत्पाटनं रदति अरादीत् अरदीत् रराद रेदतुः । '**णद ञिक्ष्विदा** अव्यक्ते' शब्दे, शब्दमात्र इत्यन्ये, 'पाठे धात्वादेर्णो नः' ( २।३।९७ ) इति नत्वे नदति 'अदुरुपसर्गा०' ( २।३।७७ ) इति णत्वे प्रणदति 'नेर्ङ्मादा०' ( २।३।७९ ) इति णत्वे प्रणिनदति, अनादीत् अनदीत्, ननाद नेदतुः । 'ञिक्ष्विदा' क्ष्वेदति अक्ष्वेदीत् चिक्ष्वेद चिक्ष्विदतुः । अर्दधातुं पठतो निर्दिशति अर्दतीत्यादि सर्वं सुगमम् । 'ऋथ अर्दिण् हिंसाया'मित्यस्य तु 'युजादेर्नवा' ( ३।४।१८ ) इति वा णिचि अर्दयते अर्दते । '**नर्द णर्द गर्द**' शब्दे नोपदेशत्वाण्णत्वाभावे प्रनर्दति । णर्दधातोस्तु 'पाठे धात्वादे'रिति नत्वे नर्दति णोपदेशत्वाण्णत्वे प्रणर्दति, गर्द गर्दति अगर्दीत् जगर्द गर्दभः, '**तर्द** हिंसायाम्' तर्दति अतर्दीत् ततर्द, '**कर्द** कुत्सिते शब्दे' कर्दति अकर्दीत् चकर्द, '**खर्द** दशने' दशनमिह दन्दशूककर्तृकं दन्तकर्म स्वभावाच्च धातुः साधनप्रधानप्रयोगसमवायी खर्दति अखर्दीत् चखर्द । **पूर्वे** तु 'खर्द दन्दशूके' इति पठन्ति, व्याचक्षते च—दन्दशनशीलो दन्दशूक उच्यते अनेन च तद्विषया क्रिया लक्ष्यते क्रियार्थत्वाद्धातोः । दन्दशन इति यङन्तनिर्देशेऽपि तद्विषया क्रिया प्रतीयते, किन्तु साधननिर्देशः साधनप्रधानप्रयोगसमवायित्वज्ञापनार्थ इति । '**अदु** बन्धने' उदित्वान्नोऽन्ते अन्दति आन्दीत् 'अनातः०' ( ४।१।६९ ) इत्यात्वे ने च आनन्द । उणादौ 'कृषिचमि०' ( ८२९ ) इत्यूः अन्दूः गजपादशृङ्खलम् । '**इदु** परमैश्वर्ये' परमैश्वर्यं परमेशनक्रिया उदित्वान्ने इन्दति ऐन्दीत् 'गुरुनाम्यादे०' ( ३।४।४८ ) इत्यामादेशे इन्दाञ्चकार उणादौ भीवृधि० ( ३८७ ) इति रे इन्द्रः । '**विदु** अवयवे' अवयव एकदेशः । अनेन स्वगता क्रिया

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लक्ष्यते उदित्वान्ने विन्दति यथभिधानमस्ति विन्दुरिति तु दृश्यते यथा गण्डति गण्ड इति । उणादौ 'भूसृतृत्सरी(७१६)त्युः' विन्दुः ॥ ८६ ॥

## उदितः स्वरान्नोऽन्तः ॥ ८७ ॥ [ सि० ४।४।९८ ]

**उदितो धातोः स्वरात्परो नोऽन्तः स्यात् । म्नां धुड्वर्गेन्त्योऽपदान्ते । निन्दति ४ । इट इतीति सिज्लोपे । अनिन्दीत् अनिन्दिष्टाम् अनिन्दिषुः । अनिन्दिष्म ५ । निनिन्द ६ । निन्द्यात् ७ । निन्दिता ८ ॥ एवं 'टुनदु समृद्धौ' नन्दतीत्यादि १० । 'णमं प्रह्वत्वे' । नमति ४ ॥ ८७ ॥**

'उदित०' णिदुधातुं णदुधातुं च स्पष्टमाचष्टे, स्पष्टार्थं च सर्वमेतत् । किन्तु '**निंसनिक्षनिन्दः कृति वा**' (२।३।८४) अदुरुपसर्गान्तःशब्दस्थाद्रषृवर्णात्परस्य निसादीनां धातूनां नकारस्य कृत्प्रत्यये परे णो वा भवति । 'प्रणिसुकि चुम्बने' प्रणिंसनं प्रनिंसनं प्रणिक्षणं प्रनिक्षणं । णिदु-धातुः प्रस्तुतोऽयं प्रणिन्दनं । कृतीति किम् ? प्रणिंस्ते परिणिंस्ते प्रणिक्षति परिणिक्षति प्रणिन्दति परिणिन्दति, णोपदेशत्वान्नित्यं णत्वं भवति । 'चदु दीप्त्याह्लादयोः' आह्लादः आह्लादनमानन्दोत्पादनमित्यर्थः । उदित्वान्ने चन्दति अचन्दीत् चचन्द । चन्दति दीप्यते आह्लादयति वा 'रम्यादिभ्यः०' (५।३।१२६) इत्यनटि चन्दनम् उणादौ 'भीवृधि०' (३८७) इति सूत्रेण रे चन्द्रः 'मदिमन्दिचन्दि०' (४१२) इति इरे चन्दिरश्चन्द्रः । छन्द इति 'छदिदहिभ्यामि(९५४)त्यसि छादयते । 'त्रदु चेष्टायां' त्रन्दति अत्रन्दीत् तत्रन्द । 'कदु क्रदु क्लदु रोदनाह्वानयोः' कन्दति अकन्दीत् चकन्द, क्रदु क्रन्दति अक्रन्दीत् चक्रन्द, क्लदु क्लन्दति अक्लन्दीत् चक्लन्द, कदुङ् क्रदुङ् क्लदुङ् इति घटादावात्मनेपदिनः कन्दते क्रन्दते क्लन्दते । 'क्लिदु परिदेवने' परिदेवनं शोचनम् क्लिन्दति अक्लिन्दीत् चिक्लिन्द । 'स्कन्दृ गतिशोषणयोः' स्कन्दति आस्कन्दति । '**वेः स्कन्दोऽक्तयोः**' (२।३।५१) विपूर्वस्य स्कन्देः संबन्धिनः सकारस्य षो वा भवति अक्तयोः, न चेत् क्तक्तवतू प्रत्ययौ भवतः । द्विवचनादर्थवद्ग्रहणानपेक्षमुभयपरिग्रहः, विष्कन्दति विस्कन्दति । अक्तयोरिति किम् ? विस्कन्नः विस्कन्नवान् ॥ '**परेः**' (२।३।५२) परिपूर्वस्य स्कन्देः सकारस्य षो वा भवति । परिष्कन्दति परिस्कन्दति । योगविभागादक्तयोरिति नानुवर्त्तते तेन क्तयोरपि विकल्पो भवति परिष्कण्णः परिस्कन्नः, परिष्कण्णवान् परिस्कन्नवान् । ऋदित्वाद्वाऽङि अस्कदत् अस्कान्त्सीत् अस्कान्ताम् अस्कान्त्सुः चस्कन्द चस्कन्दतुः चस्कन्दुः, अनुस्वारेत्त्वान्नेट् स्कन्ता स्कन्त्स्यति, यङि 'वञ्चस्रंस०' (४।१।५०) इति पूर्वस्य न्यागमे चनीस्कद्यते । यङ्लुपि चनीस्कन्दीति चनीस्कन्त्ति २ 'स्कन्दस्यन्दः' (४।३।३०) इति क्तः क्त्वाभावान्नलोपाभावे स्कन्त्वा प्रस्कन्द्य, ये तु यपः कित्त्वमिच्छन्ति तन्मते प्रस्कद्य । विशपतेति (५।४।८१) णमि गेहावस्कन्दमास्ते गेहं गेहमवस्कन्दमास्ते । उणादौ 'स्कन्धसिभ्यां धः' (२५१) स्कन्धः अंसः । बहुलाधिकाराद्दस्य लुक् । 'स्कन्देर्धे च' (९६०) इत्यसि स्कन्धः स्कन्धसी । इति दान्ता षड्विंशतिः स्कन्दृवर्जाः सेटश्च । '**षिधू** गत्याम्' 'षः स०' इति सत्वे सेधति असेधीत् सिसेध । '**गतौ सेधः**' (२।३।६१) सकारस्य षो न भवति । अभिसेधति अनुसेधति गाः अभिगच्छति अनुगच्छतीत्यर्थः । गतेरन्यत्र 'स्थासेनि०' (२।३।४०) इति षत्वे प्रतिषेधति पापात्, अनेकार्थत्वाच्चायं निषेधेऽपि वर्त्तते, षोपदेशत्वाद्गतेरन्यत्र 'नाम्यन्तस्था०' (२।३।१५) इति षत्वे सिषेध ऊदित्वात् 'ऊदितो वा' (४।४।४२) इति वेटि सिद्ध्वा सेधित्वा 'वौ व्यञ्जनादेः०' (४।३।२५) इति इटि क्त्वो वा कित्त्वम्, सनो वा कित्त्वे सिसिधिषति सिसेधिषति, क्ति वेट्त्वात् क्तयोर्नेट् सिद्धः सिद्धवान् । (निरनुबन्धपाठे तु सिधितः) ॥ 'षिधूंच् संराद्धौ' इत्यस्य, दिवादिकस्य तु सिद्ध्यति निसिद्ध्यति 'स्थासेनी'त्यत्र सेधनिर्देशान्नात्र षत्वम् । अनुस्वारेत्त्वात् सेद्धा सेत्स्यति । '**षिधौ** शास्त्रमाङ्गल्ययोः'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शास्त्रं शास्त्रविषयं शासनं माङ्गल्यं मङ्गलविषया क्रिया अनयोरेवार्थयोरयमौदित्, अर्थान्तरे पुनरूदित् पूर्वोक्त एव अन्यथा तत्पाठोऽनर्थकः स्यात्। अर्थान्तरेऽप्यनेनैवेड्विकल्पस्य सर्वत्रैव सिद्धत्वात् 'षः स०' इति सत्वे सेधति षोपदेशत्वात्तस्य कृतत्वे 'नाम्यन्तस्था०' इति षत्वं सिषेध 'स्थासेनि०' इति षत्वं अभिषेधति अड्व्यवाये अभ्यषेधत् घञि सेधः। **'निर्दुस्सोः सेधसन्धिसाम्नाम्'** (२।३।३१) निरादिभ्यः परेषां सेधादीनां सस्य समासे षो भवति। वचनभेदाद्यथासङ्ख्याभावः। निःषेधः दुःषेधः सुषेधः निःषन्धिः दुःषन्धिः सुषन्धिः, निःषाम दुःषाम सुषाम ॥ परोक्षायां 'स्कसृवृ०' (४।४।८१) इति नित्यमिट् सिषिधिव सिषिधिम 'घसेकस्वर०' (४।४।८२) इति नियमात् क्वसौ नेट् सिषिद्वान् वेट्त्वात् 'वेटोऽपतः' (४।४।६२) इति क्तयोर्नेट् सिद्धः सिद्धवान्। **'शुन्ध शुद्धौ'** शुन्धति अशुन्धीत् शुशुन्ध 'शुधंच् शौचे' इत्यस्य तु शुद्ध्यति शुद्धः शुद्धवान्। इति धान्तास्त्रयः ३।

**'स्तन धन ध्वन चन स्वन वन शब्दे'** स्तनति अस्तानीत् तस्तान स्तनिता। शब्दे घटादित्वाण्णिगि ह्रस्वे स्तनयति अन्यत्र स्तानयति घञि **'अभिनिष्टानः'** (२।३।२४) अभि निस् इत्येतस्मात्परः स्तानशब्दः समासे कृतषत्वो निपात्यते, नाम्नि संज्ञाविषये। अभिनिष्टानो वर्णः विसर्जनीयस्यैषा संज्ञा, वर्णमात्रस्येत्यन्ये। नाम्नीत्येव—अभिनिस्तन्यतेऽभिनिस्तानो मृदङ्गः॥ धन धनति अधानीत् २ दधान 'मन्वन्०' (५।१।१४७) इति वन् धन्वा बाहुलकाद् 'वन्याङ् पञ्चमस्य' (४।२।६५) इत्यात्वाभावः उणादौ 'कृषिचमि०' (८२९) इत्यूः धनूः ज्या चापश्च 'रुयर्त्ति०' (९९७) इत्युसि धनुः। ध्वन ध्वनति अध्वानीत् दध्वान क्ते 'क्षुब्धविरिब्ध०' (४।४।७०) इति निपातनात्तमसि नेट् ध्वान्तं तमः, ध्वनितमन्यत्। शब्दे घटादित्वाण्णौ ह्रस्वे ध्वनयति अन्यत्र ध्वानयति। उणादौ 'पदिपठि०' (६०७) इति इः ध्वनिः। चन चनति हिंसायां घटादित्वाण्णौ ह्रस्वे चनयति। स्वन दन्त्यादिः स्वनति **'व्यवात्स्वनोऽशने'** (२।३।४३) वेरवाच्चोपसर्गात्परस्य स्वनो धातोः सकारस्याशने भोजनेऽर्थे द्वित्वेऽप्यड्यपि षो भवति, पूर्वसूत्रे चानुकृष्टत्वादिहाङ इति नानुवर्त्तते। विष्वणति अवष्वणति भुङ्क्ते इत्यर्थः, सशब्दं भुङ्क्ते इत्यर्थ इत्यन्ये, भुञ्जानः कश्चिच्छब्दं करोतीत्यर्थः इत्यपरे, विषष्वाण अवषष्वाण विषंष्वण्यते अवषंष्वण्यते विषिष्वणिषति अवषिष्वणिषति व्यष्वणत् अवाष्वणत् व्यषिष्वणत् अवाषिष्वणत्। व्यवादिति किम्? अतिस्वनति अत्यसिस्वनत्। अशन इति किम्? विस्वनति अवस्वनति मृदङ्गः, विविधं शब्दं करोतीत्यर्थः॥ परोक्षायां 'जृभ्रम०' (४।१।२६) इति वैत्वे स्वेनतुः सस्वनतुः। अवतंसने घटादित्वाण्णौ ह्रस्वे स्वनयति अन्यत्र स्वानयति सेट्त्वात् स्वनिता स्वनिष्यति 'नवा क्वण' (५।३।४८) इति वाल्लि स्वनः स्वानः 'क्षुब्धविरिब्ध०' इति मनसि क्ते नेट् स्वान्तं मनः स्वनितमन्यत्। वन वनति अवानीत् २ ववान वेनतुः वेनुः इटि वनिता वनिष्यति अचि मृगविहगशब्दैर्वनतीति वनम्। **'वन षन भक्तौ'** भक्तिर्भजनम्, वनिरर्थभेदार्थं पुनरिहाधीतः। वनति अनटि संवननम्। षन 'षः स०' (२।३।९८) इति सत्वे निमित्ताभावे इति णस्य नत्वे सनति असानीत् असनीत् ससान सेनतुः सेनुः। **'कनै दीप्तिकान्तिगतिषु'** दीप्तिः प्रकाशः कान्तिः शोभा कनति अकानीत् २ चकान चकनतुः। क्वनि सुकावा क्विपि सुका सुकानौ। उणादौ 'दृकृनि०' (२७) इति के कनकम् 'कनेरीनकः' (७३) कनीनिका 'स्याच्छामा०' (३५७) इति ये कन्या। इति नान्ता नव सेटश्च। **'गुपौ रक्षणे'** अयमग्रे वक्ष्यते। 'कुप्यभिद्योध्य (५।१।३९) इति निपातनात् क्यपि कुप्यम्। **'गुपच् व्याकुलत्वे'** इत्यस्य तु गुप्यति। गुपण् भासार्थः इत्यस्य तु गोपयति गोपना **'तपं धूप सन्तापे'** तपति **'निसस्तपेऽनासेवायाम्'** (२।३।३५) 'ह्रस्वान्नाम्नस्ति'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(२।३।३४) इति सूत्रात्तीत्यनुवर्त्तते निसः संबन्धिनः सकारस्य ति तकारादौ तपतौ परे षो भवति, अनासेवायामर्थे। पुनःपुनःकरणमासेवा। निष्टपति सुवर्णम्—सकृदग्निं स्पर्शयतीत्यर्थः। अनासेवायामिति किम्? निस्तपति सुवर्णं सुवर्णकारः पुनः पुनस्तपतीत्यर्थः। निष्टप्तं रक्षः, निष्टप्ता अरातय इत्यत्र तु सदप्यासेवनं न विवक्ष्यते। तीत्येव—निरतपत्। शब्निर्देशो भौवादिकपरिग्रहार्थः यङ्लुब्निवृत्त्यर्थश्च, निस्तातप्ति निस्तातपीति। धूपायतिर्वक्ष्यते। 'रप लप जल्प व्यक्ते वचने' रपति अरापीत् २ रराप रेपतुः, लपति अलापीत् अलपीत् ललाप लेपतुः, करणेऽनटि लपनं, जल्पति अजल्पीत् जजल्प 'क्रियाव्यतिहारे०' (३।३।२३) इत्यत्र शब्दार्थवर्जनान्नात्मनेपदं व्यतिजल्पति। 'जप मानसे च' मनोनिर्वर्त्त्ये वचने चकाराद्व्यक्ते वचने। जपति अजापीत् अजपीत् जजाप जेपतुः जेपुः। 'चप सान्त्वने' चपति अचापीत् २ चचाप चेपतुः अचि चपो वंशस्तस्य विकारश्चापं धनुः उणादौ 'दिव्यवि०' (१४२) इत्यदे चपटो रसः 'चपेरेटः' (१५८) चपेटः 'मृदिकन्दि' (४६५) इत्यले चपलः। 'षप समवाये' 'षः स०' इति षस्य सत्वे सपति असापीत् २ ससाप सेपतुः सेपुः। षोपदेशत्वात् 'णिस्तोरेव०' (२।३।३७) इति षत्वे सिषापयिषति। स्तौतिसाहचर्यात् स्वदादिपर्युदासेन सद्दशग्रहणाच्च ण्यन्तानामेव षोपदेशानामेव ग्रहणं तथा च कृतत्वात् 'नाम्यन्तस्थाकवर्गा०' (२।३।१५) इति सूत्रेण सिद्धे नियमार्थत्वात् सूत्रस्य। येषां तु नायं षोपदेशस्तेषां षत्वाभावे सिसापयिषति। उणादौ 'पुज्ञायजि०' (६४६) इति तौ सप्तिः अश्वः 'षप्यशौभ्यां तन्' (९०३) सप्त घटाः। चान्तोऽयमिति चन्द्रः। सचति 'पलिसचेरिवः' (५२२) सचिवः 'षचि सेचने' इत्यस्य तु सचते। 'सृप्लृं गतौ' दन्त्यादिः सर्प्पति लृदित्वादङि असृपत् अनुस्वारेत्वान्नेट् सर्प्ता सर्प्स्यति 'लिहादिभ्यः' (५।१।५०) इत्यचि सर्प्पः। कुटिलं सर्प्पतीति 'गत्यर्थात्कुटिले' (३।४।११) इति यङि अचि सरीसृपः। षोपदेशाभावादत्र न षत्वम्, भावे घञि संसर्पो, अभिधानादस्य स्त्रीत्वम्। उणादौ 'ऋज्यजितंचि०' (३८८) इति किति रे सृप्रा काचिन्नदी 'रुच्यर्चि शुचि०' (९८९) इति इसि सर्पिः। 'चुप मन्दायाम्' गतावित्यनुवृत्तेर्मन्दायां गतौ। चोपति किञ्चिच्चलतीत्यर्थः। अचोपीत् चुचोप चुचुपतुः इटि चोपिता चोपिष्यति अनटि चोपनम् उणादौ 'क्षुचुपि०' (३०१) किप्पः, चुप्पः मन्दगमनं 'ऋज्यजि०' (३८८) इति किति रे चुप्रो वायुः। 'तुप तुम्प त्रुप त्रुम्प तुफ तुम्फ त्रुफ त्रुम्फ हिंसायाम्' तोपति अतोपीत् तुतोप तुतुपतुः, तुम्प तुम्पति। प्रात्तुम्पतेर्गवि (४।४।९७) प्रात्परस्य तुप इत्येतस्य धातोर्गवि कर्त्तरि स्सडाविर्भवति। प्रस्तुम्पति गौः, प्रस्तुम्पति वत्सो मातरम्, प्रस्तुम्पको वत्सः। गवीति किम्? प्रतुम्पति वनस्पतिः अधःस्थान् जीवान् हिनस्तीत्यर्थः, अन्ये तु प्रात्परस्य तुम्पतिशब्दस्य गवि अभिधेये स्सडादिर्भवति प्रस्तुम्पतिर्गौः प्रतुम्पतिरन्यः तुम्पतिधातोस्तु स्सड् न भवतीति मन्यन्ते, एके तु प्रात्तुम्पतेः कपीत्यारभन्ते कपि हिंसायां कच्पर्याये वा कपि समासान्त इति च व्याचक्षते प्रस्तुम्पति वत्सो मातरं हिनस्तीत्यर्थः। प्रगतस्तुम्पोऽस्मात् प्रस्तुम्पको देशः॥ त्रुप त्रोपति अत्रोपीत् तुत्रोप तुत्रुपतुः। इति पान्ताः पञ्चदश १५। तत्र गुपौ वेट् तपं सृप्लृं अनिटौ शेषाः सेटः १५। तुफ तोफति अतोफीत् तुतोफ तुतुफतुः। तुम्फ तुम्फति अतुम्फीत् तुतुम्फ तुतुम्फतुः। त्रुफ त्रोफति अत्रोफीत् तुत्रोफ। त्रुम्फ त्रुम्फति अत्रुम्फीत् तुत्रुम्फ तुत्रुम्फतुः। तुपतुम्पतुफतुम्फास्तुदादावपीत्यन्ये तुपति शे नलुगनिष्टेश्च प्रस्तुम्पति गौः तुफति तुम्फति। 'वर्फ रफ रफु अर्ब कर्ब खर्ब गर्ब चर्ब तर्ब नर्ब पर्ब बर्ब शर्ब षर्ब सर्ब रिबु रबु गतौ' सप्तदशाप्येते गत्यर्थाः। फान्तास्त्रयोऽपि हिंसायामिति कश्चन। वर्फति रफति उदित्वान्ने रम्फति। इति फान्ताः सप्त सेटश्च ७॥ अर्बति 'अनात०'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(४।१।६९) इत्यात्वे ने च आनर्ब । कर्बति उणादौ 'दिव्यवि०' (१४२) इत्यटे कर्बटम् क्षुद्रपत्तनम् वाश्यसीत्युरे (४२३) कर्बुरः । खर्बति अचि खर्बः गर्बति घञि गर्बः । चर्बति घञि चर्बः अनटि चर्बणं । तर्बति नर्बति पर्बति । बर्बति ओष्ठ्यादिरयम् उणादौ ऋच्छिचटीत्यरे (३९७) बर्बरः बर्बरी कुञ्चिताः केशाः । शर्ब तालव्यादिः शर्बति । षर्ब षोपदेशः 'षः स०' (२।३।९८) इति सत्वे सर्बति षोपदेशत्वात्–'णिस्तोरेव' (२।३।३७) इति षत्वे सिषर्बयिषति । सर्ब सर्बति सोपदेशत्वात्षत्वाभावे सिसर्बयिषति । रिबु रबु उदित्वान्ने रिम्बति । रम्बति अचि रम्बः, के रम्बः करम्बः, क्ते करम्बितः । घर्बेत्यपि केचित्पठन्ति स पुनरनार्षत्वादुपेक्षितः । अर्बेत्यादौ रेफस्थाने नकारं कौशिका मन्यन्ते । 'कुबु आच्छादने' उदित्वान्ने कुम्बति 'भीषिभूषीति' (५।३।१०९) णांवङि कुम्बा, 'कुबुण् आच्छादने' इत्यस्य तु कुम्बयति । 'लुबु तुबु अर्दने' लुम्बति । उणादौ ण्यन्तात् स्वरेभ्य इः (६०६) इति इः लुम्बिः । तुबु तुम्बति अचि गौरादित्वात् ङ्यां तुम्बी 'लुबु तुबुण् अर्दने' इत्यस्य तु लुम्बयति तुम्बयति । 'चुबु वक्त्रसंयोगे' वक्त्रेण संबन्धे नमस्तुङ्गशिरश्चुम्बीत्युपचारात् चुम्बति अचुम्बीत् चुचुम्ब । इत्यष्टादश बान्ताः सेटश्च ॥ १८ ॥

'सृभू सृम्भू स्रिभू षिम्भू भर्भ हिंसायाम्' आद्यास्त्रयो दन्त्याद्याः चतुर्थः षोपदेशः । सर्भति सिसर्भयिषति । सृम्भति सिसृम्भयिषति । स्रिभू स्रेभति अस्रेभीत् सिस्रेभ । षिम्भू 'षः स' इति षस्य सत्वे सिम्भति असिम्भीत् षोपदेशत्वात् 'नाम्यन्तस्था०' (२।३।१५) इति सिषिम्भ । भर्भ भर्भति अभर्भीत् बभर्भ । 'शुर्भ भाषणे च' चकाराद्धिंसायाम् । भासने चेत्यन्ये, तालव्यादिः । शुम्भति अशुम्भीत् क्ते सेट्त्वात् 'क्तेटो०' (५।३।१०६) इत्यः शुम्भा शोभेत्यर्थः 'शुभ शुम्भत् शोभार्थे' इत्यस्य तु शुभति षोपदेशोऽयमिति गुप्तः । सुम्भति कुपूर्वादचि कुसुम्भः । लक्ष्यं च–सावष्टम्भनिशुम्भसुम्भनेति । 'यर्भ जभ मैथुने' मिथुनस्य कर्मणि भावे वा आद्योऽन्तस्थादिः यभति अयाभीत् २ ययाभ येभतु येभुः । 'जभः स्वरे' (४।४।१००) जम्भतेः स्वरात्परः स्वरादौ प्रत्यये परे नोऽन्तो भवति । जम्भति अजम्भीत् जजम्भ क्तयोरिटि नागमे नलुकि च जभितः जभितवान् । 'जभैङ् गात्रविनामे' इत्यस्य तु जम्भते । इत्यष्टौ भान्ताः यभंवर्जाः सेटश्च । 'चमू छमू जमू झमू जिमू अदने' पञ्चाप्यूदितः 'ष्ठिवूक्लम्वाचमः' (४।२।११०) ष्ठिवेः क्लमेराङ्पूर्वस्य च चमेः शिति परे दीर्घो भवति, अत्यादौ । 'ष्ठिवू क्षिवू निरसने' ष्ठीवति । दैवादिकस्य ष्ठिवो दीर्घोऽस्त्येव 'क्लमूच् ग्लानौ' क्लामति क्लाम्यति 'भ्रासभ्लास०' (३।४।७३) इति वा श्यागमः । आचामति । चामेराङ्पूर्वस्यग्रहणादिह न भवति चमति विचमति । ष्ठिवूक्लमोरूकारनिर्देशात् यङ्लुपि न भवति तेष्ठिवत् चंक्लमत् 'अन्तो नो लुक्' (४।२।९४) । छमू छमति अच्छामीत् अच्छमीत् चच्छाम चच्छमतुः । जमू जमति अजामीत् २ जजाम जेमतुः जेमुः । झमू झमति अझामीत् २ जझाम जझमतुः । जिमू जेमति अजेमीत् जिजेम जिजिमतुः ।

अथात्युपयोगिनः कांश्चिन् मान्तान् धातून् कण्ठतो निर्दिशति 'णमं प्रह्वत्वे' प्रह्वत्वं नम्रत्वं 'पाठे०' (२।३।९७) इति णस्य नत्वे नमति ॥ ८७ ॥ अत्रोपसर्गयोगे सूत्रम्—

## अदुरुपसर्गान्तरो णहिनुमीनानेः ॥ ८८ ॥ [ सि० २।३।७७ ]

दुर्वर्जोपसर्गस्थादन्तःशब्दस्थाच्च रादेः परस्यैषां नो ण् स्यात् । णेति णोपदेशा धातवः । प्रणमति । 'यमिरमि०' इति सागमे । 'शिड्हेऽनुस्वार' (१।३।४०) इत्यनुस्वारे । अनंसीत् अनंसिष्टाम् अनंसिषुः ५ । ननाम नेमतुः । नेमुः । नेमिथ ननन्थ ६ । नम्यात् ७ । नन्ता ८ । नंस्यति ९ । अनंस्यत् १० । 'गम्लृं गतौ' ॥ ८८ ॥



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'अदु०'** दुर्वर्जेत्यादि दुर्वर्जितोपसर्गस्थादन्तःशब्दस्थाच्च रषृवर्णात्परस्य णकारसंबन्धिनो नस्य हिनु आनिसंबन्धिनो नकारस्य च णो भवति । णेति णोपदेशा धातवो गृह्यन्ते । उपसर्गाण्णत्वविधानात् । प्रणमति परिणमति प्रणयति परिणयति प्रणामकः परिणामकः प्रणायकः परिणायकः । अन्तर्–अन्तर्णयति अन्तर्णायकः । हिनु–प्रहिणोति प्रणिहिनुतः । मीना–प्रमीणाति प्रमीणीतः । हिनुमीनाग्रहणे विकृतस्यापि एकदेशविकृतस्यानन्यवत् आनि प्रयाणि प्रवयाणि । आनीत्यर्थवत एव ग्रहणात् अनर्थकस्य न भवति–प्रवृद्धा वपा येषां तानि प्रवयानि मांसानि । अदुरिति किम् ? दुर्नयः दुर्नीतं । उपसर्गान्तरिति किम् ? प्रातर्नयति पुनर्नयति । येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञा भवन्तीति इह न भवति–प्रगता नायका यस्मात् स प्रनायको देश इति । णहिनुमीनानेरिति किम् ? प्रनृत्यति । अणोपदेशत्वाण्णत्वं न भवति । थमिरमीत्यादि सर्वं स्पष्टम् । गम्लं गतौ इति ॥ ८८ ॥ अत्र सूत्रम्––

## गमिषद्यमश्छः ॥ ८९ ॥ [ सि० ४।२।१०६ ]

**एषां शिति छः स्यात् । गच्छति ४ । लृदित्त्वादङागमे । अगमत् अगमताम् अगमन् ५ । जगाम ॥ ८९ ॥**

**'गमि०'** एषामिति गम्धातोः 'इषत् इच्छायाम्' 'यमूं उपरमे' एषामित्यर्थः अनेन मस्य छत्वे 'स्वरेभ्यः' ( १।३।३० ) इति छस्य द्वित्वे 'तृतीयस्तृतीय०' ( १।३।४९ ) इत्याद्यछस्य चत्वे गच्छति ॥ ८९ ॥ परोक्षायाः प्रथमत्रिकद्विवचने सूत्रम्

## गमहनजनखनघसः स्वरेऽनङि क्ङिति लुक् ॥ ९० ॥ [ सि० ४।२।४४ ]

**एषामुपान्त्यस्याङ्वर्जे स्वरादौ क्ङिति परे लुक् स्यात् । जग्मतुः जग्मुः ६ । गम्यात् ७ । गन्ता ८ ॥ ९० ॥**

**'गम०'** एषामिति गमधातुरयमुक्त एव 'हनंक् हिंसागत्योः' 'जनैचि प्रादुर्भावे' 'खनूग् अवदारणे' 'घस्लं अदने' इत्येतेषामित्यर्थः । जग्मतुः इत्यादि स्पष्टम् । अस्यानुस्वारेत्त्वाद्भविष्यन्त्यामिड्निषेधे प्राप्ते ॥ ९० ॥ सूत्रम्––

## गमोऽनात्मने ॥ ९१ ॥ [ सि० ४।४।५१ ]

**गमः परस्य स्यादेरिट् स्यात् नत्वात्मनेपदे । गमिष्यति गमिष्यतः गमिष्यन्ति ९ । अगमिष्यत् अगमिष्यताम् अगमिष्यन् । अगमिष्यः अगमिष्यतम् अगमिष्यत । अगमिष्यम् अगमिष्याव अगमिष्याम १० ॥ ९१ ॥ 'क्रमू पादविक्षेपे' ।**

**'गमो०'** गमः परस्य सकारादेस्ताद्यशित आदिरिड् भवति अनात्मनेपदं चेन्न भवति गम इत्यनादेशस्यादेशस्य च ग्रहणमविशेषात् । गम्लं–गमिष्यति अगमिष्यत् जिगमिषिति जिगमिषितुं संजिगमिषिता संजिगमिषितव्यम् । इण्–जिगमिषति ग्रामम् जिगमिषुः । इक्–अधिजिगमिषति मातुः अधिजिगमिषुः । इङ्–अधिजिगमिषिता शास्त्रस्य अधिजिगमिषुः अधिजिगमिषितव्यम् । इङो नेच्छन्त्यन्ये तन्मते अधिजिगांसिता अधिजिगांसुः अधिजिगांसितव्यमित्येव भवति । अनात्मन इति किम् ? गंस्यते ग्रामः संगंस्यते वत्सो मात्रा गंस्यमानः अगंस्यत समगंस्यत संगंसीष्ट सञ्जिगंसति सञ्जिगंसमानः सञ्जिगंसिष्यते सञ्जिगंसिष्यमानः । इणिकोर्जिगांस्यते सञ्जिगांस्यते अधिजिगांस्यते माता ॥ ९१ ॥ 'क्रमू पादविक्षेपे' पादन्यासे इत्यर्थः । शितिप्रत्यये सूत्रम्––

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## भ्रासभ्लासभ्रमक्रमक्लमत्रसित्रुटिलषियसिसंयसेर्वा ॥ ९२ ॥ [ सि० ३।४।७३ ]

**एभ्यो दशभ्यः कर्तृविहिते शिति श्यो वा स्यात् ॥ ९२ ॥**

**'भ्रास०'** एभ्यो दशभ्य इति 'भासि टुभ्रासि टुभ्लासि दीप्तौ' भ्रास् भ्लास् । 'भ्रमूच अनवस्थाने' इति दिवादिः 'भ्रमू चलने' इति ज्वलाद्यन्तर्गणपठितो भ्वादिर्वा भ्रम् । 'क्रमू पादविक्षेपे' 'क्रमू क्लमूच् ग्लानौ' 'क्लम् । त्रसैच् भये' 'त्रस् । चुट् छुट् त्रुट् च् छेदने' त्रुट् । 'लषी कान्तौ' लष्, 'यसूच् प्रयत्ने' यसिः सम् पूर्वकत्वे संयसिः एतेभ्यो धातुभ्य इत्यर्थः । श्यो वा स्यादिति प्राप्ताप्राप्तविभाषेयम्, ततः पक्षे यथायोगं शवादयः स्युः । भ्रास्यते भ्रासते भ्लास्यते भ्लासते 'शमसप्तकस्य श्ये' (४।२।१११) इति दीर्घे भ्राम्यति भ्रमति भौवादिकस्य भ्रम्यति ॥ ९२ ॥ क्रमो विशेषे सूत्रं—

## क्रमो दीर्घः परस्मै ॥ ९३ ॥ [ सि० ४।२।१०९ ]

**क्रमः परस्मैपदे शिति दीर्घः स्यात् । क्राम्यति क्रामति । क्राम्येत् क्रामेत् ४ ॥ ९३ ॥**

**'क्रमो०'** स्पष्टम् अत्यादौ इति ज्ञेयम् क्राम्यति क्रामति । 'ष्ठिवूक्लम्वाचम' (४।२।११०) इति दीर्घे क्लाम्यति क्लामति । त्रस्यति त्रसति, त्रुट्यति त्रुटति, लष्यति लषति, अभिलष्यति अभिलषति, यस्यति यसति, संयस्यति संयसति । यसिग्रहणेनैव सिद्धे संयसिग्रहणमुपसर्गान्तरपूर्वकस्य यसेर्निवृत्त्यर्थम्, तेन आयस्यति प्रयस्यतीति नित्यं श्यः । क्राम्येत् क्रामेत् ॥ ९३ ॥ अद्यतन्यां सिजागमे सूत्रम्—

## क्रमः ॥ ९४ ॥ [ सि० ४।४।५३ ]

**क्रमः परस्य स्ताद्यशित आदि इट् स्यान्नत्वात्मनेपदे ॥ ९४ ॥**

**'क्रमः'** स्पष्टम् । अक्रमीत् क्रमिष्यति एवं चिक्रमिषति चिक्रमिषिता चिक्रमिषितुः प्रक्रमितुं प्रक्रमितव्यम् । अनात्मने इत्येव—प्रक्रंस्यते प्रक्रंस्यमानः प्रक्रन्ता प्रक्रन्तासे प्रक्रंसीष्ट प्राक्रंस्त प्राक्रंस्यते प्रचिक्रंसते प्रचिक्रंसिष्यते । क्रमितेवाचरति क्रमित्रीयते इत्यत्रात्मनेपदस्य क्यङाश्रितत्वेन बहिरङ्गत्वादिट् भवति । कथं विक्रंसया कृत्रिमपङ्क्तेरित्यत्रेडभावः गतानुगतिक एव पाठः जिघृक्षया कृत्रिमपत्रिपङ्क्तेरिति तु अविगानः पाठः । अथाद्यतन्यामक्रमीदित्यादौ 'व्यञ्जनादेर्वोपान्त्यस्यातः' (४।३।४७) इति वृद्धिविकल्पप्राप्तावपवादसूत्रम् ॥ ९४ ॥

## न श्विजागृशसक्षणह्मयेदितः ॥ ९५ ॥ [ सि० ४।३।४९ ]

**एषां ह्मयन्तानामेदितां च परस्मैपदे सेटि सिचि वृद्धिर्न स्यात् । अक्रमीत् अक्रमिष्टाम् ५ ॥ ९५ ॥**

**'न श्वि०'** एत् इत् यस्य स एदित् श्विश्च जागृश्च शसश्च क्षणश्च ह् च म् च य् च एदिच्च श्विजागृशसक्षणह्मयेदित् तस्य एषामिति श्विजागृशसक्षणां हकारमकारयकारान्तानामेदितां च धातूनामित्यर्थः । क्रमेणोदाहरणानि 'ट्वोश्वि गतिवृद्ध्योः' अश्वयीत् 'जागृक् निद्राक्षये' अजागरीत् 'शसू हिंसायां' अशसीत् शसूस्थाने श्वसं पठन्त्यन्ये 'अन श्वसक् प्राणने' अश्वसीत् 'क्षणूयी दाने' अक्षणीत् । हान्त—'ग्रहीश् उपादाने' अग्रहीत् 'चह कल्कने' अचहीत् । मान्त—'टुवमू उद्गिरणे' अवमीत् 'स्यमू शब्दे' अस्यमीत् । यान्त—अव्ययीत् 'हय हर्यं क्लान्तौ च' अहयीत् । कगे इति सौत्रो धातुः अकगीत् । श्वादीनां यङ्लुबन्तानामपि प्रतिषेधः अशेश्वयीत् अजजागरीत् केचिज्जागर्तेरपि यङ्मिच्छन्ति अशाशसीत् अचाक्षणीत् अचाचहीत् । मताभिप्रायेणेदम्, स्वमते तु 'व्ये स्यमोर्यङि' (४।१।८५) इति ३३

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ण्वृत्यसेसेमीदिति भवति अवाव्ययीत्। एदितां तु यङ्लुपि न प्रतिषेधः अजाहासीत् अजाहसीत् अत एव श्वादयो नैदितः क्रियन्ते अन्यथा ह्येदितः कृत्वा इह श्व्यादिग्रहणं न क्रियेत। सेटीत्येव अधाक्षीत्। वकारान्तस्यापि प्रतिषेधमिच्छत्यन्यः अमवीत्। श्विजाग्रोः 'सिचि परस्मै समानस्याऽङिति (४।३।४४) इति वृद्धावन्येषां च 'व्यञ्जनादेर्वोपान्त्यस्यातः' (४।३।४७) इति विकल्पे प्राप्ते वचनम्॥ ९५॥ परोक्षायां द्वित्वे सति सूत्रम्—

## कङश्चञ्॥ ९६॥ [ सि० ४।१।४६ ]

**द्वित्वे पूर्वयोः कङोश्चञौ स्याताम्। चक्राम चक्रमिथ-चक्रन्थ ६। क्रम्यात् ७। क्रमिता ८। क्रमिष्यति ९। अक्रमिष्यत् १०। 'दृशृं प्रेक्षणे'। पश्यति ४॥ ९६॥**

**'कङ०'** कङोश्चञाविति धातोर्द्वित्वे सति पूर्वस्य ककारस्य चकारः कवर्गीयङकारस्य चवर्गीयो ञकारः स्यादित्यर्थः। यथा चकार चखान। 'उङ् कुङ् गुङ् घुङ् ङुङ् शब्दे' परो० ए द्वित्वे अनेन ञुः 'धातोरिवर्णस्य०' (२।१।५०) इत्युवादेशे ञुङ्वे। एवं च चक्रामेत्यादि स्पष्टम्। उक्तशेषा मान्तधातवश्चैवम् **'यमूं** उपरमे' उपरमो निवृत्तिः। 'गमिषद्यमश्छः' (४।२।१०६) यच्छति अयमीत् मान्तत्वान्नित्यं वृद्धिः, ययाम येमतुः 'तिक्कृतौ नाम्नि' (५।१।७१) इत्यकटि यमकम् उणादौ यम्यजीत्युने (२८८) यमुना हुयामेति (४५१)त्रे यत्रम् मृदिकन्दीत्यले (४६५) यमलम्। **'स्यमूं शब्दे'** स्यमति अस्यमीत् सस्याम 'जृभ्रम०' (४।१।२६) इति वैत्त्वे स्येमतुः सस्यमतुः स्येमुः सस्यमुः 'व्ये स्यमोर्यङीति' य्वृति सेसिम्यते इटि स्यमिता स्यमिष्यति। **'षम ष्टम** वैक्लव्ये' वैक्लव्यं कातरत्वम् 'षः सो०' (२।३।९८) इति सत्वे समति असमीत् ससाम सेमतुः सेमुः इटि समिता समिष्यति अचि समः 'निर्दुःसुवेः समसूतेः' (२।३।५६) इति षत्वे विषमः सुषमा दुःषमा। ष्टम 'षः सो०' इति षस्य सत्वे स्तमति अस्तमीत् तस्ताम तस्तमतुः। स्तनध्वनस्वनस्यमूषमष्टमान् षडप्यदन्तान् सभ्या अभ्युपागमन्। **'अम** शब्दभक्त्योः' भक्तिर्वर्जनम् अमति आमीत् आम आमतुः उणादौ दम्यमीति (२००) ते अन्तः, विजिश्विति (३९२) रे दीर्घे च आम्रः, हुयामेति त्रे अत्रम्, वृग्रक्षीत्यत्रे (४५६) अमत्रम्, वन्धिवहीति इत्रे (४५९) अमित्रः, पादावमीति शे (५२७) अंशः, मावावद्यमीति से (५६४) अंसः, अमेर्भहौ चान्तावित्यसि (९६२) अम्भः अंहः। **'अम द्रम हम्म मीमृ गम्लृं** गतौ' अमिरुदाहृत एव, अर्थभेदार्थं तु पुनः पाठः। द्रमति अद्रमीत् दद्राम दद्रमतुः। हम्म हम्मति सुराष्ट्रेष्विति भाष्याद्विबद्धो मकारः हम्मति अहम्मीत् हम्मिता यङि जंहम्म्यते अत्र 'मुरतोऽनुनासिकस्य' (४।१।५१) इत्यत्रानुनासिकजातिपरिग्रहादतोऽनुनासिकान्तत्वे पूर्वस्य मुरन्तः। केचित्तु म्वागमं नेच्छन्ति तन्मते जाहम्म्यते। मीमृ मीमति लृदित्वादङि अमीमत् मिमीम मीमिता अयं शब्देऽपीत्यन्ये। **गम्लृंधातुस्तु प्रागुक्तः** किन्तु उणादौ गम्यमीति (९२) गे गंगा, विदनेति निपातनादने गगनं (२७५), जिमृस्तिति (४४७) त्रटि वृद्धौ च गात्रं मनः, गमेराचेति (४५३) त्रे गात्रम्, कृसिकम्यमीति (७७३) तुनि आगन्तुः वैदेशिकः, द्युगमिभ्यां डोः (८६७) द्यौः गौः, गमेरिन् (९१९) गमी, 'आङ्श्च णित्' (९२०) आगामी, गम्यादित्वाद्भविष्यति साधू। गमेर्डिंद्रु चेति (८८५) कर्त्तरि जगत् जगती। गत्यर्थाद्वा कर्त्तरि क्ते गतो ग्रामं पक्षे कर्मणि गतो ग्रामः 'नाम्नो गमः खड्डौ च विहायसस्तु विहः (५।१।१३१) प्लवङ्गः प्लवगः, विहङ्गमः विहङ्गः, उरगः पृषोदरादित्वात्सलोप श्रृकमेत्युकणि (५।२।४०) गामुकः, निपातनाद्गत्वरः, 'दिद्युद्दद०' (५।२।८३) दिति क्विपि जगत्।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'युवर्ण०' ( ५।३।२८ ) इत्यलि गमः । इति मान्ताः सप्तदश यमूं णमं गम्लं वर्जाः सेटश्च ॥ १७ ॥ 'हय हर्य क्लान्तौ च' चकाराद्गतौ, हयति 'व्यञ्जनादे०' ( ४।३।४७ ) रिति वा वृद्धेः 'नश्वि-जागृ०' ( ४।३।४९ ) इति प्रतिषेधात् अहयीत् इटि हयिता अचि हयः क्यां हयी । क्विपि 'य्वोः०' ( ४।४।१२१ ) इति यलुकि अत इत्यलुगित्येके । सुपूर्वस्य सुद् क्वौ 'ढस्तड्डे' ( १।३।४२ ) इति ढलुकि पूर्वस्य दीर्घे च सूढिः । केवलस्य तु ढिः । उणादौ ऋहपृनहीत्युषे ( ५५७ ) हयुषा ओपधिः । हर्य हर्यति अहर्यीत् हर्यिता मनि सुहर्मा वनि सुहर्वा क्विपि विचि वा सुहः । 'मव्य बन्धने' मव्यति अमव्यीत् ममव्य मव्यतीति क्विप् 'य्वोरिति' यलुक् 'अनुनासिके च०' ( ४।१।१०८ ) इति वस्योट् तत 'ऊटा' इत्यौत्वे मौः । लाक्षणिकत्वाच्च मव्यवीत्युपान्त्येन सहोऽभावः मव्यितः मव्यितवान् क्ते सेट्त्वात् क्तेट इति अः मव्या तिकि मौतिः । 'सूक्ष्र्य ईर्ष्य ईक्ष्य ईर्ष्यार्थाः' सूक्ष्र्य दन्त्यादिः ईर्ष्या कामजमसहनम् सूक्ष्र्यति असूक्ष्र्यीत् सुसूक्ष्र्य सूर्क्ष्यिता मनि यलुकि सुसूक्ष्र्मा वनि सुसूक्ष्र्वा 'क्रुद्द्रुहे०' ( २।२।२७ ) इति संप्रदाने चतुर्थ्यां चैत्राय सूक्ष्र्यति क्विपि यलुकि सौ 'पदस्य' ( २।१।८९ ) इति षलोपे 'रात्सः' ( २।१।९० ) इति नियमात् कलुगभावे सूर्क् क्तयोः सूर्क्ष्यितः सूर्क्ष्यितवान् । ईक्ष्य ईक्ष्र्यति ऐक्ष्र्यीत् 'गुरुनाम्यादेः०' ( ३।४।४८ ) इति आमादेशे ईक्ष्र्याञ्चकार ईर्क्ष्यिता मनि 'य्वोः' इति यलुकि ईक्ष्र्मा वनि ईक्ष्र्वा मैत्रायेक्ष्र्यति । ईर्ष्य ईर्ष्यति ऐर्ष्यीत् ईर्ष्याञ्चकार ईर्ष्यिता छात्रायेर्ष्यते अत्र छात्रस्य सम्प्रदानत्वेऽकर्मकलक्षणं 'तत्साप्यानाप्या०' ( ३।३।२१ ) इति भावे आत्मनेपदम् क्ते सेट्त्वात् 'क्तेटो गुरोर्व्यञ्जनात्' ( ५।३।१०६ ) इति ईर्ष्या उणादौ 'लस्जीर्ष्यिशलेरालुः' ( ८२२ ) ईर्ष्यालुः । 'शुच्यै चुच्यै अभिषवे' शुच्यै तालव्यादिः द्रवेण द्रवाणां परिवासनमभिषवः । स्नानमिति चान्द्राः । शुच्यति अशुच्यीत् शुच्यिता शुशुच्य मनि यलुकि उपान्त्यस्य गुणे शुशोच्मा, वनि शुशोच्वा, विचि शुशोक्, ऐदित्त्वात् क्तयोर्नेट् शुक्तः शुक्तवान्, तिकि शुक्तिः, क्तेऽनिङ्वादप्रत्ययाप्राप्तौ स्त्रियां क्तिः शुक्तिः । चुच्यै चुच्यति अचुच्यीत् चुचुच्य चुच्यिता ऐदित्वात् क्तयोर्नेट् चुक्तः चुक्तवान् । इत्यष्टौ यान्ताः सेटश्च । 'त्सर छद्मगतौ छद्मप्रकारे', तादिरयम् । त्सरति 'वदव्रजलः' ( ४।३।४८ ) इति वृद्धावत्सारीत् तत्सार, उणादौ भृमृतृत्सरीत्युः ( ७१६ ) त्सर्यते हस्तेन प्रच्छाद्यते इति त्सरुः खड्गमुष्टिः, छ(त्स)द्मेत्यपि कौशिकः, छ(त्स)द्मति । 'क्मर हूर्छने' क्मरति 'वदव्रजेति' वृद्धौ अक्मारीत् चक्मार, अचि क्मरः । 'अभ्र वभ्र मभ्र गतौ' अभ्रति आभ्रीत् 'अनातो नश्च०' ( ४।१।६९ ) इत्यात्वे ने च आनभ्र अभ्रिता क्ये अभ्र्यते अत्र सरूपान्तस्थाया अभावे 'अञ्जनात्पञ्चम०' ( १।३।४७ ) इति रो वा लुग् न भवति अचि अभ्रम् । वभ्र वभ्रति अवभ्रीत् ववभ्र वभ्रिता । मभ्र मभ्रति अमभ्रीत् ममभ्र मभ्रिता । 'चर भक्षणे च' चकाराद्गतौ, चरति क्रियाव्यतिहारे गत्यर्थप्रतिषेधाद्गतौ नात्मनेपदं व्यभि-चरन्ति ग्रामम्, भक्षणे तु क्रियाव्यतिहारे गतीत्यात्मनेपदं व्यभिचरन्ते भक्ष्यम् अचारीत् । यङि निन्द्यं चरति चञ्चूर्यते । यङि अचि चञ्चुरः 'चरेराङस्त्वगरौ' ( ५।१।३१ ) इति ये चर्यम् आचर्यं तपः आश्चर्यमद्भुतम् वर्चस्कादित्वाच्छे साधुः । गुरौ तु आचार्यः । णके परिचारकः अचि चरः गौरादित्वात् ङ्यां चरी प्रज्ञाद्यणि चर एव चारः पटन्तश्चरन्तीति पटच्चराश्चौराः जीर्णवस्त्रं तु भूतपूर्वे ट्चरटि भूतपूर्वं पट इवाचरत् पटच्चरम् 'तिक्कृतौ नाम्नि' ( ५।१।७१ ) इत्यकटि चरकः । चरेष्टः कुरुचरः कुरुचरी 'भिक्षासेनादायात्' ( ५।१।१३९ ) भिक्षां चरति भिक्षाचरः सेनां चरति परीक्षते सेनाचरः आदीयते इत्यादायो वागुरा तेन आदाय वा चरति आदायचरः ग्रहादिभ्य इति णिनि व्यभिचारी व्यभिचरी गण-निपातात्पक्षे ह्रस्वः सब्रह्मचारीति निपातनात समानं (ब्रह्म) व्रतं समाने वा ब्रह्मणि गुरुकुले व्रतं चरतीत्येवं-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शीलः सब्रह्मचारी अत्र समानस्य सभावो व्रतशब्दलोपश्च । 'भ्राज्यलंकृगिति०' ( ५।२।२८ ) इष्णौ चरणशीलश्चरिष्णुः 'लूधूसूखनिचर०' ( ५।२।८७ ) इति इत्रे चरित्रम् घञि उच्चारः 'समजनि०' ( ५।३।९९ ) इति क्यपि चर्या 'परेः सृचरेर्यः' (५।३।१०२) परिचर्या 'गोचरसंचर०' (५।३।१३१) इति निपातनाद् घञपवादे घे गोचरः संचरः 'चराचर०' ( ४।१।१३ ) इति निपातनादचि चराचरः । उणादौ तृकृभ्रिलणि ( १८७ ) चरणः पादः, सृपृप्रथीत्यमे ( ३४७ ) चरमः, भूभ्रिति णिती त्रे ( ४६० ) चारित्रम्, भावे करणे कर्मण्यधिकरणे च साधुः । 'कृशृकुटीति वा णिदिः' ( ६१९ ) चरिः पशुः प्राकाराग्रं च चारिः पशुभक्ष्यम् । मिवहीति वा णिदुः ( ७२६ ) चरुः स्थाली चारुः शोभनः । मनि ( ९११ ) चर्म । '**धोर्ऋ** गतेश्चातुर्ये' धोरति अधोरीत् अधोरत् दुधोर धोरिता 'नन्द्यादिभ्य०' ( ५।१।५२ ) इत्यने अधोरणः । व्यस्तनिर्देश उत्तरार्थः । '**खोर्ऋ** प्रतीघाते' गतेरित्यनुवृत्तेर्गतेः प्रतीघाते खोरति अखोरत् चुखोर खोरिता क्ये खोर्यते अचि खोरा अधमस्त्री णके खोरिका पात्री । इत्यष्टौ रान्ताः सेटश्च । '**दल ञिफला** विशरणे' दलति 'वदव्रज०' ( ४।३।४८ ) इति वृद्धौ अदालीत् दलिता अचि दलम् उणादौ दलिवलीत्यपे ( ३०४ ) दलपः प्रहरणम्, दलेरीपो दिल्च ( ३१० ) दिलीपः, गृदृरमीति भे ( ३२७ ) दल्भः ऋषिः । 'दलण् विदारणे' इत्यस्य तु दालयति । ञिफला फलति प्रतिफलति उत्फलति 'वदव्रज०' इति वृद्धौ अफालीत् पफाल 'तॄत्रपफलभजाम्' ( ४।१।२५ ) इत्येत्वे फेलतुः यङि 'चरफलाम्' ( ४।१।५३ ) इति म्वागमे 'तिचोपान्त्य०' ( ४।१।५४ ) इत्युत्वे च पम्फुल्यते यङ्लुपि पम्फुलीति पुम्फुलीषि । **द्व्युक्तोपान्त्यस्य शिति स्वरे** ( ४।३।१४ ) कृतद्वित्वस्य धातोरुपान्त्यनामिनः स्वरादौ शिति गुणो न भवतीति गुणनिषेधः पुम्फुलि अत्र 'तिचोपान्त्ये'त्यत्रानोदिति वचनाद्गुणाभावः तसि पुम्फुलतः अचि फलम् सम्फलः यङ्यचि पम्फुलः 'तिकृतौ नाम्नि' ( ५।१।७१ ) इत्यकटि फलकम् 'अनुपसर्गाः क्षीबोल्लाघ०' ( ४।२।८० ) इति क्ते निपातनात्फुल्लः फुल्लमनेन उत्फुल्लः सम्फुल्लः । सोपसर्गस्य प्रफुल्ता लता अत्र क्तीत्वात् 'ज्ञानेच्छार्चा०' ( ५।२।९२ ) इति वर्त्तमाने क्तः । 'क्तवतौ निपातनाभावात् फुल्तवान्' ये तु क्तवतावपीच्छन्ति तन्मते फुल्लवान् । आदित्वात् 'नवा भावारम्भे' ( ४।४।७२ ) इति क्तयोर्वा नेटि प्रफुलितमनेन प्रफुल्तमनेन प्रफुलितः प्रफुल्तः । उणादौ दृकृनॄ ( २७ ) इत्यके फलकः, कीचकपेचकेति ( ३३ ) निपातनात् फलहकः, फलेर्गोन्तश्चेत्युने ( २९१ ) फल्गुनः फल्गुनी, कमिवमीति ( ६१८ ) णिदिः फालिः दलम्, 'फलिवल्यमेर्गुः ( ७५८ ) फल्गुः । 'फल निष्पत्तौ' इत्यस्य तु फलितः ।

'**मील श्मील स्मील क्ष्मील** निमेषणे' निमेषणं संकोचः । मीलति अमीलीत् मिमील मीलिता क्ते सेटत्वात् प्रमीला तन्द्रा । अनटि मीलनम् । 'मिलत् श्लेषणे' इत्यस्य तु मिलति अनटि मेलनम् । श्मील तालव्यादिः श्मीलति अश्मीलीत् शिश्मील श्मीलिता । स्मील दन्त्यादिः स्मीलति अस्मीलीत् सिस्मील स्मीलिता । क्ष्मील क्ष्मीलति अक्ष्मीलीत् चिक्ष्मील क्ष्मीलिता । '**पील** प्रतिष्टम्भे' प्रतिष्टम्भो रोपणम् पीलति अपीलीत् पिपील पीलिता । णौ ङे अपीपिलत् । नाम्युपान्त्येति के पीला अपिपूर्वोण्णके पिपीलकः पिपीलिका । पृषोदरादित्वादपेः पिः । '**णील** वर्णे' वर्णोपलक्षितायां क्रियायां यथा श्वेतं नीलति मरकतकान्त्या । 'पाठे०' ( २।३।९७ ) इति णस्य नत्वे नीलति णोपदेशत्वात् 'अदुरुपसर्ग०' ( २।३।७७ ) इति णत्वे प्रणीलति अनीलीत् नीलिता अचि नीलम् 'नीलात्प्राण्यौषध्योः' ( २।४।२७ ) इति ङ्यां नीली गौः ओषधिश्च, अन्यत्र नीला शाटी । 'क्ताच०' ( २।४।२८ ) इति वा ङ्यां नीली नीला उणादौ 'भ्रीकैपैनीलेरङ्कुक्' ( ७६१ ) नीलङ्कुः कृमिरंतर्जः सृगालश्च । '**शील** समाधौ' समा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

धिरैकाक्ष्यम् तालव्यादिः शीलति अशीलीत् शिशील 'ज्ञानेच्छार्चा०' इति सत्यर्थे क्ते अनुशीलितः शीलिकामीति णे धर्मशीला घञि शीलं उणादौ कोरदूषाटरूषेति ( ५६१ ) निपातनादूषे शैलूषः शिलूषः शिलूषापत्यं वा । 'शीलण् उपधारणे' शीलयति । **'कील** बन्धे' कीलति अकीलीत् चिकील कीलिता 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के कीलः घञि कीलयतेऽनेनास्माद्वा कीलः कपि कीलकः क्ते सेट्त्वात् 'क्तेटो०' ( ५।३।१०६ ) इत्यः कीला क्ते उत्कीलितः उणादौ ऋकृमित्र्याले ( ४७५ ) कीलालम् 'नाम्युपान्त्येति किदिः ( ६०९ ) कीलिः । **'कूल** आवरणे' कूलति अनुकूलति अकूलीत् चुकूल कूलिता के कर्मणि घञि च कूलम् । **'शूल** रुजायाम्' तालव्यादिः शूलति अशूलीत् शुशूल शूलिता के शूलम् । **'तूल** निष्कर्षे' निष्कर्षोऽन्तस्थस्य बहिर्निस्सारणम् तूलति अतूलीत् तुतूल तूलिता के तूलम् उणादौ नाम्युपान्त्येति किदिः ( ६०९ ) तूलिः शय्या स्वार्थिके के तूलिका चित्रकरशलाका । **'पूल** सङ्घाते' पूलति अपूलीत् पुपूल पूलिता के घञि वा पूलः 'जातेरयान्त०' ( २।४।५४ ) इति पूली तृणोच्चयः । **'मूल** प्रतिष्ठायाम्' मूलति अमूलीत् मुमूल मूलिता णिगि उन्मूलयति केशान् क्ते उन्मूलितः के घञि वा मूलम् 'मूलण् रोहणे' इत्यस्य तु मूलयति । **'फल** निष्पत्तौ' निष्पत्तिः सिद्धिः फलति 'वदव्रज०' ( ४।३।४८ ) इति वृद्धौ अफालीत् पफाल 'तृत्रप०' ( ४।१।२५ ) इत्येत्वे फेलतुः फेलुः फलिता क्ते फलितः फलितवान् ञिफलेत्यस्य तु फुल्लः अचि फलम् पलितमिति तु पलेः । **'फुल्ल** विकसने' फुल्लति अफुल्लीत् पुफुल्ल पुफुल्लतुः पुफुल्लुः फुल्लिता क्तयोः फुल्लितः फुल्लितवान् अचि फुल्लम् । **'चुल्ल** ह्लावकरणे' मैथुनेच्छाप्रेरितशरीरविकारो ह्लावकरणं चुल्लति अचुल्लीत् चुचुल्ल चुल्लिता अचि चुल्लः उणादौ किलिपिलीति ( ६०८ ) इः चुल्लिः । **'चिल्ल** शैथिल्ये च' चकाराद्ध्लावकरणे, चिल्लति अचिल्लीत् चिचिल्ल चिल्लिता अचि चिल्लः पटः शिथिल इत्यर्थः क्ते चिल्लितः । **'पेल्ट फेल्ट शेल्ट षेल्ट सेल्ट वेल्ल सल तिल तिल्ल पल्ल वेल्ल** गतौ' पेलति अपेलत् अपेलीत् पिपेल अचि पेलः वृषणः पेला वस्त्रादिभाजनविशेषः णके पेलकः क्ते पेलितम् उणादौ वडिवटीत्यवे ( ५१५ ) पेलवम् । फेल्ट फेलति अफेलत् अफेलीत् पिफेल ऋदित्वादपिफेलत् क्ते फेलितम् सेट्त्वात् 'क्तेट०' ( ५।३।१०६ ) इत्यः फेला भोजनोज्झितम् । शेल्ट शेलति अशेलत् अशेलीत् शिशेल ऋदित्वादशिशेलत् । षेल्ट 'षः स०' ( २।३।९८ ) इति सत्वे सेलति असेलत् असेलीत् षोपदेशत्वात्षत्वे सिषेल ऋदित्वादसिषेलत् । सेल्ट सेलति असेलत् असेलीत् सोपदेशत्वान्न षत्वम् सिसेल ऋदित्वादसिसेलत् । वेल्ल वेल्लति अवेल्लीत् विवेल्ल वेल्लिता । सल सलति ससाल सोपदेशत्वान्न षत्वम् सिसालयिषति सिसलिषति घञि भ्रमरैः सल्यते इति सालः । तिल तेलति अतेलीत् तितेल तेलिता 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के तिलः 'तिलत् स्नेहने' तिलति 'तिलण् स्नेहने' इत्यस्य तु तेलयति । तिल्ल तिल्लति अतेल्लीत् तितिल्ल तिल्लिता । पल्ल पल्लति अपल्लीत् पपल्ल पल्लिता उणादौ पदिपठीति इः ( ६०७ ) पल्लिः । वेल्ल वेल्लति अवेल्लीत् विवेल्ल वेल्लिता क्ते वेल्लितः णौ ङे अविवेल्लत् । **'वेल्ट चेल्ट केल्ट क्वेल्ट खेल्ट स्खल** चलने' वेलति अवेलत् अवेलीत् विवेल वेलिता ऋदित्वादविवेलत् अचि वेला वेलका 'वेलण उपदेशे' वेलयति । चेल्ट चेलति अचेलत् अचेलीत् चिचेल चेलिता अचि चेलम् 'चिलत् वसने' चिलति घञि चेलम् । केल्ट केलति अकेलत् अकेलीत् चिकेल केलिता 'किलिपिलीति ( ६०८ ) इः केलिः । 'कील बन्धने' इत्यस्य तु कीलति कीलितम् कीलनम् कीलिः । क्वेल्ट क्वेलति अक्वेलत् अक्वेलीत् चिक्वेल क्वेलिता ऋदित्वादचिक्वेलत् । खेल्ट खेलति अखेलत् अखेलीत् चिखेल खेलिता ऋदित्वादचिखेलत् अचि खेलः खेला खुरलिः पृषोदरादित्वाद्ध्रस्वे खिलम् । स्खल स्खलति चस्खाल स्खलिता । चालशब्दार्थादित्यने स्खलनशीलः स्खलनः क्ते स्खलितं ।

'**खल** सञ्चये च' चकाराच्चलने, खलति 'वदव्रज०' (४।३।४८) इति वृद्धौ अखालीत् चखाल खलिता 'गोचर०' (५।३।१३१) इति निपातनाद् घे खल्यन्ते सञ्चीयते यशांसि धान्यानि वा यत्रेति खलः खलम् रणाजिरं धान्यपचनस्थानं च खलो दुर्जनः अचि खलति सञ्चिनोति पापं चलति वा गुणेभ्य इति खलो नीचः। उणादौ खलिहिंसिभ्यामीनः (२८६) खलीनम्, लटिखटीति (५०५) वे खल्वं निम्नम्, खल्वा दृतिः; कपाटविराटेति–निपातनात् (१४८) खल्वाटः, दृपृभ्रियते (२०७) खलतः खल्वाटः, पदिपठीति इः (६०७) खलिः पिण्याकः, खलयमीत्यतौ (६५३) खलतिः। '**श्वल श्वल्ल** गतौ' ताल्व्यादी श्वलति 'वदव्रज०' इति वृद्धौ अश्वालीत् वश्वाल वश्वलतुः। श्वल्ल श्वल्लति अश्वल्लीत् वश्वल्ल वश्वल्लतुः शलिमप्यत्रैके पठन्ति स ज्वलादिपाठेनैव गतार्थ इति नेहाधीतः। '**गल चर्व** अदने' गलति अगालीत् जगाल गलिता अचि गलः कण्ठः स्रवणेऽप्ययमनेकार्थत्वात् गलत्युदकं कुण्डिकायाः। उणादौ कलिगलेरस्योच्चेति (३१५) फे गुल्फः। बहुलमेतन्निदर्शनमिति 'गलिण् स्रावणे' गालयते उद्गालयते। इति लान्ताश्चत्वारिंशत्सेटश्च। चर्व चर्वति अचर्वीत् चचर्व चर्विता। उणादौ मवाकेति (३७) निपातनादाके चार्वाकः। बहुलमेतन्निदर्शनमिति चुरादित्वे चर्वयति। '**पूर्व पर्व मर्व** पूरणे' पूर्वति अपूर्वीत् पुपूर्व पूर्विता अचि पूर्वः। पर्व पर्वति अपर्वीत् पपर्व पर्विता विचि सुपः सुपरौ सुपरः। य्वोः प्वय् व्यञ्जने (४।४।१२१) इति वलोपः। उणादौ दृपृभ्रियते (२०७) पर्वतः। '**मर्व धवु शव** गतौ' मर्व मर्वति अमर्वीत् ममर्व मर्विता। धवु उदित्वान्ने धन्वति धन्विष्यति। उणादौ उक्षितक्षीत्यनि (९००) धन्वा। 'शवतिर्गतिकर्मा काम्बोजेषु भाष्यते, विकार एवैनमार्या आहुः। शवति अशवीत् शशाव शविता अचि शवः शवम् सुष्ठु शवतीति शवः स्त्रियां गौरादित्वात् ङ्यां सुशवी क्विपि 'अनुनासिके च०' (४।१।१०८) इति वस्योट् तत ऊदेत्यस्यौत्वे शौः शविष्यति। '**कर्व खर्व गर्व** दर्पे' कर्वति खर्वति गर्वति अकर्वीत् अखर्वीत् अगर्वीत् चकर्व चखर्व जगर्व अचि घञि वा कर्वः खर्वः गर्वः। '**ष्ठिवू क्षिवू** निरसने' 'षः सः०' (२।३।९८) इत्यत्र ष्ठिवो वर्जनात्षस्य सत्वाभावे 'ष्ठिवूक्लम्वाचमः' (४।२।११०) इति दीर्घे च ष्ठीवति अष्ठीवीत् परोक्षायां सूत्रम्–'**तिर्वा ष्ठिवः**' (४।१।४३) ष्ठिवेर्द्वित्वे सति पूर्वस्य द्वितीयस्य तिरादेशो वा भवति तिष्ठेव टिष्ठेव तेष्ठीव्यते नेरिकारोऽत्रोच्चारणार्थः आदेशस्तु तकारमात्रम्, तेन 'इवृध०' (४।४।४७) इत्यादिना वेटि तुष्ठ्यूषति टुष्ठ्यूषति पक्षे तिष्ठेविषति टिष्ठेविषति। पूर्वस्य त्यादेशविधानमेवं ज्ञापयति ष्ठिवेः षकारः ठकारपरः यद्यत्र षकारः टकारपरः स्यात्तदानेन तद्विधानं न कुर्यात् यतो'ऽघोषे शिटः' (४।१।४५) इति षलुकि निमित्ताभावे इति ठस्य थत्वे 'द्वितीयतुर्ययोः०' (४।१।४२) इति थकारस्य तकारः सिद्ध एव, पक्षे टकारविधानार्थं तु टिर्वा ष्ठिव इति सूत्रं कुर्यादिति। ष्ठिवो भ्वादेर्दिवादेश्चात्र ग्रहः। ष्ठाष्ट्यैप्रभृतीनां तु षकारस्तवर्गपरस्तेन तस्थौ तष्ठौ इत्यादि भवति। वेट्त्वात् क्तयोर्नेट् ष्ठ्यूतः ष्ठ्यूतवान् मनि 'अनुनासिके च०' इत्युट्त्वे सुष्ठ्योमा वनि सुष्ठ्योवा क्विपि सुष्ठ्यूः विचि सुष्ठेः 'ष्ठिव्सिवोऽनटि वा' (४।२।११२) इति वा दीर्घे ष्ठीवनं ष्ठेवनम्। क्षिवू क्षेवति अक्षेवीत् चिक्षेव क्षेविता उदित्त्वात् क्ष्यूत्वा क्षेवित्वा क्तयोः क्ष्यूतः क्ष्यूतवान्। क्षीवृमप्येके पठन्ति क्षीवति णौ ङे अचिक्षीवत्, 'ष्ठिवू क्षिवूच् निरसने' इत्यस्य तु ष्ठीव्यति क्षीव्यति। '**जीव** प्राणधारणे' जीवति अजीवीत् जिजीव जीविता णौ 'भ्राजभास०' (४।२।३६) इति वा ह्रस्वे अजीजिवत् अजिजीवत् 'नाम्युपान्त्य०' (५।१।५४) इति के जीवः णके जीवकः पक्षी जीवं जीवकोऽपि जीवेन सहचरेण जीवतीति बाहुलकात् खः स्वार्थे कश्च णके तु बाहुलकात् पूर्वस्यानुस्वारः। 'यावतोविन्दजीवः' (५।४।५५)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति णमि यावज्जीवमधीते 'नाम्नि पुंसि च' (५।३।१२१) इति णके जीविका उणादौ 'जीवेरातृको' जैव चेति (६७) जैवातृकः, रुहिनन्दीत्यन्ते (२२०) जीवताज्जीवन्तः जीवन्ती भूशीशपील्यथे (२३२) जीवथो वायुः जीवेरातुः (७८२) जीवातुः जीवनम् जीवेरदानुक् (७९५) जीरदानुः। **'पीव मीव तीव नीव** स्थौल्ये' पीवति अपीवीत् पिपीव पीविता के पीवः उणादौ तीवरेति (४४४) निपातनादरे पीवरः पीवेति तु प्यैङः। मीव मीवति अमीवीत् मिमीव मीविता। तीव तीवति अतीवीत् तितीव तीविता उणादौ खुरक्षुरेति (३९६) निपातनात्तीव्रः तीवरेति (४४४) निपातनादरे तीवरं जलं विवरं च। नीव नीवति अनीवीत् निनीव नीविता नाम्युपान्त्येति किदिः (६०९) नीविः नयतेर्वा डिद्विः (७०५) खुरक्षुरेति निपातनान्नीव्रम् (३९६) नयतेर्वोमन्नादिषु सर्वेषामेषां ष्ठिविना तुल्यमुदाहरणम्। **'उर्वै तुर्वै थुर्वै दुर्वै धुर्वै जुर्वै अर्व भर्व शर्व** हिंसायाम्' 'भ्वादे०' (२।१।६३) रिति दीर्घे ऊर्वति औवीत् ऊर्वाञ्चकार ऊर्विता ऐदित्त्वात्क्तयोर्नेट् ऊर्णः ऊर्णवान् क्विपि 'राल्लुक्' (४।१।११०) इति वलुकि ऊः उरौ उरः उणादौ उर्वेरादेरूदेतौ चेत्यारौ (८१४) ऊर्वारुः कटुचिर्भिटी एर्वारुः चारुचिर्भिटी। तुर्वै तूर्वति अतूर्वीत् तुतूर्व तूर्विता मनि सुतोर्मा वनि सुतोर्वा विचि सुतोः क्विपि तूः सुतूः सुतुरौ सुतुरः ऐदित्त्वात् तूर्णः तूर्णवान्। थुर्वै थूर्वति अथूर्वीत् तुथूर्व थूर्विता ऐदित्त्वात् थूर्णः थूर्णवान्। दुर्वै दूर्वति अदूर्वीत् दुदूर्व दूर्विता अचि दूर्वा क्विपि सुदूः सुदुरौ सुदुरः ऐदित्त्वात् दूर्णः दूर्णवान्। धुर्वै धूर्वति अधूर्वीत् दुधूर्व धूर्विता 'दिद्युद्दद्ज०' (५।२।८३) इति क्विपि धूः धुरौ धुरः ऐदित्त्वात् धूर्णः धूर्णवान् शीरीति (२०१) किति ते धूर्त्तः कित्त्वान्न गुणः गॄपॄदुर्विधुर्विभ्यः क्विप् (९४३) धूः। जुर्वै जूर्वति जूर्विष्यति क्विपि सुजूः सुजुरौ सुजुरः ऐदित्त्वात् जूर्णः जूर्णवान्। अर्व अर्वति आर्वीत् 'अनात०' (४।१।६९) इत्यात्वे ने च आनर्व अर्विष्यति अचि अर्वः। भर्व भर्वति अभर्वीत् बभर्व भर्विष्यति। शर्व शर्वति अशर्वीत् शशर्व शर्विता अचि शर्वः। **'मुर्वै मव** बन्धने' मूर्वति अमूर्वीत् मुमूर्व मूर्विता अचि मूर्वा तृणं यद्विकारो मौर्वी क्विपि मूः मुरौ मुरः। ऐदित्त्वात् मूर्णः मूर्णवान्। मव मवति अमवीत् ममाव मेवतुः क्विपि 'मव्यवि०' (४।१।१०९) इत्युपान्त्येन सहोटि मूः मुवौ मुवः सुमूः सुम्वौ सुम्वः मविष्यति एवं मन्नादिष्वपि। **'गुर्वै** उद्यमे' 'भ्वादेः०' (२।१।६३) इति दीर्घे गूर्वति अगूर्वीत् जुगूर्व गूर्विता ऐदित्त्वात् क्तयोर्नेट् गूर्णः गूर्णवान् क्विपि गूः गुरौ गुरः। **'पिवु मिवु निवु** सेचने' सेवने इत्येके, त्रयोऽप्युदितः उदित्त्वान्ने पिन्वति अपिन्वीत् पिपिन्व मिन्वति अमिन्वीत् मिमिन्व निन्वति अनिन्वीत् निनिन्व पिन्विता मिन्विता निन्विता मनादिषु पूर्ववत्। **'हिवु दिवु जिवु** प्रीणने' त्रयोऽप्युदितः उदित्त्वान्ने हिन्वति अहिन्वीत् जिहिन्व हिन्विता, दिन्वति अदिन्वीत् दिदिन्व दिन्विता, जिन्वति अजिन्वीत् जिजिन्व जिन्विता, मन्नादिषु पूर्ववत्। **'इवु** व्याप्तौ च' चकारात् प्रीणने, इन्वति ऐन्वीत् इन्वाञ्चकार अनटि 'वोत्तरपदान्तन०' (२।३।७५) इति णत्वे प्रण्वनम् प्रन्वनम् णके इन्विका मृगशीर्षशिरस्तारकाः सुपूर्वात्मनि 'अनुनासिके च०' (४।१।१०८) इत्यूटि स्विनोमा वनि 'य्वोः' (४।४।१२१) इति वलोपे 'वन्याङ्०' (४।२।६५) इति नस्यात्वे सुयावा विचि 'य्वो'रिति वलुकि गुणे च स्वे स्वेनौ स्वेनः क्विपि वस्योटि स्विनूः इन्विता इन्वितुम् वान्तोऽयं धुड्वर्गाभावान् 'म्नां०' (१।३।३९) इति नकारस्य मो न भवति। **'अव** रक्षणगतिकान्तिप्रीतितृप्त्यवगमनप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादहनभाववृद्धिषु एकोनविंशतावर्थेषु, कैश्चित्कान्तिवर्जनादष्टादशसु, अन्यैस्तु रक्षणगतिकान्तिप्रीतितृप्तिवृद्धिषु षट्सु, अवति आवीत् आव आवतुः आवुः अविता क्विपि 'मव्यवि०'



Jain Education International For Personal & Private Use Only www.jainelibrary.org

( ४।१।१०९ ) इत्यूटि ऊः उवौ उवः क्तौ ऊतिः उणादौ दीव्यवी ( १४२ )त्यटे अवटः जीण् शीदीति ( २६१ ) किति ने ऊनः श्याकठीतीने ( २८२ ) अविनं जलम् अवेर्हस्वश्च वेति किति मे ( ३४२ ) उमा ऊमम् मह्यविभ्यां ( ५४७ ) टिदितीषे अविषः समुद्रः अविषी द्यौः । पदिपठीति ( ६०७ ) इः अविः सदिवृत्यमित्यनौ ( ६८० ) अवनिः तृस्तृतन्द्रीति ईः ( ७११ ) अवीः रजस्वला कृसिकमीति ( ७७३ ) तुनि ओतुः अवेर्मः ( ९३३ ) ओम् । इति वान्ताः सप्तत्रिंशत्सेटश्च ॥ ३७ ॥ 'कश शब्दे' सौत्रोऽयमित्येके कौशिकस्त्वष्टैष्ट्येत्यधीतः । कशति अकाशीत् २ चकाश कशिता अचि 'वर्चस्कादिष्व०' ( ३।२।४८ ) इति षागमे प्रतिष्कशोऽग्रयायी दूतश्च 'ग्रामम‌द्य प्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः', कशा चर्मयष्टिः घञि काशः तृणजातिः, उणादौ कशेर्मोऽन्तिश्चेतीरे ( ४२० ) कश्मीरा काशिरिवु तु 'काशृङ् दीप्ता‌वि'त्यस्य । वान्तोऽयमित्यन्ये कवति । '**मिश मश** रोषे च' चकाराच्छब्दे शब्दने रोषक्रियायां चेत्यर्थः । मेशति अमेशीत् मिमेश मेशिता । नाम्युपान्त्येति के मिशो व्याजः । मश मशति ममाश मशिता 'तिक्कृतौ नाम्नि' ( ५।१।७१ ) इत्यकटि दृकृन्त्रित्यूणादावके ( २७ ) वा मशकः । '**शश** प्लुतिगतौ' तालव्यादिः प्लुतिर्निर्गमने उत्प्लुत्य गमन इत्यर्थः । शशति अशाशीत् २ शशाश शेशतुः शेशुः शाशिता अचि शशः शशकः । **णिश** समाधौ 'पाठ०' ( २।३।९७ ) इति णस्य नत्वे नेशति अनेशीत् निनेश निनिशतुः 'अदुरुपसर्गान्त०' ( २।३।७७ ) इति णत्वे प्रणेशति 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के निशः 'स्थादिभ्यः' ( ५।३।८२ ) इति के नेशन्ति समाहितमनस्का भवन्त्यस्यामिति निशा । एते पञ्च शान्ताः सेटः । अथ द्वावनिटौ शान्तौ, तत्र दृश्धातुं कण्ठतो निर्दिशति 'दृशूं प्रेक्षणे' 'श्रौति०' ( ५।२।१०८ ) इति पश्यादेशे पश्यति ॥ ९६ ॥ अद्यतन्यां सूत्रम्—

## ऋदिच्छ्विस्तम्भूस्तुम्भूम्रुचूम्लुचूग्रुचूग्लुचूग्लुञ्चूज्रो वा ॥ ९७ ॥ [ सि० ३।४।६५ ]

**ऋदितः श्व्यादीनां नवानां च परस्मैपदेऽद्यतन्यामङ् वा स्यात् ॥ ९७ ॥**

'**ऋदि०**' ऋत् इत् अनुबन्धो यस्यासौ ऋदित् ऋदिच्च श्विश्च स्तम्भूश्च स्तुम्भूश्च म्रुचूश्च म्लुचूश्च ग्रुचूश्च ग्लुचूश्च ग्लुञ्चूश्च जॄश्च ऋदिच्छ्विस्तम्भू स्तुम्भू म्रुचू म्लुचू ग्रुचू ग्लुचू ग्लुञ्चू जॄ तस्मात् १० क्रमेणोदाहरणानि 'रुधूंपी आवरणे' अनेन अङागमे अरुधत् पक्षे अरौत्सीत् । 'ट्वोश्वि गतिवृद्ध्योः' अनेन अङागमे 'श्वयत्यसूवचपतः श्वास्थवोचपप्तम्' ( ४।३।१०३ ) इति श्वादेशे अश्वत् पक्षे सिजागमे इडागमे ईदागमे 'इट ईति०' ( ४।३।७१ ) इति सिज्लोपे गुणेऽयादेशे अश्वयीत् पक्षे 'ट्षेश्वेर्वा०' ( ३।४।५९ ) इति ङागमे इडागमे 'द्विर्धातुः परोक्षाङे०' ( ४।१।१ ) इति द्वित्वे अशिश्वियत् एवं त्रैरूप्यम् । स्तम्भू स्तुम्भू इति सौत्रौ धातू अस्तम्भत् अस्तम्भीत् अस्तुम्भत् अस्तुम्भीत् । 'वञ्चू चञ्चू तञ्चू त्वञ्चू मञ्चू मुञ्चू म्रुञ्चू म्रुचू म्लुञ्चू ग्लुचू ग्लुञ्चू षश्च गतौ' तथा 'ग्रुचू ग्लुचू स्तेये' गतावपि केचित्, एषां त्रयोदशानां धातूनां मध्ये म्रुचू म्लुचू ग्रुचू ग्लुचू ग्लुञ्चू एते पञ्चधातवोऽत्र सूत्रे सङ्गृहीता ज्ञेयाः । अम्रुचत् अम्रोचीत्, अम्लुचत् अम्लोचीत्, अग्रुचत् अग्रोचीत् । ग्रुचो नेच्छन्त्यन्ये । अग्लुचत् अग्लोचीत्, अग्लुञ्चत् अग्लुञ्चीत् । ग्लुचूग्लुञ्च्वोरेकतरोपादानेऽपि रूपत्रयं सिद्ध्यति अर्थभेदात्तु द्वयोरुपादानम्, अन्ये त्वङ्विधानसामर्थ्यात् ग्लुञ्चेर्नलोपं नेच्छन्ति तेनाग्लुञ्चत् । 'जॄश् वयोहानौ' इति त्र्यादिः, 'जॄष् जॄष् च् जरसि इति दिवादिः, एतद्द्वयमप्यत्र ग्राह्यम् **तथाहुः** 'जॄ जॄष्वा'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अजरत् अजारीत् । परस्मैपद इत्येव–अरुद्ध अभित्त ॥ प्रकृते तु दृश् धातोः ऋदित्त्वादनेनाङि अङो ङित्त्वात् 'नामिनो गुणोऽक्ङिति' ( ४।३।१ ) इति गुणनिषेधे प्राप्ते ॥ ९७ ॥ सूत्रम्—

## ऋवर्णदृशोऽङि ॥ ९८ ॥ [ सि० ४।३।७ ]

**ऋवर्णान्तानां दृशश्चाङि परे गुणः स्यात् । अदर्शत् अदर्शताम् अदर्शन् । पक्षे सिचि ॥ ९८ ॥**

**'ऋव०'** स्पष्टम् । ऋवर्णान्तानां यथा 'सृं गतौ' भ्वादिः 'ऋं गतौ' इति भ्वादिः 'ऋक् गतौ' इति दिवादिर्वा । **'सर्त्यर्तेर्वा'** ( ३।४।६१ ) सृ ऋ आभ्यां कर्तर्य्यद्यतन्यामङ् वा स्यात् ततोऽनेन गुणे असरत् असार्षीत् सर्त्तेः कर्त्तर्यात्मनेपदं न दृश्यते इति नोदाह्रियते । ऋ आरत् आर्षीत् समारत समार्ष्ट आत्मनेपदे न भवति, परस्मैपदे नित्यमित्येके, परस्मै नित्यमात्मनेपदेऽर्तेर्वा सर्तेर्नेत्यन्ये, उभयत्र नित्यमित्यपरे, तिनिर्देशो यङ्लुबन्तनिवृत्त्यर्थः असरिसारीत् आरारीत् । जॄष् झॄष् च पूर्वेणाङागमे अनेन गुणे अजरत् अजारीत् । प्रकृते त्वनेन गुणे अदर्शत् इत्यादि । अङो वैकल्पिकत्वात्तदभावपक्षे सिजागमे ॥ ९८ ॥ सूत्रम्—

## अः सृजिदृशोऽकिति ॥ ९९ ॥ [ सि० ४।४।१११ ]

**अनयोः स्वरात्परो धुडादौ प्रत्ययेऽदन्तः स्यात् न तु किति । द्रश् इति जाते 'व्यञ्जनानामनिटि' ( ४।३।४५ ) इति वृद्धौ यजसृजेति शस्य षत्वे ॥ ९९ ॥**

**'अः सृ०'** अनयोरिति 'सृजंत् विसर्गे' 'दृशृं प्रेक्षणे' इत्यनयोरित्यर्थः न तु किति । यथा स्रष्टा स्रष्टुं स्रष्टव्यं द्रष्टा द्रष्टुं द्रष्टव्यं । द्रश् इति जाते ॥ ९९ ॥ अत्रोपयोगिसूत्रम्—

## षढोः कः सि ॥ १०० ॥ [ सि० २।१।६२ ]

**से परे षढोः कः स्यात् । नाम्यन्तस्थेति ( २।३।१५ ) सस्य षत्वे । अद्राक्षीत् अद्राष्टाम् अद्राक्षुः ५ । वित्परोक्षायाः कित्त्वाभावः ॥ १०० ॥**

**'षढो०'** अद्राक्षीत् परत्वादकारागमे सति वृद्धिः । सरिस्रष्टि सरिस्रष्टः, दरिद्रष्टि दरिद्रष्टः ङित्यपि नेच्छन्त्येके । धुटीत्येव–सर्जनम् । अकितीति किम् ? सृष्टः दृष्टः सिसृक्षति दिदृक्षति । उपान्त्ये नामीत्युपान्त्ये सति धातोरनिट् सन् किद्वद्भवतीति सनः कित्त्वम् प्रसज्याश्रयणात्प्रतिषेधे धुटीति नाश्रीयते तेन सिज्लुचो धुडादित्वं प्रति वर्णाश्रयत्वेन स्थानिवद्भावाभावेऽपि कित्त्वं प्रति स्थानिवद्भावात्किदाश्रयः प्रतिषेधो भवति । असृष्ट असृष्टाः समदृष्ट समदृष्टाः । **'सिजाशिषावात्मने'** ( ४।३।३५ ) नाम्युपान्त्ये सति धातोः परे आत्मनेपदविषये अनिटौ सिजाशिषौ किद्वद्भवतः इत्यात्मनेपदस्य कित्त्वम्, धातोः स्वरूपग्रहणे न तत्प्रत्यये कार्यविज्ञानं तेन धातोरेव विहिते अकिति धुडादौ प्रत्ययेऽकारः स्यात् न तु नाम्नो विहिते, ततो रज्जुसृड्भ्यां देवदृग्भ्यामित्यत्र न भवति ।

परोक्षायां विशेषमाह । वित्परोक्षायाः कित्त्वाभाव इन्धेरसंयोगान्ताच्च परा अवित्परोक्षा किद्वत्स्यादिति वचनात्, ततश्च सूत्रम् ॥ १०० ॥

## लघोरुपान्त्यस्य ॥ १०१ ॥ [ सि० ४।३।४ ]

**धातोरुपान्त्यस्य नामिनो लघोरक्ङिति गुणः स्यात् । ददर्श ददृशतुः ददृशुः । सृजिदृशीत्यादिनेड्विकल्पे, ददृष्ठ ददर्शिथ ६ । दृश्यात् ७ । द्रष्टा ८ । द्रक्ष्यति ९ । अद्रक्ष्यत् १० ॥ १०१ ॥** ३२

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'**लघो०**' ततो वित्परोक्षायां गुणः ददर्शेति । अवित्परोक्षायाश्च कित्त्वात् गुणाभावः ददृशतुरित्यादि । यथा च भेत्ता गोप्ता वर्तिता भेदनं गोपनं वर्तनं वेत्ति दोग्धि नर्नर्ति । लघोरिति किम् ? ईहत ऊहते । उपान्त्यस्येति किम् ? भिनत्ति । अक्ङितीत्येव भिन्नः बेभिद्यते । दृश्यादिति आशीः क्यातः कित्त्वाददागमाभावः श्वस्तन्यादित्रयस्याङित्त्वाददागमः ॥ १०१ ॥

## दंश सञ्जः शवि ॥ १०२ ॥ [ सि० ४।२।४९ ]

**दंशं दशने । लुक् । दशति ४ । अदाङ्क्षीत् ५ । ददंश ६ । संयोगान्तत्वादवित्परोक्षायाः कित्त्वाभावे न्लोपाभावः । ददंशतुः ॥ १०२ ॥**

'**दंशं** दशने' दशनं दन्तकर्म 'दंशसञ्जः शवि' ( ४।२।४९ ) इति सूत्रम्, लुक् इति टीका, उभयमपि स्पष्टम् । अदाङ्क्षीत् अदांष्टाम् अदाङ्क्षुः, अदाङ्क्षीः अदांष्टम् अदांष्ट, अदाङ्क्षम् अदाङ्क्ष्व अदाङ्क्ष्म । संयोगान्तत्वादिति इन्ध्यसंयोगात्परोक्षा किद्वेति सूत्रप्रामाण्यात् ॥ १०२ ॥

आशिषि सूत्रम्—

## नो व्यञ्जनस्यानुदितः ॥ १०३ ॥ [ सि० ४।२।४५ ]

**व्यञ्जनान्तस्यानुदितो धातोरुपान्त्यस्य नः क्ङिति परे लुक् स्यात् । दश्यात् ७ । दंष्टा ८ । दङ्क्ष्यति ९ । अदङ्क्ष्यत् १० । कृषं विलेखने । लघोरुपान्त्यस्येति गुणे कर्षति ४ ॥ १०३ ॥**

'**नो व्य०**' स्पष्टम् व्यञ्जनान्तस्येति किम् ? नीयते । अनुदित इति किम् ? 'टुनदु समृद्धौ' नन्द्यते नानन्द्यते । क्ङितीत्येव स्रंसिता ध्वंसिता । उपान्त्यस्येत्येव नह्यते नानह्यते । ततो दश्यादित्यादि रूपसिद्धिः । श्वस्तन्यादेरङित्वान्नलोपाभावः दंष्टा इत्यादि । अनुस्वारेत्वान्नेट कर्मणोऽणि वृषं मूषिकं दशति वृषदंशः बिडालः 'दंशेस्त्रः' ( ५।२।९० ) दंष्ट्रा । अचि दंशः दंशी । घञि उपदंशः 'दशनावोदैधौध्मप्रश्रथहिमश्रथम्' ( ४।२।५४ ) इति निपातनादनटि दशनं । अवोद इति अत्र गुणे कृते 'उपसर्गस्यानिणेधेदोति' ( १।२।१९ ) इत्यकारलोपः एधः उद्मः प्रश्रथ हिमश्रथः अत्र अवपूर्वस्य उन्देः इन्धेश्च थत्ति उन्दे मनि न लोपः प्रहिमपूर्वस्य श्रथेर्घञि वृद्ध्यभावश्च निपात्यते । एवमनेनैव दशनो दंशः 'दंशेस्तृतीयया' ( ५।४।७३ ) इति णमि मूलकेनोपदंशं भुङ्क्ते अत्र 'तृतीयोक्तं वा' ( ३।१।५० ) इति वा तत्पुरुषः उणादौ स्नुपुष्विति कित्यनि ( ९०१ ) दश घटाः । इति शान्ताः सप्त तत्राद्याः पञ्च सेटः अन्त्यौ द्वावनिटौ च ॥ ७ ॥ '**घुषृ** शब्दे' घोषति ऋदित्वाद्वाङि अघुषत् अघोषीत् जुघोष 'घुषेरविशब्दे' ( ४।४।६८ ) इति क्तयोर्नेट् घुष्टा रज्जुः विशब्दने त्विटि अवघुषितं वाक्यमाह, सम्पूर्वात् 'श्वसजप०' ( ४।४।७५ ) इति वा नेटि सङ्घुष्टा सङ्घुषिता रज्जुः, सङ्घुष्टं सङ्घुषितं वाक्यं । 'घुष्टृण् विशब्दने' घोषयति आङः क्रन्दे आक्रन्दयति । उणादौ हृषिपुषीतीत्नौ ( ७९७ ) घोषयित्नुः शब्दः । '**चूष** पाने' चूषति अचूषीत् चुचूष । '**तूष** तुष्टौ' तूषति अतूषीत् तुतूष तूषिता । 'तूषं हृषं च् तुष्टौ' तुष्यति । '**पूष** वृद्धौ' पूषति अपूषीत् पुपूष उणादौ उक्षितक्षीत्यनि ( ९०० ) पूषा । '**लुष मूष** स्तेये' लोषति अलोषीत् लुलोष लोषिता 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के लुषः । मूषति अमूषीत् मुमूष 'नाम्युपान्त्ये०' ति के मूषः मूषा तेजसावर्त्तनी गौरादित्त्वात् ङ्यां मूषी णके मूषकः । '**षूष** प्रसवे' 'षः स०' ( २।३।९८ ) इति षस्य सत्वे सूषति असूषीत् षोपदेशत्वात् षत्वे सुषूष येषां तु सोपदेशस्तन्मते षत्वाभावे सुसूष 'नाम्युपान्त्येति' के सूषः गौरादित्वात् ङ्यां सूषी । ताल्व्यादिरयमिति चारकाः शूषा शाकम् । '**ऊष** रुजायाम्'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ऊषति औषीत् गुरुनाम्यादेरित्यामादेशे ऊषाञ्चकार 'नाम्युपान्त्येति' के ऊषः अनदि ऊषणम् मरिचम् त्र्यूषणं त्रिकटुकं मनि ऊष्मा ऊषरं क्षेत्रमिति तु ऊषात् 'रोऽश्मादेः' (६।२।७९) इति चातुरर्थिके रे ऊषरं जलमिति 'मध्वादिभ्य०' (७।२।२६) इति मत्वर्थीये रे सिद्धम्। 'ईषं उञ्छे' उञ्छ उच्चयनं ईषति ऐषीत् 'गुरुनाम्यादे०' (३।४।४८) रित्यामादेशे ईषाञ्चकार ईषिता क्ते सेट्त्वात् 'क्टेट०' (५।३।१०६) इत्यः ईषा व्रणगवेषणी मञ्चकाद्यवयवश्च, उणादौ ऋच्यृजीतीके (४८) ईषीका तृण-शलाका इषीकेति तु 'इषत् इच्छायामि'त्यस्य। कृषधातुं कण्ठतो निर्दिशति 'कृष विलेखने' विलेखनं हलोत्कषणं कर्षति कर्षतः कर्षन्ति तसादौ अविच्छितो ङित्त्वेऽपि शवो विच्छित्त्वात्तन्निमित्तको गुणः स्यादित्याह 'लघोरुपान्त्यस्य' (४।३।४) इत्यादि ॥ १०३ ॥ अद्यतन्यां सूत्रम्—

## स्पृशमृशकृषतृपदृपो वा ॥ १०४ ॥ [ सि० ३।४।५४ ]

**एभ्योऽद्यतन्यां सिच् वा स्यात् ॥ १०४ ॥**

**'स्पृश०'** एभ्य इति 'स्पृशंत् संस्पर्शे' 'मृशंत् आमर्शने' 'कृषींत् विलेखने' 'कृषं विलेखने' इति च 'तृपौच् प्रीतौ' 'दृपौच् हर्षमानयोः' एभ्य इत्यर्थः सिजागमे ॥ १०४ ॥ सूत्रम्—

## स्पृशादिसृपो वा ॥ १०५ ॥ [ सि० ४।४।११२ ]

**स्पृशादिपञ्चकस्य सृपश्च स्वरात्परो धुडादौ प्रत्ययेऽदन्तो वा स्यात् न तु किति। शेषं दृशिवत्। अक्राक्षीत् अक्राष्टाम् अक्राक्षुः। अकार्क्षीत् अकार्ष्टाम् अकार्क्षुः। पक्षे ॥ १०५ ॥**

**'स्पृश०'** वैकल्पिके अदागमे अस्प्राक्षीत् अम्राक्षीत् अक्राक्षीत् अत्राप्सीत् अद्राप्सीत् अदागमाभावे अस्पार्क्षीत् अमार्क्षीत् अकार्क्षीत् अतार्प्सीत् अदार्प्सीत्, अदृपत् अतृपत् तृपदृपयोः पुष्यादित्वादङि शेषाणां तु सकि प्राप्ते वचनं। तथा चाह पक्षे इति सिज्विकल्पपक्षे इत्यर्थः ॥ १०५ ॥

अत्र सूत्रम्—

## हशिटो नाम्युपान्त्याददृशोऽनिटः सक् ॥ १०६ ॥ [ सि० ३।४।५५ ]

**हान्ताच्छिडन्ताच्च नाम्युपान्त्याद्दृशिवर्जादनिटोऽद्यतन्यां सक् स्यात्। सिजपवादः। अकृक्षत् अकृक्षताम् अकृक्षन् ५। चकर्ष चकृषतुः ६। कृष्यात् ७। क्रष्टा कर्ष्टा ८। क्रक्ष्यति कर्क्ष्यति ९। अक्रक्ष्यत् अकर्क्ष्यत् १०। 'हसे हसने'। हसति ४। एदित्त्वाद्वृद्ध्यभावे। अहसीत् अहसिष्टाम् अहसिषुः ५। जहास ६। हस्यात् ७। हसिता ८। हसिष्यति ९। अहसिष्यत् १० ॥ १०६ ॥**

**'हशि०'** सिजपवाद इति सिचो परो यः सक् प्रत्ययः यथा दुह् अधुक्षत्, विश् अविक्षत्, लिहलिशोः अलिक्षत्, द्विष अद्विक्षत्। हशिट इति किम्? अभैत्सीत्। नाम्युपान्त्यादिति किम्? अधाक्षीत्। अदृश इति किम्? अद्राक्षीत्। अनिट इति किम्? अकोषीत्। विकल्पितेटोऽपि पक्षेऽनिट्त्वात् भवति न्यघुक्षत् अन्यत्र न भवति न्यगूहीत्। 'नन्द्यादिभ्य०' (५।१।५२) इत्यने संकर्षणो हली अन्यत्र 'नाम्युपान्त्य०' (५।१।५४) इति के संकृषः 'व्यञ्जनाद्०' (५।३।१३२) घञि आकर्षः द्यूतफलहकं उपपीडेति (५।४।७५) णमि पटोपकर्षं धावति भ्राष्ट्रापकर्षं धानाः खादति 'तृतीयोक्तं वा' (३।१।५०) इति वा तत्पुरुषः पक्षे पटे पटेन वा उपकर्षं धावति भ्राष्ट्रे भ्राष्ट्रेण वा उपकर्षं धानाः खादति, उणादौ कृषेर्गुणवृद्धी च वेत्यके (३१) कर्षकः कार्षकः कृषकश्च कुटुम्बी, पापुलीति कितीके (४१) कृषिकः पामरः घृवीहेति किति णे (१८३) कृष्णः, नाम्युपान्त्येति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किदिः ( ६०९ ) कृषिः कृषेश्चवादेरित्यणौ ( ६४१ ) चर्षणिः चर्षणी कुलटा कृषिचमीत्यू ( ८२९ ) कर्षूः कुल्या, कृषीत् विलेखने इत्यस्य तु कृषति कृषते । **'कष शिष जष झष वष मष मुष रुष रिष यूष जूष शष चष हिंसायाम्'** त्रयोदश । कषति 'कषः कृच्छ्रगहने' ( ४।४।६७ ) इति क्तयोर्नेट् कष्टं कृच्छ्रं गहनं च 'कषोऽनिटः' ( ५।३।३ ) इति भविष्यति क्त प्रत्यये कष्टमिति साधुः । समिणूनिकषिभ्यामाः ( ५९८ ) निकषा पर्वतं नदी । शिष तालव्यादिः शेषति अशेषीत् शिशेष शेषिता केचिदिटं नेच्छन्ति शेष्टा 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के शिषः कर्मणि घञि शेषं शिषण् असर्वोपयोगे शेषयति अचि शेषः । अत्र युजादित्वाद्वा णिच् पक्षे शेषति । एवं जषति झषति वषति । मषति कर्मणि घञि माषः । मुष मोषति मुषेर्दीर्घश्चेत्युणादाविके ( ४३ ) मूषिकः मूषिका, स्त्री । रुष रोषति तादौ 'सहलुभेच्छ०' ( ४।४।४६ ) इति वेट्त्वात् रोष्टा रोषिता रोष्टुं रोषितुं 'वेटोऽपतः' ( ४।४।६२ ) इति निषेधापवादे श्वसजपेति ( ४।४।७५ ) क्तयोर्वा नेटि रुष्टः रुषितः शील्यादित्वादत्र सत्यर्थे क्तः । 'रुषच् रोषे' रुष्यति । रिष रेषति 'सहलुभेच्छ०' इति वेटि रेष्टा रेषिता वेट्त्वात् क्तयोर्नेट् रिष्टः रिष्टवान् रिष्टं अरिष्टम् उणादौ निघृषीति किति वे ( ५११ ) रिष्वः । यूषति अयूषीत् युयूष 'नाम्युपान्त्ये०' ति के यूषः यूषं गौरादित्वात् ङ्यां यूषी । जूषति 'नाम्युपान्त्ये०' ति के जूषः क्ते जूषितः 'क्तेट०' ( ५।३।१२६ ) इत्यः जूषा । शष तालव्यादिः शषति उणादौ पम्पाशिल्पेति पे ( २९९.३०० ) शष्यति पे शष्यन्ते शष्पः बालतृणम् । चषति 'तिकृतौ नाम्नि' ( ५।१।७१ ) इत्यकटि चषकः । खषेत्यपि **कण्णः** खषति । 'वृषू सङ्घाते च' चकाराद्धिंसायाम् । वर्षति अवर्षीत् ववर्ष ववृषतुः वर्षिता वेट्त्वात् क्तयोर्नेट् वृष्टः वृष्टवान् । 'भष भर्त्सने' भर्त्सनं कुत्सितशब्दकरणम् । अतो भर्त्सने शब्दकर्मकोऽयं भषति श्वा बुक्कतीत्यर्थः । भषति भषकः पैशुन्येन वक्तीत्यर्थः । बभाष भषिता अचि भषः गौरादित्वात् ङ्यां भषी क्ते भषितम् 'तिकृतौ नाम्नी'त्यकटिः भषकः । **'जिषू विषू मिषू निषू पृषू वृषू सेचने'** षडप्यूदितः जेषति अजेषीत् जिजेष जेषिता । विषू वेषति परिवेषति वेषिता विष्ट्वा विषित्वा वेषित्वा 'विष्लृंकी' व्याप्तौ इत्यस्य तु वेवेष्टि वेविष्टे । मिषू मेषति मेषिता मिष्ट्वा मेषित्वा मिषित्वा 'लिह्यादिभ्यः' ( ५।१।५० ) इत्यचि मेषः । 'मिषत् स्पर्धायाम्' मिषति । 'निषू नेषति नेषिता निष्ट्वा नेषित्वा निषित्वा । बहुभिरयं न पठ्यते । पृषू पर्षति पर्षिता पृष्ट्वा पर्षित्वा वेट्त्वात् क्तयोर्नेट् पृष्टः पृष्टवान् 'नाम्युपान्त्य०' इति के पृषः 'ऋदुपान्त्याद०' ( ५।१।४१ ) इति क्यपि पृष्यम् उणादौ पीविशीति किति ठे ( १६३ ) पृष्ठम् पृषिरञ्जीति कित्यते ( २०८ ) पृषतः मृगः बिन्दुश्च कुशिपिशीति कितीते ( २१२ ) पृषितं वारिबिन्दुः हिरण्ये निपातनादन्ये परिपर्षतीति ( ३८० ) पर्जन्यः ऋदुभ्रिति किति णौ ( ६३५ ) पृष्णिः किरणः पृषिहृषिभ्यां वृद्धिश्चेति णौ ( ६३६ ) पार्ष्णिः द्रुहीवृहीति कतरि ( ८८४ ) पृषन्ति जलबिन्दवः पृषती मृगी स्थूलपृषतीमालभेत । वृषू वर्षति अवर्षीत् ववर्ष वर्षिता वृष्ट्वा वर्षित्वा वृष्टः वृष्टवान् 'ज्ञानेच्छार्चार्थ०' ( ५।२।९२ ) इति सत्यर्थे क्ते वृष्टो मेघः कुवृषीति वा क्यपि ( ५।१।४२ ) वृष्यं वर्ष्यम् । 'नाम्युपान्त्ये०' ति के वृषः 'शृकम०' ( ५।२।४० ) इत्युकणि वर्षणशीलो वर्षुकः वर्षादयः क्लीबे ( ५।३।२९ ) इत्यलि वर्षम् 'भिदादयः' ( ५।३।१०८ ) इति निपातनादङि वर्षाः क्रुत्संपदादिभ्य (५।३।११४) इति क्विपि प्रवर्षति प्रवर्षन्त्यत्र मेघा इति वा प्रावृट् । अत्र 'गतिकारकस्य०' ( ३।२।८५ ) इति प्रस्य दीर्घः उणादौ ऋषिवृषी कित्यभे ( ३३१ ) वृषभः तृपिवपीति कित्यले ( ४६८ ) वृषलः ऋदुभ्रिति किति णौ ( ६३५ ) वृष्णिः लृपूय्विति कित्यनि ( ९०१ ) वृषा इन्द्रः दिविपुरीति किदाः ( ५९९ ) वृषाः प्रबलम् । **'मृषू सहने**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

च' चकारात्सेचने मर्षति अमर्षीत् ममर्ष मर्षिता ऊदित्त्वात् क्त्वि वेट् मृष्ट्वा । इटि 'ऋत्तृष०' (४।३।२४) इति क्त्वो वा कित्त्वे मृषित्वा मर्षित्वा वेट्त्वात् क्तयोर्नेट् मृष्टः मृष्टवान् अत्रानिट्त्वात् क्तयोः क्षान्तावपि 'मृषः क्षान्तौ' (४।३।२८) इति न कित्त्वप्रतिषेधः 'शासूयुधि०' (५।३।१४१) इत्यने दुर्मर्षणः 'मृषीच् तितिक्षायां' इत्यस्य तु मृष्यति मृष्यते अपमृषितं वाक्यमाह । **'उषू श्रिषू श्लिषू प्रुषू प्लुषू** दाहे' पञ्चाप्यूदितः ओषति औषीत् 'जाग्रुष०' (३।४।४९) इति वामादेशे ओषाञ्चकार उवोष उषिता ऊदित्त्वात् क्त्वि वेट् उष्ट्वा उषित्वा । ये तूदितं न मन्यन्ते तन्मते उषित्वेत्येव भवति उणादौ उषेः किलुकचेति खे (८८) उखा वनिकणीति ठे (१६३) ओष्ठः घृवीह्वेति णे (१८३) उष्णम् सूमूखनीति, किति त्रटि (४४९) उष्ट्रः उषेर्जचेत्यसि (९५९) ओजो बलम् मिथिरञ्ज्यूषीति किल्यसि (९७१) उषः प्रातः । श्रिषू श्रेषति अश्रेषीत् शिश्रेष श्रेषिता श्रिष्ट्वा श्रेषित्वा श्रिषित्वा श्रिष्टः श्रिष्टवान् । श्लिषू श्लेषति अश्लेषीत् शिश्लेष श्लेषिता श्लिष्ट्वा ३ श्लिष्टः २ 'श्लिषंच् आलिङ्गने' इत्यस्य तु श्लिष्यति श्लेष्टा श्लेष्मा 'श्लिषण् श्लेषणे' इत्यस्य तु श्लेषयति । प्रुषू प्रोषति अप्रोषीत् पुप्रोष प्रोषिता प्रुष्ट्वा ३ । प्लुषू प्लोषति अप्लोषीत् पुप्लोष प्लोषिता प्लुष्ट्वा ३ प्लुष्टः २ 'प्लुषूच् दाहे' इत्यस्य तु प्लुष्यति 'प्रुष् प्लुषश् स्नेहसेचनपुरणेषु' इत्यस्य तु प्रुष्णाति प्लुष्णाति । **'घृषू** संघर्षे' घर्षति अघर्षीत् जघर्ष घर्षिता 'नन्द्यादिभ्य०' (५।१।५२) इत्यने संघर्षणः उणादौ निघृषीति किति वे (५११) निघृष्वोऽनुकूलः । **'हृषू** अलीके' हर्षति अहर्षीत् जहर्ष हर्षिता ऊदित्त्वात् हृष्ट्वा हर्षित्वा वेट्त्वात् क्तयोर्नेट् हृष्टः हृष्टवान् शील्यादित्वादत्र सत्यर्थे क्तः 'हृषेः केशलोमविस्मयप्रतिघाते' (४।४।७६) इति वा नेटि हृष्टाः हृषिताः केशाः हृष्टं हृषितं केशैः एवं हृष्टानि हृषितानि लोमानि हृष्टं हृषितं लोमभिः हृष्टः हृषितः चैत्रः विस्मित इत्यर्थः । हृष्टा हृषिता दन्ताः प्रतिहता इत्यर्थः । उणादौ हृषिवृतीत्युले (४८५) हर्षुलः कामी हृषिपुषीति णाविन्नौ (७९७) हर्षयित्नुः स्वजनः 'तुषं हृषंच् तुष्टौ इत्यस्य तु हृष्यति । **'पुष** पुष्टौ' पोषति अपोषीत् पुपोष पोषिता 'स्वस्नेहार्थात्०' (५।४।६५) इति णमि पोषम् गोपोषं रैपोषं पुषितः उणादौ सुपुषिभ्यां किदिति करे (४३६) पुष्कम् वलिपुषे कलक् (४९६) पुष्कलः हृषीपुषीति णाविन्नौ (७९७) पोषयित्नुः मेघः 'पुषंच् पुष्टौ' पुष्यति 'पुषश् पुष्टौ' पुष्णाति 'पुषण् धारणे' पोषयति । **'भूष तसु** अलङ्कारे' भूषति अभूषीत् बुभूष भूषिता क्ते भूषितः क्ते सेट्त्वात् 'क्तेट०' (५।३।१०६) इत्यः भूषा अनटि भूषणम् । इति षान्ता एकचत्वारिंशत् कृषवर्जाः सेटश्च ॥ ४१ ॥ तसु उदित्त्वान्ने तंसति अतंसीत् ततंस तंसिता व्यञ्जनाद् घञि उत्तंसः अवतंसः 'भूष तसुण् अलङ्कारे' इत्यस्य तु भूषयति तंसयति । **'तुस ह्रस ह्लस रस** शब्दे' तोसति अतोसीत् तुतोस तोसिता उणादौ मृदिकंदीत्यले (४६५) तोसलो राजा देशो वा । ह्रस ह्रसति अह्रासीत् जह्रास ह्रसिता क्ते ह्रसितः उणादौ लटीखटीति वे (५०५) ह्रस्वः । ह्लस ह्लसति अह्लासीत् जह्लास जह्लसतुः ह्लसिता क्ते ह्लसितः । रस रसति अरासीत् ररास रेसतुः रसिता क्ते रसितं उणादौ रसेर्वेति णिति ने (२६०) रास्ना ओषधिः रस्ना जिह्वा 'रसण् आस्वादनस्नेहनयोः' अदन्तः रसयति कर्मण्यलि रसः य्वसिरसित्युणादावने (२६९) रसनं जिह्वा । **'लस** श्लेषणक्रीडनयोः' लसति अलासीत् ललास लेसतुः लेसिता क्ते लसितं अचि लसः कर्मसु श्लिष्टः समाहित इति यावत् न लसोऽलसः 'वेर्विच०' (५।२।५९) इति घिनणि विलसनशीलो विलासी घ्यणि लास्यम् घञि विलासः । **'घस्लृं** अदने' घसति लृदित्वादङि अघसत् जघास जक्षतुः जक्षुः अत्र 'गमहन०' (४।२।४४) इत्युपान्त्यलोपे 'अघोष०' (१।३।५०) इति प्रथमत्वे 'घस्सः' (२।३।३६) इति षत्वम् अनुस्वारेत्वान्नेट् घस्ता 'सृघस्यदो मरक्' (५।२।७३) घस्मरः घञि घासः उणादौ मीवृ-

धीति रे( ३९७ )घस्रः दिनम् मरग्विषय एव घसिरित्येके । हस् धातुं कण्ठतो निर्दिशति । 'हसे हसने' हसति । एदित्त्वाद्वृद्ध्यभावे इति–'व्यञ्जनादेर्वोपान्त्यस्यातः' ( ४।३।४७ ) इति वृद्धिविकल्पे प्राप्ते 'नश्विजागृशसक्षणह्म्येदितः' ( ४।३।४९ ) इति सूत्रप्रामाण्याद्वृद्धिप्रतिषेध इति भावः । क्रियाव्यतिहारे हसो वर्जनान्नात्मनेपदं व्यतिहसन्ति 'नवा क्वणे'ति ( ५।३।४८ ) वाऽलि हसः हासः उणादौ दम्यमीति ते ( २०० ) हस्तः भीवृधीति रे ( ३८७ ) हस्रः दिनं सहस्रं दशशतानि । **'पिसृ पेसृ वेसृ** गतौ' पेसति ऋदित्त्वाद्वाङि अपेसीत् अपिसत् पिपेस पिपिसतुः 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के पिसः 'स्थेशभास०' ( ५।२।८१ ) इति वरे पेसनशीलः पेस्वरः 'पिसण् हिंसायामित्यस्य तु पेसयति' पेसृ पेसति अपेसीत् २ पिपेस पेसिता । वेसृ वेसयति अवेसत् २ वेसिता क्ते वेसितम् उणादौ जठर-कर्करेति ( ४०३.४३९ ) निपातनादरे वेसरः ।' **शसू** हिंसायाम्' तालव्यादिः शसति 'न श्विजागृ०' ( ४।३।४९ ) इति वृद्धिप्रतिषेधात् अशसीत् २ शशास 'अनादेशादे०' ( ४।१।२४ ) रित्येत्वस्य 'न शसददि०' ( ४।१।३० ) इति प्रतिषेधात् शशसतुः शशसुः ऊदित्त्वात् शस्त्वा शसित्वा 'धृषशस०' ( ४।४।६६ ) इति प्रगल्भ एव नेट् विशस्तः प्रगल्भः अन्यत्रेटि विशसिता । नीदाविति त्रटि शस्त्रम् उणादौ शासिशंसीति तृः ( ८५७ ) विशस्ता घातकः । **'शंसू** स्तुतौ च' तालव्यादिः चकारात् हिंसायाम् शंसति अशंसीत् शशंस शशंसतुः शशंसुः शंसिता ऊदित्त्वात् शस्त्वा शंसित्वा । क्त्वि वेट्त्वात् क्तयोर्नेट् शस्तः शस्तवान् क्षुधृषीति ( ५।१।४२ ) वा क्यपि प्रशस्यम् पक्षे घ्यणि प्रशंस्यम् अणि नृशंसः यो मृतात् शंसति निर्गतशंसो वा नृशंसः निरनुकम्प इत्यर्थः । पृषोदरान्निरो नृभावः अनेकार्थत्वाद्द्रोहार्थत्वे नॄन् शंसतीति नृशंसः । ब्राह्मणादाहृत्य शंसतीति ब्राह्मणाच्छंसी निपातनात् ङसेरलुप् 'शंसिप्रत्ययात्' ( ५।३।१०५ ) इत्यः प्रशंसा । उणादौ चिमिदीति किति त्रे ( ४५४ ) शस्त्रम् स्तोत्रं आयुधं च । शासिशंसी ति तृः ( ८५७ ) शंस्ता पशुः विशसिता । **'जर्त्स** परिभाषणे' हिंसा-तर्जनेष्वित्येके, जर्त्सति जर्त्सन्ती स्त्री । इति सान्तास्त्रयोदश घस्लं वर्जाः सेटश्च ॥ १३ ॥

**'दहं भस्मीकरणे' । दहति । ४ । भ्वादेर्दादेर्घः । इति हस्य घत्वे । गडदबादेरिति दस्य धत्वे अघोषे प्रथमोऽशिट इति घस्य कत्वे अधाक्षीत् धुड्ह्रस्वादिति सिज्लुपि ।**

## अधश्चतुर्थात्तथोर्धः ॥ १०७ ॥ [ सि० २।१।७९ ]

**चतुर्थात्परयोर्धारूपवर्जाद्धातोर्विहितयोस्तथोर्धः स्यात् । अदाग्धाम् अधाक्षुः ५ । ददाह देहतुः देहुः ६ । दह्यात् ७ । दग्धा ८ । धक्ष्यति ९ । अधक्ष्यत् १० । 'मिहं सेचने' । मेहति ४ । हशिट इति सकि अमिक्षत् ५ । मिमेह मिमिहतुः ६ । मिह्यात् ॥ १०७ ॥**

दहमिहौ पाठतः प्रकटयति 'दहं भस्मीकरणे' दहति सर्वं स्पष्टम् । घ्यणि दाह्यं 'व्यञ्जनाद् घञ्' ( ५।३।१३२ ) निदह्यतेऽस्मिन्निति निदाघः, भावे घञि दाघः, कर्मणि अवदाघः । पक्षे न्यङ्क्वेति ( ४।१।११२ ) घत्वम् अन्यत्र अवदाहः 'वेर्देहः' ( ५।२।६४ ) इति घिनणि विदहनशीलो विदाही । परेरिति ( ५।४।८ ) परिदाही । उणादौ यवसिरसीलने ( २६९ ) दहनः । 'मिह सेचने' मेहति । सर्वं स्पष्टम् ॥ १०७ ॥

श्वस्तन्यां सूत्रम्—

## ढस्तड्ढे ॥ १०८ ॥ [ सि० १।३।४२ ]

**तन्निमित्ते ढे परे ढस्य लुक् स्यात् । दीर्घश्चादिदुतः । मेढा ८ । मेक्ष्यति ९ । अमेक्ष्यत् १० ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'अर्ह मह' पूजायाम्** । अर्हति ४ । आर्हीत् ५ । आनर्ह ६ । अर्ह्यात् ७ । अर्हिता ८ । अर्हिष्यति ९ । आर्हिष्यत् १० ॥ महति ४ । अमहीत् ५ । ममाह मेहतुः ६ । मह्यात् ७ । महिता ८ । महिष्यति ९ । अमहिष्यत् १० । अक्षौ व्याप्तौ च ॥ १०८ ॥

**'ढस्त०'** तद्धे इति किम्? मधुलिड्ढौकते । नायं लुप्यमानढकारनिमित्तो ढः । एवं च कुड्ढे लुलुविड्ढे इत्यादावपि 'अदीर्घाद्विराम०' (१।३।३२) इति द्वित्वे सति ढकारयोर्निमित्तनिमित्ति-भावो नास्तीति लुग् न भवति । अदिदुत इति किम्? 'हिसु तृहप् हिंसायां' 'वृह वृद्धौ' क्ते प्रत्यये आवृढम्, अत्र ऋतो दीर्घो न स्यात् । अन्विव्येव–लेढा मेढा अत्र गुणे पश्चात् ढलोपः, अन्यथा हि पूर्वमेव ढलोपे दीर्घे च लीढा मीढेत्यनिष्टं रूपं स्यात् । 'नाम्युपान्त्य०' (५।१।५४) इति के मिहः । लिहाद्यचि 'व्यञ्जनाद्०' इति घञि वा न्यङ्क्वादेति घत्वे मेघः 'ऋवर्णख्ये'ति (५।१।१७) व्यणि मेह्यः अनटि मेहनम् । 'दाश्वत्साह्वन्मीढ्वत्' (४।१।१५) इति निपातनात् क्वसौ मीढ्वान् मीढ्वांसौ । उणादौ शुषीति कितीरे मिहिरः । **'चह कल्कने'** कल्कं शाठ्यं चहति 'न श्विजागृ०' (४।३।४९) इति वृद्धिप्रतिषेधादचहीत् चचाह चेहतुः चेहुः । चाचह्यते । यङ्लुपि चाचहीति चाचाढि । अचि चहः शठ इत्यर्थः 'चहण् कल्कने' अदन्तः चहयति चहणः शाठ्ये इति ञिणम्परे णौ वा दीर्घे अचाहि अचहि चाहं चाहं चहं २ । **'रह त्यागे'** रहति वृद्धिनिषेधे अरहीत् रराह रेहतुः । उणादौ कृवापाजीत्युणि (१) राहुः असित्यसि (९५२) रहः 'रहण् त्यागे' इत्यस्य तु रहयति अलि विरहः । **'रहु गतौ'** उदित्त्वान्ने रंहति अरंहीत् ररंह रंहिता उणादौ असित्यसि (९५२) रंहः 'रहुण् गतौ' इत्यस्य तु रंहयति । **'दृह दृहु बृह वृद्धौ'** दर्हति अदर्हीत् ददर्ह दर्हिता । दृहु उदित्वान्ने दृंहति 'बलिस्थूल०' (४।४।६९) इति निपातनात् क्ते दृहेर्दृंहेश्च वा दृढः दहितुम् । बृह बर्हति अबर्हीत् बबर्ह बर्हिता 'क्षुब्धविरिब्ध०' (४।४।७०) इति निपातनात् क्ते नेट् परिबृढः प्रभुः उणादौ द्रुहिबहीति (८८४) कतः बृहन् बृहन्तौ बृहती । **'बृहू बृहु शब्दे च'** चकाराद्वृद्धौ बर्हति ऋदित्वात् 'ऋदिच्छ्वि०' (३।४।६५) इति वाङि अबृहत् पक्षे अबर्हीत् शतरि बर्हन् बर्हन्तौ बर्हन्तः णके बर्हकः । बृहु उदित्त्वान्ने बृंहति अबृंहीत् बबृंह बंहिता क्ये बृह्यते । णके बृहकः बृंहन् बृंहन्तौ बृंहन्तः क्ते बृंहितम् 'क्षुब्धविरिब्धे०' ति निपातनात् परिबृढः उणादौ बृंहेर्नोऽच्चेति (९१३) मनि ब्रह्म बंहिबृंहेर्नलुक्चे (९९०) तीसि बर्हिः । **'उहृ तुहृ दुहृ अर्दने'** ऋदित्त्वयोऽपि ओहति 'उपसर्गस्य०' (१।२।१९) इत्यवर्णलोपे अपोहति ऋदित्वादङि औहत् पक्षे औहीत् । तुहृ तोहति अतुहत् अतोहीत् उणादौ बृहितुहीती (२८३) ने तुहिनम् दुहृ दोहति अदुहत् अदोहीत् । अर्ह मह धातू कण्ठतो निर्दिशति । अर्हति आर्हीत् 'अनात०' (४।१।६९) इत्यात्वे ने च आनर्ह आनर्हतुः आनर्हुः इडागमे अर्हिता 'अर्होऽच्' (५।१।९१) पूजार्हः । पूजार्हासुगद्विशेति अतृशि त्रैलोक्याभ्यर्चनं प्रकर्षमर्हति अर्हन् । व्यञ्जनात् घञि 'न्यङ्क्वाद०' (४।१।११२) इति घे च अर्हन्ति तेनेति अर्घो मूल्यम् पूजाद्रव्यं च । अर्घिर्धात्वन्तरं च सौत्रम् । अर्घः, कलां नार्घन्ति षोडशीम् 'शकधृष०' (५।४।९०) इति तुमि अर्हति भोक्तुम् 'अर्हण् पूजायाम्' अर्हयति अयमेव अर्थविशेषे पूजायामेव चुरादिरिति पूजाया अन्यत्र योग्यत्वादौ न णिच् अर्हति, इह च पूजायां पाठात् पूजायामपि णिजभावः । मह महति इत्यादि स्पष्टम्, अमहीदिति ह्यन्तत्वान्नान्त्यवृद्धिः । अचि महः । गौरादित्वात् ङ्यां मही । उणादौ द्रुहिवृहीति (८८४) कतरि महान् महान्तौ महान्तः असित्यसि (९५२) महः महसी महेरुश्चास्य वेति (८९) खे अन्तलुकि च मुखम् मखः



Jain Education International For Personal & Private Use Only www.jainelibrary.org

महेर्णिङ्वेती ( २८५ ) ने माहिनं महिनं च राज्यम् महिनो माहात्म्यवान् महाविभ्यां टिदिती (५४७) षे महिषः महिषी 'महण् पूजायामित्यस्य तु महयति । इति हान्ताः पञ्चदश मिहं दहं वर्जाः सेटश्च ॥ १५ ॥ **उक्ष** सेचने उक्षति औक्षीत् 'गुरुनाम्यादे०' ( ३।४।४८ ) इति परोक्षाया आमादेशे उक्षाञ्चकार उक्षिता 'व्यतिहारेऽनीहादिभ्यो ञ' ( ५।३।११६ ) इति ञे नित्यं ञ्जिनोणि (७।३।५८) त्यणि व्यात्युक्षी उणादौ उक्षितक्षी ( ९०० ) त्यनि उक्षा तक्षा । '**रक्ष** पालने' चौरादृक्षति अरक्षीत् ररक्ष रक्षिता 'ग्रहादि०' ( ५।१।५३ ) ति णिनि रक्षी क्ते रक्षितः सेट्त्वात् 'क्तेट०' ( ५।३।१०६ ) इत्यः रक्षा उणादौ असित्यसि रक्षः भीमादित्वादपादाने साधुः प्रज्ञादित्वात्स्वार्थेऽणि राक्षसः । '**मक्ष मुक्ष सङ्घाते**' मक्षति अमक्षीन् ममक्ष मक्षिता णके मक्षिकां रोषेऽयमित्येके घञि मक्षो मन्युः । मुक्ष मुक्षति अमुक्षीत् मुमुक्ष मुक्षिता ।

अक्षौप्रभृतीन् कण्ठतो निर्दिशति '**अक्षौ** व्याप्तौ च' चकारात्सङ्घाते ॥ १०८ ॥ अत्र सूत्रम्—

## वाऽक्षः ॥ १०९ ॥ [ सि० ३।४।७६ ]

अस्मात्कर्तरि शिति श्नुर्वा स्यात् ॥ १०९ ॥

**'वा०' स्पष्टम्** ॥ १०९ ॥ अत्रोपयोगिसूत्रम्—

## उश्नोः ॥ ११० ॥ [ सि० ४।३।२ ]

धातो परयोरकिति गुणः स्यात् । अक्ष्णोति ॥ ११० ॥

**'उ०'** व्यक्तम् ॥ ११० ॥ अविति प्रत्यये सूत्रम्—

## शिदवित् ॥ १११ ॥ [ सि० ४।३।२० ]

धातोः परोऽवित् शित्प्रत्ययो ङिद्वत्स्यात् । अक्ष्णुतः । भ्रूश्नोरित्युवादेशे । अक्ष्णुवन्ति १ । अक्ष्णुयात् २ । अक्ष्णोतु अक्ष्णुतात् । अक्ष्णुहि ३ । आक्ष्णोत् ४ । पक्षे अक्षति ४ ॥ १११ ॥

**'शिद०'** ङित्त्वाद्गुणाभावादिकं भवति यथा इतः सुतः जागृतः वित्तः अधीते संविते दीव्यति सुतुतः तुदति क्रीणाति अधीयन् अधीयानः विदन् संविदानः, एषु गुणाभावः । जिनाति विध्यति गृह्णाति वृश्चति एषु य्वृत् । हतः अत्र नकारलुक् । घ्नन्ति अत्रोपान्त्यलुक् । शंशान्तः संतान्तः अत्र अहन्पञ्चमस्ये (४।१।१०७) ति दीर्घः । अविदिति किम् ? एति जुहोति जयति । शिदिति किम् ? चेषीष्ट चेत्ता । कथं च्यवन्ते प्लवन्ते इत्यादौ शवो लोपे अन्ते इत्यस्य ङित्वाद्गुण **उच्यते**, अन्तरङ्गत्वाद्गुणे कृते शवो लोपः स्थानिवद्भावाद्वा शवो ङित्वाद्गुण' इति । पक्षे अक्षतीत्यादि स्पष्टम् ॥ १११ ॥

## धूगौदितः ॥ ११२ ॥ [ सि० ४।४।३८ ]

धूग औदिद्भ्यश्च परस्य स्तायशित आदिरिड्वास्यात् । इटि आक्षीत् । पक्षेऽपि आक्षीत् । **तक्षौ त्वक्षौ तनूकरणे । तक्षः स्वार्थे वा** (३।४।७७) श्नुः शिति । तक्ष्णोति तक्ष्णुतः ४ इति । अतक्षीत् । पक्षे व्यञ्जनानामनिटीति वृद्धौ संयोगस्यादाविति कलुकि, षस्य कत्वे अताक्षीत् अतक्षिष्टाम्–अताष्टाम् अतक्षिषुः–अताक्षुः ५ । ततक्ष ६ । तक्ष्यात् ७ । तक्षिता–तष्टा ८ । तक्षिष्यति–तक्ष्यति ९ । अतक्षिष्यत् १० ॥ ११२ ॥



इति भ्वादयः परस्मैपदिनः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'धूगौ०'** पृथक् योगात् 'सिजाशिषावात्मने' ( ४।३।३५ ) इति निवृत्तम् । धूग् धोता धविता । औदित् 'रधौच् रद्धा रधिता, तृपौच् त्रप्ता तर्प्ता तर्पिता, ( दृपौच् ) द्रप्ता दर्प्ता दर्पिता, नशौच् नंष्टा नशिता, मुहौच् मोग्धा मोढा मोहिता, द्रुहौच् द्रोग्धा द्रोढा द्रोहिता, ष्णुहौच् स्नोग्धा स्नोढा स्नोहिता, ष्णिहौच् स्नेग्धा स्नेढा स्नेहिता, गुपौच् गोप्ता गोपिता जुगुप्सति जुगोपिषति गुहौ निगोढा निगूहिता, गाहौ विगाढा विगाहिता, औस्वृ स्वर्त्ता स्वरिता सुस्वूर्षति सिस्वरिषति, पूङौ अदादौ दिवादौ च सोता सविता । 'स्ताद्यशित०' ( ४।४।३२ )इत्येव ररन्धिव किल ररन्धिम किल । अन्यस्त्वत्रापि विकल्पमिच्छति रेध्व ररन्धिव रेध्म ररन्धिम । स्वरतेस्तु स्ये परत्वात् 'हनृतः स्यस्य' ( ४।४।४९ ) इति नित्यमिट् स्वरिष्यति । धूग् औस्वृ षूङौ इति त्रयाणां 'ऋवर्णश्र्यूर्णुगः कितः ( ४।४।५७ ) इति 'उवर्णात्' ( ४।४।५८ ) इति च परत्वात्किति नित्यमिट् प्रतिषेधः धूत्वा स्वृत्वा सूत्वा । औदित इत्यनुबन्धनिर्देशाद्यङ्लुपि नित्यमिट सरीस्वरिता जोगूहिता । धूगिति गिन्नि- र्देशात्तौदादिकस्य नित्यमिट् धुविता । अत्रोणादेरित्येव धूसरः । अशौ अक्षरं । एके तु चायिस्फायि- प्यायीनामपि । विकल्पमिच्छन्ति निचाता निचायिता निचिचासति निचिचायिषति, आस्फाता आस्फायिता आपिस्फासते आपिस्फायिषते, आप्याता आप्यायिता आपिप्यासते आपिप्यायिषते । अपरः पठति नातिक्रंस्यति नातिक्रमिष्यति । अन्यस्त्वद्यनतन्यामास्कन्दिषम् आस्कांत्समितीच्छति । बहुलमे(के)षां ( सर्वेषां धातूनामित्यर्थः ) विकल्पः पक्ता पचिता आस्कन्तव्यं आस्कन्दितव्यं पट्टा पटिता । तदेवं व्यवस्थितविभाषाविज्ञानादागमशासनमनित्यमिति न्यायाच्च विचित्रमतयो वैयाकरणाः ।

आक्षीत् इति 'स्वरादेस्तासु' ( ४।४।३१ ) इति वृद्धौ रूपम् । पक्षेऽपीति इडभावेऽपीत्यर्थः, आष्टां आक्षिष्टाम् आक्षुः आक्षिषुः । 'अनात०' ( ४।१।६९ ) इत्यात्वे ने च आनक्ष आनक्षतुः आनक्षुः, अनेन वेटि अष्टा अक्षिता वेट्त्वात्क्तयोर्नेड् अष्टः अष्टवान्, उणदौ जठरक्रकरे ( ४०३-३९ ) त्यरे अक्षरम् पदिपठीति ( ६०७-७०७ ) इः अक्षि उक्षितक्षीत्य( ९०० )नि अक्षा इष्टिनिपातः । **तक्षौ त्वक्षौ इति** तनूकरणं कार्श्यम् । अत्र सूत्रं **'तक्षः स्वार्थे'** (३।४।७७) स्वार्थस्तनूकरणं तस्मिन्वर्त्तमानात्तक्षौ इत्येतस्मात्कर्त्तरि शिति श्नुर्वा स्यात् । तक्ष्णोति तक्षति काष्टम् । स्वार्थ इति किम् ? संतक्षति शिष्यं निर्भर्त्सयतीत्यर्थः । इदमेव ज्ञापकं धातवोऽनेकार्था इति । तक्ष्णुतः इत्यादि स्पष्टम् । वेट्त्वात् क्तयोर्नेट् तष्टः तष्टवान्, णके तक्षकः, उणादौ उक्षितक्षीत्यनि तक्षा 'स्त्रियां नृत०' ( २।४।१ ) इति ङ्यां तक्ष्णी । त्वक्षति ४ अत्वक्षीत् अत्वाक्षीत् ५ तत्वक्ष ६ त्वष्टा त्वक्षिता ७ वेट्त्वान्नेट् त्वष्टः त्वष्टवान् । **'णिक्ष चुम्बने'** चुम्बनं वक्त्रसंयोगः 'पाठे०' ( २।३।९७ ) इति णस्य नत्वे निक्षति 'अदुरुपसर्ग०' ( २।३।७७ ) इति णत्वे प्रणिक्षति परिणिक्षति अनैक्षीत् निनिक्ष निक्षिता 'निंसनिक्षनिन्दः कृति वा' ( २।३।८४ ) इति णत्वे प्रनिक्षणं प्रणिक्षणं प्रनिक्षिता प्रणिक्षिता । कृदभावेऽपि वा णत्वमित्येके प्रनिक्षति प्रणिक्षति । एवं निंसनिन्दोरपि । **'तृक्ष स्तृक्ष णक्ष गतौ'** तृक्षति अतृक्षीत् ततृक्ष अचि तृक्षः तृक्षस्यापत्यं वृद्धं तार्क्ष्यः । स्तृक्ष स्तृक्षति अस्तृक्षीत् तस्तृक्ष स्तृक्षिता । षोपदेशोऽयमिति **चन्द्रः** । णक्ष 'पाठे०' इति णस्य नत्वे नक्षति 'अदुरुपसर्गे०' ति णत्वे प्रणक्षति अचि नक्षः उणादौ वृन्नक्षी ( ४५६ ) त्रे नक्षत्रम् । नखादिसूत्रे त्वस्य निपातनं नाम्नां व्युत्पत्तिरव्यवस्थितेति ज्ञापनार्थम् । **'वक्ष** रोषे' सङ्घाते इत्येके, वक्षति अवाक्षीत् ववक्ष वक्षिता उणादौ असित्यसि सपत्नीरोषविषयाद्वक्षतीति वक्षः उरः । **'त्वक्ष** त्वचने' त्वचनं त्वग्ग्रहणं संवरणं वा त्वक्षति अत्वाक्षीत् तत्वक्ष त्वक्षिता उणादौ शासि-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शसीत्यादि ( ८५७-६५ ) ग्रहणात्तुः त्वष्टा त्वष्टारौ **'सूर्क्ष अनादरे'** सूर्क्षति असूर्क्षीत् सुसूर्क्ष सूर्क्षिता मनि सुसूर्क्ष्मा । यान्तोऽयमित्यन्ये सूर्क्ष्यति असूर्क्ष्यीत् सुसूर्क्ष्य मनि 'य्वोः०' ( ४।४।१२१ ) इति यलोपे सूर्क्ष्मा । **'काक्षु वाक्षु माक्षु** काङ्क्षायाम्' उदित्वान्ने काङ्क्षति अकाङ्क्षीत् चकाङ्क्ष काङ्क्षिता । वाङ्क्षति अवाङ्क्षीत् ववाङ्क्ष । माङ्क्षति अमाङ्क्षीत् ममाङ्क्ष । **'द्राक्षु ध्राक्षु ध्वाक्षु** घोरवासिते च' चकारात् काङ्क्षायां, त्रयोऽप्युदितः द्राङ्क्षति अद्राङ्क्षीत् दद्राङ्क्ष । ध्राङ्क्षति अध्राङ्क्षीत् दध्राङ्क्ष अचि ध्राङ्क्षः । ध्वाङ्क्षति अध्वाङ्क्षीत् दध्वाङ्क्ष अचि ध्वाङ्क्षः । इति क्षान्ता विंशतिः सेटश्च ॥ २० ॥
क्षान्तानां षान्तेषु पाठो युक्तो वैचित्र्यार्थत्विह कृतः ।

'इत्युक्ता भ्वादिधातूनां परस्मैपदिनामिह । षडशीत्यधिका पञ्चशती सर्वाग्रसङ्ख्यया' ॥ १ ॥
'आत्मनेपदिनोऽप्येवं स्वरानुक्रमतस्तथा । व्यञ्जनानुक्रमतश्च निर्दिश्यन्ते यथाश्रुतम्' ॥ २ ॥

'एधादयः प्रसिद्धा ये ते वक्ष्यन्तेऽत्र कण्ठतः ।
शेषानलिखाम टीकायां प्रसङ्गात्साधनान्वितान्' ॥ ३ ॥ ॥ ११२ ॥

## अथ भ्वादयः आत्मनेपदिनः ।

अकारान्ता अप्रसिद्धाः **'गाङ्** गतौ' ङित्त्वादात्मनेपदम् **'अनतोऽन्तोऽदात्मने'** ( ४।२।११४ ) अनकारात्परस्यात्मनेपदसंबन्धिनोऽन्तरूपस्यावयवस्यात् इत्ययमादेशो भवति, ततश्च एकद्विबहुत्वेषु गाते गाते गाते, गासे गाथे गाध्वे 'इडेत्पुसि०' ( ४।३।९४ ) इत्यालुकि गे गावहे गामहे ॥ १ ॥ गेत गेयाताम् गेरन्, गेथाः गेयाथाम् गेध्वम्, गेय गेवहि गेमहि ॥ २ ॥ पञ्चम्यामायत्रिके गाताम् ३ गास्व गाथां गाध्वम्, गै गावहै गामहै ॥ ३ ॥ अगात अगातां अगात, अगाथाः अगाथाम् अगाध्वम्, अगे अगावहि अगामहि ॥ ४ ॥ अगास्त अगासातां अगासत, अगास्थाः अगासाथाम् अगाध्वम्, अगासि अगास्वहि अगास्महि ॥ ५ ॥ जगे जगाते जगिरे, जगिषे जगाथे जगिध्वे, जगे जगिवहे जगिमहे । ६ । गासीष्ट गासीयास्ताम् गासीध्वम् ७ गाता गातारौ ८ गास्यते ९ अगास्यत १० ॥ इत्याकारान्तः । **'ष्मिङ्** ईषद्धसने' 'षः स०' ( २।३।९८ ) इति षस्य सत्वे गुणेऽयादेशे स्मयते विस्मयते १ स्मयेत २ स्मयताम् ३ अस्मयत ४ अस्मेष्ट अस्मेषाताम् अस्मेषत ५ षोपदेशा 'नाम्यन्तस्था०' ( २।३।१५ ) इति षत्वे सिष्मिये सिष्मियाते सिष्मियिरे ६ स्मेषीष्ट ७ स्मेता ८ स्मेष्यते ९ अस्मेष्यत १० । सनि 'ऋस्मिपूङ०' ( ४।४।४८ ) इतीटि सिस्मयिषते 'णिस्तोरेव०' ( २।३।३७ ) इति नियमान्न षत्वम् यङि सेष्मीयते यङ्लुपि सेष्मेति सेष्मयीति णौ **स्मिङः प्रयोक्तुः स्वार्थे** ( ३।३।९१ ) प्रयोक्तुः सकाशाद्यः स्वार्थः स्मयस्तत्र वर्त्तमानाण्णिगन्तात् स्मयतेः कर्त्तर्यात्मनेपदं स्यादस्य चान्तस्याकारोऽकर्त्तर्यपि । अकर्त्तर्यपीत्येव विस्मापनम् । ङिन्निर्देशाद्यङ्लुपि न भवति सेष्मापयति ॥ इत्यात्वे आत्मनेपदे च मुण्डो विस्मापयते, करणेन तु विस्मयभावे रूपेणैनं विस्मापयति 'स्म्यजस०' ( ५।२।७९ ) इति रे स्मेरः । इति ह्रस्वेकारान्तः १ । 'डीङ् विहायसां गतौ' डयते उड्डयते ४ अडयिष्ट अडयिषाताम् अडयिषत ५ डिड्ये डिड्याते डिड्यिरे ६ डयिषीष्ट ७ डयिता ८ डयिष्यते ९ अडयिष्यत १० डेडीयते डिडयिषते क्तयोरिति 'न डीङ्शीङ्०' ( ४।३।२७ ) इति किन्त्वप्रतिषेधात् डयितः डयितवान् 'डीङ्च्' गतौ डीयते क्तयोर्डीयश्चैदितः क्तयोरिति नेट् 'सूयत्या०' (४।२।७०) दीति तस्य नत्वं डीनः डीनवान् । इति दीर्घेकारान्तः १ । **'उङ् कुङ् गुङ् घुङ् ङुङ् शब्दे'** पञ्चाप्यनुस्वारेतः अवते

४ औष्ट औषाताम् औषत ५ वार्णात्प्राकृतं बलीय इति न्यायादन्तरङ्गादीर्घात्प्रागुवादेशे ऊवे ऊवाते ऊविरे ६ ओषीष्ट ७ ओता ८ ओष्यते ९ औष्यत १० सनो 'नामिनोऽनिट्' (४।३।३३) इति कित्त्वाद्गुणाभावे 'स्वरहन०' (४।१।१०४) इति धातोर्दीर्घे सनो द्वित्वे ऊषिषते। क्तयोः उतः उतवान् णिगि आवयति 'युवर्ण०' (५।३।२८) इत्यलि अवः उणादौ स्वरेभ्य इः (६०६) अविः। कुङ् कवते ४ अकोष्ट अकोषातां ५ चुकुवे ६ कोषीष्ट ७ कोता ८ कोष्यते ९ अकोष्यत १० 'न कवतेर्यङः' ५ (४।१।४७) इति कस्य चत्वाभावे कोकूयते खरः तिनिर्देशाद्यङ्लुपि चत्वप्रतिषेधाभावे चोकोति। उणादौ कुपूसमिणूभ्यश्चट् दीर्घश्च (११२) कूचः कूची चित्रोपकरणम् युसुकिति (२९७) पे ऊत्वे च कूपः ऋच्छिचटी (३९७) त्वरे कबरः वर्णः, कबरी वेणिः, नीमीति (४४३) वरटि दीर्घे च कूवरः स्वरेभ्यः इति (६०७) इः कविः 'कुंक् शब्दे' कौति चोकूयते 'कुङत् शब्दे' कुवते चोकूयते। 'गुङ्' अव्यक्ते शब्दे इत्येके गवते अगविष्ट ५ जुगुवे ६ गोषीष्ट ७ गोता ८ गोष्यते ९ अगोष्यत १० उणादौ शुभिगृहीति (३५) कित्याके गुवाकम् मवाकेति (३७) निपातनात् आके गूवाकं हुयामेति (४५१) त्रे गोत्रम् मृदीकन्दी (४६५) त्वले गवलम्। दीर्घान्तमेनं परस्मैपदिनं पुरीषोत्सर्गे केचिदधीयते गवति 'गुंत् पुरीषोत्सर्गे' इत्यस्य तु गुवति। घुङ् घवते ४ अघोष्ट ५ जघुवे ६ घोषीष्ट ७ घोता ८ उणादौ घुयुहीति (२४) के दीर्घे च घूकः। ङुङ् शब्दे ङवते ४ अङोष्ट ५ जुङुवे ६ ङोषीष्ट ७ ङोता ८ खुङ् चेत्येके। 'च्युङ् ज्युङ् जुङ् प्रुङ् प्लुङ् गतौ' पञ्चाप्यनिटः च्यवते ४ नित्यत्वात्सिचो लोपात्प्रागेव गुणे अच्योष्ट ५ चुच्युवे ६ च्योषीष्ट ७ च्योता ८ च्योष्यते ९ अच्योष्यत १० णिगि च्यावयति णौ सनि 'श्रुरु०' (४।१।६१) इति वा ओरित्त्वे चिच्यावयिषति चुच्यावयिषति णौ ङे सन्वद्भावादचिच्यवत् अचुच्यवत् 'नन्द्यादिभ्य०' (५।१।५२) इत्यने च्यवनः। ज्युङ् ज्यवते १० उणादौ मवाकश्यामाक० (३७) इत्याके निपातनात् ज्योन्ताकं स्वेदगृहम्। जुङ् जवते १० 'भूषाक्रोधार्थ०' (५।२।४२) इत्यने जवनशीलो जवनः 'प्रात्सूजोरिन्' (५।२।७१) प्रजवनशीलः प्रजवी 'दिद्युद्दद्०' (५।२।८३) दिति निपातनात् क्विपि जूः पिशाचः, जुवौ जुवः 'युवर्णे'त्यलि जवः 'सातिहेति०' (५।३।९४) इति निपातनात् क्तौ जूतिः। सौत्रोऽप्ययं जवति। प्रुङ् प्रवते १० णौ फलवत्कर्त्तर्यात्मनेपदाभावे 'चल्याहार०' (३।३।१०८) इति परस्मैपदे प्रावयति णौ सनि 'श्रुरु०' इति वा ओरित्त्वे पिप्रावयिषति पुप्रावयिषति णौ ङे सन्वद्भावादपिप्रवत् अपुप्रवत् 'प्रस्त्रुल्व०' (५।१।६९) इत्यके प्रवकः 'युवर्ण०' (५।३।२८) इत्यलि प्रवः 'दिद्यु०' इति निपातनात् क्विपि कटप्रूः नदीतीरः उणादौ कमिप्रुगेति (२२५) थे प्रोथः अश्वघोणाग्रम्। एवं प्लुङ् प्लवते १० पिप्लावयिषति पुप्लावयिषति अपिप्लवत् अपुप्लवत् 'भव्यगेय०' (५।१।७) इति निपातनाद्वा कर्त्तरि आप्लाव्यश्चैत्रो नद्यां पक्षे भावे 'उवर्णात्' (४।४।५८) इति घ्यणि आप्लाव्यमनेन अचि प्लवः गौरादित्वात् ङ्यां प्लवी 'आङोरुप्लोः' (५।३।४९) इति वालि आप्लवः आप्लावः। 'रुङ् रेषणे च' चकाराद्गतौ रेषणं हिंसाशब्दः रवते अरोष्ट रुरुवे रोषीष्ट रोता 'आङोरुप्लो'रिति वालि आरवः आरावः 'रोरुपसर्गात्' (५।३।२२) इति घञि विरावः संरावः। उणादौ तृकृश्रिति (१८७) अणे रवणः स्वरेभ्य (६०६) इति इः रविः रुपूभ्यां किदि (८०७) ति रौ रुरुः 'रुक् शब्दे' रौति। इत्युकारान्ता एकादश ११। 'पूङ् पवने' पवनं नीरजीकरणं पवते ४ सेट्त्वात् अपविष्ट ५ पुपुवे ६ पविषीष्ट ७ पविता ८ 'ग्रहगुहश्च०' (४।४।५९) इति निषेधापवादे 'ऋस्मिपूङ०' (४।४।४८) इति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सनीटि ओर्जान्तस्थेति पूर्वस्योत इत्वे च पिपविषते । यङि पोपूयते । यङ्लुपि पोपोति पोपवीति 'पूङ्-क्लिशिभ्यो नवेति क्तक्तवतुक्त्वामादौ वेटि पवितः पवितवान् अत्र डीङिति क्त्विाभावाद्गुणः पक्षे पूत पूतवान् । पवित्वा अत्र क्त्वेति कित्त्वाभावाद्गुणः पक्षे पूत्वा 'पूदिव्यञ्चेः०' ( ४।२।७२ ) इति क्तयोर्नत्वे पूना यवाः विनष्टा इत्यर्थः 'जिविपून्यो हलि०' ( ५।१।४३ ) इति क्यपि विपूयो मुञ्जः 'पूङ्यजः शानः' ( ५।२।२३ ) पवमानः 'हलक्रोडास्ये पुवः' ( ५।२।८९ ) इति त्रटि हलस्य पोत्रं सूकरस्य पोत्रं 'पुव इत्रो दैवते' ( ५।२।८५ ) पवित्रोऽर्हन् 'ऋषिनाम्नोः करणे' ( ५।२।८६ ) पवित्रः ऋषिः पवित्रं दर्भादि निरभेः पूल्व इति घञि निष्पावः 'नन्द्यादित्वादने पवनः 'न ख्यापूग्०' ( २।३।९० ) इत्यत्र गितो वर्जनात् 'स्वरात्' ( २।३।८५ ) इति णत्वे प्रपवणं प्रपवणीयम् । उणादौ दम्यमीति ( २०० ) ते पोतः पूमुदिभ्यां ( ९३ ) गेति पूगः ग्वसिरसि ( २६९ ) त्यने पवनः शिक्यास्याढ्येति निपातनात् पुण्यं ( ३६१-४ ) पुत्रादय ( ४५५ ) इति त्रे ह्रस्वे च पुत्रः स्वरेभ्यः इति पविः हुपूद्रोञ्नीति तृः ( ८६३ ) पोता पोतारौ । 'पूश् पवने' इत्यस्य तु पुनीते पुनाति । 'मूङ् बन्धने' मवति अमविष्ट ममुवे मविषीष्ट मविता 'ग्रहगुहश्चे'ति सनि नेट् मुमूषते णौ सन्नि 'ओर्जान्तस्थ०' ( ४।१।६० ) इति पूर्वस्योत इत्त्वे मिमावयिषति । उणादौ चिविपुषी( २२ )ति किति के मूकः शीरीति ( २०१ ) किति ते मूतः पुटबन्धः जीवनस्य मूतो जीमूतः पृषोदरादिः । शुकिशीति ( ४६३ ) किति ले मूलं स्नुपूस्विति ( ५४२ ) किति षे मूषा । इत्यूकारान्तौ द्वौ । 'धृंङ् अवध्वंसने' धरते अधृत दध्रे धृषीष्ट धर्त्ता धरिष्यते अधरिष्यत । णिगि मैत्राय शतं धारयति अत्र रुचिक्लृप्यर्थधारिभ्यः प्रेयविकारोत्तमर्णेष्विति उत्तमर्णाच्चतुर्थी यङि देध्रीयते यङ्लुपि दरीधर्त्ति दरिधर्ति दर्धर्त्ति साहिसात्यतीजपवादे शे धारयः धारेर्धर्चेति खे वसुन्धरा जलन्धरः युगन्धरः 'धारीङ्०' ( ५।२।२५ ) इत्यतृशि धारयन्नाचारं अत्र 'तृन्नुदन्त०' ( २।२।९० ) इति कर्मणि न षष्ठी । क्विपि क्षेमधृत् । न्यायावायेति निपातनात् करणाधारे घापवादे घञि आधारः भिदादिनिपातनादङि धारा प्रपातः धृतिरन्या उणादौ अर्त्तिरीति (३३८) मे धर्मः ऋहस्त्यिणौ (३३८) धरणिः । धृंग् धारणे धरति धरते वा 'धृङत् स्थाने' ध्रियते चुरादेराकृतिगणत्वात् धारयति उभयपदिषु पठिष्यमाणस्याप्यस्याविध्वंसने धरतीति प्रयोगनिवृत्त्यर्थ इह पाठः । इति ह्रस्व ऋकारान्त एकः १ । 'मेङ् प्रतिदाने' प्रतिदानं प्रत्यर्पणं मयते अमास्त ममे मासीष्ट माता क्ये 'ईर्व्यञ्जने०' ( ४।३।९७ ) इतीत्वे मीयते 'मिमीमादा०' ( ४।१।२० ) इति स्वरस्येद्भावे द्वित्वाभावे च मित्सते 'आतो डोऽह्वा०' ( ५।१।७६ ) इत्यत्र मावर्जनादणि द्रोणमायः यङि मेमीयते यङ्लुपि मामाति मामेति 'दोसोमास्थ०' ( ४।४।११ ) इति इः मितः मितवान् 'निमील्यादि०' ( ५।४।४६ ) इति परकालार्थादपि वा क्त्वि अपमित्य याचते अपमाय याचते अत्र 'मेङो वा मित्' ( ४।३।८८ ) इति वा मित् पक्षे याचित्वापमयते उणादौ शिग्रुगेर्वि (८०६-११) ति मेरुः नमेरुः स्याच्छामे (३५७) ति ये माया 'मांक् माने' माति 'माङ्क् मानशब्दयोः' मिमीते । 'दैंङ् त्रैङ् पालने' दयते अदास्त 'देर्दिगिः०' ( ४।१।३२ ) इति दिग्यादेशे दिग्ये दासीष्ट 'नेर्ङ्मादा०' ( २।३।७९ ) इति नेर्णत्वे अनुस्वारेत्त्वादिडभावे च प्रणिदाता उणादौ मन्निति(९११)मनि दाम 'दाम् दाने' यच्छति 'दैव् शोधने दायति' 'दांवक् लवने' दाति 'डुदांग्क् दाने' ददाति 'दोंच् छेदने' द्यति । इत्येदन्तौ द्वावनिटौ २ । त्रैङ् त्रायते अत्रास्त तत्रे त्रासीष्ट त्राता 'ऋह्रीघ्रा०' (४।२।७६) इति क्तयोस्तस्य च वा नत्वे त्रातः त्राणः त्रातवान् त्राणवान् । 'श्यैङ् गतौ' तालव्यादिः श्यायते अश्यास्त शश्ये श्यासीष्ट श्याता 'श्यः शीर्द्रवमूर्तिस्पर्शे नश्चास्पर्शे' ( ४।१।९७ ) शीनं घृतं स्पर्शे तु क्तयोस्तस्य नत्वाभावे शीतं वर्त्तते शीतो वायुः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अन्यत्र संश्यानः शीतेन सङ्कुचित इत्यर्थः अत्र 'व्यञ्जनान्तस्थात०' (४।२।७१) इति क्तस्य नत्वम् 'प्रतेः' (४।१।९८) इति शीभावे नत्वे च प्रतिशीनः प्रतिशीनवान् प्रतिपूर्वोऽयं रोगार्थः 'वाऽभ्य-वाऽभ्याम्०' (४।१।९९) इति वा शीभावे क्तयोर्नत्वे च अभिशीनः अभिश्यानः अवशीनः अवश्यानः 'उपसर्गादात०' (५।१।५६) इत्यत्र श्यावर्जनाद् डस्याभावे 'तन्व्यधी०' (५।१।६४) इति णे प्रतिश्यायः [ अवश्यायश्च पीनसः । उणादौ मवाकश्यामाकेत्याके निपातनात् श्यामाकः हृश्यारुहीतीते (२१०) श्येतः श्याकठीति (२८२) ], ने श्येनः विलिभिलीति (३४०) मे किति श्यामः । 'प्यैङ् वृद्धौ' प्यायते अप्यास्त पप्ये प्यासीष्ट प्याता उणादौ तीवरधीवरेति (४४४) निपातनात् पीवरः ध्याप्योरिति (९०८) क्वनिपि पीवा णस्वरेति ङ्यां नो रत्वे च पीवरी । इत्यैदन्तास्त्रयः ३ । 'वकुङ् कौटिल्ये' [गतावपीत्येके] उदित्त्वान्ने वङ्कते अवङ्किष्ट ववङ्के वङ्कीष्ट वङ्किता अचि वङ्कं काष्ठं उणादौ खुरक्षुरेति (३८८-९६) निपातनाद्रे वक्रं विङ्कतङ्क्यङ्कीति रिः (३९२) वङ्क्रिः पार्श्वास्थि । एवं 'मकुङ् मण्डने' मङ्कते सनि मिमङ्किषते 'इङ्ति०' (५।२।४४) इत्यने मङ्कनः मङ्कना वस्त्रविशेषः । उणादौ तृकृश्रि (१८७) त्यणे मङ्कणः ऋषिः मङ्केर्न लुक्० (४२४) इत्युरे मुकुरः आदर्शः मुकुलं च मकुरः आदर्शः कल्कः बालपुष्पं च । 'अकुङ् लक्षणे' अङ्कते आङ्किष्ट 'अनातो नश्च०' (४।१।६९) इति पूर्वस्यात्वे ने च आनङ्के 'स्रां धुट्' (१।३।३९) इत्यत्रान्वित्य-धिकरणात् द्वित्वे कर्त्तव्ये नकार एवास्ते ततो न बदनं संयोगादिरिति नो न द्विरुच्यते अञ्चि-किषते 'व्यञ्जनाद् घञ्' (५।३।१३२) इति घञि अङ्क्यते अस्मिन्निधाय कान्तावक्त्रं शलाकये-त्यङ्कः उत्सङ्गः उणादौ वाश्यसी (४२३) त्युरे अङ्कुरः 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) इति दीर्घे अङ्कूरः । अङ्कण् लक्षणे अङ्कयति 'णिवेत्त्यास०' (५।३।१११) इत्यने अङ्कना । 'शीकृङ् सेचने' गतावप्यन्ये तालव्यादिः शीकते अशीकिष्ट शिशीके शीकिता ऋदित्त्वाण्णौ ङे 'उपान्त्यस्यासमान०' (४।२।३५) इति ह्रस्वाभावे अशिशीकत् अचि 'क्तेट०' (५।३।१०६) इत्यप्रत्यये वा शीका अनटि शेकनं उणादौ ऋच्छिचटि (३९७) इत्यरे शीकरः 'शीकण् आमर्षणे' शीकयति शीकति 'युजादेर्नवा' (३।४।१८) इति वा णिच् । 'लोकृङ् दर्शने' लोकते अलोकिष्ट लुलोके ऋदित्त्वाण्णौ ङेः अलुलोकत् लोक्यते लोकः 'भावाऽकर्त्रोः' (५।३।१८) इति घञि लोकतेऽस्मिन्नवस्थितोऽनन्तज्ञानः सर्वभावानिति वा लोकः आलोक्यतेऽनेनार्थ इत्यालोकः 'व्यञ्जनाद् घञ्' (५।३।१३२) इति घञ् । लोकृण् भासार्थः लोकयति । उणादौ शम्बूकशाम्बूके (६१) त्यके निपानादूर्ध्वं लोकनादुलूकः । 'श्लोकृङ् सङ्घाते' सङ्घातः संहननं श्लोकते अश्लोकिष्ट शुश्लोके ऋदित्त्वाण्णौ ङे अशुश्लोकत् घञि श्लोक्यते ग्रथ्यते इति श्लोकः । 'द्रेकृङ् ध्रेकृङ् शब्दो-त्साहे' शब्दस्योत्साह औद्धत्यं द्रेकते ध्रेकते दिद्रेके दिध्रेके णौ ङे अदिद्रेकत् अदिध्रेकत् घञि उद्रेकः । 'रेकृङ् शकुङ् शङ्कायां' शङ्का सन्देहः पूर्वस्यार्थः यदाह आरेकं संशयेऽप्याहुः, द्वितीयस्य त्रासश्च । रेकते आरिरेके णौ ङे आरिरेकत् 'क्तेट०' इत्यः आरेका घञि आरेकः । शकुङ् शङ्कते 'क्तेट०' इत्यः शङ्का दूषिवृती (४८५) त्युले शङ्कुला आयुधं । 'ककि लौल्ये' लौल्यं गर्द्धः चापलं च । ककते इदित्त्वात् 'इङितः०' (३।३।२२) इत्यात्मनेपदम् चकके अत्रादेशादित्वात् 'अनादेशादे०' (४।१।२४) रित्येत्वाभावः ककिता अचि काकः पृषोदरादित्वाद्दीर्घत्वम् । 'कुकि वृकि आदाने' कोकते अकोकिष्ट चुकुके कोकिता 'नाम्युपान्त्य०' (५।१।५४) के कुकः घञि कोकश्चक्रवाकः 'वौ व्यञ्ज-नादेः०' (४।३।२५) इति क्त्वासनोर्वा कित्त्वे कोकित्वा कुकित्वा चुकोकिषते चुकुकिषते 'उति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शवर्हाद्यः क्तौ भावारम्भे०' (४।३।२६) इति वा किन्त्वे कुकितमस्य प्रकुकितः प्रकोकितः उणादौ कल्यनीति (४८१) ले कोकिलः। वृकि वर्कते अवर्किष्ट ववृके वर्किता 'नाम्युपान्त्ये०' ति के वृकः 'ऋदुपान्त्या०' (५।१।४१) दिति क्यपि वृक्यं 'ऋदवर्णस्य०' (४।२।३७) इति णौ ङे गुणापवादे ऋतो वा ऋत्वे अवीवृकत् अववर्कत्। '**चकि** तृप्तिप्रतिघातयोः' चकते अनादेशादित्त्वात् क्ते चकितः उक्तार्थयोर्घटादित्वात् 'घटादे०' (४।२।२४) रिति णौ ह्रस्वे चकयति ञिणम्परे तु वा दीर्घे अचाकि अचकि चाकं चाकं चकं चकं अर्थान्तरे तु ह्रस्वाभावे चाकयति। उणादौ चकिरमिविकसेरुचास्ये (३९३) ति रे चुक्रः अम्लो रसः बीजपूरक मिञ्जिका असुरः निमन्त्रणं च कठिचकीभ्योरे (४३३) चकोरः। **ककुङ् श्वकुङ् त्रकुङ् श्रकुङ् श्लकुङ् ढौकृङ् त्रौकृङ् ष्वष्कि वस्कि मस्कि तिकि टिकि टीकृङ् सेकृङ् स्रेकृङ् रघुङ् लघुङ्** गतौ' एते सप्तदश। ककुङ् उदित्त्वान्ने कङ्कते चकङ्के कङ्किता अचि कङ्कः उणादौ 'तृकृशृ०' (१८७) इत्यणे कङ्कणः। श्वकुङ् गतौ तालव्यादि उदित्वान्ने श्वङ्कते शश्वङ्के अचि श्वङ्कः। त्रकुङ् त्रङ्कते तत्रङ्के। श्रकुङ् श्रङ्कते शश्रङ्के, श्लकुङ् श्लङ्कते एतौ तालव्यादी। ढौकृङ् ढौकते अढौकिष्ट डुढौके ढौकिता णौ ङे ऋदित्वाद् ह्रस्वाभावे अडुढौकत् उणादौ 'शिक्यास्या०' (३६४) इति ये निपातनात् आढ्यः। त्रौकृङ् त्रौकते तुत्रौके णौ ङे अतुत्रौकत्। ष्वष्कि 'षः स०' (२।३।९८) इत्यत्र वर्जनात् सत्वाभावे ष्वष्कते सनि षिष्वष्किषते। वस्कि वस्कते ववस्के। मस्कि मस्कते ममस्के दन्त्योपान्त्यावेतौ तेन यङ्लुपि दिवो लुकि च 'संयोगस्यादौ०' (२।१।८८) इति सस्य लुक् अवावक् अमामक्। तिकि तेकते णौ ङे अतीतिकत्। टिकि टेकते अटीटिकत् ऋदितावेताविलन्ये तेन ह्रस्वाभावे अतितेकत् अटिटेकत्। टीकृङ् टीकते णौ ङे ह्रस्वाभावे अटिटीकत् टीकतेऽस्याः स्फुटमर्थमिति टीका 'क्तेट०' (५।३।१०६) इत्यः, ण्यन्ताद्वा टीकयति गमयत्यर्थमिति टीका। सेकृङ् सेकते ऋदित्त्वाद् ङे ह्रस्वाभावे षोपदेशाभावाच्च षत्वाभावे असिसेकत्। येषां तु षोपदेशोऽयं तन्मते कृतत्वात्सस्य षत्वे असिषेकत्। स्रेकृङ् दन्त्यादिः स्रेकते णौ ङे असिस्रेकत्। इत्येकोनत्रिंशत्कान्ताः सेटश्च ॥ २९ ॥ **खान्ता गान्ताश्चाप्रसिद्धाः।** रघुङ् उदित्वान्ने रङ्घते। लघुङ् लङ्घते उणादौ रङ्घिलङ्घिलिङ्गेर्ने लुक् च (७४०) इति किदुः रघुः लघुः। एतौ चुरादी भासार्थौ रङ्घयति लङ्घयति, लङ्घिर्भोजननिवृत्त्यर्थोपि नवज्वरो लङ्घनीयः। '**अघुङ् वघुङ्** गत्याक्षेपे' गतेराक्षेपो वेगः आरम्भः उपालम्भो वा। उदित्वान्ने अङ्घते 'अनात०' (४।१।६९) इति पूर्वस्यात्वे ने च आनङ्घे न बदनमिति नस्य द्वित्वाभावे अञ्जिघिषते उणादौ तकिवङ्कीति(६९२)री अङ्घिरित्येके। वघुङ् वङ्घते 'क्तेट०' (५।३।१०६) इत्यः वङ्घा। '**मघुङ्** कैतवे च' कैतवं वञ्चना चकाराद्गत्याक्षेपे मङ्घते मिमङ्घिषते उणादौ श्वन्मातरिश्वन्० (९०२) इत्यनि मघवा। '**राघृङ् लाघृङ्** सामर्थ्ये' राघते लाघते ऋदित्वाद् ह्रस्वाभावे अरराघत् अललाघत् 'अनुपसर्गाः क्षीब०' (४।२।८०) इति क्तयोर्निपातनात् उल्लाघः उल्लाघवान् नीरुक्। **द्राघृङ्** आयासे च' चकारात्सामर्थ्ये आयासः कदर्थनम्। **कौशिक**स्त्वायाम इत्याह दैर्घ्यविशिष्टायां क्रियायामिति व्याख्यत्। काल्पनिके हि प्रकृतिप्रत्ययविभागे द्राघिमादयः कस्मिंश्चिद्व्याकरणे धातोरेव साधिताः। एवं नेदत्यादेर्नेदिष्ठादयोऽपि द्राघते ऋदित्वात् अदद्राघत् क्विपि 'गडदबादे०' (२।१।७७) रित्यादिचतुर्थत्वे प्रधाक्। '**श्लाघृङ्** कत्थने' कत्थनमुत्कर्षाख्यानम् 'श्लाघह्नुस्था०' (२।२।६०) इति चतुर्थ्यां मैत्राय श्लाघते अशश्लाघत् 'क्तेट०' (५।३।१०६) श्लाघा। इति नव घान्ताः सेटश्च। '**लोचृङ्** दर्शने' लोचते अलुलोचत् क्ते आलोचितः अनदि आलोचनम् 'तिक्कृतौ नाम्नि' (५।१।७१) इति णके आलोचकम् (लोचकः?) स्त्रीशिरोवस्त्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'लोचृण् भासार्थः' आलोचयति 'णिवेत्ति०' (५।३।१११) इत्यने आलोचना। '**षचि** सेचने' सेचनं सेवनं भजनमिति यावत्। सेचते, सेचेः षोपदेशत्वात् असीषचत् 'णिस्तोरेव० (२।३।३७) इति नियमात् षत्वापन्ने सनि षत्वाभावे सिसचिषति उणादौ 'पलिसचेरिवः' (५२२) सचिवः क्रुसिकमि० (७७३) इति तुनि सच्यते स्नेहेनेति सक्तु। **चन्द्रस्तु** 'षच समवाये' इति वान्तमधीते तन्मते सवति। '**शचि** व्यक्तायां वाचि' तालव्यादिः। शचति शेचे उणादौ पदिपठि० (६०७) इति इः शची। '**कचि** बन्धने' कचते चकचे सनि चिकचिषते अचि 'पुंनाम्नि०' (५।३।१३०) घे वा कचाः शिरःप्राग्भागकेशाः। कर्मणि घञि काचः। '**कचुङ् दीप्तौ च**' चकाराद्बन्धने। उदित्त्वान्ने कञ्चते चिकञ्चिषते। ङे अचकञ्चत्। क्ते सेट्त्वाद् ध्यणि कत्वाभावे कञ्च्यम्। उणादौ कञ्चुकांशुक० (५७) इत्युके कञ्चुकः कुशिकहृदिक० (४५) इति इके निपातनात् काञ्चिकम् 'विदनगगन०' (२७५) इत्यने निपातनात् काञ्चनम् हेम कमिवमि० (६१८) इति णिदिः काञ्चिः। '**श्वचि श्वचुङ्** गतौ' श्वचते शश्वचे शिश्वचिषते ङे अशिश्वचत्। श्वचुङ् उदित्वान्ने श्वञ्चते शश्वञ्चे शिश्वञ्चिषते अशश्वञ्चत्। '**वर्चि** दीप्तौ' वर्चते ववर्चे क्ते सेट्त्वात् घञि कत्वाभावे वर्चः। **एवं चान्तेषु जान्तेषु च क्ते सेट्सु सर्वेषु वाच्यम्**, नाम्नि पुंसि च णके सुवर्चिका टण्कणम्। उणादौ मुरलोरल० (४७४) सुवर्चला शाकम्, असिलसिः (९५२) वर्चः अशुचितेजसी। '**मचि मुचुङ्** कल्कने' कल्कनं दम्भः शाठ्यं कथनं च। मचते मेचे। मुचेत्यपि **चन्द्रः** मोचते। मुचुङ् मुञ्चते 'मुच्लृंती मोक्षणे' मुञ्चति। '**मचुङ्** धारणोच्छ्रायपूजनेषु च' चकारात्कल्कने, दीप्तावप्येके, मञ्चते घञि मञ्चः णके मञ्चिका। उणादौ कञ्चुकांशुक० (५७) इत्युके मञ्चुका खट्विका। '**पचुङ्** व्यक्तीकरणे' पञ्चते पपञ्चे पिपञ्चिषते अपपञ्चत् प्रपञ्चयते 'नाम्नि पुंसि च' (५।३।१२१) इति णके पञ्चिका न्यासः घञि न्यङ्क्वादित्वात् कत्वे पङ्कः उणादौ ऋकृभृ० (४७५) इत्याले पञ्चालः ऋषिः उक्षितक्षि० (९००) इत्यनि पञ्च घटाः। अनुदिदनुस्वारेत्वायमित्यन्ये पचते पक्ता। 'पचुण् विस्तारे' प्रपञ्चयति णिच्यलि प्रपञ्चः। '**ष्टुचि** प्रसादे' 'षः स'० (२।३।९८) इति सत्वे स्तोचते तुष्टुचे णौ स्तोचयति ङे अतुष्टुचत् यङि तोष्टुच्यते घञि न्यङ्क्वादित्वात् कत्वे स्तोकः। इति चान्तास्त्रयोदश सेटश्च। '**एजृङ् भ्रेजृङ् भ्राजि** दीप्तौ' एजते 'गुरुनाम्यादे०' (३।४।४८) इति परोक्षाया आमादेशे एजाञ्चक्रे ऋदित्वाद् ङे न ह्रस्वः मा भवानेजिजत् अत्र ओणेर्ऋदित्करणज्ञापकान्नित्यादपि द्वित्वात् प्रागेव ह्रस्वः प्राप्तः ऋदित्वेन निषिध्यते 'साहिसाति०' (५।१।५९) इति शे उदेजयः 'एजेः' (५।१।११८) इति खशि अङ्गमेजयः। 'एजृ कम्पने' इत्यस्य त्वेजति। 'भ्रेजृङ् भ्रेजते बिभ्रेजे ऋदित्वाद् ङे ह्रस्वाभावे अबिभ्रेजत्। भ्राजि भ्राजते बभ्राजे णौ ङे 'भ्राजभास०' (४।२।३६) इति वा ह्रस्वे अबिभ्रजत् अबभ्राजत् 'यजसृज० इत्यत्र राजिसहचरितस्यैव (भ्राजेर्ग्रहणादस्य षत्वाभावे यङ्लुपि बाभ्रालिः क्तौ भ्रालिः क्विपि विभ्राक्, तस्य तु बाभ्राष्टि भ्राष्टिः विभ्राडिति भवति। अत एव च एत्वद्वित्वाभावविकल्पोऽपितस्यैव भ्रेजे बभ्राजे) भ्रेजे बभ्राजे। इदमेव च भ्राजेरात्मनेपदिनोऽप्युभयपदिषु राजृग् टुभ्राजि दीप्ताविति पाठे प्रयोजनम् 'भ्राज्यलङ्कृग्०' (५।२।२८) इति इष्णौ भ्राजिष्णुः 'दियुद्दृ०' (५।२।८३) इति क्विपि नभ्राक्। राजृग् टुभ्राजि दीप्तावित्यस्य तु द्वित्त्वादथौ भ्राजथुः। '**इजुङ्** गतौ' उदित्वान्ने इञ्जते इञ्जाञ्चक्रे इञ्जिता। '**ईजि** कुत्सने च' चकाराद्गतौ ईजते वीजते ईजाञ्चक्रे लौकिकस्य तु वीजेरवीजयत् राजहंसैरवीज्यन्त, अस्य तु विपूर्वस्य णौ दिवि व्यैजयत् व्यैजयन्त '**ऋजि** गतिस्थानार्जनोर्जनेषु' ऊर्जनं प्राणनम्। अर्जते 'ऋत्यारुपसर्गस्य' (१।२।९) इत्यारि उपार्ज्यते



Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनात इत्यात्वे ने च आनृजे सनीटः कार्यित्वेन द्वित्वं प्रति निमित्तत्वाभावेन द्वित्वात्प्रागेव स्वरस्य-विधौ गुणे सति 'अयि रः' (४।१।६) इति रेफस्य द्वित्वाभावे 'स्वरादेर्द्वितीयः' (४।१।४) इति जेरेव द्वित्वं अर्जिजिषते णौ अर्जयति ऋदुपान्त्याद० (५।१।४१) इति क्यपि ऋज्यम् घञि उद्गादित्वाद्गत्वे अर्गः स्थानम्, शोभनोऽर्गः स्वर्गः उणादौ ऋञ्चिऋजि० (४८) इति कितीके ऋजीकं वज्रं बलं च ऋजिशॄ० (५५४) इति कितीषे ऋजीषः अवस्करः ऋजीषं धनमुपहृतं च। उद्रि-क्तादिसिद्ध्यर्थं व्यञ्जनादिमेनं अन्ये मन्यन्ते। 'ऋजुङ् भृजैङ् भर्जने' भर्जनं पाकप्रकारः ऋञ्जते आनृञ्जे ऋत्यारुपसर्गस्य इत्यारि उपार्ञ्जते ऋञ्जिता 'भृजैङ् भर्जने' बभृजे 'ऋद्वर्णस्य' (४।२।३७) इति ऋतो वा ऋत्वे णौ ङे अबीभृजत् अबभर्जत् सनि बिभर्जिषते ऐदित्त्वात् क्तयोर्नेट् भृक्तः भृक्तवान् क्तेऽनिट्त्वात् 'क्तेऽनिटश्चजोः०' (४।१।१११) इति घञि गत्वे भर्गो रुद्रः 'ऋदुपान्त्या'-दिवि क्यपि भृज्यम् उणादौ कृषिचमि० (८२९) इत्यूः भृजूः अभ्योषः। 'तिजि क्षमानिशानयोः' निशानं तीक्ष्णीकरणं 'गुप्तिजो०' (३।४।५) इति सनि तितिक्षते कोपम् क्षान्तौ संविधानात्तेजने प्रत्ययान्तरम् णौ तेजयति करणाधारेऽनटि तेजनं तेजनी उणादौ 'भ्रूणतृण' (१८६) इति निपातनात्तीक्ष्णः तिजियुजेर्गश्चेति (३४५) किति मे तिग्मम् अस् (९५२) इत्यसि तेजः। तेजण् निशाने उत्तेजयति। इति जान्ता नव सेटश्च। 'घट्टि चलने' घट्टते जघट्टे अचि अरघट्टः घञि घट्टः 'णिवेत्ति०' (५।३।१११) इत्यने घट्टना 'घट्टण् चलने' घट्टयति। 'स्फुटि विकसने' स्फोटते 'अघोषे शिटः' (४।१।४५) इति पूर्वस्य सस्य लोपे पुस्फुटे स्फोटिता 'वौ व्यञ्जनादेः०' (४।३।२५) इति क्त्वासनोर्वा कित्त्वे स्फुटित्वा स्फोटित्वा पुस्फुटिषते पुस्फोटिषते 'नाभ्युपान्त्य०' (५।१।५४) इति के स्फुटः। डान्तोऽयमुदिच्चेत्येके स्फुण्डते स्फुण्डिता। 'स्फट स्फुट्ट विशरणे' स्फटति वस्त्रं अस्फाटीत् पस्फाट। स्फोटति ऋदित्त्वादङि अस्फुटत् 'स्फुटत् विकसने' स्फुटति। 'चेष्टि चेष्टने' चेष्टा ईहा चेष्टते चिचेष्टे णौ ङे 'वा वेष्टचेष्टः' (४।१।६६) इति पूर्वस्य वात्वे अचचेष्टत् अचिचेष्टत् क्तेटः इत्यः चेष्टा। 'गोष्टि लोष्टि सङ्घाते' गोष्टते जुगोष्टे गोष्टिता। लोष्टते लुलोष्टे कर्मणि घञि लोष्टः उणादौ भृमृतृत्सरि० (७१६) इत्युः लोष्टुः मृतपिण्डः। 'वेष्टि वेष्टने' वेष्टनं ग्रन्थनं लोटनं परिहाणिश्च वेष्टते विवेष्टे णौ ङे वा वेष्टेति पूर्वस्य वात्वे अववेष्टत् अविवेष्टत् यङि वेवेष्ट्यते यङ्-लुपि वेवेष्टि हो धुट० इति हेर्धित्वे 'तवर्गस्येति धस्य ढत्वे 'धुटो धुटि०' (१।३।४८) इति ढस्य लुकि 'तृतीयस्तृतीय०' (१।३।४९) इति षस्य डत्वे वेवेड्ढि अचि प्रवेष्टो बाहुः 'नाम्नि पुंसि च' (५।३।१२१) णके वेष्टकः कर्णवेष्टकः। 'अट्टि हिंसातिक्रमयोः' अतिक्रम उल्लङ्घनं दोपान्त्योऽयम् तवर्गस्येति डत्वं न कृतमसन्देहार्थम् 'तवर्गस्य०' (१।३।६०) इति दस्य डत्वे 'अघोषे प्रथम' (१।३।५०) इति टत्वे च अट्टते 'अनात०' (४।१।६९) इत्यात्वे ने च आनट्टे दोपान्त्यत्वात्सनीटि न वदनमिति दस्य निषेधात् 'स्वरादे०' (४।१।४) इति द्वितीयांशस्य टेरेव द्विरुक्तौ 'तवर्गस्ये'ति डत्वे 'अघोषे प्रथम०' इति टत्वे अट्टिटिषते अचि घञि वा अट्टः क्विपि अद् अत्। तोपान्त्योऽयमित्येके तेषां सनि इटि अतिट्टिषते येषां तु तान्तष्टोपान्त्यश्चायं तेषां ट्टीति द्वित्वे अटिट्टिषते। इति टान्ताः सप्त सेटश्च। 'एठि हेठि विबाधायाम्' एठते हेठते एठाञ्चक्रे जिहेठे। स्वरादेरिति द्वित्वे एटिठिषते णौ 'णिवेत्ति०' (५।३।१११) इत्यने विहेठना शाठ्यम्। 'मठुङ् कठुङ् शोके' शोकोऽत्रार्त्तध्यानम्, उदित्त्वान्ने मण्ठते ममण्ठे। कठुङ् कण्ठते उत्कण्ठते उच्चकण्ठे घञि उत्कण्ठः के उत्कण्ठितः क्ते सेट्त्वात् 'क्तेट'० (५।३।१०६) इत्यः उत्कण्ठा उणादौ हृषिवृति० (४८५) इत्युले उत्कण्ठुलः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'कठुण् शोके' 'युजादेर्नवा' (३।४।१८) इति वा णिचि उत्कण्ठयति उत्कण्ठति । 'मुठुङ् पलायने' मुण्ठते मुमुण्ठे मुण्ठिता । 'वठुङ् एकचर्यायाम्' एकस्यासहायस्य चर्या गतिस्तस्यां वण्ठते ववण्ठे अचि वण्ठः । 'अठुङ् पठुङ् गतौ' अण्ठते आनण्ठे इति ठान्ताः सप्त सेटश्च ॥ ७ ॥ पडुङ् पण्डते पपण्डे गत्यर्थात्कर्त्तरि क्ते पण्डितः अचि पण्डः क्ते सेट्त्वात् 'क्तेट०' इत्यः पण्डा उणादौ जठरक्रकर० (४०३) इत्यरे निपातनात्पाण्डरः पाण्डुरिति पनेर्दीर्घश्चेति डौ पनतेः (७६६) मध्वादित्वाद्रे पाण्डुरः । 'हुडुङ् पिडुङ् सङ्घाते' हुण्डते जुहुण्डे अचि हुण्डं समन्ततो विषमं संस्थानम्, नामकर्मभेदानां षण्णां संस्थानानामन्त्यस्य विपाको नरकभवनियतः 'क्तेट०' इत्यः हुण्डा 'नाम्नि पुंसि च' (५।३।१२१) इति णके हुण्डिका 'उणादौ किलिपिलि०' (६०८) इति इः हुण्डिः पिण्डित ओदनः । पिडुङ् पिण्डते पिपिण्डे घञि पिण्डः 'पिडुण् सङ्घाते' पिण्डयति । 'शडुङ् रुजायां च' चकारात्सङ्घाते तालव्यादिः शण्डते शशण्डे अचि शण्डः उत्सृष्टपशुः ऋषिश्च । षण्डश्च इति सनतेरौणादिके डे (१६८) बाहुलकात्षत्वम् । 'तडुङ् ताडने' तण्डते ततण्डे तण्डिता 'क्तेट०' इत्यः वितण्डा 'उणादौ हृषिवृति० (४८५) इत्युले तण्डुलः' तण्डुरिति तु तनोतेर्डौ (७६५) तण्डुना प्रोक्तमित्यणि ताण्डवम् । 'कडुङ् मदे' कण्डते चकण्डे कण्डिता अचि कण्डं उणादौ जठरक्रकर० (४०३) इत्यरे कण्डरा स्नायुसङ्घातः कटिपटि० (४९३) इत्योले कण्डोलः विदलभाजनविशेषः कण्डुरिति कणेर्डौ (७६५) 'कडुण् खण्डने' च कण्डति । 'खडुङ् मन्थे' खण्डते चखण्डे खण्डिता घञि खण्डः 'खडुण् भेदे' खण्डयति । 'खुडुङ् गतिवैकल्ये' खुण्डते चुखुण्डे चुरादेराकृतिगणत्वात् 'खुडुण् खण्डने' खुण्डयति । 'कुडुङ् दाहे' कुण्डते आधारे 'व्यञ्जनात्०' (५।३।१३२) इति घञि कुण्डम् स्त्रियां 'भाजगोण०' (२।४।३०) इति ङ्यां कुण्डी 'क्तेट०' इत्यः कुण्डा उणादौ मृदिकन्दि० (४६५) इत्यले कुण्डलम् 'कुडुण् रक्षणे' कुण्डयति । 'वडुङ् मडुङ् वेष्टने' विभाजनेऽप्यन्ये । विभाजनं विभागीकरणं चर्माभावश्च । वण्डते अचि घञि वा वण्डः । मडुङ् मण्डते अचि घञि वा मण्डः रसाग्रम् णके मण्डकः उणादौ मृमन्यञ्जि० (५८) इत्यूके मण्डूकः मृदिकन्दि० (४६५) इत्यले मण्डलम् स्त्रियां गौरादित्वात् ङ्यां मण्डली मीमसि० (४२७) इत्यूरे मण्डूरं लोहमलम् हृषिपुषि० (७९७) इति ण्यन्तादिन्नौ मण्डयित्नुः 'मडु भूषायाम्' मण्डति 'मडुण् भूषायाम्' मण्डयति । 'भडुङ् परिभाषणे' भण्डते अचि भण्डः भाण्डमिति तु भामेर्डः (१६८) 'भडुण् कल्याणे' भण्डयति 'णिवेत्ति०' (५।३।१११) इत्यने भण्डना । 'मुडुङ् मज्जने' मज्जनं शोधनं न्यग्भावश्च मुण्डते मुमुण्डे मुण्डिता घञि मुण्डः 'मुडु खण्डने च' मुण्डति । 'तुडुङ् तोडने' तोडनं हिंसा तुण्डते अचि घञि वा तुण्डम् उणादौ किलिपिलि० (६०८) इति इः तुण्डिः प्रवृद्धा नाभिः । 'भुडुङ् वरणे' वरणं स्वीकरणं भुण्डते अचि भुण्डः । 'चडुङ् कोपे' चण्डति अचि चण्डः स्त्रियां शोणादित्वाद्वा ङ्यां चण्डी चण्डा 'उणादौ ऋकमृ० (४७५) इत्याले चण्डालः 'चडुण् कोपे' चण्डयति । 'द्राडृङ् ध्राडृङ् विशरणे' द्राडते दद्राडे ध्राडते दध्राडे ऋदित्त्वात् ङे ह्रस्वः अदद्राडत् अदध्राडत् । 'शाडृङ् श्लाघायाम्' तालव्यादिः । शाडते ऋफिडादित्वाड्डस्य लत्वे शालते ऋदित्त्वात् ङे ह्रस्वाभावे अशशाडत् अचि शाला 'अजातेः०' (५।१।१५४) इति णिनि गुणशाली शालिरिति तु कुशलेरौणादिके णौ (६१८) रूपम् शालूकमित्यपि शलतेर्णूके (५९) 'वाडृङ् आप्लाव्ये' आप्लाव्यं आप्लावनम्, वाडते अचि ऋफिडादित्वात् डस्य लत्वे वालः वडवेति तु वडेः सौत्रस्याचि रूपम् । (उणादौ ५१५) 'हेडृङ्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**होडृङ्** अनादरे' हेडते जिहेडे अजिहेडत् घञि हेडः 'हेडप्रसादौ प्रभोः' । क्ते सेट्त्वात् क्तेट इत्यः ऋफिडादित्वाल्ले हेला घटादौ 'हेड वेष्टने' हेडति णौ ह्रस्वे हिडयति । होडृङ् होडते जुहोडे ङे ह्रस्वाभावे अजुहोडत् 'क्तेटो०' ( ५।३।१०६ ) इत्यः होडा अचि होडः । '**हिडुङ्** गतौ च' चकारादनादरे, हिण्डते जिहिण्डे यङि जेहिण्ड्यते यङ्लुपि जेहिण्डीति 'तवर्गस्य०' ( १।३।६० ) इति तस्य टत्वे 'धुटो धुटि०' ( १।३।४८ ) इति धुटो लुकि जेहिण्टि 'इङित०' ( ५।२।४४ ) इत्याने हिण्डनः । गत्यर्थात्कर्त्तरि क्ते हिण्डितः उणादौ किलिपिलि० ( ६०८ ) इति हिण्डिः रात्रौ रक्षाचारः । इति डान्तास्त्रयोविंशतिः सेटश्च । '**घिणुङ् घुणुङ् घृणुङ्** ग्रहणे' उदित्त्वान्ने घिण्णते जिघिण्णे घिण्णिता । घुण्णते जुघुण्णे घुण्णिता । घृण्णते जघृण्णे घृण्णिता । यङि जरीघृण्यते वनि 'वन्याङ् पञ्चमस्य' (४।२।६५) इत्यत्र पञ्चमस्येति जातिपरिग्रहणाद् ण-द्वयस्याप्याङादेशे आङो ङित्त्वाद्गुणाभावात्त्वे सुघ्यावा, व्यक्तिपरिग्रहे त्वन्त्यस्यैवात्वे सुघिनावा, एवं शेषयोरपि । क्विपि 'पदस्य' ( २।१।८९ ) इति संयोगान्तलोपे सुघिन्नित्यादि । '**घुणि घूर्णि** भ्रमणे' घोणते जुघुणे घोणिता लिहाद्यचि घोणा 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के घुणः वनि वन्याङ्पञ्चमस्येत्याङादेशे ङित्त्वाद्गुणाभावे घ्वावा । घूर्णते जुघूर्णे वन्याङि घूरावा 'घुण घूर्णत् भ्रमणे' घुणति । घूर्णति । '**पणि** व्यवहारस्तुत्योः' गुपौधूपेत्याये पणायति । आयान्तस्येङित्त्वाभावाच्छेषात्परस्मायिति परस्मैपदम् । विनिमेयद्यूतपणं० (२।२।१६) इति कर्मणो वा कर्मत्वे 'शेषे'(२।२।८१) इति षष्ठ्याम् शतस्य पणायति । स्वार्थिकप्रत्ययान्तस्य प्रकृतिवद्ग्रहणात्पणिरेवायम् । **ये** तु स्तुत्यर्थादेव पणेरायमिच्छन्ति **तन्मते** व्यवहारार्थात्स्तुत्यप्यायाभावे शतस्य पणते । 'अशवि ते वा' (३।४।४) इति वा आये पणायाञ्चकार पेणे पणायिता पणिता । 'न चोपलेभे वणिजां पणायाः' । अत्र शंसिप्रत्ययादित्यः । वर्योपसर्येति निपातनाद्ये पण्यं विक्रेयम् । अन्यत्र घ्यणि पाण्यः साधुः । पणेर्माने इति घञपवादेऽलि शाकपणः । गोचरसञ्चरेति आधारे घञपवादे घे एत्य तत्र पणायन्तीत्यापणः उणादौ आङः पणि० (३९) इति के आपणिकः पत्तनवासी । प्राङः पणि० (४२) इति के प्रापणिको वणिक् कमिवमि० ( ६१८ ) इति णिदिः पाणिः भूपणिभ्यामिज् भुरवणौ च ( ८७५ ) वणिक् प्रज्ञाद्यणि वाणिजः । इति णान्ताः षट् सेटश्च ॥ ६ ॥ '**यतैङ्** प्रयत्ने' यतते ऐदित्त्वात्क्तयोर्नेट् यत्तः आयत्तः यजिस्वपीति ने यत्नः । उणादौ पदिपठि० ( ६०७ ) इति इः यतिः । यतिननन्दिभ्यां दीर्घश्च ( ८५६ ) इत्यृ याता देवरभार्या । तृस्वस्त्रित्यत्र तुः सार्थकस्य ग्रहणादारभावे यातरौ । 'यतण् निकारोपस्कारयोः' यातयति । **युतृङ् जुतृङ्** भासने योतते युयुते ऋदित्त्वाद्ङे अयुयोतत् । जोतते जुजुते अजुजोतत् 'जृत् भासने' जोतति ऋदित्त्वाद्वाङि अजुतत् अजोतीत् । **कौशिकस्तु** ज्योतिःसिद्धये जुतिस्थाने ज्युतिमधीते । **तदसत्** द्युतेरादेश्च ज इति सिद्धत्वात् । इति तान्तास्त्रयः ॥ ३ ॥ '**विथृङ् वेथृङ्** याचने' वेथते विविथे ऋदित्त्वाद् ङे अविवेथत् 'वेथृङ् वेथते विवेथे ङे अविवेथत् । **कौशिकस्तु** विधुरसिद्धये धान्तं इत्याह । **तन्न** व्यथेरेव 'श्वशुर०' ( ४२६ ) इत्युरे निपातनात्सिद्धेः । **नाथृङ्** पुरस्ताद्वक्ष्यते । '**श्रथुङ्** शैथिल्ये' तालव्यादिः, शैथिल्यमगाढता, उदित्त्वान्ने श्रन्थते शश्रन्थे अत्र 'वा श्रन्थग्रन्थो न लुक् च' ( ४।१।२७ ) इत्यत्रौपदेशिकस्य श्रन्थो ग्रहणाद्वा एत्वनलुकौ न भवतः । **अन्ये** त्वत्रापीच्छन्ति । 'दशनाऽवोदैधौ०' ( ४।२।५४ ) इति घञि निपातनात् प्रश्रथः हिमश्रथः णिवेत्त्यने श्रन्थना । उणादौ श्रन्थेः शिथ् च ( ४१४ ) इतीरे शिथिरम् लत्वे शिथिलम् । '**ग्रथुङ्** कौटिल्ये' कौटिल्यं कुसृतिर्बन्धश्च । ग्रन्थते जग्रन्थे णिवेत्त्यने ग्रन्थनेत्येके । 'श्रन्थश् मोचनप्रतिहर्षयोः' 'ग्रन्थश् सन्दर्भे' श्रथ्नाति श्रथ्यते ग्रथ्नाति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ग्रथ्यते वा । 'श्रन्थग्रन्थो न लुक् च' इति वा एत्वे नलुकि च श्रेथतुः शश्रन्थतुः ग्रेथतुः जग्रन्थतुः । 'श्रन्थ ग्रन्थण् सन्दर्भे' श्रन्थयति श्रन्थति ग्रन्थयति ग्रन्थति । श्रेथतुः शश्रन्थतुः ग्रेथतुः जग्रन्थतुः । एकधाताविल्यात्मनेपदे भूषार्थेति ञिक्ययोरभावे च कर्मकर्त्तरि त्रयाणामपि श्रन्थते श्रथ्नीते अश्रन्थिष्ट ( वा स्वयमेव एवं ) 'ग्रन्थते ग्रथ्नीते अग्रन्थिष्ट' उणादौ पदिपठि० ( ६०७ ) इति इः श्रन्थिर्ग्रन्थिश्च पर्वसन्ध्यादिः । **'कत्थि** श्लाघायाम्' श्लाघा गुणारोपः कत्थते चकत्थे इङित इत्यने कत्थनः । इति थान्ताः षट् सेटश्च ॥ ६ ॥ **श्विदुङ्** श्वैत्ये श्वैत्यं श्वेतगुणक्रिया श्विन्दते कोऽर्थः स यदि सकर्मकस्तदा श्वेतीकरोतीति अथाकर्मकस्तदा श्वेतीभवतीति । श्वेतगुणः सिद्धोऽप्याख्यातेन साध्यैकरूप उच्यते कृतानुसाध्योऽपि सिद्धतया पाकादिवच्छब्दशक्तिस्वाभाव्यात् । क्ये श्विन्द्यते क्ते श्विन्दितः । **वदुङ्** स्तुत्यभिवादनयोः स्तुतिर्गुणैः प्रशंसा, अभिवादनं पादयोः प्रणिपातः, वन्दते देवान् स्तौतीत्यर्थः, ववन्दे गुरून्-अभिवादितवानित्यर्थः । वन्दिता ( अचि ) वन्दी हठाकृष्टा स्त्री । ग्रहादित्वाण्णिनि वन्दी मङ्गः । 'शृवन्देरारुः' ( ५।२।३५ ) वन्दनशीलो वन्दारुः कामवृक्षश्च । (न)णिङ्येत्यत्र दीपिग्रहणात् असरूपे ने वन्दनः 'णिवेत्त्या०' ( ५।३।१११ ) इत्यने वन्दना उणादौ पदिपठि० ( ६०७ ) इति इः वन्दिः ग्रहणिः । **'भदुङ्** सुखकल्याणयोः' सुखं सद्वेद्यकर्मोदयाच्छुभानुभवनम्, कल्याणं श्रेयः, प्रीतावप्यन्ये, प्रीतिर्मोहनीयविपाकः । भन्दते बभन्दे 'इङित०' (५।२।४४) इत्यने भन्दनः उणादौ सीमन्तहेमन्त० ( २२२ ) इत्यन्ते निपातनात् भदन्तः । भन्देर्वा ( ३९१ ) इति रे वा नलुकि च, भद्रं भन्द्रं च सुखकल्याणे । चुरादौ 'भडुण् कल्याणे' दान्त इत्येके भन्दयति । **'मदुङ्** स्तुतिमोदमदस्वप्नगतिषु' मोदो हर्षः मदो दर्प्पः स्वप्नेनालस्यमपि लक्ष्यते । **चन्द्रस्तु** मदि जाड्ये इत्येवाह । मोदमदस्वप्नेष्वकर्मकोऽयम्, स्तुतिगत्योः सकर्मकः । मन्दते ममन्दे अचि मन्दः स्त्रियां 'जातेरयान्त०' ( २।४।५४ ) इति, यौवनावस्थावृत्तौ तु 'वयस्यनन्त्ये' ( २।४।२१ ) इति, ङीप्राप्तावजादेरित्यपि मन्दा स्त्रीजातिः, युवतिर्वा । 'उणादौ शलिवलि० ( ३४ ) इत्याके मन्दाकः । मत्वर्थीये नि मन्दाकिनी । भीवृधि० ( ३८७ ) इति रे मन्द्रं गम्भीरम् । मद्रमिति तु माद्यतेः । ( ३८७ ) ऋच्छिचटि० ( ३९७ ) इत्यरे मन्दरः शैलविशेषः । अम्यङ्गि० ( ४०५ ) इत्यारे मन्दारो देववृक्षः । मदिमन्दि० ( ४१२ ) इतीरे मन्दिरं सद्म । मदिरेति तु माद्यतेः ( ४१२ ) । वाश्यसि० ( ४२३ ) इत्युरे मन्दुरा वाजिशाला ( ४२३ ) । **'स्पदुङ्** किञ्चिच्चलने' स्पन्दते पस्पन्दे णिगन्तात्फलवत्कर्त्तर्यपि चल्याहारार्थेऽङिति परस्मैपदम् स्पन्दयति । घञि स्पन्दः चालशब्दार्थादित्यने स्पन्दनः वृक्षविशेषः । **क्लिदुङ्** परिदेवने परिदेवनं शोचनम् । क्लिन्दते 'क्लिदु परिदेवने' क्लिन्दति । गित्त्वमकृत्वोभयत्र पाठस्तु फलवत्यपि कर्त्तरि परस्मैपदार्थः अफलेप्यात्मनेपदार्थश्च । **'मुदि** हर्षे' अकर्मकोऽयम् मोदते मुमुदे मोदिता क्ते मोदितः 'वौ व्यञ्जनादेः०' ( ४।३।२५ ) इति क्तासनोर्वा किद्वे मुदित्वा मोदित्वा मुमुदिषते मुमोदिषते णौ मोदयति चैत्रम्, अत्राणिगीति फलवत्कर्त्तर्यपि परस्मैपदम् 'गतिबोधाहारार्थ०' ( २।२।५ ) इत्यणि कर्तुः कर्मत्वं च, मूलविभुजादित्वात् के कुमुदम् 'तिकृतौ नाम्नि' ( ५।१।७१ ) इत्यानशि मोदमानः कोऽपि ग्रामः, णके मोदयतीति मोदकः 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के मुदः । 'इङित०' ( ५।२।४४ ) इत्यने मोदनः उणादौ पूमुदिभ्यां कित् ( ९३ ) इति किति गे मुद्गः । 'ऋज्यजि०' ( ३८८ ) इति रे मुद्रा । 'मुदिगूरिभ्यां टिद्गजौ चान्तौ ( ४०४ ) मुद्गरः मुद्गरी । शुषीषि० ( ४१६ ) इति कितीरे मुदिरो मेघः 'मुदण् संसर्गे' मोदयति । **'ददि** दाने' धारणे इति **कौशिकः,** ददते

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'अनादेशादे०' ( ४।१।२४ ) इत्येत्वस्य 'न शसदद०' ( ४।१।३० ) इति प्रतिषेधात् ददे ददिता। **'ष्वदि स्वर्दि स्वादि** आस्वादने' आद्यः षोपदेशोऽयम, नेतरौ। **यत्स्मृतिः** स्वरदन्त्यपराः षोपदेशाः स्मि-स्विदि-स्वदि-स्वञ्जि-स्वपयश्च, सृपि-सृजि-स्तृ-स्तॄ-स्त्या-सेक-सृवर्जम् । आस्वादनं जिह्वया लेहः। चैत्राय स्वदते 'रुचिकृप्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु०' ( २।२।५५ ) इति चतुर्थी। सस्वदे षोपदेशात्षत्वे असिष्वदत् सनि षत्वापन्ने 'णिस्तोरेव०' ( २।३।३७ ) इत्यत्र वर्जनात्तस्य षत्वाभावे सिस्वादयिषति, णिस्तोरेवेति नियमात्सनि षत्वाभावे सिस्वदिषते। 'इङित०' इत्यने स्वदनः उणादौ कृवापाजि० ( १ ) इत्युणि स्वादुः 'ष्वदण् आस्वादने' स्वादयति। स्वर्दि स्वर्दते अषोपदेशत्वात्षत्वाभावे सिस्वर्दयिषति असिस्वर्दत्। स्वादि स्वादते सस्वादे अषोपदेशत्वात्षत्वाभावे असिस्वदत् सनि सिस्वादिषते। **'उर्दि** मानक्रीडनयोश्च' चकारादास्वादने। मानं मितिः। 'भ्वादेः०' ( २।१।६३ ) इति दीर्घे ऊर्दते 'गुरुनाम्यादे०' ( ३।४।४८ ) इति परोक्षाया आमि ऊर्दाञ्चक्रे 'अयि रः' ( ४।१।६ ) इति रस्य प्रतिषेधात् 'स्वरादे०' ( ४।१।४ ) इति देरेव द्वित्वे सनि ऊर्दिदिषते अचि स्त्रियां गौरादित्वात् ङ्यां ऊर्दी विमानम्। **'कुर्दि गुर्दि गुदि** क्रीडायाम्', 'भ्वादे०' इति दीर्घे कूर्दते चुकूर्दे। गुर्दि जुगूर्दे। गुर्दिस्थानेऽन्ये **खुर्दि** पेठुः खूर्दते। 'गुर्दण् निकेतने' गूर्दयति। गुदि गोदते जुगुदे 'वौ व्यञ्जनादेः०' ( ४।३।२५ ) इति क्त्वासनोर्वा कित्त्वे गुदित्वा गोदित्वा जुगुदिषते जुगोदिषते 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के गुदं स्त्रीणामपाङ्गम्। कल्याणं गुदमस्याः क्रोडादित्वाद् ङ्यभावे कल्याणगुदा। गुदिस्थाने **गुधिमेके**ऽध्यैषत। **'षूदि** क्षरणे' क्षरणं निरसनं 'षः स०' ( २।३।९८ ) इति सत्वे सूदते सुषूदे ङे असुषूदत् क्ते निषूदितः नन्द्यादित्वादने सूदनः अचि सूदः स्त्रियां गौरादित्वात् ङ्यां सूदी शीलाद्यर्थविवक्षायामिङित० इत्यनस्य 'न णिङ्य०' ( ५।२।४५ ) इति प्रतिषेधात्तृनि सूदनशीलः सूदिता 'षूदण् आश्रवणे' सूदयति। **'ह्रादि** शब्दे' अव्यक्ते शब्दे इत्यन्ये, अव्यक्तोऽपरिस्फुटवर्णः, ह्रादते जह्रादे घञि ह्रादः अचि ह्रदः पृषोदरादित्वात् ह्रस्वः। **'ह्लादैङ्** सुखे च' चकाराच्छब्दे ह्लादते जह्लादे ऐदित्त्वात् क्तयोर्नेट् प्रह्लन्नः। अत्र 'ह्लादो ह्रद् क्तयोश्च' ( ४।२।६७ ) इति ह्लद्, तो न श्च। णौ के आह्लादितः क्तौ प्रह्लत्तिः 'मनयवलपरे हे' ( १।३।१५ ) इत्यनुस्वारानुनासिकयोः किंह्लादते किँल्ह्लादते। **'पर्दि** कुत्सिते शब्दे' पायुध्वनौ वर्त्तते। अन्ये तु निःशब्दमधोवातं पर्दनं मन्वाना अशब्द इत्याहुः। पर्दते पपर्दे 'इङित०' ( ५।२।४४ ) इत्यने पर्दनः। पृदाकुरिति पिपर्त्तेर्दाकुकि ( ७५६ ) **'स्कुदुङ्** आप्रवणे' आप्रवणमुत्प्लुत्य गमनमास्कन्दनं वा। उद्धरणमित्यन्ये। उदित्त्वान्ने स्कुन्दते चुस्कुन्दे सनि चुस्कुन्दिषते यङि चोस्कुन्द्यते यङ्लुपि चोस्कुन्दीति। कुन्द इति तु कवतेर्दे नेऽन्ते च रूपम्। ( २४० ) इत्येकविंशतिर्दान्ता ;हर्दिवर्जाः सेटश्च ॥ २१ ॥

**'एधि वृद्धौ' शवि एधते धर्मतः सुखम्।**

अथ धान्तेषु एधिधातुं कण्ठतो निर्दिशति एधते इति। उपसर्गान्निषेधे ( १।२।१९ ) इत्यत्रैधिवर्जनादुपसर्गावर्णलुगभावे प्रैधते परैधते। द्विवचने सूत्रम्—

## आतामाते आथामाथे आदिः ॥ ११३ ॥ [ सि० ४।२।१२१ ]

**आत्परेषामेषां चतुर्णामात इः स्यात्। एधेते एधन्ते। एधसे एधेथे एधध्वे। एधे एधावहे एधामहे १। एधेत एधेयाताम् एधेरन्। एधेथाः एधेयाथाम् एधेध्वम्। एधेय एधेवहि एधेमहि २। एधताम् एधेताम् एधन्ताम्। एधस्व एधेथाम् एधध्वम्। एधै एधावहै एधामहै ३।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**स्वरादेस्तास्विति वृद्धौ ऐधत ऐधेताम् ऐधन्त । ऐधथाः ऐधेथाम् ऐधध्वम् । ऐधे ऐधावहि ऐधामहि । ऐधिष्ट ऐधिषाताम् ॥ ११३ ॥**

'आता०' एषां चतुर्णामिति । आत्मनेपदे अद्यतनीपञ्चम्योः प्रथमत्रिकस्य द्विवचनम् आताम्, वर्त्तमानायाः प्रथमत्रिकस्य द्विवचनम् आते, अद्यतनीपञ्चम्योर्द्वितीयत्रिकस्य द्विवचनं आथाम्, वर्त्तमानाया द्वितीयत्रिकस्य द्विवचनं आथे इति । आदिति किम्? मिमाताम् मिमाते मिमाथाम् मिमाथे ॥ ११३ ॥ अद्यतनीप्रथमत्रिकबहुवचने सिजागमे इडागमे सूत्रम् ।

## अनतोऽन्तोऽदात्मने ॥ ११४ ॥ [ सि० ४।२।११४ ]

**अनतः परस्यात्मनेपदस्यान्तोऽत्स्यात् । ऐधिषत । ऐधिष्ठाः ऐधिषाथाम् ॥ ११४ ॥**

'अन०' अन्त इति षष्ठ्येकवचनान्तम् । ततश्च आत्मनेपदसम्बन्धिनोऽन्त इत्यस्यावयवस्य अत् इत्ययमादेशः । अनत इति किम्? पचन्ते पच्यन्ते । आत्मनेपदस्येति किम्? चिन्वन्ति ॥ ११४ ॥ द्वितीयत्रिकबहुवचने सिजागमे इडागमे च सूत्रम् ।

## सो धि वा ॥ ११५ ॥ [ सि० ४।३।७२ ]

**धातोर्धादौ प्रत्यये (सो) लुग् वा स्यात् । ऐधिध्वम् । पक्षे नाम्यन्तस्थेति सिचः षत्वे तस्य तृतीयस्तृतीय इति डत्वे तवर्गश्चवर्गश्चेति धस्य ढत्वे ऐधिड्ढ्वम् । ऐधिषि ऐधिष्वहि ऐधिष्महि ॥ ११५ ॥**

'सो धि०' सिच्यनुवर्त्तमाने सग्रहणं सामान्यसकारपरिग्रहार्थम्, तेन प्रकृतिसकारस्यापि वा लुग् भवति यथा चकाधि चकाद्धि आशाध्वम् आशाद्ध्वम् । विकल्पं नेच्छन्त्येके । अन्ये तु सिच एव नित्यं लोपमिच्छन्ति ॥ ११५ ॥ परोक्षायां सूत्रम्—

## गुरुनाम्यादेरनृच्छ्रूर्णोः ॥ ११६ ॥ [ सि० ३।४।४८ ]

**गुरुर्नाम्यादिर्यस्य तस्माद्धातो ऋच्छ्रूर्णुवर्जात्परस्याः परोक्षाया आम् स्यात् । आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते । अनुर्विपर्यासव्यवहितनिवृत्त्यर्थः । एधाम्बभूव एधाम्बभूवतुः एधाम्बभूवुः इत्यादि प्राग्वत् ॥ ११६ ॥**

'गुरु०' गुरुग्रहणं किम्? इयेष । नामिग्रहणं किम्? आनर्च । आदिग्रहणं किम्? निनाय । 'ईङ्च् गतौ' इत्यस्य तु व्यपदेशिवद्भावाद्भवति । अयाञ्चक्रे । आमं नेच्छन्त्येके तन्मते आमभावे ईये ईयाते ईयिरे इत्येव भवति । ईषतुः ईषुरित्यत्र सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न भवति । अनृच्छ्रूर्णोरिति किम्? आनर्च्छ प्रोर्णुनाव । अत एव ऋच्छप्रतिषेधात्संयोगे परे पूर्वो गुरुरिति ज्ञायते ।

ओणेर्ऋदित्करणान्नित्यमपि द्विर्वचनं ह्रस्वो बाधते 'तेन णौ ङे पूर्वं ह्रस्वे ततो द्वित्वे मा भवानिदिधत् । सनि एदिधिषते, आतशि एधमानः, घञि एधः, उणादौ अस् (९५२) इत्यसि एधः एधसी 'इन्धेरपि 'दशनावोदै०' (४।२।५४) इति ये 'येन्धिभ्यां यादेधौ च (९६८) आभ्यां मस् इमौ चादेशौ भवत इति वचनादेधसोः सिद्धिः । आमन्तादनुप्रयुक्तस्य कृग आत्मनेपदादिव्यवस्थामाह ॥ ११६ ॥

## आमः कृगः ॥ ११७ ॥ [ सि० ३।३।७५ ]



Jain Education International For Personal & Private Use Only www.jainelibrary.org

आमः परादनुप्रयुक्तात्कृग आम एव प्राग् यो धातुस्तस्मादिव कर्तर्यात्मनेपदं स्यात्। स चेदात्मनेपदार्हस्तस्मात्तत्प्रयोज्यमन्यथा परस्मैपदमिति। एधाञ्चक्रे। एधामास ६। एधिषीष्ट एधिषीयास्ताम् एधिषीरन्। एधिषीष्ठाः एधिषीयास्थाम् एधिषीध्वम्। एधिषीय एधिषीवहि एधिषीमहि ७। एधिता एधितारौ एधितारः। एधितासे एधितासाथे एधिताध्वे। एधिताहे एधितास्वहे एधितास्महे ८। एधिष्यते एधिष्येते एधिष्यन्ते। एधिष्यसे एधिष्येथे एधिष्यध्वे। एधिष्ये एधिष्यावहे एधिष्यामहे ९। ऐधिष्यत ऐधिष्येताम् ऐधिष्यन्त। ऐधिष्यथाः ऐधिष्येथाम् ऐधिष्यध्वम्। ऐधिष्ये ऐधिष्यावहि ऐधिष्यामहि १०। 'द्युति दीप्तौ'। लघोरुपान्त्यस्येति गुणे द्योतते १। द्योतेत २। द्योतताम् ३। अद्योतत ४॥ ११७॥

'**आम०**' कर्त्तर्यात्मनेपदं स्यादिति भवति न भवति चेति विधिप्रतिषेधावतिदिश्येते। ईहाञ्चक्रे ईक्षाञ्चक्रे इत्यफलवत्यपि भवति, बिभराञ्चकार जागराञ्चकारेति फलवत्यपि न भवति, यत्र तु पूर्वस्मादुभयं तत्र फलवत्यफलवति चोभयं भवति बिभराञ्चक्रे बिभराञ्चकार (पाचयाञ्चक्रे पाचयाञ्चकार)। कृग इति किम्? करोतेरेव यथा स्यात् इह माभूत् ईक्षामास ईक्षाम्बभूव। '**स्पर्द्धि** सङ्घर्षे' सङ्घर्षः पराभिभवेच्छा। स्पर्द्धते भ्रातुः—भ्रात्रा सह स्पर्द्धां करोतीत्यर्थः। पस्पर्द्धे। सनि पिस्पर्द्धिषते यङि पास्पर्द्ध्यते यङ्लुपि पास्पर्द्धीति। दिवि 'यङ् तुरुस्तो०' (४।३।६४) रितीति अपास्पर्द्धीत्। सिचि 'स्तेः सूद्धां च रुर्वा' (४।३।७९) इति सिचो लुकि धस्य रुत्वे 'रो रे लुगिति सेर्लुकि अस्य दीर्घे च अपास्पाः 'इङित०' (५।२।४४) इत्यने स्पर्द्धनः अकर्मकोऽयम्। स्पर्द्धयति मैत्रमित्यत्राणिगि प्राणिकर्तृकोऽपि परस्मैपदम्, 'गतिबोध०' (२।२।५) इत्यणिक्कर्तुः कर्मत्वं च। स्पर्द्धमानः स कृष्णमिति तु कृष्णं प्राप्येत्यध्याहारः। बहुलमितीष्णौ मेरुं स्पर्द्धिष्णुनेवान्यो धृतो नाको हिमाद्रिणा। 'क्तेटो०' (५।३।१०६) इत्यः स्पर्द्धा घञि स्पर्द्धः। '**गाधृङ्** प्रतिष्ठालिप्साग्रन्थेषु' प्रतिष्ठा आस्पदम्, लब्धुमिच्छा लिप्सा, ग्रन्थनं ग्रन्थः, प्रतिष्ठायामकर्मकोऽयम्, लिप्साग्रन्थयोः सकर्मकः। गाधते जगाधे ऋदित्त्वाद् ङे न ह्रस्वः अजगाधत् सनि जिगाधिषते यङि जागाध्यते यङ्लुपि जागाधीति अचि अगाधमतलस्पर्शम् 'इङित०' इत्यने गाधनः उणादौ 'पदिपठि०' (६०७) इति इः गाधिः विश्वामित्रपिता। '**बाधृङ्** रोटने' रोटनं प्रतिघातः बाधते ङे अबबाधत् 'इङित०' इत्यने बाधनः 'क्तेट०' इत्यः बाधा घञि बाधः बाहुरिति तु मिवहीति (७२६) णित्यौ वहेः। '**दधि** धारणे' दाने इति **कौशिकः** दधते देधे दधिता यङ्लुपि दादधीति दादद्धि। णौ ङे अदीदधत् अचि दधः। उणादौ पदिपठि० (६०७) इति इः दधिः। '**बधि** बन्धने वैरूप्ये' 'शान्दान्०' (३।४।७) इति सनीतो दीर्घे च बीभत्सते अर्थान्तरे तु बधते। 'न जनवधः' (४।३।५४) इति वृद्ध्यभावे अबधि बधकः उणादौ पदिपठि० इति इः बधिः 'बधण् संयमने बाधयति'। **नाधृङ्** नाथृङ्वत्। उपतापैश्वर्याशीर्याञ्चास्वर्थेषु नाथृङ् वदयं वर्त्तते, लाघवार्थमेवं निर्देशः। वर्णक्रमानुसारेण नैकत्राधीतौ। नाधते। (येषां तु णोपदेशोऽयं तन्मते प्रणाधते परिणाधते) ननाधे नाधिता इति धान्ताः सप्त सेटश्च। '**पनि** स्तुतौ' 'गुपौधूप०' (३।४।१) इत्याये पनायति जिनम्। इङित्त्वाभावादत्र शेषात्परस्मैपदम्। **ये** तु स्वार्थिकप्रत्ययस्य प्रकृतिवद्ग्रहणाद्यथा यप्रत्ययान्तस्य प्रकृत्यर्थवाचित्वं तथेदित्त्वमपीति प्रतिपन्नास्**तन्मते** 'इङितः कर्त्तरि' (३।३।२२) इत्यात्मनेपदे पनायते जिनम्। एवं पणायते 'अशवि ते वेति वाये पनायिष्यते पनिष्यते उणादौ तप्यणि० (५६९) इत्यसे पनसः फलवृक्षः, फणस इति फणेः फनसतामरसादयः। (५७३) इत्यसे निपातनात्। '**मानि** पूजायाम् विचारे' 'शान्दान्मानिति' सनि पूर्वस्येतो दीर्घे च मीमांसते

Jain Education International For Personal & Private Use Only www.jainelibrary.org

धर्मम् 'शंसिप्रत्ययात्' (५।३।१०५) इत्यः मीमांसा। अर्थान्तरे घञि मानः। अनटि माननम्। णौ मानयति। उणादौ मावावदि० (५६४) इति मांसम् मानिभ्राजेर्लुक् च (८५९) इति तृः माता 'मानण् पूजायाम्' 'युजादेर्नवा' (३।४।१८) इति वा णिचि मानयति मानति। इति नान्तौ द्वौ सेटौ २। **'तिपृङ् ष्टिपृङ् ष्टेपृङ् क्षरणे'** तेपते तितेपे। तेपिता, आगमशासनमनित्यमितीडभावे तेप्ता। णौ ङे अतितेपत् 'वौ व्यञ्जनादेः०' (४।३।२५) इति क्त्वासनोर्वा कित्त्वे तिपित्वा तेपित्वा, तितिपिषते तितेपिषते। ष्टिपृङ् ष्टेपृङ् 'षः स०' (२।३।९८) इति सत्वे स्तेपते २। षोपदेशात्षत्वे तिष्टिपे तिष्टेपे। णौ ङे अतिष्टिपत् अतिष्टेपत्। क्ते स्तिपितः स्तेपितः। **'तेपृङ् कम्पने च'** चकारात्क्षरणे तेपते तितेपे तेपिता अतितेपत् **'टुवेपृङ् केपृङ् गेपृङ् कपुङ् चलने'** वेपते विवेपे अविवेपत् ट्वित्त्वादथौ वेपथुः 'न ख्यापूग्भूभाकमगमप्यायवेपो णेश्च' (२।३।९०) इति वक्ष्यमाणप्रतिषेधाण्णत्वाभावे प्रवेपनम्। उणादौ विपिनाजिनादयः (२८४) इतीने निपातनात् विपिनं गहनम्। केपृङ् केपते चिकेपे अचिकेपत्। गेपृङ् गेपते जिगेपे अजिगेपत्। कपुङ् उदित्त्वान्ने 'म्नां धुड्वर्गे०' (१।३।३९) इति मत्वे कम्पते चकम्पे कम्पिता 'चल्याहारार्थे०' (३।३।१०८) इति फलवत्कर्त्र्यपि ण्यन्तात्परस्मैपदम् कम्पयति शाखाम् 'गतिबोध०' (२।२।५) इत्यणिक्कर्तुरत्र कर्मत्वम् भीष्यादिभ्योऽप्रत्ययेनैव भीषादिसिद्धावङ्विधानं णिलुकोऽनित्यत्वज्ञापनार्थम्, तेनाचि णेर्गुणे कम्पया 'लङ्गिकम्प्यो०' (४।२।४७) इति नलुकि विकपितः। अङ्गविकृतेरन्यत्रेदित्त्वान्नलोपाभावे कम्पितः शीलाद्यर्थविवक्षायां चालशब्दार्थादित्यने कम्पनः 'स्म्यजस०' (५।२।७९) इति रे कम्प्रः। 'क्तेट०' (५।३।१०६) इत्यः कम्पा। उणादौ अम्भिकुण्ठि० (६१४) इति इर्नलुक् च कपिः। कपोल इति कपेः सौत्रस्यौले (४९३)। **'केपृङ्गेपृङौ गतावपि'**। **'ग्लेपृङ् दैन्ये च'** चकाराच्चलने, गतावप्यन्ये। ग्लेपते जिग्लेपे ग्लेपिता। ऋदित्त्वात् ङे न ह्रस्वः अजिग्लेपत्। **'मेपृङ् रेपृङ् लेपृङ् गतौ'** मेपते मिमेपे ङे अमिमेपत् एवं रेपते रिरेपे ङे अरिरेपत् **रेपृः** शब्देऽपीत्येके। 'लेपते लिलेपे अलिलेपत्। देशान्तरप्राप्तिहेतुर्गतिस्तत्रैव स्थितस्य स्पन्दनं चलनमिति पृथगेषां पाठः। **हेपृङ्** चेति **कौशिकः।** **त्रपौषि** लज्जायाम्। त्रपते 'तृत्रपफल०' (४।१।२५) इत्येत्वे द्वित्वाभावे च त्रेपे। औदित्त्वाद्वेट् त्रप्ता त्रपिता 'वेटोऽपतः' (४।४।६२) इति क्तयोर्नेट् त्रप्तः त्रप्तवान् 'आसुयुवपि०' (५।१।२०) इति यापवादे घ्यणि अपत्राप्यम्। 'भ्राज्यलङ्कृग्०' (५।२।२८) इति इष्णावपत्रपाशीलादिः अपत्रपिष्णुः। षित्वादङि त्रपा अपत्रपा। उणादौ भृमृतॄ० (७१६) इत्युः त्रपुः। **'गुपि** गोपनकुत्सनयोः' गर्हायां सनि जुगुप्सते। अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति, यं समुदायं सोऽवयवो न व्यभिचरति। न व्यभिचरति च गुपिर्गर्हायां सन्नन्तसमुदायमितीङित इत्यात्मनेपदम् **'स्वार्थे'** (४।४।६०) स्वार्थे विहितस्य सन इड् न भवति इतीडभावः। इच्छासन्नन्तादेव सनो निषेधात् 'तुमर्हात्०' (३।४।२१) इति जुगुप्सिषते 'शंसिप्रत्ययात्' (५।३।१०५) इत्यः जुगुप्सा। गर्हाया अन्यत्र सनोऽभावे अर्थान्तरेऽपि प्रायेण त्यादयो नाभिधीयन्ते इत्यत्र प्रायोग्रहणात् गोपते। अनटि गोपनम्। क्तौ गुप्तिः। 'गुपौ रक्षणे' गोपायति। 'गुपच् व्याकुलत्वे' गुप्यति। 'गुपण् भासार्थः' गोपयति। इति पान्ताश्चतुर्दश सेटश्च ॥ १४ ॥ **'अबुङ् रबुङ् शब्दे'** अम्बते 'अनात०' (४।१।६९) इति पूर्वस्यात्वे ने च आनम्बे, अचि कर्मणि घञि वा अम्बा। उणादौ शमाम्य० (४६२) इति अम्ब्लो रसः॥ रबुङ् रम्बते ररम्बे रम्बिता। के रम्बते इत्यचि करम्बः। कृगो वा 'कृकडिकटि०' (३२१) इत्यम्बे करम्बः। **'लबुङ्** अवस्रंसने च' चकाराच्छब्दे, लम्बते प्रलम्बते अवलम्बते आलम्बते



Jain Education International For Personal & Private Use Only www.jainelibrary.org

उल्लम्बते विलम्बते इत्यनेकार्थत्वमुपसर्गद्योतितमन्यत्राप्युदाहार्यम् । णके लम्बिका त्रिकटा । विलम्बिका शकृद्विलम्बः । अचि लम्बः । उणादौ नञो लम्बेर्न लुक् च ( ८३८ ) इति णिदूः अलाबूः । अलम्बुसेति त्वलतेरम्बुसे ( ५८५ ) अलम्बुसा नाम शाकम् । '**कबृङ् वर्णे**' वर्णः वर्णनं शुक्लादिश्च । कबते चकबे कबिता । ऋदित्त्वाद् ङे न ह्रस्वः अचकाबत् । घ्यणि काव्य(ब्य?)म् । उणादौ जठर० (४०३) इत्यरे कबरः कबरी । पदिपठि० (६०७) इति इः कबिः । कर्बुर इति तु कर्बेरोष्ठ्यान्त्यस्य वाश्यसि० (४२३) इत्युरे । '**क्लीबृङ् अधार्ष्ट्ये**' क्लीबते चिक्लीबे । ङे अचिक्लीबत् 'नाम्युपान्त्य०' (५।१।५४) इति के क्लीबम् । '**क्षीबृङ् मदे**' क्षीबते चिक्षीबे अचिक्षीबत् 'नाम्युपान्त्य०' इति के क्षीबः प्रक्षीबः । क्तयोः 'अनुपसर्गाः क्षीब०' ( ४।२।८० ) इति निपातनात् क्षीबः क्षीबवान्, उपसर्गात्तु प्रक्षीबितः प्रक्षीबितवान् । एते च कबृङादयो यद्यपि दन्त्यौष्ठ्यान्ता अपि काव्यादिशब्देषु श्रूयन्ते **तथापि** वृद्धैरोष्ठ्यान्त्यमध्ये पठितत्वादस्माभिस्तथैव पठिताः । इति बान्ताः षट् सेटश्च ॥ ६ ॥ '**शीभृङ् वीभृङ् शल्भि कत्थने**' शीभते ङे अशिशीभत् ऋच्छिचटि० (३९७) इत्यरे शीभरः हस्तिहस्तमुक्तो जललवः । वीभृङ् वीभते । शल्भि शल्भते अशशल्भत् । त्रयोऽपि क्ते सेट इति 'क्तेट०' ( ५।३।१०६ ) इत्यः शीभा वीभा शल्भा । '**वल्भि भोजने**' वल्भते घञि वल्भः 'क्तेट०' इत्यः वल्भा । '**गल्भि धार्ष्ट्ये**' गल्भते अचि प्रगल्भः 'क्तेट०' इत्यः प्रगल्भा । प्रगल्भ इवाचरतीति गल्भक्लीबहोडात्त्विति ङिति क्विपि 'धातोरनेकस्वरात्०' ( ३।४।४६ ) इति परोक्षाया आमि प्रगल्भाञ्चक्रे; क्विपो ङित्त्वादात्मनेपदम् ॥ '**रेभृङ् अभुङ् रभुङ् लभुङ् शब्दे**' रेभते 'क्षुब्धविरिब्ध०' ( ४।४।७० ) इति निपातनात् विरिब्धः स्वरः, विरेभितमन्यत् । ऋदित्त्वाण्णौ ङे ह्रस्वाभावे अरिरेभत् । अभुङ् अम्भते 'अनात०' ( ४।१।६९ ) इति आनम्भे । अम्भ इति अमेर्भहौ चान्ताविलमते रूपम् । रभुङ् रम्भते अचि रम्भा कदली । करम्भः दधिसक्तवः । क्ते रम्भितः । लभुङ् लम्भते ललम्भे क्ते लम्भितः अचि घञि वा लम्भः ॥ '**ष्टभुङ् स्कभुङ् ष्टुभुङ् स्तम्भे**' । स्तम्भः क्रियानिरोधः 'षः स०' (२।३।९८) इति सत्वे उदित्त्वान्ने च स्तम्भते तस्तम्भे अचि घञि वा स्तम्भः । अङ्गप्रतिस्तब्धनिस्तब्ध इति षत्वे विष्टम्भः । 'अवाच्चाश्रयोर्जाऽविदूरे' ( २।३।४२ ) अवष्टम्भते दण्डम् अवष्टम्भते शूरः । अवष्टब्धे सेने 'उदः स्था०' (१।३।४४) इति सलुकि उत्तम्भते । णौ सनि षत्वे तिष्टम्भयिषते । टपरः षकारोऽयमित्येके, तन्मते टिष्टम्भयिषते टाष्टम्भ्यते विष्टम्भते । स्तभ्यते इति तु स्तभ्नातेः ॥ **स्कभुङ्** स्कम्भते स्कम्भ्यते चस्कम्भे स्कम्भिता । विष्कभ्यते इति तु स्कभ्नातेः । 'स्तम्भू स्कम्भू सौत्रौ स्तः' स्तभ्नाति स्तभ्नोति 'स्तम्भूस्तुम्भूस्कम्भूस्कुम्भूस्कोःश्ना च' (३।४।७८) स्तम्भ्वादिभ्यः सौत्रेभ्यो धातुभ्यः स्कुगश्च कर्तरि विहिते शिति श्ना श्नुश्चप्रत्ययौ पर्यायेण भवत इति द्वैरूप्यम् । एवं स्कभ्नाति स्कभ्नोतीत्यपि । वेः 'स्कभ्नः' ( २।३।५५ ) इति षत्वे विष्कभ्नः । ष्टुभुङ् 'षः स०' ( २।३।९८ ) इति षत्वे स्तोभते दोषः । षोपदेशात्षत्वे तुष्टुभे 'उपसर्गात्सुग०' ( २।३।३९ ) इति षत्वे अभिष्टोभते । ऊदित्त्वादूदितो वेति क्त्वि वेट् स्तुब्ध्वा । इटि 'वौ व्यञ्जनादेः' ( ४।३।२५ ) इति वा कित्त्वे स्तुभित्वा स्तोभित्वा । वेट्त्वात् क्तयोर्नेट् स्तुब्धः स्तुब्धवान् । घञि स्तोभः । उणादौ ककुप्० ( ९३२ ) इति कर्मणि क्विपि त्रिष्टुप् अनुष्टुप् । स्तुम्भू इति सौत्रस्य स्तुभ्नाति स्तुभ्नोति । '**जभुङ् जभैङ् जृभुङ् गात्रविनामे**' जभुङ् जम्भते जम्भ्यते जजम्भे क्ते जम्भितः अने जम्भनः । जभैङ् 'जभः स्वरे' ( ४।४।१०० ) इति ने जम्भते । ऐदित्त्वात्क्तयोर्नेट् जब्धः जब्धवान् । जृभुङ् जृम्भते जजृम्भे जृम्भिता जृम्भितः जृम्भितवान् क्ते सेट्त्वात् 'क्तेट०' ( ५।३।१०६ ) इत्यः जृम्भा । घञि जृम्भः । '**रभिं**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

राभस्ये' राभस्यं कार्योपक्रमः **'रभोऽपरोक्षाशवि'** (४।४।१०२) रभतेः स्वरात्परः परोक्षा शव्वर्जिते स्वरादौ प्रत्यये परे नोऽन्तः स्यात्। इति शवपरोक्षयोर्वर्जनान्नस्याभावे आरभते। अद्यतन्यां आरब्ध आरप्सातान् आरप्सन्त। आरेभे। अनुस्वारेत्वान्नेट् आरब्धा। 'रभलभ०' (४।१।२१) इति स्वरस्येत्वे द्वित्वाभावे च आरिप्सते। घञि आरम्भः, णौ आरम्भयति, णके आरम्भकः, 'साधौ' (५।१।१५५) इति णिनि साध्वारम्भी 'ख्णम् चाभीक्ष्ण्ये' (५।४।४८) इति णमि आरम्भमारम्भं याति। अचि रम्भः स्त्रियां रम्भा अनटि आरम्भणम्। एषु रभोपरोक्षेति नः 'शकितकि०' (५।१।२९) इति ये रभ्यम् आरभ्यम् संरभ्यम्। 'शकधृष०' (५।४।९०) इति तुमि आरभते भोक्तुम्। उणादौ दिवादि० (५७२) इति कित्यसे रभसः निर्विचारा प्रवृत्तिः। लभधातुं पुरस्ताद्वक्ष्यति। इति भान्ताः सप्तदश सेटश्च॥ १७॥ **'भामि क्रोधे'** भामते बभामे भामिता यङि बाभाम्यते। अत्र अतःपरस्यानुनासिकस्याभावात् 'मुरत०' (४।१।५१) इति मुरन्तो न भवति ये त्वत इति पूर्वस्य विशेषणं प्रतिपन्नास्तन्मते मौ बम्भाम्यते। यङ्लुपि वस्रसोर्मो न इति मस्य नत्वे बाभान्वः बाभान्मः बम्भान्वः बम्भान्मः क्विपि (पदान्ते) मो नत्वे प्रभान् 'नाम्नो नोऽनह्नः' (२।१।९१) इति न लुग् न भवति नत्वस्यासिद्धत्वात्। आवश्यके णिनि भामिनी। घञि भामः। उणादौ पञ्चमाड्डः (१६८) इति डे भाण्डम्। **'क्षमौषि सहने'** **'कमूङ्** कान्तौ' इमौ धातू वक्ष्यति। इति मान्तास्त्रयः सेटश्च॥ ३॥ **अयि**प्रभृतीन् **सप्त** वक्ष्यति। **'तयि णयि** रक्षणे च' चकाराद्गतौ, तयते तयिता 'णिन् चावश्यके' (५।४।३६) इति णिनि तायी। णयि 'पाठे धात्वादेः०' (२।३।९७) इति णस्य नत्वे नयते णोपदेशत्वाद् 'अदुरुपसर्गान्तरं०' (२।३।७७) इति णत्वे प्रणयते। नेये नयिता। मनादिषु पूर्ववत्। **दयि**धातुं वक्ष्यति। **'ऊयैङ्** तन्तुसन्ताने' ऊयते ऊयाञ्चक्रे ऊयिता ऐदित्त्वात्क्तयोर्नेट् ऊतः ऊतवान्, मनि यलुकि गुणे च स्योमा। एवं वनादिष्वपि। **'पूयैङ्** दुर्गन्धविशरणयोः' पूयते क्तयोर्नेट् पूतः पूतवान् अचि पूयः। स्त्रियां गौरादित्वात् ङ्यां पूयी। क्तौ पूतिः। अत्र केऽनिट्त्वात् 'क्तेट०' (५।३।१०६) इत्यप्रत्ययो न भवति। उणादौ दम्मृषि० (६५१) इति किति तौ पूतिः दुर्गन्धिः। **'क्नूयैङ्** शब्दोन्दनयोः' उन्दनं क्लेदनम् दुर्गन्धेऽपीत्येके, क्नूयते चुक्नूये क्नूतः क्नूतवान् णौ 'अर्त्ति०' (४।२।२१) इति पौ 'पुस्पौ' (४।३।३) इति गुणे च 'य्वोः०' (४।४।१२१) इति यलुकि च क्नोपयति। 'चेलार्थात्क्नोपेः' (५।४।५८) इति णमि चेलक्नोपं वृष्टो मेघः। 'न णिङ्य०' (५।२।४५) इति प्रतिषेधादनाभावे तृनि क्नूयनशीलः क्नूयिता। **'क्ष्मायैङ्** विधूनने' क्ष्मायते चक्ष्माये क्ष्मायिता (ऐदित्त्वात्) क्तयोर्नेट् क्ष्मातः क्ष्मातवान् णौ 'अर्त्ती'ति पौ 'य्वो' रिति यलुकि क्ष्मापयति तृनि पूर्ववत् क्ष्मायिता। **'स्फायैङ् ओप्यायैङ् तायृङ्'** एतान्पुरस्ताद्वक्ष्यति। इति यान्ताः सप्तदश सेटश्च॥ १७॥ **'वलि वल्लि संवरणे'** वलते 'अनादेशादे०' (४।१।२४) इत्येत्वद्वित्वाभावयोः 'नशस०' (४।१।३०) इति निषेधात् ववले वलिता क्ते उपोद्वलितः अचि वलः कुत्सितो वलः कुवलः स्त्रियां गौरादित्वात् ङ्यां कुवली बदरी घञि वालाः केशाः। कल्याणा वाला यस्या इति क्रोडादित्वादसहनञिति ङ्यभावे कल्याणवाला, श्वेतवालीति जातिवाचिनः 'पाककर्ण०' (२।४।५५) इति ङ्यां सिद्धम्। उणादौ भीण्शलि० (२१) इति के वल्कम्। स्यमिकषि० (४६) इति ईके वलीकं नीव्रम्। सृणीकास्तीक० (५०) इति ईके निपातनात् वल्मीकः नाकुः। कुगुवलि० (३६५) इत्यये वलयः कटकः। वलिपुषेः कलक् (४९६) वल्कलम् वलकं लातीति डे वा वल्कलम्। पदिपठि० (६०७) इति इः वलिः। फलिवलि० (७५८) इति गौ वल्गुः। दन्त्यो-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ष्ठ्यादिरयम् । 'बल प्राणनधान्यावरोधयोरिति त्वौष्ठ्यादिः बलति' । 'वर्षादयः क्लीबे' ( ५।३।२९ ) इत्यलि बलम् । वा ज्वलादीति णे बालः अचि बलः । उणादौ शलिबलि० ( ३४ ) इत्याके बलाका । बलेर्वोन्तश्च वा ( १३३ ) इत्यजे बल्वजः उलपः । बल्वजा सबुसो धान्यविशेषः । विष्टपोलप० ( ३०७ ) इत्यपि निपातनात् उलपः । 'वलण् प्राणने' घटादिश्चेत्येके वलयति । वल्लि वल्लते ववल्ले वल्लिता क्ते वल्लितः क्ते सेट्त्वात् 'क्तेट०' ( ५।३।१०६ ) इत्यः वल्ला अचि वल्लः कृशृगॄ० ( ३२९ ) इत्यभे वल्लभः मीमसि० ( ४२७ ) इत्यूरे वल्लूरं शुष्कमांसम् । वडिवटि० ( ५१५ ) इत्यवे वल्लवो गोपालः । पदिपठि० ( ६०७ ) इति इः वल्लिः लता नदिवल्लि० ( ६९८ ) इत्यरौ वल्लरिः मञ्जरी । 'शलि चलने च' चकारात्संवरणे । तालव्यादिः । शलते शेले शलिता उणादौ भीण्शलि० ( २१ ) इति के शल्कः शरणम् शलिबलि० ( ३४ ) इत्याके शलाका शल्यणेर्णित् ( ५९ ) इति ऊके शालूकः बलवान् कृशृगॄ० ( ३२९ ) इत्यभे शलभः । स्याछामा० ( ३५७ ) इति ये शल्यम् यावादित्वात्के शल्यकः । मृदिकन्दि० ( ४६५ ) इत्यले शललं श्वावित्सूची । शलमिति त्वचि । कमिवमि० ( ६१८ ) इति णिदिः शालिः शलेराटुः ( ७६३ ) शलाटुः ( कोमलं फलम् लस्जीर्ष्यिशलेरालुः (८२२) शलालुः ) वृक्षावयवः । 'शल गतौ' तालव्यादिः ज्वलादिः शलति । वा ज्वलादीति णे शाला । अचि शलं श्वाविद्रोम । 'मलि मल्लि धारणे' मलते मेले मलिता अचि मलः । कर्मणि घञि माला उणादौ कुगुवलि० ( ३६५ ) इत्यये मलयो गिरिः । मल्लिकणि० ( ४२८ ) इत्यूरे माल्लूरः बिल्वः । चुरादेराकृतिगणत्वाच्चुरादावदन्तः मलयति अचि परिमलः । मल्लि मल्लते ममल्ले अचि मल्लः गौरादित्वात् ङ्यां मल्ली विचकिलः । णके मल्लकः स्त्रियां मल्लिका उणादौ वृकृनृ० ( २७ ) इत्यके मल्लकः शरावः मल्लिका विचकिलः शरावश्च । 'भलि भल्लि परिभाषणहिंसादनेषु' भलते बभले भलिस्थाने ओष्ठ्यादिं बलिमेके पठन्ति । बलते 'अनादेशादे०' ( ४।१।२४ ) इत्येत्वद्वित्वाभावयोः बेले । 'भलिण् आभण्डने' निभालयते उणादौ मृमन्यञ्जि० ( ५८ ) इत्यूके भालूकः ऋक्षः । भल्लि भल्लते बभल्ले करणे 'व्यञ्जनाद्०' ( ५।३।१३२ ) इति घञि भल्लः क्षुरप्रः । उणादौ कणिभलेर्दीर्घश्च वा ( ६० ) इत्यूके भल्लूको भालूकश्च ऋक्षः । पदिपठि० ( ६०७ ) इति इः भल्लिः । 'कलि शब्दसङ्ख्यानयोः' कलते आकलते सङ्कलते परिकलते प्रत्याकलते विकलते । चकले । अचि कलः । कर्मणि घञि कालः । 'तिकृतौ नाम्नि' ( ५।१।७१ ) इत्यके कलिका उणादौ भीण्शलि० ( २१ ) इति के कल्कः दम्भः क्रीकलि० (३८) इतीके कलिका कोरकम् उत्कलिकोर्म्मिः । कलम इति तु 'कडत् मदे' इत्यस्य सृपृप्रथि० ( ३४७ ) इत्यमे डस्य लत्वे च सिद्धम् । स्याछामा० (३५७) इति ये कल्यं प्रातः । कुलिलुलि० ( ३७२ ) इत्याये कुलायः त्रिपुटधान्यम् । मृदिकन्दि० ( ४६५ ) इत्यले कललं शुक्रशोणितमलः कल्यनिमहि० ( ४८१ ) इतीले कलिलं व्याप्तम् । ऋपॄनहि० ( ५५७ ) इत्युषे कलुषं पापम् । कलेर्मषः ( ५६२ ) कल्मषं पापम् । कुलेश्चमाषक् ( ५६३ ) कुल्माषः शबलः । 'कलिकुलिभ्यां मासक् ( ५८४ ) कल्मासः शबलः । पदिपठि० ( ६०७ ) इति इः कलिः । 'कलण् क्षेपे' कालयति अचि कालः, 'णिवे०' ( ५।३।१११ ) इत्यने कालना । स्वरेभ्यः ( ६०६ ) इति इः कलिः । कालिकेति तु कालाच्चौरादयकञि । 'कलण् सङ्ख्यानगत्योः' अदन्तः कलयति कलना । भीषीभूषीत्यत्र बहुवचनादङि कला । 'कल्लि अशब्दे' शब्दस्याभावोऽशब्दत्वं तूष्णीम्भावः शब्दार्थोऽयमित्येके । अव्यक्तशब्दार्थ इत्यपरे । कल्लते चकल्ले अचि कल्लः उणादौ पिच्छोलकल्लोल० (४९५) इत्योले कल्लोलः । इति लान्ता नव सेटश्च ॥ ९ ॥ 'तेवृङ् देवृङ् देवने' तेवते देवते ऋदित्त्वात् ङे न ह्रस्वः अतितेव-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अदिदेवत् यङि तेतेव्यते यङ्लुपि तेतेवीति देदेवीति पक्षे 'अनुनासिके च०' (४।१।१०८) इति वस्योटि गुणे च तेतयो(वो)ति देदयो(वो)ति । क्लियेचोङिति पक्षे 'य्वोः' ( ४।४।१२१ ) इति वलुपि तेतेति देदेति । मनि 'अनुनासिके च०' इति वस्योटि गुणे च सुतयोमा सुदयोमा । वनि 'य्वो'रिति वलुकि सुतेवा । क्विपि ऊटि सुतयूः । विचि 'य्वो'रिति वलुकि सुतेः । क्तेरपवादः 'क्तेटो०' (५।३।१०६) इत्यः तेवा देवा । 'परेर्देवि०' ( ५।२।६५ ) इति घिनणि परिदेवी । 'उपसर्गाद्देवृदेवि०' (५।२।६९) इति णके आदेवकः । उणादौ ऋच्छिचटि० (३९७) इत्यरे देवरः मृदिकन्दि० (४६५) इत्यले देवलः ऋषिः । देवट इति तु ( दीव्यतेः ) दिव्यवि० ( १४२ ) इत्यटे । **षेवृङ्प्रभृतीन् दश वक्ष्यति** । 'रेवृङ् **पवि** गतौ' रेवृङ् प्लुतिगतावित्यन्ये, प्लुतिभिर्गतिः प्लुतिगतिः । रेवते ङे अरिरेवत् 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के रेवा नर्मदा । उणादौ तृजि० ( २२१ ) इत्यन्ते रेवन्तः सूर्यपुत्रः । रेवती तु रीयतेर्विचि मतौ ङ्यां रूपं भवति । पवि पवते 'इङित०' ( ५।२।४४ ) इत्यने पवनः । इति वान्ताश्चतुर्दश सेटश्च ॥ १४ ॥ '**काशृङ्** दीप्तौ' काशते ङे अचकाशत् अचि काशः आकाशः सङ्काशः प्रकाशः 'नामिनः काशे' (३।२।८७) इति दीर्घे प्रतीकाशः नीकाशः । घञि काशः । उणादौ वनिकणि० ( १६२ ) इति ते काष्ठम् । पदिपठि० ( ६०७ ) इति इः काशिः । '**क्लेशि** विबाधने' क्लेशते क्ते क्लेशितः 'क्तेट' इत्यः क्लेशा घञि क्लेशः । इति शान्तौ द्वौ सेटौ च ॥ २ ॥ '**भाषि** च व्यक्तायां वाचि' प्रकृतेः परश्चकारः प्रकृतिमनुकर्षति तेन क्लेशि भाषिश्च व्यक्तायां वाचि । क्लेशि-रुदाहृत एव । भाषि भाषते । णौ ङे 'भ्राजभास०' ( ४।२।३६ ) इति वा ह्रस्वे अबीभषत् अब-भाषत् । क्ते भाषितः 'क्तेट०' इत्यः भाषा । घञि भाषः । घ्यणि भाष्यत इति भाष्यम् करणे वा बहुलमिति घ्यण् 'निन्दहिंस०' ( ५।२।६८ ) इति णके व्याभाषणशीलो व्याभाषकः । '**ईषि** गति-हिंसादर्शनेषु' ईषते 'गुरुनाम्यादे०' ( ३।४।४८ ) इति ईषाञ्चक्रे ईषितः 'क्तेट०' इत्यः ईषा 'नाम्यु-पान्त्य०' ( ५।१।५४ ) इति के वा रूपम् । उणादौ ऋच्यृजि० ( ४८ ) इति ईके ईषीका काशः । इषीकेति तु 'इषत् इच्छायाम्' इत्यस्य इषुरपीच्छतेः । पृकाहृषि० ( ७२९ ) इति किर्यौ रूपम् 'ईष उञ्छे' ईषति । '**गेषृङ्** अन्विच्छायाम्' अन्विच्छा अन्वेषणम् । गेषते जिगेषते अजिगेषत् । '**येषृङ्** प्रयत्ने' येषते अयियेषत् । '**जेषृङ् णेषृङ् एषृङ् हेषृङ्** गतौ' जेषते अजिजेषत् । णेषृङ् 'पाठे धात्वादेः०' ( २।३।९७ ) इति नत्वे नेषते । णोपदेशत्वात् 'अदुरुपसर्गे०' ( २।३।७७ ) इति णत्वे प्रणेषते । निनेषे अनिनेषत् । नेष्टेति नयतेर्नियः पादादिरिति तृप्रत्यये रूपम् । एषृङ् एषते अन्वेषते एषाञ्चक्रे 'स्वरादेर्द्वितीयः ( ४।१।४ ) इति षेर्द्वित्वे अन्वेषिषते । ऋदित्त्वात् ङे न ह्रस्वः मा भवानेषिषत् । अत्राप्योणेरेव ऋदित्करणेन नित्यस्यापि द्वित्वस्य ह्रस्वेन बाधादह्रस्वस्य प्राप्तिः । क्ते अन्वेषितः । अन्विष्ट इति त्विच्छतेः । हेषृङ् हेषते जिहेषे अजिहेषत् क्ते हेषितः 'क्तेट०' ( ५।३।१०६ ) इत्यः हेषा । '**रेषृङ् हेषृङ्** अव्यक्ते शब्दे' रेषते रिरेषे अरिरेषत् 'क्तेट०' इत्यः रेषा । हेषते जिहेषे । क्ते हेषितम् । अजिहेषत् हेषा । **पर्षि** स्नेहने पर्षते पपर्षे । क्विपि तलुकि 'रात्सः' ( २।१।९० ) इति नियमात् 'पदस्य' ( २।१।८९ ) इति लोपाभावे सुपर्ट् । पार्ष्णिरिति तु पृषिहृषिभ्यां वृद्धिश्च ( ६३६ ) इति णौ । पर्षदित्यपि पृणातेः प्रःसद् ( ८९७ ) इति सदि । परिषदिति तु परिपूर्वात् सीदतेः क्विपि । 'घुषुङ् कान्तीकरणे' उदित्त्वान्ने घुंषते जुघुंषे घुंषिता । इति षान्ता द्वादश सेटश्च ॥ १२ ॥ '**स्रंसूङ्** प्रमादे' दन्त्यादिः प्रमादोऽवलेपः स्रंसते सस्रंसे क्ये स्रस्यते ऊदित्त्वात् क्त्वि वेट् स्रस्त्वा । इटि क्त्वेति कित्त्वाभावे स्रंसित्वा । वेट्त्वात् क्तयोर्नेट् स्रस्तः स्रस्तवान् 'वञ्चस्रंस०' ( ४।१।५० )

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यत्र ध्वंसिसहचरितस्य द्युतादिस्रंसेर्ग्रहणादस्य यङि न्यभावे सास्रस्यते 'स्रंसध्वंस०' (२।१।६८) इत्यत्र साहचर्यानाश्रयणादुभयोरपि ग्रहणात् क्विपि दत्वे उस्रासत् । **भ्रान्तो**ऽयमित्येके विस्रम्भते विस्रभ्यते । '**कासृङ् शब्दकुत्सायाम्**' शब्दस्य कुत्सा रोगः । कासते 'दयायास्०' (३।४।४७) इति परोक्षाया आमि कासाञ्चक्रे ऋदित्त्वात् ङे ह्रस्वाभावे अचकासत् । क्ते कासितम् । 'क्तेट०' इत्यः कासा । घञि कासः । विकास इति तु कसतेर्घञि । '**भासि टुभ्रासि टुभ्लासृङ् दीप्तौ**' भासते बभासे णौ ङे 'भ्राजभास०' (४।२।३६) इति वा ह्रस्वे अबीभसत् अबभासत् ग्रहादित्वाण्णिनि उद्भासी । 'भञ्जिभासि०' (५।२।७४) इति घुरे भासनशीलो भासुरः । 'स्थेश-भास०' (५।२।८१) इति वरे भास्वरः । 'दिद्युद्दद्०' (५।२।८३) इति क्विपि भाः भासौ भासः । भेति तु मृगयेच्छेति निपातनादङि आपि च भातेः । क्ते भासितः । 'क्तेट०' इत्यः भासा । घञि उद्भासः । उणादौ तॄजिभूवदि० (२२१) इत्यन्ते भासन्तः । णौ आमन्तेल्वयि भासयन्तश्च सूर्यः । टुभ्रासि 'भ्रासभ्लास०' (३।४।७३) इति वा श्ये भ्रास्यते भ्रासते 'जॄभ्रम०' (४।१।२६) इति वा स्वरस्यैत्वे द्वित्वाभावे च भ्रेसे बभ्रासे । णौ ङे 'भ्राजभास०' इति बहुवचनाद्वा ह्रस्वे अबिभ्रसत् अबभ्रासत् । द्वित्वादथौ भ्रासथुः । एवं टुभ्लासृङ् भ्लास्यते भ्लासते भ्लेसे बभ्लासे णौ ङे न ह्रस्वः अबभ्लासत् । भ्लासथुः ॥ '**रासृङ् णासृङ् शब्दे**' रासते ररासे । ङे अररासत् 'नाम्नि पुंसि च' (५।३।१२१) इति णके रासकः । उणादौ कृशॄ० (३२९) इत्यभे रासभः । रास्ना रस्नेति रसेर्णिद्वेति ने रसतेः (२६०) । णासृङ् 'पाठे धात्वादे०' (२।३।९७) इति नत्वे नासते । णोपदेशत्वात् 'अदुरुपसर्गा०' (२।३।७७) इति णत्वे प्रणासते, ननासे । ऋदित्त्वात् अननासत् अचि नासा णके नासिका । '**भ्यसि भये**' भ्यसते बभ्यसे । भेषृ इति **चन्द्रः** । भेषते । '**आङः शसुङ् इच्छायाम्**' । आङः इति, आङः पर एवायं प्रयुज्यते, नान्योपसर्गोऽत्रापि केवल इति ज्ञापनार्थम् । उदित्वान्ने आशंसते आशंस्यते आशशंसे । 'क्तेट०' इत्यः आशंसा । सनभिक्षेत्युः आशंसुः । प्रशस्यते शस्तम् (प्रशस्तम्?) । प्रशंसेति तु शंसू स्तुतावित्यस्य । '**ग्रसूङ् ग्लसूङ् अदने**' ग्रसते जग्रसे । यङि जाग्रस्यते । यङ्लुपि जाग्रसीति जाग्रस्ति । ऊदित्त्वात् क्त्वि वेट् ग्रस्त्वा ग्रसित्वा । वेट्त्वात् क्तयोर्नेट् ग्रस्तः ग्रस्तवान् । घञि ग्रासः । उणादौ ग्रसिहाग्भ्यां ग्राजिहौ च (३३९) इति मे ग्रामः । रुक्मग्रीष्म० (३४६) इति निपातनात् ग्रीष्मः । एवं ग्लसूङ् ग्लसते जग्लसे ग्लस्त्वा ग्लसित्वा । वेट्त्वात् क्तयोर्नेट् ग्लस्तः ग्लस्तवान् । घञि ग्लासः । '**घसुङ् करणे**' उदित्त्वान्ने घंसते जघंसे । मूर्द्धन्योऽयमिति **चन्द्रः** घंषते ।

इति सान्तास्त्रयोदश सेटश्च ॥ १३ ॥ **ईहि**-धातुं वक्ष्यति । '**अहुङ् पिलहि** गतौ' अंहते आनंहे अंहिता । उणादौ अभिकुण्ठि० (६१४) इति इनें लुक् च अहिः । तङ्किवङ्कि० (६९२) इति रौ अंह्रिः । अस् (९५२) इत्यसि अंहः पापम् अमेर्वा, अमेर्भहौ चान्तौ (९५२।६२) इत्यसि । 'अहुण् भासार्थः' अंहयति । **प्लिहि** प्लेहते पिप्लेहे । उणादौ श्वन्० (९०२) इत्यनि निपातनात् प्लीहा । '**गर्हि गल्हि** कुत्सने' गर्हते जगर्हे गर्हिता जागर्ह्यते । मनि सुगर्ह्मा । वनि सुगर्ह्वा । स्त्रियां 'क्तेट०' इत्यः गर्हा । श्वादिभ्य इति क्तौ गर्ढिः । घञि गर्हः । क्विपि 'रात्सः' (२।१।९०) इति नियमात् संयोगान्तलोपाभावे सुघर्ट् 'गर्हण् विनिन्दने' युजादित्वाद्वा णिचि गर्हति गर्हयति । गल्हि गल्हते जगल्हे यङि जागल्ह्यते मन्वादिषु पूर्ववत् । '**वर्हि वल्हि** प्राधान्ये' वर्हते ववर्हे अचि वर्हः प्रधानभूतः मुनिप्रवर्हः । वल्हि वल्हते ववल्हे चुरादौ वर्हयति वल्हयति । '**बर्हि बल्हि** परिभाषण-हिंसाच्छादनेषु' । दानेऽप्यन्ये । ओष्ठ्यादी एतौ । पूर्वौ तु दन्त्यौष्ठ्यादी बर्हते बबर्हे बर्हिता घञि बर्हः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रज्ञाद्यणि बार्हः फलबर्होऽस्तीतीने बर्हिणः बार्हिणः । बल्हि बल्हते बबल्हे बल्हिता 'हान्तस्थ०' (२।१।८१) इति अद्यतन्यां धस्य वा ढत्वे अबल्हिढ्वम् अबल्हिध्वम् उणादौ सृणीक० ( ५० ) इतीके निपातनात् बाल्हीकः । पदिपठि० ( ६०७ ) इति इः बल्हिः । बाहुलकाद्दीर्घे बाल्हयः । स्वार्थिके के बाल्हिका देशः क्षत्रियाश्च । **'वेहृङ् जेहृङ् वाहृङ् प्रयत्ने'** वेहते विवेहे वेहिता अविवेहत् वेहदिति तु हन्तेः । विहन्ति गर्भमिति वेहद्गर्भघ्नी गौः संश्वद्वेहत्० ( ८८२ ) इति निपातनात् । जेहृङ् जेहते अजिजेहत् । वाहृङ् वाहते अववाहत् 'क्षुब्धविरिब्ध०' (४।४।७०) इति क्ते निपातनादिडभावे बाढं भृशम् वाहितमन्यत् । **'द्राहृङ् निक्षेपे'** निद्राक्षेपे इत्येके । द्राहते दद्राहे द्राहिता अदद्राहत् । **'ऊहि वितर्के'** ऊहते **'उपसर्गादस्योहो वा'** ( ३।३।२५ ) उपसर्गात्पराभ्यामस्यत्यूहिभ्यां कर्त्तर्यात्मनेपदं वा स्यात् विपर्यस्यते विपर्यस्यति । अस्येति स्यनिर्देशोऽस्त्यसतिनिवृत्त्यर्थः, इति वात्मनेपदे समूहति समूहते **'उपसर्गादूहो ह्रस्वः'** ( ४।३।१०६ ) उपसर्गात् परस्य ऊहतेरूकारस्य क्ङिति यकारादौ परे ह्रस्वो भवति । इति क्ङिति यि ह्रस्वे अभ्युह्यात् समुह्यात् । अभ्युह्यते । समुह्यते 'गुरुनाम्यादे०' ( ३।४।४८ ) इति परोक्षाया आमि ऊहाञ्चक्रे । सनि 'स्वरादे०' ( ४।१।४ ) इति हेर्द्वित्वे ऊजिहिषते । क्ते ऊहितम् 'क्तेट०' इत्यः ऊहा । घञि ऊहः । **गाहूधातुं** वक्ष्यति । **'ग्लहौङ् ग्रहणे'** ग्लहते जग्लहे औदित्त्वाद्वेट् ग्लाढा अत्र 'ढस्तड्ढे' ( १।३।४२ ) इति ढो लुक् पूर्वस्यातो दीर्घश्च, इटि ग्लहिता वेट्त्वात् क्तयोर्नेट् ग्लाढः ग्लाढवान् 'सृग्लहः प्रजनाक्षे' ( ५।३।३१ ) इत्यलि अक्षाणां ग्लहः पणः । अक्षविषयादन्यत्र घञि ग्लाहः । **अयं गृहौङ् इत्येके ।** गर्हते गर्हिता गर्ढा गृढः गृढिः गृहं गृहाः । **'बहुङ् महुङ् वृद्धौ'** उदित्त्वान्ने बंहते उणादौ स्थावङ्किबंहि० ( ४८६ ) इति कित्युले नलुकि च बहुलः कृष्णपक्षः । बंहिबृहेर्नलुक् च ( ९९० ) इतीसि बहिः । बहुः बाहुरिति तु मिवहि० ( ७२६ ) इति वा णित्यौ वहेः । महुङ् मंहते ममंहे मंहिता । महानिति तु महेः द्रुहिबृहि० (८८४) इति कर्त्तरि । महीत्यप्यस्यैव पदिपठि० ( ६०७ ) इति इप्रत्ययेऽजन्तस्य वा ङ्याम् । 'बहुण् महुण् भासार्थौ बंहयति । इति हान्ता अष्टादश सेटश्च । **'दक्षि शैघ्र्ये च'** शैघ्र्यं शीघ्रता चकाराद्वृद्धौ, दक्षते अचि दक्षः उणादौ द्रुहि० ( १९४ ) इति इणे दक्षिणः दक्षिणा । श्रुदक्षि० ( ३७३ ) इत्याय्ये दक्षाय्यः गरुडः । **'धुक्षि धिक्षि** सन्दीपनक्लेशनजीवनेषु' । धुक्षते । मनि सुधुक्ष्मा । क्विप् लुकि 'संयोगस्यादौ०' ( २।१।८८ ) इति को लुकि सुधुट् क्ते सन्धुक्षितः । धिक्षि धिक्षते मनि सुधिक्ष्मा क्विपि सुधिट् । **'वृक्षि** वरणे' वृक्षते ववृक्षे ( यङि ऋमतामिति री ) वरीवृक्ष्यते । अचि घञि वा वृक्षः । मन्त्रादिषु धुक्षिवत् । **'शिक्षि** विद्योपादाने' शिक्षते शिशिक्षे शिक्षिता क्ते शिक्षितः 'क्तेट०' इत्यः । शिक्षा, णके शिक्षकः शिक्षयतीति तु शकेः सन्नन्तस्याजिज्ञासायां रूपम्, जिज्ञासायां तु शकेरप्यात्मनेपदमेव विद्यासु शिक्षते । **'भिक्षि याञ्चायाम्'** भिक्षते गां राजानम् । बिभिक्षे भिक्षिता 'सन् भिक्षा०' ( ५।२।३३ ) इत्युः भिक्षणशीलो भिक्षुः । वृङ्भिक्षीति टाके भिक्षाकः भिक्षाकी । क्ते भिक्षितः । 'क्तेट०' इत्यः भिक्षा । घञि भिक्षः । **केचिदलाभे लाभे चेत्याहुः । 'दीक्षि** मौण्ड्येज्योपनयननियमव्रतादेशेषु' । मौण्ड्यं वपनम् । इज्या यजनम् । उपनयनं मौञ्जीबन्धः । नियमः संयमः । व्रतादेशः संस्कारादेशः । दीक्षते दिदीक्षे 'इङित०' ( ५।२।४४ ) इत्यनस्य 'न णिङय०' ( ५।२।४५ ) इति प्रतिषेधात्तृनि दीक्षिता क्ते दीक्षितः 'क्तेट०' इत्यः दीक्षा । **केचित्तु** 'दीक्षि मौण्ड्ये' 'ज्यो (ऽ?)पनयनादिषु च' इति वृद्धपाठं भिन्दन्ति ज्यवते जीतः । **ईक्षिधातुं** वक्ष्यति । इत्यष्टौ क्षान्ताः सेटश्च । एतेषां च षान्तेषु पाठो युक्तो(पि) क्रमवैचित्र्यार्थं त्विह कृतः ॥ ११७ ॥

॥ इत्यात्मनेपदिनः ॥



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अथ द्युतादयः** रुपौङ्पर्यन्तास्त्रयोविंशतिरात्मनेदिनः सेटश्च वर्णक्रमेण वर्ण्यन्ते । तत्र पूर्वाचार्याम्नायानुरोधात्पूर्वं द्युतेः पाठः । **द्युति** दीप्ताविति इदित्त्वादात्मनेपदम् । विभक्तिचतुष्टयं स्पष्टम् । अद्यतन्यां सूत्रम्

## द्युद्भ्योऽद्यतन्याम् ॥ ११८ ॥ [ सि० ३।३।४४ ]

**द्युतादिभ्योऽद्यतनीविषये कर्तर्यात्मनेपदं वा स्यात् । अद्योतिष्ट । पक्षे ऌदिद्द्युतादिपुष्यादेः परस्मै इत्यङ् । अद्युतत् अद्योतिषाताम् अद्युतताम्–अद्योतिषत–अद्युतन् । अद्योतिष्ठाः–अद्युतः अद्योतिषाथाम्–अद्युततम् अद्योतिध्वम् २ अद्युतत । अद्योतिषम्-अद्युतम् अद्योतिष्व–अद्युताव अद्योतिष्म–अद्युताम ५ ॥ ११८ ॥**

**द्युद्भ्यो०** बहुवचनं गणार्थम् । अद्योतिष्टेति पक्षे शेषात्परस्मायिति परस्मैपदे 'ऌदिद्द्युतादि०' ( ३।४।६४ ) इत्यङि अद्युतत । एवं सर्वत्र रूपसिद्धिर्ज्ञेया । अद्योतिध्वमित्यत्र परोक्षाद्यतन्याशिषो धो ढ इति धस्य ढत्वे अद्योतिढ्वमिति द्वितीयं रूपं द्विकेनाङ्केन सूचितमेवमन्यत्रापि ज्ञेयम् ॥ ११८ ॥ परोक्षायां सूत्रम्—

## द्युतेरिः ॥ ११९ ॥ [ सि० ४।१।४१ ]

**द्युतेर्द्वित्वे पूर्वस्य उत इः स्यात् । दिद्युते दिद्युताते दिद्युतिरे । दिद्युतिषे इत्यादि ६ । द्योतिषीष्ट ७ । द्योतिता ८ । द्योतिष्यते ९ । अद्योतिष्यत १० । 'रुचि अभिप्रीत्यां च' । रोचते इत्यादि । एवं द्युतादयस्त्रयोविंशतिस्तत्र वृतादिपञ्चतो विशेषः । 'वृतूङ् वर्त्तने' । वर्त्तते ४ । अवर्त्तिष्ट अवृतत् ५ । ववृते ६ । वर्त्तिषीष्ट ७ । वर्त्तिता ८ ॥ ११९ ॥**

**द्युते०** पूर्वस्य उत इति पूर्वावयवसम्बन्धिन उकारस्य इः स्यादित्यर्थः । शेषं स्पष्टम् । यङि देद्युत्यते यङ्लुपि देद्युतीति देद्योत्ति देद्योत्तः देद्युतति । णौ ङे अदिद्युतत् । 'इङित०' ( ५।२।४४ ) इत्यने द्योतनशीलो द्योतनः । क्विपि विद्युत् । 'दिद्युद्दद्०' ( ५।२।८३ ) इति निपातनात् दिद्युत् आयुधम् 'वौ व्यञ्जनादेः' ( ४।३।२५ ) इति क्त्वासनोर्वा कित्त्वे द्युतित्वा द्योतित्वा । दिद्युतिषते दिद्योतिषते । उणादौ द्युतेरादेश्च जः (९९१) इतीसि ज्योतिः । स्वार्थिके (के) ज्योतिष्काः सूर्यादयः । 'रुचि अभिप्रीत्यां च' चकारादीप्तौ, अभिप्रीतिरभिलाषः । मैत्राय रोचते दधि । अत्र 'रुचिकृप्यर्थं०' ( २।२।५५ ) इति चतुर्थी । द्युतादित्वादङि अरुचत् अरोचिष्ट फलवत्कर्त्तरीगित इत्यात्मनेपदेऽणिगि प्राणीति परस्मैपदेन बाधिते परिमुहेति पुनर्विहिते परिरोचयते मित्रं चैत्राय 'रुच्याव्यथ्य०' ( ५।१।६ ) इति कर्त्तरि निपातनात् क्यपि रुच्यम् । भावे ध्यणि क्ते सेट्त्वात् कत्वाभावे रोच्यम् । क्ते रुचितः । 'भ्राज्यलङ्कृग्' ( ५।२।२८ ) इतीष्णौ रोचनशीलो रोचिष्णुः । 'इङित०' इत्यनेन रोचनः । घञि न्यङ्क्वादित्वात् कत्वे रोकः । 'करणाधारे' ( ५।३।१२९ ) इत्यनटि रोचनी दृषत् । ण्यन्तान्न्याद्यने रोचना वर्णजातिः । उणादौ रुवसिरसि० (२६९) इत्यने रोचनः चन्द्रः । विरोचनः सूर्यो दानवश्च । रोचना गोपित्तम् । रुक्मग्रीष्म० ( ३४६ ) इति निपातनात् रुक्मं हिरण्यम्, रुक्मो वर्णः सोऽस्यास्तीति रुक्मिणी 'नाम्युपान्त्य०' (६०९) इति किः रुचिः मत्वर्थे रे रुचिरम् । रुच्यर्चि० ( ९८९ ) इतीसि रोचिः । वसुभी रोचते वसुरोचिः आदित्यः । अथ टान्तास्त्रयः । 'घुटि परिवर्त्तने' घोटते जुघुटे अघुटत् अघोटिष्ट । णके घोटकः 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के घुटः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वार्थिके के घुटिका गुल्फास्थि । '**रुटि लुटि लुठि** प्रतिघाते' आद्यो दीप्तावित्यन्ये रोटते अरुटत् आरोटिष्ट के रुटः । वान्तोऽयमित्यन्ये' लुटि लोटते अलुटत् अलोटिष्ट । 'लुट विलोटने' लोटति 'लुटच् विलोटने' लुट्यति । अथ ठान्तः । लुठि लोठते अलुठत् अलोठिष्ट । 'लुठ उपघाते' लोठति 'लुठत् संश्लेषणे' लुठति । अथ तान्तः 'श्विताङ् वर्णे' श्वेतते शिश्विते अश्वितत् अश्वेतिष्ट आदित्त्वात् क्तयोर्नेट् श्वित्तः श्वित्तवान् 'नवा भावारम्भे' (४।४।७२) श्वेतितं श्वित्तमनेन प्रश्वित्तः प्रश्वितितः । घञि श्वेतः । उणादौ 'ऋज्यजि०' (३८८) इति किति रे श्वित्रं कुष्ठभेदः । अथ दान्तास्त्रयः । '**ञिमिदाङ् स्नेहने**' स्नेहनं स्नेहयोगः । मेदते मिमिदे अमिदत् अमेदिष्ट ञीत्त्वात् 'ज्ञानेच्छा०' (३।१।८६) इति वर्तमाने क्तः मिन्नः, अत्रादित्त्वात् नेट् मिन्नवान् । 'नवा भावारम्भे' इति वेट् प्रतिषेधे मिन्नमनेन मेदितमनेन प्रमिन्नः प्रमेदितः अत्रेटि नडीङिति कित्त्वप्रतिषेधाद्गुणः । लिहाद्यचि मेदः म्लेच्छः । भञ्जिभासीति घुरे मेदनशीलो मेदुरः । उणादौ चिमिदि० (४५४) इति त्रे मित्रम् । अस् (९५२) इत्यसि मेदः वसा 'ञिमिदाच् स्नेहने' मेद्यति । 'मिदुण् स्नेहने' मिन्दयति । '**ञिक्ष्विदाङ् ञिष्विदाङ्** मोचने च' चकारात् स्नेहने, मिदावत् । क्ष्वेदते चिक्ष्विदे अक्ष्विदत् अक्ष्वेदिष्ट क्ष्विण्णः क्ष्विण्णमनेन क्ष्वेदितमनेन प्रक्ष्विण्णः २ प्रक्ष्वेदितः २ । **डान्तो**ऽयमित्येके क्ष्वेडो विषः, क्ष्वेडा रवः । 'ञिक्ष्विदाच् मोचने च' क्ष्विद्यति । ञिष्विदाङ् 'षः स०' (२।३।९८) इति सत्वे स्वेदते 'नाम्यन्तस्था०' (२।३।१५) इति षत्वे सिष्विदे द्युताद्यङि अस्विदत् अस्वेदिष्ट ञीत्त्वात् सति क्ते स्विन्नः अत्रादित्त्वान्नेट् 'नवा भावारम्भे' (४।४।७२) इति स्विन्नमनेन (स्वेदितमनेन) प्रस्विन्नः प्रस्वेदितः । 'वौ व्यञ्जनादेः' (४।३।२५) इति क्त्वासनोर्वा कित्त्वे स्विदित्वा स्वेदित्वा सिस्विदिषते सिस्वेदिषते अत्र 'णिस्तोरेव०' (२।३।३७) इति नियमान्न षत्वम् 'णिस्तोरेवे'ति स्विदेर्वर्जनाण्णौ सनि षत्वाभावे सिस्वेदयिषते । घञि स्वेदः । 'ञिष्विदाच् गात्रप्रक्षरणे' स्विद्यति । अथ भान्ताः पञ्च । '**शुभि** दीप्तौ' शोभते अशुभत् अशोभिष्ट 'नाम्युपान्त्य०' (५।१।५४) इति के शुभम् । (णौ) नन्द्यादित्वादने शोभनः । 'इङित०' (५।२।४४) इत्यने शोभनशीलो शोभनः । भिदादिनिपातनादङि शोभा । उणादौ ऋज्यजि० (३८८) इति किति रे शुभ्रः । 'शुभत् शोभार्थे' शुंभति अत्र मुचादीति नः । '**क्षुभि** सञ्चलने' सञ्चलनं रूपान्यथात्वम् । क्षोभते अक्षुभत् अक्षोभिष्ट 'क्षुब्धविरिब्ध०' (४।४।७०) इति निपातनादिडभावे क्षुब्धो मन्थः क्षुभितोऽन्यः 'क्षुभच् सञ्चलने' क्षुभ्यति 'क्षुभश् सञ्चलने' क्षुभ्नाति क्षुभ्नादित्वाण्णत्वाभावः । '**णभि तुभि** हिंसायाम्' 'पाठे०' (२।३।९७) इति नत्वे नभते णोपदेशत्वाद् 'अदुरुपसर्ग०' (२।३।७७) इति णत्वे प्रणभते । अनभत् अनभिष्ट । उणादौ अस्० (१५२) इत्यसि नभः । अणोपदेशोऽयमित्येके । तुभि तोभते अतुभत् अतोभिष्ट 'णभ तुभच् हिंसायाम्' नभ्यति प्रणभ्यति तुभ्यति । 'णभ् तुभश् हिंसायाम्' नभ्नाति प्रणभ्नाति तुभ्नाति । '**स्रम्भूङ्** विश्वासे' दन्त्यादिः । स्रम्भते सस्रम्भे अस्रभत् अस्रम्भिष्ट । ऊदित्वात् क्त्वि वेट् स्रब्ध्वा स्रम्भित्वा । क्त्वेति सेटः किस्वात् 'नो व्यञ्जनस्य०' (४।२।४५) इति नलोपाभावः । वेट्त्वात् क्तयोर्नेट् विस्रब्धः विस्रब्धवान् । 'वेर्विच०' (५।२।५९) इति घिनणि विस्रम्भशीलो विस्रम्भी । घञि विस्रम्भः । **हान्तो**ऽयमिति **कौशिकः** स्रंहते । अथ शान्तः **भ्रंशूङ् स्रंसूङ्** अवस्रंसने' । 'शिड्हे०' (१।३।४०) इत्यनुस्वारे भ्रंशते बभ्रंशे अभ्रशत् अभ्रंशिष्ट क्त्वि वेट् भ्रष्ट्वा भ्रंशित्वा । वेट्त्वात् क्तयोर्नेट् भ्रष्टः । संज्ञायां 'कुत्सित०' (७।३।३३) इति कपि भ्रष्टकः भ्रष्टवान् । यङि 'वञ्चस्रंस०' (४।१।५०) इति पूर्वस्यान्तो नीः बनीभ्रश्यते । क्तेऽनिट्त्वात्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

'क्तेट०' ( ५।३।१०६ ) इत्यप्रत्ययाभावे स्त्रियां क्तौ भ्रष्टिः। घञि भ्रशः। 'भ्रंशूच् अधःपतने भ्रश्यति। अथ सान्तौ स्रंसूङ् दन्त्यादिः, स्रंसते अस्रसत् अस्रंसिष्ट। सनि सिस्रंसिषते। यङि सनीस्रस्यते। यङ्लुपि सनीस्रंसीति, ऊदित्त्वात् क्त्वि वेट् स्रस्त्वा स्रंसित्वा, वेट्त्वात् क्तयोर्नेट् स्रस्तः स्रस्तवान्, क्विपि उखेन उखया वा स्रंसते उखास्रत्–अत्र 'स्रंसध्वंस०' ( २।१।६८ ) इति पदान्ते सस्य दः। 'घञ्युपसर्गः०' ( ३।२।८६ ) इति बाहुलकाद्दीर्घः। स्त्रियां क्तौ स्रस्तिः 'स्रंसूङ् प्रमादे' 'वञ्चस्रंस०' इत्यत्र ध्वंसिसहचरितस्य स्रंसेर्ग्रहणात् न्यभावे यङि सास्रस्यते। अङभावे अस्रंसिष्ट। स्रंसुध्वंसित्यत्र तूभयोर्ग्रहणात् क्विपि दत्वे उखास्रत्। 'ध्वंसूङ् गतौ च' चकारादवस्रंसने, ध्वंसते दध्वंसे अध्वसत् अध्वंसिष्ट। यङि 'वञ्चस्रंस०' इति पूर्वस्य नी दनीध्वस्यते ऊदित्त्वात् क्त्वि वेट् ध्वस्त्वा ध्वंसित्वा। वेट्त्वात् क्तयोर्नेट् ध्वस्तः ध्वस्तवान्। स्त्रियां क्तौ ध्वस्तिः घञि ध्वंसः क्विपि पर्णध्वत्।

अथ द्युताद्यन्तर्गणो वृतादिपञ्चकः। तथाचाह-वृतादिपञ्चतो विशेष ( पृ० ५६८ ) इति 'वृतूङ् वर्त्तने' इति वर्त्तनं स्थितिः। अद्यतन्यां द्युताद्यङि अवृतत्। अङऽभावपक्षे च अवर्त्तिष्टेत्यादि। अग्रे विभक्तित्रयं सुगमम् ॥ ११९ ॥ भविष्यतीक्रियातिपत्त्योः सूत्रम्—

## वृद्भ्यः स्यसनोः ॥ १२० ॥ [ सि० ३।३।४५ ]

**वृतादेः पञ्चतः स्यादौ प्रत्यये सनि च विषये कर्त्तर्यात्मनेपदं वा स्यात्। वर्त्तिष्यते। पक्षे ॥१२०॥**

**'वृद्भ्य०'** आत्मनेपदाभावपक्षे 'स्ताद्यशित०' ( ४।४।३२ ) इतीटि प्राप्तेऽपवादसूत्रम् ॥ १२० ॥

## न वृद्भ्यः ॥ १२१ ॥ [ सि० ४।४।५५ ]

**वृतादिपञ्चकात् स्ताद्यशितोऽनात्मने इट् न स्यात्। वर्त्स्यति ९। अवर्त्तिष्यत–अवर्त्स्यत् १०। 'स्यन्दौङ् स्रवणे'। स्यन्दते। औदित्त्वादिड्वा अस्यन्दिष्ट–अस्यन्त अस्यन्दिषाताम्–अस्यन्त्साताम् अस्यन्दिषत–अस्यन्त्सत ५। द्युद्भ्योऽद्यतन्यामिति परस्मैपदपक्षे अङि सति नो व्यञ्जनस्येति नलुकि। अस्यदत् अस्यदताम् अस्यदन् ५। सस्यन्दे सस्यन्दिषे सस्यन्त्से ६। स्यन्दिषीष्ट–स्यन्त्सीष्ट ७। स्यन्दिता स्यन्ता स्यन्दितासे–स्यन्तासे ८। स्यन्दिष्यते–स्यन्त्स्यते स्यन्त्स्यति ९। अस्यन्दिष्यत–अस्यन्त्स्यत अस्यन्त्स्यत् १० ॥ १२१ ॥**

**न वृ०।** अनात्मने इति आत्मनेपदनिमित्तं चेद्वृतादयो न भवन्ति। आत्मनेपदनिमित्तं च वृताद्यः स्यसनि श्वस्तन्यां कृपिर्विकल्पेन भवन्ति। सनि विवृत्सति विवर्त्तिषते। **नन्वमीषामात्मनेपदि**नामनात्मनेपदनिमित्तत्वं कथमित्यत्रोच्यते 'वृद्भ्यः स्यसनोः' 'कृपः श्वस्तन्याम्' ( ३।३।४६ ) इति सूत्राभ्यामित्यवेहि। ततश्च स्यसनोरप्येषां पाक्षिकत्वादनात्मनेपदनिमित्तत्वस्य यत्र तन्नास्ति तत्रेड्भवत्येव वर्त्तिष्यते अवर्त्तिष्यत विवर्त्तिषते विवर्त्तिषतुं विवर्त्तिषितव्यम्। यङि 'ऋमतां०' ( ४।१।५५ ) इति पूर्वस्य रीः वरीवृत्यते। यङ्लुपि वरीवर्त्ति। णौ वर्त्तयति। णौ ङे **'ऋदृवर्णस्य'** ( ४।२।३७ ) धातोरुपान्त्यस्य ऋवर्णस्य ङपरे णौ वा ऋकारो भवति इति गुणापवादे ऋतो वा ऋत्वे अवीवृतत् अववर्त्तत्। वर्त्तेर्वृत्तं ग्रन्थे ( ४।४।६५ ) इति निपातनात् वृत्तस्तर्कः, ग्रन्थादन्यत्र वर्त्तितं कुङ्कुमम्। ऊदित्त्वात् क्त्वि वेट् वृत्त्वा वर्त्तित्वा, वेट्त्वात् क्तयोर्नेट् वृत्तः वृत्तवान्। णके वर्त्तकः। स्त्रियां 'वौ वर्त्तिके'ति वेत्वे वर्त्तिका वर्त्तका च शकुनिः। क्विपि 'गतिकारक०' ( ३।२।८५ ) इति दीर्घे नीवृत् उपावृत्। स्त्रियां क्तौ वृत्तिः वृत्तिरस्त्यस्याः वार्त्ता 'व्यञ्जनाद् घञि' रथा अस्मिन् वर्त्तन्ते इति रथा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वर्त्तो ग्रामो गिरिश्च । 'घञ्युपसर्ग०' (३।२।८६) इति बाहुलकाद्दीर्घः । **'हस्तार्थाद् ग्रह-वर्त्तिवृतः'** (५।४।६६) हस्तार्थात्करणवाचिनः शब्दात्परेभ्यो ग्रहवर्त्तिवृद्भ्यस्तस्यैव (धातोः) सम्बन्धे णम्वा भवति । हस्तग्राहं गृह्णाति एवं करग्राहम् पाणिग्राहम्, हस्तेन गृह्णातीत्यर्थः । वर्त्तिवृत इति वर्त्तेर्ण्यन्तस्याण्यन्तस्य च ग्रहणम् । हस्तवर्त्तं वर्त्तयति करवर्त्तम् पाणिवर्त्तम् हस्तेन वर्त्तयतीत्यर्थः । हस्तवर्त्तम् करवर्त्तम् पाणिवर्त्तं वर्त्तते हस्तेन वर्त्तते इत्यर्थः । अण्यन्तान्नेच्छन्त्येके । उणादौ दृकृनृ० (२७) इत्यके वर्त्तकः वर्त्तिका वर्त्तका वा शकुनिः । 'भवाकश्यामाक०' (३७) इत्याके निपातनात् वार्त्ताकी शाकविशेषः तत्फलं वार्त्ताकम् । वृन्ताकी उत्तबृहती वृन्ताकम् । वृतेस्तिकः (७५) वर्त्तिका चित्रकरोपकरणम् । ऋज्यजि० (३८८) इति किति रे वृत्रः । विदिवृतेर्वा (६१०) इति किदिः वृतिः कण्टकावरणम् । निर्वृतिः सुखम् । वर्त्तिर्दीपदशा । सदिवृति० (६८०) इत्यनौ वर्त्तनिः पन्थाः । मन् (९११) इति मनि वर्त्म । 'वृतूचि वरणे' वृत्यते । 'वृतण् भासार्थः' वर्त्तयति इति तान्तः । अथ दान्तः । 'स्यन्दौङ् स्रवणे' इत्यादि स्पष्टम् ॥ १२१ ॥ उपसर्गयोगे सूत्रम्

## निरभ्यनोश्च स्यन्दस्याप्राणिनि ॥ १२२ ॥ [ सि० २।३।५० ]

एभ्यः परिनिविभ्यश्च परस्याप्राणिकर्तृकस्य स्यन्दः सः षु वा स्यात् । अनुष्यन्दते अनुस्यन्दते जलम् । अप्राणिनीति किम् ? । अनुस्यन्दते हस्ती । 'वृधूङ् वृद्धौ' । 'शृधूङ् शब्दकुत्सायाम् । एतौ द्युतिवत् । कृपौङ् सामर्थ्ये ॥ १२२ ॥

**'निर०'** निःष्यन्दते निःस्यन्दते तैलम् । अभिष्यन्दते अभिस्यन्दते अनुष्यन्दते अनुस्यन्दते, परिष्यन्दते परिस्यन्दते निष्यन्दते निस्यन्दते, विष्यन्दते विस्यन्दते । शब्निर्देशाद्यङ्लुपि न भवति अभिसास्यन्दी तैलम् । निरभ्यनोश्चेति किम् ? अतिस्यन्दते तैलम् । पर्युदासोऽयम् । न प्रसज्यप्रतिषेधः, तेन प्राणीचाप्राणी च कर्त्ता भवति । तत्राप्राण्याश्रयो विकल्पो भवति न तु प्राण्याश्रयः प्रतिषेधः, अनुस्यन्दते मत्स्योदके, अनुष्यन्दते वा । निर्निभ्यां नेच्छन्त्येके । 'विष्यन्दिमदनिःष्यन्दैः कराभिष्यन्दिशीकरैः । सल्लक्या रसनिष्यन्दः स्म परिष्यन्द्यते गजैः' ॥ १ ॥ गजैः सल्लक्या रसनिष्यन्दो रसप्रवाहः परिष्यन्दतेस्म चर्वणेन स्राव्यतेस्म । कीदृशैर्गजैर्विष्यन्दी प्रसृमरो मदनिष्यन्दो मदप्रवाहो येषां तैस्तथा करेभ्योऽभिष्यन्दिनः स्रवणशीलाः शीकरा येषां तैः, पक्षे विस्यन्दिमदनिस्यन्दैरित्यादि इति **द्व्याश्रयमहाकाव्ये** । सनि सिस्यन्त्सति सिस्यन्दिसिता सिस्यन्दिसितुम् सिस्यन्दिसितव्यम् । आत्मनेपदे स्यौदित्वाद्वेट् स्यन्दिष्यते स्यन्त्स्यते सिस्यन्दिषते । यङि सास्यद्यते यङ्लुपि सास्यन्ति २। क्त्वीडभावे 'स्कन्दस्यन्दः' (४।३।३०) इति कित्त्वाभावे स्यन्त्वा । इटि तु क्त्वेति कित्त्वाभावे स्यन्दित्वा । यपि प्रस्यन्द्य । तादेरेव क्त्वः कित्त्वाभाव इत्येके । तन्मते कित्त्वे नलुपि प्रस्यद्य वेट्त्वात् क्तयोर्नेट् स्यन्नः स्यन्नवान् । 'स्यदो जवे' (४।२।५३) इति घञि निपातनात् गोस्यदः अवस्यदः, जवादन्यत्र तैलस्यन्दः घृतस्यन्दः । उणादौ ग्वसिरसि० (२६९) इत्यने स्यन्दनः । स्यन्दिसृजिभ्यां सिन्धरज्जौ च (७१७) इत्युः सिन्धुः । अथ धान्तौ । 'वृधूङ् वर्द्धने' द्युताद्यङि अवृधत् अवर्द्धिष्ट । 'वृद्भ्यः स्यसनोः' (३।३।४५) इति वात्मनेपदम् तदभावे 'न वृद्भ्यः' (४।४।५५) इति नेट् वर्त्स्यति वर्द्धिष्यते । सनि विवृत्सति विवर्द्धिषते । ऊदित्वात् क्त्वि वेट् वृद्ध्वा वर्द्धित्वा । वेट्त्वात् क्तयोर्नेट् वृद्धः वृद्धवान् । क्तौ तिकि वा वृद्धिः । णौ नन्द्याद्यने वर्द्धनः सुखवर्द्धनः । 'भ्राज्यलङ्कृग्०' (५।२।२८) इतीष्णौ वर्द्धिष्णुः । उणादौ भीवृधि० (३८७) इति रे

घर्धः । 'वृधण् भासार्थः' वर्द्धयति । '**शृधूङ् शब्दकुत्सायाम्**' । तालव्यादिः । शब्दकुत्सा पायुशब्दत्वात् । शर्द्धते अशृधत् अशर्द्धिष्ट शाग्वत् शर्त्स्यति शर्द्धिष्यते शिशृत्सति शिशर्द्धिषते । ऊदित्वात् क्त्वि वेट् श्रद्धा शर्द्धित्वा । वेट्त्वात् क्तयोर्नेट् शृद्धः शृद्धवान् । घञि शर्द्धः शर्द्धजहाः माषाः । उणादौ डीनीबन्धि० ( ३२५ ) इति डिम्बे शिम्बा बीजकोशी । नृतिशृधि ( ८४४ ) इति किदूः शृधूः शर्द्धनः । मूले वर्णक्रमोल्लङ्घनेन वृतोऽनन्तरं एतौ धृतिवंदिस्येतयोरतिदेशस्तु लाघवार्थ इति ज्ञेयम् ।

**कृपौङ्** इति सूत्रम् ॥ १२२ ॥

## ऋरलृलं कृपोऽकृपीटादिषु ॥ १२३ ॥ [ सि० २।३।९९ ]

**कृपेर्ऋतो रस्य च लृल् स्यात्, न तु कृपीटादिविषयस्य । कल्पते ४ । द्युद्भ्योऽद्यतन्यामित्यात्मनेपदविकल्पे धूगौदित इतीड्विकल्पे च अकल्पिष्ट । पक्षे ॥ १२३ ॥**

'**ऋर०**' कृपेरिति कृपेर्धातोर्ऋकारस्य लृकारो रेफस्य च लकारो भवतीत्यर्थः । न तु कृपीटादीति स चेत् कृपिः कृपीटादिविषयो न भवति तदेत्यर्थः । कृपीटादयश्चेमे कृपीटम् कृपणः कृपाणः कृपः कर्पूरः कर्पटः कर्पटिरित्यादि । बहुवचनमाकृतिगणार्थम् । कल्पते इत्यादि स्पष्टम् । अकल्पिष्टेति ॥ १२३ ॥ इडभावपक्षे च सूत्रम्—

## सिजाशिषावात्मने ॥ १२४ ॥ [ सि० ४।३।३५ ]

**नाम्युपान्त्ये सति धातोरनिटावात्मनेपदविषयौ सिजाशिषौ किद्वत् स्याताम् । अक्लृप्त । पक्षे अक्लृपत् ५ । चक्लृपे । चक्लृपिषे–चक्लृप्से इत्यादि ६ । कल्पिषीष्ट–क्लृप्सीष्ट ७ ॥ १२४ ॥**

'**सिजा०**' अयं भावः । नामिन्युपान्त्ये सति धातोः परे आत्मनेपदविषये अनिटौ सिजाशिषौ किद्वत्स्यातामित्यर्थः । सिचः कित्त्वाच्च गुणाभावे 'धुड्ह्रस्वाद्०' ( ४।३।७० ) इति सिज्लोपे अक्लृप्तेति । एवमाशिषः कित्त्वे क्लृप्सीष्टेति । सिजाशिषाविति किम् ? कल्प्स्यते । आत्मने इति किम् ? अस्राक्षीत् अद्राक्षीत् । नामिनीत्येव अयष्ट यक्षीष्ट । उपान्त्य इत्येव अचेष्ट अचेषीष्ट । अनिडित्येव अवर्द्धिष्ट वर्द्धिषीष्ट ॥ १२४ ॥ श्वस्तन्यां सूत्रम्

## कृपः श्वस्तन्याम् ॥ १२५ ॥ [ सि० ३।३।४६ ]

**कृपेः श्वस्तन्यामात्मनेपदं वा स्यात् । कल्पिता कल्प्ता । परस्मैपदपक्षे न वृद्भ्य इतीड्निषेधे कल्प्ता । एवं कल्पितासे–कल्प्तासि ८ । कल्पिष्यते कल्प्स्यते–कल्प्स्यति ९ । अकल्पिष्यत–अकल्प्स्यत–अकल्प्स्यत् १० । 'कपुङ् चलने' । उदित इति नुमागमे म्नां धुड्वर्गेति मत्वे कम्पते ४ । अकम्पिष्ट ५ । चकम्पे ६ । 'क्षमौषि सहने' । क्षमते ४ । औदित्त्वात् अक्षमिष्ट–अक्षंस्त क्षमिता–क्षन्ता । 'रमिं क्रीडायाम्' । रमते ४ । अरंस्त ५ । रेमे ६ । रंसीष्ट ७ । रन्ता ८ । रंस्यते ९ । अरंस्यत १० । ( व्याङ्परे रमः परस्मैपदं स्यात् ) विरमति । व्यरंसीत् । विरराम । 'डुलभिंष् प्राप्तौ' । लभते ४ । अधश्चतुर्थात्तथोर्धः । अलब्ध ५ । लेभे ६ । लप्सीष्ट ७ । लब्धा ८ । लप्स्यते ९ । अलप्स्यत १० । 'स्फायैङ् ओप्यायैङ् वृद्धौ' स्फायते ४ । अस्फायिष्ट ॥ १२५ ॥**

'**कृपः०**' स्पष्टम् । कल्प्तेति कल्प्ता कल्प्तारौ कल्प्तारः कल्प्तासि कल्प्तास्थः कल्प्तास्थ कल्प्तास्मि कल्प्तास्वः कल्प्तास्मः । स्यन्दिकृपोरौदिल्लक्षणो विकल्पः परत्वादनेन बाध्यते । अनात्मने इत्येव

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कल्पितव्यम् । कल्प्तुं कल्पितुम् । ऋवर्णोपदिष्टं कार्यं लृवर्णस्यापीति लृतोऽपि ऋतोऽत् चिक्लृप्सति चिकल्पिषते चिक्लृप्सते । 'ऋमतां रीः ( ४।१।५५ ) यङि चलीक्लृप्यते अचकल्पत अचि क्लृपत् ऋलृवर्णस्येति वाकः णौ क्ते अवकल्पितः । व्यञ्जनादित्याधारे घञि क्लृप्यन्ते यस्मिन् प्राणिनां भोगोपभोगा हानिवृद्धिभ्यामिति कल्पः कालविशेषः उत्सर्पिण्यवसर्पिणीसमुदायः । उणादौ तृकृकृपि० ( १५१ ) इति कीटे कृपीटं हिरण्यं जलं च । 'कृपण् अवकल्कने' कल्पयति 'कृपण् दौर्बल्ये' अदन्तः कृपयति । वृत् वर्त्तनम् ।

वृत् द्युतादिः २३ वृतादि ५ अन्तर्गणसहितो वर्त्तितः समाप्त इत्यर्थः ।

→॥ वृधेः क्विपि वृत् वर्द्धितौ पूर्णावित्येके ।॥←

'**कपुङ्** चलने' इति अयं च वर्णानुक्रमे प्राग् विस्तरेण निरूपितः । '**क्षमौषि** सहने' इति औकारषकारेकारा इतः । आद्य इड्विकल्पार्थः । द्वितीयोऽङर्थस्तृतीय आत्मनेपदार्थ इति । शेषं स्पष्टम् । 'शकितकि०' ( ५।१।२९ ) इति ये क्षम्यम् औदित्त्वाद्वेड् क्षमिता क्षन्ता क्षमितव्यं क्षन्तव्यम् । षित्त्वादङि क्षमा । 'क्षमौच् सहने' इत्यस्य तु स्त्रियां क्तौ क्षान्तिः । वेट्त्वात् क्तयोर्नेट् क्षान्तः क्षान्तवान् । 'क्षमौच् सहने' क्षाम्यति ।

**रमिं** क्रीडायामिति अयं च ज्वलादिगणगतः । **ज्वलादयश्च** यजादेः प्रागेकत्रिंशत् । तत्रैकोनत्रिंशत्परस्मैपदिनो द्वौ चात्मनेपदिनौ । कुशंरुहंरमिंवर्जाः सेटश्च । वर्णक्रमेण निर्दिश्यन्ते । तत्रापि पूर्वाचार्यानुरोधेन पूर्वं **ज्वल** दीप्तौ ज्वलति । घटादित्वात् णौ ह्रस्वे प्रज्वलयति 'ज्वलह्वल०' ( ४।२।३२ ) इत्यनुपसर्गस्य वा ह्रस्वे ज्वलयति ज्वालयति । वाज्वलादीति णे ज्वलः ज्वालः पक्षेऽचि ज्वलः 'भूषाक्रोधार्थ०' ( ५।२।४२ ) इत्यने ज्वलनः । उणादौ निष्कतुरुष्क० ( २६ ) इति निपातनात् उल्का । कञ्चुकांशुक० ( ५७ ) इत्युके निपातनात् उल्मुकम् । अथ चान्तः । '**कुच** सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु' सम्पर्चनं मिश्रता । प्रतिष्टम्भो रोधः । विलेखनं कर्षणम् । कोचति सङ्कुचितः णौ क्ते सङ्कोचितः वा ज्वलादीति णे कोचः 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के कुचः । घञि क्ते सेट्त्वात् कत्वाभावे उत्कोचः सङ्कोचः । अथ तान्तः । '**पत्लृ पथे** गतौ' पत्धातुः स च प्राक् परस्मैपदिषु वर्णक्रमनिरूपणे प्रतिपादित एव । अथ थान्तास्त्रयः सेटश्च । पथे पथति पपाथ पथिता एदित्त्वात् 'व्यञ्जनादे०' ( ४।३।४७ ) इति वृद्धेः 'न श्विजागृ०' ( ४।३।४९ ) इति निषेधे अपथीत् । वा ज्वलादीति णे पाथः पक्षेऽचि पथः । उणादौ पथिमन्थिभ्याम् ( ९२६ ) इतीनि पन्थाः । '**क्वथे** निष्पाके' क्वथति चक्वाथ प्राग्वत् वृद्धिनिषेधे अक्वथीत् णे क्वाथः अचि क्वथः घञि क्वाथः । 'अतोऽनेकस्वरात्' ( ७।२।६ ) इति मत्वर्थीयेके क्वाथिका यवागूः । '**मथे** विलोडने' मथति वृद्धिनिषेधे अमथीत् वा ज्वलेति णे माथः पक्षेऽचि मथः । 'मथलपः' ( ५।२।५३ ) इति घिनणि प्रमाथी । घञि प्रमाथः अध्वपरिमाणम् । उणादौ वाश्यसि० ( ४२३ ) इत्युरे मथुरा । मन्था इति मथ्नातेः । अथ दान्तौ । '**षद्लृं** विशरणगत्यवसादनेषु' विशरणं शटनम् । अवसादोऽनुत्साहः । श्रौति० ( ४।२।१०८ ) इति सीदादेशे सीदति 'षः स०' ( २।३।९८ ) इति सत्वे ससाद 'सदोऽप्रतेः०' ( २।३।४४ ) इति षत्वे निषीदति विषीदति निषसाद विषसाद । सनि निषिषत्सति विषिषत्सति । प्रतेस्तु षत्वाभावे प्रतिसीदति । 'नाम्यन्तस्था० ( २।३।१५ ) इति सिषत्सति लृदित्त्वादङि आसदत् अनुस्वारेत्त्वान्नेट् सन्नः सन्नवान् । 'गृलुप०' ( ३।४।१२ ) इति गर्ह्यार्थे यङि सासद्यते । वाज्वलादीति णे सादः । बाहुलकात्सोपसर्गादपि णे निषादः विषादः ( अचि सदः ) क्विपि भीरुष्ठानादित्वा-

त्षत्वं आदिषत् ( उपसत् ) पुष्करसत् । सम्पदादित्वात् क्विपि उपनिषद् । परिषीदन्त्यस्यामिति परिषद् । ग्रहादित्वाण्णिनि सादी निषादी । दाद्धेसि० ( ५।२।३६ ) इति रौ सादनशीलः सद्रुः । घञि सादः विषादः । स्त्रियां 'समज०' ( ५।३।९९ ) इति क्यपि निषद्या आधारे व्यञ्जनादिति घञि 'घञ्युपसर्ग०' ( ३।२।८६ ) इति दीर्घे प्रासादः उणादौ 'हुयामा०' ( ४५१ ) इति त्रे सत्रं यज्ञः । कॄगॄशॄ ( ४४१ ) इति वरटि निषद्वरः पङ्कः । मन् ( ९११ ) इति मनि सद्म । कमिवमि० ( ६१८ ) इति णिदिः सादिः अश्वारोहः सारथिश्च । अस् ( ९५२ ) इत्यसि सदः सभा । **'शद्लृं** शातने' । शातनं तनूकरणम् । 'शदेः शिति' ( ३।३।४१ ) इत्यात्मनेपदे 'श्रौति०' (४।२।१०८) इति शीयादेशे शीयते शितोऽन्यत्र परस्मैपदम् शशाद लृदित्त्वादङि अशदत् अनुस्वारेत्वान्नेट् शत्स्यति । णौ 'शदिरगतौ शात्' ( ४।२।२३ ) पुष्पाणि शातयति । वा ज्वलेति णे शादः तृणपङ्कौ । अचि शदः शदितः । क्षत्रियापशदः विशदः । णौ 'करणाधारे' ( ५।३।१२९ ) इत्यनटि पलाशशातनो दण्डः पलाशशातनी यष्टिः । उणादौ शदेरूच्च ( ३९४ ) इति रे शूद्रः । तङ्किवङ्कि० ( ६९२ ) इति रिः शद्रिः वज्रः । जनिहनि० ( ८०९ ) इति रौ तादेशे शत्रुः । अथ धान्तः । **'बुध** अवगमने' । अवगमनं ज्ञापनम् । बोधति बुबोध बोधिता वा ज्वलेति णे बोधः 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के बुधः । णौ 'गतिबोध०' ( २।२।५ ) इत्यणिकर्त्तुः कर्मत्वे बोधयति शिष्यं धर्मम् । अनुस्वारेद्यमित्येके तन्मते अभौत्सीत् बोद्धा राज्ञां बुद्धः 'बुधिंच् ज्ञाने' बुध्यते । अथ मान्तौ । **'टुवमू** उद्गिरणे' उद्गिरणं भुक्तस्योर्ध्वगतिः । वमति 'अनादेशादे०' ( ४।१।२४ ) इत्यस्य 'न शसदादि०' ( ४।१।३० ) इति प्रतिषेधे 'जॄभ्रम०' ( ४।१।२६ ) इति वा प्रतिप्रसवे वेमतुः ववमतुः । वा ज्वलेति णे मोकमीत्यत्र वमेर्वर्जनाद्वृद्धिप्रतिषेधाभावे वामः । अचि वमः । वमिता । 'अमोऽकम्य०' ( ४।२।२६ ) इति णौ ह्रस्वे उद्वमयति । ह्वलज्वलेत्यनुपसर्गस्य वा ह्रस्वे वमयति ( वामयति ) णौ नन्द्याद्यने वामनः णके वामकः घञि वामः अङ्गादित्वात् मत्वर्थीये ने वामनः 'जीणृदृक्षि०' ( ५।२।७२ ) इति वमनशीलो वमी । ड्वित्त्वादथौ वमथुः । ऊदित्त्वात् क्त्वि वेट् वान्त्वा वमित्वा । वेट्त्वात् क्तयोर्नित्यमिडभावे प्राप्ते 'श्वसजप०' ( ४।४।७५ ) इति वेटि वान्तः वान्तवान् वमितः वमितवान् । उणादौ कमिवमि० ( ६१८ ) इति णिदिः वामिः ( स्त्री ) इत इति ( वा ) ङ्यां वामी अश्वा, नायमूदित्यन्ये । **'भ्रमू** चलने' 'भ्रासभ्लास०' ( ३।४।७३ ) इति वा श्ये भ्रम्यति भ्रमति 'जॄभ्रम०' ( ४।१।२६ ) इति वैत्वे भ्रेमतुः बभ्रमुः । ऊदित्त्वात् क्त्वि वेट् भ्रान्त्वा भ्रमित्वा वेट्त्वात् क्तयोर्नेट् भ्रान्तः भ्रान्तवान् । वा ज्वलेति ज्वलादिपाठान्मोऽकमि० ( ४।३।५५ ) इति प्रतिषेधाभावे 'ञ्णिति' ( ४।३।५० ) इति वृद्धौ भ्रामः । अचि भ्रमः । तृचि भ्रमिता । उणादौ ऋच्छिचटि० ( ३९७ ) इत्यरे भ्रमरः । तॄभ्रम्य० ( ६११ ) इति इः भ्रमिश्च भूमिर्वायुः । बाहुलकात् भ्र(भ्रु)मादेशाभावे भ्रमिर्भ्रमः । भ्रमिगमि० (८४३) इति डिदूः भ्रूः 'भ्रमूच् अनवस्थाने' भ्राम्यति । अथ रान्तः । **'क्षर** सञ्चलने' सकर्मकश्चायमकर्मकश्च क्षरति गौः पयो मुञ्चतीत्यर्थः । क्षरति स्रवतीत्यर्थः । णे क्षारः । ऋदित्येके । अचि क्षरः । अथ लान्ताश्चतुर्दश । **'चल** कम्पने' चलति । णे चालः । अचि चलः । 'चराचर०' ( ४।१।१३ ) इति निपातनात् चलाचलः । यङ्लुपि चाचलः चञ्चलः । कम्पने घटादित्वाण्णौ ह्रस्वे चलयति शाखाम् । अन्यत्र चालयति सूत्रम् । चालशब्देत्यने चलनशीलः चलनः । घञि चालः 'चलण् भृतौ' चालयति । **'जल** घात्ये' घात्यं जडत्वम् अतैक्ष्ण्यमित्यर्थः । जलति णे जालम् अचि जलम् डलयोरैक्यं जडः व्यवस्थितविभाषत्वाद्भिन्नेऽर्थे प्रत्ययो घञि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जालम् । वन्नन्तस्यापि नपुंसकत्वं लोकात् । 'जलण् अपवारणे' जालयति । 'टल ट्वल वैक्लव्ये' विक्लव एव वैक्लव्यम् टलति ट्वलति टटाल टट्वाल । णे टालः ट्वालः । अचि टलः ट्वलः । 'ष्ठल स्थाने' 'षः स०' ( २।३।९८ ) इति सत्वे स्थलति तस्थाल । णे स्थालम् गौरादित्वात् ङ्यां स्थाली अचि स्थलम् । स्त्रियां 'भाजगोण०' ( २।४।३० ) इति ङ्यां स्थली अकृत्रिमा स्थलान्या 'विकुशमि०' ( २।३।२८ ) इति षत्वे विष्ठलम् कुष्ठलम् शमिष्ठलम् । 'कपेर्गोत्रे' ( २।३।२९ ) कपीनां स्थलमिव स्थलमस्य कपिष्ठलः । षोपदेशत्वात् 'नाम्यन्तस्था०' (२।३।१५) इति षत्वे तिष्ठालयिषति । अषोपदेशोऽयमित्यन्ये । 'हल विलेखने' विलेखनं कर्षणं हलति जहाल । णे हालः हाला सुरा । अचि हलम् । हलाहलम् उणादौ पदिपठि० (६०७) इति इः हलिः हडिः । 'णल गन्धे' गन्धोऽर्दनं 'पाठे०' (२।३।९७) इति नत्वे नलति णोपदेशत्वात् 'अदुरुपसर्गा०' ( २।३।७७ ) णत्वे प्रणलति ननाल णे नालम् नाला पद्मादीनां वृन्तम् नाली नाडी प्रणालम् प्रणाली प्रणालिका प्रणाडिका । अचि नलम् नडः । आत इति डे नलदः । 'बल प्राणनधान्यावरोधयोः' । प्राणनं जीवनम् । धान्यमवरुध्यते यत्रेति धान्यावरोधः कुशूलः । ओष्ठ्यादिः बलति बबाल 'अनादेशादे०' ( ४।१।२४ ) इति बेलतुः बेलुः । णे बालः । स्त्रियां वयस्यनन्त्ये ( २।४।२१ ) इति ङ्यपवादे अजादित्वादापि बाला । अचि बलः बलम् । उणादौ दृपृभृ० ( २०७ ) इत्यते बलतः कुसूलः । 'वलि संवरणे' दन्त्यौष्ठ्यादिः । वलते ववले । 'वलण् प्राणने' । घटादिश्चेत्येके । वलयति । 'पुल महत्त्वे' पोलति वा ज्वलेति णे पोलः पक्षे 'नाम्युपान्त्य०' (५।१।५४) (इति) के पुलः पुलम् विपुलम् । उणादौ 'क्षुधुन्दि०' (२९) इति कित्यके पुलकः रोमाञ्चः । पापुलि ( ४१ ) इति कितीके पुलिकः तुच्छधान्यम् । कल्यलि० ( २४६ ) इति इन्दकि पुलिन्दः । वृजितुहि० ( २८३ ) इति कितीने पुलिनम् । 'नाम्युपान्त्य०' ( ६०९ ) इति किदिः पुलिः । अगिविलि० ( ६६० ) इत्यस्तिकि पुलस्तिः । अयं तुदादिरपीत्येके पुलति । 'पुलण् समुच्छ्राये' पोलति । 'कुल बन्धुसंस्त्यानयोः' । संस्त्यानं सङ्घातः । कोलति वा ज्वलेति णे कोलः सूकरः कोलं बदरम् । के कुलम् नकुलः । कक्कोलमिति तु कचेः पिञ्छोल ( ४९५ ) इत्योले निपातनात् । उणादौ कुलिपिलि० ( ४७६ ) इति कित्याले कुलालः । 'पल फल शल गतौ' पलति णे पालः अचि पलं मांसम् । कर्मणोऽणि गोपालः । उणादौ हृश्या० ( २१० ) इतीते पलितम् पाण्डुरः केशः केशपाकश्च । अभ्रादित्वादः पलितमस्यास्ति पलितः । मृदिकन्दि० ( ४६५ ) इत्यले पललं तिलकल्कः । ऋकृभृ० ( ४७५ ) इत्याले पलालम् । शमिकमि० ( ४९९ ) इति वले पल्वलमखातसरः । 'पलण् रक्षणे' पालयति । फल फलति 'तृत्रपफल०' ( ४।१।२५ ) इत्येत्वे फेलतुः फेलुः । णे फालः कुशिकः । फाला इव तण्डुलाः । अचि फलम् । शल शलति णे शालः शाला । अचि शलं श्वाविद्रोम । उणादौ भीण्शलि ( २१ ) इति के शल्कः शरणम् । शलिबलि० ( ३४ ) इत्याके शलाका । शल्यणेर्णित् ( ५९ ) इत्यूके शालूक कुमुदादिकन्दः । शल्यतेरुचात ( ३१९ ) इति वे शुल्वम् । कृशॄगॄ० ( ३२९ ) इत्यभे शलभः । स्याछामा० ( ३५७ ) इति ये शल्यम् । यावादित्वात्के शल्यकः । मृदिकन्दि० ( ४६५ ) इत्यले शललं श्वाविद्रोमसूची । कमिवमि० ( ६१८ ) इति णिदिः शालिः । माशालि० ( ७०३ ) इति ण्यन्तान्मलौ शाल्मलिः । फलिशल्योः पूर्वमधीतयोरपीह पाठो ज्वलादिकार्यार्थः, शलेः परस्मैपदार्थश्च । 'हुल हिंसासंवरणयोश्च' चकाराद्गतौ, होलति णे होलः पक्षे नाम्युपान्त्य० ( ५।१।५४ ) इति के च हुलः हुडः । उणादौ पृकाहृषि० ( ७२९ ) इति किदुः हुडुर्मेषः । अथ शान्तः 'क्रुशं आह्वानरोदनयोः' क्रोशति 'हशिट०' ( ३।४।५५ ) इति सकि अक्रुक्षत्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनुस्वारेत्त्वान्नेट् क्रोष्टा आक्रोष्टा। णे क्रोशः। बाहुलकात्सोपसर्गादपि णे उत्क्रोशः कुररः। 'नाम्युपान्त्य०' (५।१।५४) इति के क्रुशः। उपसर्गादेविति णके आक्रोशनशीलः आक्रोशकः। घञि आक्रोशः। क्रुश्यतेऽध्वपरिमाणं यस्मात्क्रोशः णके उत्क्रोशः। उणादौ क्रुसिकमि० (७७३) इति तुनि क्रोष्टुना। ऋशीक्रुशि० (९०६) इति क्वनिपि क्रुश्वा शिवा। अथ सान्तः। '**कस** गतौ' कसति उत्कसति विकसति चकास णे कासः अचि कसः यङि 'वञ्चस्रंस०' (४।१।५०) इति न्यागमे चनीकस्यते यङ्लुपि चनीकसीति 'स्थेशभास०' (५।२।८१) इति विकसनशीलो विकस्वरः। उणादौ संविभ्यां० (५२) इत्युके सङ्कसुकः अस्थिरः भीमादित्वादपादाने साधुः विकसुकः गुणवादी। कसिपदि० (८३५) इति णिदूः कासूः शक्त्यायुधम्। अथ हान्तः। '**रुहं** जन्मनि'। बीजजन्मनि इत्येके। बीजजन्माङ्कुरोत्पत्तिः। रोहति अरुक्षत् रोढा णौ 'रुहः पः' (४।२।१४) इति वा पादेशे रोपयति रोहयति। णे रोहः। बाहुलकात्सोपसर्गादपि णे प्ररोहः आरोहः। 'नाम्युपान्त्य०' (५।१।५४) इति के रुहः। स्थादित्वाद् भावाकर्त्रोर्मूलविभुजादित्वाद्वा कर्त्तरि के बीजरुहा। अस्य 'साक्षादादिश्च्व्यर्थे' (३।१।१४) इति कृगा योगे वा गतित्वे बीजरुहा कृत्य बीजरुहा कृत्वा गतः। श्लिषशीङ (५।१।९) इति वा कर्त्तरि क्ते खट्वामारूढः। हृश्य० (२१०) इतीते रोहितः वर्णः लत्वे लोहितः। 'श्येतै०' (२।४।३६) इति ङ्यां रोहिणी। रुहिनन्दि० (२२०) इति दित्यन्ते रोहन्तः द्रुमः। रोहन्ती ओषधिः। विपिन० (२८४) इति निपातनादिने रोहिणः। स्त्रियां 'रेवत०' (२।४।२६) इति ङ्यां रोहिणी नक्षत्रम्। रुहेर्वृद्धिश्च (५४८) इतीषे रौहिषं तृणजातिः। ण्यन्तात् स्वरेभ्य इः (६०६) रोहिः मृगः। हृस्रुहि० (८८७) इतीति रोहिन् मृगः। ऋशीक्रुशि० (९०६) इति क्वनिपि रुह्वा वृक्षः। अथात्मनेपदिनौ द्वौ। **रमिं** क्रीडायाम् १ '**षहिं** मर्षणे' २ इति च। तत्र रमिधातुं कण्ठतो निर्दिशति रमते इत्यादि स्पष्टम्। आत्मनेपदिनोऽप्यस्योपसर्गयोगे परस्मैपदं स्यादित्यत्र सूत्रम् '**व्याङ्०**' (३।३।१०५) कण्ठ्यम्। 'यमिरमिनम्यातः सोन्तश्च' (४।४।८६) इति इटि सेऽन्ते च रूपम्। व्यरंसीदिति। अत्रायं विशेषः '**वोपात्**' (३।३।१०६) उपपूर्वाद्रमेः कर्त्तरि परस्मैपदं वा स्यात्। भार्यामुपरमति उपरमते वा। उपसम्प्राप्तिपूर्विकायां रतौ वर्त्तमानोऽन्तर्भूतणिगर्थो वा रमिः सकर्मकः। उपरमति उपरमते वा सन्तापः। निवृत्त्यर्थः पुनरुपपूर्वोऽप्यकर्मकः उपरमत्युपरमते वा अवद्यात्। उपाद्रमेः सकर्मकात्परस्मैपदमेवेत्येके। आत्मनेपदमेवेत्यन्ये। यङि रंरम्यते। यङ्लुपि रंरन्ति। 'भव्यगेय०' (५।१।७) इति कर्त्तरि निपातनात् ये रम्यः। नन्द्याद्यने रमणः। 'रम्यादिभ्यः कर्त्तरि' (५।३।१२६) इति कर्त्तर्यनटि रमणी। णे रामः रामा। अचि रमः रमा। 'शोकापनुद०' (५।१।१४३) इति निपातनात् के स्तम्बेरमो हस्ती (उणादौ पुतपित्तेति (२०४) निपातनात् सूरतो दमितो हस्त्यन्यो वा दान्तः। नीनूरमि० (२२७) इति किति थे रथः। रमेस्त् च (२६४) इति ने रत्नम्। केचित्तु 'यमूं उपरमे' 'रमूं क्रीडायाम्' इत्यूदितौ ज्वलादावधीयते। तन्मते ऊदित्त्वात् क्त्वि वेट् यत्त्वा यमित्वा रत्वा रमित्वा। **षहि**धातुं चानुपदमेव वक्ष्यति ॥ ३१ ॥ **वृत् ज्वलादिः**

'**डुलभिंष** प्राप्तौ' इति। अत्र लभ् इति धातुः शेषाश्चत्वार इतः। तत्र डुकारेत्त्वात् 'ड्वितस्त्रिमक्तत्कृतम्' (५।३।८४) इति लब्धिमम्। षित्त्वादङि लभ इति ने 'नो व्यञ्जनस्य०' (४।२।४५) इति नलुकि लभा उपलभा। इदित्वादात्मनेपदमनुस्वारेत्वादिडभावः। '**लभः**' (४।४।१०३) लभतेः स्वरात्परः परोक्षाशव्वर्जिते स्वरादौ प्रत्यये परे नोऽन्तः स्यादिति। परोक्षा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शव्वर्जनान्नोन्ताभावे लभते इत्यादि । अन्यत्र स्वरादौ नोऽन्तागमे आलम्भयति आलम्भकः साध्वालम्भी आलम्भो वर्त्तते । 'शकितकि०' (५।१।२९) इति ये लभ्यम् । **'आङो यि'** (४।४।१०४) आङ्परस्य लभतेः स्वरात्परो यकारादौ प्रत्यये नोऽन्तो भवति । आलम्भ्या गौः । आलम्भ्या वडवा हिंस्येत्यर्थः । आङ इति किम् ? लभ्यः । यीति किम् ? आलब्धा । **'उपात्स्तुतौ'** (४।४।१०५) उपात्परस्य लभतेः स्वरात्परो यकारादौ प्रत्यये परे स्तुतौ प्रशंसायां गम्यायां नोऽन्तो भवति । उपलम्भ्या विद्या भवता उपलम्भ्यं शीलम् । स्तुताविति किम् ? उपलभ्या वार्त्ता उपलभ्यमस्माद्वृषलात् किञ्चित् । **'ञिख्णमोर्वा'** (४।४।१०६) ञौ ख्णमि च प्रत्यये परे लभतेः स्वरात्परो नोन्तो भवति । अलाभि अलम्भि लाभं २ लम्भं २ । **'उपसर्गात् खल्घञोश्च'** (४।४।१०७) उपसर्गात् परस्य लभतेः स्वरात्परः खल्घञोर्ञिख्णमोश्च परयोर्नोन्तो भवति । खल् ईषत्प्रलम्भम् ईषदुपलम्भम् दुष्प्रलम्भम् सुप्रलम्भम् । घञ् प्रलम्भः उपलम्भः विलम्भः । ञि प्रालम्भि । ख्णम् प्रलम्भं प्रलम्भम् । उपसर्गादिति किम् ? ईषल्लभः लाभो वर्त्तते । ञिख्णमोर्नित्यार्थमुपसर्गादेव खल्घञोरिति नियमार्थं वचनम् । उपसर्गेभ्यो लभः स्वरात्परः खल्घञोरिति नियमार्थं वचनम् । उपसर्गेभ्यो लभः स्वरात्परः खल्घञ्ञिख्णमुस्वेव प्रत्ययेषु नोन्तो भवति, नान्येष्विति विपरीतनियमस्तु न भवति । 'शप उपलम्भने' इति ज्ञापनात् । **'सुदुर्भ्यः'** (४।४।१०९) सुदुर् इत्येताभ्यां व्यस्ताभ्यां समस्ताभ्यां चोपसर्गात्पराभ्यां परस्य लभतेः स्वरात्परः खल्घञोः परयोर्नोन्तो भवति खल् अतिसुलम्भं अतिदुर्लम्भम् । घञ् अतिसुलम्भः अतिदुर्लम्भः । अतिसुदुर्लम्भः । उपसर्गादित्येव सुलभम् दुर्लभम् । सुदुर्लभम् सुलाभः दुर्लाभः सुदुर्लाभः । अतिसुलभमतिदुर्लभमित्यतः पूजातिक्रमयोरनुपसर्गत्वात् उपसर्गादेव सुदुर्भ्य इति नियमार्थं वचनम् । बहुवचनं व्यस्तसमस्तपरिग्रहार्थं दुस्सङ्ग्रहार्थं च ।

अथ **घटादय** एकोनषष्टिर्वर्णक्रमेण निर्दिश्यन्ते । तेषु त्रयोदशात्मनेपदिनः षट्चत्वारिंशत्परस्मैपदिनः । श्रांस्मृंवर्जाः सेटश्च । तत्र पूर्वाचार्यानुरोधात्पूर्वं घटनिर्देशः । **घटिष्** चेष्टायाम् इति १ चेष्टा ईहा घटते इत्यादि स्पष्टम् सनि जिघटिषते । यङि जाघट्यते । क्ते घटितं णौ 'घटादेर्ह्रस्वः०' (४।२।२४) इति ह्रस्वे घटयति । दीर्घस्तु वा ञिणम्परे अघाटि अघटि । घाटिष्यते घटिष्यते । घाटं २ घटं २ 'णिवेत्ति०' (५।३।१११) इत्यने घटना । षित्त्वादङि घटा । इह च घटादीनामनेकार्थत्वेऽपि पठितार्थेष्वेव घटादिकार्यविज्ञानम् । तेन उद्घाटयति, कमलवनोद्घाटनम् कुर्वते ये, प्रविघाटयिता समुत्पतन् हरिदश्वः कमलकरानिव, उद्घाटितः कपाटः, श्रापयति स्मारयति दारयति नाटयति फाणयति छादयति प्रमादयति चालयतीत्यादौ चेष्टाद्यर्थाभावे घटादेर्ह्रस्व इति ह्रस्वो न भवति। विघटयतीत्वजन्तस्याङन्तस्य वा 'णिज्बहुलं नाम्नः०' इति करोत्यर्थे णिचि रूपम् । **अन्ये** तु ये घटाद्योऽन्यत्र पठितास्तेषां योऽर्थ उपात्तस्तत्रैव ह्रस्वादिकार्यं ये त्वत्रैव पठ्यन्ते तेषां सामान्येनानेकार्थत्वादिति ब्रुवते, तन्मते विघटयतीति चेष्टाभावे ह्रस्वः स्यादेव, कमलवनोद्घाटनम् प्रविघाटयिता समुत्पतन्नित्यादौ तु चुरादौ भासार्थस्य घटेर्णिचि यमिज्ञाबहिर्वर्जितस्य घटादिकार्यनिषेधाद् ह्रस्वाभावे रूपम् यथा शमिणो णिचि निशामयते, चेष्टार्थस्यैव वा घञन्तस्य णिचि । इत्थं चोन्नामिताखिलमहीधरकन्धरस्य चौरस्योत्काथयतीत्यादि सिद्धम् । संक्रामयतीति तु संक्रामं करोतीति णिचि । 'शकधृष०' (५।४।९०) इति तुमि घटते भोक्तुम् । अचि घटः । इह घटादौ केप्यत्रैवाधीताः प्रकृत्यादिकार्यभाजो न्याय्यशव्प्रत्ययाश्च । अन्ये तु स्वस्थानोक्तार्थभाजः पित्त्वह्रस्वाद्यर्थमनूद्यन्त इति यथायथमुत्प्रे-



Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्ष्यम् । अथ जान्तः १ । 'क्षजुङ् गतिदानयोः' । उदित्त्वान्ने क्षञ्जते चक्षञ्जे क्षञ्जिता क्ते क्षञ्जितः 'क्तेट०' ( ५।३।१०६ ) इत्यः क्षञ्जा । णौ क्षञ्जयति घटादिपाठबलाण्णौ ञिणम्परेऽनेकव्यञ्जनव्यवधानेऽपि वा दीर्घे अक्षाञ्जि अक्षञ्जि । क्षाञ्जं क्षाञ्जम् । क्षञ्जं २ । एवं कन्दिक्रन्दिक्लन्दिदक्षीणां ज्ञेयम् । अत एव णौ ञिणम्परे ह्रस्वमविकल्प्य दीर्घविकल्पः । 'क्षजुण् कृच्छ्रजीवने' क्षञ्जयति । कौशिकस्तु क्षजौ विपर्ययेणाधीते । अथ थान्तौ । व्यथिषू भयचलनयोः । दुःखेऽप्यन्ये । व्यथते । 'ज्याव्येव्यधिव्यचिव्यथेरिः' ( ४।१।७१ ) इति पूर्वस्येत्वे विव्यथे व्यथिता । णौ ह्रस्वे व्यथयति ञिणम्परे तु वा दीर्घे अव्याथि अव्यथि । व्याथम् २ । व्यथम् २ । 'रुच्याव्यथ्य०' ( ५।१।६ ) इति कर्त्तरि निपातनाद्ये अव्यथ्यः । भावे घ्यणि अव्याथ्यम् । ग्रहादित्वाण्णिनि अव्याथी । 'जीण्दृक्षि०' ( ५।२।७२ ) इति नि अव्यथनशीलोऽव्यथी । 'इङितः०' ( ५।२।४४ ) इत्यने व्यथनः । षित्त्वादङि व्यथा । उणादौ श्वशुर० ( ४२६ ) इत्युरे निपातनात् विथुरः राक्षसः । नञो व्यथेः ( ५५२ ) इतीषे अव्यथिषः सूर्यः । अव्यथिषी भूः । 'प्रथिषू प्रख्याने' । प्रख्यानं प्रसिद्धिः । प्रथते णौ ह्रस्वे प्रथयति । णौ ङे सन्वद्भावापवादे 'स्मृदृत्वरप्रथम्रदस्तॄस्पशेरः' ( ४।१।६५ ) इति पूर्वस्यातो अत्वे अपप्रथत् । ञिणम्परे तु वा दीर्घे अप्राथि अप्रथि । प्राथम् २ । प्रथम् २ । षित्त्वादङि प्रथा । उणादौ सृणीकास्तीक० ( ५० ) इतीके निपातनात् पृथ्वीका एला । सृपृप्रथि० ( ३४७ ) इत्यमे प्रथमः । प्रथेरिवट् पृथ् च ( ५२१ ) पृथिवी । प्रथेर्लुक् च वा ( ६४७ ) इति तौ प्रति चादिः । पक्षे प्रत्तिः प्रथनं भागश्च । रभिप्रथिभ्यामृच्च रस्य ( ७३० ) इत्यौ पृथुः । कुत्सितादौ कपि पृथुकः । अथ दान्ताः पञ्च ॥ ५ ॥ 'म्रदिषू मर्दने' म्रदते । णौ ह्रस्वे म्रदयति । णौ ङे प्राग्वत् । अमम्रदत् । षित्त्वादङि म्रदा । उणादौ मृद्वीका मृदीका चेति मृदेर्वोन्तिश्च वा ( ४९ ) इतीके मृद्वातेः । एवं मृदुः । 'स्खदिषू खदने' खदनं विदारणम् । स्खदते । षित्त्वादङि स्खदा । णौ ह्रस्वे स्खदयति । 'कदुङ् क्रदुङ् क्लदुङ् वैक्लव्ये' । विक्लवः कातरस्तस्य भावः कर्म वा वैक्लव्यम् । वैकल्य इति चन्द्रः । त्रिष्वपि उदित्त्वान्नोन्तः कन्दते क्रन्दते क्लन्दते 'क्तेट०' ( ५।३।१०६ ) इत्यः कन्दा क्रन्दा क्लन्दा । णौ कन्दयति ३ । ञिणम्परे तु वा दीर्घः अकान्दि अकन्दि । कान्दम् २ कन्दम् २ । एवं शेषयोरपि क्रन्देर्नन्द्याद्यने सङ्क्रन्दनः । 'इङितः०' ( ५।२।४४ ) इत्यने आक्रन्दनः घञि आक्रन्दः । त्रयोऽप्येतेऽनुदितः षितश्चेति नन्दी । कदते क्रदते क्लदते । कदा क्रदा क्लदा । 'कदु क्रदु क्लदु रोदनाह्वानयोः' कन्दति क्रन्दति क्लन्दति । अथ पान्तः १ । 'क्रपि कृपायाम्' । क्रपते । णौ क्रपयति । 'मृगयेच्छा०' ( ५।३।१०१ ) इति निपातनादङि कृपा । कृपण इति तु कॄपॄगॄ० ( १८८ ) इति किल्यणे कृपेः । अथ रान्तः १ । 'ञित्वरिषू सम्भ्रमे' । सम्भ्रमोऽत्राशुकारिता । त्वरते तत्वरे त्वरिता । यङि तात्वर्यते । यङ्लुपि तात्वरीति । 'मव्यविश्रिविज्वरित्वरेरुपान्त्येन' ( ४।१।१०९ ) इति वस्योपान्त्येन सहोटि तातूर्त्तिः । षित्त्वादङि त्वरा । णौ ह्रस्वे त्वरयति । सन्वद्भावापवादे 'स्मृदृत्वर०' ( ४।१।६५ ) इति पूर्वस्यात्वे अतत्वरत् । ञीत्त्वात् 'ज्ञानेच्छा०' ( ३।१।८६ ) इति सति क्ते 'क्षुब्धविरिब्ध...' 'श्वसजपवमरुषत्वरसंघुषास्वनामः' ( ४।४।७५ ) इति वेटि त्वरितः । पक्षे 'मव्यवि०' इति वस्योपान्त्येन सहोटि तूर्णः । तूर्णिरिति तु तुरेः कावावी० ( ६३४ ) इति णौ । अथ सान्तः । 'प्रसिषू विस्तारे' प्रसव इत्यन्ये, । प्रसते पप्रसे षित्त्वादङि प्रसा । णौ प्रसयति । अथ क्षान्तः १ । 'दक्षि हिंसागत्योः' दक्षते 'क्तेट०' ( ५।३।१०६ ) इत्यः दक्षा । 'दक्षि शैघ्र्ये च' इत्यस्यैवार्थभेदाद् घटादि-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कार्यार्थं पुनः पाठः । णौ दक्षयति । ञिणम्परे तु वा दीर्घः अदाक्षि अदक्षि । दाक्षम् २ दक्षम् २ । इति त्रयोदशात्मनेपदिनः ॥ १३ ॥ 'श्रां पाके' 'श्रैं पाके' 'श्रांक् पाके' इत्यस्य चेह घटादिकार्यार्थं पाठः श्रायति श्राति वा कश्चित्तमन्यः प्रयुङ्क्ते श्रपयति श्रापयति श्राति वा हविः स्वयमेव तदन्येन प्रायुज्यतेति णौ घटादित्वात् ह्रस्वे क्ते 'श्रपेः प्रयोक्त्रैक्ये' (४।१।१०१) इति शृतादेशे शृतं हविः क्षीरं वा चैत्रेण । अन्यत्र श्रापयति घर्मः स्वेदयतीत्यर्थः । अत एव ज्ञापकादनेकार्थत्वं धातूनां सिद्धम् । अथ ऋदन्तः १ । स्मृं आध्याने । आध्यानमुक्तं वा स्मरति । घटादित्वाद् ह्रस्वे स्मरयति । आध्यानादन्यत्र चित्तं स्मारयति विस्मारयति । अन्यत्रोक्तस्यार्थविशेषे घटादिकार्यार्थमिह पाठः । अथ ॠदन्तौ २ । 'दॄ भये' दरति 'युवर्ण०' (५।३।२८) इत्यलि दरः । णौ दरयति बलम् । भयादन्यत्र काष्ठं दारयति । उणादौ 'शॄदॄ०' (८९४) इत्यादि दरन्नामा जनपदः । 'दॄश् विदारणे' । दृणाति दारयति काष्ठम् । अस्यैव घटादिकार्यार्थमिह पाठ इत्यन्ये । दीर्यते इति कर्मकर्त्तरि दिवादावप्ययमन्यैः पठ्यते । तन्मते कर्त्तर्यपि दीर्यते । 'नॄ नये' । क्र्यादेर्घटादिकार्यार्थं विरलोऽस्य पाठः । नृणन्तं प्रयुङ्क्ते नरयति । अथ कान्ताश्चत्वारः ४ । 'ष्टक स्तक प्रतीघाते' 'षः स०' (२।३।९८) इति सत्वे स्तकति घटादित्वाद् ह्रस्वे सनि षोपदेशत्वात् षत्वे तिष्टकयिषति । स्तक स्तकति णौ ह्रस्वे अषोपदेशत्वात्षत्वाभावे तिस्तकयिषति । 'चक तृप्तौ च' चकारात् प्रतीघाते, चकति णौ ह्रस्वे चकयति क्ते चकितः । उणादौ कठिचकि० (४३३) इत्यारे चकोरः । 'चकि तृप्तिप्रतीघातयोः' चकते । 'अक कुटिलायां गतौ' अकति । णौ ह्रस्वे अकयति । अनोकह इति तु अनेरोकहः (५९५) । अथ खान्तः । 'कखे हसने' कखति 'न श्विजागृ०' (४।३।४९) इति वृद्धिनिषेधे अकखीत् । णौ ह्रस्वे कखयति । किखिरिति तु कोर्डिखिः (६२६) इति कौतेः । अथ गान्ता नव सेटश्च । अग अकवत् । 'अक कुटिलायां गतौ' पठितः अयमपि तदर्थो लाघवार्थं तथा निर्दिश्यते । अगति णौ ह्रस्वे अगयति । उणादौ भीवृधि० (३८७) इति रे अग्रम् । वीयुसुवहि० (६७७) इति नौ अग्निः । 'रगे शङ्कायाम्' । रगति एदित्त्वात् ह्रस्वनिषेधे अरगीत् । णौ रगयति । 'लगे सङ्गे' लगति अलगीत् लगयति । 'क्षुब्धविरिब्धस्वान्तध्वान्तलग्नम्लिष्टकाण्डबाढपरिवृढं मन्थस्वरमनस्तमःसक्ताऽस्पष्टाऽनायासभृशप्रभौ' (४।४।७०) इति निपातनात् लग्नः सक्तः, लगितोऽन्यः । 'ह्वगे ह्लगे षगे सगे ष्ठगे स्थगे संवरणे' । संवरणं आच्छादनम् । ह्वगति अद्यतन्यां एदित्त्वात् (व्यञ्जनादेरिति वा वृद्धेः) 'न श्विजागृ०' इति वृद्धिनिषेधे अह्वगीत् णौ ह्वगयति । एवं ह्लगति अह्लगीत् ह्लगयति । षगे 'षः स०' (२।३।९८) इति सत्वे सगति असगीत् सगयति । षोपदेशत्वात्षत्वे सिषगयिषति । सगे सगति असगीत् सगयति सिसगयिषति । ष्ठगे 'षः स०' इति सत्वे स्थगति अस्थगीत् । स्थगयति । षोपदेशत्वात् षत्वे तिष्ठगयिषति । स्थगे स्थगति अस्थगीत् स्थगयति । षत्वाभावे तिस्थगयिषति । अथ टान्तास्त्रयः सेटश्च ३ । 'वट भट परिभाषणे' वटति वटयति । भटति भटयति । 'वट वेष्टने' वाटयति । 'भट भृतौ' भाटयति । 'णट नृतौ' नटति णौ ह्रस्वे नटयति शाखाम् । नृतौ तु नाटयति । 'नटण् अवस्यन्दने' चौरस्योन्नाटयति । अथ डान्तास्त्रयः सेटश्च ॥ ३ ॥ गड सेचने गडति । लत्वे गलति । णौ ह्रस्वे गडयति । अचि गडयतीति गडः । सुखं स्वपिति गौर्गडी । उणादौ तॄजिभूवदि० (२२१) इत्यन्ते गडयन्तः गडयन्ती । कडार इति तु कडतेः अम्यङ्गि० (४०५) इत्यारे । कडत्रं कलत्रमित्यपि वृगॄनक्षि० (४५६) इत्यत्रेऽस्यैव । 'हेड वेष्टने' हेडति जिहेड हेडिता णौ ह्रस्वे हिडयति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ह्रस्वविधानबलादेव गुणो नास्ति । ञिणम्परे तु वा दीर्घे अहीडि अहिडि । हीडम् २ । हिडम् २ । ये तु ञिणम्परे ह्रस्वमेव विकल्पयन्ति तन्मते अहिडि अहेडि । हिडम् २ हेडम् २ । 'लड जिह्वोन्मन्थने' जिह्वाया उन्मन्थनं जिह्वोन्मन्थनम् । णौ ह्रस्वे लडयति जिह्वां कुक्कुरः । लत्वे जिह्वाशतान्युल्ललयत्यभीक्ष्णम् । अन्यत्र लाडयति चित्रम् । लालयति बालम् । लालितः लालितकः सेवकः । लालना लाला । जिह्वोन्मन्थयोरित्येके । तन्मतसंग्रहार्थं जिह्वा च जिह्वाविषया क्रियोन्मन्थनं चेति समाहारः । लडयति जिह्वाम् । ललयति दधि । 'लडण् उपसेवायाम्' लाडयति । लड विलास इत्यस्यैवार्थविशेषे घटादिकार्यार्थमिह पाठः । अथ णान्ताः षट् सेटश्च ॥ ६ ॥ **'फण, कण, रण,** गतौ' फणति । णौ (ह्रस्वे) फणयति 'जॄभ्रम०' (४।१।२६) इति वैत्वे फेणतुः पफणतुः । थवि 'स्कसृवृ०' (४।४।८१) इतीटि फेणिथ पफणिथ । 'क्षुब्धविरिब्ध०' (४।४।७०) इति क्तेवि निपातनादनायासे फाण्टाभिरद्भिराचामेदिति कदुष्णाभिरित्यनायासो गम्यते आयासे तु फणितम् । कण कणति णौ ह्रस्वे कणयति णावचि कणयतीति कणः । 'कणे मनस्तृप्तौ' (३।१।६) इति सूत्रनिर्देशादेत्वे कणेहत्य पयः पिबति । श्रद्धाघातं कृत्वेत्यर्थः । तृप्तेरन्यत्र गतित्वाभावे कणेहत्वा मूषिकां गतः । रण रणति णौ रणयति गतेरन्यत्र फाणयति घटं निःस्नेहयतीत्यर्थः । काणयति राणयति शब्दयतीत्यर्थः । कणिरणी पूर्वाधीतौ घटादिकार्यार्थमिह पठितौ । **'चण** हिंसादानयोश्च' । हिंसायां दाने चकाराद्गतौ । चणति । णौ ह्रस्वे चणयति शब्दे तु चाणयति । उणादौ दृकृनित्यके (२७) चणकः । **'शण श्रण** दाने' शणति णौ ह्रस्वे शणयति घञि शाणः । श्रणति णौ ह्रस्वे श्रणयति । दानादन्यत्र शाणयति श्राणयति 'श्रणण् दाने' विश्राणयति । अथ थान्ताश्चत्वारः सेटश्च । **'श्लथ क्नथ क्रथ क्लथ** हिंसार्थाः' । श्लथति श्लथयति । क्नथति क्नथयति । क्रथति क्रथयति । क्लथति क्लथयति । चौरस्योत्क्राथयतीति तु यौजादिकस्य घञन्ताद्वा णिचि 'जासनाटक्राथ०' (२।२।१४) इति ह्रस्वाभावे वा । अथ दान्तौ २ सेटौ च । **'छद्** ऊर्जने' । ऊर्जनं प्राणनं बलं च । 'छदण् संवरणे' इति पठिष्यमाणोऽप्यूर्जने घटादिकार्यार्थमिह पठितः । छदयत्यग्निः स्वार्थे णिच् छादयन्तं प्रयुङ्क्ते इति णिग्वा । ऊर्जनादन्यत्र छादयति गृहं तृणैः । **'मदै** हर्षग्लपनयोः' । 'मदैच् हर्षे इत्ययमनयोरर्थयोर्घटादिकार्यार्थमिह पठितः । मदयति । गुरुं शिष्यः । मदयति सुरा चैत्रम् हर्षयतीत्यर्थः । मदयति शत्रुम् विमदयति शत्रुम् ग्लपयतीत्यर्थः । अन्यत्रानेकार्थत्वात् उन्मादयति प्रमादयति । अथ नान्ताः पञ्च सेटश्च । **ष्टन स्तन ध्वन** शब्दे । 'षः स०' (२।३।९८) इति सत्वे स्तनयति । षोपदेशत्वात् 'नाम्यन्तस्था०' (२।३।१५) इति षत्वे तिष्टनयिषति । स्तनयति । अषोपदेशत्वात्षत्वाभावे तिस्तनयिषति । ध्वनयति दध्वान ध्वनयन्नाशाम् । एते पूर्वपठिता अप्यर्थविशेषे घटादिकार्यार्थमिहाधीताः । अनेकार्थत्वादर्थान्तरे स्तानयति । शब्देऽपि स्तानयतीत्यन्ये । ध्वानयति । **'स्वन** अवतंसने' । स्वनति । णौ स्वनयति अवतंसयतीत्यर्थः । 'जॄभ्रम०' (४।१।२६) इति वैत्वे स्वेनतुः सस्वनतुः स्वेनुः सस्वनुः । पूर्वं पठितोऽप्यर्थविशेषे घटादिकार्यार्थमिहाधीतः । शब्दे तु स्वानयति । **'चन** हिंसायाम्' । चनति णौ चनयति । शब्दे तु चानयति पूर्वपठितोऽप्यर्थविशेषे घटादिकार्यार्थमिहाधीतः । अथ रान्तः सेट् च १ । **'ज्वर** रोगे' । ज्वरति णौ ह्रस्वे ज्वरयति । ञिणम्परे तु वा दीर्घे अज्वारि अज्वरि । ज्वारम् २ ज्वरम् २ । रुजार्थस्येत्यत्र ज्वरेर्वर्जनाद्वा कर्मत्वाभावे द्वितीयैव, न तु षष्ठी । चौरं ज्वरयति ज्वरः । यङि जाज्वर्यते । यङ्लुपि जाज्वरीति जाजूर्त्ति । क्ते ज्वरितः । क्विपि 'मव्यवि०' (४।१।१०९) इति वत्वोटि सुजूः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्तौ जूर्त्तिः । 'समः पृचैप्ज्वरेः' ( ५।२।५६ ) इति घिनणि संज्वरणशीलः संज्वारी । उणादौ कावावी० ( ६३४ ) इति णौ जूर्णिः ज्वरः । अथ लान्ताश्चत्वारः सेटश्च ॥ ४ ॥ 'चल कम्पने' । चलति णौ ह्रस्वे चलयति शाखाम् । कम्पनादन्यत्र चालयति सूत्रम् पर्यनुयुङ्क्ते । चालयति शीलम् हरतीत्यर्थः । ज्वलादौ पठितोऽयं घटादिकार्यार्थमिह पठ्यते । 'ह्वल ह्मल चलने' । ह्वलति णौ ह्रस्वे विह्वलयति । ( अचि विह्वलः । ह्मल ह्मलति णौ ह्रस्वे प्रह्मलयति ज्वलह्वलेत्यनुपसर्गस्य वा ह्रस्वे ह्वलयति ह्मालयति ह्मलयति ) ह्मालयति 'ज्वल दीप्तौ च' । चकाराच्चलने प्रज्वलयति संज्वलयति । 'ज्वलह्वल०' ( ४।२।३२ ) इत्यनुपसर्गस्य वा ह्रस्वे ज्वलयति ज्वालयति । ज्वलादौ पठितोऽप्ययं घटादिकार्यार्थमिह पठितः । केचित्तु दलिवलिस्खलिक्षपित्रपीणामपि घटादित्वमिच्छन्ति । तन्मते दलयति वलयति स्खलयति क्षपयति त्रपयति इत्यपि भवति । →→ वृत् घटादिः ५९ ←←

'वदुङ् स्तुत्यभिवादनयोः' । वन्दते इत्यादि पाठसिद्धम् । धातुश्चायं वर्णपरिपाट्यां निरूपित एव ॥ १२५ ॥ स्फायैङ् इति अद्यतन्या द्वितीयत्रिकबहुवचने सूत्रम्

## हान्तस्थाञ्ञीड्भ्यां वा ॥ १२६ ॥ [ सि० २।१।८१ ]

**हादन्तस्थायाश्च पराञ्ञेरिटश्च परासां परोक्षाद्यतन्याशिषां धो ढ् वा स्यात् । अस्फायिढ्वम्–अस्फायिध्वम् । पस्फाये पस्फायिढ्वे २ । ६ । स्फायिषीष्ट स्फायिषीढ्वम् २। ७ । स्फायिता ८ । स्फायिष्यते ९ । आप्यायते ४ ॥ १२६ ॥**

'हान्त०' हान्तस्थात ञीड्भ्यां वेत्यत्र वचनभेदो यथासङ्ख्यनिवृत्त्यर्थः । हकारादन्तस्थायाश्च परात् ञेरिति 'स्वरग्रहदृशहन्भ्यः स्यसिजाशीः श्वस्तन्यां ञिड् वा' ( ३।४।६९ ) इति ञिडागमः । ततो ञेः परासामद्यतन्याशिषां धस्य ढत्वे क्रमेणोदाहरणानि–अग्राहिढ्वम् अग्राहिध्वम् । ग्राहिषीढ्वम् ग्राहिषीध्वम् । अनायिढ्वम् अनायिध्वम् । नायिषीढ्वम् नायिषीध्वम् । अकारिढ्वम् अकारिध्वम् । कारिषीढ्वम् कारिषीध्वम् । अलाविढ्वम् अलाविध्वम् । लाविषीढ्वम् लाविषीध्वम् । भावकर्मविहितासु स्यसिजाशीःश्वस्तनीषु ञिड्विधानात्परोक्षायां ञिर्न सम्भवतीति नोदाहृतः । इटश्चेति हादन्तस्थायाश्च परादिटः परासां परोक्षाद्यतन्याशिषां धस्य ढत्वे क्रमेणोदाहरणानि जगृहिढ्वे जगृहिध्वे । अग्रहीढ्वम् अग्रहीध्वम् । 'सो धि वा' ( ४।३।७२ ) इति सिचो लुक् ग्रहीषीढ्वम् ग्रहीषीध्वम् । 'दीङ्च् क्षये' 'दीय् दीङः क्ङिति स्वरे' ( ४।३।९३ ) इतीयादेशे उपदिदीयिढ्वे उपदिदीयिध्वे । आयिढ्वम् आयिध्वम् । अयिषीढ्वम् अयिषीध्वम् । तत्वरिढ्वे तत्वरिध्वे । अत्वरिढ्वम् अत्वरिध्वम् । त्वरिषीढ्वम् त्वरिषीध्वम् । ववलिढ्वे २ । अवलिढ्वम् अवलिध्वम् संवलिषीढ्वम् संवलिषीध्वम् । लुलुविढ्वे लुलुविध्वे । अलविढ्वम् अलविध्वम् । लविषीध्वम् । लविषीढ्वम् । हान्तस्थादिति किम् ? धानिषीढ्वम् आसिषीध्वम् ।

ऐदित्त्वात् क्तयोर्नेट् स्फातः स्फातवान् । 'स्फायः स्फीर्वा' ( ४।१।९४ ) इति स्फीतः स्फीतवान् । णौ 'स्फायः स्फाव्' ( ४।२।२२ ) इति स्फावादेशे स्फावयति । पारायणिकानां तु स्फाययतात्यपि । तथा क्विपि यलुकि स्फामाचष्टे इति णिचि अन्तस्य स्फावादेशे स्फावयतीति । उणादौ दिननग्न० (२६८) इति इने निपातनात् फेनः भीवृधि० ( ३८७ ) इति रे स्फारम् । स्थविरपिठिर० (४१७) इतीरे निपातनात् स्फिरः स्फार इत्यर्थः । ओप्यायैङ् आप्यायते इत्यादि स्फुटम् ॥ १२६ ॥ अद्यतन्यामाद्यत्रिकाद्यवचने सूत्रम् ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## दीपजनबुधिपूरितायिप्यायो वा ॥ १२७ ॥ [ सि० ३।४।६७ ]

**एभ्यः षड्भ्योऽद्यतन्यास्ते परे ञिच् वा स्यात्तद्योगे तलुक् च । ञचावितौ । आप्यायि चैत्रः । आप्यायिष्ट ५ ॥ १२७ ॥**

**'दीप०'** एभ्यः षड्भ्य इति 'दीपैचि दीप्तौ,' 'जनैचि प्रादुर्भावे,' 'बुधिं मनिंच् ज्ञाने' 'पूरैपि आप्यायने' 'तायृङ् सन्तानपालनयोः' 'प्यायैङ् अयमेव । एतेभ्यः क्रमेणोदाहरणानि अदीपि अदीपिष्ट । अजनि अजनिष्ट । अबोधि अबुद्ध । अपूरि अपूरिष्ट । अतायि अतायिष्ट । अप्यायि अप्यायिष्ट चैत्र इति । ते पर इति किम् ? अदीपिषाताम् । कर्त्तरीत्येव । अदीपि भवता । भावकर्मणोरुत्तरेण नित्यमेव, बुधीति इकारो दैवादिकस्यात्मनेपदिनः परिग्रहार्थः, तेन बुधृग् अबोधिष्टेत्यत्र न भवति ॥ १२७ ॥ परोक्षायां सूत्रम्

## प्यायः पीः ॥ १२८ ॥ [ सि० ४।१।९१ ]

**प्यायः परोक्षायङोः पीः स्यात् । आपिप्ये । आपिप्यिषे ६ । आप्यायिषीष्ट ७ । आप्यायिता ८ । आप्यायिष्यते ९ । आप्यायिष्यत १० । 'तायृङ् सन्तानपालनयोः' । तायते ४ । अतायि अतायिष्ट इत्यादि । अयिवयिप्रभृतयो गतौ । अयते । उपसर्गस्यायौ ( २।३। १०० ) रो लः । प्लायते-पलायते ४ । पलायिष्ट ॥ १२८ ॥**

**'प्यायः०'** स्पष्टं च । आपिप्ये इत्यादि सर्वं व्यक्तमेव । यङि आपेपीयते । क्तयोरनुपसर्गस्य ( ४।१। ९२ ) इति पीभावे 'सूयत्याद्योदितः' ( ४।२।७० ) इति क्तस्य नत्वे च पीनौ स्तनौ । पीनं मुखम् । 'आङोऽन्धूधसोः' ( ४।१।९३ ) इति प्यादेशे आपीनोऽन्धुः आपीनमूधः । अर्थान्तरे तु आप्यानश्चन्द्रः । **स्वरात्** ( २।३।८५ ) अदुरुपसर्गान्तः शब्दस्थाद्रषूवर्णात्परस्य कृद्विषयस्य नकारस्य स्वरादुत्तरस्य णो भवति इति णत्वे प्राप्ते 'न ख्यापूग्०' (२।३।९०) इति प्रतिषेधात् णत्वाभावे प्रप्यानः । ओदित्त्वात् 'सूयत्याद्योदितः' इति तस्य नत्वम् । **तायृङ्** इति तायते इत्यादि व्यक्तार्थम् । ऋदित्त्वात् ङपरे णौ न ह्रस्वः अततायत् । यङि तातायते यङ्लुपि तातायीति ताताति । 'न णिङ्य०' ( ५।२। ४५ ) इति प्रतिषेधादनाभावे तृनि तायिता । 'णिन् चावश्यका०' ( ५।४।३६ ) इति णिनि तायी । **अयि वयि** प्रभृतय इति **'अयि वयि पयि मयि नयि चयि रयि** गतौ' । अयते उपसर्गयोगे सूत्रम् । **'उप०'** (३।२।१००) रो लृ इति अयमस्यार्थः । उपसर्गसम्बन्धिनो रेफस्य **अयि** गतावित्यस्मिन् धातौ परे लकारादेशो भवति । प्लायते पलायते पल्ययते । प्लृयते । अत्रानेकवर्णव्यवधानान्नेच्छन्त्यन्ये । प्रतिपूर्वस्य प्रयोग एव नास्तीत्यन्ये । उपसर्गस्येति किम् ? परस्य अयनं परायनम् । अयाविति किम् ? इण्क् गतौ । अल् प्रायः परायः । अयीतीकारानिर्देशो यि गतावित्यस्य परिग्रहार्थः ॥ १२८ ॥ परोक्षायां सूत्रम्

## दयायास्कासः ॥ १२९ ॥ [ सि० ३।४।४७ ]

**एतेभ्यश्चतुर्भ्यः परोक्षाया आम् स्यात् । पलायाञ्चक्रे ६ । 'दयि दानगतिहिंसादानेषु च' । दयते ४ । अदयिष्ट ५ । दयाञ्चक्रे ६ । 'षेवृङ् सेवृङ् सेवने' ॥ १२९ ॥**

**'दया०'** एभ्यश्चतुर्भ्य इति । 'दयि दानगतिहिंसादानेषु' १ । अयिरयमेव 'आसिक् उपवेशने' 'कासृङ् दीप्तौ' । दयाञ्चक्रे अयाञ्चक्रे एवं पलायाञ्चक्रे एवमासाञ्चक्रे कासाञ्चक्रे । अयिधातोश्चानटि

निलयनम् दुलयनम् । निर्दुसोस्तु सो रुत्वस्य परे लत्वे सिद्धत्वान्निरयणम् दुरयणम् । अत्र 'स्वरात्' (२।३।८५) इति नस्य णत्वम् । अदुरुपसर्गान्तर इत्यत्र दुरो वर्जनात् स्वरादिति णत्वाभावे दुरयनम् । मनि 'य्वोः' (४।४।१२१) इति यलोपेऽकारान्ताद्विहितेऽशिति 'अतः' (४।३।८२) इति लोपविधानादस्य लोपाभावे स्वमा । ये त्वत्राप्यलुकमिच्छन्ति तन्मते सुमा । क्विपि 'य्वोः' इति यलुपि ह्रस्वस्येति ते स्वत् । ये त्वत्राप्यत इति अल्लोपमिच्छन्ति तन्मते सुत् । ये त्वन्तरङ्गं तागमं प्रति बहिरङ्गस्य यलुकोऽसिद्धत्वमिच्छन्ति तन्मते (स्वः) । विचि यलुकि (स्वः । क्तौ य्वोरिति यलुकि अतिः, अलुक्पक्षे तु तिः । **वयि** वयते नशसेत्येत्वनिषेधाद्ववये वयिता मनि य्वोरिति यलुकि) सुवमा । अलुक् पक्षे सुव्मा । अत्र स्वरस्य (परे) प्राग्विधाविति स्थानित्वात् 'अनुनासिके च०' (४।१।१०८) इति वस्योट् न भवति । उणादौ सृवधिभ्यां णित् (५७०) इत्यसे वायसः । असू (९५२) इत्यसि वयः पक्षी बाल्यादि च । **पयि** पयते पेये पयिता । मनि यो लुकि सुपमा । अलुक्पक्षे सुप्मा । एवं वनि सुपवा सुप्वा । असित्यसि पयः, पिबतेर्वा पाहाक्भ्यां पयह्यौ च (९५३) इत्यसि । **मयि** मयते मेये मयिता अचि मयः । **नयि** नयते नेये नयिता । णोपदेशत्वाण्णत्वाभावे प्रनयिता । मनि यो लुकि सुनमा । अलुक्पक्षे सुन्मा । एवं सुनवा सुन्वा । क्विपि यलुकि 'ह्रस्वस्य०' (४।४।११३) इति ते च सुनत् सुनतौ सुनतः । सूः सूतौ सूनः । अत्रालुक् 'स्वरस्य परे प्राग्विधौ' (७।४।११०) इति स्थानित्वस्य 'न सन्धिः' इति प्रतिषेधात् 'नि दीर्घे' इति दीर्घो नाम्नो नोऽनह्न इति नस्य लुक् च भवति । क्तौ नतिः न्तिः । **चयि** चयते चेये चयिता । घञि चायः । चय इति तु चिनातेरलि । **रयि** रयति रेये रयितेत्यादि । '**दयि** दानगतिहिंसादानेषु च' चकाराद्रक्षणे 'स्मृत्यर्थदयेशः' (२।२।११) इति कर्मणो वा कर्मत्वे 'शेषे' (२।२।८१) इति षष्ठ्यां दानस्य दयते, दानं दयते । 'दयायास्०' (३।४।४७) इति परोक्षाया आमि दयाञ्चक्रे दयिता । क्ये दय्यते अत्र 'य्वोः प्वय्०' इत्यत्र यिवर्जनाद्यलोपाभावः । 'शीङ् श्रद्धा०' (५।२।३७) इत्यालौ दयालुः । दयनं दयन्ते प्राणिनोऽनयेति वा यथाक्रमं त्तयनटोरपवादे भिदादित्वादङि दया । क्ते दयितः । दयेरेव कर्मणो वा कर्मत्वविधानादेङ् पालने इत्यस्य कर्मणि द्वितीया । मातरं दयते । **षेवृङ् सेवृङ्** प्रभृतय इति '**षेवृङ् सेवृङ् केवृङ् खेवृङ् गेवृङ् ग्लेवृङ् पेवृङ् प्लेवृङ् मेवृङ् म्लेवृङ् सेवने**' दशाप्येते ऋदितः सेटश्च । ऋदित्त्वं ङपरे णावुपान्त्यस्य ह्रस्वाभावार्थम् । **षेवृङ्** 'षः स०' (२।३।९८) इति सत्वे सेवते सिषेवे सेविता । ऋदित्त्वात् ङे ह्रस्वाभावे षोपदेशत्वाच्च 'नाम्यन्तस्था०' (२।३।१५) इति षत्वे असिषेवत् ॥ १२९ ॥ उपसर्गयोगे सूत्रम् ।

## परिनिवेः सेवः ॥ १३० ॥ [ सि० २।३।४६ ]

**एभ्यः परस्य सेवः सो द्वित्वेऽप्यट्यपि ष् स्यात् । सेवते परिषेवते । पर्यषेवत् ४ । पर्यषेविष्ट ५ । परिषिषेवे ६ । परिषेविषीष्ट ७ । परिषेविता ८ । परिषेविष्यते ९ । पर्यषेविष्यत १० । 'षहि मर्षणे' । सहते ॥ १३० ॥**

'**परि०**' एभ्यः परस्येति परिनिव्युपसर्गस्थान्नाम्यन्तस्थाकवर्गात् परस्य सेवतेर्धातोः सकारस्य द्वित्वेऽप्यट्यपि षो भवति परिषेवते । निषेवते । विषेवते । अड्व्यवायेऽपि पर्यषेवत न्यषेवत व्यषेवत । सनि परिषिषेविषते । यङि परिषेषेव्यते निषेषेव्यते । विषिषेविषते विषेषेव्यते । विषिषेवे । परिनिवेरिति किम् ? अनुसेवते प्रतिसेषेव्यते प्रत्यसिषेवत् । अत्रोपसर्गाश्रितं षत्वं न भवति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

धातोस्तु द्वित्वाश्रितं भवत्येव । उभयत्र नेच्छन्त्येके । प्रतिसेसेव्यते प्रत्यसिसेवत् । अत्र 'णिस्तोरेव०' ( २।३।३७ ) इति नियमेन बाधितस्य षत्वस्य प्रतिप्रसवः । अनटि सेवनम् । भीरुष्ठानादित्वात्षत्वे दुन्दुभेः सेवनं दुन्दुभिषेवणम् । **सेवृङ्** सेवते अषोपदेशत्वात्षत्वाभावे परिसेवते निसेवते विसेवते । सनि परिसिसेविषते सिसेवे । णौ ङे असिसेवत् क्ते सेवितः 'क्रुट०' ( ५।३।१०६ ) इत्यः सेवा । **केवृङ्** केवते चिकेवे णौ ङे अचिकेवत् उणादौ 'मृदिकन्दि०' ( ४६५ ) इत्यले केवलः । **खेवृङ्** खेवते चिखेवे णौ ङे अचिखेवत् । **गेवृङ्** गेवते जिगेवे अजिगेवत् । **ग्लेवृङ्** ग्लेवते जिग्लेवे अजिग्लेवत् । **पेवृङ्** पेवते पिपेवे अपिपेवत् । **प्लेवृङ्** प्लेवते पिप्लेवे अपिप्लेवत् । **मेवृङ्** मेवते मिमेवे अमिमेवत् । **म्लेवृङ्** म्लेवते मिम्लेवे अमिम्लेवत् । **'षहिं मर्षणे'** इति अनुस्वारेत्त्वाभावात् सेट् मर्षणं क्षमा । सहते उत्सहते सहेत सहताम् असहत । असहिष्ट असहिषाताम् ध्वमि 'सो धि वा' ( ४।३।७२ ) इति सिज्लोपे 'हान्तस्था०' ( २।१।८१ ) इति वा ढत्वे त्रैरूप्यम् असहिध्वम् असहिढ्ढ्वम् । असहिढ्वम् । सेहे सेहाते सेहिरे सेहिषे । सहिषीष्ट । सोढा सहिता । सहिष्यते । असहिष्यत ॥ १३० ॥ उपसर्गयोगे सूत्रम्

## असोङ्सिवूसहस्सटाम् ॥ १३१ ॥ [ सि० २।३।४८ ]

**परिनिविभ्यः परस्य सिवूसहोः स्सटश्च सः ष् स्यात् । अँटि च वा न च सो ङविषये । विषहते । पर्यषहत–पर्यसहत ४ । पर्यषहिष्ट २।५ । सेहे ६ । सहिषीष्ट ७ ॥ १३१ ॥**

**'असो०'** क्रमेणोदाहरणानि 'षिवूच् उतौ' 'षः स०' ( २।३।९८ ) इति सत्वे पुनरनेन षत्वे परिषीव्यति निषीव्यति विषीव्यति । परिषहते निषहते विषहते । सम्परेः कृगस्सडिति स्सट् परिष्करोति विष्किरः शकुनिः । नेस्तु परस्सड् नास्तीति नोदाह्रियते । असोङेति किम् ? परिसोढः परिसोढव्यः निसोढः निसोढव्यः विसोढः विसोढव्यः । ङे मा परिसीषिवत् परिसीषहत् । मूलधातोस्तु षत्वं भवत्येव । 'सो' प्रतिषेधः सेहेरेव न सिवस्तस्य सोरूपासम्भवात् । सिवोऽनुबन्धनिर्देशात् यङ्लुपि न भवति परिसेषिवीति । बहुवचनं परिनिविभिः सह यथासङ्ख्यनिवृत्त्यर्थम् । अँटि च वेति । अत्र सूत्रम् **'स्तुस्वञ्जश्चाटि नवा'** ( २।३।४९ ) परिनिविभ्यः परस्य स्तुस्वञ्जोर्धात्वोरसोङ्सिवूसहस्सटां च सकारस्याटि सति षो वा स्यात् । 'ष्टुंक् स्तुतौ' 'षः स०' ( २।३।९८ ) इति सत्वे अनेन विकल्पेन षत्वे पर्यष्टौत् पर्यस्तौत् । न्यष्टौत् न्यस्तौत् । व्यष्टौत् व्यस्तौत् । **'ष्वञ्जित्** सङ्गे' 'षः स०' इति सत्वे पुनरनेन विकल्पेन षः पर्यष्वजत पर्यस्वजत । न्यष्वजत न्यस्वजत । व्यष्वजत व्यस्वजत । पर्यषीव्यत् पर्यसीव्यत् । न्यषीव्यत् न्यसीव्यत् । व्यषीव्यत् व्यसीव्यत् । पर्यषहत पर्यसहत । न्यषहत न्यसहत । व्यषहत व्यसहत । पर्यष्करोत् पर्यस्करोत् । असोङ्सिवूसहेत्येव पर्यसोढयत् पर्यसीषिवत् पर्यसीषहत् । स्तुस्वञ्जोर्नित्यं प्राप्ते सिवूसहस्सटां चाप्राप्ते विभाषा ॥ १३१ ॥ अशिति तादौ इड् विकल्पे सूत्रम् ।

## सहलुभेच्छरुषरिषस्तादेः ॥ १३२ ॥ [ सि० ४।४।४६ ]

**एभ्यः परस्य तादेरशित आदिरिड् वा स्यात् । सहिता । पक्षे हो धुट्पदान्ते इति हस्य ढत्वे, अधश्चतुर्थादिति तस्य धत्वे, तवर्गश्चवर्गेति धस्य ढत्वे ॥ १३२ ॥**

**'सह०'** 'षहि मर्षणे' 'लुभच् गार्ध्ये' 'इषत् इच्छायाम्' 'कष शिष जष झष वष मष मुष रुष रिष

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यूष जूष शष चष हिंसायाम्' । एषां त्रयोदशानामष्टमनवमौ रुषरिषौ । एभ्यः परस्य । तादेरित्यादि व्यक्तम् ॥ १३२ ॥ इडभावपक्षे 'हो धुट् पदान्ते' इत्यादिप्रक्रियायां कृतायां सूत्रम् ।

## सहिवहेरोच्चावर्णस्य ॥ १३३ ॥ [ सि० १।३।४३ ]

**सहिवह्योर्ढस्य तद्वे परे लुक् स्यात्, ओच्चावर्णस्य । सोढा–सहिता सोढारौ । असोढेति किम् ? । विषहितासे–विसोढासे ८ । सहिष्यते ९ । असहिष्यत १० । 'गाहौङ् विलोडने' । गाहते ४ । इड्विकल्पे अगाहिष्ट–अगाढ अगाहिषाताम्–अघाक्षाताम् । अगाहिषत–अघाक्षत । अगाहिष्ठाः-अगाढाः इत्यादि ५ । जगाहे जगाहिषे–जघाक्षे ६ । गाहिषीष्ट–घाक्षीष्ट ७ । गाहिता-गाढा ८ । गाहिष्यते–घाक्ष्यते ९ । अगाहिष्यत–अघाक्ष्यत १० । 'ईहि चेष्टायाम्' । ईहते ऐहत ४ ऐहिष्ट ५ ईहाञ्चक्रे ६ ईहिषीष्ट ७ ईहिता ८ ईहिष्यते ९ ऐहिष्यत १० । 'ईक्षि दर्शने' ईक्षते ऐक्षत ४ । ऐक्षिष्ट ५ ईक्षाञ्चक्रे ६ ईक्षिषीष्ट ७ ईक्षिता ८ ईक्षिष्यते ९ ऐक्षिष्यत ॥ १३३ ॥**

**'सहि०'** स्पष्टम् । सोढेति 'वहीं प्रापणे' इति वहीधातोस्तु वोढेति एवं सोढुं सोढव्यम् । सहिता सहितुम् सहितव्यम् । 'लुभ इत्यविशेषेण ग्रहणम् । लोब्धा लोब्धुम् लोब्धव्यम् । लोभिता लोभितुम् लोभितव्यम् । इच्छ एष्टा एष्टुम् एष्टव्यम् एषिता एषितुम् एषितव्यम् । इच्छेति निर्देशादिषत् इच्छायामित्यस्य ग्रहणम् । 'इषच् गतौ' 'इषश् आभीक्ष्ण्ये' इत्यनयोस्तु नित्यमेवेट् प्रेषिता प्रेषितुम् प्रेषितव्यम् । केचिदिषशोऽपि विकल्पमाहुः । रुष् रोष्टा रोष्टुम् रोष्टव्यम् रोषिता रोषितुम् रोषितव्यम् । रेष्टा रेषितुम् रेषितव्यम् । तादेरिति किम् ? सहिष्यते लोभिष्यति एषिष्यति । **कश्चित्तु पठति सूत्रम्** 'अशिभृगुस्तुशुचिवसिभ्यस्तकारादौ वेट्' अष्टा अशिता । भर्ता भरिता । स्तोता स्तविता । शोक्ता शोचिता । वस्ता वसिता ॥ **तथा** 'रुनुसुदु ४ भ्यो(ऽप्य)परोक्षायां वेट्' रोता रविता । नोता नविता । सोता सविता । अत्र 'सुं प्रसवे' इत्यषोपदेश एव गृह्यते । अन्यथा व्यावृत्तिदर्शिते सुसुविमेति प्रयोगे कृतत्वात्षत्वं स्यात् । दोता दविता । अपरोक्षायामिति किम् ? रुरुविम नुनुविम सुसुविम । ( दुदुविम ) **तथा** 'विषेर्मूलफलकर्मण्यपरोक्षायामिड्वा' । वेष्टा वेषिता मूलानि वा । ( फलानि वा ) अन्यत्र संवेष्टा । अपरोक्षायामिति किम् ? संविविषिव(म) । **'गाहौङ्** विलोडने' इति विलोडनं परिमलनम् अगाहिष्ठाः अगाढा इत्यादीति । अद्यतन्या ध्वमि इडभावपक्षे 'सो धि वा' ( ४।३।७२ ) इति सिजूलोपे 'हो धुट्पदान्ते' ( २।१।८२ ) इति हस्य ढत्वे 'तवर्गस्य श्चवर्ग०' ( १।३।६० ) इति धस्य ढत्वे 'तृतीयस्तृतीयचतुर्थे' ( १।३।४९ ) इति ढस्य डत्वे अघाड्ढ्वम् 'धुटो धुटि स्वे०' ( १।३।४८ ) इति डलोपे अघाढ्वम् । 'सो धि वा' इति सिजूलोपाभावे तु 'षढोः कः सि०' ( २।१।६२ ) इति ढस्य कत्वे 'नाम्यन्तस्थाकवर्गात्०' ( २।३।१५ ) इति सस्य षत्वे 'तृतीयस्तृतीय०' इति षस्य डत्वे 'तवर्गस्य श्चवर्ग०' इति धस्य ढत्वे अगाहिड्ढ्वम् । सिचो लोपे 'हान्तस्थाञ्जीड्भ्यां वा' ( २।१।८१ ) इति धस्य ढत्वे अगाहिढ्वम् । धस्य ढत्वाभावे अगाहिध्वम् अघाक्षि अगाहिषि अघाक्ष्वहि अगाहिष्वहि । अघाक्ष्महि अघाहिष्महि । **परोक्षायां** जगाहिषे इति जगाहाथे जगाहिढ्वे जगाहिध्वे । शेषं स्पष्टम् । वेट्त्वात् क्तयोर्नेट् गाढः गाढवान् । अचि गाहः । स्त्रियां गौरादित्वात् ङ्यां गाही घञि अवगाहः । **ईहि** चेष्टायामिति ईहते इत्यादि सर्वं स्पष्टम् । घञि ईहः स्त्रियां 'क्तेट०' ( ५।३।१०६ ) इत्यः ईहा । **ईक्षि** दर्शने ईक्षते इत्यादि सर्वं सुबोधम् । 'यद्वीक्ष्ये राधीक्षी' ( २।२।५८ ) इति चतुर्थ्यां मैत्रायेक्षते । ईक्षितव्यम् परस्त्रीभ्यः । अचि वीक्ष्यः । शीलीकामीत्यणो-



Jain Education International For Personal & Private Use Only www.jainelibrary.org

पवादे णे प्रियेक्षा । क्ते प्रेक्षितः 'क्तेट०' इत्यः प्रेक्षा । घ्यणि उत्प्रेक्ष्यः । करणेऽनटि ईक्षणम् ।

'आत्मनेपदिनां भ्वादिधातूनां द्विशती स्मृता ।
षण्णवत्यधिकाऽथैकोनषष्टिश्च घटादयः' ॥ १ ॥
'ज्वलादयः स्मृता एकत्रिंशदेवं चुतादयः ।
त्रयोविंशतिरित्येवं नवोपेता चतुःशती' ॥ २ ॥ ॥ १३३ ॥

अथ परस्मैपदिनामुभयपदिनां च यथात्मनेपदित्वं भवति तथा दर्शयति

**विशिष्टार्थोपसर्गादेः परस्मैपदिनामपि ।**
**तथा चोभयपदिनामात्मनेपदिता भवेत् ॥ १ ॥**

**विशि०** विशिष्टा येऽर्थाश्च उपसर्गाश्च ते आदिर्यस्य क्रियाव्यतिहारादेः स विशिष्टार्थोपसर्गादिस्तस्मात् । तत्र विशिष्टार्था इत्यर्थविशेषा यथा 'प्रलम्भे गृधिवञ्चेः' (३।३।८९) बटुं गर्द्धयते वञ्चयते । विशिष्टोपसर्गा उपसर्गविशेषा यथा 'परावेर्जेः' (३।३।२८) पराजयते विजयते । आदिशब्दादन्येऽपि क्रियाव्यतिहारादय आत्मनेपदित्वहेतवो गृह्यन्ते । यथा 'समस्तृतीयया' (३।३।३२) इत्यत्रोपसर्गविभक्तिविशेषसमुदायः । यथा वा 'उदश्चरः साप्यात्' (३।३।३१) इत्यत्रोपसर्गसकर्मकत्वसमुदाय इत्यादयो यथायथं दर्शयिष्यन्त इति ।

## देवार्चामैत्रीसङ्गमपथिकर्तृकमन्त्रकरणे स्थः ॥ १३४ ॥ [ सि० ३।३।६० ]

**एतदर्थादुपपूर्वात्तिष्ठतेरात्मनेपदं स्यात् । देवार्चा, जिनेन्द्रमुपतिष्ठते उपातिष्ठत ४ ॥ १३४ ॥**

'देवार्चा०' जिनेन्द्रमुपतिष्ठते पूजयतीत्यर्थः ॥ १३४ ॥ अद्यतन्यास्ते सूत्रम्

## इश्च स्थादः ॥ १३५ ॥ [ सि० ४।३।४१ ]

**स्थाधातोर्दासंज्ञाच्चात्मनेपदविषयः सिच् किद्वत्स्यात् तद्योगे च स्थादोरिश्च । सिचः कित्त्वाद्गुणाभावः । धुड्ह्रस्वादिति सिज्लोपे उपास्थित उपास्थिषाताम् उपास्थिषत ५ । उपतस्थे ६ । उपस्थासीष्ट ७ । उपस्थाता ८ । उपस्थास्यते ९ । उपास्थास्यत १० । मैत्री, रथिकानुपतिष्ठते । सङ्गमः, यमुना गङ्गामुपतिष्ठते । पन्थाः कर्ता यस्य तत्र स्रुघ्नमुपतिष्ठते पन्थाः । मन्त्रः करणं यस्य तत्र ऐन्द्र्या गार्हपत्यमुपतिष्ठते ॥ १३५ ॥**

'इश्च०' स्पष्टं च । यथा च । 'बहूनामप्यचित्तानामेको भवति चित्तवान् । पश्य वानरसङ्घेऽस्मिन् यदर्कमुपतिष्ठते' । यदा तु नेयं देवपूजाऽपि तु चापलमिति विवक्षितम्, तदा न भवत्यात्मनेपदम् । 'मैवं मंस्थाः सचित्तोऽयमेषोपि हि यथा वयम् । एतदप्यस्य कापेयं यदर्कमुपतिष्ठति' इति । मैत्रीति मित्रतया मित्रं वा कर्तुमाचरणं मैत्री उपस्थानस्य हेतुः फलं वा । अयमत्राभिप्रायः । अजर्यं सङ्गतमितिवत्संपूर्वाद्गमेर्मैत्र्यामपि दर्शनान्मैत्रीसङ्गमयोरर्थाभेदं यः शङ्कते तं प्रत्युपश्लेषरूपात्सङ्गमान्मित्रतयेत्यादिना मैत्र्या भेदं दर्शयति । विनापि संश्लेषेण मैत्री, मित्रस्य भावो मैत्री । सा हि उपस्थानस्य धात्वर्थस्य हेतुर्निर्वर्त्तिका । यथा रथिकानुपतिष्ठते इत्यत्र मित्रं सत् उपतिष्ठते तदा मैत्रीहेतुः । यदा तु प्रागमित्रं सन्मैत्र्यर्थं प्रवर्त्तते तदा मैत्रीफलम् । ततश्च कारणस्य फलस्य च क्रियां प्रति विषयत्वोपपत्तेरुपस्थानस्य विशेषणत्वेन मैत्री गौणो धात्वर्थो भवति । एवं च रथिकानुपतिष्ठते इति मैत्र्या हेतुना फलेन वाराधयतीत्यर्थः । सङ्गम इति सङ्गम उपश्लेषः । यमुना गङ्गामुपतिष्ठते उपश्लिष्यतीत्यर्थः । पन्थाः कर्त्ता

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यस्येति यस्य धात्वर्थस्य उपस्थानलक्षणस्य पन्थाः कर्त्ता भवति । तदप्युपचारात् पथिकगतमुपस्थानकर्तृत्वं पथ्युपचर्यते इति । ऐन्द्र्या गार्हपत्यमिति ऐन्द्र्या मन्त्रविशेषेण गार्हपत्यमग्निविशेषमाराधयतीत्यर्थः । मन्त्रादन्यत्र पतिमुपतिष्ठति यौवनेन । करणग्रहणं गायत्रीमुपतिष्ठति । अत्र मैत्री धात्वर्थविशेषणत्वेनोपसर्जनं धात्वर्थः, शेषास्तु प्रधानम् । अद्यतन्यां सिजागमे सूत्रम् 'इश्च०' स्पष्टम् ॥ १३५ ॥

## वा लिप्सायाम् ॥ १३६ ॥ [ सि० ३।३।६१ ]

**उपात्स्थो लिप्सायां गम्यायामात्मनेपदं वा स्यात् । भिक्षुर्वदान्यमुपतिष्ठते २ ॥ १३६ ॥**

**'वा लि०'** वदान्यमुपतिष्ठते उपतिष्ठति वा भिक्षां लभेयेति । द्विकेनाङ्केन वैकल्पिकं रूपद्वयं ज्ञेयम् ॥ १३६ ॥

## उदोऽनूर्ध्वेहे ॥ १३७ ॥ [ सि० ३।३।६२ ]

**अनूर्ध्वचेष्टायां उत्पूर्वात्स्थस्तथा । मुक्तावुत्तिष्ठते । ऊर्ध्वचेष्टायां तु आसनादुत्तिष्ठति । अचेष्टायामपि ग्रामाच्छतमुपतिष्ठति ॥ १३७ ॥**

**'उदो०'** अनूर्ध्वो य ईहश्चेष्टा तत्र वर्त्तमानादुदः परात्तिष्ठतेः कर्त्तर्यात्मनेपदं भवतीति । मुक्तावुत्तिष्ठते इति मुक्त्यर्थं चेष्टते इत्यर्थः । ग्रामाच्छतमुत्तिष्ठति उत्पद्यते इत्यर्थः ॥ १३७ ॥ उदुपसर्गयोगे विशेषसूत्रम्

## उदः स्थास्तम्भः सः ॥ १३८ ॥ [ सि० १।३।४४ ]

**उदः परयोः स्थास्तम्भोः सस्य लुक् स्यात् । उत्थाता ॥ १३८ ॥**

**'उद०'** स्पष्टार्थम् ॥ १३८ ॥

## ज्ञीप्सा स्थेये ॥ १३९ ॥ [ सि० ३।३।६४ ]

**ज्ञीप्सात्मप्रकाशनम् स्थेयः सभ्यस्तयोर्विषये स्थ आत्मनेपदम् । तिष्ठते कन्या छात्रेभ्यः । त्वयि तिष्ठते विवादः । प्रतिज्ञायाम् ( ३।३।६५ ) अप्येवम् । नित्यं शब्दमातिष्ठते । ( †संविप्रावात् ) ( ३।३।६३ ) संतिष्ठते इत्यादि ॥ १३९ ॥**

**'ज्ञीप्सा०'** आत्मप्रकाशनमिति परपरितोषार्थमात्मरूपादिप्रकाशनम् ज्ञीप्सा । स्थेयः सभ्य इति तिष्ठत्यस्मिन्निति स्थेयः । बाहुलकादधिकरणे 'य एचातः' ( ५।१।२८ ) इति यः । व्युत्पत्तिसमये आधारस्य निर्णेतृत्वं न विवक्षितमिति वाक्ये परस्मैपदम् । एषा च स्थेयशब्दस्य व्युत्पत्तिः, रूढिवशाच्च विवादपदे निर्णेता प्रमाणभूतः पुरुष उच्यते । तयोर्विषये स्थ इति ज्ञीप्सायां स्थेयविषयायां च क्रियायां वर्त्तमानात्तिष्ठतेः कर्त्तर्यात्मनेपदं स्यात् । तिष्ठते कन्येति स्वाभिप्रायप्रकाशनेनात्मानं रोचयतीत्यर्थः । त्वयि तिष्ठते विवाद इति त्वदुपदिष्टं निर्ण्णयतीत्यर्थः । यथा 'संशय्य कर्णादिषु तिष्ठते यः' कर्णादिस्थेयोपदिष्टं निर्ण्णयतीत्यर्थः । **प्रतिज्ञाया**मप्येवमिति प्रतिज्ञा अभ्युपगमस्तत्र वर्त्तमानात्तिष्ठतेः कर्त्तर्यात्मनेपदं भवति । नित्यं शब्दमातिष्ठते अभ्युपगच्छतीत्यर्थः । स्वभावाच्चायमाङ्पूर्वक एव प्रतिज्ञायां वर्त्तते । अस्योपलक्षणत्वात् **'समो गिरः'** ( ३।३।६६ ) सम् पूर्वाद्गिरतेः प्रतिज्ञायां वर्त्तमानात् कर्त्तर्यात्मनेपदं स्यात् । स्याद्वादं सङ्गिरते प्रतिजानीते इत्यर्थः । प्रतिज्ञायामित्येव सङ्गिरति ग्रासम् । गिर इति निर्देशात् गृणातेर्न भवति । **'अवात्'** ( ३।३।६७ ) पृथग्योगात्प्रतिज्ञायामिति निवृत्तम् । अवपूर्वाद्गिरतेः कर्त्तर्यात्मनेपदं भवति । अवगिरते । अवादन्यत्र गिरति गिर इत्येव । अवगृणाति अव-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पूर्वस्य गृणातेः प्रयोगो नास्तीत्यन्ये । **'निह्नवे ज्ञः'** ( ३।३।६८ ) निह्नवोऽपलापस्तस्मिन् वर्त्तमानाज्जानातेः कर्त्तर्यात्मनेपदं स्यात् । शतमपजानीते अपह्नुते इत्यर्थः । अनेन चास्यायमर्थोऽभिव्यज्यते । निह्नव इति किम् ? तत्त्वं जानाति । **'सम्प्रतेरस्मृतौ'** ( ३।३।६९ ) सम्–प्रतिभ्यां पराज्जानातेरस्मृतौ वर्त्तमानात्कर्त्तर्यात्मनेपदं स्यात् । **'समो ज्ञोऽस्मृतौ वा'** ( २।२।५१ ) अस्मृतौ वर्त्तमानात्सम्पूर्वाज्जानातेः कर्मणि तृतीया वा स्यात् । पक्षे द्वितीया । शतेन सञ्जानीते । शतं सञ्जानीते । अवेक्षते इत्यर्थः । शतं प्रतिजानीते अभ्युपगच्छतीत्यर्थः । अस्मृताविति किम् ? मातुः सञ्जानाति । मातरं सञ्जानाति स्मरतीत्यर्थः । **'अननोः सनः'** ( ३।३।७० ) सन्नन्ताज्जानातेः कर्त्तर्यात्मनेपदं स्यात्, स चेदनोरुपसर्गात्परो न भवति । धर्मं जिज्ञासते । अननोरिति किम् ? धर्ममनुजिज्ञासति । कथमौषधस्यानुजिज्ञासते ? 'अकर्मकात्प्राग्वत्' ( ३।३।७४ ) इत्यनेन भविष्यति । अकर्मकात् ज्ञ इत्यनेन प्राग् दृष्टत्वात्सन्नन्तात्प्राग्वदित्यनेनात्मनेपदे सिद्धे सकर्मकादेवायं विधिरिति ज्ञायते । **'श्रुवोऽनाङ्प्रतेः'** ( ३।३।७१ ) सन्नन्तात् शृणोतेः कर्त्तर्यात्मनेपदं स्यात्, स चेदाङ्प्रतिभ्यामुपसर्गाभ्यां परो न भवति । शुश्रूषते गुरून् । संशुश्रूषते शब्दान् । अनाङ्प्रतेरिति किम् ? आशुश्रूषति प्रतिशुश्रूषति । चैत्रं प्रति शुश्रूषते इति प्रतिना सम्बन्धाभावात् प्रतिषेधो न भवति । **'स्मृदृशः'** ( ३।३।७२ ) स्मृदृशिभ्यां सन्नन्ताभ्यां कर्त्तर्यात्मनेपदं स्यात् । सुस्मूर्षते पूर्ववृत्तम् । दिदृक्षते देवम् । **'शको जिज्ञासायाम्'** ( ३।३।७३ ) शकिःस्वभावादन्यधात्वर्थानुसंहितः प्रवर्त्तते । शक्नोति भोक्तुम् अन्यद्वेति । ततो ज्ञानानुसंहितार्थात्सन्नन्तात्कर्त्तर्यात्मनेपदं स्यात् । विद्याः शिक्षते विद्यासु शिक्षते ज्ञातुं शक्नुयामितीच्छतीत्यर्थः । आत्मनेपदेनैव जिज्ञासाया अवगमात् जिज्ञासितुमिति न प्रयुज्यते । जिज्ञासायामिति किम् ? शकुमिच्छति शिक्षति 'शिक्षि विद्योपादाने' इत्यनेनैव सिद्धे आमनुप्रयोगार्थं च वचनम् । तेन शिक्षाञ्चक्रे इति भवति नतु शिक्षाञ्चकारेति । अयं भावः । यद्यदः सूत्रं न व्यधास्यत् तदा सन्नन्तस्य शकेर्धातोः 'आमः कृग' ( ३।३।७५ ) इति आत्मनेपदं नाभविष्यत् । ततः शिक्षाञ्चक्रे इति न स्यात् । शिक्षेस्त्वामोऽसम्भव एव एकस्वरत्वात् । केचित्तु शकेः सन्नन्तस्यात्मनेपदमनिच्छन्तः शिक्षतेरेव जिज्ञासायामात्मनेपदमन्यत्र च परस्मैपदमिच्छन्ति ।

अथ प्रकृतम् । **'†संवि०'** ( ३।३।६३ ) एभ्यश्चतुर्भ्यः परात्तिष्ठतेः कर्त्तर्यात्मनेपदं स्यात् । सन्तिष्ठते वितिष्ठते प्रतिष्ठते अवतिष्ठते ॥ १३९ ॥

## उपात्स्थः ॥ १४० ॥ [ सि० ३।३।८२ ]

**कर्मण्यसति तथा । योगे उपतिष्ठते । सकर्मणस्तु नृपमुपतिष्ठति ॥ १४० ॥**

**'उपा०'** उपपूर्वात्तिष्ठतेः कर्मण्यसति कर्त्तर्यात्मनेपदं स्यात् । भोजनकाले उपतिष्ठते ॥ १४० ॥

## प्रोपादारम्भे ॥ १४१ ॥ [ सि० ३।३।५१ ]

**आभ्यामारम्भेऽर्थे क्रम आत्मनेपदं स्यात् । प्रक्रमते ४ । 'क्रम' इतीड्निषेधे प्राक्रंस्त ५ । प्रचक्रमे ६ । प्रक्रंसीष्ट ७ । प्रक्रन्ता ८ । प्रक्रंस्यते ९ । प्राक्रंस्यत १० । 'क्रमोऽनुपसर्गात्' ( ३।३।४७ ) वात्मनेपदम् । क्रमते–क्रामति †इत्यादि । 'आङो ज्योतिरुद्गमे' ( ३।३।५२ ) आक्रमते भानुः । 'वद व्यक्तायां वाचि' ॥ १४१ ॥**

**'प्रोपा०'** आरम्भ आदिकर्म, अङ्गीकरणं वेत्यन्ये । तस्मिन् वर्त्तमानात् प्रोपाभ्यां परात्क्रमेः कर्त्तर्यात्मनेपदं स्यात् प्रक्रमते उपक्रमते भोक्तुम् । आरभते अङ्गीकरोति वेत्यर्थः । आरम्भ इति किम् ?

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पूर्वेद्युः प्रक्रामति गच्छतीत्यर्थः । अपरेद्युरुपक्रामति समीपमागच्छतीत्यर्थः । 'परोपात्' ( ३।३।४९ ) इत्यनेनापि न भवति । वृत्त्यादेरर्थस्याविवक्षितत्वात् । **अन्ये तु** स्वार्थविषय एवारम्भे मन्यन्ते । तेन प्रक्रमते उपक्रमते पादाभ्यां गन्तुमारभते इत्यर्थः इत्यत्रैव भवति । स्वार्थविषयादन्यत्र तु प्रक्रामति उपक्रामति भोक्तुमित्यत्र न भवति । प्रक्रमते इत्यादि प्रक्रिया स्पष्टा । **'क्रमो०'** ( ३।३।४७ ) अविद्यमानोपसर्गात्क्रमेः कर्त्तर्यात्मनेपदं वा स्यात् । क्रमते क्रामति । अनुपसर्गादिति किम् ? संक्रामति । वृत्त्यादेरन्यत्रायमारम्भ इत्यप्राप्तविभाषा । इत्यादिकरणात् । **'वृत्तिसर्गतायने'** ( ३।३।४८ ) वेति निवृत्तम् । वृत्त्यादिष्वर्थेषु वर्त्तमानात्क्रमेः कर्त्तर्यात्मनेपदं स्यात् । वृत्तिरप्रतिबन्धः आत्मयापनं वा । शास्त्रेऽस्य क्रमते बुद्धिः न तत्र प्रतिहन्यते, आत्मानं यापयति वेत्यर्थः । सर्ग उत्साहः तात्पर्यं वा । सर्गेणातिसर्गशब्दस्य लक्षणादनुज्ञा वा । सूत्राय क्रमते तदर्थमुत्सहते तत्परो वाऽनुज्ञातो वा । तायनं स्फीतता सन्तानपालनं वा । क्रमन्तेऽस्मिन् योगाः स्फीता भवन्ति सन्तन्यन्ते सन्तानेन वर्त्तन्ते इति कर्मकर्त्तरि पालयन्ते वेत्यर्थः । वृत्त्यादिष्विति किम् ? क्रामति । **'परोपात्'** ( ३।३।४९ ) परोपाभ्यामेव परस्मात्क्रमेर्वृत्त्यादिष्वर्थेषु कर्त्तर्यात्मनेपदं स्यात् । पराक्रमते उपक्रमते । परोपादेवेति किम् ? अनुक्रामति । वृत्त्यादिष्वित्येव पराक्रमति । उपक्रामति समीपे गच्छतीत्यर्थः । अन्ये तु परोपाभ्यां पराक्रमतेर्वृत्त्याद्यर्थाभावेऽपीच्छन्ति तेन पराक्रमते उपक्रमते इत्यात्मनेपदमेव । वृत्त्यादिषु त्वन्योपसर्गपूर्वादपि पूर्वेण मन्यन्ते निष्क्रमते प्रतिक्रमते न प्रतिहन्यत इत्यर्थः । **'वेः स्वार्थे'** ( ३।३।५० ) स्वार्थः पादविक्षेपः । तस्मिन् वर्त्तमानाद्वेः परात्क्रमेः कर्त्तर्यात्मनेपदं स्यात् । साधु विक्रमते गजः । स्वार्थ इति किम् ? अश्वेन विक्रामति । नन्वत्रापि पादविक्षेप एव क्रमिर्वर्त्तते स च कर्तृकृतः करणकृतो वा भवतु । **सत्यम्**, गौणमुख्ययोरिति न्यायात्सर्वकारकप्रधानकर्तृगत एव गृह्यते । अत्र तु करणकृतः पादविक्षेप इति न भवति । विक्रामत्यजिनसन्धिः स्फुटतीत्यर्थः । विक्रामति राजा उत्सहते इत्यर्थः । **'आङो०'** ( ३।३।५२ ) आङः परात्क्रमेर्ज्योतिषां चन्द्रादीनामुद्गमे ऊर्द्ध्वगमने प्रधाने उपसर्जने वा वर्त्तमानात् कर्त्तर्यात्मनेपदं स्यात् । आक्रमते भानुरिति उदयते इत्यर्थः । दिवमाक्रममाणेन हेतुना अत्र दिवमिति कर्मणा योगादुद्गमनोपसर्जनव्याप्तिवचनः क्रमिः । ज्योतिरुद्गम इति किम् ? आक्रमति माणवकः कुतुपं अवष्टभ्नाति इत्यर्थः । ज्योतिरिति किम् ? धूम आक्रमति उद्गच्छतीत्यर्थः । आक्रामति धूमो हर्म्यतलं उद्गच्छन् व्याप्नोतीत्यर्थः । उद्गम इति किम् ? 'नभः समाक्रमति नष्टवर्त्मना स्थितैकचक्रेण रथेन भास्करः' । अत्र व्याप्तिमात्रं विवक्षितम् । ननूद्गमोपसर्जना- व्याप्तिः । अन्ये तूद्गमोपसर्जनां व्याप्तिं पश्यन्तोऽसाधुमेनं मन्यन्ते ॥ अस्योपलक्षणत्वात् । **'दागोऽस्वास्यप्रसारविकासे'** ( ३।३।५३ ) आङ्पूर्वाद्ददातेः कर्त्तर्यात्मनेपदं स्यात्, न चेत्स्वास्यप्रसारणं विकासश्चार्थो भवति । प्रसारणं प्रयोजकव्यापारः । विकासश्च कर्तृव्यापार इत्यनयोर्भेदः । विपूर्वात्कस गताविसतो घञि वृद्धौ विकामः । विद्यामादत्ते । अस्वास्यप्रसारविकास इति किम् ? उष्ट्रो मुखं व्याददाति प्रसारयतीत्यर्थः । कूलं व्याददाति विपादिका, व्याददाति विकसयतीत्यर्थः । स्वग्रहणं किम् ? व्याददते पिपीलिकाः पतङ्गस्य मुखम् । आङ् इत्येव ददाति प्रददाति । फलवतोऽन्यत्रायं विधिः ॥ १४१ ॥ वदेति अत्र सूत्रम् ।

## व्यक्तवाचां सहोक्तौ ॥ १४२ ॥ [ सि० ३।३।७९ ]

व्यक्तवाचो नरादयस्तेषां सम्भूयोच्चारणार्थाद्वद आत्मनेपदं स्यात् । सम्प्रवदन्ते ग्राम्याः ।२४

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**विवादे वा ( ३।३।८० ) विवदन्ति विवदन्ते वा गणकाः । 'अनोः कर्मण्यसति' ( ३।३।८१ ) अनुवदते चैत्रो मैत्रस्य । कर्मणि तु उक्तमनुवदति ॥ १४२ ॥**

**'व्यक्त०'** सम्प्रवदन्ते ग्राम्याः सम्भूय भाषन्ते इत्यर्थः । व्यक्तवाचामिति किम् ? सम्प्रवदन्ति कुक्कुटाः । सम्प्रवदन्ति शुकाः सारिकाश्च । शुकसारिकादीनामपि व्यक्तवाक्त्वात्सहोक्ताविच्छन्त्यन्ये सम्प्रवदन्ते शुकाः सारिकाश्च । सहोक्ताविति किम् ? चैत्रेणोक्ते मैत्रो वदति । **'विवा०'** ( ३।३।८० ) विरुद्धार्थो वादो विवादः । व्यक्तवाचां सहोक्तौ विवादरूपायां वर्त्तमानाद्वदेः कर्त्तयात्मनेपदं वा स्यात् । विवदन्ते गणका इति परस्परप्रतिषेधेन युगपद्विरुद्धं वदन्तीत्यर्थः । विवाद इति किम् ? सम्प्रवदन्ते वैयाकरणाः सह वदन्तीत्यर्थः । ( सहशब्देनापि सहोक्तावुक्तायां व्यक्तवाचामित्यनेनापि नात्रात्मनेपदम् ) । व्यक्तवाचामित्येव सम्प्रवदन्ति शकुनयः । नानारुतं कुर्वन्ति जातिशक्तिभेदात् । सहोक्तावित्येव मौहूर्त्तो मौहूर्त्तेन सह क्रमेण विप्रवदति । विरुद्धाभिधानमात्रमिह विवक्षितम् न तु विमतिपूर्वकम् । तेन विमतिलक्षणमप्यात्मनेपदं न भवति । **'अनोः'** ( ३।३।८१ ) व्यक्तवाचामित्येवानुवर्त्तते । व्यक्तवाचां सम्बन्धिन्येवार्थे वर्त्तमानादनुपूर्वाद्वदेः कर्मण्यसति कर्त्तर्यात्मनेपदं स्यात् । अनुः सादृश्ये पश्चादर्थे वा । अनुवदते चैत्रो मैत्रस्येति । यथा मैत्रो वदति तथा चैत्रो वदतीत्यर्थः । अनुवदते आचार्यस्य शिष्यः आचार्येण पूर्वमुक्ते पश्चाद्वदतीत्यर्थः । कथं वाचिकषडिकौ न संवदेते इति । वागाशिस् वागाशीर्दत्त इति वा प्रकृतिः । अनुकम्पितो वागाशीर्वागाशीर्दत्तो वा 'अजातेर्नृनाम्नो बहुस्वरादियेकलं वा' ( ७।३।३५ ) इत्यनेन इकप्रत्यये । 'षड्वर्जैकस्वरपूर्वपदस्य स्वरे' ( ७।३।४० ) षट्शब्दवर्जितमेकस्वरं पूर्वपदं यस्य तत् सम्बन्धिन उत्तरपदस्यानुकम्पायां विहिते स्वरादौ प्रत्यये लुग् भवति । अनुकम्पितो वागाशीः वागदत्तो वागाशीर्दत्तो वा वाचिकः । एवमनुकम्पितः षडङ्गुलिः षडङ्गुलिदत्तो वा 'अजाते'रितीके 'द्वितीयात्स्वरादूर्ध्वम्' ( ७।३।४१ ) अनुकम्पायां विहिते स्वरादौ प्रत्यये परतः प्रकृतेर्द्वितीयात्स्वरादूर्ध्वं शब्दस्वरूपस्य लुग् भवति ततश्च ( ङ्गुलिलोपे ) षडिक इति । एतौ च वाचिकषडिकौ शास्त्रकारविशेषौ न संवदेते मिथो विरुद्ध्येते । कथमत्रात्मनेपदमित्यत्रोच्यते विमतिविवक्षायां भविष्यति । यद्वा वाचिकषडिकौ इति शब्दौ मिथो विरुद्ध्येते यथा वाचिक इति सिद्ध्यति तथा षडिक इति न सिद्ध्यति । तथाहि षड्वर्जैकस्वरपूर्वपदस्य स्वरे इत्युत्तरपदलोपे वाचिक इति सिद्ध्यति । षडिक इत्यत्र तु द्वितीयात्स्वरादूर्ध्वमिति द्वितीयस्वरादूर्ध्वं लोपे । तथा च 'अवर्णेवर्णस्य' ( ७।४।६८ ) इत्यलुचः स्थानिवद्भावात्पदत्वस्यानिवृत्तेस्तृतीयत्वं न निवर्त्यते । षड्वर्जनादेव चापदत्वे सन्धिविधावप्यलुकः स्थानित्वनिषेधो न भवति । 'अनोः कर्मण्यसती'त्यत्र अकर्मकादित्यनुक्त्वा कर्मण्यसतीति निर्देशः 'आङो यमहनः स्वेऽङ्गे च' ( ३।३।८६ ) कर्मणीति लाघवेन प्रतिपत्त्यर्थम् । अस्याप्युपलक्षणत्वात् इत्यादिशब्दानुसन्धानाद्वा । **'वदोऽपात्'** ( ३।३।९७ ) अपपूर्वाद्वदतेः फलवति कर्त्तर्यात्मनेपदं स्यात् । एकान्तमपवदते । अपादिति किम् ? वदति । फलवतीत्येव अपवदति परं स्वभावतः । **'ज्ञः'** ( ३।३।८२ ) जानातेः कर्मण्यसति कर्त्तर्यात्मनेपदं स्यात् । सर्पिषो जानीते । कथमत्र जानातिरकर्मकः । **उच्यते** नात्र सर्पिरादि ज्ञेयत्वेन विवक्षितम्, किं तर्हि ? प्रवृत्तौ करणत्वेन सर्पिषा मधुना करणेन भोक्तुं प्रवर्त्तते इत्यर्थः । अत एव 'अज्ञाने ज्ञः षष्ठी' ( २।२।८० ) इति षष्ठी । मिथ्याज्ञानार्थो वा जानातिः, सर्पिषि रक्तः प्रतिहतो वोदकादि सर्पिष्ट्या ज्ञानवान् भवतीत्यर्थः । मिथ्याज्ञानं चाज्ञानमित्यज्ञानार्थे पूर्ववदेव षष्ठी । अथवा सर्पिसम्बन्धिज्ञानं करोतीति विवक्षायां ज्ञानार्थोऽपि जानातिरकर्मकस्तदा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तु सम्बन्धे षष्ठी । कर्मण्यसतीत्येव तैलं सर्पिषो जानाति, तैलं सर्पिष्ट्या जानातीत्यर्थः । स्वरेण पुत्रं जानाति । केचित्तु ज्ञानोपसर्जनायां प्रवृत्तावेवाकर्मकाज्जानातेरात्मनेपदमाहुः, अत एव ते संभविष्याव एकस्यामभिजानासि मातरि इत्यादौ प्रवृत्त्यर्थाभावादात्मनेपदाभावं मन्यन्ते । सम्भविष्याव इति 'अयदि स्मृत्यर्थे भविष्यन्ती' (५।२।९) इत्यनेन भूते भविष्यन्तीस्यावस् । अभिजानासि मातरीति एकस्यां मातरि आवां सम्भविष्याव इत्युल्लेखेन त्वं स्मरसि इति विवक्षायामकर्मकत्वमन्यथा व्यङ्गविकलता स्यात् । **स्वमते** तु इति त्वं स्मरसि इति वाक्यार्थस्य कर्मत्वविवक्षायां सकर्मकत्वान्नात्मनेपदम् । इति शब्दोऽत्रा(ध्या)हार्यः । तथा ज्ञास्ये रात्राविति प्राज्ञ इत्यत्रापि ज्ञात्वा प्रवर्तिष्ये इति व्याचक्षते । जाने कोपपराङ्मुखीत्यत्र ज्ञोऽनुपसर्गादित्यात्मनेपदमिच्छन्ति । अत्रायमभिप्रायः—कोपपराङ्मुखी दयिता इत्युल्लेखेन जाने इति विवक्षायामकर्मतया 'ज्ञ' इत्यनेनाप्यात्मनेपदम् । अहमिति जाने यद्दयिता कोपपराङ्मुखीति वाक्यार्थस्य कर्मत्वविवक्षायां 'ज्ञोऽनुपसर्गात्' (३।३।९६) इत्यात्मनेपदम् । वक्ष्यति हि तत्र अकर्मकात् 'ज्ञ' इत्यनेन सिद्धे सकर्मकार्थं वचनमिति । **'ज्ञोऽनुपसर्गात्'** (३।३।९६) अविद्यमानोपसर्गाज्जानातेः फलवति कर्त्तर्यात्मनेपदं स्यात् । गां जानीते अश्वं जानीते । अनुपसर्गादिति किम् ? स्वर्गं प्रजानाति । फलवतीत्येव परस्य गां जानाति । अकर्मकात्पूर्वेण सिद्धे सकर्मकार्थं वचनम् ॥ १४२ ॥

## समो गमृच्छिप्रच्छिश्रुवित्स्वरत्यर्तिदृशः ॥ १४३ ॥ [ सि० ३।३।८४ ]

**सम्पूर्वेभ्यः एभ्योऽष्टाभ्यः कर्मण्यसत्यात्मनेपदं स्यात् । सङ्गच्छते । समगच्छत ॥ १४३ ॥**

**'समो०'** एभ्योऽष्टाभ्य इति 'अम द्रम हम्म मिमृ गम्लृं गतौ' सङ्गच्छते । 'ऋछत् इन्द्रियप्रलयमूर्त्तिभावयोः' समृच्छते समृच्छिष्यते । ऋच्छेरर्त्तेश्च रूपसाम्यात् ऋच्छेरभिव्यक्त्यर्थं द्वितीयमुदाहरणम् । 'प्रच्छंत् ज्ञीप्सायाम्' सम्पृच्छते । 'श्रुंगट् श्रवणे' संशृणुते । नित्यपरस्मैपदिभिः साहचर्यात् ज्ञानार्थस्यैव विदेर्ग्रहणम् । संवित्ते । बहुवचने **'वेत्तेर्नवा'** (४।२।११६) वेत्तेः परस्यात्मनेपदसम्बन्धिनोन्तो रत् इत्यादेशो वा स्यात् । संविद्रते संविद्रतां समविद्रत । पक्षे संविदते संविदताम् समविदत । वेत्तेरिति किम् ? रौधादिकस्य मा भूत् संविदन्ते । 'औस्वृ शब्दोपतापयोः' संस्वरते । अर्त्तीति सामान्यनिर्देशात् 'ऋ प्रापणे' चेति भ्वादिः, 'ऋंक् गतौ' इत्यदादिश्च द्वयमपि गृह्यते । तत्राद्यस्य 'श्रौति०' (४।२।१०८) इत्यादिना ऋच्छादेशे समृच्छते द्वितीयस्य 'हवः शिति' (४।१।१२) इति द्वित्वम् 'ऋतोऽत्' (४।१।३८) इति पूर्वस्य अत्वम् । 'पृभृमाहाङामिः' (४।१।५८) पूर्वस्य इत्वम् । 'पूर्वस्यास्वे स्वरे०' (४।१।३७) इति इय् समृयृते । 'दृशृं प्रेक्षणे' सम्पश्यते । स्वरत्यर्त्योस्तिवृनिर्देशो यङ्लुबूनिवृत्त्यर्थस्तेन स्वरतेर्यङ्लुपि संसरिस्वर्त्ति संसरीस्वर्त्ति संसर्स्वर्त्ति । संसरिस्वरीति संसरीस्वरीति संसर्स्वरीति ६ । अर्त्तेश्च 'अस्त्यर्त्ति०' (३।४।१०) इति यङागमे तल्लुकि रिरी आगमे 'पूर्वस्ये'ति इयादेशे समरियर्त्ति समरियरीति आगमे च समरार्त्ति । समरियरीति २ समररीति । अन्येषां तु यङ्लुप्यात्मनेपदम् । सञ्जङ्गते सम्परीपृष्टे ३ संशोश्रुते संवेवित्ते संदरीदृष्टे ३ । ऋच्छेस्तु यङ् एवासम्भवः व्यञ्जनादित्वाभावात् ॥ १४३ ॥ गमेर्विशेषसूत्रम् ।

## गमो वा ॥ १४४ ॥ [ सि० ४।३।३७ ]

**गमेरात्मनेपदविषयौ सिजाशिषौ किद्वद्वा स्याताम् ॥ १४४ ॥**

**'गमो०'** स्पष्टम् । अथात्र किद्वत्तायाः फलमाह ॥ १४४ ॥ सूत्रम्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**यमिरमिनमिगमिहनिमनिवनतितनादेर्धुटि क्ङिति ॥१४५॥ [सि० ४।२।५५]**

एषां तनादीनां च धुडादौ क्ङिति लुक् स्यात् इति मलुकि धुड्ह्रस्वादिति सिज्लुपि समगत । पक्षे समगंस्त समगसाताम्–समगंस्ताम् ५ । संजग्मे संजग्मिषे ६ । संगसीष्ट संगंसीष्ट ७ । संगन्ता ८ । संगंस्यते ९ । समगंस्यत १० । **'ऑस्वृ शब्दोपतापयोः'** । संस्वरते ४ । समस्वरिष्ट ५ । संयोगादृदर्त्तेरिति गुणे संसस्वरे संसस्वरिषे ६ । इत्यादि । सम्पश्यते ४ । सिजाशिषावात्मन इति सिचः कित्त्वम् । समदृष्ट समदृक्षाताम् समदृक्षत ५ । संददृशे संददृशिषे ६ । संदृक्षीष्ट ७ । संद्रष्टा ८ । संद्रक्ष्यते ९ । समद्रक्ष्यत १० । सकर्मकत्वे तु संगच्छति रविं शशीत्यादि । **'नुप्रच्छः'** ( ३।३।५४ ) आनुते शृगालः । आपृच्छते गुरुम् । 'गमेः क्षान्तौ' ( ३।३।५५ ) आत्मनेपदम् । आगमयते गुरुम् । कञ्चित्कालं प्रतीक्षत इत्यर्थः । 'चर गतिभक्षणयोः' ॥ १४५ ॥

**'यमि०'** एषामिति यम्यादीनां सप्तानाम्, तनादीनामिति तनादिगणस्य, मनीति मन्यतेर्ग्रहणम् मनोतेस्तनादित्वेन सिद्धत्वात् । एवं वनतीति 'वन षण संभक्तौ' इत्यस्य ग्रहणम् वनूयीत्यस्य तनादित्वेन सिद्धत्वात् । क्रमेणोदाहरणानि यतः यतवान् यत्वा यतिः । एवं रतः ४ । गतः ४ । हतः हतवान् हत्वा हतिः 'सातिहेति०' ( ५।३।९४ ) इति बाधनार्थं श्वादिभ्यः क्तिः आहत आहथाः । मतः मतवान् मत्वा मतिः । वतिः क्तिः, क्तक्तवतू न दर्शितौ इट्प्राप्तेः । क्तौ तु नियमान्नेट् तथाहि **'तेर्ग्रहादिभ्यः'** (४।४।३३) ग्रहादिभ्य एव स्ताद्यशितस्तेरादिरिट् स्यात् । तेरिति सामान्येन क्तेस्तिको वा ग्रहणम् । निगृहीतिः अपिस्निहितिः निकुचितिः निपठितिः उदितिः भणितिः रणितिः मथितिः लिखितिः रुशितिः कम्पितिः अन्दोलितिः । बहुवचनमाकृतिगणार्थम् । तेर्ग्रहादिभ्य एवेति नियमादन्यत्र न भवति । शान्तिः वान्तिः दान्तिः ( दीप्तिः ) ज्ञप्तिः स्रस्तिः ध्वस्तिः । तिकः खल्वपि तन्तिः सन्तिः कण्डूतिः । णौ पाक्तिः याष्टिः प्रज्ञप्तिः । तेरेव ग्रहादिभ्य इति विपरीतनियमो न भवति । उत्तरत्र ग्रहेः परोक्षायामिटो दीर्घनिषेधात् । तिकि त्वन्तलोपप्रतिषेधस्तद्यथा **'न तिकि दीर्घश्च'** ( ४।२।५९ ) यमि रमि नमि गमि हनि मनि वनति तनादीनां तिकिप्रत्यये लुक् दीर्घश्च न भवतः । यन्तिः रन्तिः नन्तिः गन्तिः हन्तिः मन्तिः वन्तिः तन्तिः । क्षणिति लाक्षणिकोऽयं णकारस्तेन क्षन्तिरिति भवति । नान्तप्रकृतेर्णत्वबाधनाय ञामिति बहुवचनात् प्रथममेव नकारः, ञामिति बहुवचनाण्णत्वं कृतमपि वर्गान्ते कर्त्तव्ये निवर्त्तते वा । **अन्यस्तु** औपदेशिकोऽयं णकार इति मन्यते तन्मते क्षण्टिरिति भवति । अन्तलोपे प्रतिषिद्धे 'अहन्पञ्चमस्य०' ( ४।१।१०७ ) इत्यादिना दीर्घत्वं प्राप्तम्, तदपि प्रतिषिध्यते । एषामिति–शान्तिर्भगवान् । तिकीति किम् ? यतिः रतिः ततिः । **तनादिः** तनूयि ततः ततवान् तत्वा ततिः । सनोतेरात्वं भवति 'आः खनिसनिजन' ( ४।२।६० ) इति सातः सातवान् 'क्षणूग् क्षिणूयी हिंसायाम्' क्षतः क्षतवान् क्षत्वा क्षतिः ( क्षितः क्षितवान् क्षित्वा क्षितिः ) ऋणूयी, ऋतः ऋतवान् । तृणूयी तृतः तृतवान् । घृणूयी घृतः घृतवान् । वनूयि वतः वतवान् । मनूयि मतः मतवान् । एषामिति किम् ? शान्तः दान्तः । तनादीनां गणनिर्देशात् यङ्लुपि अन्तलोपो न भवति । वंवातः तन्तातः । अन्येषां भवति यंयतः रंरतः नंनतः जङ्गतः जङ्घतः । कुटिलं हतः यङ्लुप् द्वित्वम् मुरन्तः 'अङे हिहन०' ( ४।१।३४ ) इति घः गत्यर्थत्वाद् घ्नीर्न भवति । केचित्तु यङ्लुपि घ्नीं नेच्छन्ति तन्मते वधार्थोऽपि । मंमतः । धुटीति किम् ? यम्यते यंयम्यते । क्ङितीति किम् ? यन्ता रन्ता

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यादीति सम्पूर्वादीनां गमादीनां शिद्विभक्तिचतुष्टये सङ्गच्छते समृच्छते इत्यादिना रूपपद्धतिर्दिग्दर्शिता स्पष्टा च, शेषविभक्तिषु गमेः स्वरतेर्दृशश्च मूले एव दर्शिता । शेषाणां तु ऋच्छेरद्यतन्यां सेट्त्वात् समार्च्छिष्ट समार्च्छिषाताम् समार्च्छिषत । समार्च्छिष्ठाः समार्च्छिषाथाम् समार्च्छिध्वम् समार्च्छिढ्वम् । समार्च्छिषि समार्च्छिष्वहि समार्च्छिष्महि । परोक्षायां प्रथमं द्वित्वं ततः 'स्कृच्छृतोऽकि०' (४।३।८) इति गुणे 'ऋतोऽत्' (४।१।३८) इति पूर्वस्य अत्वे 'अनातो नश्चान्त०' (४।१।६९) इति अस्य आत्वे नागमे च समानर्च्छे समानर्च्छाते समानर्च्छिरे । समानर्च्छिषे समानर्च्छाथे समानर्च्छिध्वे । समानर्च्छे समानर्च्छिवहे समानर्च्छिमहे ६ । समृच्छिषीष्ट ७ । समृच्छिता ८ । समृच्छिष्यते ९ । समार्च्छिष्यत १० । **प्रच्छेर**द्यतन्यां सिजागमे अनिट्त्वादिडागमे 'धुड्ह्रस्वाद्०' (४।३।७०) इति सिज्लोपे 'अनुनासिके च च्छ्वः शूट्' (४।१।१०८) इति द्वयोरपि छकारयोः शत्वे तस्य 'यजसृज०' (२।१।८७) इति षत्वे 'तवर्गस्य श्चवर्ग०' (१।३।६०) इति तस्य टत्वे समप्रष्ट समप्रक्षातां समप्रक्षत । समप्रष्ठाः समप्रक्षाथां समप्रड्ढ्वम् २ । समप्रक्षि समप्रक्ष्वहि समप्रक्ष्महि । परोक्षायां सम्पप्रच्छे सम्पप्रच्छाते सम्पप्रच्छिरे । सम्पप्रच्छिषे सम्पप्रच्छाथे सम्पप्रच्छिध्वे । सम्पप्रच्छे सम्पप्रच्छिवहे सम्पप्रच्छिमहे ६ । सम्प्रक्षीष्ट ७ । सम्प्रष्टा ८ । सम्प्रक्ष्यते ९ । समप्रक्ष्यत १० । **संश्रृणोते**रद्यतन्यां समश्रोष्ट समश्रोषाताम् समश्रोषत । समश्रोष्ठाः समश्रोषाथाम् समश्रोढ्वम् समश्रोध्वम् । समश्रोषि समश्रोष्वहि समश्रोष्महि ५ । परोक्षायां 'संयोगात्' (२।१।५२) इत्युवादेशे संशुश्रुवे संशुश्रुवाते संशुश्रुविरे । संशुश्रुविषे ६ । संश्रोषीष्ट ७ । संश्रोता ८ । संश्रोष्यते ९ । समश्रोष्यत १० । **वेत्ते**रद्यतन्यां समवेदिष्ट समवेदिषाताम् समवेदिषत । समवेदिष्ठाः समवेदिषाथाम् समवेदिध्वम् समवेदिढ्वम् । समवेदिषि समवेदिष्वहि समवेदिष्महि । परोक्षायां वेत्तेः किल् इत्यामादेशे संविदाञ्चक्रे पक्षे संविदे० । संवेदिता ८ । संवेदिष्यते ९ । समवेदिष्यत १० । **अर्त्ते**रद्यतन्यां सिजूलोपात्प्रागेव 'स्वरादेस्तासु' (४।४।३१) इति वृद्धौ ततश्च 'धुड्ह्रस्वाद्०' इति सिजूलोपाभावे समार्ष्ट समार्षाताम् समार्षत । समार्ष्ठाः समार्षाथाम् समार्ध्वम् समार्ढ्वम् । समार्षि समार्ष्वहि समार्ष्महि ५ । परोक्षायां ऋ ऋ इति द्वित्वे 'ऋतोऽत्' (४।१।३८) इति पूर्वस्य अत्वे 'संयोगाददर्तेः' (४।३।९) इति द्वितीयस्य गुणे समारे समाराते समारिरे । समारिषे समाराथे समारिध्वे । समारे समारिवहे समारिमहे । **'नुप्र०'** (३।३।५४) आङ इत्यधिकृत्य **आङ्पूर्वात् णुक्** स्तुतौ इत्यस्य धातोः प्रच्छेश्च धातोः कर्त्तर्यात्मनेपदं स्यात् । आनुते शृगालः, उत्कण्ठितः शब्दं करोतीत्यर्थः । उत्कण्ठापूर्वके शब्दने नौतेरयं विधिर्न सर्वत्र । आनुवाते आनुवते ४ । अद्यतन्यां आनविष्ट आनविषाताम् आनविषत ५ । परोक्षायां आनुनुवे ६ । आनविषीष्ट ७ । आनविता ८ । आनविष्यते ९ । आनविष्यत १० । एवं आपृच्छते । रूपरीतिः प्राग्वत् । तथा च प्रयोगो **मेघदूते कालिदासस्य** 'आपृच्छस्व प्रियसखममुं शैलमाश्लिष्टसानुम्' इति वियुज्यमानस्य प्रश्नेऽयं विधिः । आङ इत्येव (नौति) प्रणौति पृच्छति परिपृच्छति । **'गमेः०'** (३।३।५५) क्षान्तिः कालहरणं तत्र वर्त्तमानाद्गमयतेः कर्त्तर्यात्मनेपदं वा स्यात् । क्षान्ताविति किम् ? आगमयति विद्याम्, गृह्णातीत्यर्थः । क्षान्तौ स्वभावाद्गमिर्ण्यन्त एव वर्त्तते । **'यमः स्वीकारे'** (३।३।५९) उपपूर्वाद्यमेः स्वीकार एवार्थे वर्त्तमानात् कर्त्तर्यात्मनेपदं स्यात् । कन्यामुपयच्छते । वेश्यामुपयच्छते । उपायंस्त महास्त्राणि । च्विनिर्देशः किम् ? शाटकानुपयच्छति नात्रास्वं स्वं क्रियते, स्वत्वेन तु निर्ज्ञातस्य ग्रहणमिति न भवति । उद्वाह एवेच्छन्त्येके तन्मते वेश्यामुपयच्छते इत्यादि न स्यात् ॥ १४५ ॥ **'चर** गतिभक्षणयो'रिति अत्र सूत्रम्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## उदश्चरः साप्यात् ॥ १४६ ॥ [ सि० ३।३।३१ ]

**उत्पूर्वाच्चरतेः सकर्मकादात्मनेपदं स्यात् । मार्गमुच्चरते । व्युत्क्रम्य यातीत्यर्थः । अकर्मकत्वे तु धूम उच्चरति । ऊर्ध्वं गच्छतीत्यर्थः ॥ १४६ ॥**

'**उद०**' व्युत्क्रम्येति **ननु** चैवमपि व्युत्क्रमणस्य क्रियान्तरस्य धात्वन्तरार्थत्वान्न तत्कर्मणा चरिः सकर्मक इत्युदाहरणायोगः । **अत्रोच्यते** । चरिरेवात्र व्युत्क्रमणोपसर्जनायां विशिष्टायां गतौ वर्त्तते । यथा '**जीव** प्राणधारणे' इति जीवतिरेव विशिष्टे धारणे इति । ( तद् ) व्युत्क्रमणं चरावन्तर्भूतमिति सकर्मक इत्यदोषः । प्रत्युदाहरणे तु गतिमात्रे वर्त्तते न व्युत्क्रमणाङ्गे । धातूनामनेकार्थत्वादिति भक्षणार्थेऽपि ग्रासमुच्चरते । सक्तूनुच्चरते भक्षयतीत्यर्थः । उद इति किम् ? चारिं(रं) चरति ॥ १४६ ॥

## समस्तृतीयया ॥ १४७ ॥ [ सि० ३।३।३२ ]

**सम्पूर्वाच्चरेस्तृतीयान्तेन योगे आत्मनेपदं स्यात् । अश्वेन सञ्चरते ४ । समचरिष्ट ५ । सञ्चेरे सञ्चेरिषे ६ । इत्यादि । अन्यत्र तु सञ्चरति समचारीत् । सञ्चचारेत्यादि १० । ॥ १४७ ॥ 'क्रीडृ विहारे' ।**

'**सम०**' तृतीययेति किम् ? उभौ लोकौ सञ्चरसि इमं चामुं च । यद्यप्यत्र विद्यया तपसा चेत्यर्थादिह तृतीयान्तं गम्यते । तथापि तृती(य?)येति सहयोगे तृतीया साक्षाद्योगस्य प्रतिपत्त्यर्थं न गम्यमानस्येति । अन्यथा नहि काचित्क्रिया करणं विना सम्भवतीति व्यावृत्तिरेव न घटते । सह धनेन चैत्रः सञ्चरतीत्यत्र तु विद्यमानार्थतायां चरतेस्तृतीयान्तेन योग एव नास्ति । अत्र हि तृतीयान्तं कर्त्रैव संयुज्यते नतु चरतिना, नहि तद्धनं चैत्रेण सह सञ्चरतीति । ( देवल ) किं ( त्वं ) करिष्यसि ? रथ्यया सञ्चरति चैत्रोऽरण्ये इत्यत्र तु धातोस्तृतीयान्तेनायोगान्न भवति ॥ १४७ ॥

## क्रीडोऽकूजने ॥ १४८ ॥ [ सि० ३।३।३३ ]

**कूजनमव्यक्तशब्दस्ततोऽन्यार्थात्संपूर्वात्क्रीडतेरात्मनेपदं स्यात् । संक्रीडते । कूजने तु संक्रीडन्त्यनांसि ॥ १४८ ॥**

'**क्रीडो०**' 'क्रीडृ विहारे' संक्रीडते रमते इत्यर्थः । संक्रीडन्त्यनांसीति अव्यक्तं शब्दं कुर्वन्तीत्यर्थः । सम इत्येव क्रीडति ॥ १४८ ॥

## अन्वाङ्परेः ॥ १४९ ॥ [ सि० ३।३।३४ ]

**एभ्यस्त्रिभ्यः क्रीडतेरात्मनेपदं स्यात् । अनुक्रीडते ४ । अन्वक्रीडिष्ट ५ । अनुचिक्रीडे अनुचिक्रीडिषे ६ । इत्यादि । अन्यत्र तु क्रीडति । अक्रीडीत् । चिक्रीडेत्यादि ॥ १४९ ॥ 'तपं धूप सन्तापे' ।**

'**अन्वा०**' अनुक्रीडते एवं आक्रीडते परिक्रीडते । उपसर्गादित्येव माणवकमनुक्रीडति । माणवकेन सह क्रीडतीत्यर्थः । धातुना अनोरसम्बन्धान्न भवति । एवमर्थवद्ग्रहणे नानर्थकस्येति उपरीत्यादिशब्दा(न)नुवृत्तेः । ( उपरि क्रीडति ) '**भुनजोऽत्राणे**' ( ३।३।३७ ) त्राणात् पालनादन्यत्रार्थे वर्त्तमानाद्भुनक्तेः कर्त्तर्यात्मनेपदं स्यात् । ओदनं भुङ्क्ते । अत्राण इति किम् ? पृथिवीं भुनक्ति पालयतीत्यर्थः । 'भुङ्क्ते भूमिमखिलाम्' इत्यत्र तु भूम्याश्रितं फलोपभोगविवक्षया त्राणार्थत्वम् । 'अम्बरीषश्च नाभागो बुभुजाते चिरं महीम्' इत्यत्र तु न पालनं भुजेरर्थः, किन्तु पालननिमित्तक उपकारः । धातूना-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मनेकार्थत्वात्पालनेन महीमुपकृतवन्तौ मह्याश्रयं फलं स्वीकृतवन्तौ वेत्यर्थः । उभयपदिनमेनमन्ये मन्यन्ते । भुनजिति अनिर्देशो 'भुजोंत् कौटिल्ये' इत्यस्य निवृत्त्यर्थः । ओष्ठौ निर्भुजति । कुटिलयतीत्यर्थः ॥ १४९ ॥ **'तपं धूप सन्तापे'** इति अत्र सूत्रम्

## व्युदस्तपः ॥ १५० ॥ [ सि० ३।३।८७ ]

**आभ्यां परात्तपेः कर्मण्यसति स्वेऽङ्गे वा कर्मणि सत्यात्मनेपदं स्यात् । वितपते उत्तपते रविः । वितपते पाणिम् । व्यतपत ४ । व्यतप्त व्यतप्सताम् व्यतप्सत ५ । वितेपे वितेपिषे ६ । वितप्सीष्ट ७ । वितप्ता ८ । वितप्स्यते ९ । व्यतप्स्यत १० । अन्यत्र तु तपति तपः । अताप्सीत् अताप्ताम् अताप्सुः ५ । तताप तेपिथ ततप्थेत्यादि १० ॥ १५० ॥**

**'व्युद०'** वितपते उत्तपते रविरिति दीप्यते इत्यर्थः । कर्मण्यसतीत्यस्येदमुदाहरणम् । स्वेऽङ्गे कर्मणीति वितपते उत्तपते पाणिम् तापयतीत्यर्थः । व्युद इति किम् ? निष्टपति । स्वेऽङ्गे चेत्येव वितपति पृथ्वीं सविता सन्तापयतीत्यर्थः । उत्तपति सुवर्णं स्वर्णकारः । द्रवीकरोतीत्यर्थः । उत्तपति पृष्ठं चैत्रस्य मैत्रः । अङ्ग इत्येव । स्वं स्वर्णमुत्तपति । इह दीप्यते ज्वलति भासते रोचते तत्र दीप्यते सामान्येन दीप्तौ भवति । ज्वलति ज्वालावान् भवति । भासते उद्भूतरूपो भवति । रोचते किरणवान् भवति । इत्येष्वर्थेषु तपिमकर्मकं स्मरन्ति । यथा वहति भारमिति प्रापणे वहिं सकर्मकम्, स्यन्दने त्वकर्मकं वहति नदी स्यन्दत इत्यर्थः ॥ १५० ॥ **'यमूं उपरमे'** इति । अत्र सूत्रम् ।

## आङो यमहनः स्वेऽङ्गे च ॥ १५१ ॥ [ सि० ३।३।८६ ]

**आङ्पराभ्यां यमहन्भ्यां कर्माभावे स्वेऽङ्गे वा कर्मण्यात्मनेपदं स्यात् । आयच्छते ४ ॥ १५१ ॥**

**'आङो०'** आयच्छते इति । एवम् आहते । कर्माविवक्षयात्राकर्मकत्वम् । स्वेऽङ्गे कर्मणीति आयच्छते पादं आहते शिरः । स्वेऽङ्गे चेति किम् ? आयच्छति रज्जुम् । आहन्ति वृषलम् । स्व इति किम् ? आयच्छति पादौ चैत्रस्य । आहन्ति शिरो मैत्रस्य । अङ्ग इति किम् ? स्वामायच्छति रज्जुम् । स्वं पुत्रमाहन्ति । स्वाङ्ग इति समस्तनिर्देशे पारिभाषिकस्वाङ्गप्रतिपत्तिः स्यादित्यस्यासमस्ताभिधानम् [ तेनायच्छति पादौ चैत्रस्येति नात्मनेपदम् ] ॥ १५१ ॥ अद्यतन्यां सिजागमे सूत्रम्

## यमः सूचने ॥ १५२ ॥ [ सि० ४।३।३९ ]

**सूचनार्थाद्यमेरात्मनेपदविषयः सिच् किद्वत्स्यात् । कित्त्वात् 'यमिरमि०' ( ४।२।५५ ) इत्यादिना मलुकि उदायत । 'वा स्वीकृतौ' ( ४।३।४० ) सिचः कित्त्वम्–उपायत–उपायंस्त शस्त्रम् । उपायसाताम् इत्यादि ५ । उपायेमे ६ । उपायंसीष्ट ७ । उपायन्ता ८ । उपायंस्यते ९ । उपायंस्यत १० । आहते इत्यादिवत् ॥ १५२ ॥**

**'यम०'** सूचनार्थादिति । सूचनं परदोषाविष्करणम्, तस्मिन् वर्त्तमानाद्यमेः पर आत्मनेपदविषयः सिच् किद्वत्स्यादिति । उदायतेति उदायसातां उदायसत । सूचन इति किम् ? आयंस्त कूपाद्रज्जुम् उद्धृतवानित्यर्थः । सकर्मकात् 'समुदाङो यमेरग्रन्थे' ( ३।३।९८ ) इत्यात्मनेपदम् । अत्र विशेषे सूत्रम् **'वा स्वी०'** ( ४।३।४० ) स्वीकृतौ वर्त्तमानाद्यमः पर आत्मनेपदविषयः सिच् किद्वा भवतीत्यर्थः । 'यमः स्वीकारे' ( ३।३।५९ ) इति सूत्रेण उपपूर्वाद्यमेरात्मनेपदम् । यथा 'मोपयध्वं भयं सीतां नोपायंस्त दशाननः' इति । स्वीकृताविति किम् ? आयंस्त पाणिम् । सिजित्येव उपयंसीष्ट कन्याम् । ३३

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उद्वाह एवेच्छन्त्यन्ये । ['आहते इत्यादीति अत्र 'शिदवित्' ( ४।३।२० ) इति अविच्छितः क्त्त्वम् । ततश्च धुडादौ क्ङिति 'यमिरमिनमि०' ( ४।२।५५ ) इत्यादिना नलुक्, स्वरादौ क्ङिति च 'गमहन०' ( ४।२।४४ ) इत्यादिनोपान्त्यलुक्, आहते आघ्नाते आघ्नते । आहसे आघ्नाथे आहध्वे । आघ्ने वकारस्याधुट्त्वान्नलोपाभावे आहन्वहे आहन्महे ? आघ्नीत आघ्नीयातां २ । आहतां आघ्नातां आघ्नताम् । आहस्व आघ्नाथां आहध्वम् । विक्त्त्वेनाक्त्त्वादुपान्त्यलोपाभावे आहनै आहनावहै आहनामहै ३ । आहत आघ्नातां आघ्नत । आहथाः आघ्नाथां आहध्वम् । आघ्नि आहन्वहि आहन्महि ४ । **'हनः सिच्'** ( ४।३।३८ ) हनेः पर आत्मनेपदविषयः सिच् किद्वत्स्यादिति सिचः क्त्त्वे नलोपे 'धुड्ह्रस्वाद्०' ( ४।३।७० ) इति सिच्लोपे आहत आहसातां आहसत । आहथाः आहसाथाम् नलोपे 'सो धि वा' ( ४।३।७२ ) इति सलोपे आहध्वम् । पक्षे 'तृतीयस्तृतीय०' ( १।३।४९ ) इति सस्य दत्वे आहद्ध्वम् । आहसि आहस्वहि आहस्महि । अद्यतन्यां विषये हनो वध इत्ययमादेशो भवति । आत्मनेपदे त्वस्यां वा भवति । स्थानिवद्भावेनानुस्वारेत्त्वेऽपि अनेकस्वरत्वादिट्प्रतिषेधो न भवति नैकस्वरादनुस्वारेत इति वचनात् । तत इडागमे अत इत्यलोपे आवधिष्ट आवधिषातां आवधिषत । आवधिष्ठाः आवधिषाथां आवधिध्वम् आवधिड्ढ्वम् । आवधिषि आवधिष्वहि आवधिष्महि ५ । आजघ्ने ६ । आशिषि 'हनो वध आशिष्यञौ' ( ४।४।२१ ) इति वधादेशे आवधिषीष्ट आवधिषीयास्तां आवधिषीरन् ७ । आहन्ता ८ । 'हनृतः स्यस्य' ( ४।४।४९ ) इतीडागमे आहनिष्यते ९ । आहनिष्यत १० । अस्योपलक्षणत्वात् **'समुदाङो यमेरग्रन्थे'** ( ३।३।९८ ) समुदाङ्भ्यः पराद्यमेरग्रन्थविषये प्रयोगे फलवति कर्त्तर्यात्मनेपदं स्यात् । संयच्छते व्रीहीन् । उद्यच्छते भारम् । आयच्छते वस्त्रम् । समुदाङ इति किम् ? नियच्छति वाचम् । अग्रन्थ इति किम् ? वैद्यश्चिकित्सामुद्यच्छति–चिकित्साग्रन्थे उद्यमं करोतीत्यर्थः । [ हेतुत्वाद्ग्रन्थोऽपि चिकित्सा चिकित्स्यतेऽनयेति चिकित्सा सा चासौ ग्रन्थश्च ] फलवतीत्येव संयच्छति उद्यच्छति आयच्छति परस्य वस्त्रम् । आङ्पूर्वादकर्मकात्स्वाङ्गकर्मकाच्चाङो यमहन इति सिद्धे अन्यकर्मकार्थं वचनम् ॥ १५२ ॥

अथार्थविशेषणसामान्यतः सर्वधातूनामात्मनेपदं निर्दिशति । सूत्रम्

## क्रियाव्यतिहारेऽगतिहिंसाशब्दार्थहसो ह्ववहश्चानन्योऽन्यार्थे ॥ १५३ ॥
## [ सि० ३।३।२३ ]

**अन्यचिकीर्षितायाः क्रियाया अन्येन हरणं करणं क्रियाव्यतिहारः । तदर्थाद्गतिहिंसाशब्दार्थहसवर्जाद्धातोर्हृवहिभ्यां चात्मनेपदं स्यात् । व्यतिहरन्ते व्यतिवहन्ते भारम् । गत्यादिवर्जनं किम् । व्यतिसर्पन्ति व्यतिहिंसन्ति व्यतिजल्पन्ति व्यतिहसन्ति । परस्परान्योन्येतरेतरयोगे च न । परस्परस्य व्यतिलुनन्ति ॥ १५३ ॥ 'नाथृङ् उपतापैश्वर्याशीष्षु च' ॥**

**'क्रिया०'** करणं हरणं च एकार्थमेव धातूनामनेकार्थत्वात् । ततोऽन्यचिकीर्षितायाः क्रियायाः अन्येन हरणं करणं क्रियाव्यतिहार इति । अनन्योन्यार्थे इति न चेदन्योन्यार्था अन्योन्येतरेतरपरस्परशब्दाः प्रयुज्यन्ते । यथा व्यतिलुनते व्यतिपुनते व्यतिहरन्ते भारम् । सम्प्रहरन्ते राजानः । संविवहन्ते वर्गाः [ अनेकार्थत्वाद्गत्यर्थोऽत्र वहिः ] इति । ह्ववहोर्गतिहिंसार्थत्वात् प्रतिषेधे प्राप्ते प्रतिप्रसवार्थमुपादानम् । व्यतिहार इति किम् ? लुनन्ति पुनन्ति । क्रियेति किम् ? द्रव्यव्यतिहारे मा भूत् चैत्रस्य धान्यं व्यतिलुनन्ति । अत्र लुनातिरुपसङ्ग्रहात्मके लवने वर्त्तते । चैत्रेण यद्गृहीतं धान्यं पुरस्ता-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्तल्लवनेनोपसंगृह्णन्तीत्यर्थः । अयमर्थः । व्यतिहृतं धान्यं लुनन्तीति लवनेनोपसङ्गृह्णन्तीति द्रव्यमत्र व्यतिह्रियते न लवनक्रिया । नह्यत्र व्यतिना लुनातिर्युक्तोऽपि स्वप्रयुक्तोऽपि गृह्णातिः, तस्य धान्यं कर्म न क्रियेति । परस्परस्य व्यतिलुनन्तीति क्रियाव्यतिहारो व्यतिनैव द्योतित इत्यन्योन्यादिभिस्तत्कर्माभिसम्बध्यते । अन्योन्यस्य केदारमिति लौकिके शब्दव्यवहारे लाघवानादरादन्योन्यादिशब्दा उपसर्गाश्च क्रियाव्यतिहारद्योतनाय प्रयुज्यन्ते इत्यन्योन्यार्थवर्जनं सार्थकमन्यथा पौनरुक्त्येनैव परास्तत्वात्तद्वर्जनमनर्थकं स्यादिति । कर्त्तरीत्येव-तेन भावकर्मणोः 'तत्साप्यानाप्यात्०' ( ३।३।२१ ) इत्यनेनैव स्यादनेन मा भूत् । यदि ह्यनेन स्यात्तदा व्यतिगम्यन्ते ग्रामा व्यतिहन्यन्ते दस्यव इत्यत्रागतिहिंसाशब्दार्थहस इति प्रतिषेधः स्यादिति'॥ १५३ ॥

पुनरप्युपसर्गार्थविशेषाद्धातुविशेषाणामात्मनेपदमाह 'नाथृङ्' इत्यादि अयं धातुः उपतापे ऐश्वर्ये आशिषि, चकारात् याचने वर्त्तते । तत्र उपताप उपघातः । अत्र याच्ञोपतापौ क्रियात्वादर्थौ, ऐश्वर्याशिषौ तु धर्ममात्रत्वात् द्योत्ये । यद्वा गण्डति श्वेतते प्रासादः । घण्टा ध्वनति संयुज्यते अस्ति समवैतीति द्रव्यगुणसंयोगसत्तासमवायानामिव सिद्धानामपि आख्यातावाच्यत्वेन साध्यतया प्रतीतेरनयोरर्थत्वमस्तु । यदाह पूर्वापरीभूतं भावमाख्यातेनाचष्टे इति । अथास्यात्मनेपदार्थे सूत्रम्—

## आशिषि नाथः ॥ १५४ ॥ [ सि० ३।३।३६ ]

**आशीरर्थादेव नाथ आत्मनेपदं स्यात् ॥ १५४ ॥**

**'आशि०'** स्पष्टम् ॥ १५४ ॥ आत्मनेपदे सति सूत्रम्

## नाथः ॥ १५५ ॥ [ सि० २।२।१० ]

**आत्मनेपदविषयस्य नाथो व्याप्यं कर्म वा स्यात् । सर्पिषो नाथते ४ । अनाथिष्टेत्यादि । अनाशिषि तु 'नाथन्ति के नाम न लोकनाथम्' ॥ १५५ ॥**

**'नाथः'** सर्पिषो नाथते इति सर्पिर्मे भूयादित्याशास्ते अनेन कर्मणो वाऽकर्मकत्वे 'शेषे' ( २।२।८१ ) इति षष्ठी । अनाशिषि त्विति 'आशिषि नाथः' इत्याशिष्येव चात्मनेपदनियमादर्थान्तरे परस्मैपदमेव । रिपुं नाथति, उपतपति । स्वामी नाथति, ईष्टे । नृपं नाथति, याचते । 'नाथन्ति के नाम न लोकनाथम् । एष्वात्मनेपदाभावान्नाथ इति कर्मणो वा कर्मत्वाभावे 'कर्मणि' (२।२।४०) इति द्वितीयैव । 'एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डुरप्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते । तत्पल्लीपतिपुत्रि कुञ्जरकुलं[1] जीवाभयाभ्यर्थनादीनं त्वामनुनाथते कुचयुगं पत्रांशुकैर्मा पिधाः' ॥ १ ॥ अपपाठः । अनुनाथति स्तनयुगं पत्रांशुकैर्मापिधा इति **त्वभियुक्ताः** । येषां चानुपसर्गस्य नियमः तन्मते सोपसर्गस्यार्थान्तरेप्यात्मनेपदं विरुद्ध्यते । अणोपदेशश्चायम् । **यदाह** सर्वे नादयो णोपदेशाः नृति नर्दि नन्दि नक्षि नाटि नाधृ नाथृवर्जमिति । तेन 'अदुरुपसर्गे'ति णत्वाभावे प्रनाथते । अचि नाथः । 'इङ्गित०' ( ५।२।४४ ) इत्यने नाथनः ॥ १५५ ॥

## परावेर्जेः ॥ १५६ ॥ [ सि० ३।३।२८ ]

**आभ्यां पराज्जयतेरात्मनेपदं स्यात् । पराजयते विजयते ४ । व्यजेष्ट ५ । विजिग्ये ६ । विजेषीष्ट ७ । विजेता ८ । विजेष्यते ९ । व्यजेष्यत १० ॥ १५६ ॥**

इति भ्वादयः आत्मनेपदिनः ।



[1] 'कुम्भाभयाभ्यर्थनादीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः' इति पाठान्तरम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'परा०' जेरित्यस्य धात्वनुकरणस्य प्रकृतिवदनुकरणमिति न्यायाद्धातुकार्यमियादेशः 'परिव्यवात्क्रियः' (३।३।२७) इत्यादिवत्प्राप्तोऽपि बाहुलकान्न भवति । आभ्यामिति उपसर्गाभ्यामित्यर्थः । उपसर्गाभ्यामित्येव सेना पराजयति । बहु विजयति वनम् । अद्यतन्यां व्यजैष्टेति सिचो लुकः परत्वेऽपि नित्यत्वात्प्रागेव गुणः ।

अस्योपलक्षणत्वात् **'निविशः'** (३।३।२४) निपूर्वाद्विशः कर्त्तर्यात्मनेपदं स्यात् । निविशते न्यविशतेत्यटो धात्ववयवत्वान्न व्यवधायकत्वम् । मधुनि विशंति भ्रमरा इत्यादौ तु निविशोरसम्बन्धादनर्थकत्वान्न भवति । **'उपसर्गादस्योहो वा'** (३।३।२५) उपसर्गात्पराभ्यामस्यत्यूहिभ्यां कर्त्तर्यात्मनेपदं वा स्यात् । विपर्यस्यति विपर्यस्यते समूहति समूहते । अस्येति श्यनिर्देशोऽस्यसति निवृत्त्यर्थः । उपसर्गादिति किम् ? अस्यति । ऊहते अस्यतेरप्राप्ते ऊहतेश्च नित्यं प्राप्ते उभयत्र विभाषेयम् । अन्ये त्वकर्मकाभ्यामेवेच्छन्ति प्रत्युदाहरन्ति च । निरस्यति शत्रून्, समूहति पदार्थान्, नात्र विकल्पः । **'उत्स्वराद्युजेरयज्ञतत्पात्रे'** (३।३।२६) उदः स्वरान्ताच्चोपसर्गात्पराद्युनक्तेः कर्त्तर्यात्मनेपदं स्यात् । न चेद्यज्ञे यत्तत्पात्रं तद्विषयो युज्यर्थो भवति । उद्युङ्क्ते उपयुङ्क्ते नियुङ्क्ते । उत्स्वरादिति किम् ? संयुनक्ति । अयज्ञतत्पात्र इति किम् ? द्वन्द्वं यज्ञे तत्पात्राणि प्रयुनक्ति । यत्र तु यज्ञ एव न तत्पात्रम्, तत्पात्रमेव वा न यज्ञस्तत्र भवत्येव । यज्ञे मन्त्रं रन्धनपात्राणि वा प्रयुङ्क्ते । यज्ञपात्राणि रन्धने प्राप्ते प्रयुङ्क्ते । इदित्त्वात्फलवति सिद्धेऽफलवदर्थमिदम् । 'युजिंच् समाधावि'त्यस्येदित्त्वादात्मनेपदविधानमनर्थकम् । **'परिव्यवात्क्रियः'** (३।३।२७) एभ्यः परात्क्रीणातेः कर्त्तर्यात्मनेपदं स्यात् । परिक्रीणीते विक्रीणीते अवक्रीणीते । सर्वत्रेगितः फलवतोऽन्यत्र विधिः, फलवति कर्त्तरि तु सिद्धमेव । उपसर्गादित्येव उपरिक्रीणाति, गवि क्रीणाति, वनं बहुविक्रीणाति, अपचाव क्रीणीवः । क्री इत्यनुकरणमनुकार्येणार्थेनार्थवदिति नामत्वे सति ततः स्यादयः । प्रकृतिवदनुकरणमिति न्यायाच्च धातुकार्यमियादेशः वत्करणाच्च सर्वथा धातुत्वाभावान्न त्यादयः । **'समः क्ष्णोः'** (३।३।२९) समः परात् क्ष्णोतेः कर्त्तर्यात्मनेपदं स्यात् । 'क्ष्णुक् तेजने' संक्ष्णुते शस्त्रम् । सम इति किम् ? विक्ष्णौति । उपसर्गादित्येव आयसं क्ष्णौति । सकर्मकत्वात् 'समो गमृच्छि०' (३।३।८४) इत्यत्र क्ष्णोरग्रहणं तत्र कर्मण्यसतीत्यनुवृत्तेः । **'अपस्किरः'** (३।३।३०) अपपूर्वात्किरतेः सस्सट्कात् कर्त्तर्यात्मनेपदं स्यात् । अपस्किरते वृषभो हृष्टः । अपस्किरते कुक्कुटो भक्ष्यार्थी । अपस्किरते श्वा आश्रयार्थी । सस्सट्कनिर्देशादिह न भवति अपकिरति वृषभः । अपेति किम् ? उपस्किरति । स्सट्सूत्रं त्वेवम् । **'अपाच्चतुष्पात्पक्षिशुनि हृष्टान्नाश्रयार्थे'** (४।४।९५) अपात्परस्य किरतेश्चतुष्पदे पक्षिणि शुनि च कर्त्तरि यथासङ्ख्यं हृष्टेऽन्नार्थिनि आश्रयार्थिनि सति स्सडादिर्भवति । अपस्किरते वृषभो हृष्टः हर्षाद्विलिख्य तटं विक्षिपतीत्यर्थः । हृष्ट इति **'हृषेः केशलोमविस्मयप्रतीघाते'** (४।४।७६) केशलोमकर्त्तृका क्रिया केशलोमशब्देनोच्यते । हृषेः (केशादिष्वर्थेषु वर्तमानात्परयोः क्तयोरिड्वा भवति । हृष्टा हृषिताः केशाः, हृष्टं हृषितं केशैः) हृष्टानि हृषितानि लोमानि । हृष्टं हृषितं लोमभिः । हृष्टः हृषितश्चैत्रः विस्मित इत्यर्थः । हृष्टाः हृषिता दन्ताः प्रतिहता इत्यर्थः । केशादिष्विति किम् ? हृष्टो मैत्र इत्यलीकार्थस्य, हृषितश्च चैत्र इति तुष्ट्यर्थस्य ।। एवं च वृषभो हृष्ट इति विस्मयविवक्षायां 'तुषं हृषंच् तुष्टौ' इत्यस्य रूपम् । अथवा धातूनामनेकार्थत्वात् 'हृषू अलीके' इत्येषोऽपि हर्षे अथवा तुषं हृषच् तुष्टौ इत्येनमूदितं मन्यते **विश्वनन्दी** तत 'ऊदितो वा' (४।४।४२) इति क्त्वायां वेट्त्वात् 'वेटोऽपतः' (४।४।६२) इति क्तयोरिट्–निषेधे रूपम् । अथवा हृष्टिरस्यास्तीत्य-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रादित्वादप्रत्यये हृष्ट इति, अन्यथा इट् स्यादेवेति । अथ प्रकृतं अपस्किरते कुक्कुटो भक्ष्यार्थी विलिख्यावस्करं विक्षिपतीत्यर्थः । अपस्किरते श्वा आश्रयार्थी विलिख्य भस्म विक्षिपतीत्यर्थः । अपादिति किम् ? विकिरति वृषभो हृष्टः । एष्विति किम् ? अपस्किरति धूलिं बालो हृष्टः । हृष्टादिष्विति किम् ? अपकिरति हस्ती रजश्चापलेन । प्रसङ्गतोऽस्य धातोरर्थान्तरोपसर्गान्तरोपयोगे स्सडागमो दृश्यते । स्सडिति उपादिति चानुवर्त्त्य **'किरो लवने'** (४।४।९३) उपात्परस्य किरतेः स्सडादिर्भवति लवने लवनविषयश्चेत्तदर्थो भवति । उपस्कीर्य मद्रका लुनन्ति, उपस्कारं मद्रका लुनन्ति 'उपात् किरो लवने' (५।४।७२) इति णम्, लवन इति किम् ? उपकिरति पुष्पम् । **'प्रतेश्च वधे'** (४।४।९४) प्रतेरुपाच्च परस्य किरतेर्वधे हिंसायां विषयेऽभिधेये वा स्सडादिर्भवति । प्रतिस्कीर्ण्णं ह ते वृषल भूयात्, उपस्कीर्ण्णं ह ते वृषल भूयात् । हिंसानुबन्धी विक्षेपस्ते भूयादित्यर्थः । ह इति खेदे खल्वर्थे च अभिधेये । 'उरोविदारं प्रतिचस्किरे नखैः' हत इत्यर्थः । वध इति किम् ? प्रतिकीर्ण्णं उपकीर्ण्णं बीजम्, विक्षिप्तमित्यर्थः ।

आत्मनेपद एव विशेषमाह । **'अणिक्कर्म णिक्कर्तृकाण्णिगोऽस्मृतौ'** (३।३।८८) प्रयोक्तृव्यापारे णिगिति वक्ष्यते । अणिगवस्थायां यत्कर्म्म तदेव णिगवस्थायां कर्त्ता यस्य सोऽणिक्कर्मणि कर्तृकस्तस्माण्णिगन्ताद्धातोरस्मृतौ वर्त्तमानात्कर्त्तर्यात्मनेपदं स्यात् । आरोहन्ति हस्तिनं हस्तिपकास्तानानुकूलाचरणेन पादार्प्पणशिरोऽधूननादिना हस्ती प्रयुङ्क्ते इति 'आरोहयते हस्ती हस्तिपकान् आस्कन्दयते इत्यर्थः । हस्तिन उपयोगच्छन्ति तानुपयोगमयतीत्यर्थः अत्राप्येतेनात्मनेपदम् । पश्यन्ति राजानं भृत्याः दर्शयते राजा भृत्यान् भृत्यैरिति वा । 'दृश्यभिवदोरात्मने' (२।२।९) इति अणिकर्त्तुर्णौ वा कर्मत्वम् । पिबन्ति मधु पायकाः पाययते मधु पायकान् । 'चल्याहारार्थे०' (३।३।१०८) इति परस्मैपदे प्राप्ते 'परिमुह०' (३।३।९४) इत्यनेन फलवत्यात्मनेपदम् । अनेनाफलवत्यपि । अणिगिति किम् ? आरोहन्ति हस्तिनं हस्तिपकाः आरोहयति हस्तिपकान् महामात्रः आरोहयन्ति महामात्रेण हस्तिपकाः । प्रथमणिगन्तकर्मणि द्वितीयणिगन्तकर्त्तर्यपि माभूत् । णित्करणं किम् ? गणयति गणं गोपालकः गणयते गणो गोपालकमिति णिजन्तकर्मणि कर्तृकादपि णिगन्तात्प्रतिषेधो माभूत् । णिज्कर्माप्यणिक्कर्मैव णिग्णिजोर्भेदात् । कर्मेति किम् ? करणादिकर्तृत्वे माभूत् । पश्यन्ति भृत्याः प्रदीपेन दर्शयति प्रदीपो भृत्यान् । णिगिति किम् ? यस्याणिगन्तस्यैव कर्म कर्त्ता भवति ततो ण्यन्तान्माभूत् । लुनाति केदारं चैत्रः लूयते केदारः स्वयमेव तं प्रयुङ्क्ते लावयति केदारं चैत्रः । कर्तृग्रहणं किम् ? आरोहन्ति हस्तिनं हस्तिपकास्तानेनमारोहयति महामात्रः । णिग इति किम् ? आरोहन्ति हस्तिनं हस्तिपकास्तानारोहयते हस्तीत्यणिगवस्थायां माभूत्, अत्रारोहयते हस्तीत्यर्थे विवक्षिते आरोहन्तीत्यत्राणिगवस्थायामात्मनेपदं प्राप्तं णिग इति व्यावृत्त्या निषिध्यते । प्रत्यासत्तेश्च यस्यैव धातोरणिगवस्था तस्यैव धातोर्णिगवस्था गृह्यते न धात्वन्तरस्य तेनेह न भवति आरुह्यमाणो हस्ती सेचयति पृष्ठं मूत्रेण; सिञ्चति मूत्रं कर्तृ पृष्ठं कर्मतापन्नं तत् सिञ्चत् हस्ती प्रयुङ्क्ते इति । हस्तिपकैरारुह्यमाणो हस्ती स्थलमारोहयति मनुष्यानित्यत्र तु सदृशधातुप्रयोगेऽपि पूर्वो हस्तिपककर्तृको रुहिः परश्च मनुष्यकर्तृक इति भेदान्न भवति । **ननु** यथा ग्लानाय मुद्गाः प्रत्यहं दीयमानाः सादृश्यात्त एव मुद्गा दीयन्ते इति व्यवह्रियते, तथात्रापि कर्तृभेदभिन्नोऽपि रुहिः सादृश्यादेक एवेति, रुहेरणिक्कर्मणि कर्तृकत्वाद्भवत्वात्मनेपदमित्यत्रोच्यते साधनभेदात्क्रियाभेदे धातुभेद इति न भवति, उपचारस्य च वस्तुनिरूपणेऽकिञ्चित्करत्वात् । अस्मृताविति किम् ? स्मरति वनगुल्मं कोकिलः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्मारयत्येनं **वनगुल्मः** । **ननु** लूयते केदार इत्यादाविव आरोह्यते हस्ती हस्तिपकानित्यादावपि यदेव पूर्वं कर्म तदेव कर्त्तेति एकधातावित्यनेन कर्मकर्त्तर्येवात्मनेपदं भविष्यति किमनेन । **सत्यम्** । अकर्मकक्रियत्वाभावान्न । अत्र कर्मणः प्रयोजकव्यापारात्कर्तृत्वम् । एकधातावित्यत्र तु सौकर्यादित्यनयोर्भेदः । **ननु** यदि अणिकर्मणो णिकर्तृकतायां णिगन्तादात्मनेपदमिष्यते तर्हि शुष्यन्त्यातपे व्रीहयः शोषयते व्रीहीनातप इत्यादावधिकरणादेः कर्तृतायामात्मनेपदं न प्राप्नोति । **न** फलवत्कर्त्तरि भविष्यति; कृषीवलादिकृतप्रशंसादिना चातपस्य फलवत्कर्तृत्वम् । **यद्येवमारोह्यते** हस्ती हस्तिपकानित्यादावपि तथास्तु । **सत्यं** किन्तु फलवतः कर्मस्थक्रियाद्यान्यत्रायं विधिः । तथाहि लावयते केदारः भूषयते कन्या कारयते कटः गणयते गणः आरोह्यते हस्ती स्वयमेवेत्यादौ कर्मस्थक्रियत्वात् 'एकधातौ कर्मक्रियैकाकर्मक्रिये' (३।४।८६) इत्यनेनैवात्मनेपदम् । नत्वनेनाप्राप्तेस्तथाहि लुनाति केदारं चैत्रः स एवं विवक्षति नाहं केदारं लुनामि केदारः स्वयमेव लूयते । तं स्वयमेव लूयमानं चैत्रः प्रयुङ्क्ते लावयति केदारं चैत्रः । स एवं विवक्षति नाहं लावयामि अपि तु लावयते केदारः स्वयमेवेत्यनया प्रक्रिययाऽनेन न प्राप्नोति, अणिकर्मणोऽणिग्येव कर्तृतायाः सद्भावात् । एवं भूषयते इत्यादिष्वपि एतद्वृत्त्यभिप्रायेणोक्तम् । यदा तु लुनाति केदारं चैत्रस्तं लुनन्तं मैत्रः प्रयुङ्क्ते लावयति केदारं चैत्रेण मैत्रः । स एवं विवक्षति नाहं लावयामि चैत्रेण, लावयते केदारः स्वयमेवेति प्रक्रिया क्रियते तदानेनापि प्राप्नोति, अणिकर्मणो णिकर्तृतायाः सद्भावात् परं तदापि परत्वादेकधातावित्यनेनैव भवति । कारयते कट इति करोति कटं चैत्रः निष्पद्यमानं निष्पादयति इत्याद्यावस्था । स एवं विवक्षति नाहं कटं करोमि कटः स्वयमेव क्रियते निष्पद्यते इत्यर्थः । अत्र निष्पदनं मुख्यं निष्पादनं गौणमिति द्वितीया ततः स्वयं क्रियमाणं कटं चैत्रः प्रयुङ्क्ते कारयति कटं चैत्रः । अत्र निष्पदनं गौणं निष्पादनं मुख्यमिति तृतीया चतुर्थी चावस्था, ततः पुनरस्य कर्तृत्वे निष्पदनं मुख्यं निष्पादनं गौणमिति पञ्चमी, कारयते कटः स्वयमेवेति । **नन्वारोह्यते** हस्ती स्वयमेवेत्यास्यास्कन्दयते किलार्थस्तत्कथं कर्मस्थक्रियता रुहेर्यदेकधातावित्यात्मनेपदं स्यात् । अयं भावः 'गत्यर्थानां कर्तृनिष्ठव्यापारत्वेन कर्मस्थक्रियत्वासम्भव इति **पारायणम्** यतो गम्यते ग्रामः स्वयमेवेति न भवति । कर्तृसमवेतत्वाद्गमनक्रिया( याः, आस्कन्दनक्रिया ) हि हस्तिपककर्तृसमवेता न हस्तिपककर्मयुक्तेति । कथं कर्मस्थक्रियता रुहेरिति पूर्वपक्षाभिप्रायः । **अत्रोच्यते** यदा न्यग्भवनार्थोऽयं तदा कर्मस्थक्रियत्वम् । तथाहि आरोहन्ति हस्तिनं हस्तिपका इति न्यग्भवनोपसर्जने न्यग्भावने रुहिर्वर्त्तते । स द्वितीयस्यामवस्थायामारुह्यते हस्ती स्वयमेवेत्यस्यां कर्मकर्तृविषयो न्यग्भवनमात्रवृत्तिर्भवति । अथ चतुर्थ्यामन्तर्भूतन्यग्भवनरूपतृतीयायामारुह्यमाणं प्रयुञ्जत इति हस्तिपकव्यापारप्रधानायां णिगन्तः सन्नारोहयति हस्तिनं हस्तिपका इत्यस्यां शुद्धारोहतिवन्न्यग्भवनोपसर्जने न्यग्भावने वर्त्तते । पुनर्यदा अस्यैव प्रयोजकव्यापाराविवक्षा तदा आरोह्यते हस्ती स्वयमेवेत्यस्यां पञ्चम्यामवस्थायामारुह्यते हस्ती स्वयमेवेति वन्न्यग्भवनलक्षणस्य विशेषस्य हस्तिसमवेतत्वेनोपलम्भाल्लावयते केदार इत्यादाविव कर्मस्थक्रियत्वमस्त्येवेति न किञ्चिदनुपपन्नम् । **तदुक्तम्**

'न्यग्भावना न्यग्भवनं रुहौ शुद्धे प्रतीयते । न्यग्भावना न्यग्भवनं ण्यन्तेऽपि प्रतिपद्यते' ॥ १ ॥

'अवस्थां पञ्चमीमाहुर्ण्यन्ते तां कर्मकर्त्तरि । निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते ॥ २ ॥

इति तामिति यत्तदोर्नित्याभिसम्बन्धात् यस्यां किमित्याह कर्मकर्त्तरि विवक्षिते निवृत्तप्रेषणा निवृत्तप्रयोजकव्यापाराद्धातोः प्राकृतेऽर्थे न्यग्भवनरूपे णिजुच्यते । णिजिति मतान्तरेण स्वमते तु णिगेव । आदावण्यन्तस्य न्यग्भवनं गौणत्वान्न विवक्ष्यते । ण्यन्तस्य तु गौणमपि पार्थक्येन विवक्ष्यते इति पञ्चै-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शावस्था न षट्। नन्वारोहयते हस्ती स्वयमेवेत्यस्यां पञ्चम्यामेवावस्थायां प्रयोजकव्यापारेऽविवक्षिते निमित्ताभाव इति न्यायाण्णिगोप्यभावः प्राप्नोति। नैवम्। 'णिस्नुश्र्यात्मने०' (३।४।९२) इति सूत्रे ण्यंतानामेव कर्मकर्तरि ञिक्ययोर्निषेधात्। लावयते केदार इत्यादाविवेति; लुनाति केदारं चैत्र इत्यत्र द्विधाभवनमुपसर्जनं द्विधाभावनं मुख्यमिति प्रथमावस्था, ततो लूयते केदारः स्वयमेवेत्यत्र द्विधाभावनमुपसर्जनं द्विधाभवनं मुख्यमिति द्वितीया, ततः स्वयं लूयमानं केदारं चैत्रः प्रयुङ्क्ते इत्यत्र स्वयं द्विधाभवनं गौणं द्विधाभावनं मुख्यमित्यवस्थाद्वयं तृतीया चतुर्थी च। लावयति केदारं चैत्र इति पुनरप्यस्य कर्तृत्वे लावयते केदार इति पञ्चमी, अत्र यथा कर्मस्थक्रियत्वं तथा आरोहयते हस्ती स्वयमेवेत्यत्रापि। **'प्रलम्भे गृधिवञ्चेः'** (३।३।८९) गृधि–वञ्चिभ्यां णिगन्ताभ्यां प्रलम्भे वञ्चने वर्त्तमानाभ्यां कर्त्तर्यात्मनेपदं स्यात् 'गृधूच् अभिकाङ्क्षायाम्' बटुं गर्द्धयते। 'वञ्चिण् प्रलम्भने' बटुं वञ्चयते प्रतारयतीत्यर्थः। वञ्चिणो णिजि सिद्धमात्मनेपदमात्मनेपदित्वाण्णिगन्ते तु विध्यर्थं वचनम्। चौरादिकादेव णिचि णिगन्तादात्मनेपदमित्येके। णिगन्त एव चायं प्रतारणे वर्त्तते स्वभावात्। प्रलम्भ इति किम्? श्वानं गर्द्धयति प्रलोभयतीत्यर्थः। अत्र फलवत्त्वेऽपि नात्मनेपदम्। अणिगि प्राणीति निषेधात्। अर्हिं वञ्चयति गमयतीत्यर्थः। अकर्मकत्वेऽणिगि प्राणीति निषेधः [ सकर्मकत्वे तु फलवत्यात्मनेपदं भवत्येव। णिग आत्मनेपदविधानं सर्वत्राफलवदर्थम्। **'लीङ्लिनोऽर्चाऽभिभवे चाचाकर्त्तर्यपि'** (३।३।९०) लीयतिलिनातिभ्यां णिगन्ताभ्यामर्चाभिभवयोः प्रलम्भे चार्थे वर्तमानाभ्यां कर्तर्यात्मनेपदं भवति अनयोश्चान्तस्याकर्तर्यप्याकारो भवति। जटाभिरालापयते, परैरात्मानं पूजयतीत्यर्थः। श्येनो वर्तिकामपलापयते अभिभवतीत्यर्थः ] कस्त्वामुल्लापयते वञ्चयते इत्यर्थः, अत्रार्चा मुख्य एव धात्वर्थः। अत एवोदाहरणे पर्यायो णिगन्तः कथितः (यथा पूजयति अर्चयतीत्यर्थः)। अभिभवप्रलम्भौ तु णिगन्त एव धातौ वर्त्तेते अतोऽणिगन्तौ पर्यायावूचाते। यदि तु मुख्यौ स्यातां धातोस्तदा प्रयोजकव्यापारेण व्यापार्येयातामिति। एष्विति किम्? बालमुल्लापयति उत्क्षिपतीत्यर्थः। कथं तर्ह्यत्रात्वम्? अत्रोच्यते **'लीङ्लिनोर्वा'** (४।२।९) लीयतेर्लिनातेश्च यपि खलचल्वर्जितेऽक्ङिति प्रत्यये च विषयभूते आकारोऽन्तादेशो भवति। अनेन सूत्रेण भवति। अकर्त्तर्यपीति किम्? जटाभिरालाप्यते जटिलेन। ङित् आनिर्देशो यौजादिकनिवृत्त्यर्थः। **'बिभेतेर्भीष् च'** (३।३।९२) प्रयोक्तुः सकाशात्स्वार्थे वर्त्तमानाण्ण्यन्ताद्बिभेतेः कर्त्तर्यात्मनेपदं स्यात्, अस्य च भीषादेशः। पक्षेऽन्तस्याकारश्चाकर्त्तर्यपि। मुण्डो भीषयते मुण्डो भापयते। प्रयोक्तुः स्वार्थे इत्येव कुञ्चिकया भापयति। अकर्त्तर्यपीत्येव—भीषा भापनम्। तिवृनिर्देशाद्यङ्लुपि न भवति। मुण्डो बेभाययति। **'मिथ्याकृगोऽभ्यासे'** (३।३।९३) मिथ्याशब्दयुक्तो यः कृग् तस्माण्णिगन्तादभ्यासेऽर्थे वर्त्तमानात् कर्त्तर्यात्मनेपदं स्यात्। अभ्यासः पुनः पुनः क्रियाभ्यावृत्तिः। पदं मिथ्याकारयते स्वरादिदोषदुष्टमसकृदुच्चारयति पाठयतीत्यर्थः। मिथ्येति पदसमानाधिकरणं विशेषणम्, मिथ्याभूतं पदं करोति (उच्चरति)। आत्मनेपदेनैव क्रियाभ्यावृत्तेर्द्योतितत्वादाभीक्ष्ण्ये द्विर्वचनं न भवतीति केचित्। स्वमते तु भवत्येव शब्दशक्तिस्वाभाव्यात्। केवलेनात्मनेपदेनाभ्यासो वक्तुं न शक्यते। यथा भोजं २ व्रजतीत्यादावाभीक्ष्ण्ये आगतोऽपि ण्णम् द्विर्वचनमाकाङ्क्षति (इति) पदं मिथ्याकारयते २ इति प्रयोगो ज्ञेयः। वृत्तौ त्वेकदेशेनोदाहारि। केचिदिति न्यासकारादयः, तद्परे न मृष्यन्ति, यत एवमभ्युपगम्यमानेऽभ्यासे द्योतकस्यात्मनेपदस्याभावे पदं साधु कारयतीत्यादि प्रत्युदाहरणेषु कस्मान्न भवति, न चाभ्यासो नास्तीति वाच्यं, व्यङ्ग्यवैकल्यप्रसङ्गात्तस्माद्यदेकदेशेनेत्याद्युक्तम् स एव पक्षो न्याय्यः। मिथ्येति



Jain Education International For Personal & Private Use Only www.jainelibrary.org

किम् ? पदं साधु कारयति । कृग इति किम् ? पदं मिथ्या वाचयति । अभ्यास इति किम् ? सकृत्पदं मिथ्या कारयति । **'परिमुहायमायसपाट्धेवद्वसदमादरुचनृतः फलवति'** ( ३।३।९४ ) फलवतीति भूम्न्यतिशायने वा मतुः तेन यत् क्रियायाः प्रधानं फलमोदनादि यदर्थमियमारभ्यते तद्वति कर्त्तरि विवक्षिते परिपूर्वान्मुहेराङ्पूर्वाभ्यां यमियसिभ्यां पिबति ट्धे वद वस दम अद रुच नृतिभ्यश्च णिगन्तेभ्यः कर्त्तर्यात्मनेपदं स्यात् । परिपूर्वः 'मुहौच् वैचित्त्ये' परिमोहयते चैत्रम् । आङ्पूर्वः 'यमू उपरमे' आयमयते सर्पम् । 'यमोऽपरिवेषणे णिचि च' ( ४।२।२९ ) इति ह्रस्वः । कश्चिद्यमः परिवेषणे इति पठति तन्मते ह्रस्वो न स्यात् स्वमते तु स्यादेव । आङ्पूर्व 'यसूच् प्रयत्ने' आयासयते मैत्रम् । 'पां पाने' पाययते बटुम् । 'ट्धें पाने' धापयते शिशुम् । 'वद व्यक्तायां वाचि' वादयते शिशुम् । 'वसं निवासे' वासयते पान्थम् । 'शमू दमूच् उपशमे' दमयते अश्वम् 'अमोऽकम्यमिचमः' ( ४।२।२६ ) इति ह्रस्वः । 'अदं प्सांक् भक्षणे' आदयते चैत्रेण । अदेर्नेच्छन्त्यन्ये आदयति चैत्रेण । 'रुचि अभिप्रीत्यां च' रोचयते मैत्रम् । 'नृतैच् नर्त्तने' नर्तयते नटम् । पिबन्त्यत्तिट्धेधातूनामाहारार्थत्वादौदासीन्यनिवृत्त्यर्थतायामकर्मकत्वाच्च नृतेश्चलनार्थत्वाच्च शेषाणां स्वरूपतो विवक्षातो वाऽकर्मकत्वाच्च अणिगि प्राणिकर्तृकानाप्याददिति चल्याहारार्थेति सूत्राभ्यां परस्मैपदे प्राप्ते वचनम् । पा इति ट्धे साहचर्यात्पिबतेर्ग्रहणं न पातेः । वदसाहचर्याच्च वस इति वसतेर्न वस्तेर्ग्रहणम् । पाति चैत्रो नोदास्ते पालयति चैत्रम् । वस्ते मैत्रो न नग्नो वासयति मैत्रमित्येव भवति । **'पदान्तरगम्ये वा'** ( ३।३।९९ ) 'परिमुहायमायसे'ति ( ३।३।९४ ) १ 'ईगितः' ( ३।३।९५ ) इति २ 'ज्ञोऽनुपसर्गात्' ( ३।३।९६ ) इति ३ 'वदोऽपात्' ( ३।३।९७ ) इति ४ 'समुदाङो यमेरग्रन्थे' ( ३।३।९८ ) इति ५ सूत्रपञ्चके यदात्मनेपदमुक्तं तत्पदान्तरगम्ये फलवति कर्त्तरि वा स्यात् । स्वं शत्रुं परिमोहयते परिमोहयति वा । स्वं यज्ञं यजते यजति वा । स्वं कटं कुरुते करोति वा । स्वमश्वं गमयते गमयति वा । स्वं शिरः कण्डूयते कण्डूयति वा । स्वां गां जानीते जानाति वा । स्वं शत्रुमपवदते अपवदति वा । स्वान् व्रीहीन् संयच्छते संयच्छति वा ।

अथ प्रसङ्गतः परस्मैपदनियमोऽप्यत्रैव निरूप्यते **'शेषात्परस्मै'** ( ३।३।१०० ) पूर्वप्रकरणेन आत्मनेपदनियमः कृतः, परस्मैपदं त्वनियतमिति तन्नियमार्थमिदम् । उपयुक्तादन्यः शेषः । येभ्यो धातुभ्यो येन विशेषेणात्मनेपदमुक्तं ततोऽन्यस्मादेव धातोः परस्मैपदं स्यात् । अनुबन्धोपसर्गार्थोपपदप्रत्ययभेदाच्चानेकधा शेषः । अनुबन्धशेषात् भवति अत्ति बोभवीति दीव्यति गोपायति पणायति पुत्रीयति पुत्रकाम्यति अश्वति मन्तूयति । उपसर्गशेषात् प्रविशति अधितिष्ठति आगच्छति विपद्यति । अर्थशेषात् करोति नयति वदति । उपपदशेषात् गृहे सञ्चरति, साधुभ्यः सम्प्रयच्छति, साधुपदं कारयति । प्रत्ययशेषात् शत्स्यति मुमूर्षति । **'परानोः कृगः'** ( ३।३।१०१ ) इत्यादिवत् उपसर्गयोगे **धातूनां परस्मैपदनियमस्तु यथास्थानमुक्तो वक्ष्यते** च । **'अणिगि प्राणिकर्तृकानाप्याण्णिगः'** ( ३।३।१०७ ) अणिगवस्थायां यः प्राणिकर्तृकोऽकर्मकश्च धातुस्तस्माण्णिगन्तात्कर्त्तरि परस्मैपदं भवति । आस्ते चैत्रः आसयति चैत्रम् । शेते मैत्रः शाययति मैत्रम् । अणिगीति स्वयमारोहयमाणं हस्तिनं प्रयुङ्क्ते आरोहयते हस्तिना हस्तिपकः अत्र चावस्थापञ्चकं प्राग्वत् ज्ञेयम् । ननु द्वितीयस्यामवस्थायामारुह्यते स्वयमेवेत्यस्यामणिगन्तायां धातुः प्राणिकर्तृकोऽनाप्यश्चास्ति तत्कथमस्य णिगि परस्मैपदं न भवति । सत्यं । तदपेक्षयाऽन्तर्भूततृतीयायां चतुर्थ्यां परस्मैपदमुत्पन्नमेव, आरोहयन्ति हस्तिनं हस्तिपका इति । प्रस्तुते त्वारोहयते स्वयमेवेत्यस्याः पञ्चम्या अनन्तरं स्वयमेवा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रोहयमाणं हस्तिनं प्रयुङ्क्ते इत्यस्यां षष्ठ्यामवस्थायां णिगि प्राप्तमनेन निषिध्यते, तदा हि णिगवस्थायामनाप्यो धातुर्नाणिगवस्थायाम्, पञ्चम्यामवस्थायामयं धातुर्नित्याकर्मकोऽतो नित्याकर्मकद्वारेण णिगन्तस्य धातोः षष्ठ्यामवस्थायां 'वा कर्मणामि'त्यनेन हस्तिनः कर्मत्वं प्राप्तमणिकर्त्तेत्यंशेन निषिध्यते । अणिगिति गकारः किम्? णिजवस्थायां प्राणिकर्तृकानाप्याण्णिगन्ताद्यथा स्यात्—चेतयमानं प्रयुङ्क्ते चेतयतीति । प्राणिकर्तृकादिति किम्? शुष्यन्ति व्रीहयः शोषयते व्रीहीनातपः 'प्राण्यौषधिवृक्षेभ्य०' (६।२।३१) इति पृथग्निर्देशादिह लोकप्रतीता एव प्राणिनो गृह्यन्ते । अनाप्यादिति किम्? कटं कुर्वाणं प्रयुङ्क्ते कटं कारयते । णिग इति किम्? आस्ते शेते । गकारः किम्? अणिगवस्थायां प्राणिकर्तृकानाप्याण्णिजन्तान्मा भूत् चेतयते । 'ईगितः' (३।३।९५) इत्यात्मनेपदस्यापवादोऽयम् ।

**'चल्याहारार्थेङ्बुधयुधप्रुद्रुस्रुनशजनः'** (३।३।१०८) चलेरर्थः कम्पनम् । तदर्थेभ्य आहारार्थेभ्य इङादिभ्यश्च णिगन्तेभ्यः कर्त्तरि परस्मैपदं स्यात् । चल्यर्थ चलयति कम्पयति चोपयति शाखाम् । गतिरपि कम्पनमेव गमयति ग्रामं गां चैत्रः । कथं शिरः कम्पयते युवेत्यत्रात्मनेपदम्? सत्यं, णिग्द्वयमत्र कम्पमानं शिर आत्मा प्रयुङ्क्ते ततो नात्र कम्पनं किन्तु कम्पना अत्र चलेरर्थः कम्पनमित्येवोक्तमिति । आहारार्थ निगारयति भोजयति आशयति चैत्रमन्नं पय उपयोजयते चैत्रेणेति । युजेरनाहारार्थत्वान्न भवति । 'न पीयतां नाम चकोरजिह्वया कथञ्चिदेतन्मुखचन्द्रचन्द्रिका । इमां किमाचामयसे न चक्षुषी चिरं चकोरस्य भवन्मुखस्पृशी ॥ १ ॥' इति **नैषधीये** । अत्राहारार्थत्वादाचामयसे इत्यात्मनेपदं कथम्? प्रामादिक एवायं प्रयोगः । इङ् सूत्रमध्यापयति शिष्यम् । बुध अवगमने भ्वादिः परस्मैपदी बुधृग् बोधने इति भ्वादिरुभयपदी बुधिंच् ज्ञाने इति दिवादिरात्मनेपदीत्येषां त्रयाणामपि ग्रहणमन्यथा धातुभेदेन बोधयति बोधयते इति रूपद्वयसिद्धौ नित्यं परस्मैपदविधानार्थमत्र बुधग्रहणमनर्थकं स्यात्, त्रयाणामप्यत्र ग्रहणाच्च बोधयति पद्मं रविः बोधयति शिष्यं धर्म्ममित्येव स्यान्न तु बोधयते इति । युध योधयति काष्ठानि । प्रु प्रावयति राज्यं प्रापयतीत्यर्थः । द्रु द्रावयत्ययः विलालयतीत्यर्थः । स्रु स्रावयति तैलं स्यन्दयतीत्यर्थः । नश नाशयति पापम् । जन जनयति पुण्यम् । प्रीतिं भक्तजनस्य यो जनयते इति **भास्कराचार्यकृतगणितलीलावत्याः** प्रथमपद्ये । अधनसम्पदादयः पदार्थाः प्रीतिं जनयन्ति तान् प्रयुङ्क्ते इति णिगन्ताण्णिगि रूपम् । एवं 'तदपि नाशयसे शरीरम्' इति **सिद्धसेनाचार्यकृतकल्याणमन्दिरस्तोत्रे** तत्रापि भव्याः शरीरं तापोऽनशनादिभिर्नाशयन्ति तान् सदुपदेशादिना प्रयुङ्क्ते इति णिगन्ताण्णिगि फलवत्कर्तृविवक्षयात्मनेपदे रूपम् । प्रुद्रुस्रूणामचलनार्थार्थं शेषाणां सकर्मकार्थं प्राणिकर्तृकार्थं च वचनम् ॥ १५६ ॥

इत्येवं स्वाभाविकाः कृत्रिमाश्चात्मनेपदिनो धातवो निरूपिताः ।

## अथ भ्वादय उभयपदिनः ।

**'डुपचींष् पाके' पच् धातुः । शेषा इतः ।**

अथोभयपदिनो वर्णक्रमेण निरूपणीयास्तेषु ह्रस्वेकारान्तः **श्रिग्** सेवायामिति दीर्घेकारान्तो **णींग्** प्रापणे इति । एतौ च पुरस्ताद्वक्ष्यन्ते । उक्तशेषस्वरान्ता अप्रसिद्धाः । अथ व्यञ्जनक्रमेण ते निरूप्यन्ते तत्र कान्त एकः **'हिक्की** अव्यक्ते शब्दे' ईदित्वात्फलवत्कर्त्तरि 'ईगित' इत्यात्मनेपदम् । अफलवति तु 'शेषात्परस्मै' इति परस्मैपदम् । हिक्कते हिक्कति जिहिक्के हिक्किता क्ते हिक्कितं 'क्तेट०'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

( ५।३।१०६ ) इत्यः हिक्का । अथ चान्ताश्रयः तत्राद्यौ सेटावन्त्योऽनिट् 'अञ्चूग् गतौ च' चकारादव्यक्ते शब्दे, गतिपूजयोरयं परस्मैपदिषु पठितः स चास्य पाठो गतौ फलवत्कर्त्तर्यपि परस्मैपदार्थः । अञ्चते अञ्चति 'अञ्चोऽनर्चायाम्' ( ४।२।४६ ) इति नस्य लुकि अच्यते । 'अनात०' ( ४।१।६९ ) इति पूर्वस्यात्वे ने च आनञ्चे आनञ्च अञ्चिता अञ्चितुं ऊदित्त्वात् क्त्वि वेट् अक्त्वा अञ्चित्वा धातोः परः क्त्वासेट् किद्वन्नभवतीति किन्त्वाभावान्नस्य लुग् नास्ति । वेट्त्वात् क्तयोर्नेट् अक्तः अक्तवान् । अयम् 'अचू गतावि'त्येके अचति अचते आचत् आचत आचे आच अचिता अचितुम् ऊदित्त्वात् क्त्वि वेट् अक्त्वा अचित्वा । 'अचु गतावि'त्यन्ये उदित्त्वान्ने अञ्चते अञ्चति क्ये अञ्च्यते क्ते अञ्चितः । 'अञ्चू गतौ च' अञ्चति अनर्चायां नस्य लुकि अच्यते अर्चायां नलोपाभावे अञ्च्यते । 'डुयाचृग् याच्ञायाम्, अयमग्रे वक्ष्यते । पच् धातुं कण्ठतो निर्दिशति 'डुपचींष् पाके' इति । शेषा इत इति डुकारेकारानुस्वारषकारा इत्यर्थस्तत्र डुकारेत्त्वात् 'ड्वितस्त्रिमक् तत्कृतम्' ( ५।३।८४ ) इति त्रिमकि पाकेन निर्वृत्तम् पक्त्रिमं फलम् । अनुस्वारेत्त्वान्नेट् पक्ता पक्तुम् षित्त्वात् षितोऽङ् पच्यतेऽसाविति पचा स्त्रियां भावे तु 'गापापचो भावे' ( ५।३।९५ ) इति क्तिरेव । ईकारेत्त्वस्य फलमाह अत्र सूत्रम्

## ईगितः ॥ १५७ ॥ [ सि० ३।३।९५ ]

**ईदितो गितश्च धातोः कर्तुरात्मगामिनि फले आत्मनेपदं स्यादन्यथा परस्मैपदं स्यात् । पचति ४ । अपाक्षीत् अपाक्तम् ५ । पपाच पपक्थ–पेचिथ ६ । पच्यात् ७ । पक्ता ८ । पक्ष्यति ९ । अपक्ष्यत् १० । पचते ४ । अपक्त ५ । पेचे ६ । पक्षीष्ट ७ । पक्ता ८ । पक्ष्यते ९ । अपक्ष्यत १० । 'डुकृंग् करणे' । गकार उभयपदार्थः ॥ १५७ ॥**

'**ईगि०**' ईदित इति यथा यजीं यजते डुपचींष् पचते लक्षीण् लक्षयते । गित इति डुकृंग् करणे कुरुते डुभृंग्क् बिभृते, कण्डूग् कण्डूयते । 'णिगन्त गमयते गतिः पादविहरणम् चलनं तु स्थितस्येवेति 'चल्याहारार्थ०' ( ३।३।१०८ ) इत्यादिना न नित्यं परस्मैपदम् । ईगित इति किम् ? गच्छति चोरयति कर्तुरित्यादेः फलवति कर्त्तरीत्यर्थः । फलवतीत्येव यजन्ति याजकाः, पचन्ति पाचकाः, कुर्वन्ति कर्मकराः गमयत्यश्वं दमकः नात्र स्वर्गौदनादिप्रधानं फलं कर्त्रा सम्बध्यते । यच्च दक्षिणावेतनादि कर्त्रा सम्बध्यते न तत् क्रियायाः प्रधानं फलम् । तच्चैतत्कर्तृगामिफलं सदसद्वा विवक्षानिबन्धनमेव ग्राह्यम्, तथैव लोके व्यवहारात् । तथाहि कश्चिदसदपि सद्विवक्ष्यते यथा शोषयते व्रीहीनातपस्तथा च पूर्वाचार्यप्रयोगः शब्दः[1] प्राक् स्वार्थमभिधत्ते ततो द्रव्यम् । अत्र हि शब्दस्यासदपि फलवत्त्वं विवक्षितम् । परकर्मण्यपि प्रवृत्ताः केचिदाहुर्यजामहे इमे पचामहे यत्नादस्मदीयमेवैतदिति । कश्चित्सदप्यसद्विवक्ष्यते इमे ब्रूमः । अवचनप्रतिषेधपरत्वेन प्रवृत्तेर्विवक्षितत्वात् । तथाहुः 'क्रियाप्रवृत्तावाख्याता कैश्चित्स्वार्थपरार्थता । असती वा सती वापि विवक्षितनिबन्धना' ॥ १ ॥ इति । स्वस्मै इयं परस्मै इयं क्रियाप्रवृत्तिः कर्मधारये स्वार्थपरार्थी ततो भावे तल्, मतान्तरेण पुंवद्भावे स्वार्थपरार्थता स्वमते तु 'त्वते गुणः' ( ३।२।५९ ) इति गुणवचनस्य भवति । **केचित्तु** णिग्वर्ज्जितादीगितो धातोर्णिगर्थे एव प्रेषणाध्येषणाविशेषे प्रतिविधाननाम्नि वर्त्तमानादात्मनेपदमिच्छन्ति । प्रतिविधाननाम्नीति पूर्वेषां प्रयोजकव्यापारस्य प्रतिविधानमिति संज्ञा, विधानं प्रयोज्यव्यापारं प्रतिगतं प्रतिविधानमिति व्युत्पत्तेः । यथा पचते पाचयतीत्यर्थः । केशश्मश्रु वपते वापयतीत्यर्थः । वेदो वैधर्म्यं

---

१ यथा गोशब्दः स्वार्थं सामान्यं गोत्वं प्राक् ततो गोलक्षणं द्रव्यम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विधत्ते विधापयतीत्यर्थः, इत्यादि । यदाहुः क्रीणीष्व वपते धत्ते मिनुते चिनुतेऽपि च । आत्म(त्र?)-प्रयोगा दृश्यन्ते येषु ण्यर्थोऽभिधीयते ॥ १ ॥ एतच्च **श्रोत्रियमत**मित्युपेक्ष्यते ।

पचति इत्यादि प्रक्रिया स्पष्टा । यङि पापच्यते । यङ्लुपि पापचीति पापक्ति । 'क्षैशुषि०' (४।२।७८) इति क्तयोस्तस्य वत्वे पक्वः पक्ववान् । 'क्तेऽनिट०' (४।१।१११) इति चस्य कत्वे घ्यणि पाक्यः । 'ऽयाप्ये घुरकेलिमकृष्टपच्यम्' (५।१।४) कृष्टे स्वयमेव पच्यन्ते कृष्टपच्या व्रीहयः । स्वयं पच्यन्ते पचेलिमा माषाः । उणादौ विद्याविशापचिभिद्यादेः केलिमः (३५४) पचत्यसावन्नमिति पचेलिमोऽग्निः आदित्योऽश्वश्च । लिहादित्वादणोऽपवादेऽचि श्वपचः । न्यङ्क्वादिनिपातनादणि कत्वे च श्वपाकः । न्यङ्क्वादित्वादेव कर्मकर्त्तरि अचि वृद्धावुदन्तत्वे च दूरेपाकुः फलपाकुः । 'मांसस्यानड्०' (३।२।१४१) इत्यलुकि मांस्पचनम् मांसपचनम् मांस्पाकः मांसपाकः । 'परिमाणार्थ०' (५।१।१०९) इति खे प्रस्थंपचः मितंपचः नखंपचा यवागूः । उदः पचीतीष्णौ उत्पचनशीलं उत्पचिष्णुः उणादौ स्थविर० (४१७) इति निपातनात् पचतेरत इत्वं ठश्च पिठिरं साधनभाण्डं पिठेर्वा रूपम् ।

वर्णक्रमे प्रकृतेऽपि बालानुग्रहाय प्रसिद्धप्रयोगान् कांश्चिद्धातून् व्यस्तानेव निर्दिशति । 'डुकृंग् करणे' गकार उभयपदार्थ इति । एवं ड्वित्वात् त्रिमकि कृत्रिमम् । अनुस्वारेत्त्वान्नेट् कर्त्ता कर्त्तुमिति ज्ञेयम् ॥ १५७ ॥ अत्र तिवादिषु सूत्रम्

## कृगृतनादेरुः ॥ १५८ ॥ [ सि० ३।४।८३ ]

**कृगस्तनादिभ्यश्च कर्तृविहिते शिति उः स्यात् । नामिनो गुणोऽक्ङितीति गुणे, उश्नोरिति गुणे, करोति ॥ १५८ ॥**

**'कृगत०'** स्पष्टम् । तनादावपठित्वा भ्वादिपाठोऽस्य करते करतीत्यत्र शवर्थः । येषां मते तनादौ पाठस्तेषां मते 'तन्भ्यो वा तथासिन्णोश्च' (४।३।६८) इति विकल्पेन सिजूलोपे अतत अतनिष्टेतिवदस्यापि रूपद्वयं प्राप्येत, शव् च सिद्ध्येत । स्वमते तु अकृत अकृथा इति नित्यमेव 'धुड्ह्स्वात्०' (४।३।७०) इति सिजूलुक् । अन्यैः कृग् तनादौ पठितस्ततस्तदपेक्षया तनादिसाहचर्यात् कृग् गृह्यते न तु कृंगट् ॥ १५८ ॥ अविति शिति सूत्रम्

## अतः शित्युत् ॥ १५९ ॥ [ सि० ४।२।८९ ]

**शित्यविति य उस्तन्निमित्तो यः कृगोऽकारस्तस्य उत्स्यात् । शिदवित् ङिद्वत्स्यात् इति गुणाभावे कुरुतः । इवर्णादेरिति वत्वे कुर्वन्ति । करोषि ॥ १५९ ॥**

**'अत०'** यथा कुरुतः कुर्वन्ति कुरु कुरुताम् कुर्यात् । कुरुते अकुरुताम् कुर्वन् कुर्वाणः । उविधानबलादुकारे परे 'लघोरुपान्त्यस्य' (४।३।४) इति प्राप्तो गुणो न भवति । ओकार एवान्यथा विधीयेत । उकारनिमित्तत्वेनाकारविज्ञानात् कुर्यादित्यादावुकारलोपेऽपि भवति । अडागमस्य च न भवति । अकुरुत । शित्यवितीत्युकारस्य विशेषणम् । किं कुरुत इत्यादौ शिति व्यवहितेऽपि यथा स्यात् । अन्यथा कुर्यादित्यादावेव स्यात् । नच स्वरस्येति स्थानिवत्त्वे व्यवधायकत्वमिति वाच्यम् । तस्याः परिभाषाया अनित्यत्वात् । न चैतद्वाच्यम् येन नाव्यवधानमिति न्यायाद्भविष्यति । किमनेन

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विशेषणेनेति ? कुर्यादित्यादावव्यवहितोऽस्तीति । अवितीत्येव करोति ॥ १५९ ॥ वकारमकारयकारादिविभक्तौ सूत्रम्

## कृगो यि च ॥ १६० ॥ [ सि० ४।२।८८ ]

**कृगः परस्योतो यादौ वमि चाविति लुक् स्यात् । कुर्वः कुर्मः ॥ १६० ॥**

'कृगो०' चकारात् वमीत्यनुवर्त्तते । ततो यादावित्यादि स्पष्टम् । यि चेति किम् ? कुरुतः । अवितीत्येव करोमि । कुर्म्मीत्यपि कश्चित्तदसम्मतम् । 'कृंगट् हिंसायामि'त्यस्मात्तु नकारव्यवधानादुः परो न सम्भवतीति न भवति । कृणुयात् कृणुवः कृणुमः ॥ १६० ॥ सप्तम्यां 'भ्वादेर्नामिनः०' ( २।१।६३ ) इति दीर्घे प्राप्ते सूत्रम्

## कुरुच्छुरः ॥ १६१ ॥ [ सि० २।१।६६ ]

**कुरुच्छुरोर्नामिनो रेफे परे दीर्घो न स्यात् । कुर्यात् २ । करोतु कुरुतात् ॥ १६१ ॥**

**'कुरु०'** कुर्यादिति एवं कुर्वः कर्मः । छुरत् छेदने तुदादौ कुटाद्यन्तर्गणे छुर्यात् छुर्यते । कुर्वित्युकारः किम् ? उच्यते उकाराभावे प्रतिपदोक्तत्वात् 'कुरत् शब्दे' इत्यस्यैव ग्रहणं स्यात् । तर्हि कृच्छुर इति निर्विवादं क्रियतां, न च वाच्यं कृच्छुर इति कृते कृंगट् हिंसायामित्यस्यापि ग्रहणम्, कृणोतीत्यादौ रेफाभावात्करिष्यतीत्यादौ नाम्यभावेन दीर्घत्वप्राप्तेरभावाच्चेति । उच्यते । कृच्छुर इति कृते सर्वत्रापि कृधातोर्दीर्घनिषेधे चिकीर्षतीत्यादावपि दीर्घनिषेधः स्यात् । उकारे कृते च डुकृंग् इत्यस्यैव उप्रत्ययविषय एव दीर्घनिषेध इति सर्वं समञ्जसम् । किञ्चात्रोकारग्रहणात् 'कुरत् शब्दे' इत्यस्य दीर्घः स्यात् कूर्यात् कूर्यते । केचिदस्यापि प्रतिषेधमिच्छन्ति । अथ 'रींश गतिरेषणयोः' रीः 'रिपिंत् गतौ' रिर्वा अनयोर्द्वयोरपि परोक्षाया सि उसि च रियतुः रियुः । तथा 'वींक् प्रजनादौ' अस्य विव्यतुः विव्युः । एषु इकारस्य दीर्घः कस्मान्न भवतीत्यत्रोच्यते । बहिरङ्गलक्षणस्य यत्वस्यासिद्धत्वेन व्यञ्जनाभावादिति । ननु 'व्येंग् संवरणे' 'व्यधंच् ताडने' आभ्यां णवि 'व्यस्थव् णवी'त्यात्वप्रतिषेधे द्वित्वेऽनादिव्यञ्जनलोपे 'ह्रस्वः' इत्यनेन ह्रस्वत्वे तस्य च कार्यान्तरबाधनार्थं 'ज्याव्येव्यधि०' ( ४।१।७१ ) इति इकारस्यापि इत्त्वे प्रथमे 'नामिनोऽकलिहलिरित्येत ऐत्वे आयि । द्वितीये 'ञ्णिति' ( ४।३।५० ) इति वृद्धौ संविव्याय संविव्यावेति रूपद्वयं सिद्ध्यति । अथात्र नामिनो दीर्घः कस्मान्न भवतीति चेत् । द्वित्वे कृते प्रत्ययाश्रितत्वेन बहिरङ्गस्य इकारस्य प्रकृत्याश्रितत्वेनान्तरङ्गे दीर्घे कर्त्तव्येऽसिद्धत्वादिति गृहाण ॥ १६१ ॥ पञ्चम्या ह्रौ सूत्रम्

## असंयोगादोः ॥ १६२ ॥ [ सि० ४।२।८६ ]

**असंयोगात्परो य उस्ततो हेर्लुक् स्यात् । कुरु, कुरुतात् । करवाणि करवाव करवाम ३ । अकरोत् अकुरुताम् । अकरवम् अकुर्व अकुर्म ४ । अकार्षीत् अकार्ष्टाम् अकार्षुः । अकार्षीः अकार्ष्टम् अकार्ष्ट । अकार्षम् अकार्ष्व अकार्ष्म ५ । चकार चक्रतुः चक्रुः । 'ऋतः' इतीड्निषेधे, चकर्थ चक्रथुः चक्र । स्कृसृवृ इत्यत्र स्कृग्ग्रहणात् कृगो नेट् । चकृव चकृम ६ ॥ १६२ ॥**

**'असं०'** असंयोगादित्यादि । असंयोगात्परो य उकारस्तदन्तात्प्रत्ययात्परस्य हेर्लुग् भवति । यथा सुनु, चिनु, तनु, कुरु । असंयोगादिति किम् ? 'ऋणूयी गतौ' 'कृग्तनादेरुः' ( ३।४।८३ ) 'लघोरुपान्त्यस्य' ( ४।३।४ ) इति गुणे अर्णुहि । 'अक्षौ व्याप्तौ च' भ्वादिः 'वाक्षः' ( ३।४।७६ )

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति वैकल्पिके भुप्रत्यये अक्ष्णुहि । अत्र संयोगात्पर उकार इति हेर्लुग् न । असंयोगादित्योर्विशेषणादिहापि न भवति आप्नुहि राध्नुहि । अत्र संयोगात्परो नकारोऽस्ति न तु उकारः । यदि वा संयोगाच्च उकारान्तः प्रत्यय इति प्रत्ययविशेषणं स्यात्तदाऽत्रापि भवेत् । ओरिति किम् ? क्रीणीहि । प्रत्यादित्येव । जुः सौत्रो धातुः, 'टुक्षु रु कुंक् शब्दे' जुहि रुहि । अत्र संयोगात्पर उस्तदन्तो धातुरस्ति न तु प्रत्यय इति । ननु हिलोपे निमित्ताभावे नैमित्तिकस्याप्यभाव इति उनिवृत्तिः कथं न स्यादित्यत्रोच्यते । शित्प्रत्ययनिमित्तिकस्य उप्रत्ययस्य हिनिवृत्तौ निवृत्तिर्न न्याय्या । सन्निपातलक्षणाद्वा उप्रत्ययनिमित्तको हिलोप उविघाताय नोत्सहत इति वा न उनिवृत्तिः ॥ १६२ ॥ आशिषि सूत्रम्

## रिः शक्याशीर्ये ॥ १६३ ॥ [ सि० ४।३।११० ]

**ऋदन्तस्य धातो ऋतः शे क्ये आशीर्ये च परे रिः स्यात् । क्रियात् ७ । कर्त्ता ८ । 'हनृत०' इति इडागमे करिष्यति ९ । अकरिष्यत् १० । कुरुते कुर्वते १ । कुर्वीत २ । कुरुताम् । कुरुष्व । करवै करवावहै करवामहै ३ । अकुरुत । अकुरुथाः । अकुर्वि अकुर्वहि अकुर्महि ४ ॥ १६३ ॥**

'रिः श०' क्रमेणोदाहरणानि शे 'पृङृत् व्यायामे' 'तुदादेः शः' ( ३।४।८१ ) अनेन ऋतो रिः व्याप्रियते । 'दृङृत् आदरे' आद्रियते । करणं क्रिया 'कृगः श च वा' ( ५।३।१०० ) इति शे अनेन ऋतो रित्वे 'संयोगात्' ( २।१।५२ ) इतीयादेशे क्रिया । क्ये क्रियते ह्रियते । आशीर्ये ह्रियात् क्रियात् । ह्रस्वविधानसामर्थ्यात् च्विवयक्ष्यक्येष्वित्यधिकृतेष्वपि 'ऋतो रीः' ( ४।३।१०९ ) इति सूत्रेण क्रियते इत्यत्र दीर्घो न स्यात् । आशीर्ये इति किम् ? कृषीष्ट हृषीष्ट ॥ १६३ ॥

अद्यतन्यां सूत्रम्

## ऋवर्णात् ॥ १६४ ॥ [ सि० ४।३।३६ ]

**ऋवर्णान्ताद्धातोरनिटावात्मनेपदे सिजाशिषौ किद्वत्स्याताम् । धुड्ह्रस्वादिति सिज्लुपि अकृत अकृषाताम् । माकृथाः ॥ १६४ ॥**

'ऋव०' ऋवर्णान्तादित्यादि । अयमर्थः ऋवर्णान्ताद्धातोः परे अनिटावात्मनेपदविषये सिजाशिषौ किद्वत्स्याताम् । यथा अकृत अहृत । कृषीष्ट हृषीष्ट । अतीर्ष्ट अस्मात्कर्मकर्त्तरि एकधातावित्यात्मनेपदप्रत्यये 'स्वरदुहो वा' ( ३।४।९० ) इति विकल्पेन ञिच् । कर्मणि तु नित्यं ञिच् स्यात् । एवमपूर्ष्टेत्यत्रापि । तीर्षीष्ट पूर्षीष्ट । अनिटावित्येव अवरिष्ट वरिषीष्ट । अतरिष्ट तरिषीष्ट ॥ १६४ ॥

अद्यतन्या ध्वमि सूत्रम्

## नाम्यन्तात्परोक्षाद्यतन्याशिषो धो ढः ॥ १६५ ॥ [ सि० २।१।८० ]

**रेफान्तान्नाम्यन्ताच्च धातोरेतासां धो ढः स्यात् । अकृढ्वम् । अकृष्वहि अकृष्महि ५ । चक्रे । चकृषे चकृढ्वे ६ । कृषीष्ट । कृषीढ्वम् ७ । कर्त्ता ८ । करिष्यते ९ । अकरिष्यत १० ॥ १६५ ॥**

'नाम्य०' रेफादीनामुदाहरणानि यथा तरतेरद्यतन्या ध्वमि 'सो धि वा' ( ४।३।७२ ) इति सिचो लुकि 'ऋतां क्ङितीर्' ( ४।४।११६ ) इतीरादेशे 'भ्वादेः०' ( २।१।६३ ) इति दीर्घे 'अड्धातो०' ( ४।४।२९ ) इत्यडागमे अनेन ढत्वे अतीर्ढ्वम् । आशिषः सीध्वम् सीढ्वम् । नाम्यन्त ष्टुंक् स्तुतौ डुकृंग् करणे आभ्यां परोक्षाध्वे तुष्टुढ्वे चकृढ्वे । ददातिदधात्योः 'द्वश्च स्यादः' ( ४।३।३३

Jain Education International For Personal & Private Use Only www.jainelibrary.org

४१) इतीकारः। ध्वमि सर्वत्र 'सो धि वे'ति सिज्लोपे इमानि रूपाणि। सिज्लोपाभावे अतीढ्ढ्वम् इत्यादीनि डकाराक्रान्तढकाराणि रूपाणि स्वयं ज्ञेयानि। चिनोतिच्यवत्योः 'नामिन०' इति गुणे अचेढ्वम् अच्योढ्वम् अकृढ्वम् चेषीढ्वम् कृषीढ्वम्। नाम्यन्तादिति किम्? अपग्ध्वम् पक्षीध्वम्। नाम्यन्तादिति धातोर्विशेषणं किम्? ववसिध्वे आसिध्वे। आसिध्वम्। आसिषीध्वम्। परोक्षाद्यतन्याशिष इति किम्? स्तुध्वे स्तुध्वम् अस्तुध्वम्। ह्यस्तन्या ध्वम्॥ १६५॥ समुपसर्गयोगे सूत्रम्

## सम्परेः कृगस्सट् ॥ १६६ ॥ [ सि० ४।४।९१ ]

आभ्यां परस्य कृग आदिः स्सट् स्यात्॥ १६६॥

**'सम्प०'** स्पष्टम्॥ १६६॥ अत्रोपयोगिसूत्रम्

## स्सटि समः ॥ १६७ ॥ [ सि० १।३।१२ ]

**स्सटि परे समः स स्यात्, अनुस्वारानुनासिकौ च पूर्वस्य। संस्करोति सँस्करोति॥ १६७॥**

**'स्सटि०'** संस्करोति कन्यां भूषयतीत्यर्थः। संस्कृतं वचनम्। संस्कारो वासना। तत्र नः संस्कृतं समुदितमित्यर्थः। एवं संस्करोतीत्यादीन्यनुनासिकरूपाणि ज्ञेयानि॥१६७॥ अत्र विशेषसूत्रम्

## लुक् ॥ १६८ ॥ [ सि० १।३।१३ ]

**समः सटिपरे लुक् स्यात्। सस्करोति॥ समस्करोत् ४। समस्कार्षीत् ५। सञ्चस्कार। सृजिदृशिस्कृ इत्यादिना वेटि स्कृच्छृतोऽकीति गुणे सञ्चस्करिथ–सञ्चस्कर्थ सञ्चस्करिव ६। संस्क्रियात् ७। संस्कुरुते ४। समस्कृषाताम् ५। सञ्चस्करे ६। संस्कृषीष्ट ७। असोङसिवूसहस्सटामिति षत्वे परिष्करोति॥ १६८॥**

**'लुक्'** समः स्सटि परे इत्यादि। सम इत्येतस्य स्सटि परे लुगन्तादेशो भवति। पृथग्योगादनुस्वारानुनासिकौ च पूर्वस्येति निवृत्तम्। ननु पृथग्योगः किम[illegible]सूत्र एव लुगुच्यताम्। न च वाच्यं तथा सति लुक्पक्षेऽप्यनुस्वारानुनासिकौ स्यातामिति, सकारप्रतिबद्धत्वात् तयोस्तन्निवृत्तौ न प्रवृत्तिः। नैवमनुस्वारानुनासिकौ हि कार्यप्रतिबद्धावेव विज्ञायेते। 'नोऽप्रशान०' (१।३।८) इत्यादिना शषसादावपि तत्प्रवृत्तेस्ततश्च लुकोऽपि कार्यतया तत्प्रतिबद्धौ लुक्पक्षेऽपि तौ स्यातामिति सूत्रम्। पृथग्योगादित्यादि-सस्करोति सस्कर्त्ता सस्कर्त्तुम्। केचित्त्वत्राप्यनुनासिकमिच्छति संस्करोति संस्कर्त्तुम्। स्सटि इति किम्? सङ्कृतिः सञ्चकारेत्यादौ तु व्यवधानान्मकारस्य सत्वं लुक् च न भवति। सम इति किम्? उपस्कर्त्ता। पूर्वं धातुरुपसर्गेण सम्बध्यते पश्चात्साधनेनेति द्विर्वचनादडागमाच्च पूर्वं स्सडेव भवति ततः समस्करोत् ४। समकार्षीत् ५। सञ्चस्कार ६। संस्क्रियात् ७। श्वस्तन्यां संस्कर्त्तेत्यत्र समो मस्य सत्वेऽनुस्वारानुनासिकाभ्यां द्विःसकारं रूपद्वयम्। **पाणिनीयमते** अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयानामकारोपरि शर्षु च पाठस्योपसङ्ख्यातत्वेनानुस्वारस्याच्त्वात्। अनचि चेति सकारस्य द्वित्वपक्षे त्रिसकारमपि रूपद्वयम्। तथा लोपस्य रुप्रकरणस्थत्वादनुनासिकाभ्यामेकसकारं रूपद्वयम्। **श्रीहेमसूरिमते** च पूर्वोक्तयुक्त्या मलोपेऽनुस्वारानुनासिकौ न भवत इति ताभ्यां रहितं रूपमेकम्। 'शिटः प्रथमद्वितीयस्य' (१।३।३५) इति कद्वित्वे द्वितीयम्।

| | |
|---|---|
| संस्कर्त्ता | सँस्कर्त्ता |
| संस्स्कर्त्ता | सँस्स्कर्त्ता |
| संस्स्स्कर्त्ता १३ | सँस्स्स्कर्त्ता ६ |
| संस्कर्त्ता | सस्स्कर्त्ता |
| संस्कर्त्ता | सस्स्स्कर्त्ता ४ |
| सर्वसङ्ख्यया | १३२ स्युः। |

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'अदीर्घाद्विरामै०' (१।३।३२) इति सद्वित्वे तृतीयम् । उभयोर्द्वित्वे चतुर्थम् । अनुनासिकवतां त्रयाणां द्वित्वे षट् । अनुस्वारवतां त्रयाणां रुद्वित्वे षट् 'कादिर्व्यञ्जन'मित्यत्रानुस्वारस्य व्यञ्जनसंज्ञाया ज्ञापितत्वाददीर्घाद्विरामेत्यनुस्वारद्वित्वे द्वादश । एषां द्वाविंशतेः तकारद्वित्वे मतान्तरेण पुनर्द्वित्वे एकतं द्वितं त्रितमिति षट्षष्टिः । अन्त्यस्वरस्यानुनासिकत्वे द्वात्रिंशं शतम् । संस्करोतीत्यादौ चतुश्चत्वारिंशदित्यादि स्वयं ज्ञेयम् । संस्कुरुते इत्यात्मनेपदे प्रक्रिया स्पष्टा । परिष्करोतीति परिष्करोति कन्यां भूषयतीत्यर्थः । परिष्कृतं परिष्काराभरणे चेति **कोषः** । तत्र नः परिष्कृतं समुदितमित्यर्थः । भूषासमवाययोरेवेच्छन्त्येके तन्मतेऽन्यत्र परिकृतम् । पूर्वोक्तन्यायेन द्विर्वचनादडागमाच्च प्राक् स्सडागमे पर्यस्करोत् ४ । पर्यस्कार्षीत् ५ । परिचस्कार ६ । एवं समचिस्करत् पर्यचिस्करत् । कथं सङ्कृति ? गर्गादिपाठात् । सङ्करः परिकर इति किरते रत्वाद् भविष्यति । सङ्कार इत्यत्र किरतेरेव बहुलाधिकारात् घञ् । स्सडिति द्विःसकारनिर्देशात् समचिस्करदित्यादौ 'नाम्यन्तस्था०' (२।३।१५) इति षो न भवति । परिष्करोतीत्यादौ तु 'असोङ्सिवूसहस्सटाम्' (२।३।४८) इत्यादिवचनाद्भवति । टकारः 'स्सटि समः' इत्यत्र विशेषणार्थः ॥ १६८ ॥ उपोपसर्गयोगे सूत्रम्

## उपाद्भूषासमवायप्रतियत्नविकारवाक्याध्याहारे ॥ १६९ ॥ [ सि० ४।४।९२ ]

**एष्वर्थेषु उपात्कृगः स्सट् स्यात् । कन्यामुपस्करोतीत्यादि ॥ १६९ ॥**

**'उपा०'** एष्वर्थेष्विति । भूषा अलङ्कारस्तत्र कन्यामुपस्करोति भूषयतीत्यर्थः । समवायस्समुदायस्तत्र न उपस्कृतं समुदितमित्यर्थः । पुनर्यत्नः प्रतियत्नः । सतोऽर्थस्य सम्बन्धाय वृद्धये तादवस्थ्याय वा समीहा प्रतियत्नः । एधोदकस्योपस्कुरुते । काण्डगुणस्योपस्कुरुते तत्र प्रतियतत इत्यर्थः । अत्र च **'कृगः प्रतियत्ने'** (२।२।१२) अस्मिन्नर्थे वर्त्तमानस्य करोतेर्व्याप्यं कर्म वा स्यादिति वैकल्पिके कर्मत्वाभावे 'शेषे' (२।२।८१) इति षष्ठी । पक्षे एधोदकमुपस्कुरुते इति रूपद्वयम् । प्रकृतेरन्यथाभावो विकारः । तत्रोपस्कृतं भुङ्क्ते । उपस्कृतं गच्छति विकृतमित्यर्थः । गम्यमानार्थस्य वाक्यैकदेशस्य स्वरूपेणोपादानं वाक्याध्याहारस्तत्रोपस्कृतं जल्पति । उपस्कृतमधीते । सोपस्काराणि सूत्राणि सवाक्याध्याहाराणीत्यर्थः । एष्विति किम् ? उपस्करोति ॥ १६९ ॥ अथास्यात्मनेपदं नियमयति । सूत्रम्

## वेः कृगः शब्दे चानाशे ॥ १७० ॥ [ सि० ३।३।८५ ]

**कर्मण्यसति शब्दे वा कर्मणि सत्यनाशार्थाद्विपूर्वात्कृग आत्मनेपदमेव स्यात् । विकुर्वतेऽश्वाः । क्रोष्टा विकुरुते स्वरान् । परानोः कृगः (३।३।१०१) परस्मैपदमेव । पराकरोति । 'हृंग् हरणे' । हरति ४ । अहार्षीत् ५ । जहार जहर्थ जहिम ६ । हरते ४ । अहृत ५ । जह्रे जह्रिषे ६ । हृषीष्ट ७ । 'हृगो गतताच्छील्ये' (३।३।३८) आत्मनेपदमेव । पैतृकमश्वा अनुहरन्ते । पितुरनुहरते । एवं 'भृंग् भरणे' 'धृंग् धारणे' भरति धरतीत्यादि । 'णींग् प्रापणे' । नयति ४ । अनैषीत् अनैष्टाम् अनैषुः ५ । निनाय निनयिथ निनेथ ६ । नयते ४ । अनेष्ट ५ । निन्ये निन्यिषे ६ ॥ १७० ॥**

'वेः कृ०' कर्मण्यसतीति विकुर्वतेऽश्वाः—साधु दान्ताः शोभनं वल्गन्तीत्यर्थः । ओदनपूर्णाश्छात्रा विकुर्वते—निष्फलं चेष्टन्त इत्यर्थः । शब्दे कर्मणि क्रोष्टा विकुरुते स्वरान् नानोत्पादयतीत्यर्थः । शब्दे चेति किम् ? विकरोति मृदम् । अनाश इति किम् ? विकरोत्यध्यायं विकरोति शब्दम् विनाशय-



Jain Education International For Personal & Private Use Only www.jainelibrary.org

तीत्यर्थः । अस्योपलक्षणत्वात् **'गन्धनावक्षेपसेवासाहसप्रतियत्नप्रकथनोपयोगे'** ( ३।३।७६ ) एषु सप्तस्वर्थेषु वर्त्तमानात्करोतेः कर्त्तर्यात्मनेपदं स्यात् । गन्धनं द्रोहाभिप्रायेण परदोषोद्घट्टनं प्रोत्साहनादिकमन्ये, आदिरव्याबाधानुज्ञादयः । तथा च पठन्ति तथ्येनातथ्येन वा गुणेन प्रोत्साहनं गन्धनम् । प्रथममते उत्कुरुते उदाकुरुते माम्, अध्याकुरुते जिघांसुरपकर्त्रे कथयतीत्यर्थः । **अवक्षेपण**मवक्षेपः । कुत्सनं भर्त्सनं च । दुर्वृत्तानवकुरुते कुत्सयतीत्यर्थः । श्येनो वर्त्तिकामपकुरुते भर्त्सयतीत्यर्थः । **सेवा**नुवृत्तिः । महामात्रानुपकुरुते सेवत इत्यर्थः । **साहस**मविमृश्य प्रवृत्तिः । परदारान् प्रकुरुते विनिपातमविभाव्य तानभिगच्छतीत्यर्थः । **प्रतियत्नः** सतो गुणान्तराधानम् । एधोदकस्योपस्कुरुते । तत्र गुणान्तरमादधातीत्यर्थः । **प्रकथनं** कथनप्रारम्भः प्रकर्षेण कथनं वा । जनापवादान् प्रकुरुते, कथयितुमारभते प्रकर्षेण वा कथयतीत्यर्थः । **उपयोगो** धर्मादौ विनियोगः । शतं प्रकुरुते, धर्मादौ विनियुङ्क्ते इत्यर्थः । एष्विति किम् ? कटं करोति । अफलवत्कर्त्रर्थ आरम्भः । **'अधेः प्रसहने'** ( ३।३।७७ ) अधेः परात्करोतेः प्रसहने वर्त्तमानात्कर्त्तर्यात्मनेपदं भवति । प्रसहनं पराभिभवः । परेणापराजयो वा । तं ह्यऽधिचक्रे तं प्रसेहे; तमभिभूतवान् तेन वा न पराजित इत्यर्थः । अथवा सहनं ( क्षमा ) तितिक्षोपेक्षेति यावत् । प्रकर्षेण सहनं प्रसहनम् । तच्च द्विधा शक्तस्याशक्तस्य च । तथा च **किरातार्जुनीये** 'भवादृशाश्चेदधिकुर्वते परान्' समर्था अपि यद्युपेक्षन्ते तदा 'निराश्रया हन्त हता मनस्विता ।' प्रसहन इति किम् ? तमधिकरोति । अधेरिति किम् ? शत्रून् प्रकरोति । अथास्य परस्मैपदं नियमयति । 'परा०' ( ३।३।१०१ ) स्पष्टम् । पराकरोति अनुकरोति । गङ्गामनुकुरुते तप इति नात्र करोतिरनुना सम्बध्यते । गन्धनादावर्थे गित्त्वात्फलवति च प्राप्तस्यात्मनेपदस्याऽपवादोऽयम् । 'कृगो नवा' ( ३।१।१० ) इति वा गतिसंज्ञायां 'तिरसो वा' ( २।३।२ ) इति वा रस्य सत्वे तिरस्कृत्य तिरःकृत्य पक्षे गतित्वाभावे 'गतिक०' ( ३।१।४२ ) इति समासाभावाद्यबभावे तिरःकृत्वा । कर्मणोऽणित्यणि पयस्कारः । अत्र 'अतः कृकमि०' ( २।३।५ ) इति रस्य सत्वम् । 'सत्यागदा०' ( ३।२।११२ ) इति मोऽन्ते सत्यङ्कारः । 'कृवृषि०' ( ५।१।४२ ) इति वा क्यपि कृत्यम् । पक्षे घ्यणि कार्यम् । 'शकृत्स्तम्बाद्०' ( ५।१।१०० ) इति इः शकृत्करिः वत्सः । स्तम्बकरिर्व्रीहिः । 'किंयत्तद्बहोरः' ( ५।१।१०१ ) किङ्करः किङ्करा जातिरिदानीम्, किङ्करी तु 'हेतुतच्छीला०' ( ५।१।१०३ ) इति टे रूपम् । यथा विद्या यशस्करी । 'सङ्ख्याहर्दिवा०' ( ५।१।१०२ ) इति टे सङ्ख्याकरः एककरः इत्यादि । 'भृतौ कर्मणः' ( ५।१।१०४ ) कर्मकरः कर्मकरी । 'क्षेमप्रियमद्रभद्रात् खाऽण्' ( ५।१।१०५ ) क्षेमङ्करः क्षेमकारः । 'मेघर्त्तिभयाभयात्खः' ( ५।१।१०६ ) मेघङ्करः । 'कृगः खनट् करणे' ( ५।१।१२९ ) नग्नङ्करणं द्यूतम् । 'कृगः सुपुण्यपाप०' ( ५।१।१६२ ) इति भूते क्विपि सुकृत् । 'सहराज०' ( ५।१।१६७ ) इति भूते क्वनिपि सहकृत्वा राजकृत्वा । 'भ्राज्यलं०' ( ५।२।२८ ) इतीष्णौ अलङ्करणशीलोऽलङ्करिष्णुः निराकरिष्णुः । कारणमित्यनटि निपातनात् करोतीति कारणम् । 'च्व्यर्थे कर्त्राप्या०' ( ५।३।१४० ) इति खलि सुकटङ्कराणि तृणानि । अन्यथैवमिति ख्णमि अन्यथाकारं भुङ्क्ते । 'यथातथादीर्ष्योत्तरे' ( ५।४।५१ ) यथाकारमहं भोक्ष्ये । तथाकारमहं भोक्ष्ये किं तवानेन । 'शापे व्याप्यात्' ( ५।४।५२ ) चौरङ्कारमाक्रोशति । 'स्वाद्वर्थाददीर्घात्' ( ५।४।५३ ) स्वादुङ्कारं भुङ्क्ते । 'कृगोऽव्ययेनाऽनिष्टोक्तौ क्त्वाणमौ' ( ५।४।८४ ) उच्चैःकृत्य उच्चैःकृत्वा उच्चैःकारं कथयति ब्राह्मणः कन्या ते गर्भिणीति । 'तिर्यचाऽपवर्गे' ( ५।४।८५ ) इति तिर्यक्कृत्य । तिर्यक्कृत्वा । तिर्यक्कारं गतः समाप्येत्यर्थः ।

Jain Education International   For Personal & Private Use Only   www.jainelibrary.org

'स्वाङ्गतश्च्व्यर्थनानाविधानार्थेनभूवश्च' ( ५।४।८६ ) मुखतःकृत्य । मुखतःकृत्वा । मुखतःकारं गतः—एषु 'तृतीयोक्तं वा' ( ३।१।५० ) इति समासः । सनि क्ते चिकीर्षितम् । प्रज्ञाद्यणि चैकीर्षितम् । 'कृभ्वस्तिभ्यां०' ( ७।२।१२६ ) इति च्वौ घटीकरोति मृदम् । 'अरुर्मन०' ( ७।२।१२७ ) इति सो लुकि अरूकरोति । 'तीयशम्ब०' ( ७।२।१३५ ) इति डाचि द्वितीयाकरोति क्षेत्रम् । 'सङ्ख्यादेर्गुणात्' ( ७।२।१३६ ) द्विगुणाकरोति क्षेत्रम् । 'अव्यक्तानुकरणे०' ( ७।२।१४५ ) इति डाचि, 'डाच्यादौ' ( ७।२।१४९ ) इति पूर्वस्य तो लुकि पटपटाकरोति । उणादौ कृवापाजि० ( १ ) इत्युणि कारुः शिल्पी । कृगो वा ( २३ ) इति किति के कृकः शिरोग्रीवे 'कृकस्तु कन्धरामध्य'मिति कोषः । कर्कः श्वेतोऽश्वः । करकः करकेति तु दृकॄश्रित्यके ( २७ ) रूपम् । कृगो द्वे च ( ७ ) इति किदः चक्रम् । कृकडि० ( ३२१ ) इत्यम्बे करम्बः दध्योदनः दधिसक्तवश्च । 'कृकलेरम्भः' ( ३३६ ) करम्भः दधिसक्तवः । करीर इति तु किरतेः कॄशॄपॄ० ( ४१८ ) इतीरे । ऋकृमृ० ( ४७५ ) इत्याले करालमुखम् । पतिकृलुभ्यो णित् ( ४७९ ) करालं लेपद्रव्यम् । 'कृधूतन्यॄ० ( ४४० ) इति किति सरेः कृसरः तिलौदनः । कृकुरिभ्यां पासः ( ५८३ ) कर्पासः । कॄशॄकुटि० ( ६१९ ) इति वा णिदिः कारिः शिल्पी, करिः हस्ती विष्णुश्च [ ऋहस्र ( ६३८ ) इत्यणौ करणिः सादृश्यम् । आङः 'कृह' ( ६४३ ) इति सनो णौ आचिकीर्षणिर्व्यवसायः । कृभूभ्यां कित् ( ६९० ) इति मौ कृमिः ] क्रिमिरिति तु क्रमेः क्रमितमि० ( ६१३ ) इति इप्रत्यये उपान्त्येत्वे च । जॄशॄस्तॄ० ( ७०५ ) इति ङिति वौ कृविः रुद्रः राजा च । कृहृ० ( ७७२ ) इत्येणौ करेणुः हस्ती । कृलाभ्यां कित् ( ७८० ) इत्यतौ क्रतुः । मनि ( ९११ ) कर्म, करण्ड इति तु जॄकॄतॄ० ( १७३ ) इति अण्डे किरतेः । एवं किरोऽङ्को रो लश्च वा ( ६२ ) करङ्कः समुद्रः कलङ्को लाञ्छनम् । कॄम ऋत उर् च ( ७३४ ) 'कृत् विक्षेपे' ( इत्यस्मादुः ) कुरुः । कुरोरपत्यमिति 'दुनादि०' ( ६।१।११८ ) इति ञ्यः । 'कुरोर्वा' ( ६।१।१२२ ) इति स्त्रियां तल्लुपि 'उतोऽप्राणिनश्चा०' ( २।४।७३ ) इत्यूङि कुरूः । 'कृंग्ट् हिंसाया'मित्यस्य तु कृणुते कृणोति । **'हृंग् हरणे'** इति प्रक्रिया सर्वापि कृंग्वत् स्पष्टा । अथास्यात्मनेपदं नियमयति तत्र सूत्रम् **'हृगो०'** ( ३।३।३८ ) अस्यायमर्थः । गतं प्रकारः सादृश्यमनुकरणमित्येकोऽर्थः । तच्छीलमस्य, तच्छीलस्तस्य भावस्ताच्छील्यम्, उत्पत्तेः प्रभृत्याविनाशात्तत्स्वभावता । हरतेः प्रकारताच्छील्येऽर्थे वर्त्तमानात्कर्त्तर्यात्मनेपदं स्यात् । शब्दशक्तिस्वाभाव्याच्चानुपूर्व एव हरतिर्गतताच्छील्ये वर्त्तते । तथा चोदाहरति—पैतृकमश्वा अनुहरन्ते इति । एवं गावो मातृकमनुहरन्ते । पितुरागतं मातुरागतं गुणविषयं वा सादृश्यमविकलं शीलयन्तीत्यर्थः । एवं पितुरनुहरते मातुरनुहरते । गतग्रहणं किम् ? पितुर्हरति मातुर्हरति । ताच्छील्य इति किम् ? नटो राममनुहरति । नटो हि कश्चिदेव कालं राममनुकरोतीत्यसातत्ये न भवति । यद्वा गतं गमनं तस्य पित्रादेः शीलमस्य तच्छीलस्तस्य भावस्ताच्छील्यम् । गतेन गमनेन ताच्छील्यं गतताच्छील्यम्, तस्मिन् वर्त्तमानात् हरतेः कर्त्तर्यात्मनेपदं स्यात् । पैतृकमश्वा अनुहरन्ते । पितुरागतं गमनमविच्छेदेन शीलयन्तीत्यर्थः । एवं पितुरनुहरते पितरमनुहरते । गतताच्छील्य इति किम् ? धर्मान्तरेण पितरमनुहरते । अथवा गते गमने ताच्छील्ये च वर्त्तमानात् हरतेरात्मनेपदं भवति । पैतृकमश्वा अनुहरन्ते तद्वद्गच्छन्ति तद्वच्छीलयन्ति वेत्यर्थः । हरतिरयं सकर्मकश्चाकर्मकश्च तथाभ्यवहारार्थश्चेतरार्थश्च दृश्यते । यदा अकर्मकश्चाभ्यवहारार्थश्च भवति, तदा णौ 'गतिबोध०' ( २।२।५ ) इत्यणिकर्त्तुर्नित्यं प्राप्तं कर्मत्वं 'हृक्रोर्नवा' ( २।२।८ ) इति विकल्प्यते । हरति मैत्रः हारयति मैत्रेण वा चैत्रः । हरतीत्यत्र विहरतीति युक्तं प्रतिभाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विपूर्वस्यास्य क्रीडार्थत्वादकर्मकत्वम्। क्रीडार्थत्वं 'विहारदेशं तमवाप्य' इति नैषधीयप्रयोगात् प्रसिद्धम्। अभ्यवहरति मैत्रः। अभ्यवहारयति मैत्रं मैत्रेण वा चैत्रः। यदा सकर्मको भवति। चौर्यार्थत्वादनभ्यवहारार्थश्च तदा कर्मकत्वमप्राप्तं (हृक्रोर्नवेति) कर्मत्वं विभाष्यते। हरति द्रव्यं चौरः, हारयति द्रव्यं चौरं चौरेण वा चैत्रः, यदा तु सकर्मको भवत्यचौर्यार्थत्वेऽपि देशान्तरप्रापणार्थस्तदा गत्यर्थत्वात् गतिबोधेति नित्यं प्राप्तं कर्मत्वं विभाष्यते। हरति भारं चैत्रः, हारयति भारं चैत्रं चैत्रेण वा मैत्रः। देशान्तरं प्रापयतीत्यर्थः। ग्रहादित्वाण्णिनि व्याहारी संव्याहारी। 'अवहृतासंसोः' (५।१।६३) इति णे अवहारः। 'हृगो वयोऽनुद्यमे' (५।१।९५) इत्यचि अस्थिहरः श्वा। मनोहरः। उद्यमे तु अणेव भारहारः। 'आङः शीले' (५।१।९६) इत्यचि पुष्पाहरो विद्याधरः। 'दृतिनाथात् पशाविः' (५।१।९७) दृतिहरिः श्वा, नाथहरिः पशुः। 'न्यायावाय०' (५।३।१३४) इति घापवादे घञि संहारः अवहारः। उणादौ कुशिकहृदिक० (४५) इतीके निपातनात् हृदिकः यादवः। द्रुहृवृहि० (१९४) इति इणे हरिणः। हृश्या० (२१०) इतीते हरितः। 'गयहृदय०' (३७०) इति निपातनात् हृदयम्। हिरण्य० (३८०) इत्यन्ये निपातनात् हरतेरिन्नातः हिरण्यम्। स्वरेभ्य इः (६०६) हरिः। नीवीप्रहृभ्यो डित् (६१६) प्रहिः कूपः। 'कृहृ०' (७७२) इत्येणौ हरेणुर्गन्धद्रव्यम्। हृसृरुहि० (८८७) इतीति हरित्। दिक्। हृजनिभ्यामिमन् (९१७) हरिमा मृत्युः। सृहृभृ० (९१८) इति ईमनि हरीमा मातरिश्वा।

एवं भृंग् भरणे इति। भरते भरति इत्यादि प्रक्रिया सुगमैव। अनुस्वारेत्वान्नेट्। भर्त्ता भर्त्तुम्। तीर्थस्य भर्त्ता तीर्थभर्त्ता। 'कर्मजा तृचा च' (३।१।८३) इति प्रतिषिद्धोऽपि याजकादित्वात् षष्ठीसमासः। 'हनृतः स्यस्य' (४।४।४९) इतीटि भरिष्यति। सनि 'इवृध०' (४।४।४७) इति वेटि बुभूर्षति बिभरिषति। भृतः भृतवान्। घञि भारः। भर इति तु भृणातेरलि। भृगोऽसंज्ञायाम् (५।१।४५) इति क्यपि भृत्यः। संज्ञायां 'ऋवर्ण०' (५।१।१७) इति ध्यणि भार्यो नाम क्षत्रियः। भार्या वधूः। 'कुक्ष्यात्मोदराद्भृगः खिः' (५।१।९०) कुक्षिम्भरिः। आत्मम्भरिः। उदरम्भरिः 'भृवृजि०' (५।१।११२) इति खे विश्वम्भरा भूः। क्विपि विदभृत्। 'मालेषीकेष्टकस्याऽन्तेऽपि भारितूलचिते' (२।४।१०२) इति ह्रस्वे मालां बिभर्त्तीत्येवंशीलः 'अजातेः शीले' (५।१।१५४) इति मालभारी उत्पलमालभारी। मालभारिणी उत्पलमालभारिणी। 'डुडुभृंग्क् पोषणे' इत्यस्य तु बिभर्त्ति। 'धृंग् धारणे' इति। धरते धरति इत्यादि प्रयोगजातं प्रकटम्। 'आयुधादिभ्यः०' (५।१।९४) इत्यचि चक्रधरः। दण्डादेस्तु 'कर्मणोऽण्' (५।१।७२) इत्यणि दण्डधारः सूत्रधारः। 'धृङ् अवध्वंसने' धरते 'धृङ्त् स्थाने' ध्रियते। चुरादेराकृतिगणत्वात् धारयति। इति चत्वार ऋकारान्ता धातवः उक्ताः। अथ दीर्घईकारान्तमाह। णींग् प्रापणे इति। अजां नयति नयते वा ग्रामं प्रापयतीत्यर्थः। णोपदेशत्वात् 'अदुरुपसर्गान्तर०' (२।३।७७) इति णत्वे प्रणयते। शेषं स्फुटम्॥ १७०॥ अथास्यात्मनेपदं नियमयति। सूत्रम्

## कर्तृस्थाऽमूर्त्ताप्यात्॥ १७१॥ [सि० ३।३।४०]

**कर्तृस्थममूर्त्तं कर्म यस्य तस्मान्निय आत्मनेपदमेव। श्रमं विनयते॥ १७१॥**

'कर्तृ०' कर्तृस्थमित्यादि। एवं क्रोधं विनयते शमयतीत्यर्थः। कर्तृस्थ इति किम्? चैत्रो मैत्रस्य मन्युं विनयति। अमूर्तेति किम्? गडुं विनयति। घण्टां विनयति। आप्येति किम्? बुद्ध्या विन-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यति । श्रमं विनयते इत्यादौ श्रमापगमादेः फलस्य कर्तृसमवायित्वात्सिद्धे आत्मनेपदे नियमार्थं वचनम् । ( तेनात्र सूत्रे फलवत्त्वैव विवक्ष्यते ) व्यवच्छेद्यं च प्रत्युदाहरणम्, तेन प्रत्युदाहरणेषु फलवत्त्वविवक्षायामपि नात्मनेपदम् । शमयतिक्रियावचनादेव नयतेरात्मनेपदं दृश्यते न प्रापणार्थात् । यथा 'शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतिम् । विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः' ॥ १ ॥ इति **किरातार्जुनीये** द्वितीयसर्गे श्लो० ३५ यथा च कोपं शमं नयति । मन्युं नाशं नयति । प्रज्ञां वृद्धिं नयति । बुद्धिं क्षयं नयति ॥ १७१ ॥ सूत्रम्

## पूजाचार्यकभृत्युत्क्षेपज्ञानविगणनव्यये नियः ॥ १७२ ॥ [ सि० ३।३।३९ ]

**आत्मनेपदमेव । नयते विद्वान् स्याद्वादे । अदुरुपसर्गेति णत्वे प्रणयति अन्तर्णयति । 'श्रिंग् सेवायाम्' । श्रयति ४ ॥ १७२ ॥**

**'पूजा०'** अयमस्यार्थः पूजाचार्यकभृतिषु यथासङ्ख्यं कर्मकर्तृधात्वर्थविशेषणेषु गम्यमानेषु उत्क्षेपादिषु च धात्वर्थेषु वर्त्तमानान्नयतेः कर्त्तर्यात्मनेपदं स्यात् । **पूजा** सन्मानः । नयते जीवादीन् विद्वान् स्याद्वादे; प्रमाणव्यापारवित् स्याद्वादे जीवादीन् पदार्थान् युक्तिभिः स्थिरीकृत्य शिष्यबुद्धिं प्रापयति, ते हि युक्तिभिः स्थिरीकृताः पूजिता भवन्ति । आचार्यस्य भावः कर्म वा **आचार्यकम्**, माणवकमुपनयते, स्वयमाचार्यो भवन्माणवकमध्ययनायात्मसमीपं प्रापयतीत्यर्थः । **भृतिर्वेतनम्**; कर्मकरानुपनयते । वेतनेनात्मसमीपं प्रापयतीत्यर्थः । **उत्क्षेप** ऊर्ध्वनयनम्, शिशुमुदानयते उत्क्षिपतीत्यर्थः । **ज्ञानं** प्रमेयनिश्चयः; नयते तत्त्वार्थे, तत्र प्रमेयं निश्चिनोतीत्यर्थः । **विगणनमृणादेः** शोधनम्; मद्राः कारं विनयन्ते, राजग्राह्यं भागं दानेन शोधयन्तीत्यर्थः । **व्ययो** धर्मादिषु विनियोगः, शतं विनयते, धर्मार्थं विनियुङ्क्ते इत्यर्थः । एतेष्विति किम् ? अजां ग्रामं नयति । गिस्त्वादफलवदर्थ आरम्भः । णिगि 'गतिबोधे'त्यत्र नीवर्जनादणिक्कर्तुः कर्मत्वाभावे नाययति भारं ग्रामं चैत्रेण । 'प्रणाय्यो निष्कामासंमते' ( ५।१।२३ ) इति ध्यणि निपातनात् प्रणाय्यः । 'धाय्यापाय्य०' ( ५।१।२४ ) इति निपातनात् सान्नाय्यं हविः । 'परिचाय्योपचाय्य०' ( ५।१।२५ ) इति निपातनात् आनाय्यो दक्षिणाग्निः । ये त्वग्नेरन्यत्राप्यनित्यविशेषमिच्छन्ति, तन्मते आनाय्यो गोधुक् । 'जिविपून्य०' ( ५।१।४३ ) इति क्यपि विनीयः कल्कः । 'वा ज्वलादि०' ( ५।१।६२ ) इति णे नायः । पक्षेऽचि नयः । 'ग्रामाग्रान्नियः' ( २।३।७१ ) इति ग्रामणीः अग्रणीः । 'असरूपोपवादे०' ( ५।१।१६ ) इत्यणि ग्रामनाय इत्यपि । 'नीदांव्०' ( ५।२।८८ ) इति करणे त्रटि नेत्रम् । 'नियश्चानुपसर्गाद्वा' ( ५।३।६० ) इति वा घञि नायः । पक्षेऽलि नयः । 'वोदः' ( ५।३।६१ ) उन्नायः उन्नयः । 'अवात्' ( ५।३।६२ ) अवनायः । 'परेर्द्यूते' ( ५।३।६३ ) 'परिणायस्तु शारीणां नयनं स्यात्समन्ततः' । पुन्नाम्नि घे नीयतेऽनेनेति नयः । 'आनायो जालम्' ( ५।३।१३६ ) इति घञि आनायो मृगाणाम् । उणादौ नीनूरं ( २२७ ) इति किति थे नीथं जलम् । सुनीथो नाम राजा । नियो वा ( ३०२ ) इति वा किति पे नीपः कदम्बः, कित्त्वाभावे नेपः पुरोधाः, नेपं जलं यानं च । ऋज्यजि० ( ३८८ ) इति किति रे नीरम् । नीस० ( ६८७ ) इति मौ नेमिः चक्रधारा । नियो डित् ( ८५४ ) इति ऋः ना नरौ । हुपृद्रोन्नी० ( ८६३ ) इति तृः उन्नेता ऋत्विक् । नियः षादिः ( ८६४ ) नेष्टा ऋत्विक् । अथ **ह्रस्वेकारान्तमाह** । **श्रिंग् सेवायामिति** । श्रयतीत्यादि स्पष्टम् ॥ १७२ ॥

अद्यतन्यां सूत्रम्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## णिश्रिद्रुस्रुकमः कर्त्तरि ङः ॥ १७३ ॥ [ सि० ३।४।५८ ]

ण्यन्तात् श्र्यादेश्च कर्त्तर्यद्यतन्यां ङः स्यात्ततो द्विर्धातुरिति द्वित्वे संयोगादितीयादेशे अशिश्रियत् अशिश्रियताम् अशिश्रियन् ५। शिश्राय शिश्रियतुः शिश्रियुः। शिश्रयिथ ६। श्रीयात् ७। श्रयिता ८। श्रयिष्यति ९। अश्रयिष्यत् १०। श्रयते ४। अशिश्रियत अशिश्रियेताम् अशिश्रियन्त ५। शिश्रिये ६। श्रयिषीष्ट ७। 'शपीं आक्रोशे'। शपति ४। अशाप्सीत् ५। शशाप। शेपिथ–शशप्थ ६। शपते ४ अशप्त ५। शेपे। शेपिषे ६। शप्सीष्ट ७॥ १७३॥

'णिश्रि०' क्रमेणोदाहरणानि। णिरिति णिग्णिजूणिङ्गं ग्रहणम्। तथाहि अचीकरत् अचूचुरत् औजिढत् अचीकमत। कर्मकर्त्तापि कर्त्तैव। अचीकरत् कटः स्वयमेव। **श्रि** अशिश्रियत्। **द्रु** अदुद्रुवत्। **कम** अचकमत। कर्त्तरीति किम्? अकारयिषातां कटौ देवदत्तेन। कमिग्रहणं 'अशविते वा' ( ३।४।४ ) इति यदा णिङ्नास्ति, तदार्थवत्। ङकारो ङित्कार्यार्थः॥ श्रिश्रिङी इत्यनिट्कारिकायामस्य वर्जनादनुस्वारेत्त्वाभावेन सेट्त्वात् श्रयितेत्यादि। 'ऋवर्णश्र्यूर्ण्गुगः कित' (४।४।५७) इति इडभावे श्रित्वा श्रितः श्रितवान्। सनि 'इवृध०' ( ४।४।४७ ) इति वेटि शिश्रीषति शिश्रयिषति। 'जीणृदृक्षि०' ( ५।२।७२ ) इतीनि विश्रयणशीलो विश्रयी। 'दिद्युद्दद्०' ( ५।२।८३ ) इति किपि निपातनात् श्रीः। 'भूश्र्यद०' ( ५।२।२३ ) इति सोपसर्गादलि प्रश्रयः। अनुपसर्गात्तु घञि श्रायः। श्रय इति तु बाहुलकादलि। 'उदः श्रेः' ( ५।३।५३ ) इति अलि उच्छ्रयः। पक्षे घञि उच्छ्रायः। उणादौ कावावी० ( ६३४ ) इति णौ श्रेणिः। अश्रिरिति त्वश्नोतेः तक्किवक्कि० ( ६९२ ) इति रौ। श्मश्रुरित्यपि शेतेः श्मनः शीङो डित् ( ८१० ) इति रौ। शिर इति च मिथिरञ्ज्युषि० ( ९७१ ) इति कित्यसि। भ्वादिस्वरान्ताः षडेवोभयपदिन इति ते निरूपिताः।

अथ वर्णक्रमोऽनुसन्धीयते। तत्र कान्तः प्रागुक्तः। चान्तेषु अञ्चूग् डुपचींष् प्रागुक्तौ। याचृग् वक्ष्यते इति चान्तास्त्रय एव। राजृग् टुभ्राजि भर्ज्जी रञ्जीं इति जान्ताश्चत्वारो वक्ष्यन्ते। शेषा वर्णक्रमेण निरूप्यन्ते। तत्र टान्तः एकः सेट् च। '**रेटृग्** परिभाषणयाचनयोः'। रेटते रेटति ऋदित्त्वादद्यतन्यामङि अरटत्। रिरेटे रिरेट। ङपरे णौ न ह्रस्वः अरिरेटत्। णान्तः एकः सेट्। '**वेणृग्** गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु'। वादित्रस्य वाद्यभाण्डस्य वा वादनाय ग्रहणम्। वेणते वेणति। अवेणत् अवेणीत्। विवेणे विवेण। ङपरे णौ अविवेणत्। णके स्त्रियां वेणिका। उणादौ इणुर्विशा० ( १८२ ) इति णे वेण्णानाम नदी। वीणा इति तु धृवीह्वा० ( १८३ ) इति किति णे वेतेः। वेणिरित्यपि कावावी० ( ६३४ )इति णावस्यैव॥ अथ तान्तः सेट् १। '**चतेग्** याचने'। चतते चतति। चतिता चतितुम्। एदित्त्वात् 'व्यञ्जनादेः' ( ४।३।४७ ) इति वा वृद्धेः 'न श्विजागृ०' ( ४।३।४९ ) इति प्रतिषेधे अचतीत्। क्ते चतितम्। उणादौ कृगृशृ ( ४४१ ) इति

१ ननु 'स्वरस्य परे' इति ह्रस्वस्य स्थानित्वे लघोरभावात्सन्वद्भावो न प्राप्नोति। न। एतत्सूत्रसामर्थ्याद्भवति, यत ओणेर्ऋदनुबन्धकरणव्याख्यानात् पूर्वं ह्रस्वत्वे कृते स्थानिवद्भावो न, प्राग्विधावित्यस्य प्राचि पूर्वस्मिन् काले विधिः प्राग्विधिरिति व्याख्यानाद्वा। २ अत्र परे द्वित्वे 'हो धुट्पदान्ते' इत्यस्यासत्त्वे तदाश्रितत्वात् 'अधश्चतुर्थात्तथोर्धः' इत्यस्याप्यसत्त्वे णौ यत्कृतमिति न्यायादकारस्य स्थानित्वे 'नाम्नो द्वितीयात्' इत्यनेन ढ्तेति द्विर्वचनम्, तत्र यदा परे द्वित्वे 'हो धुट्पदान्ते' इत्यस्य शास्त्रस्यासिद्धिराश्रीयते तदा पुनरपि 'हो धुट्पदान्ते' इत्यादि प्रक्रिया क्रियते, ततो 'ढस्तड्ढे' इति ढलोपे पूर्वजकाराकारस्य दीर्घत्वे 'ह्रस्वः' इत्यनेन ह्रस्वः। ३ क्रियेते कटौ देवदत्तेन तौ देवदत्तेन क्रियमाणौ यज्ञदत्तेन प्रयुज्येते स्म, यद्वा करोति कटौ देवदत्तः, स एवं विवक्षते नाहं करोमि अपि तु क्रियेते कटौ स्वयमेव। तौ क्रियमाणौ यज्ञदत्तेन प्रायुक्षाताम्।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वरटि चत्वरम् । वाश्यसि० (४२३) इत्युरे चतुरः । चतेरुर् (९४८) चत्वारः । अथ थान्ताः त्रयः सेटश्च । 'प्रोथृग् पर्याप्तौ' पर्याप्तिः पूर्णता । प्रोथते प्रोथति । पुप्रोथे पुप्रोथ । ऋदित्त्वात् ङे अपुप्रोथत् । अचि प्रोथः अश्वघोणाधः, प्रियश्च युवा । प्रियं प्रोथमनुव्रजेत् । 'मिथृग् मेधाहिंसयोः' । मेथते मेथति । मिमेथे मिमेथ । मेथिता । अमिमेथत् अचि मेथः । गौरादित्वात् ङ्यां मेथी खीले गोबन्धदारु यत् । 'मेथीबद्धोऽपि च भ्राम्यन् घासग्रासं करोति गौः' । उणादौ किलिपिलि० (६०८) इति इः मेथिः खलमध्यस्थूणा । 'मेथृग् सङ्गमे च' । चकारात् हिंसामेधयोः । मेथते मेथति । मिमेथे मिमेथ । अचि मेथः । ङ्यां मेथी । अथ दान्ता षट् सेटश्च । 'चदेग् याचने' । चदते चदति । अचदीत् १ । 'ऊबुन्दृग् निशामने' । निशामनमालोचनम् । बुन्दते बुन्दति । बुबुन्दे । बुन्दिता । ऋदित्त्वादङि अबुदत् अबुन्दीत् । ऊदित्त्वात् क्त्वि वेट् बुत्त्वा बुन्दित्वा । वेट्त्वात् क्तयोर्नेट् बुन्नः बुन्नवान् । धान्तोऽयमिति नन्दी बुन्धति २ । अबुधत् अबुन्धीत् । बुद्ध्वा बुन्धित्वा । बुद्धः बुद्धवान् । अयं चेदृगित्येके २ । 'णिदृग् णेदृग् कुत्सासन्निकर्षयोः' । 'पाठे०' (२।३।९७) इति नत्वे नेदते नेदति । णोपदेशत्वात् 'अदुरुपसर्गे०' (२।३।७७) इति णत्वे प्राप्ते प्रणेदते प्रणेदति । णेदृग् नेदते नेदति ४ । 'मिदृग् मेदृग् मेधाहिंसयोः' । मेदते मेदति । मिमेदे मिमेद । मेदृग् मेदते २ । मिमेदे मिमेद । 'ञिमिदाच् स्नेहने' मेद्यति । 'मिदुण् स्नेहने' मिन्दयति ६ । अथ धान्ताश्चत्वारः सेटश्च । 'मेधृग् सङ्गमे च' चकारान्मेधाहिंसयोः । मेधते मेधति । मिमेधे मिमेध । 'क्तेट०' (५।३।१०६) इत्यः मेधा । घ्यणि मेध्यम् । 'कर्मणोऽण्' (५।१।७२) इत्यणि अश्वमेधः । 'अजातेः शीले' (५।१।१५४) इति णिनि गृहमेधी । उणादौ पदिपठि० (६०७) इति इः मेधिः १ । 'शृधूग् मृधूग् उन्दे' । उन्दं क्लेदनम् । शृधू तालव्यादिः । शर्धते शर्धति । अशृधत् अशर्धीत् । शशृधे शशर्ध । शर्धिता । ऊदित्त्वात् क्त्वि वेट् शृध्वा शर्धित्वा । वेट्त्वात् क्तयोर्नेट् शृद्धः शृद्धवान् । शृधूङ् इत्यस्य तु शर्धते । मृधूग् मर्धते मर्धति । ममृधे ममर्ध । मर्धिता । मृध्वा मर्धित्वा । मृद्धः मृद्धवान् । 'नाम्युपान्त्य०' (५।१।५४) इति के मृधं रणः । 'बुधृग् बोधने' । बोधते बोधति । बुबुधे बुबोध । बोधिता । अबुधत् अबोधीत् । आत्मनेपदे त्वङोऽसत्त्वे अबोधिष्ट । क्ते बुधितः । नायमृदिदित्येके । 'बुध अवगमने' ज्वलादिः । बोधति । 'वा ज्वलादि०' (५।१।६२) इति णे बोधः । 'नाम्युपान्त्य०' (५।१।५४) इति के बुधः । 'बुधिंच् ज्ञाने' बुध्यते । अविवक्षितकर्मत्वेन 'गत्यर्थ०' (५।१।११) इति कर्त्तरि क्ते बुधः । अथ नान्तास्त्रयः सेटश्च । खनूग् अवदारणे । खनते खनति । चखान चख्ने चख्नतुः । खनिता । क्त्वि वेट् खात्वा, अत्राः खनीत्वास्वम् । खनित्वा । 'ये नवा' (४।२।६२) इति वात्वे खायते खन्यते । यङि चाखायते चङ्खन्यते । यङ्लुपि चङ्खनीति चङ्खन्ति । वेट्त्वात् क्तयोर्नेट् खातः खातवान् । 'खेय०' (५।१।३८) इति क्ये निपातनात् खेयम् । 'नृत्खन्०' (५।१।६५) इत्यकटि खनकः खनकी । क्वचिदिति डे खन्यते खम् परिखाता परिखा । 'लूधूसूखनि०' (५।२।८७) इतीत्रे खनन्ति तेन खनित्रम् । खनो डडरेकेकवकथं (?) च आखायते आखन्यते वाऽनेनासिन्या आखः आखरः आखनिकः आखनिकवकः आखनः आखानः । १ । 'दानी अवखण्डने' २ 'शानी तेजने' ३ । आर्जवे निशाने चार्थे 'शान्दान्मान्वधान्निशानार्जवविचारवैरूप्ये दीर्घश्चेतः' (३।४।७) इति सनि 'सन्यङश्च' (४।१।३) इति द्वित्वे 'ह्रस्वः' (४।१।३९) इति पूर्वस्य ह्रस्वत्वे 'सन्यस्य' (४।१।५९) इति तस्य इत्वेऽनेन तस्य दीर्घत्वे च दीदांसते दीदांसति । शीशांसते शीशांसति । अर्थान्तरे तु सनोऽभावे प्रत्ययान्तराण्यपि । 'षप्'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

धातुं कण्ठतो निर्दिशति । 'शपीं आक्रोशे' इति पान्तोऽनिट् च । आक्रोशो विरुद्धानुध्यानम् । शपति शपते इत्यादि प्रक्रिया स्पष्टा । अनेकार्थत्वादयमुपलम्भनेऽपि तत्र चात्मनेपदमेव ॥ १७३ ॥ तत्र सूत्रम्

## शप उपलम्भने ॥ १७४ ॥ [ सि० ३।३।३५ ]

**उपलम्भनं प्रकाशनं शपथो वा तदर्थाच्छपतेरात्मनेपदमेव । मैत्राय शपते । अनुपलम्भने तु मैत्रं शपति ॥ १७४ ॥**

**'शप०'** मैत्राय शपते इति । मैत्रं कञ्चिदर्थं बोधयतीत्यर्थः । मैत्रमेवैवम्भूतोऽसाविल्यन्यस्मै प्रकाशयतीत्येके । अथवा स्वाभिप्रायस्य परत्राविष्करणमुपलम्भनं शपनं शपथ इति यावत् मैत्राय शपते इति । वाचामात्रादिशरीरस्पर्शनेन मैत्रं स्वाभिप्रायं बोधयतीत्यर्थः । सर्वत्र 'श्लाघह्नुस्थाशपा प्रयोज्ये' ( २।२।६० ) इति चतुर्थी । प्रोषितस्य भावाभावोपलब्धौ कस्यचिदर्थस्यासेवनं चोपलम्भनम् । मैत्राय शपते इति प्रोषिते मैत्रे तस्य भावेऽभावे चोपलब्धे सति तदनुरूपं किञ्चिदनुतिष्ठतीत्यर्थः । अस्मिन् पक्षे चतुर्थी दुरुपपादा, ज्ञाप्ये प्रयोज्येऽर्थे तस्याविधानात्[1] । उपलम्भन इति किम्? मैत्रं शपति आक्रोशतीत्यर्थः । यङि शाशप्यते । यङ्लुपि शाशपीति शाशप्ति । शप्ता शप्तुम् । 'शकितकि०' ( ५।१।२९ ) इति घ्यणपवादे ये शप्यः । घञि शापः उणादौ भृशीशपि० ( २२२ ) इत्यथे शपथः । शाशपि० ( २३७ ) इति दे शब्दः । शवल इति तु शमेर्वं च वा ( ४७० ) इत्यले शाम्यतेः । 'शपींच् आक्रोशे' शप्यते शप्यति ४ ।

**'यजीं देवपूजासङ्गतिकरणदानेषु'** । यजति ४ । अयाक्षीत् ५ ।

अथ यजादिगणं निरूपयति । ते च यजादयो नव । तत्र षडुभयपदिनस्त्रयश्च परस्मैपदिनस्तथा च वक्ष्यति 'श्विवद्वसः परस्मैपदिनः' इति । 'श्विवद्वर्जा अनिटश्चैते' । एते वर्णक्रमेण दर्श्यन्ते । सम्प्रदायानुरोधाच्च यजेः प्राग् निर्देशः । **यजीं** इति यजते यजतीत्यादि स्पष्टम् ॥ १७४ ॥ परोक्षायां सूत्रम्

## यजादिवशवचः सस्वरान्तस्था य्वृत् ॥ १७५ ॥ [ सि० ४।१।७२ ]

**यजादेर्वशवचोश्च परोक्षायां द्वित्वे पूर्वस्य सस्वरान्तस्था यथासङ्ख्यं इउऋरूपा य्वृत्स्यात् । ञ्णितीति वृद्धौ इयाज ५ ॥ १७५ ॥**

**'यजा०'** यजादेरिति । यजादीनां वशवचोश्चेति । 'वशक् कान्तौ' । 'वचंक परिभाषणे' इति द्वयोरदादिकयोरिति । इयाज इति परोक्षाणवि रूपम् ॥ १७५ ॥ अथ द्विवचनादौ कित्परोक्षायां सूत्रम्

## यजादिवचेः किति ॥ १७६ ॥ [ सि० ४।१।७९ ]

**यजादेर्वचेश्च सस्वरान्तस्था किति परे य्वृत् स्यात् । ततो द्वित्वे व्यञ्जनस्यानादेर्लुगिति जलुकि, दीर्घे च ईजतुः ईजुः । वित्परोक्षायाः कित्त्वाभावात् इयजिथ ५ । यजसृजेति षत्वे इयष्ठ ६ । इज्यात् ७ । यष्टा ८ । यक्ष्यति ९ । अयक्ष्यत् १० । यजते अयजत ४ । अयष्ट**

[1] अस्मिन् व्याख्याने मैत्रशब्दान्मतान्तरेणैव चतुर्थी प्रयोज्यलाभावान्मैत्रस्य ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अयक्षाताम् ५ । ईजे ईजिषे ६ । यक्षीष्ट ७ । 'वेंग् तन्तुसन्ताने' । वयति वयेत् वयतु अवयत् ४ । आत्सन्ध्यक्षरस्येत्यात्वे अवासीत् अवासिष्टाम् ५ ॥ १७६ ॥

**'यजादि०'** वचश्चेति । वचंक ब्रुगादेशो वा । ऊचतुः ऊचुः । 'वचण् भाषणे' इत्यस्य यौजादिकस्य तु न भवति वच्यते । यङि यायज्यते । यङ्लुपि यायजीति यायष्टि । अनुस्वारेत्त्वान्नेट् यष्टा यष्टुम् । 'यजेर्यज्ञाङ्गे' ( ४।१।११४ ) इति गत्वप्रतिषेधात् घञि प्रयाजः अनुयाजः, यज्ञाङ्गादन्यत्र यागः । ध्यणि गत्वप्रतिषेधात् याज्यम्, अत एव वचनात् घ्यणपि । 'शकितकि०' ( ५।१।२९ ) इति ये यज्यम् । णके याजकः । याजकादित्वात् षष्ठीसमासः नृपयाजकः । क्विपि 'यजसृज०' ( २।१।८७ ) इति षापवादे, ऋत्विग्दिगिति गे ऋतौ यजति ऋत्विक् 'करणाद्यजो भूते' ( ५।१।१५८ ) इति णिनि अग्निष्टोमयाजी । 'सुयज०' ( ५।१।१७२ ) इति ङ्वनिपि यज्वा । 'पूङ्यजः शानः' ( ५।२।२३ ) इति शानि यजमानः । 'यजिजपि०' ( ५।२।४७ ) इति यङन्तादूके यायजनशीलो यायजूकः । 'यजिस्वपि०' ( ५।३।८५ ) इति ने यज्ञः । आस्यटि० ( ५।३।९७ ) इति स्त्रियां भावे क्यपि इज्या । 'श्वादिभ्यः' ( ५।३।९२ ) इति क्तौ इज्यतेऽनया इष्टिः । उणादौ ब्रुज्ञा० ( ६४६ ) इति तौ यष्टिः । रुचर्चि० ( ९९७ ) इत्युसि यजुः अच्छन्दाः श्रुति ॥ अथ एदन्तास्त्रयः । वयति वयते इत्यादि स्फुटम् ॥ १७६ ॥ परोक्षायां सूत्रम्

## वेर्वय् ॥ १७७ ॥ [ सि० ४।४।१९ ]

वेगः परोक्षायां वय् वा स्यात् । उवाय । यजादिवचेः कितीति य्वृति द्वित्वे ऊय् इति भवति ॥ १७७ ॥

**'वे०'** उय् इति भवतीति । अत्र 'यजादिवचेः किति०' ( ४।१।७९ ) इति पुनर्द्वित्वे प्राप्ते ॥ १७७ ॥ सूत्रम् ।

## न वयो य् ॥ १७८ ॥ [ सि० ४।१।७३ ]

वेगो वयो यः परोक्षायां य्वृन्न स्यात् । ऊयतुः ऊयुः । यजादिवशवच इत्यादिना पूर्वस्य य्वृति उवयिथ । स्वरान्तत्वान्नित्यमिद् ऊयथुः ऊय । उवाय उवय । ऊयिव ऊयिम । वयादेशाभावे तु ॥ १७८ ॥

**'न व०'** वेगो वयो यकारः परोक्षायां य्वृन्न स्यादिति व्यक्तम् । वयादेशस्य वैकल्पिकत्वात् ॥ १७८ ॥ पक्षे सूत्रम्

## वेरयः ॥ १७९ ॥ [ सि० ४।१।७४ ]

वेगोऽयन्तस्य पूर्वस्य परस्य च परोक्षायां य्वृन्न स्यात् । ववौ ववतुः ववुः ॥ १७९ ॥

**'वे०'** स्पष्टम् । ववतुः ववुरिति ॥ १७९ ॥ अकृतवयादेशस्य वेगः परोक्षायां नित्यं य्वृन्निषेधे प्राप्ते सूत्रम्

## अविति वा ॥ १८० ॥ [ सि० ४।१।७५ ]

वेगोऽयकारान्तस्याविति परोक्षायां य्वृद्वा न स्यात् । द्वित्वे कृते परत्वाद्धातोरुवादेशे पश्चात् समानदीर्घः । ऊवतुः ऊवुः । ववाथ वविथ ६ । स्वरान्तत्वादिड्विकल्पः । ऊयात् ७ । वाता ८ ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वास्यति ९ । अवास्यत् १० । आत्मनेपदेऽपि वयते ४ । अवास्त ५ । परोक्षायां वयादेशे ऊये ऊयिषे पक्षे ववे वविषे ६ । वासीष्ट ७ । 'व्येंग् संवरणे' संव्ययति ४ । अव्यासीत् ५ ॥१८०॥**

'अवि०' परत्वादिति । वार्णात्प्राकृतं बलीय इति न्यायाद्धातोरुवादेशे पश्चात्समानदीर्घ इति । ऊवतुः ऊवुरिति । अत्र 'य्वृत्सकृत्' (४।१।१०२) इति सूत्रेण पश्चाद्वकारस्य न य्वृत् । तथाहि य्वृदित्यन्तस्थानामिकारोकारऋकाररूपापत्तानां शास्त्रेऽस्मिन् व्यवहारधातोर्य्वृत् सकृदेकवारमेव भवति । यावत्सम्भवस्तावद्विधिरिति पुनः प्राप्तमनेन निषिध्यते । यथा **'व्येंग् संवरणे'** इत्यस्य संवीयते इत्यत्र यकारस्य 'यजादिवचेः०' (४।१।७९) इति य्वृति पुनर्वकारस्य प्राप्तमनेन निषिध्यते । ववाथ वविथेति । अवित्परोक्षाभावान्न य्वृद्विकल्पः । किन्तु स्वरान्तत्वादिड्विकल्प एव । एवं ववथुः ऊवथुः । वव ऊव । वविव ऊविव । वविम ऊविम । आत्मनेपदे वयादेशे ऊये ऊयाते ऊयिरे । ऊयिषे ऊयाथे ऊयिध्वे ऊयिढ्वे । ऊये ऊयिवहे ऊयिमहे । पक्षे वयादेशाभावे य्वृद्विकल्पे ववे ऊवे, ववाते ऊवाते, वविरे ऊविरे । वविषे ऊविषे ववाथे ऊवाथे, वविढ्वे २ ऊविढ्वे २ । ववे उवे, वविवहे उविवहे, वविमहे उविमहे इति । अनिट्त्वात् वाता वातुम् वातव्यम् । णौ 'पाशाच्छा०' (४।२।२०) इति ये वाययति । 'ज्यश्च०' (४।१।७६) इति यपि य्वृन्निषेधे प्रवाय । 'य एचातः' (५।१।२८) इति ये प्रवेयः पटः । 'उपसर्गादातः' (५।३।११०) इति डे प्रवः । 'तन्व्यधी०' (५।१।६४) इति णे वायः । 'आतो ड०' इत्यत्र वावर्जनात्कर्मणोऽणि तन्तुवायः । मनि सुवामा वनि सुवावा । क्वनिपि 'यजादि०' (४।१।७९) इति य्वृति 'दीर्घमव०' (४।१।१०३) इत्यत्र वेगो वर्जनाद्दीर्घाभावे 'ह्रस्वस्य०' (४।४।११३) इति तागमे सुत्वा । क्विपि सुवाः । क्विपि सूत् । क्ते 'यजादी'ति य्वृति 'दीर्घमव०' इत्यत्र वेगो वर्जनाद्दीर्घाभावे उतः उतवान् । ऊयत इत्यत्र तु य्वृति 'दीर्घश्च्वि०' (४।३।१०८) इति दीर्घः । क्तौ उतिः । ऊतिरिति तु 'ऊयैङ् तन्तुसन्ताने' इत्यस्य क्तौ । उणादौ वेगो डित् (६२८) इतीचौ वीचिः । सात्मन्नात्मन्० (९१६) इति निपातनात् वेमा वेम तन्तुवायोपकरणम् । विरिति तु वेतेर्डौ (६१६) २ । **'व्येंग्** संवरणे' इति संवरणमाच्छादनम् । संव्ययतीत्यादि स्पष्टम् । परोक्षायां सूत्रम् **'व्यस्थवणवि'** (४।२।३) न आः इति । 'आत्सन्ध्यक्षरस्य' (४।२।१) इति सूत्रात् आ इत्यनुवर्त्तते, 'न शिति' (४।२।२) इति सूत्राच्च नेत्यनुवर्त्तते, ततोऽयमर्थः, व्ययतेस्थवि णवि च विषयभूते आकारो न भवति । अन्यत्र सर्वत्रात्वं भवतीति । केचित्तु परोक्षामात्रे आत्वप्रतिषेधमिच्छन्तो व्येगो य्वृद्विधिं विकल्पयन्ति । य्वृति संविव्यतुः । अन्यथा संविव्ययतुः । एवं संविव्युः संविव्ययुः इति सर्वत्रापि रूपद्वयसिद्धिः तेन त्वक्त्रैः संविव्ययुर्देहानिति सिद्धम् । तदपरे पाठभ्रम एवायमिति मन्यन्ते । त्वक्त्रैः संविव्युरङ्गानीति सम्यक्पाठः । एवं 'संविव्ययुर्वसनचारुचमूसमुत्थं पृथ्वीरजः करभकण्ठकडारमाशाः' इति **माघे** । अत्रापि 'संविव्युरम्बरविकासिचमूसमुत्थ'मिति सत्पाठ इति ॥ १८० ॥ अत्रोपयोगिसूत्रम्

## ज्याव्येव्यधिव्यचिव्यथेरिः ॥ १८१ ॥ [ सि० ४।१।७१ ]

**एषां पञ्चानां परोक्षायां द्वित्वे सति पूर्वस्य इः स्यात् । यजादिवशिति य्वृद्बाधनार्थमिकारस्यापि इः । नामिनोऽकलिहलेरिति वृद्धौ आयादेशे च विव्याय । यजादिवचेरिति य्वृति योऽनेकस्वरस्येति यत्वे च विव्यतुः विव्युः ॥ १८१ ॥**

**'ज्याव्ये०'** एषां पञ्चानामिति । ज्यांश् हानौ क्र्यादिः । **'व्येंग्** संवरणे' यजादिः । 'व्यधंच्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ताडने' दिवादिः । 'व्यचत् व्याजीकरणे' तुदादौ कुटादिः । 'व्यथिष् भयचलनयोः' घटादिः । क्रमेणोदाहरणानि व्या । जिव्यौ जिव्यिथ । प्रकृते संविव्याय । व्यध् विव्याध विव्यधिथ । व्यच् विव्याच विव्यचिथ अत्र 'कुटादेर्ङिद्वदञित्' ( ४।३।१७ ) इत्यनेनेथे ङित्त्वेऽपि 'व्यचोऽनसि' ( ४।१।८२ ) इति न य्वृत् । समासान्तागम इति न्यायात् कुटादिगणनिर्दिष्टस्य ङित्त्वस्यानित्यत्वात् । व्यथ विव्यथे । परोक्षायामित्येव वाव्यथ्यते ॥ १८१ ॥ थवि विशेषसूत्रम् ।

## ऋवृव्येऽद इट् ॥ १८२ ॥ [ सि० ४।४।८० ]

**एभ्यश्चतुर्भ्यः परस्य थवो नित्यमिट् स्यात् । विव्ययिथ । विव्याय विव्यय ६ । यजादिवचेः कितीति य्वृति वीयात् ७ । व्याता ८ । व्यास्यति ९ । अव्यास्यत् १० । व्ययते ४ । अव्यास्त ५ । विव्ये विव्यिषे ६ । व्यासीष्ट ७ । 'ह्वेंग् स्पर्धाशब्दयोः' । आह्वयति ४ ।**

'ऋवृ०' एभ्यश्चतुर्भ्य इति । 'ऋ प्रापणे' 'ऋंक् प्रापणे वा' । 'वृगृट् वरणे' वृग्श् वरणे वा' । 'व्येंग् संवरणे' । 'अदं प्सांक् भक्षणे' । क्रमेणोदाहरणानि । ऋ ऋ द्वित्वे 'ऋतोऽत्' ( ४।१।३८ ) पूर्वस्य अत्वे । 'अस्यादेः०' ( ४।१।६८ ) इति तस्य आत्वेऽनेन इडागमे आरिथ । वृग् ववरिथ । व्ये विव्ययिथ । अद् आदिथ । अर्त्तेः 'ऋतः' ( ४।४।७९ ) इति सूत्रेण वृगः 'स्कसृवृ'० ( ४।४।८१ ) इति सूत्रेण प्रतिषेधे प्राप्ते व्येऽदोस्तु 'सृजिदृशि०' ( ४।४।७८ ) इत्यादिना विकल्पे प्राप्ते वचनम् । संव्यायेत्यादौ परोक्षाश्रयत्वेन बहिरङ्गमित्वमन्तरङ्गे दीर्घेऽसिद्धमिति । 'भ्वादेः०' ( २।१।६३ ) इति पूर्वस्य दीर्घाभावः । यङि 'व्येस्यमोर्यङि' ( ४।१।८५ ) इति य्वृति संवेवीयते । यपि 'व्यः' ( ४।१।७७ ) इति य्वृन्निषेधे उपव्याय । 'सम्परेर्वा' ( ४।१।७८ ) संव्याय संवीय । परिव्याय परिवीय । क्ये वीयते । णौ 'पाशाच्छा०' ( ४।२।२० ) इति ये व्याययति । अनिट्त्वात् व्याता । 'य एचातः' ( ५।१।२८ ) इति व्येयम् । नीविरिति नयतेरौणादिके ङ्वौ ( ७०५ ) ३ । ह्वेंग् इति सर्वं सुगमम् ॥ १८२ ॥ अद्यतन्यां सूत्रम्

## ह्वालिप्सिचः ॥ १८३ ॥ [ सि० ३।४।६२ ]

**एभ्यस्त्रिभ्योऽद्यतन्यामङ् स्यात् । आह्वत् आह्वताम् आह्वन् ॥ १८३ ॥**

'ह्वा०' एभ्यस्त्रिभ्य इति । ह्वा इति प्रकृतोऽयम् । अन्यौ च द्वौ 'लिपींत् उपदेहे' 'षिचींत् क्षरणे' इति । ङित्त्वात् 'इडेत्पुसि चातो लुक्' ( ४।३।९४ ) इत्यातो लुकि आह्वत् इत्यादि व्यक्तम् ॥ १८३ ॥ परोक्षायां सूत्रम्

## द्वित्वे ह्वः ॥ १८४ ॥ [ सि० ४।१।८७ ]

**ह्वेगो द्वित्वविषये सस्वरान्तस्था य्वृत्स्यात् । ततो हुहु इति द्वित्वे आजुहाव । धातोरिवर्णोवर्णस्येत्युवादेशे आजुहुवतुः आजुहुवुः, आजुहोथ आजुहविथ, आजुहाव आजुहव ६ । आहूयात् ७ । आह्वाता ८ । आह्वास्यति ९ । आह्वास्यत् १० । आह्वयते ४ ॥ १८४ ॥**

'द्वित्वे०' आजुहावेत्यादि स्पष्टम् । यङि जोहूयते जोहवीति । सनि जुहूषति । **'णौ ङसनि'** ( ४।१।८८ ) ह्वयतेः सस्वरान्तस्था ङपरे सन्परे च णौ विषये य्वृद्भवति । 'भ्राजभ्रास०' ( ४।२।३६ ) इति वा ह्रस्वे पक्षे 'लघोर्दीर्घ०' ( ४।१।६४ ) इति दीर्घे 'णेरनिटि' ( ४।३।८३ ) इति णिग्लोपे ह्वाययन्तं प्रायुङ्क्त आजुहावत् आजुहवत् । ह्वाययितुमिच्छति जुहावयिषति । णाविति विषय- **३३**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सप्तमी किम् ? णिविषय एवान्तरङ्गमपि 'पाशाच्छासावेव्याह्वो यः' ( ४।२।२० ) इति यकारागमं बाधित्वा य्वृद् यथा स्यात् । ङसनीति किम् ? ह्वाययति । 'द्वित्वे ह्वः' ( ४।१।८७ ) इति । अनेन सिद्धे एतत्सूत्रकरणं णेरन्यस्मिन् निमित्तप्रत्ययव्यवधायके य्वृत् मा भूत् इत्येवमर्थम् । तेनेह न भवति । ह्वायकमिच्छति ह्वायकीयति ततः सन् ह्वायकीयितुमिच्छति जिह्वायकीयिषति ॥ १८४ ॥ आत्मनेपदे सूत्रम्—

## वात्मने ॥ १८५ ॥ [ सि० ३।४।६३ ]

**ह्वादिभ्यस्त्रिभ्योऽद्यतन्यामात्मनेपदेऽङ् वा स्यात् । आह्वत आह्वास्त, आह्वाताम् आह्वासाताम् ५ । आजुहुवे आजुहुविषे ६ । आह्वासीष्ट ७ ॥ १८५ ॥**

**'वात्म०'** स्पष्टम् ॥ १८५ ॥ अथास्यात्मनेपदं नियमयति । सूत्रम्

## ह्वः स्पर्धे ॥ १८६ ॥ [ सि० ३।३।५६ ]

**आङ्पूर्वात् ह्वयतेः स्पर्धे गम्ये आत्मनेपदमेव स्यात् । मल्लो मल्लमाह्वयते । अन्यत्र तु गामाह्वयति ॥ १८६ ॥**

**'ह्वः०'** स्पर्द्धः सङ्घर्षः पराभिभवेच्छा । स धात्वर्थस्य विशेषणम् । धात्वर्थश्च ह्वयतेराङ्पूर्वस्य शब्द एव स्वभावात् । मल्लो मल्लमाह्वयते इति । स्पर्द्धमान आकारयतीत्यर्थः । स्पर्द्ध इति किम् ? गामाह्वयति ॥ १८६ ॥ उपसर्गयोगे नियममाह सूत्रम्

## संनिवेः ॥ १८७ ॥ [ सि० ३।३।५७ ]

**एभ्योऽपि ह्वयतेरात्मनेपदमेव । 'डुवपीं बीजसन्ताने' वपति ४ । अवाप्सीत् ५ । द्वित्वे पूर्वस्य य्वृति, उवाप । य्वृति द्वित्वे, ऊपतुः ऊपुः । उवपिथ उवप्थ ऊपथुः ऊप । उवाप–उवप ६ । उप्यात् ७ । वप्ता ८ । वप्स्यति ९ । अवप्स्यत् १० । वपते ४ । अवप्त ५ । ऊपे ऊपिषे ६ । वप्सीष्ट ७ । 'वहीं प्रापणे' वहति ४ । अवाक्षीत् ५ । सहिवहेरोचावर्णस्येति अवोढाम् अवाक्षुः ५ । उवाह उवहिथ । इडभावपक्षे उवोढ ६ । उह्यात् ७ । वोढा ८ । वक्ष्यति ९ । अवक्ष्यत् १० । वहते ४ । अवोढ अवक्षाताम् अवक्षत ५ । ऊहे ऊहिषे ६ । वक्षीष्ट ७ ॥ १८७ ॥**

**'संनि०'** संह्वयते, निह्वयते, विह्वयते । **'उपात्'** ( ३।३।५८ ) उपपूर्वात् ह्वयतेः कर्त्तर्यात्मनेपदं स्यात् । उपह्वयते । योगविभाग उत्तरार्थः । 'उपसर्गादातः' ( ५।३।११० ) इति ङे आह्वः । 'तन्व्यधी०' ( ५।१।६४ ) इति णे ह्वायः । 'आतो डो०' ( ५।१।७६ ) इत्यत्र ह्वावर्जनात् कर्मणोऽणि स्वर्गह्वायः । 'ह्वः समाह्वयाह्वयौ द्यूतनाम्नोः' ( ५।३।४१ ) इति अलि निपातनात् समाह्वयः प्राणिद्यूतम् । आह्वयः संज्ञा । 'न्यभ्युपवेर्वाश्चोत्' ( ५।३।४२ ) इत्यल् वाकारश्च उकारो भवति । ह्वः अभिह्वः उपह्वः विह्वः । ह्वो ह्व इति ह्वानिपातनं किम् ? यङ्लुपि निपातनं मा भूत् । तेन निजोह्व इति सिद्धम् । 'आङो युद्धे' ( ५।३।४३ ) आह्वो युद्धम् । आह्वायोऽन्यः । 'आहावो निपानम्' ( ५।३।४४ ) आहूयन्ते पानाय गावो यत्रेति निपातनम् । 'भावेऽनुसर्गात्' ( ५।३।४५ ) ह्वः । कर्मणि घञि ह्वायः । उणादौ तीवरधीवर० ( ४४४ ) इति वरटि निपातनात् उपह्वरं सन्धिः रहश्च । रहश्छन्नमुपह्वरमिति वचनात् । **'डुवपीं बीजसन्ताने'** । बीजानां सन्तानः क्षेत्रे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विस्तारणम् । वपति इत्यादि स्पष्टम् । 'नेर्ङ्मादा०' ( २।३।७९ ) इति णत्वे प्रणिवपति प्रणिवपते इति । 'यजादिवचे०' ( ४।१।७९ ) इति य्वृति ऊपे । क्ये उप्यते । यङि वावप्यते । यङ्लुपि वावपीति वावप्ति । 'आसुयु०' ( ५।१।२० ) इति यापवादे घ्यणि वाप्यम् । अचि वपः । कर्मणोऽणि बीजवापः । अनिट्त्वात् उप्तः उप्तवान् । ड्वित्वात् उप्त्रिमम् । घञि वापः । भिदादित्वादङि वपा भेदः । उप्तिरन्या । उणादौ भापाचणि० ( २९६ ) इति पे वप्पः पिता । भीवृधि० ( ३८७ ) इति रे वप्रः केदारः । कमिवमि० ( ६१८ ) इति णिदिः वापिः । रुद्यर्त्ति० ( ९९७ ) इत्युसि वपुः ५ । वहीं इति । भारं वहति । देशान्तरं प्रापयतीति । सकर्मोप्ययं धातुरर्थान्तरे वर्त्तमानोऽकर्मा भवति । यथा नदी वहति स्रवतीत्यर्थः । 'नेर्ङ्मादा०' इति णत्वे प्रणिवहति । अवोढामिति, पूर्वं वृद्धौ एकदेशविकृतेति न्यायात् वहेरोत्वे रूपम् । अवाक्षुरिति अग्रे अवाक्षीः अवोढं अवोढ । अवाक्षम् अवाक्ष्व अवाक्ष्म । आत्मने अद्यतन्यां अवक्षतेति । अग्रे अवोढाः अवक्षाथाम् अवोढ्वम् । अत्र 'सोधि वा' ( ४।३।७९ ) इति वा सिज्लुकि 'हो धुट्०' ( २।१।८२ ) इति हो ढे, 'तवर्गस्य०' ( १।३।६० ) इति धो ढे, 'सहिवहेः०' ( १।३।४३ ) इति ढलुक् ओच । पक्षे सिज्लुगभावे हो ढ, इति ढे 'षढोः कः सि' ( २।१।६२ ) 'नाम्यन्तस्था०' ( २।३।१५ ) इति षे, 'तृतीयस्तृतीय०' ( १।३।४९ ) इति डे गे च, 'तवर्ग०' इति धो ढे च अवगूढ्वम् । अवक्षि अवक्ष्वहि अवक्ष्महि । उपसर्गयोगेऽस्य परस्मैपदं नियमयति ॥ १८७ ॥ सूत्रम्

## प्राद्वहः ॥ १८८ ॥ [ सि० ३।३।१०३ ]

परस्मैपदमेव । प्रवहति । ( परेश्च ) परिवहति । 'ट्वोश्वि गतिवृद्ध्योः' श्वयति अश्वयत् ४ । ट्धेश्वेर्वेति वैकल्पिके डे, द्विर्धातुरिति द्वित्वे संयोगादितीयादेशे अशिश्वियत् अशिश्वियताम् अशिश्वियन् । पक्षे ऋदिच्छ्वीत्यादिना वैकल्पिके ङि श्वत्यस्लवच इत्यादिना श्वादेशे च अश्वत् अश्वताम् अश्वन् । पक्षे सिजागमे इडागमे ईदागमे न श्वीति वृद्धिनिषेधे गुणेऽयादेशे सिज्लोपे अश्वयीत् अश्वयिष्टाम् अश्वयिषुः । अश्वयीः ५ ॥ १८८ ॥

'प्रा०' ( ३।३।१०३ ) स्पष्टम् । 'परेर्मृषश्च' ( ३।३।१०४ ) परिपूर्वान्मृषेर्वहेश्च कर्त्तरि परस्मैपदं भवति । परिमृष्यति परिवहति । धनं परिमृष्यते धनं परिवहते इत्यत्र परिर्मृषिवहिभ्यां सम्बध्यते । वहेर्नेच्छन्त्यन्ये । क्ये उह्यते । यङि वावह्यते । यङ्लुपि वावहीति वावोढि । अनिट्त्वात् वोढा । ऊढः ऊढवान् । घञि प्रवाहः । 'गोचरसंचर०' ( ५।३।१३१ ) इति निपातनाद् घञपवादे घे वहो वृषस्कन्धः । 'वह्यं करणे' ( ५।१।३४ ) इति निपातनाद्ये वह्यं शकटम् । वाह्यमन्यत् । ण्यन्तादचि वाहः । उदकस्य वाहः उदवाहः । अत्र 'नाम्युत्तरपदस्य च' ( ३।२।१०७ ) इति उदादेशः । 'कूलादुद्रुजोद्वहः' ( ५।१।१२२ ) इति खशि कूलमुद्वहः समुद्रः । णौ करणेऽनटि वाहनम् । प्रगतानि वाहनानि यस्य प्रवाहणः । अत्र 'पूर्वपदस्थान्नाम्न्यगः' ( २।३।६४ ) इति णत्वम् । अजा अस्मिन्नुह्यन्ते इति व्यञ्जनाद् घञि 'ङ्यापो बहुलं नाम्नि' ( २।४।९९ ) इति ह्रस्वे च अजवाहो नाम ग्रामः । 'कर्त्तुर्जीव०' ( ५।४।६९ ) इति णमि पुरुषवाहं वहति । उणादौ बन्धिवहि० ( ४५९ ) इति वहित्रं वाहनं वहनं च । वीयुसुवह्यगिभ्यो निः ( ६७७ ) वह्निः । वहेर्धू च ( ८३२ ) इत्यूः वधूः । ६ । ट्वोश्वीति ॥ १८८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## वा परोक्षा यङि ॥ १८९ ॥ [ सि० ४।१।९० ]

श्वेः सस्वरान्तस्था परोक्षायङोर्य्वृद्वा स्यात् । ततः शुशु इति द्वित्वे शुशाव शुशुवतुः शुशुवुः, शुशविथ पक्षे शिश्वाय शिश्वियतुः शिश्वियुः शिश्वयिथ ६ । यजादिवचेरिति य्वृति शूयात् शूयास्ताम् ७ । श्वयिता ८ । श्वयिष्यति ९ । अश्वयिष्यत् १० । 'वद व्यक्तायां वाचि' वदति ४ वदव्रजलृ इति वृद्धौ अवादीत् अवादिष्टाम् अवादिषुः । मैवं वादीः ५ । उवाद ऊदतुः ऊदुः उवदिथ ६ । उद्यात् ७ । वदिता ८ । 'वसं निवासे' वसति ४ ॥ १८९ ॥

परोक्षायां शिश्वयिथेति । अग्रे शुशुवथुः शिश्वियथुः शुशुव शिश्विय । शुशाव शुशव, शिश्वाय शिश्वय । शुशुविव शुशुविम, शिश्वियिव शिश्वियिम । शिश्वियथुः । शुशुय शिश्विय । शुशाव शुशव । शिश्वाय शिश्वय । शुशुविव शिश्वियिव । शुशुविम-शिश्वियिम । यङि शोशूयते शेश्वीयते । यङ्लुपि शोशवीति शोशोति, शिश्वयीति शेश्वेति । '**श्वेर्वा**' ( ४।१।८९ ) श्वयतेः सस्वरान्तस्था ङपरे सन् परे च णौ विषये य्वृद्वा भवति । अशूशवत् अशिश्वयत् । शुशावयिषति शिश्वाययिषति । विषयविज्ञानादन्तरङ्गमपि ( वृद्ध्यादिकं )[1] य्वृता बाध्यते । कृते च तस्मिन् वृद्धिस्ततः अवादेशं उपान्त्यह्रस्वत्वम् । ततो णि कृतस्य स्थानित्वात् शोर्द्वित्वं ततः पूर्वदीर्घ इति क्रमः । णावित्येव अशिश्वियत् शिश्वयिषति । 'य एश्चातः' ( ५।१।२८ ) इति ये श्वेयम् । ओदित्त्वात् 'सूयत्यादि०' ( ४।२।७० ) इति क्तयोस्तस्य नत्वे, 'डीयश्व्यै०' ( ४।४।६१ ) इतीडभावे च शूनः शूनवान् । द्वित्त्वादथुः श्वयथुः । स्त्रियां क्तौ शूतिः । क्त्वि श्वयित्वा । क्त्वेति कित्त्वाभावात् गुणः । उणादौ श्वन्मातरिश्वन्० ( ९०२ ) इत्यनि निपातनात् श्वा मातरिश्वा ७ । **वदेति** वदतीत्यादि स्फुटम् । उवदिथेति 'स्क्रसृ०' ( ४।४।८१ ) इति इट् । ननु स्क्रवृ० इत्यादिना वेट् । अस्य सेट्त्वात् 'दीप्तिज्ञान०' ( ३।३।७८ ) इत्यात्मनेपदे वदते विद्वान् स्याद्वादे वदन् दीप्यते इत्यर्थः । '**व्यक्तवाचां सहोक्तौ**' ( ३।३।७९ ) सम्प्रवदन्ते द्विजाः । '**विवादे वा**' ( ३।३।८० ) विप्रवदन्ते विप्रवदन्ति वा मौहूर्त्तिकाः । '**अनोः कर्मण्यसति**' ( ३।३।८१ ) अनुवदते कठः कलापस्य । '**वदोऽपात्**' ( ३।३।९७ ) इति फलवत्कर्त्तरि अपवदते । अन्यत्रापवदति । क्ये 'यजादिवचेः०' ( ४।१।७९ ) इति य्वृति उद्यते । णौ 'ईगितः' ( ३।३।९५ ) इति फलवत्कर्त्तरि आत्मनेपदे 'अणिगि प्राणी०' ( ३।३।१०७ ) इति परस्मैपदेनापोदिते परिमुहेति पुनर्विहिते वदति चैत्रः । वादयते चैत्रं मैत्रः । अत्र 'गतिबोध०' ( २।२।५ ) इत्यणिक्कर्तुः कर्मत्वम् । फलवतोऽन्यत्र परस्मैपदे वादयति चैत्रं मैत्रः । ङपरे णौ अवीवदत् । णिगन्ताण्णौ वदति वीणा तां परिवादकः प्रायुङ्क्त तमप्यन्यः, अवीवदद्वीणा परिवादकेन । यद्यप्यत्र णौ णेर्लोपोऽभूत्तथापि न समानलोपः । यतो णाविति जात्या एकवचनं ततश्च यः कश्चित् णिग् स सर्वोऽपि निमित्ततया विवक्षितोऽन्तः( ऽतः ? ) स लुप्तोऽपि निमित्तमेव । एवमपीपठदित्यादावपि सनि विवदिषति । सन् परे णौ विवादयिषति । यङि वावद्यते । यङ्लुपि वावदीति वावत्ति वावत्तः वावदति । सेट्त्वात् वदिता वदितुम् । 'ऋवर्ण०' ( ५।१।१७ ) इति घ्यणि वाद्यम् । 'वर्योपसर्य०' ( ५।१।३२ ) इति निपातनाद्ये अवद्यं गर्ह्यम् । अनूद्यमन्यत् । 'नाम्नो वदः क्यप् च' ( ५।१।३५ ) ब्रह्मोद्या । ये ब्रह्मवद्या । 'खेयमृषोद्ये' ( ५।१।३८ ) इति निपातनात् क्यपि मृषोद्यम् । अचि वदः । 'चराचर०' ( ४।१।१३ ) इति निपातनात्

---

१ ननु विधानसामर्थ्यादेव वृद्ध्यादिकं बाधित्वा य्वृद्भविष्यति किं विषयव्याख्यानेन । नैवम् । वृद्धौ कृतायामपि यस्यापि य्वृत्प्राप्नोति, अतो विधानं चरितार्थम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वदावदः । लिहाद्यचि श्लोकवदः । 'प्रियवशाद्वदः' ( ५।१।१०७ ) इति प्रियंवदः वशंवदः । 'सम्परिव्यनुप्राद्वदः' ( ५।२।५८ ) इति घिनणि संवदते इत्येवंशीलः संवादी । एवं परिवादी । 'वादेश्च णकः' ( ५।२।६७ ) इति णौ णके ( परिवादनशीलः ) परिवादकः । 'यजिजपि०' ( ५।२।४७ ) इति यङन्तादूके वावदूकः । घञि वादः । 'तेर्ग्रहादिभ्यः' ( ४।४।३३ ) इतीटि उदितिः । क्त्वि उदित्वा । 'गत्यर्थवदोच्छः' ( ३।१।८ ) इति गतित्वे गतिक्विति समासे क्त्वो यपि अच्छोद्य । उणादौ वदिसहिभ्यामान्यः ( ३८१ ) वदान्यः दाता प्रियवाक् च । वदन्य इति तु वदने साधु इति साधौ ये । भूगृवदिचरिभ्यो णित् ( ४६० ) इति णितीत्रे वादित्रं आतोद्यम् । कमिवमि० ( ६१८ ) इति णिदिः वादिः वाग्मी । मावावदि० ( ५६४ ) इति से वत्सः ८ । **वसमिति** । वसति । 'उपान्वध्याङ्वसः ( २।२।२१ ) इत्याधारस्य कर्मत्वे ग्राममुपवसति ४ । अन्वादिसाहचर्यात् वासार्थस्यैवोपस्य ग्रहणम् । तेन भोजननिवृत्त्यर्थे नोपेन योगे कर्मत्वं न भवति । यद्वा नात्र वसेरुपपूर्वस्य ग्राममाधारः, किन्तु वसेः । ग्रामे वसंस्त्रिरात्रमुपवसतीत्युपवस्याधारस्य त्रिरात्रस्य कर्मता स्यादेव ॥ १८९ ॥ अद्यतन्यां सूत्रम्

## सस्तः सि ॥ १९० ॥ [ सि० ४।३।९२ ]

**सन्तस्य धातोः सस्याशिति सादौ प्रत्यये विषयभूते तः स्यादिति सिजागमात्प्रागेव सस्य तः । अवात्सीत् अवात्ताम् अवात्सुः ५ । उवास ॥ १९० ॥**

**'सस्तः०'** सिजागमात्प्रागेवेति, सिजुत्पत्तेः प्रागेव सस्य तत्त्वे सिचो लुकि स्थानित्वेन वृद्धौ च अवात्तामिति सिद्ध्यति । 'धुड्ह्रस्व०' ( ४।३।७० ) इत्यत्र हि लुबधिकारे लुग्ग्रहणं सिजो लुक्यपि स्थानित्वेन तत्कार्यप्रतिपत्त्यर्थम् । तेनात्र वृद्धिः सिचोऽभावेऽपि सिद्धा । विषयसप्तमीव्याख्यानाभावे प्राक् सिजागमे तु लोपविधेर्बलीयस्त्वात् 'धुड्ह्रस्वात्०' ( ४।३।७० ) इति सिज्लोपे तकारो न स्यात् । न च सिचो लुचः स्थानित्वाद्भविष्यति किमनेन विषयसप्तमीव्याख्यानेनेति वाच्यम् । सकार उक्तस्तस्य वर्णविधित्वात् स्थानिवद्भावो न भवति । 'स्थानीवावर्णविधौ' ( ७।४।१०९ ) इति वचनात् अवात्सुरिति । अग्रे अवात्सीः अवात्तं अवात्त । अवात्सम् अवात्स्व अवात्स्म ॥ १९० ॥ कित्परोक्षायां 'यजादिवचेः०' ( ४।१।७९ ) इति य्वृति सूत्रम्

## घस्वसः ॥ १९१ ॥ [ सि० २।३।३६ ]

**नाम्यादेः परस्य घस्वसोः सः षः स्यात् । ऊषतुः ऊषुः । उवसिथ उवस्थ, उवास उवस ६ । उष्यात् ७ । वस्ता ८ । वत्स्यति ९ । श्विवद्वसः परस्मैपदिनः । 'डुयाचृग् याञ्चायाम्' । याचति ४ । अयाचीत् । पक्षे ऋदिच्छ्वीत्यङागमे अयाचत् । ययाच ६ । याच्यात् ७ । याचिता ८ । याचिष्यति ९ । अयाचिष्यत् १० । याचते ४ । अयाचिष्ट ५ । ययाचे ६ । याचिषीष्ट ७ । 'गुहौग् संवरणे' ॥ १९१ ॥**

**'घस्व०'** नाम्यादेरिति । नाम्यन्तस्थाकवर्गात्परस्य घसेर्वसश्च धातोः सम्बन्धिनः सकारस्य षः स्यादिति भावः । घसिरिह प्रकृत्यन्तरं आदेशस्य कृतत्वेनैव सिद्धत्वात् अकृतसकारार्थं वचनम् । शिड्नान्तरेऽपि बहूंषि नगराणि वसन्तीति क्विपि य्वृति उषः । बहव उषो वास्तव्या येषु तानि बहूंषि । नाम्यादेरित्येव । जघास । वसति यङि वावस्यते । यङ्लुपि वावसीति वावस्ति वावस्तः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वावसति । वावसित्वा । वावसितः वावसितवान् । अत्र गणनिर्देशात् 'यजादिवचेरिति' न य्वृत् । सनि विवत्सति । णौ 'ईङ्गितः' ( ३।३।९५ ) इत्यात्मनेपदे 'अणिगि प्राणी०'ति ( ३।३।१०७ ) परस्मैपदेनोपादिते, 'परिमुह०' ( ३।३।९४ ) इति फलवत्कर्त्तरि पुनर्विहिते वसति चैत्रः, वासयति चैत्रं मैत्रः । अत्र 'गतिबोधे०' त्यणिक्कर्तुः कर्मत्वम् । 'क्षुधवसस्तेषाम्' ( ४।४।४३ ) इतीटि उषितः उषितवान् । उषित्वा । अत्र 'क्षुधक्लिश०' ( ४।३।३१ ) इति क्त्वः कित्त्वाद्यजादीति य्वृत् । 'हृच्याव्यथ्य०' ( ५।१।६ ) इति कर्त्तरि निपातनात् ध्यणि वास्तव्यः । 'वाधारे०' ( ५।१।२१ ) इति ध्यणि वा निपातनात् अमावास्या अमावस्या । 'अजातेः शीले' ( ५।१।१५४ ) इति णिनि शयवासीति सप्तम्या वा अलुपि ग्रामेवासी ग्रामवासी । 'श्रुसद०' ( ५।२।१ ) इति भूते वा परोक्षा अनूवास । पक्षे अन्ववात्सीत् अन्ववसत् । तत्र क्वसुकानौ इति 'घसेकस्वर०' ( ४।४।८२ ) इतीटि अनूषितवान् गुरुं शिष्यः । 'सम्प्राद्वसात्' ( ५।२।६१ ) इति घिनणि संवसनशीलः संवासी । एवं सम्प्रवासी । उणादौ तॄजि० ( २२१ ) इत्यन्ते वसन्तः । उपसर्गाद्वसः ( २३३ ) इत्यथे आवसथः । भेषजादि ट्यणि आवसथ्यम् । प्याधा० ( २५८ ) इति ने वस्नं वस्नं मूल्यं च । ऋज्यजि० ( ३८८ ) इति किति रे उस्रे रश्मिः, बाहुलकात्षत्वाभावः । णौ ऋच्छिचटि० ( ३९७ ) इत्यरे वासरः । मीव्यजि० ( ४३९ ) इति सरे वत्सरः । कृशृकुटि० ( ६१९ ) इति वा णिदि वासिः क्यां वासी तक्षभाण्डम् । वसिः शय्या । पुञ्ञा० ( ६४६ ) इति तौ वस्तिः मेढ्रोर्ध्वं वस्त्रदशा गुदस्नेहनोपकरणं च इति धातुपारायणे । उणादिवृत्तौ तु बस्तिः मूत्राधारः चर्मपुटः स्नेहनोपकरणं च । खल्यमि० ( ६५३ ) इति तौ वसतिः । वस्यर्त्तिमातिः ( ६६२ ) वसातयो राष्ट्रम् । भृमृतॄ० ( ७१६ ) इत्यौ वसुर्द्रव्यम् । वसेर्णिद्वा ( ७७४ ) इति तुनि वस्तु पदार्थः । वास्तु गृहं गृहभूमिश्च । 'वसिक् आच्छादने' वस्ते । उणादौ दम्यमि० ( २०० ) इति ने वस्त्रः । 'वस्तिण् अर्दने' इत्यस्य वा अचि । 'वसण् स्नेहच्छेदावहरणेषु' वासयति ९ । इत्येवं नवको यजादिगणः समाप्तः ।

अथ यत्प्रागुक्तं याचृग् वक्ष्यते इति तमाह । 'डुयाचृग् याच्ञायाम्' इति । याचति याचते इत्यादि स्पष्टम् । क्ते याचितः । ऋदित्त्वात् ङे न ह्रस्वः । अययाचत् । ड्वित्वात् त्रिमक् याचित्रिमम् । ड्विदयमित्येके तन्मते अथौ याचथुः । क्ते सेट्त्वात् ध्यणि कत्वाभावे याच्यम् । 'मृगयेच्छा०' ( ५।३।१०१ ) इति निपातनात् ने याच्ञा । अथ यान्तौ सेटौ च । 'चायृग् पूजानिशामनयोः' । चायते चायति । चचाये चचाय । णौ ङे अचचायत् । चायिता । 'चायः कीः' ( ४।१।८६ ) यङि चेकीयते । 'अपाच्चायश्चिः क्तौ' ( ४।२।६६ ) अपचितिः । 'अपचितः' ( ४।४।७७ ) इति क्ते वा निपातनात् अपचितः अपचायितः । उणादौ चायेः केकॄ च ( ३६६ ) इत्यये केकयः राजा । चायः के च ( ७७८ ) इति तुनि केतुः । '**व्ययी** गतौ' व्ययते व्ययति । वव्यये वव्याय । 'व्यञ्जनादेः०' ( ४।३।४७ ) इति वा वृद्धेः 'न श्विजागृ०' ( ४।३।४९ ) इति निषेधात् अव्ययीत् । व्ययिता । णौ व्याययति । अचि व्ययः । 'व्ययण् वित्तसमुत्सर्गे' अदन्तः व्यययति । अथ लान्तः सेट् च '**अली** भूषणपर्याप्तिवारणेषु' । अलते अलति । आले आल । सनि अलिलिषते अलिलिषति । अचि अलम् । 'निषेधेऽलंखल्वो०' ( ५।४।४४ ) इति निर्देशान्मान्तत्वं निपात्यते, अव्ययश्चायम् । 'भूषादर०' ( ३।१।४ ) इति च्वौ अलङ्कृत्य कन्यामुपयच्छते । अत्र 'गतिक०' ( ३।१।४२ ) इति समासे 'क्त्वो यप्' । पर्याप्तौ अलं मल्लो मल्लाय । अत्र 'शक्तार्थ०' ( २।२।६८ ) इति चतुर्थी । वारणे अलं कृत्वा । अत्र 'निषेधऽलं०' इति क्त्वा । उणादौ निष्कतुरुष्क० ( २६ ) इति निपातनात् अलर्कः उन्मत्तः श्वा । दृकॄनृ० ( २७ ) इत्यके अलकं चूर्णकुन्तलः । अलका पुरी ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कीकलयलि० ( ३८ ) इतीके अलिकं ललाटम् । स्यमिकषि० ( ४६ ) इतीके अलीकं मिथ्या । अलीका पण्यस्त्री । व्यलीकमपराधः । व्यलीका लज्जा । कल्यलि० ( २४६ ) इतीन्दकि अलिन्दः द्वाराग्रस्थूणा । शल्यलेरुश्चातः ( ३१९ ) इति वे उल्वं कललम् । कुशूकुटि० ( ६१९ ) इति वा णिदिः आलिः सखी । अलिर्भ्रमरः । अलक्त इति त्वरक्तशब्दस्य लत्वे । परस्मैपदिनमेनमन्ये मन्यन्ते । अथ वान्तौ सेटौ च । 'धावूग् गतिशुद्ध्योः' । धावते धावति, दधावे दधाव, धाविता । ऊदित्त्वात् क्त्वि वेट् धौत्वा । अत्र 'अनुनासिके०' ( ४।१।१०८ ) इति वस्योटि 'ऊटा' ( १।२।१३ ) इत्यौत्वम्, पक्षे धावित्वा । वेट्त्वात् क्तयोर्नेट् धौतः धौतवान् पादौ । कथं धावितः धावितवान्? सत्यपि वेट्त्वे गतौ क्तयोरिट्प्रतिषेधस्यानित्यत्वात् । णके धावकः । मनि 'अनुनासिके च०' इत्यूटि सुधामा । वनि 'य्वोः०' ( ४।४।१२१ ) इति वस्य लुकि सुधावा । विचि सुधाः । क्विप्यूटि सुधौः । क्तौ धौतिः । क्तेऽनिट्त्वात् 'क्तेट०' ( ५।३।१०६ ) इत्यप्रत्ययो नास्ति । 'चीवृग्' झषीवत् । 'झषी आदानसंवरणयोर्वक्ष्यते । तद्वदयमप्यादानसंवरणयोरित्यर्थः । चीवते चीवति । चिचीवे चिचीव । चीविता । ऋदित्त्वात् ङपरे णौ अचिचीवत् । अनूदयमित्येके, तन्मते ङे ह्रस्वे अचीचिवत् । उणादौ जठर० ( ४०३ ) इति निपातनात् चीवरं मुनिवस्त्रम् । चिनोतेर्वा वरटि दीर्घे च ( ४४३ ) । 'दाशृग् दाने' दाशते दाशति । ददाशे ददाश । दाशिता । ङे अददाशत् । 'दाश्वत्साह्वन्मीढ्वत्' ( ४।१।१५ ) इति सूत्रेण क्वसुप्रत्यये निपातनात् फलवत्कर्त्तर्यपि क्वसौ द्वित्वेटोरभावे दाश्वान् दाश्वांसौ । दाशुषी । एवं 'सहि परिमर्षणे' इत्यस्य परस्मैपदमुपान्त्यदीर्घत्व-मनिट्त्वं च निपात्यते । साह्वान् साह्वांसौ । 'मिहं सेचने' इत्यस्याद्वित्वमनिट्त्वमुपान्त्यदीर्घत्वं ढत्वं च निपात्यते मीढ्वान् मीढ्वांसौ इति । दाशतेऽस्मै दाशः । पुरो दाशते पुरोडाशः, दुःखेन दाश्यते दूडाशः पृषोदरादित्वात्साधू । अथ पान्ता नव त्विषीवर्जाः सेटश्च । 'झषी आदानसंवरणयोः' । झषते झषति । जझषे जझाष । झषिता । क्ते झषितम् । अचि झषः । 'झष हिंसायाम्' झषति । 'भेषृग् भये' । भेषते भेषति । अभेषत् । बिभेषे बिभेष भेषिता । ऋदित्त्वात् ङे न ह्रस्वः अबिभेषत् णौ भेषयति । 'भ्रेषृग् चलने च' चकाराद्भये । भ्रेषते भ्रेषति । बिभ्रेषे बिभ्रेष । भ्रेषिता । अबिभ्रेषत् । णौ भ्रेषयति । घञि भ्रेषः । भ्रेषो भ्रंशो यथोचितादिति कोषः । 'पषी बाधनस्पर्शनयोः' । स्पर्शनं ग्रन्थनम् । पषते पषति । पेषे पपाष । पषिता । क्ते पषितम् । घञि पाषः । उणादौ पषो णित् ( १९२ ) इत्याणे पाषाणः । पाषाणः प्रस्तरो दृषदिति कोषः । अयं स्पशीत्येके । स्पशते स्पशति । अचि स्पशः । वार्त्तायनः स्पशश्चार इति कोषः । 'पषण् बन्धने' पाषयति । पषण् अनुपसर्गोऽदन्तः पषयति । 'लषी कान्तौ' । कान्तिरिच्छा । 'भ्राजभास०' ( ४।२।३६ ) इति वा श्ये अभिलष्यते अभिलष्यति, अभिलषते अभिलषति । लेषे ललाष । लषिता । 'लषपतपदः' ( ५।२।४१ ) इत्युकणि अभिलाषुकः । 'भूषाक्रोधार्थ०' ( ५।२।४२ ) इत्यने अभिलषणः । 'व्यपाभेर्लषः' ( ५।२।६२ ) इति घिनणि विलाषी अपलाषी अभिलाषी । घञि अभिलाषः । उणादौ लषेः शु च ( २८९ ) इत्युने लशुनं कन्दविशेषः । 'चषी भक्षणे' । चषते चषति । चेषे चचाष । चषिता । क्ते चषितम् । घञि चाषः । उणादौ दृकृनृ० ( २७ ) इत्यके चषकं सरकः । ऋकमृ० ( ४७५ ) इत्याले चषालः यूप-वलयः । 'चष हिंसायाम्' चषति । 'छषी हिंसायाम्' । छषते छषति । चच्छषे चच्छाष । छषिता छषितुम् । 'त्विषीं दीप्तौ' । त्वेषते त्वेषति । 'दृशिट०' ( ३।४।५५ ) इति सकि अत्विक्षत् तित्विषे तित्वेष । अनिट्त्वात् त्वेष्टा त्वेष्टुम् । 'क्रुत्सम्पदा०' ( ५।३।११४ ) इति क्विपि त्विट् । त्वग्भ्रक्षत्तृ०



Jain Education International For Personal & Private Use Only www.jainelibrary.org

( ८६५ ) इति तृप्रत्यये निपातनात् त्वष्टा अर्कः । अवपूर्वौ दाननिरसनयोश्चेत्येके । निरसनमपाकरणम् , चकारादीप्तौ । अवत्वेषते अवत्वेषति ददाति निरस्यति दीप्यते चेत्यर्थः । **'अषी असी** गत्यादानयोश्च' । चकाराद्दीप्तौ, । अषते अषति । आषे आष । अषित्वा । अथ सान्तौ सेटौ च । **असी** । असति असते । आसे आस । आसेत्यसतेरिति **वामनः** । असिता । 'असक् भुवि' अस्ति । 'असूच् क्षेपणे' अस्यति । **'दासृग्** दाने' दासति दासते । ददासे ददास । दासिता । क्ते दासितम् । अचि दासः । गौरादित्वात् ङ्यां दासी । ग्रहादित्वाण्णिनि उदासी । घञि उदासः । 'णौ दान्त०' ( ४।४।७४ ) इति क्ते वा निपातनात् दस्तः दासितः । ह्यान्तौ सेटौ च । **'माहृग्** माने' ( मानं वर्तनम् ) माहते माहति । अमाहत् । ममाहे ममाह । माहिता । ङे अममाहत् । अचि माहः । स्त्रियां माहा गौः । माहा सुरभिरर्जुनीति **कोषः** । **गुहृ**धातुं कण्ठतो निर्दिशति ॥ १९१ ॥ **'गुहौग्'** इति । शवि सूत्रम्—

## गोहः स्वरे ॥ १९२ ॥ [ सि० ४।२।४२ ]

**कृतगुण(स्य)गुहेः स्वरादावुपान्त्यस्य ऊत्स्यात् । गूहति १ । गूहेत् २ । गूहतु ३ । अगूहत् ४ । अगूहीत् । इडभावे हशिट इति सकि अघुक्षत् अगूहिष्टाम्–अघुक्षाताम् अगूहिषुः–अघुक्षन् ५ । जुगूह जुगुहतुः जुगुहुः । जुगूहिथ–जुगोढ जुगुहथुः जुगुह ६ । गुह्यात् ७ । गूहिता–गोढा ८ । गूहिष्यति–घोक्ष्यति ९ । अगूहिष्यत्–अघोक्ष्यत् १० । गूहते ४ । अगूहिष्ट इडभावे सक् ॥ १९२ ॥**

'गोहः०' स्वरादाविति । प्रत्यये इति शेषः । गूहतीति । एवं गूहयति । साधुगूही गूहं २ । जुगूह । गोहः इति किम् ? निजुगुहतुः जुगुहुः । स्वर इति किम् ? निगोढा निगोढुम् । इडभावे इति 'धुगौदितः' ( ४।४।३८ ) इति इट् विकल्पात् अघुक्षत इति । अत्र 'हो धुट्' इति ढः । 'षढोः०' इति किः । 'गडदबा०' इति घः । 'नाम्यन्तस्था०' ( २।३।१५ ) इति षः । अत्र ढस्थानस्य कस्याऽसत्त्वात् चतुर्थान्तलक्षणो घो भवति । आत्मनेपदे अद्यतन्यास्ते अगूहिष्टेति रूपम् । पक्षे इडभावे 'हशिट०' ( ३।४।५५ ) इति सक् ॥ १९२ ॥ तत्र सूत्रम्

## दुहदिहलिहगुहो दन्त्यात्मने वा सकः ॥ १९३ ॥ [ सि० ४।३।७४ ]

**एभ्यश्चतुर्भ्यः परस्य सको दन्त्यादावात्मनेपदे लुग् वा स्यात् । ढस्तड्ढ इति ढलोपे उकारस्य दीर्घे च अगूढ । पक्षे अघुक्षत अगूहिषाताम् ॥ १९३ ॥**

**'दुह०'** एभ्यश्चतुर्भ्य इति । 'दुहींक् क्षरणे' 'दिहींक् उपलेपे' 'लिहींक् आस्वादने' 'गुह' इत्ययं प्रकृतः । दन्त्यादौ इति तकारादौ थकारादौ वकारादौ आत्मनेपदे इत्यर्थः । वो दन्त्योष्ठ इति वचनात् वकारोऽपि दन्त्य एव । ततः अगूढेति रूपम् । पक्षे–सको लुगभावे इत्यर्थः अघुक्षतेति रूपम् । अगूहिषातामिति ॥ १९३ ॥ अत्र सूत्रम्

## स्वरेऽतः ॥ १९४ ॥ [ सि० ४।३।७५ ]

**सकोऽस्य स्वरादौ प्रत्यये लुक् स्यात् । अघुक्षाताम् । अगूहिषत–अघुक्षन्त । अगूहिष्ठाः–अगूढाः–अघुक्षथाः । अगूहिष्वहि–अगुह्वहि–अघुक्षावहि ५ । जुगुहे ६ । गूहिषीष्ट–घुक्षीष्ट ७ । 'भजीं सेवायाम्' । भजति ४ । अभाक्षीत् ५ । बभाज ६ । भज्यात् ७ । भक्ता ८ । भक्ष्यति**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**९। अभक्ष्यत् ॥ १०। भजते ४। अभक्त ५। भेजे भेजाते ६। भक्षीष्ट ७। 'राजृग् टुभ्राजि-दीप्तौ'। राजति ४ ऋदिच्छ्वीत्यादिनाङि अराजत्। पक्षे सिचि अराजीत् अराजताम्-अराजिष्टाम् ५। रराज ॥ १९४ ॥**

'स्वरे०' स्पष्टम्। एवं इड्विकल्पे रूपद्वयम्। अगूहिषातां-अघुक्षातामिति। अगूहिषतेति 'अनतोऽन्तोदात्मने' (४।२।११४) इति अन्तोऽदादेशे रूपम्। अघुक्षन्तेति स्वरस्य पर इति प्राचः परस्मिन्नपि विधौ कर्त्तव्ये स्वरादेशस्य स्थानिवत्त्वमिष्यते, तेनात्राकुलः परस्मिन्नन्तोऽदादेशे स्थानित्वादनतोऽन्तोऽदादेशो न भवति। अघुक्षथा इति। अग्रे अघुक्षाथां अगूहिषाथां अधुक्षध्वं अगूढ्वं अगूहि ३ ध्वं ढ्वं ढ्वम्। अघुक्षि अगूहिषि अघुक्षावहीति अग्रे-अघुक्षामहि-अगूहिष्महि। **'ग्रहगुहश्च सनः'** (४।४।५९) ग्रहिगुहीभ्यामुवर्णान्ताच्च धातोर्विहितस्य सन आदिरिड् न भवति। इतीड्निषेधे 'उपान्त्ये' (४।३।३४) इति सनः किंत्वे जुघुक्षति। यङि जोगुह्यते। यङ्लुपि जोगुहीति जोगोढि जोगूढः जोगुहति। जोगुहीषि जोघोक्षि। अजोगुहीत्। पदान्ते गो घत्वे अजोघोट्-ड् अजोगूढां अजोगुहुः। अजोगुहीः अजोघोट्-ड् अजोगूढं अजोगूढ। अजोगुहं अजोगुह्व अजोगुह्म। णौ गूहयति। ङपरे णौ अजूगुहत्। ह्रस्वाभावमते अजुगूहत्। 'वेटोऽपतः' (४।४।६२) इतीड्निषेधे गूढः गूढवान्। गूढ्वा गूहित्वा। गोहिता गोढा। गोढुं गूहितुम्। गूहनीयम्। 'कृवृषि०' (५।१।४२) इति वा क्यपि गुह्यम्। पक्षे घ्यणि गोह्यम्। गूहनीयम्। 'नाम्युपान्त्य०' (५।१।५४) इति के गुहः। गिर्योषध्योर्भिदादित्वादङि गुहा। अन्यत्र क्तौ गूढिः। उणादौ विदनगगन० (२७५) इति निपातनात् गहनम्। तीवरधीवर० (४४४) इति वरटि निपातनात् गह्वरम्। अथ क्षान्तः सेट् च। **'भ्लक्षी** भक्षणे'। भ्लक्षते भ्लक्षति। बभ्लक्षे बभ्लक्ष। भ्लक्षिता। क्ते भ्लक्षितम्। घञि भ्लक्षः। **अयं** 'भक्षी'त्यन्ये। भक्षते भक्षति। बभक्षे बभक्ष। भक्षितुम्। के भक्षितम्।

अथ प्राग् यदुक्तम्। 'जान्ताश्चत्वारो वक्ष्यन्ते' इति तानाह। **'भजीं** भजति भजते। अभाक्षीत् इति। अग्रे अभाक्तां अभाक्षुः। अभाक्षीः अभाक्तं अभाक्त। अभाक्षं अभाक्ष्व अभाक्ष्म। परोक्षायां बभाजेति। अग्रे 'तृत्रपफलभजाम्' (४।१।२५) इत्येत्वे भेजतुः भेजुः। भेजिथ बभक्थ भेजथुः भेज। बभाज बभज भेजिव भेजिमेति। आत्मनेपदे अभक्तेति। अग्रे अभक्षातां अभक्षत। अभक्थाः अभक्षाथां अभग्ध्वम्। अभक्षि अभक्ष्वहि अभक्ष्महि। आत्मनेपदे परोक्षायां भेजे इत्यादि व्यक्तम्। सनि बिभक्षति बिभक्षते। यङि बाभज्यते यङ्लुपि बाभजीति बाभक्ति। ङपरे णौ अबीभजत्। अनिट्त्वात् भक्ता भक्तुम्। 'श्लिष०' (५।१।९) इति वा कर्त्तरि क्ते विभक्ता भ्रातरो रिक्थम् पक्षे कर्मणि क्ते विभक्तं धनं तैः। 'शकि०' (५।१।२९) इति ये भज्यम्। बहुलमिति घ्यणि भाग्यम्। 'भजो विण्' (५।१।१४६) अर्द्धभाक्। 'युजभुज०' (५।२।५०) इति घिनणि भजनशीलो भागी। घञि भागः। 'गोचरे'ति निपातनात् करणाधारयोर्घञपवादे भगः। क्तौ भक्तिः। **राजृग्** इति। राजतीत्यादि स्पष्टम् ॥ १९४ ॥ अविरपरोक्षायां सूत्रम्

## जॄभ्रमवमत्रसफणस्यमस्वनराजभ्राजभ्रासभ्लासो वा

## ॥ १९५ ॥ [ सि० ४।१।२६ ]

**एषामेकादशानां स्वरस्यावित्परोक्षासेट्थवोरेर्वा स्यात् न च द्विः। रेजतुः रराजतुः रेजुः-रराजुः। रेजिथ-रराजिथ ६। राज्यात् ७। राजिता ८। राजिष्यति ९। अराजिष्यत् १० ॥** ३४

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**राजते ४ । अराजिष्ट ५ । रेजे रराजे, रेजाते रराजाते, रेजिरे रराजिरे ६ । राजिषीष्ट ७ । एवं भ्राजिरपि । 'रञ्जीं रागे' ॥ १९५ ॥**

'**जॄभ्र०**' एषामेकादशानामिति । '**जॄष झॄष** च जरसि' १ 'भ्रमूच् अनवस्थाने ।' 'भ्रमू चलने' ज्वलादिर्वा २ । 'टुवमूद्गिरणे' ३ । 'त्रसैच् भये' ४ । 'फण कण रण गतौ' घटादिः ५ । 'स्यमू शब्दे' ६ । 'स्तन धन ध्वन चन स्वन वन शब्दे' एषु षट्सु पञ्चमः स्वन इति ७ । राजृग् टुभ्राजिश्र्' इमौ प्रकृतौ । 'भासिं टुभ्रासि टुभ्लासृङ् दीप्तौ ।' भ्रासभ्लासौ ११ । क्रमेणोदाहरणानि । जेरतुः जजरतुः । जेरिथ जजरिथ । भ्रेमतुः बभ्रमतुः । भ्रेमिथ बभ्रमिथ । वेमतुः ववमतुः । वेमिथ ववमिथ । 'उद्वेमुस्तत्र रुधिरं रथिनोऽन्योन्यवीक्षिताः' । वमेर्नेच्छन्त्यन्ये । त्रेसतुः तत्रसतुः । त्रेसिथ तत्रसिथ । फेणतुः पफणतुः फेणिथ पफणिथ । स्येमतुः सस्यमतुः । स्येमिथ सस्यमिथ । स्वेनतुः सस्वनतुः । स्वेनिथ सस्वनिथ । रेजतुः रराजतुः । रेजिथ रराजिथ । भ्रेजे बभ्राजे । भ्रेसे बभ्रासे । भ्लेसे बभ्लासे । अविदिरेव । अहं जजर । एषु जॄधातोर्गुणित्वेन 'न शस०' (४।१।३०) इति निषेधे प्राप्ते भ्रमत्रसस्यमस्वनानामनेकव्यञ्जनमध्यत्वेन फणस्यादेशादित्वेन राजादीनां चतुर्णामकाराभावेनाप्राप्ते वमस्यानादेशादित्वान्नित्यं प्राप्ते इयमेकादशानामेत्वविभाषा ॥ 卐 आत्मनेपदे रेजे रेजाते इत्यादि स्पष्टम् । ङपरे णौ अरराजत् । क्विपि सम्राट् विराट् । उणादौ शीभी० (७१) इत्यानके राजानकः । धाग्राजि० (३७९) इत्यन्ये राजन्यः । त्रटि (४४६) राष्ट्रम् । उक्षितक्षि० (९००) इत्यनि राजा । एवं **भ्राजिरपीति** । इदित्त्वादात्मनेपदम् । भ्राजते इत्यादि । 'जॄभ्रम०' इत्येत्वे भ्रेजे बभ्राजे इति । भ्राजिता । णौ ङे 'भ्राजभास०' (४।२।३६) इति वा ह्रस्वे अबिभ्रजत् अबभ्राजत् । ङित्त्वादथुः भ्राजथुः । ङित्त्वमेके नेच्छन्ति । भ्राजेरात्मनेपदिनोऽपि पुनरिह पाठो राजृसाहचर्यप्रदर्शनार्थः । तेन 'यजसृज०' (२।१।८७) इत्यत्रास्यैव ग्रहणात्षत्वे यङ्लुपि बाभ्राष्टि । पूर्वस्य तु धातोर्गत्वे बाभ्राक्ति । ङित्वायं तेनास्य भ्राजथुः, पूर्वस्य तु भ्राज इति रूपम् । एतच्च प्रागप्युक्तम् । यद्येवं षत्वमेव विकल्प्यतां किं पुनः पाठेन ? सत्यम् । अस्यात्मनेपदाव्यभिचारोपदर्शनद्वारान्येषां यथादर्शनमात्मनेपदानित्यत्वज्ञापनार्थः पुनः पाठः । तेन लभते लभति । सेवते सेवति । श्रोतारमुपलभति न प्रशंसितारम् । 'स्वाधीने विभवेऽप्यहो नरपतिं सेवन्ति किं मानिनः' । इत्यादयः प्रयोगाः साधव इति । '**रञ्जीं**' इति ॥ १९५ ॥ शवि सूत्रम्

## अकट्घिनोश्च रञ्जेः ॥ १९६ ॥ [ सि० ४।२।५० ]

**रञ्जेरकटि घिनणि शवि चोपान्त्यनो लुक् स्यात् । रजति । अरजत् ४ । अराङ्क्षीत् अराङ्क्ताम् अराङ्क्षुः ५ । ररञ्ज ररञ्जतुः ६ । रज्यात् ७ । रङ्क्ता ८ । रङ्क्ष्यति ९ । अरङ्क्ष्यत् १० । रजते ४ । अरङ्क्त अरङ्क्षातां अरङ्क्षत ५ । ररञ्जे ६ । रङ्क्षीष्ट ७ । रङ्क्ता ८ । रङ्क्ष्यते ९ । अरङ्क्ष्यत १० ॥ १९६ ॥**

इति महोपाध्यायश्रीकीर्त्तिविजयगणिशिष्योपाध्यायश्रीविनयविजयगणिविरचितायां हैमलघुप्रक्रियायां भ्वादयः समाप्ताः ।

'**अक०**' अकटीति । 'नृत्खन्रञ्जः शिल्पिन्यकट्' (५।१।६५) अस्मिन् परे नलोपे रजक इति । घिनणीति 'युजभुज०' (५।२।५०) इति घिनणि रञ्जनशीलो रागी । प्रकृते च शवि नलुकि रजत इत्यादि स्पष्टम् । अराङ्क्षीदिति 'व्यञ्जनानामनिटि' (४।३।४५) इति सूत्रे बहुवचनं जात्यर्थम्, तेनानेकव्यञ्जनव्यवधानेऽपि परस्मैपदेऽनिटि सिचि परे समानस्य वृद्धिर्भवति । यथा असा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ङ्ऽक्षीत् अभाङ्क्षीत् अताक्षीत् अत्वाक्षीदित्यादि । अराङ्क्षुरिति अग्रे अराङ्क्षीः अराङ्क्तम् अराङ्क्त । अराङ्क्षम् अराङ्क्ष्व अराङ्क्ष्म । ररञ्जतुरिति संयोगान्तत्वादवित्परोक्षाया अपि 'इन्ध्यसंयोगात्०' ( ४।३।२१ ) इति किस्वाभावे नलोपाभावात् अग्रे ररञ्जुः । ररञ्जिथ ररङ्क्थ ररञ्जथुः ररञ्ज । ररञ्ज ररञ्जिव ररञ्जिम । रज्यादिति किस्त्वान्नलोपः । **'कुषिरञ्जेर्व्याप्ये वा परस्मै च'** ( ३।४।७४ ) कर्मकर्त्तरि शिद्विषये वा परस्मैपदम्, तद्योगे श्यश्च । रजति रजकः । रज्यति रज्यते वा वस्त्रं स्वयमेव । विरज्यति विरज्यते भव्यो भोगेभ्यः स्वयमेव । शितोऽन्यत्र तु अरञ्जि । रङ्क्षीष्ट । रंक्ष्यते वा वस्त्रं स्वयमेव । सनि रिरङ्क्षति रिरङ्क्षते । यङि रारज्यते । यङ्लुपि रारञ्जीति रारङ्क्तः रारञ्जति । 'णौ मृगरमणे' ( ४।२।५१ ) इति नलुकि, 'कगेवनूजनैजृष्क्नसञ्जः' ( ४।२।२५ ) इति ह्रस्वे रजयति मृगं व्याधः । ङे अरीरजत् । ञिपरे तु वा दीर्घः । अराजि अरजि । मृगरमणादन्यत्र नलोपाभावे रञ्जयति नटः सभाम् । रञ्जयति रजको वस्त्रम् । किस्त्वान्नलुकि एत्वे च क्वसुकानौः रेजिवान् रेजानः । 'जनशो०' ( ४।३।२३ ) इति वा किस्त्वे रक्त्वा रङ्क्त्वा । अनिट्त्वात् रङ्क्ता रङ्क्तुम् । केचित्तु मृगरमणादन्यत्रापि नलुकमिच्छन्ति । राजर्षिकल्पो रजयति मनुष्यान् । 'घञि भावकरणे' ( ४।२।५२ ) इति न लुकि रञ्जनं रागः । 'व्यञ्जनाद् घञ्' (५।३।१३२) इति करणे घञि रागः । आधारे घञि रङ्गः नृत्तस्थानम् । ऋवर्णेति घ्यणि रङ्ग्यः । उणादौ पृषिरञ्जि० ( २०८ ) इति कित्यते रजतम् । तुदादिवृजि० ( २७३ ) इति कित्यने रजनं हरिद्रा महारजनं कुसुम्भम् । गौरादित्वात् ङ्यां रजनी । रञ्जेः कित् ( ६८१ ) इत्यनौ रजनिः रात्रिः । मिथिरञ्ज्युषि० ( ९७१ ) इति कित्यसि रजः । 'रञ्जींच् रागे' इत्यस्य तु रज्यति रज्यते । इत्युभयपदिनः ।

'चतुः पञ्चाशदुभयपदिनः परिकीर्त्तिताः । यजादयो नवेत्येवं त्रिषष्टिः सर्वसङ्ख्यया' ॥ १ ॥

'एवं भ्वादिगणे सर्वसङ्ख्यया धातवः स्फुटम् । अष्टपञ्चाशदधिकं सहस्रं परिकीर्त्तिताः' ॥ २ ॥ १९६ ॥

"यां शिष्योद्धुतकीर्त्तिकीर्त्तिविजयश्रीवाचकाहर्म्मणे
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः ।
तस्यां शासितसाधुशब्दसरणौ, स्वोपज्ञसत्प्रक्रियावृत्तौ
भ्वादय इत्यमी निगदिताः, स्पष्टं त्रिधा धातवः" ॥ १ ॥



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# अथ अदादयः

श्रीगुरवे नमः ।

**'अदं प्सांक् भक्षणे' । कर्त्तर्यनद्भ्य इत्यत्रादादिवर्जनादेषां शवभावः । अत्ति अत्तः अदन्ति । अद्यात् । अत्तु-अत्तात् ।**

अथादादीन् धातून् निरूपयितुकाम आह । 'अदं प्सांक् भक्षणे' इति । इहाविकरणेषु वर्णक्रमेण धातुषु पठितव्येषु पूर्वाचार्यप्रसिद्ध्यनुसारेण अदेरादावुपन्यासः । कित्करणमदादिज्ञापनार्थं सर्वत्र ज्ञेयम् । अत्तीत्यादि प्रक्रिया सर्वापि स्पष्टा । पञ्चम्या हौ सूत्रम्

## हुधुटो हेर्धिः ॥ १ ॥ [ सि० ४।२।८३ ]

**होधुर्डन्ताच्च परस्य हेर्धिः स्यात् । अद्धि-अत्तात् २ ॥ १ ॥**

'हुधु०' होरिति जुहोतेः । यथा जुहुधि । धुडन्तात् यथा छिन्द्धि भिन्द्धि अद्धि विद्धि । हुधुट इति किम् ? क्रीणीहि । हुधुड्भ्यां परत्वेन हेर्विशेषणादिह न भवति रुदिहि स्वपिहि । हेरिति किम् ? जुहोतु अत्तु । जुहुतात् त्वम्, भित्तात्त्वमित्यत्र नित्यत्वात्प्रकृत्यनपेक्षणेनान्तरङ्गत्वाच्च तातङ् । तस्य च पुनर्न धिभावो हिरिति शब्दाश्रयणादिति ॥ १ ॥ ह्यस्तन्या दिस्योः परयोः सूत्रम्

## अदश्चाट् ॥ २ ॥ [ सि० ४।४।९० ]

**अत्तेरुत्पञ्चकाच्च दिस्योरादिरट् स्यात् । स्वरादेस्तास्विति वृद्धौ । आदत् आत्ताम् आदन् । आदः आत्तम् आत्त । आदम् आद्व आद्म ॥ २ ॥**

'अद०' रुत्पञ्चकादिति रुदादयः पञ्च धातवोऽग्रे वक्ष्यन्ते । यथा अरोदत् अरोदः । अदादि-दिस्योरित्येव । अत्ति अशि रोदिति रोदिषि ॥ २ ॥ अद्यतन्यां सूत्रम्

## घस्लृसनद्यतनी घञचलि ॥ ३ ॥ [ सि० ४।४।१७ ]

**एषु पञ्चसु परेष्वदेर्घस्लृः स्यात् । लृदिद्द्युतादिपुष्यादेः ( ३।४।६४ ) इत्यङ् । अघसत् अघसताम् अघसन् ॥ ३ ॥**

'घस्लृ०' सन् च अद्यतनी च घञ् च अच् च अल् च तस्मिन् । क्रमेणोदाहरणानि । सन्, अत्तुमिच्छति जिघत्सति । अद्यतनी, अघसत् । घञ् घासः । अच् प्रात्तीति प्रघसः । अजन्तस्य अदेः प्रपूर्वस्यैव घसादेशं वदन्ति वृद्धास्तेन माघे 'अदद' इति प्रयोगः सिद्धः । अदन्तीत्यदाः अच् । अदान् भक्षकान् द्यतीति अतो ङ इति डे अददो विष्णुः । अल् प्रादनं प्रघसः । 'घस्लृ अदने' इत्यनेनैव सिद्धे अदेः सन्नादिषु रूपान्तरनिवृत्त्यर्थं वचनम् । लृदङर्थः ॥ ३ ॥ परोक्षायां सूत्रम्

## परोक्षायां नवा ॥ ४ ॥ [ सि० ४।४।१८ ]

**अदेः परोक्षायां घस्लृ आदेशो वा स्यात् । जघास । द्वित्वे गमहनेत्यकारलोपे, 'अघोषे**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रथमोऽशिट' ( १।३।५० ) इति घस कत्वे, 'घस्वसः' ( २।३।३६ ) इति षत्वे । जक्षतुः जक्षुः । ऋवृव्येऽद इट् । जघसिथ जक्षथुः जक्ष । जघास जघस जक्षिव जक्षिम । पँक्षे ॥ ४ ॥

**'परो०'** स्पष्टम् । घस्यदिभ्यामेव सिद्धे विकल्पवचनं घसेरसर्वविषयत्वज्ञापनार्थम् । तेन घस्ता घस्मर इत्यादावेव घसेः प्रयोगो भवति ॥ ४ ॥ पँक्षे इति विकल्पपक्षे सूत्रम्

## अस्यादेराः परोक्षायाम् ॥ ५ ॥ [ सि० ४।१।६८ ]

अस्यां द्वित्वे पूर्वस्यादेरत आः स्यात् । आद आदतुः आदुः । आदिथ ६ । अद्यात् ७ । अत्ता ८ । अत्स्यति ९ । आत्स्यत् १० ॥ प्साति प्सातः प्सान्ति १ । प्सायात् २ । प्सातु–प्सातात् ३ । अप्सात् अप्साताम् ॥ ५ ॥

**'अस्या०'** स्पष्टम् । णौ गतिबोध०' ( २।२।५ ) इत्यत्रादेर्वर्जनादणिकर्तुः कर्मत्वाभावे आद्यते पिण्डी चैत्रेण । अत्र 'चल्याहारार्थ०' ( ३।३।१०८ ) इति फलवत्कर्त्तर्यपि परस्मैपदापवादः 'परिमुहायमा०' ( ३।३।९४ ) इत्यात्मनेपदम् । 'यपि चादो जग्धू' ( ४।४।१६ ) इति जग्धादेशे क्त्वि जग्ध्वा प्रजग्ध्य गतः । क्तौ जग्धिः । 'अद्यर्थाच्च०' ( ५।१।१२ ) इति वाधारे क्त इदमेषां जग्धम् । कर्मणि क्ते जग्धमन्नम् । भावे जग्धमनेन । अन्नमिति त्वदोनन्नादिति निर्देशादनेर्वा 'व्याधा०' ( २५८ ) इति ने रूपम् । अचि प्रघसः । 'अदोनन्नादिति' ( ५।१।१५० ) क्विपि आमात् । 'कर्मणोऽण्' ( ५।१।७२ ) अन्नादः । 'क्रव्यात्क्रव्यादावामपक्वादौ' ( ५।१।१५१ ) क्रव्यात् आममांसादी । क्रव्यादः पक्वमांसादी । 'सृघस्यदो मरक्' ( ५।२।७३ ) अदनशीलोऽद्मरः । 'भूश्यदोऽल्' ( ५।३।२३ ) विघसः । उपसर्गाभावे घञि घासः । 'न्यादो नवा' ( ५।३।२४ ) न्यादः निघसः । नन्द्यादित्वादने काकादनः । गौरादित्वात् ङ्यां काकादनी । तत्रैव पाठात् गवादनः । उणादौ तङ्कि-वङ्कि० ( ६९२ ) इति रिः अद्रिः । अदेस्त्रीणिः ( ६४५ ) अत्रीणिः कृमिजातिः । अद्यते गृध्रैरिति राग्रादीति ( ६९६ ) त्रिः अत्रिः ऋषिः । अदेस्त्रिन् ( ९२९ ) अत्री ऋषिः । अत्रिणौ । अदेरन्धु च वा ( ९६३ ) इत्यसि अन्धः कूरम् पक्षे अदः । क्षीरमिति तु घसिवशीति ( ४१९ ) कितीरे घसतेः । अथादन्तोऽनिट् प्साधातुः । प्सातीत्यादि ॥ ५ ॥ ह्यस्तन्या अपि सूत्रम् ।

## वा द्विषातोऽनः पुस् ॥ ६ ॥ [ सि० ४।२।९१ ]

द्विष आदन्ताच्च परस्य शितोऽनः पुस् वा स्यात् । अप्सुः अप्सान् ४ । अप्सासीत् अप्सासिष्टाम् अप्सासिषुः ५ । पप्सौ पप्सतुः पप्सुः ६ । प्सायात्–प्सेयात् ७ । प्साता ८ । प्सास्यति ९ । अप्सास्यत् १० । एवं 'भांक् दीप्तौ' । भाति ४ । अभासीत् ५ । बभौ बभाथ–बभिथ ६ । 'यांक् प्रापणे' । याति ४ । अयासीत् ५ । ययौ ६ । 'ष्णांक् शौचे' । स्नाति ४ । अस्नासीत् ५ । सस्नौ ६ । 'श्रांक् पाके' । श्राति ४ । अश्रासीत् ५ । शश्रौ ६ । 'द्रांक् कुत्सितगतौ' । द्राति । नियोगे निद्राति ४ । न्यद्रासीत् ५ । निदद्रौ ६ । 'प्रांक् पूरणे' । प्राति ४ । अप्रासीत् ५ । पप्रौ ६ । प्रेयात्–प्रायात् ७ । प्राता ८ । प्रास्यति ९ । अप्रास्यत् १० । 'वांक् गतिगन्धनयोः' 'ख्यांक् प्रकथने' । 'पांक् रक्षणे' । 'मांक् माने' दांवक् लवने' एतावपि तथैव । किन्त्वाशिषि गामापास्थेति मेयात्, दायात् । 'इंणक् गतौ' । एति । अविच्छितो ङित्त्वाद् गुणाभावे इतः ॥ ६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'वा द्वि०'** सूत्रं स्पष्टम् । 'य एचातः' ( ५।१।२८ ) इति ये प्सेयम् । 'उपसर्गादातः' ( ५।३।११० ) इति ङे प्रप्सः । 'तन्व्यधी०' ( ५।१।६४ ) इति णे प्सायः । उणादौ श्वन्मातरिश्वन्० ( ९०२ ) इति ( अनि ) निपातनात् विश्वप्सा अग्निः कालश्च । **'भांक्** दीप्तावि'त्यादि स्पष्टम् । अनटि 'न ख्यागपूग्०' ( २।३।९० ) इति प्रतिषेधात् 'स्वरात्' ( २।३।८५ ) इति णेर्वेति च णत्वाभावे प्रभानम् प्रभापना । शतरि ङ्यां, 'अवर्णादश्न०' ( २।१।११५ ) इति वान्त इत्यादेशे भान्ती भाती स्त्री कुले वा । त्त्यपवाद 'उपसर्गादातः' इत्यङि प्रभा विभा । 'मृगयेच्छा०' ( ५।३।१०१ ) इति निपातनादङि भा । भाः भासाविति तु भासेः क्विपि । उणादौ दाभाभ्यां नुः ( ७८६ ) भानुः । भातेर्डवतुः ( ८८६ ) भवान् । स्त्रियामुदित्त्वात् ङ्यां भवती । **'यांक्** प्रापणे' इत्यादि व्यक्तम् । 'यायावरः' ( ५।२।८२ ) इति निपातनाद्यङन्ताद्वरे यायायनशीलो यायावरः । गत्यर्थे वा कर्त्तरि संयातः । 'अजातेः शीले' ( ५।१।१५४ ) इति णिनि प्रयायी । गम्यादित्वाद्भत्यर्थेति साधुः । 'णिन् चावश्यक०' ( ५।४।३६ ) इति णिनि यायी । उणादौ हुयामा० ( ४५१ ) इति त्रे यात्रा । यापाभ्यां द्वे च ( ७१४ ) इति किदीः ययी रविः । हनिया० ( ७३३ ) इति कित्यौ द्वित्वे च ययुः अश्वः । पीमृगमित्रदेवकुमारलोकधर्मविश्वसुम्नाश्मावेभ्यो यः ( ७४१ ) इति कित्यौ पीयुः उलूकः । मृगयुर्व्याधः इत्यादि । कृसिकमि० ( ७७३ ) इति तुनि यातुः राक्षसः । अर्त्तीरि० ( ३३८ ) इति मे यामः । मन् ( ९११ ) इति मनि यामा । बहुव्रीहौ सुयामा नाम कश्चित् । **ष्णांक्** इति षोपदेशत्वात् 'नाम्यन्तस्था०' ( २।३।१५ ) इति षत्वे सिष्णासति । णौ 'ज्वलह्वल०' ( ४।२।३२ ) इत्यनुपसर्गस्य वा ह्रस्वे स्नपयति । सोपसर्गस्य तु ह्रस्वाभावे प्रस्नापयति । णके स्नापकः । 'कर्मजा तृचा च' ( ३।१।८३ ) इति प्रतिषिद्धोऽपि याजकादित्वात्षष्ठीसमासः राजस्नापकः । **'निनद्याः०'** ( २।३।२० ) इति षत्वे निष्णातः निष्णः नदीष्णातः नदीष्णः । कौशलादन्यत्र षत्वाभावे नदीस्नः । स्थादित्वात्के प्रस्नाति तत्रेति प्रस्नः । एवं प्रतिस्नः । कुत्सादिकपिभीरुष्ठानादित्वात्षत्वे च प्रतिष्णिका । **'प्रतेः स्नातस्य सूत्रे'** ( २।३।२१ ) इति षत्वे प्रतिष्णातम् । **'स्नानस्य नाम्नि'** ( २।३।२२ ) प्रतिष्णानं सूत्रम् । उणादौ स्नामदि० ( ९०४ ) इति वन्प्रत्यये स्नावा सिरा नदी च । 'ष्णैं वेष्टने' इत्यस्य तु स्नायति । कृवापा० ( १ ) इत्युणि स्नायुः । **'श्रांक्** पाके' इति । श्राति पच्यते स्वयमेवेत्यर्थः । पाके घटादित्वाण्णौ ह्रस्वे श्रपयति । पाकादन्यत्र ह्रस्वाभावे श्रापयति । **'श्रः शृतं हविः क्षीरे'** ( ४।१।१०० ) श्रातेः श्रायतेश्च क्तप्रत्यये हविषि क्षीरे चाभिधेये शृभावो निपात्यते । शृतं हविः । शृतं क्षीरं स्वयमेव । श्राति श्रायती हि अकर्मकौ कर्मकर्तृविषयस्य पचेरर्थे वर्त्तेते, तयोश्चैतन्निपातनम् । हविः क्षीर इति किम् ? श्राणा यवागूः । 'व्यञ्जनान्तस्था०' ( ४।२।७१ ) इति क्तस्य नत्वम् । **'श्रपेः प्रयोक्त्रैक्ये'** ( ४।१।१०१ ) श्रातेः श्रायतेर्वा ण्यन्तस्यैकस्मिन् प्रयोक्तरि क्ते परतो हविषि क्षीरे चाभिधेये शृभावो निपात्यते । श्राति श्रायति वा हविः स्वयमेव । तच्चैत्रेण प्रायुज्यत शृतं हविश्चैत्रेण । शृतं क्षीरं चैत्रेण । यदा तु द्वितीये प्रयोक्तरि णिगुत्पद्यते तदा न भवति । श्रपितं हविश्चैत्रेणेति । हविः क्षीर इत्येव श्रपिता यवागूः । **अन्ये** तु श्रपिं चुरादौ पठन्ति तस्यैव श्रपेर्निपातनम् । प्रयोजकण्यन्तस्य त्वेकस्यापि प्रयोगं नेच्छन्ति । तन्मते कर्मकर्तृ हविः श्रातुं चैत्रः प्रयुक्तवानिति प्रयोजकव्यापारे णिगि श्रपितं हविश्चैत्रेणेत्येव भवति । **अपरे** तु सकर्मकावपि श्राति श्रायती इच्छन्ति । तन्मते तयोरप्यण्यन्तयोर्निपातनं भवति । शृतं हविश्चैत्रेण । ण्यन्तयोस्तु न भवत्येव । श्रपितं हविश्चैत्रेण मैत्रेणेति । **द्रांक्** कुत्सितगताविति कुत्सिता गतिः पलायनं स्वप्नश्च । 'नेर्ङ्मादा०' ( २।३।७९ ) इति णत्वे प्रणिद्राति । 'व्यञ्जनान्तस्था०' ( ४।२।७१ ) इति क्तयो-



Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्तस्य नत्वे घ्राणः द्राणवान् । तृनि द्राणशीलो द्राता । 'शीङ्श्रद्धा०' ( ५।२।३७ ) इत्यालौ निद्राणशीलो निद्रालुः । द्रायतेरेवालुर्न तु द्रातेरित्यन्ये । 'द्रैं स्वप्ने द्रायति । **प्रांक्** इति क्ते 'व्यञ्जनान्तस्था०' इति तस्य नत्वे प्राणः । 'आतो ड०' ( ५।१।७६ ) इति डे गोष्पदप्रं वृष्टो देवः । एकेन गोष्पदप्रेण । **वांक्** इति । णौ 'वो विधूनने जः' ( ४।२।१९ ) इति जे पक्षेणोपवाजयति । विधूननादन्यत्र 'अर्त्तिरी०' ( ४।२।२१ ) इति णौ वापयति केशान् । 'निर्वाणमवाते' ( ४।२।७९ ) इति निपातनात् क्तस्य नत्वे निर्वाणो भिक्षुः । वाते तु निर्वातो वातः, निर्वातं वातेन । 'अवर्णादश्नो०' ( २।१।११५ ) इति वान्तादेशे वाती वान्ती स्त्री कुले वा । उणादौ कृवापाजि० ( १ ) इत्युणि वायुः । दम्यमि० ( २०० ) इति ते वातः । अर्त्तीरि० ( ३३८ ) इति मे वामः । मन् ( ९११ ) इति मनि वामा । मत्वर्थीये ने वामनः । **पांक्** इत्यादि । 'ईर्व्यञ्जने०' ( ४।३।९७ ) इत्यत्र गास्थासहचरितस्य पिबतेर्ग्रहणात् क्ये इत्वाभावे पायते । णौ 'पातेः' ( ४।२।१७ ) इति ले पालयति । 'आतो ड०' इति डे नृपः । 'स्थापा०' ( ५।१।१४२ ) इति के अधिपः । शतरि नखादित्वाददभावे नपात् । उणादौ भीण्शलि० ( २१ ) इति के पाकः वालः । स्त्रियां 'वयस्यनन्त्ये' ( २।४।२१ ) इति ङ्यपवादे 'अजादेः' ( २।४।१६ ) इत्यापि पाका । भापा० ( २९६ ) इति पे पान्ति तस्मादात्मानमिति पापम् भीमादित्वादपादाने साधुः । नीदांव्शसूयुयुजस्तुतुदसिहपतपानहस्त्रद् ( ५।२।८८ ) इति त्रटि पात्रम् । ( ४४६ ) पातेर्वा ( ६५९ ) इति वा किल्सतौ पतिः पातिः । पातेरिच्च ( ८५८ ) इति तृः पिता । खुरक्षुर० ( ३९६ ) इति निपातनात् विप्रः । मन् ( ९११ ) इति मनि पामा । मत्वर्थीये ने पामनः । पातेर्जस्थसौ ( ९७७ ) पाजः बलम् । पाथः जलम् । पातेर्डुम्सु ( १००२ ) पुमान् । 'पां पाने' इत्यस्य पिबति 'पैं शोषणे' इत्यस्य पायति । **लांक्** आदाने । 'आतो ड०' इति डे बहुलः । णौ 'लोलः' ( ४।२।१६ ) इति वा ले घृतं विलालयति । पक्षे 'अर्त्तिरी०' ( ४।२।२१ ) इति पौ घृतं विलापयति । क्ते बिलातः । '**रांक्** दाने' आदानेऽपीति कश्चित्, रातुं वारणमागतः । उणादौ भीण्शलि० ( २१ ) इति के राका पूर्णिमा । राशदि० ( ६९६ ) इति त्रौ रात्रिः । रातेर्डैः ( ८९६ ) राः धनम् । **मांक्** माने इति मानं वर्त्तनम् । माति पात्रे । 'नेर्ङ्मादा०' ( २।३।७९ ) इत्यत्र ङोपलक्षितस्य मो ग्रहणान्नेर्णत्वाभावे प्रनिमाति । क्ये 'ईर्व्यञ्जने०' ( ४।३।९७ ) इतीत्वे मीयते । मातेरीत्वं नेच्छन्त्येके तन्मते मायते । सनि 'मिमीमादामि०' ( ४।१।२० ) इति स्वरस्य इत्वे मित्सति । ये त्वस्येत्वं नेच्छन्ति तन्मते मिमासति । 'दोसोमा०' ( ४।४।११ ) इतीति मितः मितवान् । मातेरित्वं नेच्छन्त्येके तन्मते मातः मातवान् । शतरि 'अवर्णादश्नो०' ( २।१।११५ ) इति वान्तादेशे माती मान्ती स्त्री कुले वा । उणादौ स्थाछा० ( ३५७ ) इति ये माया । हुयामा० ( ४५१ ) इति त्रे मात्रा । शमा० ( ४६२ ) इति ले माला । मात्रावदि० ( ५६४ ) इति से मासः । मेरुरिति तु मीनातेः चिनीपी० ( ८०६ ) इति रौ । चन्द्रमा इत्यपि चन्दो रमस् ( ९८६ ) इति । **दांवक्** इति । वकारो 'अवौ दाधौ दा' ( ३।३।५ ) इति विशेषणार्थः । दाति क्षेत्रम् । दायन्ते व्रीहयः । अत्रावावित्यत्र वितो वर्जनाद्दासंज्ञाया अभावे 'ईर्व्यञ्जने०' ( ४।३।९७ ) इति ईर्न भवति । अनिट्त्वात् दाता दातुम् । 'नीदांव्०' ( ५।२।८८ ) इति करणे त्रटि दात्रम् । किन्त्वाशिषीति मेयादित्यत्र 'गापास्थासादामाहाकः' ( ४।३।९६ ) इत्येत्वं स्यात् । दायादित्यत्र दासंज्ञाया अभावादेत्वं न स्यादित्यर्थः ।

इत्यादय इति वचने '**ख्यांक्** प्रकथने' । ख्याति । 'शास्त्यसूवक्ति०' ( ३।४।६० ) इत्यङि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आख्यत् । आचख्यौ । 'समः ख्यः' ( ५।१।७७ ) इति डे अश्वसङ्ख्यः । 'दृश्याङः' ( ५।१।७८ ) इति डे स्त्रियमाचष्टे स्त्र्याख्यः । प्रियमाचष्टे प्रियाख्यः । इत्यादन्ताश्चतुर्दशानिटश्च ।

इंणक् इति । णित्त्वमिण इत्यादौ विशेषणार्थम् । एतीत्यादि स्पष्टम् ॥ ६ ॥ वर्त्तमानान्यदर्थ-बहुवचने सूत्रम् ।

## ह्विणोरप्विति व्यौ ॥ ७ ॥ [ सि० ४।३।१५ ]

होरिणश्च नामिनः स्वरादावपित्यविति यथासङ्ख्यं व्यौ स्याताम् । यन्ति । एषि इथः इथ । एमि इव इम १ । इयात् इयाताम् इयुः २ । एतु-इतात् इताम् यन्तु । इहि-इतात् इतम् इत । अयानि अयाव अयाम ३ ॥ ७ ॥

'ह्विणो०' व्यौ स्यातामिति । वकारयकारावादेशावियुवोरपवादौ भवतः । यथा यन्ति यन्तु इत्यादि । व्यतिप्रतियीरन् ज्ञानार्थत्वात् 'क्रियाव्यतिहार०' ( ३।३।२३ ) इत्यात्मनेपदे अनेनेणो यत्वे रूपम् । मा स्म यन् । यन् यन्तौ यन्तः । शितीत्येव । ईयतुः । स्वरादावित्येव । इतः । अवितीति किम् ? पुस् अजुहवुः । वित् अयानि । आयन् इत्यत्र तु 'एत्यस्ते०' ( ४।४।३० ) इति वृद्धिरेवाप-वादत्वात् ॥ ७ ॥ ह्यस्तन्यां सूत्रम्

## एत्यस्तेर्वृद्धिः ॥ ८ ॥ [ सि० ४।४।३० ]

इणिकोरस्तेश्चादेः स्वरस्य ह्यस्तन्यां वृद्धिः स्यात् । अमाङा । यँत्वाल्लुगपवादोऽयम् । ऐत् । ऐताम् आयन् । ऐः ऐतम् ऐत । आयम् ऐव ऐम ४ । पिबैतिदेति सिज्लोपे ॥ ८ ॥

'एत्य०' 'अड्धातो०' इतिसूत्रादनुवर्त्तमान आदिशब्दः प्रथमान्तोऽप्यत्र षष्ठ्यन्ततया परिण-मते । अर्थवशाद्विभक्तिपरिणाम इति । तथा चाह । आदेरिति यथा आयन् अध्यायन् आस्ताम् आसन् । अमाङेत्येव । मास्म भवन्तो यन् । मास्म भवन्तः सन् । यत्वे कृतेऽलुकि च स्वरादित्वा-भावात् 'स्वरादेस्तासु' ( ४।४।३१ ) इति वृद्धिर्न प्राप्नोतीति वचनम् । विषयविज्ञानात्परत्वात्प्रागेव वृद्धौ कुतो यत्वालुकोः प्राप्तिरिति चेत् । सत्यम् । इदमेव वचनं ज्ञापकम् कृतेऽन्यस्मिन् धातुप्रत्ययकार्ये वृद्धिस्तद्बाध्योऽट् च भवति । तेन ऐयरुः अध्यैयतेत्यादावियादेशे सति वृद्धिः सिद्धा । अचीकरदित्यादौ च दीर्घत्वमटि तु स्वरादित्वात्तन्न स्यात् । यँत्वाल्लुगपवादोऽयमिति । अयमर्थः । इणो ह्विणोरप्विति व्यौ इति यत्वे प्राप्ते तत्साहचर्यादिकोऽपि 'इको वा' ( ४।३।१६ ) इति यत्वे कर्त्तव्ये अस्तेश्च 'श्नास्त्योर्लुक्' ( ४।२।९० ) इत्यलुकि प्राप्तायां वचनमिदम् । तेनेकः पक्षे यत्वाभावे अध्यैयन् इत्यत्र इति सति 'स्वरादेस्तासु' इति वृद्धिः ॥ ८ ॥ अद्यतन्यां सूत्रम्

## इणिकोर्गाः ॥ ९ ॥ [ सि० ४।४।२३ ]

इणिकोरद्यतन्यां विषये गाः स्यात् । अगात् अगाताम् अगुः ५ । द्वित्वे द्वितीयस्य वृद्धावाथादेशे ॥ ९ ॥

'इणि०' अद्यतन्यां विषय इति । अत्र विषयव्याख्यां विनाऽगादित्यादिषु सिचो लुपि स्यान्नत्व-गायीत्यत्र ञिचा व्यवधानात् । अगादित्यादि । एवं अगायि भवता । अध्यगात् अध्यगाताम् अध्यगुः । अध्यगायि भवता ॥ ९ ॥ परोक्षायां सूत्रम्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## पूर्वस्यास्वे स्वरे य्वोरियुव् ॥ १० ॥ [ सि० ४।१।३७ ]

द्वित्वे सति यः पूर्वस्तत्सम्बन्धिनोरिवर्णोवर्णयोरस्वे स्वरे इयुवौ स्याताम् । इयाय ॥ १० ॥

'**पूर्व०**' य्वोरिति । इवर्णोकारयोरित्यर्थः । दीर्घोकारस्यासम्भवात् । तत्र ह्रस्वेकारस्य यथा इयेष इयर्त्ति इयृयात् । दीर्घेकारस्य यथा अर्त्तेर्यङ्लुपि द्वित्वे पूर्वस्य अत्वे 'रिरौ च लुपि' ( ४।१।५६ ) इत्यनेन रिरी आगमे तदिवर्णस्य इयादेशे अरियरीति । एके त्वत्रेयं नेच्छन्ति । अर्यर्ति अर्यरीति तन्मत-सङ्ग्रहार्थं पूर्वस्येति य्वोः समानाधिकरणं विशेषणम् । तेन इकारोकारमात्रस्यैव पूर्वस्येयुवौ भवतो न तु रिरीत्यादिवदधिकस्य तत्सम्बन्धिनः । अस्व इति किम् ? ईषतुः । स्वर इति किम् ? पिपक्षति । अस्वे स्वरे इति भणनात् गुणादौ कृते इयुवादेशः । नन्वियेषेत्यादौ इयुवादेशे स्वरस्य परे इत्यनेन गुणस्य स्थानिवद्भावादियुवौ न प्राप्नुतः । सत्यम् । किन्तु पर इति सप्तमी सप्तम्या च निर्दिष्टे पूर्वस्या-नन्तरस्यैव । अत्र तु षकारेण व्यवधानमिति न स्थानित्वम् । अस्वे इति नञा निर्दिष्टमनित्यमिति वा । न च असिद्धं बहिरङ्गमिति न्यायेन गुणस्यासिद्धत्वात् 'न स्वरानन्तर्ये' इति न्यायेन तस्य बाधितत्वा-दिति ॥ १० ॥ द्विवचने सूत्रम्

## इणः ॥ ११ ॥ [ सि० २।१।५१ ]

अस्य स्वरादौ प्रत्यये इय् स्यात् । दीर्घे । ईयतुः ईयुः । वेटि द्वितीयस्य गुणेऽयादेशे इयादेशे च, इययिथ-इयेथ ईयथुः । ईय । इयाय-इयय ईयिव ईयिम ६ । दीर्घश्च्वीति दीर्घे । ईयात् ईयास्ताम् ईयासुः ७ । एता ८ । एष्यति ९ । ऐष्यत् १० । ॥ ११ ॥

'**इणः**' 'योऽनेकस्वरस्य' ( २।१।५६ ) इति प्राप्तस्यापवादोऽयम् । वेटीति 'सृजिदृशि०' ( ४।४।७८ ) इति सूत्रेणेड्विकल्पे इत्यर्थः ॥ ११ ॥ उपसर्गयोगे आशिषि सूत्रम् ।

## आशिषीणः ॥ १२ ॥ [ सि० ४।३।१०७ ]

उपसर्गात्परस्येण ईतः क्ङिति यादावाशिषि ह्रस्वः स्यात् । उदियात् । शेषं प्राग्वत् । 'इंक् स्मरणे' । अधिपूर्वः एवायम् । अध्येति अधीतः ॥ १२ ॥

'**आशि०**' उदियादिति । एवं समियात्, अन्वियात् । 'दीर्घश्च्वि०' ( ४।३।१०८ ) इति दीर्घ-त्वेऽनेन ह्रस्वः । आशिषीति किम् ? उदीयते । उपसर्गादित्येव ईयात् । ई इण इति इकारप्रश्लेषात् आ ईयात् एयात् समेयादित्यत्र न भवति । ननु प्रतीयादित्यत्र समानलक्षणे दीर्घे सति कथं न ह्रस्वः । नैवम् । दीर्घे सति उपसर्गात्परस्य इणो धातोरभावात् । केचिदत्रापीच्छन्ति प्रतियात् । इकोऽपि समानदीर्घत्वे इच्छन्त्येके अधियात् । शेषं प्राग्वदिति । उपसर्गात्परस्य इण आशिषं विनान्यत्र कुत्रापि विशेषो नास्तीति भावः । 'दृवृग्०' ( ५।१।४० ) इति यापवादे क्यपि इत्यः । 'तन्व्यधी०' ( ५।१।६४ ) इति णे अत्यायः प्रत्यायः । लिहाद्यचि अयः समयः प्रत्ययः । 'गत्यर्थ०' ( ५।१।११ ) इति वा कर्त्तरि क्ते मार्गमतीतः । 'वेयिवद०' ( ५।२।३ ) इति निपातनाद्भूतमात्रे क्वसौ, नित्यत्वात् द्वित्वात्प्रागेव 'घसेकस्वर०' ( ४।४।८२ ) इतीटि ईयिवान् समीयिवान् उपेयिवान् । 'जीणदृक्षि०' ( ५।२।७२ ) इति ईनि अयनशीलोऽत्ययी । 'सृजीण्०' ( ५।२।७७ ) इति ट्वरपि इत्वरः इत्वरी । मनि एमा । वनि एवा । क्वनिपि इत्वा । विचि एः क्विप्येतीति इत् । 'युवर्ण०' ( ५।३।२८ ) इत्यलि अयः । अन्वयः । समयः । इणोऽभ्रेषे इत्यलपवादे घञि न्यायः । स्थितेरचलनमभ्रेषः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लोकशास्त्रप्रसिद्ध्या नियतमयनं न्यायः। 'परेः क्रमे' (५।३।७६) पर्यायः। क्रमादन्यत्रालि विपर्ययो मतेः। 'समज०' (५।३।९९) इति क्यपि इत्या। 'न्यायावाय०' (५।३।१३४) इति तु नीधातोर्नीयतेऽनेनेति करणे घञि न्यायः। उणादौ कृवापा० (१) इत्युणि आयुः नरः पुरूरवः पुत्रः जीवनं च। जरायुर्गर्भवेष्टनम्। जटायुः पक्षी। भीण्शलि० (२१) इति के एकः। इणुर्विश० (१८२) इति णे एणः। दम्यमि० (२००) इति ते एतो वर्णः। अवभृ० (२२९) इति किति थे समिथः सङ्गमः। जीणुशो० (२६१) इति किति ने इनः। इण्धाग्भ्यां वा (३८९) इति किति रे इरा सुरा भूश्च, एरा एडका। खुरक्षुर० (३९६) इति निपातनाद् दुष्पूर्वस्य दूरम्। समिण्० (५९८) इत्याः समया गिरिम्। अस् (९५२) इत्यसि अयः लोहम्। इणो णित् (९९८) इत्युसि आयुः आयुषी। अर्त्तीण्भ्यां नस् (९७९) एनः पापम्। दृमुषिकृषिरिषिविषिशीशुच्यशिपूयीण्प्रभृभ्यः कित् (६५१) इति किति तौ इति हेत्वादौ। आग इति तु अगेर्वेस्त्यगिभ्यां णित् (९७०) इत्यसि। इंक् अधि पूर्व एवायमिति। तथोक्तं **धातुपारायणे** इङिकावधिनैव प्रयुज्येते। कित्करणम् 'इको वा' (४।३।१६) इत्यादि विशेषणार्थं गणज्ञापनार्थं च। 'स्मृत्यर्थ०' (२।२।११) इति वा कर्मणः कर्मत्वे, 'शेषे' (२।२।८१) इति षष्ठ्यां मातुरध्येति अधीतः ॥१२॥

बहुवचने सूत्रम्

## इको वा ॥ १३ ॥ [ सि० ४।३।१६ ]

**इकः स्वरादाववित्ति शिति य्वा स्यात्। अधियन्ति-अधीयन्ति १। शेषमिणवत्। आशिषि ह्रस्वाभावो विशेषः। अधीयात् अधीयास्ताम् १०। 'वींक् प्रजनकान्त्यसनखादनेषु'। वेति वीतः वियन्ति १। वीयात् २। वेतु वीतात् वीहि ३। अवेत् अवीताम्। अवियन् ४। अवैषीत् अवैष्टाम् ५। विवाय विव्यतुः ६। वीयात् ७। वेतात् वेष्यति ९। अवेष्यत् १०। 'षुंक् प्रसवैश्वर्ययोः'। प्रसवोऽभ्यनुज्ञानम् ॥ १३ ॥**

**'इको०'** अधियन्ति अधीयन्ती। एवं अधियन्तु अधीयन्तु। क्रियाव्यतिहारे व्यत्यधियीरन्-व्यत्यधीयीरन्। मास्माऽधियन् मास्माधीयन्। कतीहाधियानाः कतीहाधीयानाः। 'इणिकोर्गा' (४।४।२३) इति गादेशे 'पिबैति०' (४।३।६६) इति सिज्लुपि च अध्यगात्। क्रियाव्यतिहारे अध्यगास्त। 'भावकर्मणोः' (३।४।६८) इति ञिचि अध्यगायि। 'सनीङश्च' (४।४।२५) इति गमुः (अधिजिगमिषति 'णावज्ञाने गमुः') अधिगमयति। ज्ञाने त्वर्थं प्रत्याययति। क्त्वि अधीत्य। इति ह्रस्वेदन्तावनिटौ। **वींक्** इति। प्रजननं घञ् 'न जनवध' इति वृद्धिनिषेधः। प्रजनः प्रथमगर्भग्रहणम्। असनं क्षेपः। अशनं तृप्तिरित्येके। **वेतीत्यादि**। परोक्षायां विवाय। 'योऽनेकस्वरस्य' (२।१।५६) यत्वे विव्यतुः विव्युरिति। अत्रासिद्धं बहिरङ्गमन्तरङ्ग इति यत्वस्यासिद्धत्वात् 'य्वादे'रिति पूर्वस्य दीर्घाभावः। 'वियः प्रजने' (४।२।१३) इति वात्वे पुरोवातो गाः प्रवापयति। क्ते वीतं असारं हस्त्यश्वम्। वीतं फल्गुहयद्विपमिति **अभिधानचिन्तामणौ**। 'तिक्कृतौ नाम्नि' (५।१।७१) इति तिकि वीतिः अश्वः। उणादौ वीपतिपदिभ्यस्तनः। (२९२) वेतनं भृतिः। हुयामा० (४५१) इति त्रे वेत्रः। कावावी० (६३४) इति णौ वेणिः कबरी। अस् (९५२) इत्यसि वयः। प्रज्ञाद्यणि वायसः इति दीर्घेदन्तोऽनिट्। **षुंक्** इति। प्रसवोऽभ्यनुज्ञानमिति। निषिद्धस्य पुनरभ्यनुज्ञा प्रतिप्रसवः पुत्रादेर्जन्मापि। 'षः स०' (२।३।९८) इति सत्वे ॥ १३ ॥

तिवादौ सूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## उत और्विति व्यञ्जनेऽद्वेः ॥ १४ ॥ [ सि० ४।३।५९ ]

**अद्व्युक्तस्योदन्तधातोर्व्यञ्जनादौ विति औः स्यात् । सौति सुतः सुवन्ति १ । सुयात् २ । सौतु-सुतात् ३ । असौत् ४ ॥ १४ ॥**

'**उत०**' सौतीत्यादि । उत इति किम् ? एति । धातोरित्येव । सुनोमि । वितीति किम् ? सुतः रुतः । व्यञ्जन इति किम् ? सवानि यवानि । अद्विरिति किम् ? सोसोति योयोति । तोः स्थाने तातङो ङित्त्वात् स्थानिवत्त्वं बाध्यते । तेन सुतात् युतात् रुतादित्यादौ नौकारः । केचित्तु यङ्-लुबन्तस्यापीच्छन्ति सोसौति योयौति रोरौति नोनौति ॥ १४ ॥ अद्यतन्यां सूत्रम्

## धूग्सुस्तोः परस्मै ॥ १५ ॥ [ सि० ४।४।८५ ]

**एभ्यः परस्मैपदे सिच आदेरिट् स्यात् । सु इति सुमात्रस्य ग्रहणम् । असावीत् असाविष्टाम् । सुनोतेरेव ग्रहणमिति पक्षे असौषीत् असौष्टाम् ५ । सुषाव ६ । सूयात् ७ । सोता ८ । सोष्यति ९ । असोष्यत् १० । 'तुंक हिंसावृत्तिपूरणेषु' ॥ १५ ॥**

'**धूग्सु०**' स्पष्टम् । षोपदेशत्वात् परोक्षायां सुषाव सुषुवतुरित्यादि । अषोपदेशोऽमित्येके सुसाव । उणादौ सुसितनि० ( २०३ ) इति ते वा दीर्घे च सुतः पुत्रः, सूतः सारथिः । 'युसुकु०' ( २९७ ) इति पे सूपः । 'सुं प्रसवैश्वर्ययोः' । सवति । 'षुंग्ट् अभिषवे' सुनोति ॥ १५ ॥ 'तुंक्' इति तिवादौ सूत्रम्

## यङ्तुरुस्तोर्बहुलम् ॥ १६ ॥ [ सि० ४।३।६४ ]

**यङ्लुबन्ताचुरुस्तुभ्यश्च परो व्यञ्जनादौ विति ईत् बहुलं परादिः स्यात् । तवीति-तौति तुतः तुवन्ति १ । तुयात् २ । तौतु-तवीतु तुतात् ३ । अतौत् ४ । केचित्तु सर्वत्र व्यञ्जनादौ शितीतमिच्छन्ति । तुतः-तुवीतः, तुयात् तुवीयात् ४ । अतौषीत् ५ । तुताव ६ । तूयात् ७ । तोता ८ । तोष्यति ९ । अतोष्यत् १० । 'टुँक्षु रु कुंक शब्दे' । टुकार इत् । रौति-रवीति ४ । अरावीत् ५ । क्षु कु सौतिवत्, किन्तु क्षोः सेट्त्वात् अक्षावीत् ५ । 'युक् मिश्रणे' । 'णुक् स्तुतौ' 卐 इत्यादयोऽपि सौतिवत् । 'रुदृक् अश्रुविमोचने' ॥ १६ ॥**

'**यङ्तु०**' बहुलमिति शिष्टप्रयोगानुसारेण । परादिः परावयवः । कचिद्विकल्पः बोभवीति बोभोति । नर्नृतीति नर्नर्त्ति । लालपीति लालप्ति । कचिन्न भवति । वर्वर्ति । चर्कर्ति । अन्ये तु वावदीति लालपीति रोरवीतीति नित्यम् । बोभवीति बोभोति, सोषोति सोषवीति, चर्कर्त्ति चर्करीति विकल्पः । नर्त्ति वर्वर्त्ति वर्वर्ष्टीत्यत्र न भवतीत्याहुः । तुंक् तवीति तौति । रुंक् रवीति रौति । ष्टुंक् स्तवीति स्तौति । तुरुस्तुभ्यः ईतं **छान्दसमाहुरेके** । व्यञ्जनादावित्येव बोभवानि तवानि रवाणि स्तवानि । वितीत्येव बोभूतः तुतः रुतः स्तुतः । अद्वेरित्यनुवृत्तेः तुतोथ तुष्टोथेत्यत्र न भवति । यङिति सामान्याभिधानेऽपि यङ्लुबन्तस्य ग्रहणम्, यङन्तस्यात्मनेपदित्वाद्वितो व्यञ्जनादेरसम्भवात् । उणादौ भीण्शलि० ( २१ ) इति के तोकं अपत्यम् । **टुँक्षु** इत्यादि । टुकार इत् इति । तेन 'ट्वितोऽथुः' ( ५।३।८३ ) इत्यथौ क्षवथुः । क्षौति क्षुतः क्षवन्ति । अक्षावीत् । चुक्षाव । क्षविता । क्षविष्यति । यङि चोक्षूयते । यङ्लुपि चोक्षोति चोक्षवीति । 'य एचातः' ( ५।१।२८ ) इति ये क्षव्यम् । 'उवर्णादावश्यके' ( ५।१।१९ ) घ्यणि क्षाव्यमवश्यम् । सनि 'ग्रहगुह०' ( ४।४।५९ ) इति नेट्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चुक्षूषति । किल्युवर्णादिति नेट् क्षुता क्षुतं क्षुतः क्षुतवान् । 'युवर्ण०' ( ५।३।२८ ) इत्यलि क्षवः । विपूर्वात् 'क्षुश्रोः' ( ५।३।७१ ) इति घञि विक्षावः । 'क्रुत्सम्पदादिभ्यः क्विप्' ( ५।३।११४ ) इति क्विपि क्षुत् । उणादौ स्थाक्षुतोरूच्च ( १८५ ) इति णे क्षूणमपराधः । रु इति । रौति-रवीति रुतः रुवन्ति । रुराव । रविता । सनि 'ग्रहगुहश्च सनः' ( ४।४।५९ ) इति नेट् रुरूषति । यङि रोरूयते । यङ्लुपि रोरवीति रोरोति । किल्युवर्णादिति नेट् रुत्वा रुतम् । रुतः रुतवान् । 'युवर्ण०' इत्यलि रवः । अलपवादे 'रोरुपसर्गात्' ( ५।३।२२ ) इति घञि संरावः । 'आङोरुप्लोः' ( ५।३।४९ ) इति वा घञि आरावः आरवः । 'चलशब्दार्थ०' ( ५।२।४३ ) इत्यने रवणशीलो रवणः । 'क्वचित्' ( ५।१।१७१ ) इति डे मह्यां रौति मयूरः पृषोदरादिः । उणादौ तृकृशृ० ( १८७ ) इत्यणे रवणः करभः । रोर्वा ( २३५ ) इति किलथे रुवथः शकुनिः । रवथः आक्रन्दः । स्वरेभ्य इः ( ६०६ ) रविः । रुपूभ्यां कित् ( ८०७ ) इति रौ रुरुः मृगः । विहायस्० ( ९७६ ) इत्यसि निपातनात् पुरु ( यथा स्यात्तथा ) रौति पुरूरवा राजा । 'रुङ् रेषणे च' रवते रोता । कुंक् इति । कौति कुतः कुवन्ति । अकौषीत् चुकोव । कोता । सनि चुकूषति । यङि 'न कवतेर्यङः' ( ४।१।४७ ) इति भ्वादेरेव प्रतिषेधात् 'कङश्चञ्' ( ४।१।४६ ) इति पूर्वस्य चत्वे चोकूयते । उणादौ दृशृकृ० ( २७ ) इत्यके रुवकं अभक्ष्यद्रव्यम् । दुकूलेति अले निपातनात् कुकूलं शङ्कुमद्गर्तो 'कुङ् शब्दे' कवते । यङि कोकूयते 'कूङत् शब्दे कुवते चोकूयते । एषां शब्दार्थत्वेपि कौतिः शब्दमात्रे, कुवतिरार्त्तस्वरे, कवतिरव्यक्ते शब्दे ॥ युक् इति । यौति युतः युवन्ति । अयावीत् । युयाव युयुवतुः । 'स्क्रसृवृ०' ( ४।४।८१ ) इतीटि युयविथ । यविता यवितुम् । सनि 'ग्रहगुह०' ( ४।४।५९ ) इतीडभावे प्राप्ते, तदपवादे 'इवृध' (४।४।४७) इति वेटि 'ओर्जान्तस्था०' (४।१।६०) इति पूर्वस्येत्वे यियविषति पक्षे युयूषति । वेट्त्वात् क्तयोर्नेट् युतः युतवान् । 'आसुयु०' ( ५।१।२० ) इतीयापवादे ध्यणि याव्यम् । नन्द्याद्यने यवनः । मनि सुयोमा । वनि सुयोवा । विचि सुयौः । क्विपि सुयुत् । 'युवर्ण०' ( ५।३।२८ ) इत्यलि यवः । प्रज्ञाद्यणि यावोऽलक्तकः । स्वार्थे के यावकः । 'युदुद्रोः' ( ५।३।५९ ) इति सम्पूर्वाद् घञि संयावः गुडगोधूमः । उत्पूर्वात् 'युपुद्रोर्घञ्' ( ५।३।५४ ) उद्यावः । 'सातिहेति०' ( ५।३।९४ ) इति क्तौ निपातनात् यूतिः सङ्गः । गोयूतिः । पृषोदरादित्वात् गव्यूतिः । क्त्वि 'उवर्णात्' ( ४।४।५८ ) इतीडभावे युत्वा । उणादौ घुयुहि० ( २४ ) इति के दीर्घे च यूका । पथयूथ० ( २३१ ) इति निपातनात् यूथः । युसुकु० ( ३९७ ) इति पे ऊत्वे यूपः । योरूच वा ( ५४१ ) इति षे यूषः पेयविशेषः । यूषा च्छाया । योषा स्त्री । युजलेराषः ( ५४५ ) यवाषः दुरालभा । बहियुभ्यां वा ( ५७१ ) इति वा णित्यसे यावसं भक्तं तृणं च । यवसं घासोऽन्नं च । युवलिभ्यामासः ( ५७४ ) यवासः दुरालभा । योः कित् ( ६५८ ) इत्यतौ युवतिः । वीयुसुवहि० ( ६७७ ) इति नौ योनिः । लुपूयु० ( ९०१ ) इति कित्यनि युवा । अयुतसिद्धानामित्यादिदर्शनादमिश्रणे युरित्यन्ये । 'युंश् बन्धने' । युनीते युनाति योता । 'युणि जुगुप्सायाम्' यावयते । अर्थविशेषे चुरादित्वाज्जुगुप्साया अन्यत्र यौति । णुक् इति 'पाठे०' ( २।३।९७ ) इति णस्य नत्वे, नौति नुतः नुवन्ति । अनावीत् । नुनाव । णोपदेशत्वात् 'अदुरुपसर्ग०' ( २।३।७७ ) इति णत्वे प्रणौति परिणौति । 'नुप्रच्छः' ( ३।३।५४ ) इत्याङ्पूर्वादात्मनेपदे आनुते सृगालः । सनि 'ग्रहगुह०' ( ४।४।५९ ) इति नेट् नुनूषति । नविता नवितुम् । 'उवर्णात्०' ( ५।१।१९ ) इति यापवादे ध्यणि नाव्यमवश्यम् । अचि नवः प्रणवः । किल्युवर्णादिति नेट् नुत्वा नुतः नुतवान् नुतिः । उक्षितक्षि० ( ९०० ) इत्यनि नव पदार्थाः । 卐 इत्यादयोऽपीत्यत्रादिशब्दग्रहणात् युंक्

अभिगमे'। 'उत औ०' (४।३।५९) इत्यौत्वे द्यौति द्युतः द्युवन्ति। अद्यावीत्। दुद्याव। थवि 'सृजिदृशि०' (४।४।७८) इति वेटि दुद्योथ दुद्यविथ। यङि दोद्यूयते। यङ्लुपि दोद्योति दोद्यवीति। वनि सुद्योवा। कनिपि सुद्युत्वा। विचि द्यौः। 'य एचातः' (५।१।२८) इति ये 'द्यक्ये' (१।२।२५) इत्यवि द्यव्यम्। 'उवर्णात्०' (५।१।१९) इति घ्यणि द्याव्यमवश्यम्। उणादौ द्युद्रुभ्याम् (७४४) इति डिदुः द्युः। द्युगमिभ्यां डोः (८६७) द्यौः। '**क्ष्णुक्** तेजने'। क्ष्णौति क्ष्णुतः क्ष्णुवन्ति। 'समः क्ष्णोः' (३।३।२९) इत्यात्मनेपदे संक्ष्णुते शस्त्रम्। क्ष्णविता। यङि चोक्ष्णूयते। यङ्लुपि चोक्ष्णोति २। सनि 'ग्रहगुह०' इति नेट् चक्ष्णूषति। '**स्नुक्** प्रस्रवने'। प्रस्रवनं क्षरणम्। स्नौति स्नुतः स्नुवन्ति। 'स्नोः' (४।४।५२) इत्यात्मनेपदाभावे नेट् प्रस्नोष्यते। कर्मकर्त्तरि 'एकधातौ०' (३।४।८६) इति ञिक्यात्मनेपदेषु प्राप्तेषु 'भूषार्थ०' (३।४।९३) इति ञिक्ययोः प्रतिषेधात् प्रस्नुते प्रास्नोष्ट गौः स्वयमेव। सुस्नाव सुस्नुवतुः। यङि सोस्नूयते। यङ्लुपि सोस्नोति सोस्नवीति। सनि 'ग्रहगुह०' इति नेट् सुस्नूषति। उणादौ स्नुपूसू० (५४२) इति किति षे स्नुषा। इति दशोदन्ताः। **ऊदन्तादयोऽप्रसिद्धाः** ॥ १६ ॥

**अथ व्यञ्जनान्तास्तत्रान्तर्गणो रुदादिपञ्चकः।** रुदक् इति। तिवादौ सूत्रम्

## रुत्पञ्चकाच्छिदयः ॥ १७ ॥ [ सि० ४।४।८८ ]

रुदादेः पञ्चतः परस्य व्यञ्जनादेः शितोऽयादेरादिरिट् स्यात्। रोदिति रुदितः रुदन्ति १। रुद्यात् २। रोदितु-रुदितात् रुदन्तु। रुदिहि-रुदितात् रुदितम् रुदित। रोदानि रोदाव रोदाम ३ ॥ १७ ॥

**'रुत्प०'** रुदादेः पञ्चत इति। रुदि १ स्वपि २ अनि ३ श्वसि ४ जक्षि ५ लक्षणात्पञ्चकादिति। पञ्चकादिति किम्? जागर्त्ति। शित इति किम्? स्वप्ता। अय इति किम्? रुद्यात्। व्यञ्जनादेरित्येव। रुदन्ति ॥ १७ ॥ दिस्योः सूत्रम्

## दिस्योरीट् ॥ १८ ॥ [ सि० ४।४।८९ ]

रुत्पञ्चकाच्छितो दिस्योरादिरीट् स्यात्। अरोदीत्। 'अदश्चाट्' इत्यडागमे च अरोदत् अरुदिताम् अरुदन्। अरोदीः अरोदः अरुदितम् अरुदित। अरोदम् अरुदिव अरुदिम ४। अस्य सेट्त्वादद्यतन्याम्, अरोदीत्। पक्षे ऋदिच्छ्वीत्यङि, अरुदत् अरुदताम् अरोदिष्टाम् अरोदिषुः अरुदन् ५। रुरोद रुरुदतुः रुरुदुः ६। रुद्यात् ७। रोदिता ८। रोदिष्यति ९। अरोदिष्यत् १०। '**ञिष्वपंक्** शये'। स्वपिति १। स्वप्यात् २। स्वपितु ३। अस्वपीत् अस्वपत् ४। अस्वाप्सीत् अस्वाप्ताम् अस्वाप्सुः ५। द्वित्वे भूस्वपोरिति पूर्वस्योत्वे, सुष्वाप ६।

**'दिस्यो०'** सूत्रं स्पष्टम्। दिस्योरिति किम्? रोदिति। दिसाहचर्यात् सिर्ह्यस्तन्या एव। तेन रोदिषि। अस्य सेट्त्वात्। रोदिता रोदितुम्। 'रुदविद०' (४।३।३२) इति क्त्वासनोः कित्त्वे रुदित्वा। रुरुदिषति। उणादौ ऋज्यजि० (३८८) इति किति रे रुद्रः। रोदयतीति वा खुरक्षुर० (३९६) इति निपातनात् रुद्रः। रुद्यार्त्ति० (९९७) इत्युसि रोदुः अश्रुनिपातः। **ञिष्वपंक्** इति। ञिरिति ञीच्छ्वील्यादिभ्य इत्यादिषु विशेषणार्थः। अकार उच्चारणार्थः। अनुस्वारोऽनिट्त्वार्थः। ककारो गणज्ञापनार्थः। ष्वप् इति धातुः। प्रक्रिया स्पष्टा ॥ १८ ॥ अवित्परोक्षायाः कित्त्वात्तत्र विशेषः। सूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## स्वपेर्यङ्के च ॥ १९ ॥ [ सि० ४।१।८० ]

स्वपेर्यङि ङे किति च सस्वरान्तस्था य्वृत् स्यात् । ततो द्वित्वे, सुषुपतुः सुषुपुः । सुष्वपिथ सुष्वप्थ ६ । सुप्यात् ७ । स्वप्ता ८ । स्वप्स्यति ९ । अस्वप्स्यत् १० । 'अन श्वसक् प्राणने' प्रपूर्वः । अदुरुपसर्गेति णत्वे 'द्वित्वेऽप्यन्तेऽप्यनितेः परेस्तु वा' इति णत्वे । प्राणिति १ । प्राण्यात् २ । प्राणितु ३ । प्राणीत् प्राणत् ४ । प्राणीत् प्राणिष्टाम् ५ । प्राण प्राणतुः ६ । प्राण्यात् ७ । प्राणिता ८ । प्राणिष्यति ९ । प्राणिष्यत् १० ॥ श्वसिति १ । श्वस्यात् २ । श्वसितु ३ । अश्वसीत्-अश्वसत् ४ । व्यञ्जनादेर्वोपान्त्यस्येति वृद्धिविकल्पे, अश्वासीत्-अश्वसीत् ५ । शश्वास शश्वसतुः ६ । श्वस्यात् ७ । श्वसिता ८ । श्वसिष्यति ९ । अश्वसिष्यत् १० । 'जक्षक् भक्षहसनयोः' । जक्षिति जक्षितः ॥ १९ ॥

'स्वपे०' यङि सोषुप्यते सोषुपीति । यङ्लुपि नेच्छन्त्यन्ये सास्वप्ति । णिमन्तरेण ङस्यासम्भवात् स्वपि(ति)र्ण्यन्तो लभ्यते असूषुपत् । ङे य्वृत् गुणो ह्रस्वत्वं द्वित्वं पूर्वस्य दीर्घत्वमित्यत्र क्रमः । किति सुषुपतुः सुप्यते सुप्यात् । सुषुप्सति 'रुदविद०' ( ४।३।३२ ) इति सनः कित्त्वम् । एष्विति किम् ? स्वपिति । घञन्तादपि केचिदिच्छन्ति स्वापमकरोत् । असुषुपत् । समानलोपित्वान्न दीर्घः । स्वमते तु असस्वापत् । ञीत्त्वात् 'ज्ञानेच्छार्चार्थ०' ( ५।२।९२ ) इति सति क्ते सुप्तः । 'अवः स्वपः' ( २।३।५७ ) निर्दुःसुविपूर्वस्य वकाररहितस्य स्वपेः सकारस्य षः स्यात् । निःषुषुपतुः । दुःषुषुपतुः । सुषुषुपतुः । विषुषुपतुः । निःषुप्तः । दुःषुप्तः । सुषुप्तः । विषुप्तः । अव इति किम् ? निःस्वप्तः दुःस्वप्तः । सुस्वप्तः । विस्वप्तः । विसुष्वाप । 'तृषिधृषि०' ( ५।२।८० ) इति नजिङि स्वप्नक् । 'यजिस्वपि०' ( ५।३।८५ ) इति ने स्वप्नः । असरूपत्वात्पक्षे स्वापः । क्त्वि सुप्त्वा । **अन श्वसक** इति । प्राणन इति प्राणनं जीवनम् । वर्णक्रमस्य प्रतिज्ञानात्स्वपः प्रागनेर्निर्देशे प्राप्ते लाघवार्थमिह पाठः । 'द्वित्वेऽप्यन्तेऽप्य०' ( २।३।८१ ) इति सूत्रम् । अस्यार्थः । अदुरुपसर्गान्तःशब्दस्थाद्रषृवर्णात्परस्यानितेर्नकारस्य द्वित्वे चाद्वित्वे चान्ते चानन्ते च वर्त्तमानस्य णो भवति । परिपूर्वस्य तु वा द्वित्वे, प्राणिणिषति, प्राणिणत् । अद्वित्वे प्राणिति पराणिति । अन्ते क्विपि हे प्राण्, हे पराण् । परेस्तु वा द्वित्वे पर्यणिणिषति पर्यनिनिषति । पर्याणिणत् पर्यानिनत् । अद्वित्वे पर्यणिति पर्यनिति । अन्ते हे पर्यण् हे पर्यन् । परिपूर्वस्य द्वित्वेऽन्ते च नित्यं णत्वमिच्छन्त्येके । अन्ये तु अन्ते अनन्ते च नेच्छन्त्येव । ये तु द्वित्वे कृतेऽपि पुनर्द्वित्वमिच्छन्ति तन्मतेऽपि द्वित्व इति वचनाद्द्वयोरेवाद्ययोर्णत्वं न तृतीयस्य । प्राणिणिषयतेर्ङे प्राणिणिनिषत् । अनन्त्यस्येत्यधिकारादन्त्यस्य न प्राप्नोतीत्यन्ते इति वचनम् । अनितीति तिवा निर्देशो दैवादिकनिवृत्त्यर्थो न तु यङ्लुपनिवृत्त्यर्थः । यङोऽसम्भवात् ॥ अनि घञि वा प्राणः । घञि आनः । उणादौ स्यमिकषि० ( ४६ ) इतीके अनीकम् । ध्याधा० ( २५८ ) इति ने अन्नम् । अस् ( १५२ ) इत्यसि अनः शकटम् । **श्वस** तालव्यादिः दन्त्यान्त्यः । 'श्वसजप०' ( ४।४।७५ ) इति क्तयोर्वेट् । आश्वस्तः आश्वसितः आश्वस्तवान् आश्वसितवान् । 'तन्व्यधी०' ( ५।१।६४ ) इति णे श्वासः । **जक्षक्** इति । अयं रुत्पञ्चकस्य पञ्चमो जक्षपञ्चकस्य त्वाद्य इत्युभयकार्यभाक् । रुत्पञ्चकादितीटि जक्षिति जक्षितः ॥ १९ ॥ बहुवचने सूत्रम्

## अन्तो नो लुक् ॥ २० ॥ [ सि० ४।२।९४ ]

द्युक्तजक्षपञ्चकात्परस्यान्तो नो लुक् स्यात् । जक्षिति १ । जक्ष्यात् २ । जक्षितु ३ । अजक्षीत् अजक्षिताम् ॥ २० ॥

'**अन्तो**' अन्तो नो लुगिति। शितोऽवितोन्तः सम्बन्धिनो नकारस्य लुक् स्यादित्यर्थः ॥ २० ॥ ह्यस्तन्या अनि सूत्रम्

## ह्युक्तजक्षपञ्चतः ॥ २१ ॥ [ सि० ४।२।९३ ]

**कृतद्वित्वाज्जक्षपञ्चकाच्च परस्य शितोऽनः पुस् स्यात् । अजक्षुः ४ । अजक्षीत् ५ । जजक्ष ६ । जक्ष्यात् ७ । जक्षिता ८ । जक्षिष्यति ९ । अजक्षिष्यत् १० । इति रूपपञ्चकम् ।**

**'दरिद्राक् दुर्गतौ' । दरिद्राति ॥ २१ ॥**

'**ह्युक्त०**' द्वे उक्ते यस्य ह्युक्तः । पञ्चानां वर्गः पञ्चत् 'पञ्चदशद्वर्गे वा' ( ६।४।१७५ ) इति निपातः । जक्षाणां पञ्चत् जक्षपञ्चत् तस्मात् । शेषं स्पष्टम् । शतरि जक्षत् । शौ वा जक्षति जक्षन्ति कुलानि । **दरिद्राक्** इति ॥ २१ ॥ व्यञ्जनादौ सूत्रम्

## इर्दरिद्रः ॥ २२ ॥ [ सि० ४।२।९८ ]

**दरिद्रो व्यञ्जनादौ शित्यवित्यात इः स्यात् । दरिद्रितः ॥ २२ ॥**

'**इर्द०**' स्पष्टम् । व्यञ्जनादाविति किम् ? दरिद्रति । शितीत्येव दिदरिद्रासति । अवितीत्येव दरिद्राति ॥ २२ ॥ अविति शिति सूत्रम्

## श्नश्चातः ॥ २३ ॥ [ सि० ४।२।९६ ]

**ह्युक्तजक्षपञ्चतः श्नश्च शित्यवित्यातो लुक् स्यात् । दरिद्रति दरिद्रासि १ । दरिद्रियात् २ । दरिद्रातु दरिद्रितात् दरिद्रिहि ३ । अदरिद्रात् अदरिद्रिताम् अदरिद्रुः ४ ॥ २३ ॥**

'**श्नश्चा०**' श्नश्चेति श्नाप्रत्ययसम्बन्धिन इति । यथा क्रीणन्ति क्रीणन्तु ॥ २३ ॥ अद्यतन्यां सूत्रम्

## दरिद्रोऽद्यतन्यां वा ॥ २४ ॥ [ सि० ४।३।७६ ]

**दरिद्रोऽद्यतन्यां विषये लुग् वा स्यात् । अदरिद्रीत् अदरिद्रिष्टाम् अदरिद्रिषुः । अदरिद्रासीत् अदरिद्रासिष्टाम् अदरिद्रासिषुः ॥ २४ ॥**

'**दरि०**' दरिद्र इति दरिद्रातेरन्तस्येत्यर्थः । अद्यतन्यां विषये इति विषयव्याख्यानादादेशादागम इति **न्यायात्** प्रथमं 'यमिरमिनम्यात०' इति इट् सोन्तश्च न । भावकर्मणोस्तु ञिट् ञिचि 'आत ऐः कृञ्ञौ' ( ४।३।५३ ) इति ऐकारो न । अदरिद्रि । पक्षेऽन्तलुगभावे आत ऐत्वे अदरिद्रायि ॥ २४ ॥ परोक्षायां सूत्रम्

## धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तम् ॥ २५ ॥ [ सि० ३।४।४६ ]

**अनेकस्वराद्धातोः परस्याः परोक्षायाः स्थाने आम् स्यात् । आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते । दरिद्रांश्चकार ददरिद्रौ ६ ॥ २५ ॥**

'**धातो०**' अन्विति विपर्यासव्यवहितनिवृत्त्यर्थम् । तेन चकारचकासां ईहां देवदत्तश्चक्रे इत्यादि न भवति । उपसर्गस्य तु क्रियाया विशेषकत्वान्न व्यवधायकत्वम् । तेन उक्षांप्रचकुर्नगरस्य मार्गा-

नित्यादि भवत्येव । तं पातयां प्रथममास पपात पश्चादित्यत्रापि प्रथममित्यस्य क्रियाविशेषणत्वान्न व्यवधायकत्वम् । प्रभ्रंशयां यो नहुषं चकारेत्ययं त्व(प)प्रयोग एव । ननु च कर्त्राद्यपि क्रियाया विशेषकं भवति तस्याप्यव्यवधायकत्वं प्राप्नोति । नैवम् । क्रियाया एव विशेषकमित्यवधारणस्य विवक्षितत्वात् । कर्त्रादि च द्रव्यस्यापि विशेषणं स्यादिति । ददरिद्राविति 'आतो णव०' ( ४।२।१२० ) इत्यत्र आकारेणैव पपावित्यादिसिद्धौ. औकारविधानं दरिद्रातेर्णव आमादेशानित्यत्वार्थम् । तेन आमादेशाभावे णव औत्वे अशित्यस्सन्नित्यालोपे ददरिद्रौ इति सिद्ध्यति । अन्यथा ददरिद्रो इति स्यात् ॥ २५ ॥ आशीःप्रभृतिषु सूत्रम्

## अशित्यस्सन्णकचूणकानटि ॥ २६ ॥ [ सि० ४।३।७७ ]

**सादिसन्नादिवर्जे अशिति विषये लुक् स्यात् । दरिद्र्यात् ७ । दरिद्रिता ८ । दरिद्रिष्यति ९ । अदरिद्रिष्यत् १० । 'जागृक् निद्राक्षये' । जागर्ति जागृतः जाग्रति । जागर्षि १ । जागृयात् २ । जागर्तु-जागृतात् जागृताम् जाग्रतु । जागृहि-जागृतात् ३ । नामिनो गुणोऽक्ङितीति गुणे ॥ २६ ॥**

**'अशि०'** सादिसन्नादीति सकारादिसन् णकच् णक अनट् वर्जिते अशिति प्रत्यये विषयभूते दरिद्रातेरन्तस्य लुग् भवति । यथा ( दरिद्रयति ) दरिद्रिता दरिद्रितुम् । दरिद्रणीयम् । साधुदरिद्री णिन् । दरिद्र्यते । दरिद्र्यात् । दरिद्राञ्चकृवान् । आमादेशस्यानित्यत्वे ददरिद्वानित्यपि । षष्ठ्यां तु ददरिद्वुष इति भवति । विषयसप्तमीविज्ञानात्पूर्वमेवाकारलोपे दरिद्रातीति दरिद्रः । अजेव भवति नत्वाकारान्तलक्षणो णः । तथा दुर्दरिद्रमित्याकारान्तलक्षणोऽनो न भवति । दरिद्राणम् । दरिद्र इति च घञि 'आत' इति ऐर्न भवति । अशितीति किम् ? दरिद्राति दरिद्रामि अदरिद्राम् । स्सन्नादिवर्जनं किम् ? सनि दिदरिद्रासति । क्रियायां क्रियार्थायां णकचि दरिद्रायको व्रजति । पर्यायार्हेत्यादिना णके दरिद्रायिका वर्तते । 'णकतृचौ' ( ५।१।४८ ) इति च णके दरिद्रायकः । अनटि दरिद्राणम् । सनः सादिविशेषणं किम् ? दिदरिद्रिषति । 'इवृधभ्रस्जदम्भश्रियूर्णुभरज्ञपिसनितनिपतिवृद्दरिद्रः सनः' ( ४।४।४७ ) इति वैकल्पिके इटि सादित्वाभावः । नन्वत्र 'इडेत्पुसि चा०' ( ४।३।९४ ) इत्यनेनाल्लुकि दिदरिद्रिषतीति भविष्यति किं सनः सादिविशेषणेन ? सत्यम् । किन्तु सादिविशेषणं विना इडेत्पुसीत्याल्लुकं असन्णकचेति विशेषनिषेधो बध्नीयात् । अक इत्येव वक्तव्ये णकच्णकयोरुपादानं किम् ? आशिष्यकनि मा भूत् । दरिद्रकः । केचिद्दरिद्रातेरनिटि क्वसौ आलोपं नेच्छन्ति । तन्मते इट् आम् चाभिधानान्न भवतः । ददरिद्रावान् । णौ दरिद्रयति । णौ ङे अददरिद्रत् । णौ विषये आल्लुकं नेच्छन्त्येके । दरिद्रापयति । ङे उपान्त्यस्य ह्रस्वत्वे अददरिद्रपत् । नन्वत्र सन्वद्भावात् पूर्वस्येत्वं प्राप्नोति । नैवम् । येन नाव्यवधानं तेन व्यवहितेऽपि स्यादित्येकवर्णव्यवहिते लघौ लघोः परेण चैकवर्णेन व्यवहिते ङपरे णौ सन्वद्भावो भवति । यथा अपीपचदित्यादौ । अवीव्रजदित्यादौ तु 'स्मृदृत्वर०' ( ४।१।६५ ) इत्यत्वविधानादनेकव्यञ्जनव्यवहिते लघुनीष्यते । इह तु लघोरव्यवधानेऽपि लघोः परेण वर्णसमुदायेन णेर्व्यवधेति न भवति । दरिद्रिता दरिद्रितुम् । वेट्त्वेप्यनेकस्वरत्वात् क्तयोरिट् दरिद्रितः दरिद्रितवान् । अचि घञि वा दरिद्रः । दर्दूरिति तु तॄदॄभ्यां दूः ( ८४६ ) इति दृणातेः । **जागृक्** इति । जागर्त्तीति अकर्मकोऽयम् । प्रतियोगे सकर्मकोऽपि प्रतिजागर्त्ति धर्मम् । प्रतिपालयतीत्यर्थः । 'अन्तो नो लुक्' ( ४।२।९४ ) इति जाग्रति ॥ २६ ॥ दिवि सूत्रम्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## व्यञ्जनाद्देः सश्च दः ॥ २७ ॥ [ सि० ४।३।७८ ]

धातोर्व्यञ्जनात्परस्य देर्लुक्, यथासम्भवं धातुसकारस्य च दः स्यात् । अजागः अजागृताम् ॥ २७ ॥

'व्य०' अजागः इति । नानिष्टेति न्यायात्सन्निपातन्यायोऽत्र न प्रवृत्तस्तेन गुणे कृते देर्लुक् सिद्धः ॥ २७ ॥ बहुवचने सूत्रम्

## पुस्पौ ॥ २८ ॥ [ सि० ४।३।३ ]

नाम्यन्तस्य धातोः पुसि पौ च गुणः स्यात् । अजागरुः ॥ २८ ॥

'पु०' पुसि पौ चेति । 'द्युक्तजक्षपञ्चतः' ( ४।२।९३ ) इत्यनेन पुसि अनेन गुणः । 'अर्त्तिरीव्लीह्रीक्नूयीक्ष्माय्यातां पुः' ( ४।२।२१ ) इति प्वागमे गुणः । यथा अपर्यतीत्यादौ ॥ २८ ॥ सिवि सूत्रम्

## सेः स्द्धां च रुर्वा ॥ २९ ॥ [ सि० ४।३।७९ ]

धातोर्व्यञ्जनात्परस्य सेर्लुक् सकारदकारधकाराणां च यथासम्भवं रुर्वा । अजागः अजागृतम् अजागृत । अजागरम् ४ । न श्विजागृशसेति वृद्ध्यभावे, अजागरीत् अजागरिष्टाम् अजागरिषुः ५ ॥ २९ ॥

'सेः' सकारदकारधकाराणां यथासम्भवं रुर्वेति । यथा अचकास्त्वं अचकास्त्वम् । सकारस्य रुत्वे सिद्धे पक्षे रुत्वबाधनार्थं वचनम् । ततश्च पक्षे 'धुटस्तृतीयः' ( २।१।७६ ) इति सकारस्य दकारो भवति । दकार अभिनस्त्वम् अभिनत्त्वम् । धकार अरुणस्त्वम् अरुणत्त्वम् । रोरुदित्करणं किम् ? उत्वादिकार्यं यथा स्यात् । अभिनोऽत्र । दिप्रत्यासत्तेः सिरपि ह्यस्तन्या एव तेनेह न स्यात् भिनत्सि अजागरीदिति । 'सिचि परस्मै०' ( ४।३।४४ ) इति प्राप्ताया वृद्धेः 'नश्विजागृ०' ( ४।३।४९ ) इति प्रतिषेधः ॥ २९ ॥ परोक्षायां सूत्रम् ।

## जागुषसमिन्धेर्नवा ॥ ३० ॥ [ सि० ३।४।४९ ]

एभ्यः परोक्षाया आम् वा स्यात् । जागराञ्चकार ३ । पक्षे ॥ ३० ॥

'जागु०' एभ्य इति 'जागृक् निद्राक्षये' 'उषू श्रिषू श्लिषू प्रुषू प्लुषू दाहे' सम् पूर्वः 'ञिइन्धैपि दीप्तौ' रुधादिरात्मनेपदी इन्ध धातुः । आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनु प्रयुज्यन्ते । यथा जागराञ्चकार जागराम्बभूव जागरामास । उषाञ्चकार उवोष । समिधाञ्चक्रे समीधे । सम् ग्रहणं किम् ? इन्धाञ्चक्रे प्रेन्धाञ्चक्रे । सोपसर्गादिन्धेराम्न भवत्येवेति कश्चित् । अन्ये तु परोक्षायामिन्धेरामन्तस्यैव प्रयोग इत्याहुः । समोऽन्यत्रापीन्धेराम्विकल्प इत्यन्यः इन्धाञ्चक्रे ईन्धे इति ॥ ३० ॥ पक्षे इति आमभावे सूत्रम्

## आद्योंश एकस्वरः ॥ ३१ ॥ [ सि० ४।१।२ ]

अनेकस्वरस्य धातोराद्य एकस्वरोऽवयवः परोक्षा ङे परे द्विः स्यात् । जागुर्ञ्णिणवि ( ४।३।५२ ) वृद्धिः स्यात् । 'नामिनोऽकलिहलेः' इति सिद्धे नियमार्थमिदम् । तेनान्यत्र ञ्णिति वृद्धिर्न स्यात् । जजागार । अवित्परोक्षायाः कित्त्वे 'जागुः किति' (४।३।६) गुणः स्यात् । जजागरतुः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जजागरुः । अनेकस्वरत्वात् 'ऋत' इतीड्निषेधाभावे जजागरिथ जजागरथुः जजागर । जजागार जजागर जजागरिव जजागरिम ६ । जागर्यात् ७ । जागरिता ८ । जागरिष्यति ९ । अजागरिष्यत् १० । 'चकासृ दीप्तौ' । ऋकार इत् । चकास्ति चकास्तः चकासति १ । चकास्यात् २ । चकास्तु । हेर्धिः 'सो धि वा' (४।३।७२) लुक् । चकाधि चकाद्धि ३ । अचकात् अचकास्ताम् अचकासुः । अचकाः अचकात् ४ । अचकासीत् अचकासिष्टाम् अचकासिषुः । ऋदित्त्वादङागमे अचकासत् ५ । चकासाञ्चकार ६ । चकास्यात् ७ । चकासिता ८ । चकासिष्यति ९ । अचकासिष्यत् १० । 'शासूक् अनुशिष्टौ' । शास्ति ॥ ३१ ॥

'आद्यों०' द्विर्धातुरिति सर्वस्य द्वित्वे प्राप्ते वचनम् । अत्र सूत्रम् 'जागु०' (४।३।५२) ञीति णिदृञ्णिचोरुभयोरपि ग्रहणम् । यथा अजागारि । जागारिष्यते । णिगन्तस्य तु ञेर्णिगा व्यवधानात् न स्यात् । मैत्रोऽजागरि । जागरयिष्यते । अन्यत्र ञ्णितीति जागरकः साधु जागरी जागरं जागरो वर्त्तते । द्विवचनादौ सूत्रम् 'जागुः' (४।३।६) क्ङितीति किम् ? जागृतः । इह कस्मान्न भवति । जजागृवानिति । जागर्त्तेः क्वसुरनभिधानाद्भाषायां नास्तीत्येके । गुणमेवेच्छन्त्यन्ये जजागर्वान् । अपरे तु क्वसुकानयोर्गुणप्रतिषेधमेवाहुः । जजागृवान् व्यतिजजाग्राणः । क्ङिति प्रतिषेधे प्राप्ते वचनम् । अक्ङिति तु पूर्वेणैव गुणः । शतरि अन्तो नो लुकि जाग्रत् । 'जागुर्ञिणवि' (४।३।५२) इति वृद्धेर्ञिणवोरेव नियमान्नामिन इति वृद्ध्यभावे णौ गुणे जागरयति । जागरिता जागरितुम् । क्तयोः जागरितः जागरितवान् । जागुरित्यूके जागरणशीलो जागरूकः । स्त्रियां क्त्यपवादौ 'जागुरश्च' (५।३।१०४) इत्यर्थौ जागरा जागर्या । उणादौ जृशृस्तृ० (७०५) इति ङिति वौ जागृविरग्निः । चकासृक् इति अन्तो नो लुकि चकासति । 'व्यञ्जनाद्दे०' (४।३।७८) इति देर्लुकि सस्य दत्वे च अचकात् । 'द्युक्तजक्ष०' (४।२।९३) इति शिदनः पुसि अचकासुः । 'सेः स्द्धां०' (४।३।७९) इति सेर्लुकि सो वा रुत्वे च अचकास्त्वम् पक्षे 'धुट०' (२।१।७६) इति सस्य दत्वे अचकात्त्वम् । सनि चिचकासिषति । ऋदित्त्वात् ङे न ह्रस्वः अचचकासत् । शासूक् इति अनुशिष्टिर्नियोगः ॥ ३१ ॥ क्ङिति व्यञ्जनादौ सूत्रम्

## इसासः शासोऽङ्व्यञ्जने ॥ ३२ ॥ [ सि० ४।४।११८ ]

शास्तेरंशस्यासोऽङि क्ङिति व्यञ्जनादौ च परे इस् स्यात् । शिष्टः शासति । शास्सि शिष्ठः शिष्ठ । शास्मि शिष्वः शिष्मः १ । शिष्यात् २ । शास्तु शिष्टात् शिष्टाम् शासतु ॥ ३२ ॥

'इसा०' शासः शिसित्यकृत्वा आस इस्विधानं यङ्लुपि शाशिष्ट इत्यादिप्रयोगार्थमन्यथा शिष्ट इत्यादि स्यात् । अङ्व्यञ्जन इति किम् ? शशासतुः । क्ङितीत्येव शास्ति ॥ ३२ ॥ पञ्चम्यादौ सूत्रम्

## शासऽस्हनः शाध्येधिजहि ॥ ३३ ॥ [ सि० ४।२।८४ ]

एषां त्रयाणां ह्यन्तानां यथासङ्ख्यं शाध्येधिजहयः स्युः । शाधि शिष्टात् शिष्टम् शिष्ट । शासानि शासाव शासाम ३ । अशात् अशिष्टाम् अशासुः । अशाः अशात् अशिष्टम् अशिष्ट । अशासम् अशिष्व अशिष्म ४ ॥ ३३ ॥

'शास०' एषामिति 'शासूक् अनुशिष्टौ' 'असक् भुवि' 'हनंक् हिंसागत्योः' इत्येषां त्रयाणामित्यर्थः । यथा शाधि, एधि, जहि । शासूहनोर्यङ्लुप्यपि शाधि जहि । हनेस्तु यङ्लुपि नेच्छन्त्यन्ये जङ्गहि । ३३

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'सेः स्द्धां च०' (४।३।७९) इति सेर्लुकि वैकल्पिके सो रुत्वे च अशास्त्वम्, पक्षे 'धुटस्तृतीयः' (२।१।७६) इति सस्य दत्वे च अशाद्त्वम् ॥ ३३ ॥ अद्यतन्यां सूत्रम्

## शास्त्यसूवक्तिख्यातेरङ् ॥ ३४ ॥ [ सि० ३।४।६० ]

एभ्यश्चतुर्भ्योऽद्यतन्यामङ् स्यात् । अशिषत् अशिषताम् अशिषन् ५ । शशास शशासतुः ६ । शिष्यात् ७ । शास्ता ८ । शासिष्यति ९ । अशासिष्यत् १० ॥ इति जक्षपञ्चकम् ॥ 'वचंक् भाषणे' । वक्ति वक्तः । अन्तिपरस्य वचेः प्रायोऽप्रयोगः । वक्षि वक्थः वक्थ । वच्मि वच्वः वच्मः १ । वच्यात् २ । वक्तु-वक्तात् वक्ताम् वचन्तु । वग्धि ३ । अवक्-अवग् अवक्ताम् अवचन् । अवक्-अवग् अवक्तम् अवक्त । अवचम् अवच्व अवच्म ४ । शास्त्यसूवक्तीत्यङि श्वयत्यसूवचेति वोचादेशे, अवोचत् अवोचताम् अवोचन् ५ । द्वित्वानन्तरं यजादिवशवच इति य्वृति उवाच । यजादिवचेरिति य्वृति द्वित्वे ऊचतुः ऊचुः । उवचिथ-उवक्थ ६ । उच्यात् ७ । वक्ता ८ । वक्ष्यति ९ । अवक्ष्यत् १० । 'मृजौक् शुद्धौ' । लघोरुपान्त्यस्येति गुणे ॥ ३४ ॥

'शास्त्य०' एभ्य इति 'शासूक् अनुशिष्टौ' 'असूच् क्षेपणे' । 'वचंक् परिभाषणे' 'ख्यांक् प्रकथने' एभ्यश्चतुर्भ्य इत्यर्थः । ऊदित्त्वात् क्त्वि वेट् शिष्ट्वा शासित्वा । वेट्त्वात् क्तयोर्नेट् शिष्टः शिष्टवान् । क्विपि 'क्वौ' (४।४।११९) इति सूत्रेण आसः स्थाने इस्, मित्रं शास्तीति मित्रशीः । 'इसासः शासोऽङ्व्यञ्जने' (४।४।११८) इति सूत्रेणैव सिद्धे क्वाविति पृथक्सूत्रकरणं क्विपि व्यञ्जनकार्यमनित्यमितिन्यायज्ञापनार्थम् । तेनाव्ययमाचष्टेऽव्ययिेत्यत्र यलोपाभावो, गिरो गिर इत्यत्र व्यञ्जनाश्रितदीर्घत्वाभावो राजनतीत्यत्र नलोपाभावश्च सिद्धः । अव्ययित्यत्र णिलुकः स्थानित्वं तु 'न सन्धि०' इत्यस्योपस्थितेर्न भवति । क्तौ शिष्टिः । 'इकिस्तिव्०' (५।३।१३८) इति तिव्प्रत्यये शास्ति । उपान्त्यस्येत्यत्र शासेर्वर्जनात् ङे ह्रस्वाभावे अशशासत् । 'दृवृग्स्तुजुषेतिशासः' (५।१।४०) इति क्यपि शिष्यः । 'शासियुधि०' (५।३।१४१) इत्यने दुःशासनः उणादौ शासिशंसि० (८५७) इति तृः शास्ता बुद्धः । प्रशास्ता ऋत्विक् । 'तृस्वसृ०' (१।४।३८) इत्यारि प्रशास्तारौ । [ इति जक्षपञ्चकम् ]

रुत्पञ्चकजक्षपञ्चके समाप्य प्रकृतो वर्णक्रमेऽनुस्त्रियते ।

वचंक् इति । अन्ति परस्य वचेः प्रायोऽप्रयोग इति । तथोक्तं धातुपारायणे अन्तौ वचेः प्रयोगं नेच्छन्त्येके इति । अनुस्वारेत्त्वान्नेट् वक्ता वक्तुम् । प्रवचनीयेति वा कर्त्तर्यनीये प्रवचनीयो गुरुर्धर्मस्य । प्रवचनीयो धर्मो गुरुणा । 'ऋवर्ण०' (५।१।१७) इति घ्यणि प्रवाच्यो ग्रन्थविशेषः । अत्र 'त्यजूयज०' (४।१।११८) इति कत्वाभावः । वचोऽशब्दनाम्नि कत्वाभावे वाच्यमाह । शब्दनाम्नि तु 'क्तेऽनिट०' (४।१।१११) इति कत्वे वाक्यम् । 'वेयिवद०' (५।२।३) इति भूतमात्रे निपातनाद्वा काने अनूचानः । पक्षे अन्ववोचत् । भावाकर्त्रोर्घेत्रि अनुवाकः । 'दिद्युद्दद्०' (५।२।८३) इति क्विपि निपातनात् वचनशीलो वाक् । 'गोचरसंचर०' (५।३।१३१) इति निपातनाद् घे वक्तीति वकः । क्ते उक्तम् लिहाद्यचि श्लोकवचः । उणादौ नीनूरमि० (२२७) इति किति थे उक्थम् साम । त्रट् (४४६) इति त्रटि वक्त्रम् । कृकस्थूराद्वचः कूच (७२८) इत्युणि कृकवाकुः कुक्कुटः । स्थूरवाकुः उच्चध्वनिः । अस् (९५२) इत्यसि वचः । 'वचण् भाषणे' वाचयति युजादित्वाण्णिच् । पक्षे वचति । इति चान्तोऽनिट् । मृजौक् इति तिवादौ गुणे कृते सति ॥ ३४ ॥ सूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## मृजोऽस्य वृद्धिः ॥ ३५ ॥ [ सि० ४।३।४२ ]

**मृजेर्गुणे सत्यकारस्य वृद्धिः स्यात् । यजसृजेति षत्वे मार्ष्टि मृष्टः ॥ ३५ ॥**

**'मृजो०'** मार्ष्टीति । एवं मार्ष्टा मार्ष्टुम् मार्ष्टव्यम् मार्जिता मार्जकः सम्मार्जनम् सम्मार्गः । अत इति किम् ? मृज्यते मरीमृज्यते । मृष्टः मृष्टवान् । कथं म्रष्टा म्रष्टुम् ? । **द्रमिला** जानन्ति ये मृजेरपि सृजादीनामिव रत्वमिच्छन्ति । रत्वमिति सस्वरं रत्वमकारागमेन रत्वं वा ॥ ३५ ॥ स्वरादौ सूत्रम्

## ऋतः स्वरे वा ॥ ३६ ॥ [ सि० ४।३।४३ ]

**मृजेः ऋतः स्वरादौ प्रत्यये वृद्धिर्वा स्यात् मार्जन्ति-मृजन्ति । षढोः कः सीति कत्वे, मार्क्षि मृष्टः मृष्ट । मार्ज्मि मृज्वः मृज्मः १ । मृज्यात् २ । मार्ष्टु-मृष्टात् मृष्टाम् मृजन्तु-मार्जन्तु । हुधुटो हेर्धिरिति मृड्ढि-मृष्टात् मृष्टम् मृष्ट । मार्जानि मार्जाव मार्जाम ३ । अमार्ट्-अमार्ड् अमृष्टाम् अमृजन्-अमार्जन् । अमार्ट-अमार्ड् अमृष्टम् अमृष्ट । अमार्जम् अमृज्व अमृज्म ४ । औदित्त्वाड् विकल्पे, अमार्जीत्-अमार्क्षीत् ५ । ममार्ज ममार्जतुः ममृजतुः ममार्जुः-ममृजुः । ममार्जिथ ६ । मृज्यात् ७ । मार्जिता-मार्ष्टा ८ । मार्जिष्यति मार्क्ष्यति ९ । अमार्जिष्यत्-अमार्क्ष्यत् १० । 'विदक् ज्ञाने' । वेत्ति वित्तः विदन्ति । वेत्सि वित्थः वित्थ । वेद्मि विद्वः विद्मः ॥ ३६ ॥**

**'ऋत०'** ऋत इति किम् ? ममार्ज । अत्र गुणे कृते 'मृजोऽस्य वृद्धिः' ( ४।३।४२ ) इत्यनेन (नित्यं वृद्धिः, नत्वनेन) विकल्पः । ननु गुणात्प्रागेव परत्वाद्वृद्धिः कथं न ? सत्यम् । विकल्पबलात् 'ऋतः स्वरे वा' इत्यस्य विकल्पपक्षे इदमुदाहरणमन्यथा हि परत्वाद् वृद्धिः स्यात् किं व्यावृत्त्या । किंबहुना, गुणे कृते वृद्धिविकल्पो मा भूदित्येवमर्थं ऋत इति व्यावृत्तिस्तेन ममर्ज मर्जयतीति न भवति । स्वर इति किम् ? मृष्टः मृष्ट । मृज्वः मृज्मः । धातोः कार्यं विधीयमानं धात्वधिकारविहित एव प्रत्यये विज्ञायत इति कंसपरिमृज इत्यत्र क्विबन्तस्य धातुत्वेऽपि नामाधिकारविहिते स्यादिप्रत्यये वृद्ध्यभावः । औदित्त्वाद्वेट् मार्ष्टा मार्जिता । वेट्त्वात् क्तयोर्नेट् मृष्टः मृष्टवान् । 'कृवृषि०' ( ५।१।४२ ) इति वा क्यपि परिमृज्यः । पक्षे घ्यणि 'क्तेऽनिट०' ( ४।१।१११ ) इति गत्वे परिमार्ग्यः । 'शोकानुपद०' ( ५।१।१४३ ) इति निपातनात् के तुन्दपरिमृजोऽलसः । अन्यत्र कर्मणोऽणि तुन्द-परिमार्जः । घञि मार्गः । भिदाद्यङि मृजा शुद्धिः । अन्यत्र स्त्रियां क्तौ मृष्टिः । उणादौ अम्यङ्कि० ( ४०५ ) इत्यारे मार्जारः । लत्वे मार्जालः । मृजिखनि० ( ४७३ ) इति डित्यले मलः । 'मृजौण् शौचालङ्कारयोः' युजादित्वाद्वा णिचि मार्जयति । 'णिवेत्ति०' (५।३।१११) इत्यने मार्जना । क्ते मार्जितः मार्जिता रसालेति रूढेः पक्षे मार्जति । इति जान्तः सेट् १ । **'सस्तुक् स्वप्ने'** । उदित्त्वान्ने 'धुटो धुटि स्वे वा' ( १।३।४८ ) इति तो लुकि संस्ति संस्तः संस्तन्ति । संस्तिता । इति सेट् तान्तः । **विदक्** इति वेत्ति इत्यादि रूपाणि व्यक्तानि ॥ ३६ ॥ अत्र विशेषसूत्रम्

## तिवां णवः परस्मै ॥ ३७ ॥ [ सि० ४।२।११७ ]

**वेत्तेः परेषां तिवादीनां परस्मैपदान्येव णवादयो नव यथासङ्ख्यं वा स्युः । वेद विदतुः विदुः । वेत्थ विदथुः विद । वेद विद्व विद्म १ । विद्यात् विद्याताम् विद्युः २ ॥ ३७ ॥**

**'तिवां०'** व्यक्तैव रूपपद्धतिः ॥ ३७ ॥ पञ्चम्यां सूत्रम्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## पञ्चम्याः कृग् ॥ ३८ ॥ [ सि० ३।४।५२ ]

**वेत्तेः परस्याः पञ्चम्याः किदाम् वा स्यात्, आमन्ताच्च पञ्चम्यन्तः कृगनुप्रयुज्यते । विदाङ्करोतु । पक्षे वेत्तु-वित्तात् वित्ताम् विदन्तु । हुधुटो हेर्धिरिति, विद्धि-वित्तात् वित्तम् वित्त । वेदानि वेदाव वेदाम ३ । व्यञ्जनादेरिति दिव्लुपि, अवेत् अवित्ताम् । सिज्विदो भुव इत्युसि अविदुः । सेः स्द्धां च रुर्वा इति सेर्लुपि, दस्य रुत्वे । अवेः अवित्तम् अवित्त । अवेदम् अविद्व अविद्म ४ । अवेदीत् अवेदिष्टाम् अवेदिषुः ५ ॥ ३८ ॥**

'पञ्च०' पञ्चम्याः सर्वेषां वचनानामामादेशो भवति । पुरुषवचनाभिव्यक्तिस्तु अनुप्रयुक्तात्पञ्चम्यन्तात् कृगो भवति । कित्त्वाच्च गुणो न भवति । विदाङ्करोतु विदाङ्कुरुताम् विदाङ्कुर्वन्तु विदाङ्कुरुतम् विदाङ्कुरुत । विदाङ्करवाणि विदाङ्करवाव विदाङ्करवाम । सम्पूर्वात् 'समो गमृच्छि०' ( ३।३।८४ ) इत्यात्मनेपदे संविदाङ्कुरुताम् संविदाङ्कुर्वाताम् । संविदाङ्कुरुष्व संविदाङ्कुर्वाथाम् संविदाङ्कुरुध्वम् । संविदाङ्करवै संविदाङ्करवावहै संविदाङ्करवामहै ॥ ३८ ॥ परोक्षायां सूत्रम्

## वेत्तेः कित् ॥ ३९ ॥ [ सि० ३।४।५१ ]

**वेत्तेः परस्याः परोक्षाया आम्वा स्यात्, स च कित् । विदाञ्चकार ३ । पक्षे विवेद विविदतुः विविदुः । विवेदिथ ६ । विद्यात् विद्यास्ताम् विद्यासुः ७ । वेदिता ८ । वेदिष्यति ९ । अवेदिष्यत् १० । 'हनंक् हिंसागत्योः' । हन्ति । नेर्ङ्गादेति णत्वे प्रणिहन्ति । यमिरमीति नलुपि हतः । गमहनेत्युपान्त्यलुपि हनो ह्नो घ्न इति घ्नादेशे घ्नन्ति । हनोघीति णत्वप्रतिषेधे, प्रघ्नन्ति । हंसि हथः हथ । हन्मि हन्वः हन्मः ॥ ३९ ॥**

'वेत्ते०' विदाञ्चकारेति । एवं विदाम्बभूव विदामास । पक्षे विवेदेत्यादि । विवेदिथेति । एवं विविदथुः विविद । विवेद विविदिव विविदिम । आत्मनेपदे संविदाञ्चक्रे इत्यादि । सेट्त्वात् विदितः विदितवान् । 'वौ व्यञ्जनादेः०' ( ४।३।२५ ) इति विकल्पापवादे 'रुदविद०' ( ४।३।३२ ) इति क्त्वासनोः कित्त्वे विदित्वा विविदिषति । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के विदः । णौ 'साहिसाति०' ( ५।१।५९ ) इति शे वेदयः । क्विपि वित् वेदवित् 'तत्र क्वसु०' ( ५।२।२ ) इति क्वसौ विद्वान् । 'स्क्रसृवृ०' ( ४।४।८१ ) इतीटो 'घसेकस्वर०' ( ४।४।८२ ) इति नियमादत्राभावः । 'गमहनविद्लृविशदृशो वा' ( ४।४।८३ ) इति वेत्तेरपि वेडित्येके । तन्मते विविदिवान् विविद्वान् । स्वमते तु लृकारो लाभार्थस्य विदेर्ग्रहणार्थस्तेन ज्ञानार्थस्य विविद्वानित्येव भवतीति । 'वा वेत्तेः क्वसुः' ( ५।२।२२ ) विद्वान् विदन् । 'वेत्तिच्छिद०' ( ५।२।७५ ) इति घुरे वेदनशीलो विदुरः । 'विन्द्विच्छू' ( ५।२।३४ ) इति निपातनाद्वेदनशीलो विन्दुः । घञि वेदः । स्त्रियां भावाकर्त्रोः नाम्नि 'समज०' ( ५।३।९९ ) इति क्यपि विद्या । 'णिवेत्ति०' ( ५।३।१११ ) इत्यने वेदना । करणाधारे पुन्नाम्नि व्यञ्जनादिति वेदः । 'विद्दृग्भ्यः०' ( ५।४।५४ ) इति णमि अतिथिवेदं भोजयति । उणादौ विदिभिदि० ( २३४ ) इति किथे विदथो ज्ञानी । विदिवृतेर्वा ( ६१० ) इति वा किदिः विदिः शिल्पी । वेदिः इज्यादिस्थानम् । असू ( ९५२ ) इत्यसि नखादित्वाददभावे नवेदाः सर्ववेदाः सर्वस्वदक्षिणक्रतुयाजी । यस्त्वोष्ठ्यादिर्जलकणवाची बिन्दुः स बिन्देर्भृमृतॄ० ( ७१६ ) इत्यौ । 'विदिंच् सत्तायाम्' विद्यते । 'विद्लृंती लाभे' विन्दते विन्दति । 'विदिंप् विचारणे' विन्ते । **तथा चोक्तम्** वेत्तिरूपं 'विद ज्ञाने' विन्ते 'विद विचारणे' विद्यते 'विद सत्तायाम् लाभे' विन्दति विन्दते । 'विदिण् चेतना-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्थाननिवासेषु' वेदयते इति दान्तः सेट् १ । हनंक् इति । 'नेर्ङ्गादा०' (२।३।७९) इति नेर्णत्वे प्रणिहन्ति चौरस्येति । अत्र 'निप्रेभ्य०' (२।३।१५) इति वा कर्मणः कर्मत्वे शेषषष्ठी । पक्षे चौरं प्रणिहन्ति ॥ ३९ ॥ हनो नस्य णत्वे सूत्रम्

## हनः ॥ ४० ॥ [ सि० २।३।८२ ]

अदुरुपसर्गान्तस्थाद्रादेः परस्य हन्तेर्नो ण् स्यात् ॥ ४० ॥

'हनः' यथा प्रहण्यादित्यादौ नित्यं णत्वम् । ञमोः परयोस्तु वा णत्वम् ॥ ४० ॥ तथा च सूत्रम्

## वमि वा ॥ ४१ ॥ [ सि० २।३।८३ ]

ञमोः परयोस्तु वा । प्रहण्मि-प्रहन्मि प्रहण्वः-प्रहन्वः १ । हन्यात्-प्रहण्यात् २ । हन्तु-हतात् हताम् घ्नन्तु । शासाऽस्हन इति, जहि-हतात् हतम् हत । हनानि हनाव हनाम ३ । अहन् अहताम् अघ्नन् । अहन् अहतम् अहत । अहनम् अहन्व अहन्म ४ ॥ ४१ ॥

'वमि०' स्पष्टम् । जहि इति । जहि शत्रून् । यङ्लुपि नेच्छन्त्येके । तन्मते 'यमिरमि०' (४।२।५५) इति नलुकि जङ्घहि । ये तु तिवा श्वेति न्यायस्य सूत्रनिर्दिष्टेऽपि प्रवृत्तेरभ्युपगमाद्य-मिरमीति लुगभावं 'अहन्पञ्चम०' (४।१।१०७) इति हन्तेरपि दीर्घत्वं चेच्छन्ति । तेषां जङ्घाहि ॥ ४१ ॥ अद्यतन्यां सूत्रम्

## अद्यतन्यां वा त्वात्मने ॥ ४२ ॥ [ सि० ४।४।२२ ]

अद्यतन्यां विषये हनो वधः स्यात्, आत्मनेपदे तु वा । इट ईतीति सिज्लोपे ॥ ४२ ॥

'अद्य०' स्पष्टम् । वधादेशे सति ॥ ४२ ॥ सूत्रम्

## अतः ॥ ४३ ॥ [ सि० ४।३।८२ ]

अदन्ताद्धातोर्विहितेऽशिति प्रत्यये धातोर्लुक् स्यात्, इत्यकारलुपि । अवधीत् अवधिष्टाम् अवधिषुः ५ ॥ ४३ ॥

'अतः' व्यक्तम् । अवधीदिति । स्थानिवद्भावेनानुस्वारेत्त्वेऽप्यनेकस्वरत्वादिति स्वरस्य पर इत्यलुकः स्थानित्वात् 'व्यञ्जनादेर्वोपान्त्यस्यातः' (४।३।४७) इति वृद्धिर्न भवति ॥ ४३ ॥ परोक्षाणवि सूत्रम्

## ञिणवि घन् ॥ ४४ ॥ [ सि० ४।३।१०९ ]

ञौ णवि च परे हन्तेर्घन् स्यात् । ततो द्वित्वे, द्वितीयतुर्ययोरिति घस्य गत्वे, गहोर्ज इति तस्य जत्वे, वृद्धौ च जघान ॥ ४४ ॥ हनो द्वित्वे गमहनेत्युपान्त्यलुपि

'ञिण०' 'अङे हिहनो०' (४।१।३४) इति सिद्धौ णवग्रहणं घात् बाधनार्थम् । ञौ यथा अघानि ॥ ४४ ॥ द्विवचनादौ सूत्रम्

## अङे हिहनो हो घः पूर्वात् ॥ ४५ ॥ [ सि० ४।१।३४ ]

हिहनोर्ङवर्जे प्रत्यये परे द्वित्वे सति पूर्वस्मात्परस्य हो घः स्यात् । जघ्नतुः जघ्नुः । जघनिथ-जघन्थ जघ्नथुः जघ्न । जघान-जघन जघ्निव जघ्निम ६ ॥ ४५ ॥

'अङे०' हिहनोरिति 'हिंट् गतिवृद्ध्योः' 'हनंक् हिंसागत्योः' इत्यनयोरित्यर्थः । हि, प्रजिघाय प्रजिघीषति । प्रजेघीयते प्रजेघेति । हन्, जिघांसति जङ्घन्यते जङ्घनीति । अङ इति किम् ? प्राजी-



Jain Education International For Personal & Private Use Only www.jainelibrary.org

हयत् अङे द्विर्वचननिमित्तप्रत्ययेऽनन्तरस्य विज्ञानादिह न भवति । हनयितुमिच्छति जिहनयिषति (हननीयितुमिच्छति जिहननीयिषति इत्यपि सिद्धहेमबृहद्वृत्तौ) ञ्पर्युदासात्तु णिञ्यवधाने भवति । प्रजिघायियिषति । पूर्वादिति वचनान्न च द्विरिति निवृत्तम् । थवि 'सृजिदृशि०' (४।४।७८) इति वेटि जघनिथ जघन्थेति ॥ ४५ ॥ आशिषि सूत्रम्

## हनो वध आशिष्यञौ ॥ ४६ ॥ [ सि० ४।४।२१ ]

**आशीर्विषये हन्तेर्वधः स्यात्, न तु ञिटि । वध्यात् वध्यास्ताम् वध्यासुः ७ । हन्ता ८ । हनृतः स्यस्येतीडागमे, हनिष्यति ९ । अहनिष्यत् १० । 'वशक् कान्तौ' । यजसृजेति षत्वे, तवर्गस्य श्ववर्गेति टत्वे, वष्टि ॥ ४६ ॥**

**'हनो०'** आशीर्विषये इति । अत्र विषयविज्ञानात्पूर्वमेवादेशे वध्यादित्यकारलोपः । अन्यथा 'अतः' इति सूत्रेऽपि विहितव्याख्यानात्स न स्यात् । अञाविति किम्? 'भावकर्मणोः' (३।४।६८) 'स्वरग्रहदृशहन्भ्यः स्यसिजाशीःश्वस्तन्याम्०' (३।४।६९) इति ञिटि घानिषीष्ट घानिष्यते त्वया । सनि 'स्वरहन०' (४।१।१०४) इति दीर्घे जिघांसति । यङि 'हनो घ्नीर्वधे' (४।३।९९) जेघ्नीयते । वधादन्यत्र जङ्घन्यते । 'चराचरे०' (४।१।१३) इत्यचि वा निपातनात् घनाघनः । पक्षे हनः 'क्लेशादिभ्योऽपात्' (५।१।८१) क्लेशापहः तमोऽपहः । 'कुमारशीर्षाणिन्' (५।१।८२) कुमारघाती शीर्षघाती । 'अचित्ते टक्' (५।१।८३) पित्तघ्नं घृतम् । वातघ्नं तैलम् । 'जायापतेश्चिह्नवति' (५।१।८४) जायाघ्नो द्विजः । पतिघ्नी कन्या । 'ब्रह्मादिभ्यः' (५।१।८५) ब्रह्मघ्नः । शत्रुघ्नः । बाहुलकात् सम्प्रदानेऽपि । गां हन्ति यस्मै दातुं स गोघ्नोऽतिथिः । 'हस्तिबाहुकपाटाच्छक्तौ' (५।१।८६) हस्तिघ्नः बाहुघ्नः कपाटघ्नो मल्लः । शक्तेरन्यत्र हस्तिघातो रसदः । एवं बाहुघातः कपाटघातः । एषु 'कर्मणोऽण्' (५।१।७२) इत्यण् । 'नगरादगजे' (५।१।८७) नगरघ्नोऽरिः । गजे तु नगरघातः । राजानं हन्ति 'राजघः' (५।१।८८) 'पाणिघताडघौ शिल्पिनि' (५।१।८९) अन्यत्र कर्मणोऽपि पाणिघातः ताडघातः । एवं दार्वाघातः । चार्वाघातः । वर्णसङ्घातः । दार्वाघाटः चार्वाघाटः वर्णसंघाट इति तु घटतेः, हन्तेरेव वा पृषोदरादित्वात् । 'हनो णिन्' (५।१।१६०) पितृघाती । 'ब्रह्मभ्रूण०' (५।१।१६१) इति भूते क्विपि ब्रह्महा, भ्रूणहा, वृत्रहा । 'क्वचित्' (५।१।१७१) डे वरमाहन्ति वराहः । पटे हन्यते पटहः । कलं हन्ति कलहः । 'युजभुज०' (५।२।५०) इति घिनणि अभ्याहननशीलोऽभ्याघाती । 'शृकम०' (५।२।४०) इत्युकणि आघातशील आघातुकः (व्याधः) । 'हनोऽन्तर्घनान्तर्घणौ देशे' (५।३।३४) अन्तर्हन्यते यस्मिन् अन्तर्घनः अन्तर्घणो वा देशः, अन्तर्घातोऽन्यः । 'प्रघणप्रघाणौ गृहांशे' (५।३।३५) प्रघणः प्रघाणश्च द्वारालिन्दकः । 'निघोद्घसङ्घोद्घनाऽपघनोपघ्नं निमित्तप्रशस्तगणात्याधानाङ्गासन्नम्' (५।३।३६) निघाः वृक्षाः । निघाः शालयः । उद्घो मनुष्यः प्रशस्त इत्यर्थः । 'मुर्त्तिनिचिताऽभ्रे घनः' (५।३।३७) दध्नो घनः काठिन्यमित्यर्थः । घनं दधीति गुणवचनत्वात् । घनं निचितम्, घनोऽभ्रम् । 'व्ययोद्रोः करणे' (५।३।३८) विघनः । अयोघनः । अरीहणादिपाठाण्णत्वे द्रुघणः ॥ 'स्तम्बाद् घ्नश्च' (५।३।३९) स्तम्बघ्नो दण्डः । स्तम्बघनः । 'परेर्घः' (५।३।४०) 'परेर्घाङ्कयोगे' (२।३।१०३) इति लत्वे पलिघः । 'स्थादिभ्यः कः' (५।३।८२) इति के, विहन्यतेऽनेनेति विघ्नः । 'हनो वा वध् च' (५।३।४६) वधः, घातः । वध्य इति वधेर्घ्यणि 'न जन०' (४।३।५४) इति वृद्धिप्रतिषेधात् वधमर्हतीति वा दण्डादेर्ये । 'सातिहेति०' (५।३।९४) इति क्तौ निपातनात् हतिः । 'हनश्च०' (५।४।६३) इति णमि समूल-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

घातं हन्ति । 'करणेभ्यः' ( ५।४।६४ ) उपलघातं हन्ति । 'हिंसार्थाद्०' ( ५।४।७४ ) इति णमि दण्डोपघातं गाः कलयति । 'तृतीयोक्तं वा' ( ३।१।५० ) इति समासः । पक्षे दण्डेनोपघातम् । णौ करणेऽनटि परिघातनः परिघः । उणादौ कीचकपेचक० ( ३३ ) इति निपातनाद्वधकः हन्ता व्याधिश्च । वधकं पद्मबीजम् । बाहुलकादन्यत्रापि वधादेशः । वृत्रवधः शक्रः । वधिता वध्यः वधनम् ( ३३ ) सीमन्त० ( २२२ ) इत्यन्ते निपातनात् हेमन्तः । नीनूरमि० ( २२७ ) इति थे हथः पन्थाः कालश्च । हनेर्घतजघौ च ( २७२ ) इत्यने घतनः पापः । जघनं श्रोणिः । हिमं हेममिति तु क्षुहिभ्यां वा ( ३४१ ) इति वा किति मे हिनोतेः । कोरचोर० ( ४३४ ) इत्योरे निपातनात् घोरः भीमः । मावावदि० ( ५६४ ) इति से हंसः । कमिवमि० ( ६१८ ) इति णिदिः घातिः प्रहरणम् । बाहुलकाद् घातादेशाभावे हानिः उच्छित्तिः । तत एव वा णित्त्वे हनिरायुधम् । हन्तेरंह च ( ६५४ ) इत्यतौ अंहति व्याधिः रथश्च । कृहनेस्तुकनुकौ ( ७९१ ) अनेन तुकि हतुर्हिमम् । नुकि बाहुलकान्नलुकि च हनुः कपोलाधः । अनेहेति तु नञ ईहेरेहेधौ च ( ९७५ ) इत्यसि । इति नकारान्तोऽनिट् । **वशक्** इति कान्तिरिच्छा ॥ ४६ ॥ क्ङिति सूत्रम्

## वशेरयङि ॥ ४७ ॥ [ सि० ४।१।८३ ]

**वशेः सस्वरान्तस्था अयङि क्ङिति य्वृत्स्यात् । उष्टः उशन्ति । वक्षि उष्ठः उष्ठ । वश्मि उश्वः उश्मः १ । उश्यात् २ । वष्टु–उष्टात् उष्टाम् उशन्तु । उड्ढि–उष्टात् उष्टम् उष्ट । वशानि वशाव वशाम ३ । अवट्–ड् य्वृति स्वरादेस्तास्विति वृद्धौ, औष्टाम् औशन् । अवट्–ड् औशम् । औश्व औश्म ४ । व्यञ्जनादेर्वोपान्त्यस्यात इति वृद्धिविकल्पे, अवाशीत्–अवशीत् अवाशिष्टाम् अवशिष्टाम् ५ । द्वित्वे यजादिवश इति य्वृति वृद्धौ उवाश । वशेरयङि इति य्वृति द्वित्वे च ऊशतुः ऊशुः । उवशिथ ऊशथुः ऊश । उवाश–उवश ऊशिव ऊशिम ६ । उश्यात् उश्यास्ताम् ७ । वशिता ८ । वशिष्यति ९ । अवशिष्यत् १० । 'असक् भुवि' । अस्ति ॥ ४७ ॥**

'वशे०' अयङीति किम् ? वावश्यते । क्ये उश्यते । वशिवा । के उशितः । णौ नन्द्याद्यने वाशनः । 'युवर्ण०' ( ५।३।२८ ) इत्यलि वशः । 'साक्षादादि०' ( ३।१।१४ ) इति वा गतित्वे वशेकृत्य वशेकृत्वा(गतः) । गणनिर्देशात्सप्तम्या अलुप् । उणादौ घसिवशि० ( ४१९ ) इति कितीरे उशीरं वीरणीमूलम् । वशेः कित् ( ८७६ ) इतीजि उशिक् कान्तः उशीरं च । वष्टेः कनस् ( ९८५ ) उशनाः शुक्रः । घसिवशीति छान्दसावित्यन्ये । भाषायामपि प्रयोगदर्शनादत्रोपात्तौ । इति शान्तः सेट् १ । **असक्** इति । भुवीति भवनं भूः सत्ता इत्यर्थः ॥ ४७ ॥ अविति शिति सूत्रम्

## श्नाऽस्त्योर्लुक् ॥ ४८ ॥ [ सि० ४।२।९० ]

**श्नश्चास्तेश्चातः शित्यविति लुक् स्यात् । स्तः । सन्ति ॥ ४८ ॥**

**'श्नास्त्यो०'** अस्येति । 'रुधां स्वराच्छ्नो न लुक् च' ( ३।४।८२ ) इति विहितस्य श्नप्रत्ययस्यातः शित्यविति लुक् स्यात् । यथा रुन्द्धः ॥ ४८ ॥ सादि प्रत्यये एति च सूत्रम्

## अस्तेः सि हस्त्वेति ॥ ४९ ॥ [ सि० ४।३।७३ ]

**अस्तेः सस्य लुक् स्यात् सादौ प्रत्यये, एति च सस्य हः स्यात् । असि स्थः स्थ । अस्मि स्वः स्मः १ । स्यात् स्याताम् स्युः २ । अस्तु–स्तात् स्ताम् सन्तु । शासस् इति, एधि–स्तात् स्तम्**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**स्त । असानि असाव असाम ३ । सःसिजस्तेरितीदागमे एत्यस्तेरिति वृद्धौ च आसीत् आस्ताम् आसन् । आसीः आस्तम् आस्त । आसम् आस्व आस्म ४ ॥ ४९ ॥**

**'अस्ते०'** एति चेति 'क्रियाव्यतिहारे०' ( ३।३।२३ ) इत्यात्मनेपदे 'अस्तेः सि०' इति सो लुकि व्यतिसे । हस्त्वेति व्यतिहे । धातोरनेकेत्यत्र भ्वस्त्योरेकतरानुप्रयोगेणैव साध्यस्य सिद्धेरुभयोरुपादानादस्तेर्भ्वादेशाभावे चकासामहे चैत्रेण ॥ ४९ ॥ अशिद्विभक्तिविषये सूत्रम्

## अस्तिब्रुवोर्भूवचावशिति ॥ ५० ॥ [ सि० ४।४।१ ]

**अस्तिब्रुवोर्यथासङ्ख्यं भूवचौ स्याताम् अशिति विषये । अभूत् ५ । बभूव ६ । इत्यादि-प्राग्वत् ॥ ५० ॥**

**'अस्ति०'** स्पष्टम् ॥ ५० ॥ उपसर्गयोगे सूत्रम् ।

## प्रादुरुपसर्गाद्यस्वरेऽस्तेः ॥ ५१ ॥ [ सि० २।३।५८ ]

**प्रादुःशब्दादुपसर्गस्थाच्च नाम्यन्तस्थाकवर्गात्परस्यास्तेः सकारस्य यादौ स्वरादौ च प्रत्यये षः स्यात् । प्रादुष्ष्यात् निष्यात् प्रादुष्षन्ति निषन्ति । शिड्नान्तरेऽपि । निःषन्ति ॥ ५१ ॥**

**इति परस्मैपदिनः ।**

**'प्रादु०'** स्पष्टम् । शतरि सन् सती । क्वयोः 'उवर्णात्' ( ४।४।५८ ) इति नेट् । भूतः भूतवान् । 'य एचातः' ( ५।१।२८ ) इति ये 'व्यक्ये' ( १।२।२५ ) इत्यवि च भव्यम् । 'कृभ्वस्तिभ्यां०' ( ७।२।१२६ ) इति च्वौ शुक्लीस्याद्दत्तम् । 'असी गत्यादानयोश्च' असते आस । 'असूच् क्षेपणे' अस्यति । उपलक्षणत्वात् 'षसक् स्वप्ने' 'षः स०' ( २।३।९८ ) इति सत्वे सस्ति सस्तः ससन्ति । सस्यात् । सस्तु सस्तात् । असद् असत् । ससाद 'अनादेशादे०' ( ४।१।२४ ) इत्येत्वे द्वित्वाभावे च सेसतुः सेसुः । ससिता । षोपदेशत्वात् 'नाम्यन्तस्था०' ( २।३।१५ ) इति षत्वे सिषासयिषति । उणादौ षसेर्णित् ( २५९ ) इति ने सास्ना । स्थाछामा० ( ३५७ ) इति सस्यम् । इति द्वौ सान्तौ सेटौ २ ।

**यङ्लुक्** ( च ) । सर्वे धातवो यङ्लुबन्ताः कित्करणाददादौ परस्मैपदिनः । 'कर्त्तर्यनद्भ्य०' ( ३।४।७१ ) इत्यत्रादादिवर्जनाच्छवभावे 'शेषात्०' ( ३।३।१०० ) इति परस्मैपदे 'यङ्तुरुस्तोर्बहुलम्' ( ३।४।६४ ) इति बोभवीति बोभोति । पापचीति पापक्ति । वावदीति वावत्ति । पास्पर्द्धीति पास्पर्द्धि । 'क्रियाव्यतिहारे०' ( ३।३।२३ ) इत्यात्मनेपदे 'शीङोरत्' ( ४।२।११५ ) इत्यत्र ङित्रिर्देशेन यङ्लुबन्तस्याग्रहणादन्तो रदादेशाभावेऽनत इत्यति 'योऽनेकस्वरस्य' ( २।१।५६ ) इति यत्वे च ( व्यतिशेश्यते ) [ व्यतिशेशीति व्यतिशेशियाते व्यतिशेशियते ? ] 'शीङ एः०' ( ४।३।१०४ ) इत्यत्राङित्रिर्देशात्तिवाशवेति यङ्लुबन्तस्याग्रहणम् । तेनैर्नास्ति । यङ्लुबन्तमात्मनेपदे न प्रयुज्यते इत्येके । भावकर्मणोरात्मनेपदे न प्रयुज्यते इत्यन्ये । यङ्लुबन्तस्य चर्करीतं चर्करीतिञ्च पूर्वेषां संज्ञा । यङ्लुबन्तं छन्दस्येवेति केचित् ।



इति परस्मैपदिनः पञ्चचत्वारिंशत् ॥ ५१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अदादय आत्मनेपदिनः ।

**'इङ्क् अध्ययने' । ङकार आत्मनेपदार्थः, अधिपूर्वश्चायम् । अधीते । धातोरिवर्णेतीयादेशे अधीयाते अधीयते । अधीषे १ । अधीयीत अधीयीयाताम् । २ । अधीताम् अधीयाताम् ३ । अध्यैत इयादेशे वृद्धौ च अध्यैयाताम् अध्यैयत ४ ।**

अथात्मनेपदिनोऽदादयो निरूप्यन्ते । **इङ्क्** इति । अधिपूर्वश्चायमिति । इङिकोऽधिनावश्यम्भावी योगः । यदाहुः 'धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते । तमेव विशिनष्ट्यन्योऽनर्थकोऽन्यः प्रयुज्यते' ॥ १ ॥ अध्यैत अध्यैयाताम् । 'स्वरादेस्तासु' (४।४।३१) इति सर्वत्र वृद्धिः । अद्यतन्यां सूत्रम्

## वाद्यतनीक्रियातिपत्त्योर्गीङ् ॥ ५२ ॥ [ सि० ४।४।२८ ]

**अनयोः परयोरिङो गीङ् वा स्यात् । अध्यगीष्ट अध्यगीषाताम् अध्यगीषत । अध्यैष्ट अध्यैषाताम् अध्यैषत ५ ॥ ५२ ॥**

**'वाद्य०'** अध्यगीष्टेत्यादि । पक्षे 'स्वरादेस्तासु' (४।४।३१) इति वृद्धौ अध्यैष्टेत्यादि ॥ ५२ ॥ परोक्षायां सूत्रम्

## गाः परोक्षायाम् ॥ ५३ ॥ [ सि० ४।४।२६ ]

**इङः परोक्षाविषये गाः स्यात् । अधिजगे ६ । अध्येषीष्ट ७ । अध्येता ८ । अध्येष्यते ९ । अध्यगीष्यत अध्यैष्यत १० । 'शीङ्क् स्वप्ने' ॥ ५३ ॥**

**'गाः०'** परोक्षाविषय इति । विषयव्याख्यानात् 'प्राक्तु स्वरे स्वरविधेः' इति नोपतिष्ठते । तेन प्रागेव द्वित्वं न भवति । ततो गादेशानन्तरं द्वित्वे अधिजगे इत्यादि । 'नामिनः०' (४।३।१) इति गुणे अध्येषीष्ट ७ । अध्येता ८ । अध्येष्यते ९ । क्रियातिपत्तौ १० गीङादेशे अध्यगीष्यत पक्षे 'स्वरादेस्तासु' (४।४।३१) इति वृद्धौ अध्यैष्यतेत्यादि । णौ सन् ङे वा अधिजिगापयिषति अध्यजीगपत् । पक्षे 'णौ क्रीजीङः' (४।२।१०) इत्यात्वे 'अर्त्तिरी०' (४।२।२१) इति पौ च अध्यापिपयिषति अध्यापिपत् । 'सनीङश्च' (४।४।२५) इति गमौ 'स्वरहन०' (४।१।१०४) इति दीर्घे च अधिजिगांसते । अनुस्वारेत्त्वान्नेट् अध्येतुम् । 'गमोऽनात्मने' (४।४।५१) इति सादेरादिरिट् अधिजिगमिषितव्यम् । 'य एचातः' (५।१।२८) इति ये अध्येयम् । णके अध्यायकः । ण्यन्तात् णके अध्यापकः । 'कर्मजा तृचा च' (३।१।८३) इति प्रतिषिद्धोऽपि याजकादित्वात् षष्ठीसमासः साध्वध्यापकः । क्ते अधीतम् । 'इष्टादेः' (७।१।१६८) इतीति अधीती शास्त्रे । अत्र 'व्याप्ये क्तेनः' (२।२।९९) इति द्वितीयापवादः सप्तमी । मनि अध्येमा । विचि अध्यैः । क्विपि अधीत् । 'धारीङोऽकृच्छ्रेऽतृश्' (५।२।२५) अधीयन् सिद्धान्तम् । अत्र 'तृन्नुदन्त०' (२।२।९०) इति प्रतिषेधात् 'कर्मणि कृतः' (२।२।८३) इति षष्ठी नास्ति । 'युवर्ण०' (५।३।२८) इत्यलपवादे इङोपादाने तु टिद्वेति घञि उपाध्यायः । स्त्री चेत् उपाध्याया । टित्त्वपक्षे 'अणञेये०' (२।४।२०) इति ङ्यां उपाध्यायी । धवयोगे तु उपाध्यायस्य भार्या 'मातुलाचार्योपाध्यायाद्वा' (२।४।६३) इति ङ्यामानागमे उपाध्यायानी उपाध्यायी । पुन्नाम्नि घापवादे 'न्यायावाय०' (५।३।१३४) इति घञि अधीयतेऽस्मिन्नित्यध्यायः । इति ह्रस्वेकारान्तोऽनिट् । **शीङ्क्** इति ॥ ५३ ॥ शिति सूत्रम्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## शीङ एः शिति ॥ ५४ ॥ [ सि० ४।३।१०४ ]

शेते शयाते ॥ ५४ ॥

**'शीङ्'** शितीति किम् ? शिश्ये । संशीतिः ङिन्निर्देशाद्यङ्लुपि न भवति । शेशेति । शेशयीति शेशीतः शेश्यति ॥ ५४ ॥ बहुवचने सूत्रम्

## शीङो रत् ॥ ५५ ॥ [ सि० ४।२।११५ ]

शीङः परस्याऽऽत्मनेपदस्थस्याऽन्तो रत् स्यात् । शेरते १ । शयीत २ । शेताम् शयाताम् शेरताम् ३ । अशेत ४ । अशयिष्ट ५ । शिश्ये ६ । शयिषीष्ट ७ । शयिता ८ । शयिष्यते ९ । अशयिष्यत १० । 'षूङौक् प्राणिगर्भविमोचने' । सूते १ । 'धातोरिवर्णोवर्णस्य०' इति उवादेशे सुवीत २ । सूताम् विच्छितोऽक्ङित्त्वाद्गुणे प्राप्ते । सूतेः पञ्चम्याम् (४।३।१३) गुणो न स्यात् । सुवै ३ । असूत ४ । औदित्त्वादिड्विकल्पः । असविष्ट असविषाताम् असविषत । असोष्ट असोषाताम् असोषुः ५ । सुषुवे सुषुविषे ६ । सोषीष्ट-सविषीष्ट ७ । सोता-सविता ८ । सोष्यते-सविष्यते ९ । असोष्यत-असविष्यत १० । इत्यादि । 'ईडिक् स्तुतौ' । ईट्टे ईडाते ईडते ॥ ५५ ॥

**'शीङो०'** स्पष्टम् । 'अधेः शीङ्०' (२।२।२०) इत्याधारस्य कर्मत्वे ग्राममधिशेते । **क्ङिति यि शय्** (४।३।१०५) शय्यते अधिशय्य गतः । यङि शाशय्यते । यीति किम् ? शिश्यानः । क्ङितीति किम् ? 'य एचातः' (५।१।२८) इति ये शेयम् । यङ्लुपि न भवति । संशेशीय । क्त्वो यपि संशय्य शयिता शयितुम् । शयितव्यम् । शयितः शयितवान् । अचि शयः । 'पार्श्वादिभ्यः शीङ' इत्यः पार्श्वशयः । 'ऊर्ध्वादिभ्यः कर्तुः' (५।१।१३६) ऊर्ध्वशयः उत्तानशयः । 'आधारात्' (५।१।१३७) खशयः गिरिशयः । गिरिश इति तु लोमादित्वान्मत्वर्थीये शे । स्थण्डिलाच्छेते 'व्रते' इति णिनि स्थण्डिलशायी । 'श्लिषशीङ' (५।१।९) इति साप्यादपि वा कर्त्तरि क्ते 'न डीङ्शीङ्' (४।३।२७) इति कित्त्वप्रतिषेधाद्गुणे उपशयितो गुरुं शिष्यः । पक्षे कर्मणि क्ते उपशयितो गुरुः शिष्येण । 'शीङ्श्रद्धा०' (५।२।३७) इत्यालौ शयनशीलः शयालुः । 'युवर्ण' (५।३।२८) इत्यलि संशयः । 'व्युपाच्छीङः' (५।३।७७) इति घञि तव विशायः मम विशायः । तव राजोपशायः मम राजोपशायः । 'समज०' (५।३।९९) इति क्यपि शेरतेऽस्यामिति शय्या । आधारेऽनटि शयनम् । शवानां शयनं श्मशानमिति पृषोदरादिः । उणादौ शीभी० (७१) इत्यानके शयानकः अजगरः शैलश्च । शिखा शाखेति श्यतेरिश्च वा (८५) इति खे श्यतेः । शीरी० (२०१) इति किति ते शीतम् । हपृभृ० (२०७) इत्यते शयतः निद्रालुश्चन्द्रश्च । न्युद्भ्यां शीङः । (२२८) इति किति थे निशेरतेऽस्मिन्निति निशीथः अर्द्धरात्रः रात्रिः प्रदोषश्च । उच्छीथः स्वप्नः टिट्टिभश्च । भृशीशपि० (२३२) इत्यथे शयथः अजगरः । जीणूशीदी० (२६१) इति किति ने शीनः पीलुः । शीङः सन्वत् (२६७) इति डिति ने शिश्नं मेढ्रम् । भापा० (२९६) इति पप्रत्यये शेपः पुच्छम् । रीशीभ्यां फः (३१४) शेफः मेढ्रम् । शुकशीमूभ्यः कित् (४६३) इति ले शीलम् । शीङस्तलक्पालवालण्वलण्वलाः (५०१) शीतलं अनुष्णम् । शेपालम् जपादित्वाद्वत्वे शेवालं शेवलं शैवालं शैवलं च जलमलः । शीङापो ह्रस्वश्च वा (५०६) इति वे शिवं क्षेमं सुखं मोक्षपदं च । शिवा हरीतकी । शेवं धनं सुखं च । शेवः अजगरः । शेवा । प्रचला निद्राविशेषः मेढ्रश्च । भूमृतृ०

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(७१६) इत्युः शयुः अजगरः । शीङो धुक् (७८४) शीधुः । शीङः फश्च (९८२) इति फसि पसि च शेफः शेपश्च मेढ्रः । शेखर शिखरौ तु शाखेरिदेतौ चातः (४००) इत्यरे शाखेः । '**दीधीङ्** दीप्तिदेवनयोः' । **वेवीङ्** वीसमानार्थः । एतावपि केचित्पठन्ति । छान्दसत्वात्तूपेक्षितौ । इति दीर्घेकारान्तोऽनिट् । उपलक्षणत्वात् '**ह्नुङ्क्** अपनयने' अपनयनमपलापः । '**मनयवलपरे हे**' (१।३।१५) मनयवलपरे हे परे मोऽनुनासिकानुस्वारौ स्याताम् । किम्ह्मलयति किं ह्मलयति । किन्ह्नुते किं ह्नुते । किंह्यः कियँह्यः । किवँह्वलयति । किंह्वलयति । किल्ँह्लादते किंह्लादते । एषु किंह्नुते इति प्रकृतधातो रूपम् । 'श्लाघह्नुङ्स्था०' (२।२।६०) इति चतुर्थ्यां चैत्राय निह्नुते । जुह्नुवे । यङि जोह्नूयते । अनुस्वारेत्त्वान्नेट् ह्नोता ह्नोतव्यम् । 'य एचातः' (५।१।२८) इति ये ह्नव्यम् । 'उवर्णात्०' (५।१।१९) इति घ्यणि ह्नाव्यमवश्यम् । 'युवर्ण०' (५।३।२८) इत्यलि अपह्नवः । इत्युदन्तोऽनिट् । **षूङौक्** इति । 'षः सोऽष्ट्यै०' (२।३।९८) इति सत्वे सूते इत्यादि व्यक्तम् । षोपदेशत्वात् 'नाम्यन्तस्था०' (२।३।१५) इति षत्वे सुषुवे इत्यादि । क्ये सूयते । यङि सोषूयते । यङ्लुपि सोषोति सोषवीति । णौ ङे असूषवत् । णौ सनि सुषावयिषति । औदित्त्वाद्वेटि सोता सविता । किति 'उवर्णात्' (४।४।५८) इति नेट् सूतः सूतवान् । युवतौ 'भोजसूतयोः क्षत्रियायुवत्योः' (२।४।८१) इत्यन्त्यस्य य्ये भोज्या सूत्या । युवतेरन्यत्र कुत्सितेति कपि 'श्वेषसूतपुत्रवृन्दारकस्य' (२।४।१०९) इत्यतो वेत्वे सूतिका सूतका । 'निर्दुःसुवेः०' (२।३।५६) इति षत्वे निःषूतिः दुःषूतिः सुषूतिः । सूत्वा । 'सञ्चाय०' (५।१।२२) इति घ्यणि निपातनात् राजसूयः क्रतुः । क्विपि सूः प्रसूः अण्डसूः शतसूः । 'प्रात्सूजोरिन्' (५।२।७१) इत्यत्र सूतेरपि ग्रहणमित्येके प्रसवशीलः प्रसवी । 'क्लीबे०' (५।३।१२३) इति क्ते सूतम् । स्वार्थे के सूतकम् । उणादौ ऋज्यजि० (३८८) इति किति रे सूरः सुभटः । सुवः कित् (७८८) इति नौ सूनुः । 'षूङौच् प्राणिप्रसवे' सूयते । 'षूत् प्रेरणे' सुवति । इत्यूदन्तः सेट् १ । '**पृचैङ् पृजुङ् पिजुकि** सम्पर्चने' । सम्पर्चनं मिश्रणम् । पृक्ते सम्पृक्ते । क्ये सम्पृच्यते । सम्पपृचे । संपर्चिता । संपर्चितुम् । ऐदित्त्वात् क्तयोर्नेट् सम्पृक्तः सम्पृक्तवान् । 'ऋदुपान्त्य०' (५।१।४१) इति सम्पृच्यः । घञि 'क्तेनिट०' इति कत्वे सम्पर्कः । सम्पृक्तेरपि 'समः पृचैप्०' (५।२।५६) इति घिनणित्येके । तन्मते सम्पर्चनशीलः सम्पर्की । अयं पृजैङिति **कौशिकः** । 'पृचैप् सम्पर्के' । पृणक्ति इति चान्तः सेट् ? । **पृजुङ्** उदित्त्वान्ने पृङ्क्ते पृञ्जाते । अपृञ्जिष्ट । पपृञ्जे । पृञ्जिता पृञ्जितुम् । **पिजुकि** उदित्वान्ने पिङ्क्ते पिञ्जाते । अपिञ्जिष्ट । पिपिञ्जे । पिञ्जिता पिञ्जितुम् । यङि पेपिञ्ज्यते । यङ्लुपि पेपिङ्क्ति पेपिञ्जीति । घञि न्यङ्क्वादित्वात् गत्वे पिङ्गः । उणादौ ऋच्छिचटि० (३९७) इत्यरे पिञ्जरः । पिञ्जिमञ्जि० (४८८) इत्यूले पिञ्जूलः हस्तिबन्धनपाशः । वर्णार्थोऽयमित्येके । अव्यक्तशब्दार्थ इति **कौशिकः** । 'पिजुण् हिंसादौ भासार्थश्च' पिञ्जयति । '**वृजैकि** वर्जने' वृक्ते वृजाते वृजते । अवर्जिष्ट । ववृजे । वर्जिता वर्जितुम् । ऐदित्त्वात् क्तयोर्नेट् वृक्तः वृक्तवान् । 'वृजैण् वर्जने' युजादित्वाद्वा णिचि वर्जति वर्जयति । '**णिजुकि** शुद्धौ' । 'पाठे०' (२।३।९७) इति णस्य नत्वे, उदित्वान्ने च निङ्क्ते । णोपदेशत्वात् 'अदुरुपसर्ग०' (२।३।७७) इति णत्वे प्रणिङ्क्ते । अनिञ्जिष्ट । निनिञ्जे । निञ्जिता निञ्जितुम् । '**शिजुकि** अव्यक्ते शब्दे' । तालव्यादिः । उदित्वान्ने शिङ्क्ते शिञ्जाते शिञ्जते । अशिञ्जिष्ट । शिशिञ्जे । शिञ्जिता । यङि शेशिञ्ज्यते । यङ्लुपि शेशिञ्जीति शेशिङ्क्ति । ग्रहादित्वाण्णिनि शिञ्जिनी । क्लीबे क्ते शिञ्जितम् । इति जान्ताः सेटः पञ्च । **ईडिक्** इति । 'अघोषे०' (१।३।५०) इति डस्य प्रथमत्वे 'तवर्गस्य०' (१।३।६०) इति तस्य टत्वे च ईट्टे इति ॥ ५५ ॥ सेप्रभृतिषु सूत्रम्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ईशीडः सेध्वेस्वध्वमोः ॥ ५६ ॥ [ सि० ।४।४।८७ ]

आभ्यामेष्विट् स्यात् । ईडिषे ईडाथे ईडिध्वे । ईडे ईड्वहे ईड्महे १ । ईडीत २ । ईड्डाम् ३ । ऐड्ड ४ । ऐडिष्ट ५ । गुरुनाम्यादेरित्यामि ईडाञ्चक्रे ६ । ईडिषीष्ट ७ । ईडिता ८ । ईडिष्यते ९ । ऐडिष्यत १० । 'ईरिक् गतिकम्पनयोः' । ईर्त्ते १ । ईरीत २ । ईर्त्ताम् ईर्ष्व ईर्ध्वम् ३ । ऐर्त्त ४ । ऐरिष्ट ५ । ईराञ्चक्रे ६ । ईरिषीष्ट ७ । ईरिता ८ । ईरिष्यते ९ । ऐरिष्यत १० । 'ईशिक् ऐश्वर्ये' । ईष्टे ईशिषे ईशिध्वे १ । ईशीत २ । ईष्टाम् ३ । ऐष्ट ४ । ऐशिष्ट ५ । ईशाञ्चक्रे ६ । ईशिषीष्ट ७ । ईशिता ८ । ईशिष्यते ९ । ऐशिष्यत १० । 'वसिक् आच्छादने' । वस्ते १ । वसीत २ । वस्ताम् ३ । अवस्त ४ । अवसिष्ट ५ । ववसे ६ । वसिषीष्ट ७ । वसिता ८ । वसिष्यते ९ । अवसिष्यत १० । 'आङः शासूकि इच्छायाम्' । आशास्ते १० । आङ्पूर्वत्वं प्रायिकं तेन प्रशास्महे इत्यपि सिद्धम् । 'आसिक् उपवेशने' । आस्ते १ । आसीत् २ । आस्ताम् ३ । आस्त ४ । आसिष्ट ५ । 'दयायास्कासः' आसाञ्चक्रे ६ । आसिषीष्ट ७ । आसिता ८ । आसिष्यते ९ । आसिष्यत १० । 'णिसुकि चुम्बने' । उदितः स्वरादिति नुमागमे, निंस्ते १० । 'चक्षिक् व्यक्तायां वाचि' । संयोगस्येति क्लुपि आचष्टे आचक्षाते आचक्षते । आचक्षे आचक्षाथे आचड्ढ्वे १ । आचक्षीत २ । आचष्टाम् ३ । आचष्ट आचक्षाताम् आचक्षत ४ ॥ ५६ ॥

'ईशी०' आभ्यामिति । 'ईशिक् ऐश्वर्ये' 'ईडिक् स्तुतौ' इत्याभ्यामित्यर्थः । एष्विति वर्त्तमानासेध्वयोः पञ्चमीस्वध्वमोश्चेत्यर्थः । स्व(सह)चरितस्य ध्वमो ग्रहणात् ह्यस्तनीध्वमीडभावे ऐड्ढ्वम् । शेषं स्पष्टम् । ईडिता ईडितुम् । 'ऋवर्ण०' (५।१।१७) इति ध्यणि ईड्यः । 'क्तेट०' इत्यः ईडा । पृषोदरादित्वात् ह्रस्वे इडा भूः । उणादौ म्लेच्छीडे ह्रस्वश्च वा ( ३ ) इत्यः इडः ईडश्च देवविशेषः । इडा ईडा च भूः । ईडेरविड् ह्रस्वश्च (८७९) अस्मादविड् प्रत्ययो ह्रस्वश्चास्य भवति । इडविट् विस्रवाः । इति डान्तः सेट् १ । ईरिक् इति सर्वापि प्रक्रिया स्पष्टा । क्ये ईर्यते । ईरिता ईरितुम् । 'ऋवर्ण०' (५।१।१७) इति ध्यणि ईर्यः । 'नाम्युपान्त्य०' (५।१।५४) ईरः । 'अजातेः शीले' (५।१।१५४) इति णिनि 'स्वैरस्वैर्य०' (१।२।२५) इति सस्य ईता सहैत्वे स्वैरी । उणादौ तृकृशृ० (१८७) इत्यणे समीरणः । कफादीरेर्लं च (८३९) इत्यूः कफेलूः श्लेष्मातकः । 'ईरण् क्षेपे' । युजादित्वाद्वा णिचि ईरयति ईरति । इति रान्तः सेट् १ । ईशिक् इति 'स्मृत्यर्थ०' (२।२।११) इति वा कर्मत्वे 'शेषे' (२।२।८१) इति षष्ठ्यां भुव ईष्टे भुवमीष्टे । 'ईशीड०' (४।४।८७) इतीटि ईशिषे ईशिध्वे । ईशिष्व ईशिध्वम् । पञ्चमीध्वमो ग्रहणात् ह्यस्तनीध्वमीडभावे 'यजसृज०' (२।१।८७) इति शस्य षत्वे 'तवर्गस्य०' (१।३।६०) इति धस्य ढत्वे 'तृतीयस्तृतीय०' (१।३।४९) इति षस्य डत्वे, 'स्वरादेस्तासु' (४।४।३१) इति वृद्धौ ऐड्ढ्वम् । ईशिता । 'नाम्युपान्त्य०' (५।१।५४) इति के ईशः । आनशि ईशानः । 'स्थेश०' (५।२।८१) इति वरे ईष्टे इत्येवंशीलः ईश्वरः । स्त्रियामपि ईश्वरा । ईश्वरीति तु अश्नोतेरीच्चादेः (४४२) इति वरटि । अश्नुते व्याप्नोतीति ईश्वरो विभुः । ईश्वरी स्त्री । क्ते ईशितः । 'क्तेट०' इत्यः ईशा । उणादौ युयुजि० (२७७) इति कित्याने ईशानः । इति शान्तः सेट् १ । वसिक् इति । क्ये वस्यते । 'अनादेशादे०' (४।१।२४) इत्येत्वस्य द्वित्वाभावस्य च 'न शस०' (४।१।३०) इति प्रतिषेधे ववसे ववसाते । वसितः वसित-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वान् । आनशि वसानः । करणेऽनटि वसनम् । वसित्वा । उणादौ प्लुञ्ज्ञा० [( ६४६ ) इति तौ वस्तिः मूत्राधारश्चर्मपुटः । त्रट् ( ४४६–४५१ ) इति त्रटि वस्त्रम् । वस्यगिभ्यां णित् ( ९७० ) इत्यसि वासः । 'वसं निवासे' वस्ता । उषितः उषित्वा । **आङःशासूकि** इति । आङ इति 'आङ्पूर्व एवायं प्रयोज्यो न केवलो नान्योपसर्गपूर्व इत्येवमर्थमिति **श्रीहैमधातुपारायणे** । अन्ये तु आङ्पूर्वकत्वं प्रायिकम् । तेन प्रशास्महे इत्यपि सिद्धमित्याहुः । काविति सूत्रेणैव सिद्धे आङ इति सूत्रकरणं कावेवाङ्पूर्वस्य शास्तेरास इस् नान्यत्र इति नियमार्थम् । आङ एव काविति प्रत्ययनियमस्तु न, पूर्वेणैकयोगाकरणात् तेन 'इसासः शास०' इतीसभावे आशास्ते । क्ये आशास्यते । 'शास्त्यसूवक्ति०' (३।४।३०) इत्यत्र शास्तेरेव ग्रहणादङभावे आशासिष्ट । 'उपान्त्यस्या०' (४।२।३५) इति अत्रापि शास्तेरेव प्रतिषेधाण्णौ ङे ह्रस्वे आशीशसत् । अस्यापि ह्रस्वप्रतिषेध इत्यन्ये । तन्मते आशशासत् । आशासिता आशासितुम् । ऊदित्त्वात् क्त्विवेट् अत एव चोत्तरपदान्तस्यापि क्त्वो यबभावः । यपि हि स्ताद्यशिद्भावादिटः प्राप्तिरेव नास्ति । आशास्त्वा आशासित्वा । यपमेवेच्छन्त्येके । आशास्य । अनूदिदयमित्यन्ये । वेट्त्वात् क्तयोर्नेट् आशास्तः आशास्तवान् । येषां नोदित्तन्मते वेट्त्वाभावादिटि आशासितः आशासितवान् । 'इङित०' ( ५।२।४४ ) इत्यने आशासनशीलः आशासनः । 'क्रुत्सम्पदा०' ( ५।३।११४ ) इति क्विपि आशीः । 'श्वादिभ्यः' (५।३।९२ ) इति क्तौ आशास्तिः । 'शासूक् अनुशिष्टौ' शास्ति । शिष्यते । अशशासत् । **आसिक्** इति 'कालाध्व०' ( २।२।२३ ) इति कर्मत्वे मासमास्ते । 'अधेः शीङ०' ( २।२।२० ) इत्याधारस्य कर्मत्वे ग्राममध्यास्ते । 'दयायास्कासः' ( ३।४।४७ ) इत्यामि आसाञ्चक्रे । 'गत्यर्थाकर्मक०' ( ५।१।११ ) इति वा कर्त्तरि क्ते आसितश्चैत्रः । पक्षे भावे आसितं चैत्रेण । साप्यात् 'श्लिषशीङ्०' ( ५।१।९ ) इति वा कर्त्तरि क्ते उपासितो गुरुं शिष्यः । पक्षे कर्मणि उपासितो गुरुः शिष्येण । आसिता आसितुम् । आनशि निपातनात् आसीनः । 'आस्यटि०' ( ५।३।९७ ) इति क्यपि आस्या । 'णिवेत्त्य०' ( ५।३।१११ ) इत्यने आसना उपासना । 'श्वादिभ्यः' इति क्तौ उपास्तिः । उपलक्षणत्वात् '**कसुकि** गतिशातनयोः' । उदित्त्वान्ने कंस्ते चकंसे कंसिता । यङि चाकस्यते । यङ्लुपि चाकंस्ति चाकंसीति । अचि घञि वा कंसः । 'क्तेट०' इत्यः कंसा । **णिसुकि** इति णोपदेशत्वात् 'अदुरुपसर्ग०' ( २।३।७७ ) इति णत्वे प्रणिंस्ते परिणिंस्ते । अत्र शिटा नकारेण चान्तरेऽपीति प्रत्येकं वाक्यपरिसमाप्तेरिष्टत्वाद् द्व्यव्यवधाने षत्वाभावे निंस्से । निनिंसे । निंसिता । एषु सस्य कृतत्वाभावात् षत्वाभावः । यङि नेनिंस्यते । यङ्लुपि नेनिंसीति नेनिंस्ति । 'ऋवर्ण०' ( ५।१।१७ ) इति ध्यणि निंस्यम् । अचि घञि च निंसः । **'निंसनिक्षनिन्दः कृति वा'** ( २।३।८४ ) अदुरुपसर्गान्तः शब्दस्थाद्रषृवर्णात्परस्य निंसादीनां नस्य कृत्प्रयोगे परे णो वा स्यादिति वा णत्वे प्रणिंसनीयम् प्रनिंसनीयम् । प्रणिंसनं प्रनिंसनम् । कृतोऽन्यत्रापि णत्वविकल्प इत्यन्ये । प्रणिंस्ते प्रनिंस्ते । प्रणिनिंसे प्रनिनिंसे । इति सान्ताः पञ्च सेटः । **चक्षिक्** इति । आचष्टे इत्यादि स्पष्टम् ॥ ५६ ॥ अशिति सूत्रम्

## चक्षो वाचि क्शांग् ख्यांग् ॥ ५७ ॥ [ सि० ४।४।४ ]

**चक्षो वागर्थस्याशिति विषये क्शांग्ख्यांगौ स्यातां, परोक्षायां नवा । अनुस्वार इड्निषेधार्थः । गकार उभयपदार्थः । आक्शासीत् आक्शासिष्टाम् आक्शासिषुः । जिघ्रतिवत् । आक्शास्त आक्शासाताम् आक्शासत । शास्त्यसूवक्तीत्यङि, आख्यत् आख्यन् ५ । परोक्षायां द्वित्वे व्यञ्जनस्यानादेरिति स्लुपि, ह्रस्वे कङश्चञिति चत्वे आचक्शौ–आचक्शे । द्वितीयतुर्ययोरिति**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

ख्स्य चत्वे च आचख्यौ—आचख्ये । पक्षे आचचक्षे ६ । आक्शायात्—आक्शेयात् । आक्शासीष्ट ७ । आक्शाता २।८। आक्शास्यति—आक्शास्यते ९ । आक्शास्यत्-त १० । आख्यायात् आख्येयात् आख्यासीष्ट ७ । आख्याता ८ । आख्यास्यति—आख्यास्यते ९ । आख्यास्यत् आख्यास्यत १० ॥ ५७ ॥

इत्यदादिष्वात्मनेपदिनः ।

'चक्षो०' गकार उभयपदार्थ इति । तेन फलवत्कर्तृविवक्षायामात्मनेपदम् । न तु स्थानिवद्भावेन नित्यमात्मनेपदमिति । आक्शासीदिति 'शिट्याद्यस्य द्वितीयो वा' ( १।३।५९ ) इति कस्य ख्त्वे आख्शासीदिति द्वैरूप्यम् सर्वत्र । आशिषि 'संयोगादेर्वाशिष्येः' ( ४।३।९५ ) इत्येत्वविकल्पे, 'शिट्याद्यस्य०' इति कस्य खत्वविकल्पे क्शांग् ख्यांग्भ्यां प्रतिवचनम् षड्रूप्यम् । आक्शायात् १ आक्शेयात् २ आख्शायात् ३ आख्शेयात् ४ आख्यायात् ५ आख्येयात् ६ । यङि आचक्शायते २ आचख्यायते ३ । यङ्लुपि आचाक्शेति २ आचाक्शाति २ । आचाख्येति आचाख्याति । णि आक्शापयति आख्यापयति । ङे आचिक्शपत् आचिख्यपत् । क्वसौ आचक्शिवान् । आचख्यिवान् । काने आचक्शानः २ । आचख्यानः । आचक्षाणः । क्शाता क्शातुम् क्शातः क्शातवान् । ख्याता ख्यातुम् ख्यातः ख्यातवान् । क्शात्वा ख्यात्वा । आक्शातव्यम् आख्यातव्यम् । आक्शेयम् आख्येयम् । उभयत्र विषयसप्तमीविज्ञानात् प्रागादेशे ततो यः । 'उपसर्गादातः' ( ५।३।११० ) इति ङे आख्यः प्रख्यः । 'तन्व्यधी०' ( ५।१।६४ ) इति णे ख्यायः । 'समः ख्यः' ( ५।१।७७ ) इति डे गोसङ्ख्यः । 'व्यञ्जनान्तस्था०' इत्यत्र ख्यावर्जनात् क्तयोस्तस्य नत्वाभावे ख्यातः ख्यातवान् । 'पुमोऽशिट्य०' ( १।३।९ ) इत्यत्र ख्यागो वर्जनात् मोऽनुस्वारानुनासिकपूर्वरेफाभावे पुंख्यातम् पुंख्यातिः । वागर्थस्यैव क्शांग्ख्यांगौ, तेन वर्जनार्थाद् य्यणि संचक्ष्याः परिसंचक्ष्याः अवसंचक्ष्याः दुर्जनाः, वर्जनीया इत्यर्थः । भक्षणार्थादनटि चक्षणम् । चक्षिता । चक्षः शिद्वा ( ९६९ ) असादस् । स च शिद्वा । चक्षः ख्याः रक्षोनामनी । आचक्षाः वाग्मी । आख्याः प्रख्याश्च बृहस्पतिः । संचक्षाः ऋत्विक् । तृकृशृ० ( १८७ ) इत्यणे विचक्षणः, ज्ञानार्थत्वादत्र क्शांग् ख्यांगभावः । चक्षेः शिद्वा ( १००१ ) इति किस्युसि चक्षुः परिचक्षुः अवचक्षुः अवसंचक्षुः । अवख्युः । बाहुलकाद् द्वित्वे च संचचक्षुः विचख्युः । स्वरादिति कृतो नस्य क्षुभ्नादीनामिति णत्वप्रतिषेधे प्रख्यानं प्रख्यापनीयम् । इति क्षान्तः १ सेट् । इत्यात्मनेपदिनः एकोनविंशतिः १९ ॥ ५७ ॥

## अदादिषूभयपदिनः ।

ऊर्णुग्क् आच्छादने ।

अथोभयपदिनो निरूप्यन्ते । ऊर्णुग्क् इति । तिवादौ सूत्रम्

## वोर्णोः ॥ ५८ ॥ [ सि० ४।३।६० ]

ऊर्णोतेरद्व्युक्तस्य व्यञ्जनादौ वित्यौर्वा स्यात् । ऊर्णौति-ऊर्णोति ऊर्णुतः ऊर्णुवन्ति । ऊर्णौषि ऊर्णोषि १ । ऊर्णुयात् २ । ऊर्णौतु-ऊर्णोतु ३ ॥ ५८ ॥

'वो०' प्रयोगे प्रोपसर्गपूर्व एवायं पठ्यते । ततः प्रोर्णोति प्रोर्णौति इत्यादि ज्ञेयम् । व्यञ्जनादाविलेव प्रोर्णवानि । वितीत्येव प्रोर्णुतः । अद्वेरित्येव प्रोर्णोनोति । 'उत औव्यञ्जनेऽद्वेः' ( ४।३।५९ )

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यनेन नित्यं औत्वे प्राप्तेऽनेन विकल्पः । यङ्लुबन्तस्यापीच्छन्त्यन्ये प्रोर्णोनौति ॥ ५८ ॥ दिवूसिवोः सूत्रम्

## न दिस्योः ॥ ५९ ॥ [ सि० ४।३।६१ ]

**ऊर्णोतेर्दिस्योः परयोरौर्न स्यात् । और्णोत्-दू । और्णुवन्-और्णोः ४ ॥ ५९ ॥**

**'न दि०'** पृथग्योगात् 'उत औ'र्विति प्राप्तमपि औत्वं प्रतिषिध्यते । अन्यथा वोर्णोरदिस्योरिति सूत्रं क्रियेत । दिस्योरिति किम् ? प्रोर्ण्णौषि । दिसाहचर्यात् ह्यस्तन्या एव सिर्गृह्यते न तु वर्त्तमानाया इति ॥ ५९ ॥ अद्यतन्यामुपयोगिसूत्राणि–

## वोर्णुगः सेटि ॥ ६० ॥ [ सि० ४।३।४६ ]

**ऊर्णोतेः सेटि सिचि परस्मैपदे वृद्धिर्वा स्यात् ॥ ६० ॥**

**वोर्णु०** परस्मै इत्येव । प्रौर्णविष्ट ॥ ६० ॥ अस्येटो वा ङित्त्वमित्यत्र सूत्रम्

## वोर्णोः ॥ ६१ ॥ [ सि० ४।३।१९ ]

**ऊर्णोतेरिड् वा ङिद्वत्स्यात् । और्णावीत् और्णवीत्–और्णुवीत् और्णाविष्टाम् और्णविष्टाम् और्णुविष्टाम् ५ ॥ ६१ ॥**

**'वो०'** स्पष्टम् । 'वोर्णुग०' इत्यत्र सानुबन्धोपादानं यङ्लुप्-निवृत्त्यर्थम् । तेन प्रौर्णोनावीत् । अत्र 'वोर्णुग०' इति वृद्धिविकल्पो न, किन्तु 'वोर्णो'रितीटो ङित्त्वविकल्प एव । ततश्च अङित्त्वपक्षे 'सिचि परस्मै समानस्याङिति' ( ४।३।४४ ) इति नित्यं वृद्धिः । ङित्त्वे तु गुणवृद्ध्यभावे उवादेशे प्रौर्णुनुवीत् । 'वोर्णो'रित्यत्र हि अनुबन्धाभावाद्यङ्लुबन्तस्यापि ग्रहणम् । एवं प्रकृते ( शुद्धधातो )-स्त्रैरूप्यं यङ्लुबन्तस्य च द्वैरूप्यं सिद्धं भवति । परोक्षायां 'द्विर्धातुः परोक्षाङे०' ( ४।१।१ ) इति सूत्रेण ऊर्णु इत्यादेः समग्रधातोर्द्वित्वे प्राप्ते ॥ ६१ ॥ सूत्रम्

## स्वरादेर्द्वितीयः ॥ ६२ ॥ [ सि० ४।१।४ ]

**स्वरादेर्धातोर्द्वितीयोंऽश एकस्वरो द्विः स्यात् ॥ ६२ ॥**

**'स्वरा०'** अयं भावः । स्वरादेर्धातोर्द्विवचनभाजो द्वितीयोंऽश एकस्वरो द्विर्भवति नत्वाद्यः । यथा अटिटिषति अशिशिषति । अटाट्यते अशाश्यते । प्राक्तु स्वरे स्वरविधेरित्येव आटिटत् आशिशत् प्रोर्णुनाव प्रोर्णुनविषति । अत्र वृद्धिगुणाभ्यां प्राक् द्विर्भावः । अरिरिषति । अरिरीषत्यत्र त्विटः कार्यित्वं न निमित्तत्वम् । ततो द्वित्वनिमित्तस्य स्वरादिप्रत्ययस्याभावात् प्राग् गुणरूपः स्वरविधिरेव । अत्रा-यमभिप्रायः । 'ॠक् प्रापणे' 'ॠं प्रापणे' 'ऋश् गतौ वा' । अर्त्तुमरितुमरीतुं वा इच्छतीति सनि आद्याभ्यां 'ऋस्मिपूङ्' ( ४।४।४८ ) इति ऋशस्तु 'इवृध०' ( ४।४।४७ ) इत्यनेनेट् । अरिरीषतीत्येतत्तु ऋश एव । अन्यथा 'वृतो नवा०' ( ४।४।३५ ) इति दीर्घो न स्यात् । स्वरादित्वाद्धातोर्द्वितीयांशस्य इट्रूपस्य द्वित्वे चिकीर्षिते इटः कार्यित्वं न निमित्तमिति ॥ ६२ ॥ अथ ऊर्णुनावेत्यादौ 'स्वरादे-र्द्वितीयः इति द्वितीयस्यांशस्य द्वित्वप्राप्तौ रेफस्यापि द्वित्वं प्राप्नोतीति तत्प्रतिषेधाय सूत्रम्

## अयि रः ॥ ६३ ॥ [ सि० ४।१।६ ]

**स्वरादेर्धातोर्द्वितीयस्यांशस्यैकस्वरस्य संयोगादिरो द्विर्न भवति, स्यात्तु रादनन्तरे यि। णत्वस्यास-** ३२

स्वानो द्विर्भावः। गुरुनाम्यादेरित्यत्रोर्णुवर्जनात्परोक्षाया आमभावः। ऊर्णुनाव ऊर्णुनुवतुः ऊर्णुनुवुः। ऊर्णुनविथ-ऊर्णुनुविथ ६। ऊर्णूयात् ७। ऊर्णुविता-ऊर्णविता ८। ऊर्णुविष्यति-ऊर्णविष्यति ९। और्णुविष्यत्-और्णविष्यत् १०। ऊर्णुते ऊर्णुवाते ऊर्णुवते १। और्णुविष्ट-और्णविष्ट १०। 'ष्टुंगक् स्तुतौ'। उत औविंतीत्यौत्वे, स्तौति। यङ्तुरुस्तोरितीदागमे, स्तवीति स्तुतः स्तुवन्ति १। स्तुयात् २। स्तौतु-स्तवीतु स्तुतात् ३। अस्तौद् अस्तवीत्॥ ६३॥

'अयि०' स्यात्तु रादनन्तरे यीति–रेफात्पर आनन्तर्येण यकारश्चेन्न भवति तदा रेफो द्विर्न स्यात्। यथा अर्चिचिषति। प्रोर्णुनविषति। प्रोर्णोनूयते। प्रोर्णुनाव। प्रोर्णुनवत्। आर्चिचत्। आनन्तर्येण यि परे तु रोऽपि द्विः स्यादेव। अरार्यते। अर्यमाख्यातवान् आरर्यत्। अत्र 'स्वरस्य परे प्राग्विधौ' (७।४।११०) इति स्वरादेशोऽन्त्यस्वरलोपरूपो द्वित्वे कार्ये स्थानी निमित्तापेक्षयापि प्राग्विधिरिष्यते इति। संयोगादिरित्येव अरिरिषति। णत्वस्यासत्त्वादिति 'णषमसत्परे स्यादिविधौ च' (२।१।६०) इति सूत्रेण द्वित्वरूपे परे विधौ कर्त्तव्ये णत्वस्य णत्वशास्त्रस्य वाऽसत्त्वादन्यथा प्रोर्णुणावेति रूपप्रसङ्गः स्यादिति। अस्योपलक्षणत्वादन्येषामपि केषाञ्चित्संयोगादीनां द्वित्वं न स्यादिति निरूप्यते।

'न बदनं संयोगादिः' (४।१।५) स्वरादेर्धातोर्द्वितीयस्यावयवस्यैकस्वरस्य बकारदकारनकाराः संयोगस्यादयो न द्विर्भवन्ति। 'उब्जत् आर्जवे'। उब्जिजिषति। अड्टिटिषति। अड्डिडिषति। उन्दिदिषति। इन्दिद्रीयिषति। औब्जिजत्। आड्टिटत्। आड्डिडत्। औन्दिदत्। बदनमिति किम्? ईचिक्षिषते। संयोगादिति किम्? प्राणिणिषति। अट्यर्त्तीति यङि प्रोर्णोनूयते प्रोर्णविता प्रोर्णुविता। प्रोर्णवितुम् २। सनि 'इवृध०' (४।४।४७) इति वेटि प्रोर्णुनुविषति प्रोर्णुनविषति। पक्षे प्रोर्णुनूषति। किति 'ऋवर्णश्र्यू०' (४।४।५७) इति नेट् प्रोर्णुतः प्रोर्णुतवान्। ऊर्णोति'त्विणुर्विशे'ति (१८२) णे ऊर्वतेः। ष्टुंगक् इति। 'षः स०' (२।३।९८) इति सत्वे स्तौति। 'उपसर्गात्सुग०' (२।३।३९) इति षत्वे अभिष्टौति॥ ६३॥ उपसर्गविशेषे विशेषमाह। सूत्रम्

## स्तुस्वञ्जश्चाटि नवा॥ ६४॥ [ सि० २।३।४९ ]

परिनिवेः परस्य स्तुस्वञ्जोरसोङ्सिवूसहस्सटां च सोऽटि सति ष् वा स्यात्। पर्यष्टौत्-पर्यस्तौत् एवं न्यष्टौत्, व्यष्टौत् ४। धूगसुस्तोरितीटि, अस्तावीत् अस्ताविष्टाम् अस्ताविषुः ५। तुष्टाव। स्क्रसृवित्यादिसूत्रे स्तुवर्जनान्नेट्। तुष्टोथ तुष्टुवथुः तुष्टुव। तुष्टाव-तुष्टव तुष्टुव तुष्टुम। ६। स्तूयात् ७। स्तोता ८। स्तोष्यति ९। अस्तोष्यत् १०। स्तुते १। स्तुवीत २। स्तुताम् ३। अस्तुत ४। अस्तोष्ट अस्तोढ्वम् ५। तुष्टुवे तुष्टुढ्वे ६। स्तोषीष्ट ७। स्तोता ८। स्तोष्यते ९। अस्तोष्यत १०। 'ब्रूंगक् व्यक्तायां वाचि'॥ ६४॥

'स्तु०' स्पष्टम्। 'नाम्यन्तस्था०' (२।३।१५) इति षत्वे तुष्टावेत्यादि। 'उत औ०' इत्यत्राद्वेरिति वचनाद्द्वित्वे औत्वाभावः। तुष्टुव तुष्टुम। यङि तोष्टूयते। यङ्लुपि तोष्टोति तोष्टवीति। सनि तुष्टूषति। अनिट्त्वात् स्तोता प्रस्तोता। 'हवृग्०' (५।१।४०) इति क्यपि स्तुत्यः। 'दिद्युद्दद्०' (५।२।८३) इति क्विपि निपातनात् आयतस्तवनशील आयतस्तूः। एवं ग्रावस्तुत्। 'नीदांव्०' (५।२।८८) इति त्रटि स्तोत्रम्। क्विप्युपसर्गादिति षत्वे परिष्टुत्। 'समासेऽग्नेः स्तुतः' (२।३।१६) अग्निष्टुत्। 'प्रात्स्नुद्रुस्तोः' (५।३।६७) इति घञि प्रस्तावः। 'संस्तोः' (५।३।६६) समेत्य स्तुवन्त्यत्र संस्तावः। यज्ञविषयादन्यत्र 'युवर्ण०' (५।३।२८) इत्यलि संस्तवः एवं स्तवः। 'श्र्यादिभ्यः'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

( ५।३।९२ ) इत्यनडपवादे करणे क्तौ स्तुतिः । उणादौ मीण्शलि० ( २१ ) इति के स्तोकम् । दृकृनृ० ( २७ ) इत्यके स्तबकः गुच्छः । युसुकु० ( २९७ ) इति पे ऊत्वे च स्तूपः बोधिसत्त्व-भवनम् । आर्तिरी० ( ३३८ ) इति मे स्तोमः समूहः यज्ञः स्तोत्रं च । 'ष्टुभुङ् स्तम्भे' इत्यस्य तु स्तोभः अनर्थकं श्रुतिपूरणं वचः । इत्युदन्तौ द्वौ । आद्यः सेट् द्वितीयोऽञ्विद् च ॥ ६४ ॥ ब्रूंगक् इति । व्यञ्जनादौ विति सूत्रम्

## ब्रूतः परादिः ॥ ६५ ॥ [ सि० ४।३।६३ ]

ब्रुव उतः परो व्यञ्जनादौ विति परादिरीत् स्यात् । ब्रवीति ब्रुतः ब्रुवन्ति ॥ ६५ ॥

'ब्रूत०' स्पष्टम् ॥ ६५ ॥ तिवादौ विशेषसूत्रम्

## ब्रूगः पञ्चानां पञ्चाहश्च ॥ ६६ ॥ [ सि० ४।२।११८ ]

ब्रूगः परेषां तिवादीनां पञ्चानां यथासङ्ख्यं पञ्च णवादयो वा स्युः तद्योगे ब्रूग आहश्च । आह आहतुः आहुः ॥ ६६ ॥

'ब्रूगः०' व्यक्तम् ॥ ६६ ॥ अत्रोपयोगिसूत्रम्

## नहाहोर्धतौ ॥ ६७ ॥ [ सि० २।१।८५ ]

नहेर्ब्रूस्थानाहश्च धातोर्हो धुटि प्रत्यये पदान्ते च यथासङ्ख्यं धतौ स्याताम् । आत्थ आहथुः । ब्रूयात् २ । ब्रवीतु, अङ्कित्त्वात् ब्रवाणि ३ । अब्रवीत् अब्रवम् ४ । अस्तिब्रुवोरिति वचादेशे, श्वयत्यसूवच इति वोचादेशे च अवोचत् ५ । उवाच ६ ॥ ब्रूते १ । ब्रुवीत २ । ब्रूताम् ब्रवै ३ । अब्रूत ४ । अवोचत ५ । ऊचे ६ । वक्षीष्ट ७ । वक्ता ८ । वक्ष्यते ९ । अवक्ष्यत १० । 'द्विषींक् अप्रीतौ' द्वेष्टि १ । द्विष्यात् २ । द्वेष्टु द्विष्टात् द्विड्ढि द्वेषाणि ३ । अद्वेट् । 'वा द्विषात०' इति पुसि, अद्विषुः–अद्विषन् ४ । हशिटो नाम्युपान्त्याददिति सगागमे, अद्विक्षत् ५ । दिद्वेष ६ । द्विष्यात् ७ । द्वेष्टा ८ । द्वेक्ष्यति ९ । अद्वेक्ष्यत् १० ॥ द्विष्टे १ । द्विषीत २ । द्विष्टाम् द्वेषै ३ । अद्विष्ट । अद्विक्षत ५ । दिद्विषे ६ । द्विक्षीष्ट ७ । द्वेष्टा ८ । द्वेक्ष्यते ९ । अद्वेक्ष्यत १० । 'दुहींक् क्षरणे' । भ्वादेर्दादेरिति हस्य घत्वे, अधश्चतुर्थादिति तस्य धत्वे दोग्धि । गडदबादेरिति दस्य धत्वे धोक्षि । थस्य धत्वे दुग्धः दुग्ध । दोह्मि दुह्वः दुह्मः १ । दुह्यात् २ । दोग्धु । हेर्धित्वे दुग्धि दोहानि ३ । अधोक् अधोग् ४ । अधुक्षत् ५ । दुदोह ६ । दुह्यात् ७ । दोग्धा ८ । धोक्ष्यति ९ । अधोक्ष्यत् १० ॥ दुग्धे १ । दुहीत २ । दुग्धाम् धुग्ध्वम् दोहै ३ । अदुग्ध ४ । दुहलिहेति वा सक्लोपे, अदुग्ध अधुक्षत अदुह्वहि अधुक्षावहि ५ । दुदुहे ६ । धुक्षीष्ट ७ । दोग्धा ८ । धोक्ष्यते ९ । अधोक्ष्यत १० । एवं 'दिहींक् लेपे' देग्धीत्यादि । 'लिहींक् आस्वादने' । लेढि । हस्य ढत्वे, तस्य धत्वे, धस्य ढत्वे, ढस्तड्ढे इति ढलोपे दीर्घे च लीढः लिहन्ति । लेक्षि लीढः १ । लिह्यात् २ । लेढु–लीढात् लेहानि ३ । अलेट्–ड् अलेहम् ४ । अलिक्षत् ५ । लिलेह ६ । लिह्यात् ७ । लेढा ८ । लेक्ष्यति ९ । अलेक्ष्यत् १० ॥ लीढे लिक्षे लिढ्ढे १ । वा सक्लोपे अलीढ-अलिक्षत अलिह्वहि–अलिक्षावहि ५ ॥ ६७ ॥

इत्युभयपदिनोऽदादयः ।

इति महोपाध्यायश्रीकीर्तिविजयगणिशिष्योपाध्यायश्रीविनयविजय-
गणिविरचितायां हैमलघुप्रक्रियायां अदादयः समाप्ताः ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

'नह्या०' सुगमम् । अशिति 'अस्तिब्रुवो०' (४।४।१) इति वचादेशे 'यजादिवश०' (४।१।७२) इति पूर्वस्य य्वृति उवाच । 'यजादिवचेः०' (४।१।७९) इति य्वृति द्वित्वे ऊचे । क्ये उच्यते । किरादित्वाञ्ञिक्ययोरभावे कर्मकर्त्तरि अवोचत कथा स्वयमेव । अनिट्त्वात् वक्ता वक्तुम् । 'प्रवचनीयादयः' (५।१।८) इति कर्त्तर्यनीये प्रवचनीयो गुरुर्धर्मस्य । पक्षे कर्मणि प्रवचनीयो धर्मो गुरुणा । घ्यणि 'वचोऽशब्दनाम्नि' (४।१।११९) इति कत्वप्रतिषेधे वाच्यम् । शब्दसंज्ञायां तु वाक्यम् । 'त्यज्यज०' (४।१।११८) इति कत्वाभावे प्रवाच्यः ग्रन्थविशेषः । अचि ब्रुव इति निपातनात् ब्राह्मणमात्मानं ब्रूते इति ब्राह्मणब्रुवः । 'वेयिवद०' (५।२।३) इति निपातनात् भूतमात्रे कानः अनूचानः । 'तत्र कसु०' (५।२।२) इति कसौ उचिवान् । 'दिद्युद्०' (५।२।८३) इति क्विपि निपातनात् वचनशीलो वाक् । उणादौ नीनूरमि० (२२७) इति किति थे उक्थं साम । इत्यूदन्तोऽनिट् १ । **द्विषीँक्** इति । द्वेष्टीत्यादि व्यक्तम् । 'ऋवर्ण०' (५।१।१७) इति घ्यणि द्वेष्यः । 'नाम्युपान्त्य०' (५।१।५४) इति के द्विषः । क्विपि सुद्विट् मित्रद्विट् ब्रह्मद्विट् । 'सुग्द्विषा०' (५।२।२६) इति अतृशि 'द्विषो वातृशः' (२।२।८४) इति वा कर्मणि षष्ठ्यां चौरस्य द्विषन् चौरं द्विषन् । 'युजभुज०' (५।२।५०) इति घिनणि द्वेषणशीलो द्वेषी । घञि द्वेषः । इति षान्तोऽनिट् १ । **दुहीँक्** इति । दोग्धि दुग्धे इत्यादि व्यक्तम् । कर्मकर्त्तरि 'एकधातौ०' (३।४।८६) इति ञिक्यात्मनेपदेषु प्राप्तेषु भूषार्थेति किरादित्वात् क्यनिषेधे दुग्धे गौः स्वयमेव । 'स्वरदुहो वा' (३।४।९०) इति वा ञिज्निषेधे अदुग्ध गौः स्वयमेव । अदोहि गौः स्वयमेव । 'कृवृषि०' (५।१।४२) इति वा क्यपि दुह्या गौः । पक्षे 'ऋवर्ण०' (५।१।१७) इति घ्यणि दोह्या । क्विपि गोधुग्-क् । 'दुहेर्डुघ०' (५।१।१४५) कामदुघो धर्मः । 'युजभुज०' (५।२।५०) इति घिनणि दोही । बाहुलकात् खलपवादे ने सुदोहनः । घञि दोहः । उणादौ 'कुमुद०' (२४४) इत्यदे निपातनात् दोहदः अभिलाषविशेषः । त्वष्टृ० (८६५) इति तृप्रत्यये निपातनात् दुहिता । एवं **दिहीँक्** इति । 'नेर्ङ्मादा०' (२।३।७९) इति णत्वे प्रणिदेग्धि 'हशिट०' (३।४।५५) इति सकि अधिक्षत् । दन्त्यादावात्मनेपदे सको वा लुकि अधिक्षावहि अदिह्वहि । अधिक्षत अदिग्धाः । सन्दिदेह सन्दिदेहे । यङि देदिह्यते । यङ्लुपि देदिहीति देदेग्धि । उणादौ मृदिकन्दि० (४६५) इत्यले देहली द्वाराधो दारु । **लिहीँक्** इति । लेढि लीढे । सकि अलिक्षत् । दन्त्यादावात्मनेपदे वा सको लुकि अलिह्वहि अलिक्षावहि । अलीढ अलिक्षत । यङि लेलिह्यते । यङ्लुपि लेलिहीति लेलेढि । लेढा लेढुम् । 'ऋवर्ण०' (५।१।१७) इति घ्यणि लेह्यम् । लिहादयचि लेहः आलेहः । बाहुलकात् 'नाम्युपान्त्य०' (५।१।५४) इति के लिहः । उणादौ लिहेर्जिह् च (५१३) इति वे जिह्वा । इति हान्तास्रयोऽनिटः । ❧ एवमुभयपदिनः सप्त ❧ ॥ ६७ ॥

## अथ ह्वादयः ।

'हुंक् दानादनयोः' ।

अथादाद्यन्तर्गणो ह्वादयः । स च चतुर्दशात्मकस्तत्र परस्मैपदिनः षट्, आत्मनेपदिनौ द्वौ, उभयपदिनः षडिति । **हुंक्** इति । दानमत्र हविःप्रक्षेपः, अदनं भक्षणम् । तिवादौ सूत्रम्

### ह्वः शिति ॥ १ ॥ [ सि० ४।१।१२ ]

ह्वादयः शिति द्विः स्युः । जुहोति जुहुतः । अन्तो नो लुगिति नूलोपे, ह्विणोरप्विकतीति

वत्वे, जुह्वति । जुहोषि १ । जुहुयात् २ । जुहोतु-जुहुतात् जुहुताम् जुह्वतु ३ । हुधुटो हेर्धिः । जुहुधि ३ । अजुहोत् । द्युक्तजक्षपञ्चत इत्यतः पुसि अजुहवुः । अजुहोः अजुहवम् ४ । अहौषीत् अहौष्टाम् ५ ॥ १ ॥

'ह्व०' 'उत औः०' (४।३।५९) इत्यत्राद्वेरित्युक्तेरौत्वाभावे जुहोति । प्राक्तु स्वरे स्वरविधेरित्येव जुहवानि । 'द्युक्त०' (४।२।९३) इति शिदनः पुसि, 'पुस्पौ' (४।३।३) इति गुणे अजुहवुः ॥ १ ॥ परोक्षायां सूत्रम्

## भीह्रीभृहोस्तिव्वत् ॥ २ ॥ [ सि० ३।४।५० ]

एभ्यश्चतुर्भ्यः परोक्षाया आम् वा स्यात् । स च तिव्वत् । जुहवाञ्चकार । पक्षे जुहाव जुहुवतुः जुहविथ-जुहोथ ६ । हूयात् ७ । होता ८ । होष्यति ९ । अहोष्यत् १० । 'ओहांक् त्यागे' । जहाति ॥ २ ॥

'भीह्री०' अत्रामस्तिव्वद्भावात् 'ह्वः शिति' (४।१।१२) इति द्वित्वम् । सनि जुहूषति । यङि जोहूयते । यङ्लुपि जोहवीति जोहोति । णौ हावयति । ङे अजूहवत् । सनि । जुहावयिषति । होता होतुम् । 'य एचातः' (५।१।२८) इति ये हव्यम् । 'उवर्णादावश्यके' (५।१।१९) घ्यणि हाव्यमवश्यम् । अचि हवः । 'आशिष्यकन्' (५।१।७०) हवकः । 'दिद्युद्दद्०' (५।२।८३) इति क्विपि निपातनाद्धवनशीलो जुहूः । 'युवर्ण०' (५।३।२८) इत्यलि हवः उणादौ अर्त्तीरि० (३३८) इति मे होमः आहुतिः । हुयामा० (४५१) इति त्रे होत्रं हवनम् । होत्रा ऋचः । रुच्यर्चि० (९८९) इतीसि हविः पुरोडाशादि । हुपूद्रो० (८६३) इति तृ होता ऋत्विक् । इत्युदन्तोऽनिट् १ । ओहांक् इति । ककारोऽदादित्वज्ञापनार्थः, 'न हाको लुपि' (४।१।४९) इत्यादौविशेषणार्थश्च ॥ २ ॥ व्यञ्जनादौ अविति शिति सूत्रम्

## हाकः ॥ ३ ॥ [ सि० ४।२।१०० ]

हाको व्यञ्जनादौ शित्यविति आत इर्वा स्यात् । जहितः ॥ ३ ॥ पक्षे

'हा०' व्यञ्जन इत्येव । जहति जहतु । शितीत्येव जिहासति जेहीयते । अवितीत्येव जहाति जहासि । अनुबन्धनिर्देश ओहाङ् यङ्लुपोर्निवृत्त्यर्थः । उज्जिहीते । जहितः ॥ ३ ॥ पक्षे सूत्रम्

## एषामीर्व्यञ्जनेऽदः ॥ ४ ॥ [ सि० ४।२।९७ ]

एषामिति द्युक्तानां जक्षपञ्चतः श्नश्चातः शित्यविति व्यञ्जनादावीः स्यात्, दासंज्ञं वर्जयित्वा । जहीतः । श्नश्चात इत्यालुकि, जहति । जहासि जहिथः–जहीथः जहिथ–जहीथ १ ॥ ४ ॥

'एषां०' दासंज्ञं वर्जयित्वेति । दत्तः धत्तः । दद्वः दध्वः । दद्मः दध्मः । दद्यात् दध्यात् । अवितीत्येव जहाति लुनाति ॥ ४ ॥ यादौ शिति सूत्रम्

## यि लुक् ॥ ५ ॥ [ सि० ४।२।१०२ ]

यादौ शिति हाक आ लुक् स्यात् । जह्यात् २ । जहातु जहितात्-जहीतात् जहतु ॥ ५ ॥

'यि०' शितीत्येव । जेहीयते । हेयात् ॥ ५ ॥ पञ्चम्या हौ सूत्रम्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## आ च हौ ॥ ६ ॥ [ सि० ४।२।१०१ ]

हाको हौ आ इश्च वा स्याताम् । जहाहि–जहिहि पक्षे जहीहि २ । अजहात् अजहिताम् अजहीताम् अजहुः ४ । अहासीत् ५ । जहौ जहतुः जहिथ-जहाथ ६ । गापास्थेत्येत्वे, हेयात् ७ । हाता ८ । हास्यति ९ । अहास्यत् १० । **'ञिभींक् भये'** । बिभेति १ ॥ ६ ॥

**'आ च हौ'** स्पष्टम् । जहाति शब्दं देवदत्तः । स एवं विवक्षति नाहं जहामि । हायते शब्दः स्वयमेव । सनि जिहासति । यङि 'एषामीर्व्यञ्जने०' ( ४।२।९७ ) इतीत्वे द्वित्वे 'आगुणावन्यादेः' ( ४।१।४८ ) इति गुणे जेहीयते । यङ्लुपि 'न हाको लुपि' ( ४।१।४९ ) 'ओहांक् त्यागे' इत्यस्य द्वित्वे सति पूर्वस्य यङो लुप्याकारो न भवति । जहाति जहेति जहीतः जहति । क्त्वाप्रत्यये जहित्वा । द्वित्वे पूर्वदीर्घत्वमपीच्छन्त्येके । जीहित्वा । णौ हापयति । ङे अजीहपत् । सनि जिहापयिषति । शतरि जहत् जहती । ओदित्त्वात् 'सूयत्या०' ( ४।२।७० ) इति ने हीनः हीनवान् । 'स्वरात्' ( २।३।८५ ) इति णे प्रहीणः २ वान् । 'हाको हिः क्त्वि' हित्वा विहाय । हाता हातुम् । 'य एचातः' ( ५।१।२८ ) इति हेयम् । 'ललाटवात०' ( ५।१।१२५ ) इति खशि शर्द्धंजहा माषाः । 'हः काल०' ( ५।१।६८ ) इति टनणि जहाति भावानिति हायनः संवत्सरः । जहत्युदकमिति हायना व्रीहयः । 'आतो ड०' ( ५।१।७६ ) इति डे कलां जहाति कलहः । 'ङ्यापो बहुलं नाम्नि' ( २।४।९९ ) इति पूर्वस्य ह्रस्वः । 'ग्लाहा०' ( ५।३।११८ ) इत्यनौ हानिः । 'अहीयरुह०' ( ७।२।८८ ) इत्यत्र हाको वर्जनात् पञ्चम्यास्तस्वभावे सार्थाद्धीनः । 'पापहीयमानेन' ( ७।२।८६ ) इति तृतीयायास्तसौ विद्यातो हीयते । उणादौ भीण्शलि० ( २१ ) इति के निहाको निःस्नेह· । निहाका गोधा । पाहाकृभ्यां पयह्नौ च ( ९५३ ) इत्यसि ह्यः अनन्तरातीतदिनम् । अहरिति तु श्वन्मातरिश्वन्० ( ९०२ ) इत्यनि निपातनादंहतेः । **ञिभींक्** इति बुद्धिसंसर्गपूर्वकेऽपायेवधित्वादपादानत्वे 'पञ्चम्यपादाने' इति पञ्चम्यां चौराद्बिभेति ॥ ६ ॥ व्यञ्जनादावविति शिति सूत्रम् ।

## भियो नवा ॥ ७ ॥ [ सि० ४।२।९९ ]

भियो व्यञ्जनादौ शित्यविति इर्वा स्यात् । बिभितः–बिभीतः बिभ्यति १ । बिभियात्-बिभीयात् २ । बिभेतु-बिभितात्-बिभीतात् ३ । अबिभेत् अबिभिताम्-अबिभीताम् अबिभयुः ४ । अभैषीत् ५ । भीहीत्यामि बिभयाञ्चकार, पक्षे बिभाय बिभ्यतुः बिभयिथ-बिभेथ ६ । भीयात् ७ । भेता ८ । भेष्यति ९ । अभेष्यत् १० ॥ 'ह्रींक् लज्जायाम्' । जिह्रेति जिह्रीतः । संयोगाद्दितीयादेशे, जिह्रियति १ । जिह्रीयात् २ । जिह्रेतु-जिह्रीतात् ३ । अजिह्रेत् अजिह्रीताम् अजिह्रयुः ४ । अह्रैषीत् ५ । जिह्रयाञ्चकार जिह्राय ६ । ह्रीयात् ७ । ह्रेता ८ । ह्रेष्यति ९ । अह्रेष्यत् १० । 'पॄंक् पालनपूरणयोः' ॥ ७ ॥

**'भियो०'** यङ्लुपि बेभितः बेभीतः । व्यञ्जन इत्येव बिभ्यति । शितीत्येव बिभीषति बेभीयते । *अवितीत्येव बिभेति । णौ* ***'बिभेतेर्भीष् च'*** *( ३।३।९२ ) प्रयोक्तुः सकाशात् स्वार्थे* वर्त्तमानाण्ण्यन्ताद्बिभेतेः कर्त्तर्यात्मनेपदं भवति । अस्य भीषादेशः । पक्षेऽन्तस्याकारश्चाकर्त्तर्य्यपि भवति । मुण्डो भीषयते मुण्डो भापयते । प्रयोक्तुः स्वार्थ इत्येव कुञ्चिकया भाययति । अकर्त्तर्य्यपीत्येव भीषा भापनम् । तिव्निर्देशाद्यङ्लुपि न भवति मुण्डो बेभाययति । णौ ङे अबीभयत अबीभषत् अबीभयत् । शतरि बिभ्यत् बिभ्यती भेष्यत् । बिभयाञ्चकृवान् बिभीवान् । बिभया-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अकाणं विभ्यानम् । भीतः भीतवान् । भीत्वा प्रभीय । भेता भेतव्यं भेतुम् । 'भियो रुरुकलुकम्' (५।२।७६) भीरुः भीरुकः भीलुकः । कित्त्वादत्र न गुणः । 'वर्षादयः क्लीबे' (५।३।२९) इत्यलि भयम् । 'भ्यादिभ्यो वा' (५।३।११५) इति क्विपि भीः (पक्षे क्तौ भीतिः) उणादौ भीण्शलि० (२१) इति के भेकः मण्डूकः कातरश्च । शीभी० (७१) इत्यानके भयानकः । भियः षोन्तश्च वा (३४४) इति किति मे भीमः भीष्मः । भीवृधि० (३८७) इति रे भेरः दुन्दुभिः कातरश्च । ऋफिडादित्वात् लत्वे भेलः चिकित्सा ग्रन्थकारः अप्राज्ञश्च । ह्रींकू इति । 'संयोगात्' (२।१।५२) इतीयादेशे इति 'योऽनेकस्वरस्य' (२।१।५६) इति यापवादे इति ज्ञेयम् । सनि जिह्रीषति । यङि जेह्रीयते । यङ्लुपि जेह्रीयीति जेह्रेति जेह्रीतः जेह्रियति । 'अर्तिरी०' (४।२।२१) इति पौ, 'पुस्पौ' (४।३।३) इति गुणे ह्रेपयति । ङे अजिह्रियत् । जिह्रेपयिषति । शतरि जिह्रियत् ह्रेष्यन् । जिह्रयाञ्चकृवान् जिह्रीवान् । 'ऋह्री०' (४।२।७६) इति क्तयोस्तस्य वा नत्वे ह्रीणः ह्रीतः ह्रीणवान् ह्रीतवान् । 'य एचातः' (५।१।२८) इति ये ह्रेयम् । 'क्रुत्सम्पदा०' (५।३।११४) इति क्विपि ह्रीः । उणादौ ह्रियो रश्च लो वा (२५) इति के ह्रीको ह्रीकश्च सलज्जः ह्रियः किद्रो लश्च वा (७५०) इति कौ ह्रीकुः ह्रीकुश्च त्रपुजतुनी लज्जावांश्च । ह्रीकुर्वनमार्जारः । इति दीर्घावनिटौ च ॥ ७ ॥ पॄंकू इति शिति सूत्रम्

## पॄभृमाहाङामिः ॥ ८ ॥ [ सि० ४।१।५८ ]

**एषां पञ्चानां शिति द्वित्वे पूर्वस्य इः स्यात्ततो गुणे, पिपर्त्ति पिपृतः पिप्रति १ । पिपृयात् २ । पिपर्तु-पिपृतात् ३ । अपिपः अपिपृताम् अपिपरुः । अपिपः ४ । अपापीत् अपार्ष्टाम् ५ । पपार पप्रतुः पप्रुः ६ । प्रियात् ७ । पर्ता ८ । हनृत इतीडागमे परिष्यति ९ । अपरिष्यत् १० । पॄ इति सेट् । दीर्घान्तोऽयमिति केचित्तत्र ॥ ८ ॥**

'पॄभृ०' पॄश्च ऋश्च भृश्च माश्च हाङ् च तेषाम् । एषां पञ्चानामिति । 'पॄंकू पालनपूरणयोः' । 'ऋंकू गतौ' । 'डुडुभृंग्कू पोषणे च' । 'माङ्कू मानशब्दयोः' । 'ओहाङ्कू गतौ इत्येषामित्यर्थः । पिपर्त्तीत्यादि व्यक्तम् । परोक्षायां थवि 'ऋतः' (४।४।७९) इति इड्निषेधात् पिपर्थ इत्येकमेव रूपम् । व्यञ्जनादिपरोक्षायां 'स्क्रसृ०' (४।४।८१) इतीटि पप्रिव पप्रिम इति । 'हनृतः०' (४।४।४९) इतीटि परिष्यतीति । दीर्घान्तोऽयमिति ॥ ८ ॥ पक्षे क्ङिति सूत्रम्

## ओष्ठ्यादुर् ॥ ९ ॥ [ सि० ४।४।११७ ]

**धातोरोष्ठ्यात्परस्य ऋतः क्ङित्युर् स्यात् । भ्वादेर्नामिन इति दीर्घे पिपूर्तः पिपुरति १ । पिपूर्यात् २ । पिपर्तु-पिपूर्तात् ३ । अपिपः ४ । अपारीत् अपारिष्टाम् ५ । पपार ॥ ९ ॥**

**'ओष्ठ्या०'** उर् स्यादिति । 'ऋतां क्ङितीर्' (४।४।११६) इत्यस्यापवादः । यथा पूर्तः । पूः पुरौ । यङि पोपूर्यते । पोपुरति । 'नामिनोऽनिट्' (४।३।३३) इति सिचः कित्त्वे पुपूर्षति । 'स्वर-हन्गमोः सनि धुटि' (४।१।१०४) इति दीर्घे बुभूर्षति मुमूर्षति । दन्त्यौष्ठ्योऽप्योष्ठ्यः तेन वुवूर्षते प्रावुवूर्षति । ओष्ठ्यादिति किम् ? तीर्णम् । धातोरिति विशेषणादिह न भवति, समीर्णम् । ऋश् गता-वित्यस्य क्ते रूपम् । क्ङितीत्येव । निपरणम् निपारकः प्रावरणम् प्रावारकः । केचित्तूपान्त्यस्यापि ऋत उरमिच्छन्ति । 'पृणत् प्रीणने' मृणत् हिंसायामित्यनयोर्यङ्लुप् तस्य 'अहन्पञ्चमस्य०' (४।१।१०७)



Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यादिना दीर्घत्वम् । परिपूर्णः मरिमूर्णः । अविशेषनिर्देशात्तदपि संगृहीतम् ॥ ९ ॥ परोक्षायां सूत्रम्

## ऋः शॄदृप्रः ॥ १० ॥ [ सि० ४।४।२० ]

एषां परोक्षायामृर्वा स्यात् । पप्रतुः पक्षे स्कृच्छृतोऽकि परोक्षायामिति गुणे पपरतुः पप्रुः-पपरुः । थवि स्क्रसृत्रितीटि, पपरिथ पपरिव ६ । पूर्यात् ७ । परिता-परीता ८ । परिष्यति-परीष्यति ९ । अपरिष्यत्-अपरीष्यत् १० । 'ऋंक गतौ' । द्वित्वे तु पृभृ इति पूर्वस्य इत्वे, *पूर्वस्याऽस्वे स्वरे य्वोरियुवितीयादेशे नामिन इति गुणे च इयर्ति इयृतः इयरति १ । इयृयात् २ ।* इयर्तु-इयृतात् इयृहि-इयृतात् इयराणि ३ । ऐयः ऐयृताम् ऐयरुः । ऐयरम् । ऐयृव ॥ १० ॥

'ऋ०' एषामिति 'कॄ मॄ शॄश् हिंसायाम्' । 'दॄश् विदारणे' । 'पॄश् पालनपूरणयोः' । प्रस्तुतोऽयं 'पृंक् पूरणे' इति च । 'वृतो नवाऽनाशीः सिच्परस्मै च' ( ४।४।३५ ) इति इटो दीर्घविकल्पे परीता परितेत्यादि । क्तयोर्व्यापृतः व्यापृतवान् । येषां तु मते दीर्घान्तस्तन्मते 'ऋवर्णश्र्यूर्णुगः कितः' ( ४।४।५७ ) इतीडभावे ऋल्वादेरित्यत्र प्रो वर्जनात् क्तयोस्तस्य नत्वाभावे पूर्तः पूर्तवान् । 'णौ साहि-साति०' ( ५।१।५१ ) इति शे पारयः । घञि पारः । णौ 'दान्तशान्त०' इति क्ते वा पूर्णेति निपातनमस्यापीत्येके । तन्मते णौ क्ते पूर्णः । पारितः पूरितः इति तु पूरैश्चेण्यन्तात् क्ते । ऋंक इति । 'श्रौती'त्यत्रात्यादावित्यधिकारादत्र ऋच्छादेशाभावः । यद्वा 'श्रौति०' ( ५।२।१०८ ) इत्यत्र सूत्रे घ्रादिभिः साहचर्यात्पार्त्योर्भौवादिकयोरेव ग्रहणमिति नात्र ऋच्छादेशः । कर्मण्यसति 'समो गमृ०' ( ३।३।८४ ) इत्यात्मने पदे समियृते । समिय्राते समियृते । समियृषे । आप्ये तु सति 'शेषात्परस्मै' ( ३।३।१०० ) इति परस्मैपदे समियर्ति मित्रम् ॥ १० ॥ अद्यतन्यां सूत्रम्

## सर्त्यर्तेर्वा ॥ ११ ॥ [ सि० ३।४।६१ ]

आभ्यामद्यतन्यामङ् वा स्यात् । स्वरादेरिति वृद्धौ आरत् । पक्षे सिचि परस्मै इति वृद्धौ, आर्षीत् ५ । आर आरतुः । ऋवृव्येऽद इतीडागमे, आरिथ ६ । अर्यात् ७ । अर्ता ८ । अरिष्यति ९ । आरिष्यत् १० । षडेते परस्मैपदिनः । 'ओहाङ् गतौ' । एषामीरितीत्वे, जिहीते । श्नश्चेत्यालुकि जिहाते जिहते जिहीषे १ । जिहीत २ । जिहीताम् ३ । अजिहीत अजिहत ४ । अहास्त ५ । जहे ६ । हासीष्ट ७ । हाता ८ । हास्यते ९ । अहास्यत १० । 'माङ् मानशब्दयोः' । मिमीते मिमाते मिमते मिमीषे १ । मिमीत २ । मिमीताम् ३ । अमिमीत ४ । अमास्त ५ । ममे ६ । मासीष्ट ७ । माता ८ । मास्यते ९ । अमास्यत १० । द्वावात्मनेपदिनौ । 'डुदांगक् दाने'; दाधातुः, शेषा इतः । द्वित्वे ह्रस्वे ददाति । श्नश्चेत्यालुकि दत्तः ददति । ददासि दत्थः दत्थ १ । दद्यात् २ । ददातु-दत्तात् ॥ ११ ॥

**आभ्यामिति** 'सृं गतौ' भ्वादिः । 'ऋ' अदादिर्भ्वादिर्वा । यथा असरत् असार्षीत् । सर्तेः कर्त्तर्यात्मनेपदं न दृश्यते इति नोदाह्रियते । 'क्रियाव्यतिहार०' ( ३।३।२३ ) इत्यत्र गत्यर्थवर्जनात् सर्वे गत्यर्था ज्ञानार्था इति ज्ञानार्थस्यापि नेष्यते इति भावः । ऋ आरत् आर्षीत् । आत्मनेपदे-ऽङि समारत पक्षे समार्ष्ट । अत्र नित्यत्वात् सिचूलोपात् प्रागेव वृद्धिः । **ननु** 'एत्यस्तेर्वृद्धिः' ( ४।४।३० ) इति सूत्रेण कृतेऽन्यस्मिन् धातुप्रत्ययकार्ये पश्चाद्वृद्धिस्तद्बाध्योऽट्वेति ज्ञापितम् । ततः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कथं प्राग्वृद्धिर्भवति इत्यत्रोच्यते समासान्तागमसंज्ञाज्ञापकगणनिर्दिष्टान्यनित्यानीति न्यायात् ज्ञापकज्ञापितस्य विधेरनित्यत्वात् प्रागवृद्धिर्भवति । आत्मनेपदे न भवति । परस्मैपदे नित्यमित्येके । परस्मैपदे नित्यमात्मनेपदेऽर्त्तेर्वा, सर्त्तेर्नेत्यन्ये । उभयत्र नित्यमित्यपरे । तिव्निर्देशो यङ्लुप्निवृत्त्यर्थः । असरिसारीत् आरारीत् । भृशं पुनः पुनर्वा इयर्त्ति ऋच्छति वा 'अत्यर्त्तीति यङ् तस्य लुप् । ततो द्विर्वचनम् । 'ऋतोऽत्' ( ४।१।३८ ) 'रि रौ च लुपि' ( ४।१।५६ ) इति रागमस्ततोऽद्यतनीसिच् 'सः सिजस्तेर्दिस्योः' ( ४।३।६५ ) इतीत् इट् 'इट ईति' ( ४।३।७१ ) इति सिच्लुप् । ततः 'सिचि परस्मै०' ( ४।३।४४ ) इति धातोर्वृद्धिरार् ततः 'स्वरादेस्तासु' ( ४।४।३१ ) इति पूर्वस्य अकारस्य आकारः । इन्ध्यसंयोगादवित्परोक्षायाः किर्त्वेऽप्यत्र 'संयोगादृदर्त्तेः' ( ४।३।९ ) इत्यकि परोक्षायां गुणे आरतुः आरुरित्यादि । भावकर्मणोः क्ये 'क्ययङाशीर्ये' ( ४।३।१० ) इति गुणे अर्यते । 'अत्यर्त्तीति' ( ३।४।१० ) यङि अरार्यते । आशीर्ये अर्यात् । सनि 'ऋस्मिपूङ्ञ्जशौकृगृदृधृप्रच्छः' ( ४।४।४८ ) इत्यनेनेटि स्वरस्य कार्यित्वात् द्वित्वं प्रति निमित्तत्वाभावेन स्वरविधित्वाभावात् प्राक्स्वरे इत्यप्राप्तौ पूर्वं स्वरादेशे गुणे, पश्चात् 'स्वरादेर्द्वितीयः' ( ४।१।४ ) इति द्वितीयांशस्य रि इत्यस्य द्वित्वे अरिरिषति । अनिट्त्वात् अर्त्ता अर्त्तुम् । 'ऋह्री०' ( ४।२।७६ ) इति क्तयोस्तस्य वा नत्वे ऋणं ऋतम् । णौ 'अर्त्तिरी०' ( ४।२।२१ ) इति पौ अर्पयति । उणादौ ऋकृवृ० ( १९६ ) इत्युणे अरुणः । कमिशुगार्तिभ्यः स्थः ( २२५ ) इति थे अर्थः । गृदृरमि० ( ३२७ ) इति भे अर्भः शिशुः । अर्त्तीरि० ( ३३८ ) इति मे अर्म्मः अक्षिरोगः । धाग्राजि० ( ३७९ ) इत्यन्ये अरण्यम् । ऋछिचटि० ( ३९७ ) इत्यरे अररं कवाटः । ऋहसृ० ( ६३८ ) इत्यणौ अरणिः । अर्त्तेरत्निः ( ६८२ ) अरत्निः उत्कनिष्ठो हस्तः । अर्त्तेरूञ्चात ( ६८९ ) इति मौ ऊर्मिः । नदिवल्ल्यर्त्तिकुतेररिः ( ६९८ ) इत्यरौ अररिः कपाटः । अञ्ज्यर्त्तेः कित् ( ७७७ ) इति तुनि ऋतुर्वसन्तादिः स्त्रीरजस्तत्कालश्च । कटिकुट्य० ( ८१२ ) इत्यरौ अररुः असुरः आयुधं च । अर्त्तेर्भुक्षिनक् ( ९२८ ) ऋभुक्षा इन्द्रः । स्नामदिपद्यर्त्तिपृशकिभ्यो वन् ( ९०४ ) इति वनि अर्वा अश्वः । अर्त्तेरुराशौ च ( ९६७ ) अस्मादस् प्रत्ययोऽस्य च उर इति अर्श इति शकारान्त आदेशो भवति । उरः वक्षः । अर्शांसि गुदादिकीलाः । अर्त्तीण्भ्यां नस् ( ९७९ ) इति नसि अर्णः जलम् । रुद्यर्त्ति० ( ९९७ ) इत्युसि अरुः व्रणः । 'ॠं प्रापणे च' ऋच्छति । ऋकारान्तौ द्वौ । षडेते परस्मैपदिनोऽनिटश्च । ६ । **ओहाङ्क्** इति । ङित्त्वात् 'इङित०' ( ३।३।२२ ) इत्यात्मनेपदे 'ह्वः शिति' ( ४।१।१२ ) इति द्वित्वे 'पृभृमाहाङामिः' ( ४।१।५८ ) इति पूर्वस्येत्वे, 'एषामीर्व्यञ्जनेऽदः' ( ४।२।९७ ) इतीत्वे च जिहीते इत्यादि । 'ईर्व्यञ्जन०' ( ४।३।९७ ) इत्यत्र हाकोऽनुवृत्तेः क्ये ईत्वाभावे हायते । 'य एचातः' ( ५।१।२८ ) इति ये हेयम् । 'हः काल०' ( ५।१।६८ ) इति टनणि हायनो वर्षं व्रीहिश्च । ओदित्त्वात् 'सूयत्याद्यो०' ( ४।२।७० ) इति क्तयोस्तस्य नत्वे हानः हानवान् । 'अदुरुपसर्गान्त०' ( २।३।७७ ) पूर्वस्य स्वरादिति नस्य णत्वे प्रहाणः प्रहाणवान् । 'ओहांक् त्यागे' । जहाति । हीयते । **माङ्** इति । 'ह्वः शिति' ( ४।१।१२ ) इति द्वित्वे, 'पृभृमा०' ( ४।१।५८ ) इति पूर्वस्येत्वे, 'एषामी०' ( ४।२।९७ ) इतीत्वे च मिमीते । 'नेर्ङ्मादा०' ( २।३।७९ ) इति नेर्णत्वे प्रणिमिमीते । आशिषि क्त्त्वाभावात् 'गापास्था०' ( ४।३।९६ ) इत्येत्वाभावे मासीष्ट । क्ये 'ईर्व्यञ्जने०' ( ४।३।९७ ) इतीत्वे मीयते । सनि मिमीमादामित्स्वरस्य ( ४।१।२० ) इति स्वरस्य इत्वे द्वित्वाभावे प्रमित्सते । 'य एचातः' ( ५।१।२८ ) इति ये प्रमेयम् । किति तादौ 'दोसोमास्थः इः' ( ४।४।११ ) प्रमितः प्रमित-

वान् । 'श्र्वादिभ्यः' ( ५।३।९२ ) इति क्तौ प्रमितिः । उपसर्गादित्यङि प्रमा । करणेऽनटि प्रमाणम् । इत्यात्मनेपदिनौ द्वावनिटौ चादन्तौ २ ।

---

अथोभयपदिनो निरूप्यन्ते । **डुदांग्क्** इति । शेषा इत इति । तत्र ड्वित्त्वात् त्रिमक् दानेन निर्वृत्तं दत्रिमं भोगसुखम् । गित्त्वादुभयपदी, कित्त्वाद्दादिरिति । ददातीत्यादि स्पष्टम् ॥ ११ ॥ पञ्चमी हौ सूत्रम्

## हौ दः ॥ १२ ॥ [ सि० ४।१।३१ ]

**दासंज्ञस्य हौ परे एः स्यात्, न च द्विः । देहि-दत्तात् ३ । अददात् अदत्ताम् अददुः ४ । अदात् अदाताम् अदुः ५ । ददौ ददिथ-ददाथ ६ । देयात् ७ । दाता ८ । दास्यति ९ । अदास्यत् १० । दत्ते ददाते ददते । दत्से १ । ददीत २ । दत्ताम् ३ । अदत्त ४ । इश्च स्थाद इतीत्वे अदित अदिषाताम् अदिषत ५ । ददे ६ । दासीष्ट ७ । दाता ८ । दास्यते ९ । अदास्यत १० । 'डुधांग्क् धारणे च' । द्वितीयतुर्ययोरिति दत्वे, दधाति ।**

'हौ०' स्पष्टम् । न च द्विरिति वचनात् कृतमपि द्वित्वं निवर्त्तते । तेन यङ्लुप्यपि देहीति भवति । **ननु** प्रत्यासत्तेर्न्यायाद्यस्मिन्नेव प्रत्यये द्वित्वमेत्वं च प्राप्तं तस्मिन्नेव प्रत्यये न च द्विरिति प्रवर्त्तते । अत्र यङ्निमित्तकं द्वित्वं हौ परे कथं निवर्त्यते? **सत्यम्** । किन्तु व्यक्तौ(त्त्या) सूत्रप्रवृत्तेर्द्वित्वमात्रं सर्वं निवर्त्यते इति । हाविति व्यक्तिनिर्देशात् इह न भवति दत्तात् धत्तादिति । 'नेर्ङ्मादा०' ( २।३।७९ ) इति नेर्णत्वे प्रणिददाति । 'द्युक्त०' ( ४।२।९३ ) इति शिदनः पुसि अददुः । 'पिबैति०' ( ४।३।६६ ) इति सिचो लुपि अदात् । 'सिज्विदो भुवः' ( ४।२।९२ ) इत्यनः पुसि अदुः । आशिषि 'गापास्था०' ( ४।३।९६ ) इत्येत्वे देयात् । क्ङितोऽन्यत्र दासीष्ट । सनि 'मिमीमादामित्स्वरस्य' ( ४।१।२० ) इति द्वित्वाभावे च दित्सते । अत्र फलवत्कर्त्तरि प्राग्वदित्यात्मनेपदम् । अन्यत्र शेषादिति परस्मैपदे दित्सति । 'य एचातः' ( ५।१।२८ ) इति ये देयम् । 'तन्व्यधी०' ( ५।१।६४ ) इति णे दायः । दद इति तु ददतेरचि । 'आतोऽ०' इत्यणपवादे डे गोदः । 'दश्चाङः' ( ५।१।७८ ) दायादः । प्राजूज्ञश्चेति धर्मप्रदः । **'प्राद्दागस्त्त आरम्भे क्ते'** ( ४।४।७ ) इति वा क्ते दातुमारब्धं प्रत्तम् । द्विस्तकार आदेशः 'अनेकवर्णः सर्वस्य' ( ७।४।१०७ ) इति सर्वादेशार्थः । अकार उच्चारणार्थः । पक्षे ददिति दति प्रदत्तम् । 'निविस्वन्ववात्' ( ४।४।८ ) इति वा क्ते 'दस्ति' (३।२।८८) इति दीर्घे च नीत्तम् वीत्तम् सूत्तम् अनूत्तम् । पक्षे ददिति दति निदत्तमित्यादि । केचिदत्राप्यारम्भ एव विकल्पमिच्छन्ति । यदाहुः 'अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि । सुदत्तं च कुदत्तं च निदत्तमिति चेष्यति' । इति **तन्मतसङ्ग्रहार्थमारम्भ** इत्यनुवर्त्तनीयम् । **'स्वरादुपसर्गाद्दस्ति कित्यधः'** ( ४।४।९ ) स्वरान्तादुपसर्गात्परस्य धावर्जदासंज्ञकस्य तादौ किति त्तादेशो भवति । वेति निवृत्तम् । नित्यं भवति । प्रत्तः प्रत्तवान् आत्तः उपात्तः । परीत्त्रिमम् प्रणीत्त्रिमम् त्रिमक् । 'दाद्धेसि' ( ५।२।३६ ) इति रौ दानशीलो दारुः । 'भावाकर्त्रोः' ( ५।३।१८ ) घञि दायः । 'उपसर्गाद्दः किः' ( ५।३।८७ ) आदिः । 'उपसर्गादातः' ( ५।३।११० ) इत्यङि उपदा । खलपवादे 'शासूयुधि०' ( ५।३।१४१ ) इत्यने सुदानः । **डुधांग्क्** इति धारणे चेति । चकाराद्दाने इत्यनुवर्त्तनीयम् । दधाति । 'नेर्ङ्मादा०' ( २।३।७९ ) इति नेर्णत्वे प्रणिदधाति श्रद्दधाति । 'वा वाप्योः०' ( ३।२।१५६ ) इत्यपेः पिर्वा अपिदधाति पिदधाति ॥ १२ ॥ तसादौ सूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## धागस्तथोश्च ॥ १३ ॥ [ सि० २।१।७८ ]

चतुर्थान्तस्य धाग आदेश्चतुर्थः स्यात्तथोः स्ध्वोश्च परयोः । धत्तः दधति । दधासि धत्थः धत्थ १ । दध्यात् २ । दधातु-धत्तात् दधतु ३ । अदधात् ४ । अधात् ५ । दधौ ६ । धेयात् ७ । धाता ८ । धास्यति ९ । अधास्यत् १० । धत्ते दधाते दधते । धत्से दधाथे धध्वे १ । दधीत २ । धत्ताम् ३ । अधत्त ४ । अधित ५ । दधे ६ । धासीष्ट ७ । धाता ८ । धास्यते ९ । अधास्यत १० । 'डुंडुभृंग्क् पोषणे च' । पृभृ इतीत्वे, बिभर्ति बिभृतः बिभ्रति । बिभर्षि १ । बिभृयात् २ । बिभर्तु ३ । अबिभः अबिभरुः ४ । अभार्षीत् ५ । 'भीह्रीभृ०' इत्यामि बिभराम्बभूव । पक्षे बभार । स्क्रसृवृभृ इति सूत्रे भृवर्जनेनेड्निषेधात् बभर्थ बभृव ६ । भ्रियात् ७ । भर्ता ८ । भरिष्यति ९ । अभरिष्यत् १० । बिभृते बिभ्राते १ । बिभ्रीत २ । बिभृताम् ३ । अबिभृत ४ । अभृत अभृषाताम् ५ । बिभराञ्चक्रे बभ्रे ६ । भृषीष्ट ७ । भर्ता ८ । भरिष्यते ९ । अभरिष्यत १० । †'णिजूंकी शौचे च' ॥ १३ ॥

'धाग०' स्पष्टम् । 'अधश्चतुर्था'दित्यत्र धावर्जनात्तथोर्धत्वाभावे धत्तः । 'अन्तो नो लुक्' (४।२।९४) दधति । 'हौ दः' (४।१।३१) इति स्वरस्य एत्वे द्वित्वाभावे च धेहि । 'श्रुक्त०' (४।२।९३) इति शिदनः पुसि अदधुः । 'अवौ दाधौ दा' (३।३।५) इति दासंज्ञत्वात् 'पिबैति०' (४।३।६६) इति सिचो लुपि अधात् । 'सिज्विद०' (४।२।९२) इत्यनः पुसि अधुः । अद्यतन्यामात्मनेपदे 'इश्च स्थादः' (४।३।११) इतीत्वे कित्त्वे च अधित । क्ये 'ईर्व्यञ्जने०' (४।३।९७) इतीत्वे धीयते । शतरि दधत् । शौ वा दधति दधन्ति कुलानि । यङि देधीयते । 'ईर्व्यञ्जनेऽयपि' इति ईः । यङ्लुपि दाधाति दाधेति । 'अश्वातः' (४।२।९६) इत्यालुकि 'धागस्तथोश्च' इत्यत्र गिन्निर्देशात्पूर्वस्य न धः, दात्तः दाधति । दाधेषि दाधासि दात्थः दात्थ । दाधेमि दाधामि दाध्वः दाध्मः । दाध्यात् । दाधातु दाधेतु हौ धेहि । अदाधात् अदाधेत् अदात्ताम् अदाधुः । अद्यतन्याम् अदाधात् अदाधाताम् अदाधुः । दाधाञ्चकार । दाधेयात् । दाधिषीष्ट दाधिष्यति । 'धाग०' इत्यत्र गिन्निर्देशात् हित्वाभावे दाधित्वा । विदाधाय । दाधितः । दाधितवान् । णौ धापयति विधापयति प्रणिधापयति । णौ ङे अदीधपत् । विधापयाञ्चकार । णौ सनि विदिधापयिषति । सनि 'मिमीमा०' (४।१।२०) इतीति द्वित्वाभावे धित्सति । अनिट्त्वात् धाता धातुम् धातव्यम् । 'धाय्यापाय्य साम्नाय्यनिकाय्यमृङ्मानहविर्निवासे' (५।१।२४) इति ध्यणि निपातनात् धाय्या ऋक् । 'सामिधेनी धाय्या च समिदाधीयते यया' इत्य**भिधानचिन्तामणौ** । ऋचोऽन्यत्र 'य एचातः' (५।१।२८) इति ये धेयम् । 'तन्व्यधीण्श्वसातः' (५।१।६४) इति णे धायः । दध इति तु दधतेरचि । तादौ किति 'धागः' (४।४।१५) इति हिः विहितम् । विहितवान् । 'समस्ततहिते वा' (३।२।१३९) इति समो मो लुकि सहितं संहितम् । 'वा वाप्योस्तनिक्रीधाग्नहोर्वपी' (३।२।१५६) इति वापेः प्यादेशे अपिहितं पिहितम् । पिधानं अपिधानम् । 'आतो ड०' (५।१।७६) इति डे गोधा । 'शीङश्रद्धा०' (५।२।३७) इत्यालौ श्रद्धालुः । 'सस्निचक्रिदधिजज्ञिनेमिः' (५।२।३९) इति निपातनात् डौ धानशीलो दधिः । ड्वित्वात्त्रिमकि विधानेन निर्वृत्तं विहित्रिमम् । 'उपसर्गाद्दः किः' (५।३।८७) प्रधिः विधिः सन्धिः । 'निर्दुस्सोः सेधसन्धिसाम्नाम्' (२।३।३१) इति षत्वे निःषन्धिः दुःषन्धिः सुषन्धिः । 'व्याप्यादाधारे' (५।३।८८) जलधिः । अन्तर्द्धानं अन्तर्द्धिः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'स्थादिभ्यः कः' (५।३।८२) विधः । 'उपसर्गादातः' (५।३।११०) इत्यङि विधा उपधा । 'मृगये०' (५।३।१०१) इति निपातनादङि श्रद्धा । खलपवादे 'शासूयुधि०' (५।३।१४१) इत्यने सुधानः । उणादौ भीण्शलि० (२१) इति के धाकः ओदनः स्तम्भश्च । धाल्॰० (७०) इत्याण के धाणको दीनारद्वादशभागः । शीभीराजेश्चानकः (७१) शीभीराजिभ्यो धाल्वशिङ्खिभ्यश्च आनकः प्रत्ययो भवति । धानको हेमादिपरिमाणम् । घ्याधा० (२५८) इति ने धाना भृष्टयवोऽङ्कुरश्च । तुदादिवृजि० (२७३) इति किल्यने निधनम् । अर्त्तीरि० (३३८) इति मे धामं निलयस्तेजश्च । धाग्राजि० (३७९) इत्यन्ये धान्यम् । सन्ध्येति तु सङ्ख्येयं च (३५९) इति ये । उण्धाग्भ्यां वा (३८९) इति वा किति रे धीरः धारा । कृसिकमि० (७७३) इति तुनि धातुः । धृषेस्तु धृषे-र्दिधिषदि धीपौ च (८४२) इत्यूः 'दिधिषूः ज्यायस्याः पूर्वमूढा लव्वी पुंश्चली च । दिधीपूः ऊढायाः कनिष्ठायाः ज्येष्ठानूढा' इति **धातुपारायणे । अभिधानचिन्तामणौ** तु 'दिधिषूस्तु पूनर्भू-र्द्विरूढाऽस्या दिधिषूपतिः' इति । मन् (९११) इति मनि धाम । वयःपयःपुरोरेतोभ्य० (९७४) इत्यसि वयोधा युवा, पयोधाः पर्जन्यः, पुरोधाः पुरोहितः, रेतोधा जनकः । वेधा विधा इति तु 'विधत् विधाने' इत्यस्मादस् प्रत्ययो भवति स च किद्वा [ ९७२ ] वेधा विद्वान् सर्ववित् प्रजापतिश्च । विधाः स एव । इत्यादन्तौ द्वावनिटौ । '**डुडुभृंग्क्** इति पोषणे चेति' । चकारा-द्धारणेऽपि । 'श्रुक्त०' (४।२।९३) इति शिदनः पुसि 'पुस्पौ' (४।३।३) इति गुणे च अबिभरुः । 'भीह्री०' (३।४।५०) इति परोक्षाया वामि तिव्वद्भावात् द्वित्वेत्वयोर्बिभराम्बभूव बभारेति । 'ऋवर्णात्' (४।३।३६) इति सूत्रेणानिट् सिजाशिषो किस्वाद्गुणाभावे 'धुड्ह्रस्वा०' (४।३।७०) इति सिज्लुकि अभृत । 'भीह्री०' इति वामि विभराञ्चक्रे बभ्रे इति । 'भृगोऽसंज्ञायाम्' (५।१।४५) इति क्यपि भृत्यः । संज्ञायां तु 'ऋवर्ण०' (५।१।१७) इति घ्यणि भार्यो नाम क्षत्रियविशेषः । भार्या वधूः । 'समो वा' (५।१।४६) संभृत्यः । संभार्यः । 'लिहादिभ्यः' (५।१।५०) इत्यण-पवादेऽचि जारभरा कन्या । क्ते भृतः । 'कुत्सित०' (७।३।३३) इति कपि भृतकः । 'भावाकर्त्रोः' (५।३।१८) घञि भारः । भर इति भृणालेरलि । 'कुक्ष्यात्मोदरा०' (५।१।९०) इति खौ कुक्षिंभरिः आत्मंभरिः उदरंभरिः । 'भृवृजि०' (५।१।११२) इति खे विश्वंभरा भूः । 'भृगो नाम्नि' (५।३।९८) इति स्त्रियां भावे क्यपि कुमारभृत्या । संज्ञायामन्यत्र भृतिः । द्वित्वादथुः भरथुः । ड्वित्वात्रिमक् । भृत्रिमम् । सनि बुभूर्षति । 'इवृध०' (४।४।४७) इत्यत्र भरेतिग्रहणान्नास्य सनि वेट्त्वम् । **अन्ये** त्वस्यापि वेटं कृत्वा कृतगुणभरनिर्देशेन इडभावपक्षे किस्वेऽपि गुणं चेच्छन्ति । बिभर्षति विभरि-षति । यङि बेभ्रीयते । यङ्लुपि बर्भरीति बरिभरीति बरीभरीति । बर्भर्त्ति बरिभर्त्ति बरीभर्त्ति । णौ भारयति । णौ ङे अबीभरत् । णौ सनि बिभारयिषति । शतरि बिभ्रत् बिभ्रती । उणादौ द्वार-शृङ्गार० (४११) इत्यारे निपातनात् भृङ्गारः । ह्सुषिकृषिरिषिविषिशोशुच्यशिपूयीणुप्रभृभ्यः कित् (६५१) अनेन प्रपूर्वात् भृधातोः किति तौ प्रभृतिः आदिः । 'भृंग् भरणे' इत्यस्य तु भरति भरते । ऋकारान्तोऽनिट् एकः । '**णिजूंकि** इति । चकारात्पोषणे इत्यनुवर्त्तनीयम् ॥ १३ ॥ शिति सूत्रम्

## निजां शित्येत् ॥ १४ ॥ [ सि० ४।१।५७ ]

**निजिविजिविषां शिति द्वित्वे पूर्वस्य एत् स्यात् । नेनेक्ति नेनिक्तः नेनिजति । नेनेक्षि १ । नेनिज्यात् २ । नेनेक्तु-नेनिक्तात् नेनेग्धि ॥ १४ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**निजां०** निजामिति बहुवचनेन निजिविजिविषत्रय एवादादिपर्यन्तपठिता गृह्यन्ते ॥ १४ ॥ स्वरादौ विति गुणे प्राप्ते सूत्रम्

## द्युक्तोपान्त्यस्य शिति स्वरे ॥ १५ ॥ [ सि० ४।३।१४ ]

**द्विरुक्तस्य धातोरुपान्त्यस्य नामिनः शिति स्वरादौ गुणो न । नेनिजानि ३ । अनेनेक्-ग् अनेनिजुः अनेनिजम् ४ । ऋदिच्छ्वीत्यादिना वाङि, अनिजत् अनिजताम् । अनैक्षीत् अनैक्ताम् ५ अनैक्षुः ५ । निनेज ६ । निज्यात् ७ । नेक्ता ८ । नेक्ष्यति ९ । अनेक्ष्यत् १० । नेनिक्ते १ । नेनिजीत २ । नेनिक्ताम् ३ । अनेनिक्त ४ । अनिक्त अनिक्षाताम् ५ । नेनिजे ६ । निक्षीष्ट ७ । नेक्ता ८ । नेक्ष्यते ९ । अनेक्ष्यत १० । 'विजूंकी पृथग्भावे' वेवेक्ति १० इत्यादि निजिवत् । 'विषूंकी व्याप्तौ' । वेवेष्टि वेविष्टः १ । वेविष्यात् । वेवेष्टु-वेविष्टात् ३ । अवेवेट्-ड् ४ । लृदित्त्वादङ् अविषत् ५ । विवेष ६ । विष्यात् । वेष्टा ८ । वेक्ष्यति ९ । अवेक्ष्यत् १० । वेविष्टे १ । वेविषीत २ । वेविष्टाम् ३ । अवेविष्ट ४ । हशिट इति सकि अविक्षत ५ । विविषे ६ । विक्षीष्ट ७ । वेष्टा ८ । वेक्ष्यते ९ । अवेक्ष्यत १० । एते षडुभयपदिनः ॥ १५ ॥**

इति श्रीमहोपाध्यायश्रीकीर्तिविजयगणिशिष्योपाध्यायश्रीविनयविजयगणिविरचितायां

हैमलघुप्रक्रियायां जुहोत्यादयः समाप्ताः ।

**'द्युक्तो०'** अनेनिजमिति । एवं वेविषाणि अवेविषम् । बेभिदीति अवेभिदम् । मोमुदीति अमोमुदम् । नर्नृतीति अनर्नृतम् । द्युक्तेति किम् ? वेद वेदानि अवेदम् । उपान्त्यस्येति किम् ? जुहवानि । बोभवीति सोषवीति । शितीति किम् ? निनेज विवेद । बेभेदिषीष्ट । स्वर इति किम् ? नेनेक्ति । मोमोर्ति । नर्नर्त्ति । आत्मनेपदे पञ्चम्यास्तृतीयत्रिकेऽनेन गुणनिषेधे नेनिजै नेनिजावहै नेनिजामहै । नेक्ता नेक्तुम् । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के निजः । शतरि अन्तो नो लुकि नेनिजत् नेनिजतौ । घञि 'क्तेऽनिट०' ( ४।१।१११ ) इति गत्वे नेगः । यङि नेनिज्यते । यङ्लुपि नेनेक्ति नेनिजीति । सनि निनिक्षति । णौ नेजयति । ङपरे णौ अनीनिजत् । **विजूंकी** इति । 'वेवेक्ति न यशश्चन्द्रात्' न पृथग्भवतीत्यर्थः । वेविक्तः । आत्मनेपदेऽपि वेविक्ते वेविजाते वेविजते । सनि विविक्षति । णौ वेजयति । णौ ङे अवीविजत् । **एतत्सर्वं संक्षेपेणाह**—निजिवदिति विक्त्वा प्रविज्यते । वेक्ता वेक्तुम् । वेगः । **चान्तोऽयमिति सभ्याः** । वेवेक्ति वेविक्तः वेविचति । णिगि विवेचयति विवेक्तुम् विवेचनम् । विवेकः । इति जकारान्तौ द्वावनिटौ । **विष्लृंकी** इति । 'वेवेष्टि यशः क्ष्माम्' व्याप्नोतीत्यर्थः । वेविष्टः वेविषति । आत्मनेपदेऽद्यतन्यां च ङ भावे 'हशिट०' ( ३।४।५५ ) इति सकि अविक्षत् । बहुवचने स्वरे इत्यलुकि, स्वरस्य इत्यलुकः स्थानित्वात् 'अनतो-ऽन्तोऽदात्मने' ( ४।२।११४ ) इत्यदभावे अविक्षन्त । नायं लित् । ऊदिदित्येके । तन्मते 'हशिट०' इति सकि अविक्षत् । ऊदित्त्वात् क्त्वि वेटि विष्ट्वा वेषित्वा । अनुस्वारेत्त्वान्नेट् वेष्टा वेष्टुम् । विष्टः विष्टवान् । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के विषः विषम् । णके परिवेषकः । कर्मजेति प्रतिषिद्धोऽपि याजकादित्वात् षष्ठीसमासः । साधुपरिवेषकः । घ्यणि वेष्यः । घञि वेषः । उणादौ विषेः कित् ( ७६९ ) इति णौ विष्णुः । एकः षकारान्तोऽनिट् । एवं षडुभयपदिनो ह्वादयः ।

अत्रान्यैरन्येप्येकादशाधीयन्ते । ते त्वलौकिकत्वादस्माभिरुपेक्षिता इति **श्रीधातुपारायणे श्रीसूरिभिरुक्तम्,** ते चैवम् **'घृ क्षरणदीप्त्योः'** । ह्वादित्वात् द्वित्वे जघर्त्ति । **'हृ प्रसह्यकरणे'**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जहर्त्ति । '**सृ** गतौ' ससर्त्ति । '**भस** भर्त्सनदीप्त्योः' बभस्ति । '**किकितौ** ज्ञानार्थौ' चिकेति चिकितः । चिकेत्ति चिकित्तः । '**तुर्** त्वरणे' । तुतोर्त्ति तुतूर्त्तः तुतुरति । '**धिष** शब्दे' दिधेष्टि दिधिष्टः दिधिषति । '**धन** धान्ये' दधन्ति । **जन** जनने जजन्ति । 'आः खनिसनिजनः' (४।२।६०) इत्यात्वे जजातः । 'गमहनजन०' (४।२।४४) इत्यकारलोपे जज्ञति । व्यतिजजाते व्यतिजज्ञाते । व्यतिजज्ञिषे । व्यतिजज्ञिध्वे । **परमते** ईङ्जनोरिति इडागमे रूपम् । ये तु आत्वविभाषा जजायात् जजन्यात् इत्यादि । इत्यविकरणः किदादिगणः सम्पूर्णः ।

'परस्मैपदिनः पञ्चचत्वारिंशन्निरूपिताः । आत्मनेपदिनश्चैकोनविंशतिरुदीरिताः' ॥ १ ॥
'सर्वैवोभयपदिनो द्वादयश्च चतुर्दश । पञ्चाशीतिः सङ्कलिता एवं सर्वेऽप्यदादयः' ॥ २ ॥ १५ ॥

यां शिष्योद्धुतकीर्त्तिकीर्त्तिविजयश्रीवाचकाहर्मणे
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः ।
तस्यां शासितसाधुशब्दसरणौ स्वोपज्ञसत्प्रक्रिया
वृत्ताविथममी स्फुटं निगदिताः सद्धातवोऽदादयः ॥ १ ॥



# अथ दिवादयः ।

**'दिवूच् क्रीडाजयेच्छापणिद्युतिस्तुतिगतिषु' ।**

अथ श्यविकरणा दिवादयो वर्णक्रमेण निर्दिश्यन्ते । तत्रापि पूर्वाचार्यप्रसिद्ध्यनुरोधेन पूर्वं दिव्धातुः । **दिवूच्** इत्यादि । क्रीडा द्यूतादिः प्रतीता, जयेच्छा विजिगीषा, पणिर्व्यवहारः क्रयादिः, द्युतिः कान्तिः, स्तुतिगती प्रसिद्धे, एवं षडर्थाः । सूत्रम्

## दिवादे श्यः ॥ १ ॥ [ सि० ३।४।७२ ]

**कर्त्तरि शिति दिवादेः श्यः स्यात् । शकार इत् । भ्वादेर्नामिन इति दीर्घे, दीव्यति १ । दीव्येत् २ । दीव्यतु ३ । अदीव्यत् ४ । अदेवीत् ५ । दिदेव दिदिवतुः दिदेविथ ६ । दीव्यात् ७ । देविता ८ । देविष्यति ९ । अदेविष्यत् १० । 'जॄष् झॄष् च् जरसि' । ऋतां क्ङितीर्, जीर्यति ४ । ऋदिच्छ्वीत्यङ् वा । अजरत् अजारीत् ५ । जजार । स्कृच्छृतोऽकीति गुणे, जॄभ्रमेति वा एत्वे, जेरतुः जजरतुः ६ । जीर्यात् ७ । जरिता-जरीता ८ । जरिष्यति-जरीष्यति ९ । १० 'शोंच् तक्षणे' ॥ १ ॥**

'**दिवा०**' दीव्यतीत्यादि व्यक्तम् । 'उपसर्गाद्दिवः' ( २।२।१७ ) इति विनिमेयद्यूतपणयोः कर्मणो वा कर्मत्वे, 'शेषे' इति षष्ठ्यां शतस्य दीव्यति । शतं प्रदीव्यति । अनुपसर्गस्य 'न' ( २।२।१८ ) इति कर्मत्वाभावे शतस्य दीव्यति । 'करणं च' ( २।२।१९ ) इति करणस्य कर्मत्वकरणत्वयोः' अक्षान् दीव्यति अक्षैर्दीव्यति । वेत्यनुक्त्वा करणं चेत्यत्र चकारकरणं संज्ञाद्वयसमावेशार्थम् । तेन करणत्वात्तृतीया कर्मत्वाच्चाऽनाप्यलक्षणमणिकर्त्तुर्णौ कर्मत्वमणिगि प्राणिकर्तृकानाप्याण्णिग इति परस्मैपदं च न भवति । अक्षैर्देवयते मैत्रश्चैत्रेण । सनि 'इवृध०' ( ४।४।४७ ) इति वेटि इडभावे 'अनुनासिके च०' ( ४।१।१०८ ) इति वश्योटि दुद्यूषति दिदेविषति । ऊदित्त्वात् क्त्वि वेट् द्यूत्वा देवित्वा । अत्र 'वौ व्यञ्जनादेः सन् चाऽय्वः' ( ४।३।२५ ) वौ इति उकारे इकारे वोपान्त्ये सति व्यञ्जनादेर्धातोः परः क्त्वा सन् च सेटौ वा किद्वद्भवतः । अय्व इति यकारान्ताद्वकारान्ताच्च न भवतः । अस्य च धातोर्वकारान्तत्वात् सेटोः क्त्वासनोः कित्त्वाभावाद्गुणे दिदेविषति, देवित्वेति सिद्धम् । वेट्त्वात् क्तयोर्नेट् द्यूतः द्यूतवान् । द्यूतादन्यत्र '**पूदिव्यञ्चेर्नाशाद्यूताऽनपादाने**' ( ४।२।७२ ) पू दिव् अञ्च इत्येतेभ्यो यथासङ्ख्यं नाशे अद्यूते अनपादाने चार्थे परस्य क्तयोस्तस्य नः स्यात् । पूना यवा विनष्टा इत्यर्थः । आद्यूनः परिद्यूनः औदरिक इत्यर्थः । समक्नौ शकुनेः पक्षौ संगतावित्यर्थः । नाशाद्यूतानपादान इति किम् ? पूतं धान्यम् । द्यूतं वर्तते । उदक्तमुदकं कूपात् । कथं व्यक्तमक्षेर्भविष्यति । लिहाद्यचि देवः । गौरादित्वात् ङ्यां देवी । णके देवकः देविका नदी । क्विपि अक्षद्यूः । ण्यन्तात् क्विपि द्यूः । उपसर्गाद्देव्रिति णके आदेवयतीत्येवंशील आदेवकः । एवं परिदेवकः । उणादौ दिव्यवि० ( १४२ ) इत्यटे देवटः देवकुलविशेषः शिल्पी च । देवर इति तु देवते ऋछिचटि० ( ३९७ ) इत्यरे, देवल इत्यप्यस्यैव मृदिकन्दि० ( ४६५ ) इत्यले । छविछिवि० २९



Jain Education International For Personal & Private Use Only www.jainelibrary.org

( ७०६ ) इति वौ दिव्यतेर्दीर्घे च दीविः कितवः कातरश्च । देवेर्द्वित्वं पूर्वं दीर्घं च वेति दिदिविः स्वर्गः, दीदिविः अन्नं स्वर्गश्च । किकीति कुर्वन् दीव्यति इति किकिदीविश्चाषः ( ७०६ ) । दिव ऋः ( ८५२ ) देवा देवरः पितृव्यस्त्री च । लूपूयुवृषिदंशिधुदिविप्रतिदिविभ्यः कित् ( ९०१ ) एभ्यः किदन्प्रत्ययो भवति इत्यनि दिवा दिनम् । दिवानौ । प्रतिपूर्वात् प्रतिदिवा अहः अपराह्णश्च । प्रतिदिवानौ प्रतिदीव्नः प्रतिदीव्ना । दिवेर्डिविति डिवि द्यौः दिवौ ( ९४९ ) चित्करणं दिवादिज्ञापनार्थम् । एवं सर्वत्र । जॄष् झॄष् इति । अद्यतन्यां 'ऋदिच्छ्वि०' ( ३।४।६५ ) इत्यङि 'ऋवर्णदृशोऽङि' ( ४।३।७ ) इति गुणे अजरत् । पक्षे 'सिचि परस्मै समानस्याङितीति' ( ४।३।४४ ) इति वृद्धौ अजारीत् । 'वृतो नवा०' ( ४।४।३५ ) इतीटो वा दीर्घे जरिता जरीता इत्यादि । अस्य दीर्घऋकारान्तत्वात् सनि 'इवृधभ्रस्जदम्भश्रियूर्णुभरज्ञपिसनितनिपतिवृदरिद्रः सनः' ( ४।४।४७ ) इति वेटि 'वृतो नवा नाशी०' ( ४।४।३५ ) इति इटो वा दीर्घे च त्रैरूप्यम् । जिजरिषति जिजरीषति जिजीर्षति । 'इट्सिजाशिषोरात्मने' ( ४।४।३६ ) वृतः परयोरात्मनेपदविषययोः सिजाशिषोरादिरिड्वा भवति । इति वेटि इटो दीर्घविकल्पे च अजरिष्ट अजरीष्ट । पक्षे 'ऋवर्णात्' ( ४।३।३६ ) इति सिचः कित्त्वे अजीर्ष्ट स्वयमेव । एष्वेकधाताविति कर्मकर्त्तर्यात्मनेपदं किरादित्वाच्च भूषार्थसन्किरादिभ्यश्च ञिक्यौ' ( ३।४।९३ ) इति ञिच् 'स्वरग्रह०' ( ३।४।६९ ) इति ञिड् नास्ति जरिषीष्ट, जरीषीष्ट जीर्षीष्ट । अत्रेड्विकल्प एव । 'वृतो नवानाशी'रित्यत्राशीर्वचनादिटो दीर्घविकल्पो न भवति । णौ 'कगेवनूजनैजॄष्क्नसरञ्जः' ( ४।२।२५ ) इति ह्रस्वे जरयति । क्तिि 'ऋवर्णश्रि०' ( ४।४।५७ ) इति नेट् । 'गत्यर्थाकर्मक०' ( ५।१।११ ) इति वा कर्त्तरि क्ते जीर्णश्चैत्रः । पक्षे भावे जीर्णं चैत्रेण । साप्यादपि 'श्लिषशीङ्स्थासवसजनरुहजॄभजेः क्तः' ( ५।१।९ ) इति वा कर्त्तरि क्ते अनुजीर्णो वृषलीं चैत्रः । पक्षे कर्मणि क्ते अनुजीर्णा वृषली चैत्रेण । अकर्मका अपि हि सोपसर्गाः सकर्मकाः भवन्ति । क्त्वि 'जॄव्रश्चः क्त्वः' ( ४।४।४१ ) इतीटि जरित्वा जरीत्वा । 'सङ्गतेऽजर्यम्' ( ५।१।५ ) न जीर्यति अजर्यमार्यसङ्गतम् । अचि जरः । पृषोदरादित्वात् कुञ्जरः । भूते 'जॄषोऽतृः' ( ५।१।१७३ ) जरन् जरती । षित्त्वादङि 'ऋवर्ण०' ( ४।३।७ ) इति गुणे जरा । करणाधारे 'न्यायावाया०' ( ५।३।१३४ ) इति घापवादे घञि जारः । उणादौ ऋतष्टित् ( ९ ) इत्यः सरूपे च द्वे जर्जरः अदृढः । जर्जरी स्त्री । जॄविशिभ्यामन्तः ( २१९ ) जरन्तः वृद्धः । 'जॄश् वयोहानौ' जॄणाति । 'जॄण् वयोहानौ' युजादित्वाद्वा णिचि जारयति जरति । झॄष् झीर्यति । जझार । 'स्कृच्छृत०' ( ४।३।८ ) इति गुणे जझरतुः । झरिता । अचि अलि च झरः निर्झरः । षित्त्वादङि 'ऋवर्ण०' इति गुणे झरा । अषिद्यमित्यन्ये । उणादौ ऋतष्टित् ( ९ ) इत्यः सरूपे च द्वे रूपे झर्झरः वाद्यविशेषः । झर्झरी झल्लरिका । तूणीकास्तीक० ( ५० ) इतीके निपातनात् झर्झरीकं देहः । झर्झरीका वादित्रभाण्डम् । मूले स्वप्रसिद्धत्वादयं विलस्य नोक्तः । इति ऋदन्तौ द्वौ सेटौ च । शोंच् इति ॥ १ ॥ तिवादौ 'न शिती'त्यात्वनिषेधे सति सूत्रम्

## ओतः श्ये ॥ २ ॥ [ सि० ४।२।१०३ ]

धातोरोतः श्ये लुक् । श्यति १ । श्येत् २ । श्यतु ३ । अश्यत् ४ । आत्सन्ध्यक्षरस्येत्यात्वे, ट्धेघ्राशेति वा सिज्लुपि-अशात्, अशासीत् ५ । शशौ ६ । शायात् ७ । शाता ८ । एवं 'दों

१ उणादिवृत्तावस्य स्थाने द्युतिमान् कालो व्याघ्रजातिश्चेति दृश्यते इति संपादकः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

छोंच् छेदने' । '**षोंच् अन्तकर्मणि**' । द्यतीत्यादि । '**नृतैंच् नर्त्तने**' । **नृत्यति ४ । अनर्त्तीत् ५ । ननर्त्त ६ । नृत्यात् । नर्तिता ८ ॥ २ ॥**

'**ओत०**' स्पष्टम् । अद्यतन्यां सिज्लोपविकल्पपक्षे 'यमिरमिनम्यातः सोन्तश्च' ( ४।४।८६ ) इति सोऽन्ते अशासीदिति । णौ 'पाशाच्छासावेव्याह्वो यः' ( ४।२।२० ) इति ये निशाययति । शाता शातुम् । क्तिति ते 'छाशोर्वा' ( ४।४।१२ ) इति वेत्वे निशितः निशातः । निशितवान् निशातवान् । शित्वा शात्वा । शितिः शातिः । 'शो व्रते' ( ४।४।१३ ) संशितव्रतः साधुः । 'तन्व्यधी०' ( ५।१।६४ ) इति णे शायः । स्त्रियां भावाकर्त्रोरुपसर्गादित्यङि निशा । उणादौ शाशपि० ( २३७ ) इति दे शादः पङ्कः । 'शामा०' ( ४६२ ) इति ले शाला । शः सन्वच्च ( ७४७ ) अस्मात् डित् उः सनीवास्मिन् द्वित्वं पूर्वस्येत्वं च शिशुर्बालः । एवं **दों छोंच्** इत्यादि । द्यतीत्यादि प्राग्वत् । 'पिबैति०' ( ४।३।६६ ) इति सिज्लुपि अदात् । क्तिति ते 'दोसोमा०' ( ४।४।११ ) इतीत्वे दितः दितवान् । स्वरान्तोपसर्गपूर्वस्य तु 'स्वरात्०' इति त्तत्वे अवत्तम् । 'दस्तिः' ( ३।२।८८ ) इति नामिनो दीर्घे परीत्तम् । क्ये 'ईर्व्यञ्जने०' ( ४।३।९७ ) इतीत्वे दीयते । दाता दातुम् 'तन्व्यधी०' ( ५।१।६४ ) इति णे दायः । 'य एच्चातः' ( ५।१।२८ ) इति ये देयम् । दिनमिति ( तु ) दीव्यतेः दिननग्न० ( २६८ ) इति निपातनात् । **छोंच्** इति । अवच्छ्यति । 'टूधेघ्रा०' ( ४।३।६७ ) इति वा सिज्लुपि अच्छात् । अच्छासीत् । अवचच्छौ । क्तिति ते 'छाशोर्वा' ( ४।४।१२ ) इति वेत्वे छितः छातः छितवान् छातवान् । छित्वा छात्वा । छाता छातुम् । 'पाशाच्छा०' ( ४।२।२० ) इति ये छाययति । उणादौ गम्यमि० ( ९२ ) इति गे छागः । स्थाछामा० ( ३५७ ) इति ये छाया । छोर्डिगुगादिर्वा ( ४७१ ) अस्मात् किदलः प्रत्ययो भवति । स च डगादिर्गादिश्च वा भवति । छगलः छागलः ऋषिः छलं वचनविघातोऽर्थविकल्पोपपत्त्या । **षोंच्** इति । अन्तकर्म विनाशः । 'षः स०' ( २।३।९८ ) इति सत्वे अवस्यति । 'उपसर्गात्सुग्०' ( २।३।३९ ) इति षत्वे 'नेर्ङ्मादा०' ( २।३।७९ ) इति नेर्णत्वे प्रणिस्यति । अड्व्यवायेऽपि अभ्यष्यत् व्यष्यत् । षोपदेशत्वात् 'नाम्यन्तस्था०' ( २।३।१५ ) इति षत्वे सिषासति । 'टूधेघ्रा०' ( ४।३।६७ ) इति सिज्लुपि अवासात् अवासासीत् । अवससौ । क्ये 'ईर्व्यञ्जन०' ( ४।३।९७ ) इतीत्वे अवसीयते । 'दोसोमास्थ०' ( ४।४।११ ) इतीत्वे अवसितः अवसितवान् । सित्वा । अवसायः व्यवसायः । कथमध्यवस्य व्यवस्य न्यवस्येति ? अत्र केचित्पारायणिका ( 'ओतः श्ये' ( ४।२।१०३ ) इति योगं विभज्य यप्यपि लुकमिच्छन्ति । तदन्ये न मन्यन्ते इति **वाचकवार्त्तिकम्** । अनुस्वारेत्वान्नेट् साता सातुम् ) णौ 'पाशा०' ( ४।२।२० ) इति ये अवसाययति । 'अवहृसा०' ( ५।१।६३ ) इति णे अवसायः । 'सातिहेति०' ( ५।३।९४ ) इति क्तौ निपातनात् सातिः । अनटि अवसानम् । उणादौ स्थाछामा० ( ३५७ ) इति ये सायम् । सात्मन्ना० ( ९१६ ) इति मनि निपातनात् सात्म अत्यन्ताभ्यस्तं प्रकृतिभूतम् । सात्मनो भावः सात्म्यम् । इत्योदन्ताश्चत्वारोऽनिटः । अत्रोपलक्षणत्वात् **व्रीडच्** लज्जायाम् । व्रीडयति । अव्रीडिष्ट । विव्रीड । 'क्टे०' ( ५।३।१०६ ) इत्यः व्रीडा । ऋफिडादित्वाल्लत्वे व्रील्यति । व्रीला । पुंभावे घञि व्रीडः । इति डान्तः सेट् । **नृतैच्** इति नर्त्तनं नाट्यम् । अणोपदेशत्वात् 'अदुरुपसर्गे०' ( २।३।७७ ) इति णत्वाभावे प्रनृत्यति ॥ २ ॥ सकारादिप्रत्यये सूत्रम्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## कृतचृतनृतच्छृदितृदोऽसिचः सादेर्वा ॥ ३ ॥ [ सि० ४।४।५० ]

**एभ्यः पञ्चभ्यः परस्याऽसिचः सादेरशित आदिरिड् वा स्यात् । नर्त्तिष्यति-नर्त्स्यति ९ । 'कुथच् पूतीभावे' कुथ्यति ४ । अकोथीत् ५ । चुकोथ ६ । कुथ्यात् ७ । कोथिता ८ । 'व्यधंच् ताडने' ॥ ३ ॥**

**'कृत०'** एभ्यः पञ्चभ्य इति । 'कृतैत् छेदने' 'कृतैप् वेष्टने' वा 'चृतैच् हिंसातिक्रमयोः' । 'नृतैच् नर्त्तने' । 'उच्छृदृपी दीप्तिदेवनयोः' । 'उतृदृपी हिंसानादरयोः' यथा कर्त्स्यति । अकर्त्स्यत् । चिकृत्सति । कर्त्तिष्यति अकर्त्तिष्यत् । चिकर्त्तिषति । चृत् चर्त्स्यति अचर्त्स्यत् । चिचृत्सति । चर्त्तिष्यति अचर्त्तिष्यत् । चिचर्त्तिषति । नृत् नर्त्स्यति अनर्त्स्यत् । निनृत्सति । नर्त्तिष्यति अनर्त्तिष्यत् । निनर्त्तिषति । च्छृद् छर्त्स्यति अछर्त्स्यत् । चिच्छृत्सति । छर्दिष्यति अछर्दिष्यत् । चिच्छर्दिषति । तृद् तर्त्स्यति अतर्त्स्यत् । तर्दिष्यति अतर्दिष्यत् । तितर्दिषति । सादेरिति किम्? कर्त्तिता चर्त्तिता नर्त्तिता छर्दिता तर्दिता । असिच इति किम्? अकर्त्तीत् अचर्त्तीत् अनर्त्तीत् अछर्दीत् । प्राप्ते विभाषा । वेट्त्वादेव क्तयोरिडभावे सिद्धे ऐदित्करणं यङ्लुबन्तादनेकस्वरादपीडभावार्थम् । नृत्तः नृत्तवान् । नरीनृत्तः नरीनृत्तवान् । 'नृतेर्यङि' ( २।३।९५ ) इति णत्वप्रतिषेधे नरीनृत्यते । णौ ईंगित इति फलवत्कर्त्तर्यात्मनेपदे णिगि प्राणिकर्तृकेति परस्मैपदेनापोदिते 'परिमुहायमा०' ( ३।३।९४ ) इति पुनर्विहिते नृत्यते नटः । नर्त्तयते नटं चैत्रः । 'ऋदुपान्त्याद०' ( ५।१।४१ ) इति क्यपि नृत्यम् । लिहाद्यचि घञि वा नर्त्तः । 'नृत्खन्रञ्जः शिल्पिन्यकट्' ( ५।१।६५ ) इत्यकटि नर्त्तकः । अनटि 'पूर्वपदस्था०' ( २।३।६४ ) इति णत्वस्य क्षुभ्नादित्वादभावे प्रनर्त्तनम् । क्लीबे क्ते नृत्तम् । इति तान्तोऽनिट् । **कुथच्** इति । पूतीभावो दुर्गन्धः क्लेदः । कुथ्यति । अकोथीत् अकोथिष्टाम् । चुकोथ । कोथिता । कुथितम् । घञि कोथः । उणादौ उद्वटिकुलि० ( ३५१ ) इति कुमे कुथुमः ऋषिः । कुथुमं मृगाजिनम् । कुथिगुधेरूमः ( ३५३ ) कोथूमः चरणकृदृषिः । अत्रोपलक्षणत्वात् **'पुथच् हिंसायाम्** । पुथ्यति । अपोथीत् । पुपोथ । पोथिता पोथितुम् । पुथितः । 'पुथण् भासार्थः' । पोथयति । इति थान्तौ द्वौ सेटौ । **'गुधच् परिवेष्टने'** । गुध्यति । अगोधीत् । जुगोध । गोधिता । गोधितुम् । 'क्षुधक्लिशकुषगुधमृडमृदवदवसः' ( ४।३।३१ ) एभ्यः क्त्वासेट् किद्वद्भवति । गुधित्वा । गुधितः । लिहाद्यचि भिदाद्यङि वा गोधा । उणादौ कुथिगुधेरूमः ( ३५३ ) गोधूमः । गुधिगृधेस्त च ( ५६८ ) इति किति से गुत्सः तृणजातिः । गुच्छ इति तु 'गुङ् शब्दे' इत्यस्य तुदिमदि० ( १२४ ) इति छकि । **'राधंच् वृद्धौ'** । स्वादिषु पठिष्यमाणस्याप्यस्येह पाठो वृद्धावेव श्यविकरणार्थः । राध्यति वर्द्धते इत्यर्थः । वृद्धेरन्यत्र श्नुरेव । राध्नोत्यन्नं पचतीत्यर्थः । कथं तर्हि मैत्राय राध्यतीति श्यः? अत्रापि मैत्रस्य वृद्धिविषये शुभाशुभपर्यालोचनमिति विवक्षायां वृद्ध्यर्थतैवेति स्यादेव । राद्धा राद्धुम् । चुरादेराकृतिगणत्वात् राधयति । कश्चित्तु राधसाध संसिद्धाविति पठन् वृद्धेरन्यत्रापि श्यं साधिं च धात्वन्तरमिच्छति । राध्यत्यन्नं साध्यति । **व्यधंच्** इति । शिद्विदिति श्यस्य ङित्त्वात् ॥ ३ ॥

तत्र सूत्रम्

## ज्याव्यधः क्ङिति ॥ ४ ॥ [ सि० ४।१।८१ ]

**अनयोः सस्वरान्तस्था क्ङिति परे य्वृत्स्यात् । विध्यति ४ । अव्यात्सीत् अव्याद्धाम् अव्यात्सुः ३४५ । ज्याव्येव्यधीति पूर्वस्य इत्वे, विव्याध । य्वृति द्वित्वे च विविधतुः विव्यधिथ विव्यद्ध ६ ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विध्यात् ७ । व्यद्धा ८ । व्यत्स्यति ९ । अव्यत्स्यत् १० । **'षिवूच् उतौ'** । सीव्यति ४ । असेवीत् ५ । सिषेव ६ । **'ष्ठिवू क्षिवूच् निरसने'** । तिष्ठीव्यति तिष्ठेव टिष्ठेव । **'त्रसैच् भये'** । भ्रासभ्लासेति वा श्ये त्रस्यति त्रसति ४ । अत्रासीत्-अत्रसीत् ५ । तत्रास । जृभ्रमेति वा एत्वे, त्रेसतुः तत्रसतुः ६ । **'पुषंच् पुष्टौ'** । पुष्यति ४ । लृदिद्द्युतादि पुष्यादेरित्यङि अपुषत् ५ । पुपोष ६ । पुष्यात् ७ । पोष्टा ८ । पोक्ष्यति ९ । **'शुषंच् शोषणे'** । **'दुषंच् वैकृत्ये'** । **'ञितृषंच् पिपासायाम्'** । **'तुषं हृषंच् तुष्टौ'** । **'रुषंच् रोषे'** इत्यादि पुष्यादयः सप्तषष्टिः । **'क्लिदौच् आर्द्रभावे'** । क्लिद्यति १० । **'ञिमिदाच् स्नेहने'** ॥ ४ ॥

'ज्या०' अनयोरिति, 'ज्यांश् वयोहानौ' 'व्यधंच् ताडने' इत्यनयोः सस्वरान्तस्था किति ङिति च परे य्वृद्भवति । यथा किति, जिज्यतुः जीयते जीयात् जीनः जीनवान् । ङिति, जिनाति जेजीयते जेजेति । किति विविधतुः विध्यते विध्यात् विद्धः । ङिति विध्यते वेविध्यते वेवेद्धि । क्ङितीति किम् ? ज्याता । व्यद्धा व्यद्धुम् । विद्धः । 'तन्व्यधी०' ( ५।१।१४ ) इति णे व्याधः । क्विपि 'गतिकारकस्य०' ( ३।२।८५ ) इति दीर्घे मर्मावित् श्वावित् । अनुपसर्गात् 'व्यधजप०' ( ५।३।४७ ) इत्यलि व्यधः । उपसर्गात्तु घञि आव्याधः । 'श्यादिभ्यः कः' ( ५।३।८२ ) विध्यन्त्यनेनेति विधः शस्त्रोपकरणम् । आविधम् । उणादौ पृका० ( ७२९ ) इति किदुः विधुः चन्द्रः । इति धान्तास्त्रयः तत्राद्यः सेट् द्वावनिटौ । **'क्षिपंच् प्रेरणे'** । क्षिप्यते । अक्षैप्सीत् । चिक्षेप । क्षेप्ता क्षेप्तुम् । क्षिप्तः । 'त्रसिगृधि०' ( ५।२।३२ ) इति क्नौ क्षिप्नुः । 'क्षिपींत् प्रेरणे' इत्यस्य तु क्षिपति क्षिपते । **'पुष्पच् विकसने'** । पुष्प्यति । अपुष्पीत् । पुपुष्प । पुष्पिता पुष्पितः । अचि पुष्पम् । इति पान्तौ द्वौ । आद्योऽनिट् द्वितीयः सेट् । **'तिम तीम ष्टिम ष्टीमच् आर्द्रभावे'** । तिम्यति । अतेमीत् । तितेम । तेमिता । अनटि तेमनम् । उणादौ शुषीषि० ( ४१६ ) इति किति रे तिमिरम् । नाम्युपान्त्य० ( ६०९ ) इति किदिः तिमिर्मत्स्यः । तीम्यति तितीम तीमिता । **ष्टिम**, 'षः स०' ( २।३।९८ ) इति सत्वे स्तिम्यति षोपदेशत्वात् 'नाम्यन्तस्था०' ( २।३।१५ ) इति षत्वे तिष्टेम । स्तेमिता स्तिमितः । **ष्टीम**, 'षः स०' इति सत्वे स्तीम्यति । षोपदेशत्वात् 'नाम्यन्तस्था०' इति षत्वे तिष्टीम । स्तीमिता स्तीमितः । इति मान्ताश्चत्वारः सेटः । **षिवूच्** इति । उतौ इति । उति वानं तन्तुसन्तान इत्यर्थः । सीव्यति असेवीत् । षोपदेशत्वात् 'नाम्यन्तस्था०' इति षत्वे सिषेव । परिनिविपूर्वस्य 'असोङसिवूसह०' ( २।३।४८ ) इति षत्वे परिषीव्यति, निषीव्यति, विषीव्यति । अड्व्यवायेऽपि 'स्तुस्वञ्जश्चा०' ( २।३।४९ ) इति वा षत्वे पर्यषीव्यत् पर्यसीव्यत् । न्यषीव्यत् न्यसीव्यत् । व्यषीव्यत् व्यसीव्यत् । सेविता सेवितुम् । ऊदित्त्वात् क्त्वि वेट् 'अनुनासिके च०' ( ४।१।१०८ ) इति वस्योटि स्यूत्वा । इटि क्त्वेति कित्त्वाभावाद्गुणे सेवित्वा । वेट्त्वात् क्तयोर्नेट् । स्यूतः स्यूतवान् । 'ष्ठिवूसिवोऽनटि वा' ( ४।२।११२ ) इति वा दीर्घे सेवनं सीवनम् । लिहाद्यचि स्वार्थे के च प्रसेवकः । मनि स्योमा । उणादौ सिवेर्डित् ( १२१ ) इत्यूचटि सूचः सूची । सूत्रमिति तु सुमूखनि०' ( ४४९ ) इति किति त्रटि सूतेः । आदिशब्दात् **'श्रिवूच्** गतिशोषणयोः' श्रीव्यति । शिश्रेव । श्रेविता श्र्यूत्वा इटि श्रेवित्वा । क्तयोर्नेट् श्र्यूतः श्र्यूतवान् । क्विपि श्रूः अणुश्रूः । **'ष्ठिवू क्षिवूच्'** इति । 'षः स०' ( २।३।९८ ) इत्यत्र ष्ठिवो वर्जनात् सत्वाभावे 'भ्वादे'रिति दीर्घे ष्ठीव्यति 'अघोषे शिटः' ( ४।१।५५ ) इति पूर्वस्य लुकि 'तिर्वा ष्ठिवः' ( ४।१।४३ ) इति वा तौ तिष्ठेव टिष्ठेव । उदित्त्वात् क्त्वि वेट्, ष्ठ्यूत्वा ष्ठेवित्वा । वेट्त्वात् क्तयोर्नेट् निष्ठ्यूतः निष्ठ्यूतवान् । 'ष्ठिवसिवोऽनटि वा'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

( ४।२।११२ ) इति दीर्घे ष्ठेवनं ष्ठीवनम् । क्षिवूच् क्षीव्यति चिक्षेव । क्ष्यूत्वा । क्षेवित्वा । क्ष्यूतः क्ष्यूतवान् । 'ष्ठिवू क्षिवू निरसने' । ष्ठीवति क्षेवति । इति वान्ताश्चत्वारः सेटश्च । '**इषच्** गतौ' । इष्यति । ऐषीत् । इयेष । एषिता । एषित्वा । ऊदिदयमित्यन्यः । तन्मते क्त्वि वेट् इष्ट्वा एषित्वा । वेट्त्वात् क्तयोर्नेट् इष्टः इष्टवान् । 'यद्वायुरन्विष्टमृगैः किरातैरासेव्यते' इति अन्विष्य प्रेषितः । 'ऋवर्ण०' ( ५।१।१७ ) इति ध्यणि एष्यः । घञि एषः । 'प्रस्यैषैष्य०' ( १।२।१४ ) इत्यैत्वे प्रैषः प्रैष्यः । 'उपसर्गस्यानिण्०' ( १।२।१९ ) इत्यलुकि प्रेषते । 'इषोऽनिच्छायाम्' ( ५।३।११२ ) इत्यने एषणा अन्वेषणा । 'पर्यधेर्वा' (५।३।११३) पर्येषणा परीष्टिः । अध्येषणा अधीष्टिः । 'श्रवादिभ्यः' (५।३।९२) इति क्तौ इष्टिः । उणादौ इष्यशि० ( ७७ ) इति तककि इष्टका । मस्जीषि० ( ८२६ ) इति सुकि इक्षुः । 'इषत् इच्छायाम्' इच्छति । 'इषश् आभीक्ष्ण्ये' इष्णाति । इति षान्तः सेट् । '**ष्णसूच्** निरसने' । 'षः स०' ( २।३।९८ ) इति सत्वे निमित्ताभावाण्णस्य नत्वे स्नस्यति अस्नासीत् अस्नसीत् । सस्नास । स्नसिता । ऊदित्त्वात् क्त्वि वेट् स्नसित्वा स्नस्त्वा । क्तयोर्नेट् स्नस्तः स्नस्तवान् । षोपदेशत्वात् 'नाम्यन्तस्था०' (२।३।१५) इति षत्वे सिष्णासयिषति । घटादिरयमित्येके । तन्मते णौ ह्रस्वे सिष्णसयिषति । 'ष्णुसः अदने' इति **द्रमिलाः** । स्नुष्यति सुष्णोस । '**क्नसूच्** ह्रुतिदीप्त्योः' । ह्रुतिः कौटिल्यम् । क्नस्यति । अक्नासीत् अक्नसीत् । चक्नास । क्नसिता । क्नसित्वा क्नस्त्वा । क्नस्तः क्नस्तवान् । **चिक्लिदचक्नसं** ( ४।१।१४ ) क्लिद्यतेः के क्नस्यतेरचि उभयत्र घञर्थे वाके द्वित्वं निपात्यते चिक्लिदः चक्नसः । **त्रसैच्** इति । परोक्षाथवि 'स्कस्तृ०' ( ४।४।८१ ) इति इटि त्रेसिथ तत्रसिथ । ऐदित्त्वात् क्तयोर्नेट् त्रस्तः त्रस्तवान् । 'त्रसिगृधि०' ( ५।२।३२ ) इति क्नुः त्रसनशीलो त्रस्नुः । 'त्रसण् वरणे' त्रासयति । 'प्युसच् दाहे' । प्युस्यति । अप्योसीत् । पुप्योस । प्योसिता । प्युसितः । इति सान्ताश्चत्वारः सेटः । **षह षुहच्** शक्तौ । 'षः स०' ( २।३।९८ ) इति सत्वे सह्यति । असाहीत् असहीत् । परिनिपूर्वस्य 'असोङ०' ( २।३।४८ ) इति षत्वे परिषह्यति । ससाह । 'अनादेशादे०' ( ४।१।२४ ) इत्येत्वे सेहतुः सेहुः ॥ एवं **षुह** सुह्यति । असोहीत् । सुषोह । सोहिता । सुहितः सुहितवान् । तृप्त्यर्थेति षष्ठीसमासप्रतिषेधात् फलानां सुहितः । तृप्तावयमित्येके । इति हान्तौ द्वौ सेटौ ।

अथ दिवाद्यन्तर्गणः पुषादिः परस्मैपद्येव । तत्रापि प्रसिद्ध्यनुरोधादादौ **पुंषच्** इति । अकर्मकोऽयम् । पुष्यति । अपुषत् । पुपोष । अनिट्त्वात् पोष्टा पुष्टः पुष्ट्वा । 'कुप्यभिद्योध्य०' ( ५।१।३९ ) इति निपातनात् क्यपि पुष्यन्त्यस्मिन्नर्था पुष्यः । 'स्नेहना०' ( ५।४।६५ ) इति णमि स्वपोषं पुष्टः । एवं गोपोषं पुष्टः । 'पुष पुष्टौ' पोषति । 'पुषश् पुष्टौ' पुष्णाति । 'पुषण् धारणे' पोषयति । पुष्यादींश्च कांश्चिद्यथेष्टं कण्ठतो निर्दिशति कांश्चिच्चादिशब्देन संग्रहीष्यति । तथा चाह इत्यादि । पुष्यादयः सप्तषष्टिरिति । ते च यथास्थानं ज्ञेयाः । अत्र च वर्णक्रमेणैव निरूप्यन्ते । '**उचच्** समवाये' । समवायो ऐक्यम् । उच्यति । पुष्याद्यङि औचत् । परोक्षायां उवोच । उचिता उचितः उचित्वा । घञि न्यङ्क्वादित्वात् कत्वे ओकः । उणादौ कुशिपिशि० ( २१२ ) इति कितीति उचितं स्वभावः योग्यं चिरानुयातं श्रेष्ठं च । उच्यश्चेः क च ( ९६५ ) इत्यसि ओकः ओकसी । द्यौरोको येषां ते पृषोदरादित्वाद्दिवौकसः । दिवूशब्दो वाकारान्तः । इति चान्तः सेट् १ । '**लुटच्** विलोटने' । लुट्यति । अलुटत् । लुलोट । लोटिता । लुटितः । 'लुट विलोटने' लोटति अलोटीत् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'लुटण् भासार्थः' लोटयति । इति टान्तः सेट् १ । **'ष्विदाच् गात्रप्रक्षरणे'** गात्रप्रक्षरणं घर्मस्रुतिः । 'षः स' ( २।३।९८ ) इति सत्त्वे स्विद्यति । अस्विदत् । षोपदेशत्वात् 'नाम्यन्तस्था०' ( २।३।१५ ) इति षत्वे सिष्वेद सिष्विदतुः । 'आदितः' ( ४।४।७१ ) इति क्तयोर्नेट् स्विन्नः स्विन्नवान् । 'नवा भावारम्भे' ( ४।४।७२ ) इति वा नेटि स्विन्नमनेन प्रस्विदितुमारब्धः प्रस्विन्नः । पक्षे **'न डीङ्शीङ्पूङ्धृषिक्ष्विदिस्विदिमिदः'** ( ४।३।२७ ) एभ्यः परौ सेटौ क्तक्तवतू न किद्वद्भवतः । इति कित्त्वाभावात् स्वेदितमनेन प्रस्वेदितः । अनिट्त्वात् स्वेत्ता । स्वित्वा । ञिष्विदाङ् मोचने च । स्वेदते स्वेदिता । **क्लिदौच्** इति । क्लिद्यति । अक्लिदत् । औदित्त्वाद्वेट् सनि चिक्लित्सति । पक्षे इटि 'वौ व्यञ्जनादेः'० ( ४।३।२५ ) इति वा कित्त्वे चिक्लिदिषति चिक्लेदिषति । क्लिदित्वा क्लेदित्वा । वेट्त्वात् क्तयोर्नेट् क्लिन्नः क्लिन्नवान् । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के निपातनात् चिक्लिदः । उणादौ भृमृतृ० ( ७१६ ) इत्युः क्लेदुः क्षेत्रं चन्द्रः भगः शरीरभङ्गः । क्लेदयतीति क्लेदुः चन्द्रमाः इत्यन्ये ॥ ४ ॥ **ञिमिदाच्** इति अत्र सूत्रम् ।

## मिदः श्ये ॥ ५ ॥ [ सि० ४।३।५ ]

**मिदेरुपान्त्यस्य श्ये गुणः स्यात् । मेद्यति ४ । अमिदत् ५ । 'क्षुधंच् बुभुक्षायाम्' । क्षुध्यति १० । 'शुधंच् शौचे' । शुध्यति १० । 'क्रुधंच् कोपे' । क्रुध्यति १० । 'तृपौच् प्रीतौ' । तृप्यति ४ । स्पृशमृशेति सिज्विकल्पे, स्पृशादिसृपो वेत्यद्विकल्पे त्रप् इति जाते वृद्धौ च अत्राप्सीत् । पक्षे अताप्सीत् । पक्षे औदित्त्वादिटि अतर्पीत् । पक्षेऽङि अतृपत् ५ । ततर्प ६ । तृप्यात् ७ । त्रप्ता-तर्प्ता-तर्पिता ८ । त्रप्स्यति-तर्प्स्यति-तर्पिष्यति ९ । 'दृपौच् हर्षमोहनयोः' । दृप्यति १० । 'लुभच् गार्ध्ये' । लुभ्यति १० । 'क्षुभच् संचलने' । क्षुभ्यति १० । 'नशौच् अदर्शने' ॥ ५ ॥**

'**मिदः०**' स्पष्टम् । ञीत्त्वात् 'ज्ञानेच्छा०' ( ५।२।९२ ) इति सति क्ते 'आदितः' ( ४।४।७१ ) इति नेटि मिन्नः मिन्नवान् । 'न वा भावारम्भे' ( ४।४।७२ ) इति वा नेटि मिन्नमनेन प्रमिन्नः । पक्षे 'न डीङ्०' ( ४।३।२७ ) इति कित्त्वाभावाद्गुणे मेदितमनेन मेदितः प्रमेदितः । लिहाद्यचि मेदः मेदाढ्यो देशः । 'भञ्जिभासि०' (५।२।७४) इति घुरे मेदनशीलो मेदुरः । 'णिन्चावश्यक०' ( ५।४।३६ ) इति णिनि मेदिनी । उणादौ अस् ( ९५२ ) इत्यसि मेदः वपा । 'ञिमिदाङ् स्नेहने' द्युतादिः । मेदते अमेदिष्ट । 'मिदुण् स्नेहने' मिन्दयति । **'ञिक्ष्विदाच्** मोचने च' । चकारात् स्नेहने । क्ष्विद्यति । अक्ष्विदत् । चिक्ष्वेद । क्ष्वेदिता । आदित्त्वात् क्तयोर्नेट् ञीत्त्वात् 'ज्ञानेच्छा' ( ५।२।९२ ) इति सति क्तः क्ष्विण्णः क्ष्विण्णवान् । 'नवा भावारम्भे' ( ४।४।७२ ) इति वा नेट् क्ष्विण्णमनेन प्रक्ष्विण्णः । पक्षे 'न डीङ्०' ( ४।३।२७ ) इति कित्त्वाभावाद्गुणे क्ष्वेदितमनेन प्रक्ष्वेदितः । 'ञिक्ष्विदा अव्यक्ते शब्दे' क्ष्वेदति । 'ञिक्ष्विदाङ् मोचने च' । द्युतादिः । क्ष्वेदते अक्ष्वेदिष्ट । इति दान्ताश्चत्वारोऽनिटः । **'क्षुधंच्'** इति । अनिट्त्वात् क्षोद्धा । क्त्वाक्तेषु 'क्षुधवसस्तेषाम्' ( ४।४।४३ ) इतीटि 'क्षुधक्लिश०' ( ४।३।३१ ) इति कित्त्वे क्षुधित्वा । क्षुधितः क्षुधितवान् । ये तु क्षुधेः क्त्वः कित्त्वं नेच्छन्ति । तन्मते 'वौ व्यञ्जनादेः०' ( ४।३।२५ ) इति वा कित्त्वे क्षुधित्वा क्षोधित्वा । 'क्रुत्संपदा०' ( ५।३।११४ ) इति क्विपि क्षुत् । बाहुलकादुकणि क्षोधुकः । पिशिमिथिक्षुधिभ्यः कित् ( २९० ) इति कित्युने क्षुधुनः कीटः । **'शुधंच् शौचे'** इति । शौचं नैर्मल्यम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनिट्त्वात् क्रोद्धा क्रुद्धः । '**क्रुधंच्**' इति । 'क्रुद्द्रुहे०' ( २।२।२७ ) इति क्रोधविषयस्य संप्रदानत्वे मैत्राय क्रुध्यति । क्रोद्धा । क्रुद्धः । 'भूषाक्रोधार्थजुसृगृधिज्वलशुचश्चानः' ( ५।२।४२ ) इत्यने क्रोधनः । 'क्रुत्संपदा०' ( ५।३।११४ ) इति क्विपि क्रुत् । '**षिधंच् संराद्धौ**' । संराद्धिर्निष्पत्तिः । 'षः स०' ( २।३।९८ ) इति सत्वे सिध्यति असिधत् । 'सिध्यतेरज्ञाने' ( ४।२।११ ) इत्यात्वे अन्नं साधयति दातुम् । ज्ञाने तु आचारः । कुलं सेधयति ज्ञापयतीत्यर्थः । सेद्धा सेद्धुम् । ऊदित्वात् क्त्वि वेट् सिद्ध्वा सेधित्वा । 'षिधू गत्याम्' 'षिधू शास्त्रमाङ्गल्ययोः' सेधति । '**ऋधूच् वृद्धौ**' । ऋध्यति । समृध्यति । आर्धत् । अमाङेत्यधिकारात् स्वरादेरिति वृद्ध्यभावे माऋधत् । 'अनात०' ( ४।१।६९ ) इति पूर्वस्यात्वे ने च आनर्द्ध आनृधतुः । अर्द्धिता अर्द्धितुम् । सनि 'इवृध०' ( ४।४।४७ ) इति वेटि 'अयि रः' ( ४।१।६ ) इति रस्य द्वित्वाभावे 'स्वरादे०' ( ४।१।४ ) इति द्वितीयांशस्य धेरेव द्वित्वे अर्दिधिषति । पक्षे इडभावे सादौ सनि 'ऋध ईर्त्' ( ४।१।१७ ) न च द्विः । ईर्त्सति । ऊदित्वात् क्त्वि वेट ऋद्ध्वा अर्द्धित्वा । वेट्त्वात् क्तयोर्नेट् ऋद्धः ऋद्धवान् । णौ अर्द्धयति । ङे आर्दिधत् 'ऋदुपान्त्याद०' ( ५।१।४१ ) इति क्यपि ऋद्धम् । घञि अर्द्धः । 'ऋधूट् वृद्धौ' समृध्नोति । '**गृधूच् अभिकाङ्क्षायाम्**' । गृध्यति । जगर्ध । यङ्लुपि सिचि गुणे 'सेः स्द्धां च रुर्वा' ( ४।३।७९ ) इति सेर्लुकि धस्य रुत्वे 'रो रे०' ( १।३।४१ ) इति रस्य लुकि अतो दीर्घे च अजघाः । दिवि 'यङ्तुरुस्तोः०' ( ४।३।६४ ) इतीति 'ल्घुक्तोपान्त्य०' ( ४।३।१४ ) इति गुणाभावे अजर्गृधीत् । गर्द्धितुम् । ऊदित्वात् क्त्वि वेट् गृद्ध्वा गर्द्धित्वा । क्त्वे कित्त्वाभावाद्गुणः । वेट्त्वात् क्तयोर्न गुणः । गृद्धः गृद्धवान् । णौ फलवत्कर्त्तर्यणिगि प्राणिकर्तृकेत्यफलवति तु 'शेषात् परस्मै' ( ३।३।१०० ) इति परस्मैपदे प्राप्ते 'प्रलम्भे गृधि०' ( ३।३।८९ ) इत्यात्मनेपदे श्वानं गर्द्धयते । 'त्रसिगृधि०' ( ५।२।३२ ) इति क्नुः गृध्नुः । 'भूषाक्रोध०' ( ५।२।४२ ) इत्यने गर्द्धनः । घञि गर्द्धः । स्त्रियां क्तौ गृद्धिः । उणादौ ऋज्यजि० ( ३८८ ) इति किति रे गृध्रः । केचित्तु गृधिं चुरादिमभ्युपगम्य णिचि प्रलम्भेगृधि०' ( ३।३।८९ ) इत्यात्मनेपदमिच्छन्ति गर्द्धयते । '**रधौच् हिंसासंराद्ध्योः**' । संराद्धिः पाकः । रध्यति । '**रध इटि तु परोक्षायामेव**' ( ४।४।१०१ ) रध्यतेः स्वरात्परः स्वरादौ नोऽन्तः स्यात् । यथा रन्धयति साधु रन्धकः । रन्धं रन्धं रन्धो वर्त्तते । ततश्चाद्यतन्यां पुष्यादङि, अनेन नागमे 'नो व्यञ्जनस्य०' ( ४।२।४५ ) इति नलुकि अरधत् । इटि तु परोक्षायामेवेत्येवकारस्य परोक्षायामित्येवेति विपरीतनियमनिरासार्थत्वादिह नियमो न भवति । ररन्ध ररन्धतुः । संयोगान्तत्वात्परोक्षायाः कित्त्वाभावान्नलोपाभावः । 'स्कसृवृ०' ( ४।४।८१ ) इतीटि ररन्धिव ररन्धिम । औदित्त्वात् वेट् । इटि तु परोक्षायामेवेति नियमान्नाभावे रधिता रधिष्यति अरधिष्यत् । पक्षे रद्धा रत्स्यति अरत्स्यत् । क्वसौ 'अनादेशादे०' ( ४।१।२४ ) इत्येत्वे 'घसेकस्वरातः०' ( ४।४।८२ ) इतीटि, नागमे, कित्त्वान्नलुकि रेधिवान् । वेट्त्वात् क्तयोर्नेट् रद्धः रद्धवान् । 'षिधूंच् संराद्धौ' 'रधौच् हिंसायां' चेत्यकृत्वाऽस्याऽत्र निर्देशः संराद्धिभेदज्ञापनार्थः । अत्र पाकस्तत्र निष्पत्तिरिति इति धान्ताः सप्त, तत्राद्यास्त्रयोऽनिटः, शेषाः सेट इति । '**तृपौच् प्रीतौ**' इति । प्रीतिः सौहित्यम् । तृप्यति । अद्यतन्यां चातूरूप्यम् । श्वस्तन्यादित्रये त्रैरूप्यं च । सर्वत्र क्तयोर्नेट् । तृप्तः तृप्तवान् । उणादौ ऋज्यजि० (३८८) इति किति रे तृप्रं मेघान्तर्धर्म आज्यं काष्ठं पापं दुःखं च । 'तृपट् प्रीणने' तृप्नोति । '**दृपौच् हर्षमोहनयो**'रिति । मोहनं गर्वः । तृपिवत् अद्यतन्यां चातूरूप्यम् । श्वस्तन्यादित्रये त्रैरूप्यं च ज्ञेयम् । [ उणादौ ऋज्यजि० ( ३८८ ) इति किति रे दृप्रं बलम्, दृप्रा बुद्धिः ] '**कुपच्**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्रोधे' । कुप्यति । अकुपत् । कोपिता कोपितुम् । कुपितः । 'भूषाक्रोध०' (५।२।४२) इत्यने कोपनशीलः कोपनः । लिहाद्यचि कोपः । **'गुपच् व्याकुलत्वे'** । गुप्यति अगुपत् जुगोप गोपिता 'कुप्यभिद्यो०' (५।१।३९) इति निपातनात् क्यपि कुप्यं सुवर्णरजताभ्यामन्यत् । 'गुपौ रक्षणे' गोपायति । 'गुपि गोपनकुत्सनयोः' जुगुप्सते । 'गुपण् भासार्थः' गोपयति । **'युप रुप लुपच् विमोहने'** । युप्यति । रुप्यति । लुप्यति । अयुपत् । अरुपत् । अलुपत् । 'वौ व्यञ्जनादेः०' (४।३।५ २५) इति क्त्वासनोर्वा कित्त्वे युपित्वा योपित्वा । युयुपिषति युयोपिषति । एवं रुपलुपोरपि । घञि रोपः शरः । उणादौ शिक्यास्याढ्य० (३६४) इति ये निपातनात् रुप्यतीति रूप्यं रजतम् । 'लुप्लृंती छेदने' । लुम्पते लुम्पति । **'डिपच् क्षेपे'** । डिप्यति अडिपत् डिडेप डेपिता । 'शकितकि०' (५।१।२९) इति ये डेप्यम् । 'डिपत् क्षेपे' डिपति । 'डिपण् क्षेपे' डेपयति । **'ष्टूपच्** समुच्छ्राये' । 'षः स०' (२।३।९८) इति सत्वे स्तूप्यति । अस्तूपत् । 'नाम्यन्तस्था०' (२।३।१५) इति षत्वे तुष्टूप । णौ सनि 'णिस्तोरेवा०' (२।३।३७) इति षत्वे तुष्टूपयिषति । स्तूपिता स्तूपितुम् । 'ष्टूपण् समुच्छ्राये' । स्तूपयति । अलि स्तूपः । इति नव पान्ताः सेटः । **'लुभच् गार्ध्ये'** । गार्ध्यमभिकाङ्क्षा । लुभ्यति अलुभत् लुलोभ । तादौ 'सहलुभेच्छरुषरिषस्तादेः' (४।४।४६) इति वेटि लोब्धा लोभिता । लोभिष्यति । क्तयोर्नेट् लुब्धः लुब्धवान् । 'लुभत् विमोहने' लुभति । लुभिताः केशाः । **'क्षुभच्** संचलने' [ संचलनं रूपान्यथात्वम् ] क्षुभ्यति अक्षुभत् । चुक्षोभ क्षोभिता क्षुभिता 'क्षुब्ध-विरिब्ध०' (४।४।७०) इति निपातनात् क्षुब्धा मन्थः । क्षुभितोऽन्यः । 'क्षुभि संचलने' क्षोभते । 'क्षुभश् संचलने' क्षुभ्नाति । युतादिपठितेनैवाक्षुभदिति सिद्धम्, श्यविकरणार्थं तु दिवादाववश्यमयं पठितव्य इति पुष्यादावपि पठितः । **'णभ तुभच्** हिंसायाम्' । 'पाठे०' (२।३।९७) इति नत्वे नभ्यति । णोपदेशत्वात् 'अदुरुपसर्ग०' (२।३।७७) इति णत्वे प्रणभ्यति । अनभत् ननाभ नभिता । 'शकितकि०' (५।१।२९) इति ये नभ्यम् । **तुभच्** तुभ्यति अतुभत् तुतोभ । 'णभि तुभि हिंसायाम्' नभते तुभते । 'णभ तुभश हिंसायाम्' नभ्नाति । तुभ्नाति । इति भान्ताश्चत्वारः सेटश्च । **नशौच्** इति । अदर्शनमनुपलब्धिः ॥ ५ ॥ प्राद्युपसर्गयोगे सूत्रम्

## नशः शः ॥ ६ ॥ [ सि० २।३।७८ ]

**अदुरुपसर्गान्तस्थाद्रादेः परस्य शान्तस्य नशेर्णत्वं स्यात् । प्रणश्यति । शान्तस्येति किम् ? प्रनष्ट इत्यादौ शस्य षत्वे न भवति ॥ ६ ॥**

**'नशः०'** स्पष्टम् ॥ ६ ॥ अद्यतन्यामङि सूत्रम्

## नशेर्नेश् वाङि ॥ ७ ॥ [ सि० ४।३।१०२ ]

**नशेरङि नेश् वा स्यात् । अनेशत्-अनशत् ५ । ननाश ६ । नश्यात् ७ ॥ ७ ॥**

**'नशे०'** औदित्त्वाद्वेट् ॥ ७ ॥ इडभावे सूत्रम्

## नशो धुटि ॥ ८ ॥ [ सि० ४।४।१०९ ]

**नशः स्वरात्परो नोन्तः स्याद् धुडादौ । नंष्टा । पक्षे इटि नशिता ८ । नंक्ष्यति-नशिष्यति ९ । 'श्लिषंच् आलिङ्गने' । श्लिष्यति ४ ॥ ८ ॥**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'नशो०'** स्पष्टम् । 'नशः शः' ( २।३।७८ ) इत्यत्र शान्तस्येत्युक्तत्वात् षान्तस्य न णत्वम् प्रनङ्क्ष्यति । शान्तस्य तु स्यात् प्रणशिष्यति । **जनशो न्युपान्त्ये तादिः क्त्वा'** ( ४।३।२३ ) जकारान्ताद्धातोर्नशेश्च न्युपान्त्ये सति तादि क्त्वा किद्वद्वा भवति । यथा रक्त्वा रङ्क्त्वा । भक्त्वा भङ्क्त्वा । नष्ट्वा नंष्ट्वा । नीति किम् ? भुक्त्वा । उपान्त्य इति किम् ? निक्त्वा । क्त्वेति किम् ? भङ्क्ता । तादिरिति किम् ? वैकल्पिके इटि नशित्वा । क्तयोर्नेट् नष्टः नष्टवान् । शान्तत्वाभावे प्रनष्टः । क्विपि नशो वा गत्वे नश्यतीति नक् नग् । पक्षे 'यजसृज०' ( २।१।८७ ) इति षत्वे नट् नड् । णौ फलवत्कर्त्तर्यपि 'चल्याहारार्थ०' ( ३।३।१०८ ) इति परस्मैपदे नाशयति । नन्द्याद्यने नाशयतीति नाशनः । 'निन्दहिंस०' ( ५।२।६८ ) इति णके विनाशनशीलो विनाशकः । 'सृजीण्०' ( ५।२।७७ ) इति ड्वरपि नश्वरः नश्वरी । 'कर्त्तुर्जीव०' ( ५।४।६९ ) इति णमि जीवनाशं नष्टः । उणादौ जिभृसृ० ( ४४७ ) इति त्रदि वृद्धौ च नाष्टाः यातुधानाः । **'कुशच्** श्लेषणे' । कुश्यति । अकुशत् । चुकोश । कोशिता । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के कुशः । 'भाजगोण०' ( २।४।३० ) इति ङ्यां कुशी आयसी चेत् । कुशान्या । घञि कोशः । गौरादित्वात् ङ्यां कोशी । उणादौ तृपिवपि० ( ४६८ ) इति कित्यले कुशलम् । कुशिकमिभ्यां कुल्कुमौ च ( ५०३ ) इति मलकि कुल्मलं छेदनम् । **'भृशू भ्रंशूच** अधःपतने' । भृश्यति अभृशत् बभर्श भर्शिता । उदित्त्वात् क्त्वि वेट् भृष्ट्वा । क्त्वेति किम्त्वाभावे भर्शित्वा । वेदत्वात् क्तयोर्नेट् भृष्टः भृष्टवान् 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के भृशः । **'भ्रंशूच्** भ्रंश्यति अभ्रशत् बभ्रंश भ्रंशिता क्त्वि वेट् भ्रष्ट्वा भ्रशित्वा क्तयोर्नेट भ्रष्टः भ्रष्टवान् 'वञ्चस्रंस०' ( ४।१।५० ) इति ध्वंसिसहचरितस्य भ्वादेरेव भ्रंशेर्ग्रहणाद्यभावे यङि बाभ्रश्यते । 'भ्रंशूङ् अवस्रंसने' भ्रंशते अभ्रंशिष्ट । बनीभ्रश्यते । क्विपि घञुपसर्गस्येति बाहुलकाद्दीर्घे वहाभ्रट् । **'वृशच्** वरणे' वृश्यति । ववर्श पुष्याद्यङि अवृशत् । वर्शिता वृशितः । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के वृशः । घञि वर्शः । **'कृशच्** तनुत्वे' कृश्यति । अकृशत् । चकर्श । कर्शिता । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के कृशः । 'अनुपसर्गाः क्षीबोल्लाघकृशपरिकृशफुल्लोत्फुल्लसंफुल्लाः' ( ४।२।८० ) इति क्तयोर्निपातनात् कृशः कृशवान् । परिकृशः परिकृशवान् । सोपसर्गस्य तु प्रकृशितः । 'ऋत्तृषमृषकृशवञ्चलुञ्चथफः सेट्' ( ४।३।२४ ) एभ्यः सेट् क्त्वा किद्वत् वा स्यादिति वा कित्त्वे कृशित्वा कर्शित्वा । उणादौ कृशेरानुक् ( ७९४ ) कृशानुः । इति शान्ताः षट् सेटः ६ । **'शुषंच्** शोषणे' इति । शुष्यति अशुषत् शुशोष । अनुस्वारत्त्वान्नेट् शोष्टा शुष्ट्वा । 'क्षैशुषिपचोमकवम्' ( ४।२।७८ ) इति क्तयोस्तस्य कत्वे शुष्कः शुष्कवान् । 'ऊर्ध्वात् पूः शुषः' ( ५।४।७० ) इति णमि ऊर्ध्वशोषं शुष्कः । उणादौ विलिभिलि ( ३४० ) इति किति मे शुष्मं बलम् । शुषीषि० ( ४१६ ) इति कितीरे शुषिरम् । नाम्युपान्त्य० ( ६०९ ) इति किदिः शुषिः छिद्रम् । सात्मन्ना० ( ९१६ ) इति निपातनात् शुष्मा ( बर्हिःशुष्मा ) **'दुषंच्** वैकृत्ये' । वैकृत्यं रूपभङ्गः । दुष्यति अदुषत् दुदोष दोष्टा दुष्टः णौ 'ऊद्दुषो णौ' ( ४।२।४० ) इत्युपान्त्यस्य ऊत्वे दूषयति' **'चित्ते वा'** ( ४।२।४१ ) चित्तकर्तृकस्य दुषेरूद्वा । चित्तं दूषयति दोषयति वा । चित्तग्रहणेन प्रज्ञाया अपि ग्रहणात् प्रज्ञां दूषयति दोषयति वा । नन्द्याद्यने दूषणः । उणादौ कीकल्य० ( ३८ ) इति इके दूषयतीति दूषिका नेत्रमलः । स्यमिकमि० ( ४६ ) इति ईके दूषयतीति दूषीका नेत्रमल एव । **श्लिषंच्** इति । श्लिष्यति ॥ ८ ॥ अद्यतन्यां पुष्यादाङि प्राप्तेऽपवादसूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## श्लिषः ॥ ९ ॥ [ सि० ३।४।५६ ]

**श्लिषोऽनिटोऽनद्यतन्यां सक् स्यात् । †नत्वजीवाश्लेषे । आश्लिक्षत् । अजीवाश्लेषे तु आश्लिष्यज्जतु काष्ठम् ५ । शिश्लेष ६ । श्लिष्यात् ७ । श्लेष्टा ८ । 'असूच् क्षेपणे' । अस्यति ४ । 'शास्त्यसू' इत्यङि, श्वयत्यसू इत्यास्थादेशे, आस्थत् ५ । आस ६ । अस्यात् ७ । असिता ८ ॥ 'शमू दमू च् उपशमे' २ । 'तमूच् काङ्क्षायाम्' ३ । 'श्रमूच् खेदतपसोः' ४ । 'भ्रमूच् अनवस्थाने' ५ । 'क्षमौच् सहने' ६ । 'मदैच् हर्षे' ७ । इति शमसप्तकम् ॥ ९ ॥**

'**श्लिषः**' यथा आश्लिक्षत्कन्यां चैत्रः । 'क्रियाव्यतिहार०' ( ३।३।२३ ) इत्यात्मनेपदे 'हशिट०' ( ३।४।५५ ) इति सकि व्यत्यश्लिक्षत कन्याम् । 'पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरानि'-त्यङ एव बाधा न ञिचः आश्लेषि कन्या चैत्रेण । अनिट इति किम् ? 'श्लिषू दाहे' इत्यस्मात्सेटो मा भूत् । अश्लेक्षीत् अधाक्षीदित्यर्थः ॥ †नत्वजीवाश्लेषे इति अत्रैवं सूत्रम् । '**नासत्त्वाश्लेषे**' ( ३।४।५७ ) श्लिषो धातोरप्राण्याश्लेषे वर्त्तमानात्सक् प्रत्ययो न भवति । किन्तु पुष्यादित्वादङेव । यथा उपाश्लिषज्जतु च काष्ठं च । पृथग्योगात्पूर्वेणापि प्राप्तः प्रतिषिध्यते । नन्वनन्तरस्य विधिः प्रतिषेधो वेति न्यायादनन्तरस्य सकोऽङ्बाधकत्वात्परस्मैपदविषयस्यैव सको निषेधः प्राप्नोति । न तु क्रियाव्यतिहारे कर्त्तर्यात्मनेपदे प्रवर्त्तमानस्य 'हशिट०' इति सक इत्याशङ्कायामुक्तमेवोत्तरं पृथग् योगादिति । यदि ह्यनन्तरस्यैव प्रतिषेधः स्यात्तदाश्लिषोऽसत्त्वाश्लेष इत्येकमेव योगं कुर्यात् । पृथग्योगा'न्नासत्त्वाश्लेषे' 'हशिट०' इत्यस्यापि प्रतिषेधे सिजागमे व्यत्यश्लिक्षन्त काष्ठानि इति भवति । असत्त्वाश्लेष इति किम् ? व्यत्यश्लिक्षन्त मिथुनानि । 'हशिट०' ( ३।४।५५ ) इति सकि रूपम् । अत्र प्राचः पूर्वस्मात्परो विधिः प्राग् विधिरिति 'स्वरस्य परे प्राग्विधौ' ( ७।४।११० ) इत्यकारलोपस्य स्थानित्वात् 'अनतोऽन्तोऽदात्मने' (४।२।११४) इत्यदादेशो न भवति । अनिट्त्वात् श्लेष्टा । 'गत्यर्थाकर्मक०' ( ५।१।११ ) इति कर्त्तरि क्ते श्लिष्टो मैत्रः । पक्षे भावे श्लिष्टं मैत्रेण । साप्यादपि 'श्लिषशीङ्' ( ५।१।९ ) इति वा कर्त्तरि क्ते आश्लिष्टो मैत्रः कन्याम् । पक्षे कर्मणि क्ते आश्लिष्टा कन्या मैत्रेण । लिहाद्यचि श्लेषः । उणादौ भ्रूणतृण० ( १८६ ) इति ( णे ) निपातनात् श्लक्ष्णः । मन् ( ९११ ) इति मनि श्लेष्मा । 'श्लिषू दाहे' श्लेषति अश्लेषीत् । 'श्लिषण् श्लेषणे' । श्लेषयति । '**प्लुषूच् दाहे**' । प्लुष्यति अप्लुषत् पुप्लोष प्लोषिता । ऊदित्त्वात् क्त्वि वेट् प्लुष्ट्वा । 'वौ व्यञ्जनादेः०' ( ४।३।२५ ) इति सेटो वा कित्त्वे प्लुषित्वा, प्लोषित्वा । क्तयोर्नेट् प्लुष्टः प्लुष्टवान् । अनूदिदयमित्येके । उणादौ प्लुषेः प्लष् च ( ५६६ ) इति से प्लक्षः । 'प्लुषू दाहे' प्लोषति । 'प्रुष प्लुषश् स्नेहनसेचनपूरणेषु' । प्लुष्णाति । '**ञितृषच् पिपासायाम्**' । तृष्यति अतृषत् ततर्ष तर्षिता । ञीत्त्वात् 'ज्ञानेच्छा०' ( ५।२।९२ ) इति सति क्ते तृषितः तृषितवान् । '**ऋत्तृषमृषकृशवञ्चलुञ्चथफः सेट्**' ( ४।३।२४ ) न्युपान्त्ये इति विशेषणं थफान्तानाम् । नान्येषाम्, सम्भवव्यभिचाराभावात् । न्युपान्त्ये सति एभ्यो विहितः क्त्वा सेट् किद्वा भवति । इति सेटः क्त्वो वा कित्त्वे तृषित्वा तर्षित्वा । 'तृषिधृषि०' ( ५।२।८० ) इति नजिङि तर्षणशीलस्तृष्णक् घञि तर्षः । क्रुत्सम्पदा०' ( ५।३।११४ ) इति क्विपि तृट् । भिदाद्यङि तृषेत्येके । 'कालेन तृष्यः स्वः०' ( ५।४।८२ ) इति णमि, 'तृतीयोक्तं वा' ( ३।१।५० ) इति वा समासे द्व्यहतर्षं द्व्यहंतर्षं गाः पाययति । उणादौ घृवीह्वा० ( १८३ ) इति किति णे तृष्णा । मृगयेच्छा०' ( ५।३।१०१ ) इति निपातनाद्वा । '**तुषं, हृषच् तुष्टौ**' तुष्टिः प्रीतिः । तुष्यति अतुषत् तुतोष तोष्टा तुष्टा । शील्यादित्वात् सति क्ते तुष्टः तुष्टिः । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति

के तुषः । उणादौ तुषिकुठिभ्यां कित् ( ४०८ ) इत्यारे तुषारः । **हृष,** हृष्यति अहृषत् जहर्ष '**हृषेः केशलोमविस्मयप्रतीघाते**' ( ४।४।७६ ) केशलोमकर्तृका क्रिया केशलोमशब्देनोच्यते । हृषेः केशादिष्वर्थेषु वर्त्तमानात्परयोः क्तयोरादिरिड्वा । हृष्टा हृषिताः केशाः । हृष्टं हृषितं केशैः । हृष्टानि हृषितानि लोमानि । हृष्टं हृषितं लोमभिः । हृष्टो हृषितश्चैत्रो विस्मित इत्यर्थः । हृष्टा हृषिता दन्ताः प्रतिहता इत्यर्थः । केशादिष्विति किम् ? हृष्टो मैत्र इत्यलीकार्थस्य ऊदित्त्वेन वेट्त्वात् 'वेटोऽपतः' ( ४।४।६२ ) इति नेट् । हृषितश्चैत्र इति तुष्ट्यर्थस्य नित्यमिट् । केशाद्यर्थाभावादिति । ऊदिदयमिति **नन्दी** । अलीकार्थोऽयमित्येके । उणादौ हृषिवृति० ( ४८५ ) इत्युले हर्षुलः कामी । 'हृषू अलीके' हर्षति । अस्यापि केशादिष्वर्थेषु क्तयोरिड्विकल्पः प्रागुक्त एव केशादिसूत्रे, हृषेः सामान्यतो ग्रहणात् '**रुषच्** रोषे' । रुष्यति अरुषत् रुरोष । तादौ 'सहलुभेच्छरुषरिषस्तादेः' ( ४।४।४६ ) इति वेटि रोष्टा रोषिता । क्तयोः 'क्षुब्धविरिब्ध...' 'श्वसजपवमरुषत्वरसङ्घुषास्वनामः' ( ४।४।७५ ) एभ्यः परयोः क्तयोरादिरिड्वेति रुष्टः रुषितः । शील्यादित्वात्सति क्ते रुष्टः । 'भूषाक्रोधा०' ( ५।२।४२ ) इत्यने रोषणशीलो रोषणः । 'क्रुत्संपदा०' ( ५।३।११४ ) इति क्विप् रुट् । 'रुष हिंसायाम् रोषति' । '**प्युष प्युस पुसच्** विभागे' प्युष्यति अप्युषत् पुप्योष प्योषिता प्युषितः । 'वौ व्यञ्जनादेः०' ( ४।३।२५ ) इति क्त्वो वा कित्त्वे प्युषित्वा प्योषित्वा इति षान्ता नव । तत्र चत्वारोऽनिटः पञ्च सेटः । **प्युस,** प्युस्यति अप्युसत् पुप्योस प्योसिता प्युसित्वा प्योसित्वा । **पुस** पुस्यति अपुसत् पुपोस पोसिता पुसित्वा पोसित्वा । उणादौ शीरी० ( २०१ ) इति किति ते पुस्तं लेप्यादि कर्म । स्वार्थे के पुस्तकम् । '**विसच्** प्रेरणे' विस्यति अविसत् विवेस वेसिता 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के विसम् । उणादौ शीरी० ( २०१ ) इति किति ते विस्तं परिमाणम् । '**कुसच्** श्लेषे' कुस्यति अकुसत् चुकोस कुसिता कुसितः । उणादौ कुशिपिशि० (२१२) इति कितीते कुसितः ऋषिः । तस्य भार्या पूतक्रत्विति ङ्यामैदन्तादेशे च कुसितायी । उद्वदिकुल्यलि० ( ३५१ ) इति कुमे कुसुमम् । **असूच्** इति । 'उपसर्गादस्योहो वा' ( ३।३।२५ ) इति वात्मनेपदे निरस्यति निरस्यते । 'अकखाद्यषान्ते पाठे वा' ( २।३।८० ) इति वा नेर्णत्वे प्रण्यस्यति प्रन्यस्यति । प्रण्यस्यते प्रन्यस्यते । ( पुष्याद्यङि श्वयतीत्यस्थादेशे ) आस्थत् इति । आत्मनेपदे तु 'शास्त्यसूवक्तिख्यातेरङ्' ( ३।४।६० ) इत्यङि उदास्थत उदास्थेताम् । परोक्षायां 'अस्याद०' ( ४।१।६८ ) इति पूर्वस्यात्वे आस आसतुः । ऊदित्त्वात् क्त्वि वेट् अस्त्वा असित्वा । क्तयोर्नेट् अस्तः अस्तवान् । 'ऋवर्ण०' ( ५।१।१७ ) इति घ्यणि आस्यम् । 'कालेन तृष्य०' ( ५।४।८२ ) इति णमि 'तृतीयोक्तं वा' ( ३।१।५० ) इति समासे द्व्यहात्यासम् द्व्यहमत्यासं गाः पाययति । उणादौ शिक्यास्या० ( ३६४ ) इति ये निपातनात् आस्यम् । वाश्यसि० ( ४२३ ) इत्युरे असुरः । 'पदिपठि०' ( ६०७ ) इति इः असिः । वीसञ्जयसि० ( ६६९ ) इति किति थिकि अस्थि । मस्यसि० ( ६९९ ) इत्युरौ असुरिः संग्रामः । भृमृतृ० ( ७१६ ) इत्युः असवः प्राणाः । '**यसूच्** प्रयत्ने' । प्रयस्यति । आयस्यति । सम्पूर्वस्यानुपसर्गस्य च, 'भ्रासभ्लास०' ( ३।४।७३ ) इति वा श्ये संयस्यति यस्यति । पक्षे शवि संयसति यसति । अयसत् ययास । ऊदित्त्वात् क्त्वि वेट् यस्त्वा यसित्वा । क्तयोर्नेट् आयस्तः आयस्तवान् । णौ फलवत् कर्त्तरि 'ईङ्गितः' ( ३।३।९५ ) इत्यात्मनेपदे 'अणिगि प्राणिकर्तृका०' ( ३।३।१०७ ) इति परस्मैपदेनापोदिते 'परिमुहायमा०' ( ३।३।९४ ) इति पुनर्विहिते आयासयते शत्रुं मैत्रः । 'प्राश्च यमयसः' ( ५।२।५२ ) इति घिनणि प्रयासशीलः प्रयासी । '**जसूच्** मोक्षणे' । जस्यति अजसत्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जजास जसिता जस्त्वा, जसित्वा जस्तः । णौ हिंसार्थत्वाभावात् 'जासनाट०' ( २।२।१४ ) इति कर्मणो वा न कर्मत्वम् तेन द्वितीयैव । चौरं बन्धनात् जासयति मोचयतीत्यर्थः । हिंसार्थोऽपीत्येके तन्मते वा कर्मत्वे शेषषष्ठ्यां चौरस्योज्जासयति चौरं वोज्जासयति । 'स्म्यजस०' ( ५।२।७९ ) इति रे अजसनशीलं अजस्रं पचति अजस्रः पाकः । धात्वर्थविशेषणत्वाद्धात्वर्थकर्तृक एवायं प्रयोज्यः । तेनाजस्रो घट इति प्रयोगोऽसाधुः । 'जसण् हिंसायाम्' । चौरस्योज्जासयति । **'तसू दसूच्** उप-क्षये' तस्यति अतसत् ततास तसिता तस्त्वा तसित्वा तस्तः २ । 'तिकृतौ०' ( ५।१।७१ ) इति तिकि वितस्तिः 'दम्यमि०' ( २०० ) इति ते वितस्ता नदी । ध्रुज्ञा० ( ६४६ ) इति विपूर्वात्तसेस्तौ वितस्तिः । दस्यति अदसत् ददास दसिता दसित्वा दस्त्वा दस्तः २ । ण्यन्तस्य के 'णौ दान्त-शान्त०' ( ४।४।७४ ) इति निपातनाद्दस्तः दासितः । उणादौ भीवृधि० ( ३८७ ) इति रे दस्रौ देववैद्यौ । यजिशुन्धि० ( ८०१ ) इति युः दस्युश्चौरः । **'वसूच्** स्तम्भे' । वस्यति । अवसत् वसिता वस्त्वा वसित्वा वस्तः २ । उणादौ दम्यमि० ( २०० ) इति ते वस्तः छागः । ध्रुज्ञा० (६४६) इति तौ वस्तिर्मूत्राशयः । 'वसं निवासे' वसति वस्ता 'वसिक् आच्छादने' वस्ते । 'वसण् स्नेह-च्छेदावहरणेषु' वासयति । **'वुसच्** उत्सर्गे' । वुस्यति अवुसत् वुवोस वोसिता वुसितः 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के वुसम् । **'मुसच्** खण्डने' मुस्यति अमुसत् मुमोस मोसिता मुसितः । उणादौ शीरी० ( २०१ ) इति किति ते मुस्ता 'तृपिवपि० ( ४६८ ) इति किल्यले मुसलम् । षान्तोऽय-मित्यन्ये । **'मसैच्** परिणामे' परिणामो विकारः । परिमाण इत्यन्ये । मस्यति अमसत् ममास मसिता ऐदित्त्वात् क्तयोर्नेट् मस्तः । घञि मासः । मासिति प्रकृत्यन्तरं चन्द्राभिधायि । पूर्णमासा युक्ता साऽस्य पौर्णमासीति निर्देशादणि पौर्णमासी । उणादौ दम्यमि० ( २०० ) इति ते मस्तः । स्वार्थे के मस्तकः । पदिपठि० (६०७) इति इः मसिः शल्ली । कृसिकम्य० (७७३) इति तुनि मस्तु दधिमन्थः । अथ श्ये दीर्घार्थं शमादिसप्तकं निर्दिशति ( पृष्ठ ६८३ ) **शमू , दमूच** इत्यादि ॥ ९ ॥ तत्र सूत्रम्

## शमसप्तकस्य( श्ये ) ॥ १० ॥ [ सि० ४।२।१११ ]

**श्ये दीर्घः स्यात् । शाम्यति ४ । अशमत् ५ । शमिता ७ । क्षाम्यति । औदित्त्वात् क्षमिता क्षन्ता । क्षमिष्यति-क्षंस्यति । ॐ 'मुहौच् वैचित्त्ये' मुह्यति । इड्विकल्पे मुहद्रुहस्नुहस्निहो वेति घत्वढत्वाभ्यां च मोढा-मोग्धा-मोहिता । मोक्ष्यति-मोहिष्यति । ८ 'द्रुहौच् जिघांसायाम्' । ध्रोक्ष्यति-द्रोहिष्यति । 'ष्णिहौच् प्रीतौ । स्नेग्धा-स्नेढा-स्नेहिता ॥ १० ॥**

### इति परस्मैपदिनः ।

**'शम०'** दीर्घः स्यादिति । अयं भावः । शमादीनां मदैच्पर्यन्तानां सप्तानां श्ये परे दीर्घो भवति । यथा शाम्यतीत्यादि । शमसप्तकस्येति किम् ? अस्यति । श्य इति किम् ? भ्रमति । यङ्लुपि शंशन्ति । 'नेर्ङ्मादा० ( २।३।७९ ) इति नेर्णत्वे प्रणिशाम्यति । अशमत् । शशाम शेमतुः । णौ 'शमोऽदर्शने' ( ४।२।२८ ) इति ह्रस्वे शमयति रोगम् । दर्शने तु निशामयति रूपम् । शमिता शमितुम् । ऊदित्त्वात् क्त्वि वेट् शान्त्वा शमित्वा । क्तयोर्नेट् शान्तः २ । 'णौ दान्तशान्त०' ( ४।४।७४ ) इति निपातनात् शान्तः । पक्षे 'सेट्क्तयोः' ( ४।३।८४ ) इति णेर्लुकि शमितः । 'शकितकि०' ( ५।१।२९ ) इति ये शम्यम् । क्विपि 'अहन्पञ्चमस्य०' ( ४।१।१०७ ) इति दीर्घे 'मो नो०' ( २।१।६७ ) इति नत्वे, तस्य च परेऽसत्त्वात् 'नाम्नो न०' ( २।१।९१ ) इति लुगभावे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'नोऽप्रशान०' ( १।३।८ ) इत्यत्र प्रशानो वर्जनात् अनुस्वारानुनासिकपूर्वस्य शस्याभावे 'तवर्गस्य०' ( १।३।६० ) इति नस्य ञत्वे प्रशाञ् चरति । इदमेव शमसप्तकं क्रमूच् युक्तं शमष्टकम् । तत्र च **'शमष्टकात् घिनण्'** ( ५।२।४९ ) 'मोऽकमियमि०' ( ४।३।५५ ) इति वृद्ध्यभावे शमशीलः शमी । घञि शमः । गौरादित्वात् ङ्यां शमी । उणादौ शमिमनिभ्यां खः ( ८४ ) शङ्खः । 'कमितमि०' ( १०७ ) इति डिदुङ्गे शुङ्गो ऋषिः, शुङ्गाः कन्दल्यः । पञ्चमाङ्कः ( १६८ ) शण्ड उत्सृष्टपशुः । शमिषणिभ्यां ढः ( १७९ ) शण्ढः षण्ढः क्लीबम् । कैशीशमि० ( ७४९ ) इति कौ शङ्कुः । शकृत् इति तु शक ऋत् ( ८९१ ) इति शकेर्ऋति । **दमू,** दाम्यति अदमत् ददाम दमिता क्त्वि वेट् दान्त्वा दमित्वा दान्तः २ । णौ 'अमोऽकम्यमि०' ( ४।२।२६ ) इति ह्रस्वे फलवत्कर्तरि 'ईगितः' ( ३।३।९५ ) इत्यात्मनेपदे, अणिगि प्राणिति परस्मैपदेनापोदिते 'परिमुहाय०' ( ३।३।९४ ) इति पुनर्विहिते 'गतिबोध०' ( २।२।५ ) इत्यणिक्कर्तुः कर्मत्वे च दाम्यत्यश्वः । दमयति अश्वं चैत्रः । **'अकखाद्यषान्ते पाठे वा'** ( २।३।८० ) कादिखादिषान्तान् धातून् विनान्यस्मिन् धातौ परे अदुरुपसर्गान्तःस्थाद्रादेः परस्य नेर्णो वा स्यात् । प्रणिदमयते प्रनिदमयते । 'शकितकि०' ( ५।१।२९ ) इति ये दम्यः । नन्द्याद्यने कुलदमनः । 'भृवृजि०' ( ५।१।११२ ) इति खे अरिंदमः । 'णौ शान्तदान्त०' ( ४।४।७४ ) इति क्ते वा निपातनात् दान्तः दमितः । 'शमष्टकाद् घिनणि दमशीलो दमी । घञि दमः । उणादौ पञ्चमाङ्कः ( १६८ ) दण्डः । दम्यमि० ( २०० ) इति ते दन्तः । दमेरुनसूनसौ ( ९८७ ) दमुनाः दमूनाश्च वह्निः । यमिदमिभ्यां डोस् ( १००५ ) दोः बाहुः । **'तमूच्** काङ्क्षायाम्' । ताम्यति अतमत् तताम तमिता । क्त्वि वेट् तान्त्वा तमित्वा । तान्तः २ । घिनणि 'मोऽकमि०' ( ४।३।५५ ) इति वृद्ध्यभावे तमी । घञि तमः । गौरादित्वात् ङ्यां तमी रात्रिः । उणादौ 'चिजिशुसिमितम्यम्यर्देर्दीर्घश्च' ( ३९२ ) एभ्यो रो दीर्घश्चैषाम् । ताम्रम् । तप्यणि० ( ५६९ ) इत्यसे तमसोऽन्धकारः । तमसा नदी । 'क्रमितमिस्तम्भेरिच्च नमेस्तु वा ( ६१२ ) एभ्यः क्रिदिः प्रत्ययः इति इ प्रत्यये उपान्त्यस्येत्वे च तिमिः । अस् ( ९५२ ) इत्यसि तमः । **'श्रमूच्** खेदतपसोः' । श्राम्यति अश्रमत् शश्राम श्रमिता श्रान्त्वा श्रमित्वा । श्रान्तः २ । 'शकितकि०' ( ५।१।२९ ) इति ये श्रम्यम् । नन्द्याद्यने श्रमणः । स्त्रियामपि श्रमणा । घञि 'विश्रमेर्वा' ( ४।३।५६ ) इति वृद्धिविकल्पे विश्रमः विश्रामः । घिनणि श्रमी । **'भ्रमूच्** अनवस्थाने' । अनवस्थानं देशान्तरगमनम् । 'भ्रासभ्लास०' ( ३।४।७३ ) इति वा श्ये भ्राम्यति, पक्षे शवि भ्रमति अभ्रमत् बभ्राम भ्रान्त्वा भ्रमित्वा भ्रान्तः २ । घिनणि भ्रमी । घञि 'मोऽकमि०' ( ४।३।५५ ) इति वृद्ध्यभावे भ्रमः । गौरादित्वात् ङ्यां भ्रमी । उणादौ तृभ्रम्यदि० ( ६११ ) इति इ प्रत्यये भृमादेशे भृमिः वायुः । बाहुलकाद् भृमादेशाभावे भ्रमिः भ्रमः । भ्रमिगमि० ( ८४३ ) इति डिदूः भ्रूः । 'भ्रमू चलने' भ्रमति । 'भ्रासभ्लास०' ( ३।४।७३ ) इति वा श्ये भ्राम्यति । अस्य यङ्लुपि न दीर्घः, शमादिगणनिर्देशात् श्यस्तु भवत्येव । 'भ्रासभ्लास०' इति प्रतिपदोक्तत्वात्, तेन बंभ्रम्यतीति भवति । **'क्षमौच्** सहने' क्षाम्यति अक्षमत् चक्षाम । औदित्त्वात् इति 'धूगौदितः' ( ४।४।३८ ) इति वेट् क्षान्ता क्षमिता । क्तयोर्नेट् क्षान्तः २ । घिनणि क्षमी । घञि 'मोऽकमि०' इति वृद्ध्यभावे क्षमः । क्तौ क्षान्तिः । ऊदिदयमित्येके क्षान्त्वा क्षमित्वा । 'क्षमौषि सहने' क्षमते अक्षमिष्ट । षित्त्वादङि क्षमा । इति मान्ताः षट् सेटः । **'मदैच्** हर्षे' माद्यति अमदत् ममाद मदिता ऐदित्त्वात् क्तयोर्नेट् 'रदादमूर्च्छमदः क्तयोर्दस्य च' ( ४।२।६९ ) इत्यत्र मदेर्वर्जनान्नत्वाभावे मत्तः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

२ । णौ हर्षग्लपनयोर्घटादित्वात् ह्रस्वे मदयति अन्यत्र प्रमादयति उन्मादयति । अनुपसर्गात् यम-मदगदोऽनुपसर्गात्' ( ५।१।३० ) इति ये मद्यम्, सोपसर्गाद् घ्यणि प्रमाद्यम् । नन्द्याद्यने मदयतीति मदनः । 'इरंमद' ( ५।१।१२७ ) इति खशि निपातनात् इरया माद्यति इरंमदः मेघज्योतिः । 'उदः पचिपतिपदिमदेः' ( ५।२।२९ ) इतीष्णौ उन्मादशील उन्मदिष्णुः । घिनणि मदनशीलो मादी प्रमादी उन्मादी । 'व्यधजप०' (५।३।४७) इत्यलि मदः । सोपसर्गात्तु घञि प्रमादः । संमदप्रमदौ हर्षे संमदः कन्यानाम्, प्रमदः कोकिलानाम् । उणादौ तुदिमदि० ( १२४ ) इति छे मच्छो मत्स्यः । गौरादित्वात् ङ्यां 'मत्स्यस्य यः' ( २।४।८७ ) इति यलुकि मत्सी । मन्दिकन्दि० ( ४१२ ) इति रे मदिरा । मीव्यजि० ( ४३९ ) इति सरप्रत्यये मत्सरः । 'मदिण् तृप्तियोगे' मादयते । इति दान्तः सेट् । इति शमसप्तकं समाप्तम् । **'क्लमूच् ग्लानौ'** । 'भ्रासभ्लास०' ( ३।४।७३ ) इति वा श्ये 'ष्ठिवुक्लम्वा०' ( ४।२।११० ) इति वा दीर्घे क्लाम्यति । पक्षे शवि क्लामति अचक्लमत् चक्लाम क्लमिता । ऊदित्त्वात् क्त्विव वेट् क्लान्त्वा क्लमित्वा । क्तयोर्नेट् क्लान्तः २ । घिनणि क्लमी । घञि क्लमः । शमष्टकं समाप्तम् । 卐 **मुहौच्** इति वैचित्त्यमविवेकः । मुह्यति अमुहत् मुमोहेत्यादि स्पष्टम् । ध्वस्त-म्थादौ इड्विकल्पे विशेषस्तथा चाह इड्विकल्पे इत्यादि । क्विपि उन्मुक् उन्मुट् । वेट्त्वात् क्तयोर्नेट् मुग्धः मूढः । मुग्धवान् मूढवान् । णौ फलवत्कर्त्तरि 'ईगितः' ( ३।३।९५ ) इत्यात्मनेपदे 'अणिगि प्राणिकर्तृका०' ( ३।३।१०७ ) इति परस्मैपदेनापोदिते 'परिमुहायमा०' ( ३।३।९४ ) इति पुनर्विहिते परिमोहयते शत्रुम् । 'परेर्देविमुहश्च' ( ५।२।६५ ) इति घिनणि परिमोही । घञि मोहः । उणादौ 'पूमुहोः पुन्मूरौ च' ( ८६ ) इति खे मूर्खः । मुहेः कित् ( ७०० ) इत्युरौ मुहुरिः गौः सूर्यश्च । मुहिसिध्यादेः कित् ( १००० ) इत्युसि मुहुः कालावृत्तिः । **द्रुहौच्** इति । 'क्रुद्द्रुहे०' ( २।२।२७ ) इति सम्प्रदानत्वे मैत्राय द्रुह्यति । अद्रुहत् दुद्रोह द्रोग्धा-द्रोढा-द्रोहिता । क्विपि मित्रध्रुक् २ । मित्रध्रुट्-ड् । क्तयोर्नेट् द्रुग्धः द्रूढः । 'युजभुज०' ( ५।२।५० ) इति घिनणि द्रोहशीलो द्रोही । घञि द्रोहः । उणादौ ऋद्रुहेः कित् ( १९५ ) इतीणे द्रुहिणो ब्रह्मा । **'ष्णुहौच्** उद्गिरणे' 'षः स' ( २।३।९८ ) इति सत्वे स्नुह्यति अस्नुहत् 'नाम्यन्तस्था०' ( २।३।१५ ) इति षत्वे सुष्णोह । स्नोग्धा-स्नोढा-स्नोहिता । स्नुग्धः स्नूढः । स्नुग्धवान् स्नूढवान् । उणादौ नाम्युपान्त्यकृ० ( ६०९ ) इति किदिः स्नुहिर्महावृक्षः । **ष्णिहौच्** इति स्निह्यति अस्निहत् सिस्नेह स्निग्धः स्निग्धवान् स्नीढः स्नीढवान् । क्विपि स्निक् स्निट् । 'ऋत्विग्०' ( २।१।६९ ) इति हस्य गत्वे सूत्रनिर्देशादेव उदो दलुकि सस्य षत्वे च उष्णिक् । 'अजादेः' ( २।४।१६ ) इत्यापि उष्णिहा । घञि स्नेहः । 'ष्णिहण् स्नेहने' । स्नेहयति । केचित्तु शमू दमू तमू श्रमू भ्रमू क्षमौ मदै असू यसू जसू दसू वसू प्युष प्युस पुस ब्रुषू विस कुस कुश बुस मुस मसै लुट उच भृश कृश तृष रुष डिप ष्टूप कुप गुप युप रुप लुप ७ लुभ णभ तुभ क्लिदौ ञिमिदा ञिक्ष्विदा ऋधूगृधूनां ४३ पुष्यादित्वं नेच्छन्ति । तन्मते पुष्याद्यङ्भावे सिचि अशमीत् अदमीत् अश्रमीत् अयसीत् अलोटीत् अप्लोषीत् अकोपीत् अलोपीत् अहर्षीत इत्यादि ।

( वृत् ) पुषादिः ६७ दिवाद्यन्तर्गणो वर्तितः । सम्पूर्ण इत्यर्थः । इति परस्मैपदिनः इति स्पष्टम् ।

अथात्मनेपदिषु आदिशब्दसंगृहीतः सूयत्यादिर्नवको गणः क्तयोस्तस्य नत्वार्थं प्रदर्श्यते । **'षूङौच् प्राणिप्रसवे'** सूयते असोष्ट असविष्ट औदित्त्वाद्वेट् सुषुवे सोता सविता । क्तिति 'उवर्णात्' ( ४।४।५८ ) इति नेट् सूत्वा । 'सूयत्याद्योदितः' ( ४।२।७० ) इति क्तयोस्तस्य नत्वे सूनः २ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रसूतं कुसुमम् । अत एवायमप्राणिप्रसवे इत्यन्ये । सनि 'ग्रहगुहश्च सनः' (४।४।५९) इति नेट् 'णिस्तोरेवा०' (२।३।३७) इति नियमात् षत्वाभावे सुसूषते 'युवर्ण०' (५।३।२८) इत्यलि प्रसवः 'षूङौक् प्राणिगर्भविमोचने' सूते । 'षूत् प्रेरणे' सुवते । **'दूङ्च् परितापे'** परितापः खेदः दूयते अदविष्ट दुदुवे दविता । क्विति 'उवर्णात्' (४।४।५८) इति नेट् दूत्वा । सूयत्यादित्वात् क्तयोस्तस्य नत्वे दूनः २ । उणादौ शीरी० (२०१) इति किति ते दूतः । इत्यूदन्तौ द्वौ सेटौ च ।

**'दीङ्च् क्षये'** । अकर्मकोऽयम् । दीयते क्षयं गच्छतीत्यर्थः । **'यबक्ङिति'** (४।२।७) दीङो यपि अक्ङिति प्रत्यये विषयभूते आकार अन्तादेशो भवति । दारूपस्य बहिरङ्गत्वाद्दासंज्ञाया अभावे 'इश्च स्थादः' (४।३।४१) इति न इः । अद्यतन्यां उपादास्त उपादासाताम् उपादासत । विषयसप्तमीनिर्देशात्पूर्वमेवात्वे ईषदुपादानः उपादायो वर्त्तते इत्यत्राकारान्तलक्षणोऽनो घञ्च भवति । 'तन्व्यधी०' (५।१।३४) इति णे (तु) दायः । 'यबक्ङिती'ति किम् ? दीनः उपदीयते । सानुबन्धनिर्देशाद्यङ्लुपि न, उपदेदेति । परोक्षायां **'दीय् दीङः क्ङिति स्वरे'** (४।३।९३) दीङः क्ङित्यशिति स्वरे दीयादेशो भवति । उपदिदीये उपदिदीयाते उपदिदीयिरे । उपदिदीयिध्वे उपदिदीयिढ्वे । कानप्रत्यये उपदिदीयानः । दीङो ङित्करणं यङ्लुब्निवृत्त्यर्थम् उपदेदियतः । क्ङितीति किम् ? उपदानम् । स्वर इति किम् उपदेदीयते । उपदाता उपदास्यते उपादास्यत । क्त्वो यपि उपादाय उपदातुम् उपदातव्यम् । सर्वत्र 'यबक्ङिति' (४।२।७) इत्यात्वम् । 'दीङः सनि वा' (४।२।६) इति वात्वे दिदासते दिदीषते । 'नामिनोऽनिट्' (४।३।३३) इति सनः कित्त्वादत्र न गुणः दीनः २ । अनुस्वारेत्त्वान्नेट् सूयत्यादित्वात्तस्य नः । उणादौ जीण्शीदी० (२६१) इति किति ने दीनः कृपणः खिन्नश्च ।

**'धीङ्च् अनादरे'** । धीयते । अधेस्त दिध्ये धेता धेतुम् । धीनः २ । आधारार्थोऽयमित्यन्ये । शेषो ध्रुवं धीयते । **'मीङ्च् हिंसायाम्'** मीयते अमेस्त मिम्ये । ङित्त्वात् 'मिग्मीगो' (४।२।८) इति नात्वम् मेता मेतुम् । अस्याप्यात्वमित्येके माता मातुम् । सनि 'मिमीमादामित्स्वरस्य' (४।१।२०) इति स्वरस्य इति द्वित्वाभावे च मित्सते । क्तयोस्तस्य नत्वे मीनः २ । जीण्शी० (२६१) इति किति ने मीनो मत्स्यो राशिश्च । मीज्यजि० (४३९) इति सरे मेसरो वर्णविशेषः । चिनीपीम्यशिभ्यो रुः (८०६) मेरुर्देवाद्रिः । 'मींग्श् हिंसायाम्' मीनीते मीनाति । **'रीङ्च् श्रवणे'** । रीयते अरेस्त रिर्ये । रेता रेतुम् । तस्य नत्वे रीणः २ । णौ 'अर्त्तिरी०' (४।२।२१) इति पौ 'पुस्पौ' (४।३।३) इति गुणे रेपयति । विचि रेः मतौ स्त्रियां रेवती । उणादौ रीशीभ्यां फः (३१४) रेफः । अजिस्था० (७६८) इति णौ रेणुः । सुरीभ्यां तस् (९७८) रेतः शुक्रम् । रीवृभ्यां पस् (९८१) रेपः पापम् । 'रींश् गतिरेषणयोः' । रिणाति । **'लींङ्च् श्लेषणे'** लीयते विलीयते निलीयते । क्ये लीयते । **'लीङ्लिनोर्वा'** (४।२।९) लीयतेर्लिनातेश्च यपि खल् अच् अल् वर्जितेऽक्ङिति च प्रत्यये विषयभूते आकारोऽन्तादेशो वा भवति । इत्यद्यतन्यां व्यलास्त व्यलेष्ट । व्यलासातां व्यलेषाताम् । परोक्षायां विलिल्ये विलिल्याते विलिल्यिरे । आशिषि वात्वे विलासीष्ट विलेषीष्ट । श्वस्तन्यां विलाता विलेता । भविष्यन्त्यां विलास्यते विलेष्यते । क्रियातिपत्तौ व्यलास्यत व्यलेष्यत । यङि लेलीयते 'लीङ्लिनो०' इत्यत्र ङिन्निर्देशाद्यङ्लुपि आत्वं न । लेलयीति लेलेति लेलीतः लेलयति । णौ **'लियो नोऽन्तः स्नेहद्रवे'** (४।२।१५) ली इति लींग्श्लीङोः सामान्येन ग्रहणम् । उपलक्षणत्वाल्लीण इत्यस्यापि । लियः स्नेहद्रवेऽर्थे गम्यमाने णौ परे नोन्तोऽवयवो वा भवति । घृतं विलीनयति पक्षे विलाययति णौ वृद्धावायादेशः लिय ईः ली 'उभयोः स्थाने' इति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न्यायात् 'समानानां०' (१।२।१) इति दीर्घेऽपि इयादेशः । एवमीकारप्रश्लेषादीकारान्तस्यैव भवति । कृतात्वस्य तु वक्ष्यमाणलकारपकारौ भवतः । घृतं विलालयति विलापयति । स्नेहद्रव इति किम् ? अयो विला(य)यति । पूर्वान्तकरणाद्व्यलीलिनदित्यत्रोपान्त्यह्रस्वो भवति । अन्यथा स्वाङ्गत्वाभावान्नस्य णे व्यवधायकत्वं स्यात् । 'लो लः' (४।२।१६) लातेर्लीं इत्यस्य च कृतात्वस्य स्नेहद्रवेऽर्थे णौ परे लोऽन्तो वा भवति । घृतं विलालयति विलापयति वा स्नेहद्रव इत्येव जटाभिरालापयते । ङ व्यलीलिनत् व्यलीलयत् व्यलीलवत् व्यलीलपत् । लीयमानः लेष्यमाणः लास्यमानः लिल्यानः । लीनः २ । लीत्वा । 'लीङ्लीनोर्वा' (४।२।९) इति सूत्रे 'यबक्ङिति' (४।२।७) इत्यनुवृत्तेर्यपि विलीय विलाय । विलेतुं विलातुम् । विलेतव्यं विलातव्यम् । 'तन्व्यधी०' (५।१।६४) इति णे विलायः । घञि विलापः । अखलचलीत्यनुवृत्तेश्च । ईषद्विलयः विलयो वर्त्तते । इत्यत्रात्वं न स्यात् । **'लीङ्लिनोऽर्चाभिभवे चाचाकर्त्तर्यपि'** (३।३।९०) लीयतिलिनातिभ्यां णिगन्ताभ्यामर्चाभिभवयोः प्रलम्भे चार्थे वर्त्तमानाभ्यां कर्त्तर्यात्मनेपदं भवति । अनयोश्चान्तस्याकर्त्तर्यप्याकारो भवति । जटाभिरालापयते परैः स्वं पूजयतीत्यर्थः । श्येनो वर्त्तिकामुल्लापयति (मपलायते) अभिभवतीत्यर्थः । मायावी लोकमुल्लापयते वञ्चयतीत्यर्थः । एष्विति किम् ? बालमुल्लापयति उत्क्षिपतीत्यर्थः । 'लीङ्लिनोर्वा' (४।२।९) इत्यत्रात्वम् । अकर्त्तर्यपीति किम् ? जटाभिरालाप्यते (जटिलेन) ङित्श्चानिर्देशो त्र्यादियौजादिकनिवृत्त्यर्थः । 'लीश् श्लेषणे' लिनाति । 'लीण् द्रवीकरणे' 'युजादेर्नवा' (३।४।१८) इति वा णिचि विलालयति विलापयति ॥ **'डीङ्च्** गतौ' डीयते । क्ये डीयते । अडयिष्ट डिड्ये डयिता । 'डीयश्व्यैदितः क्तयोः' (४।४।६१) इति क्तयोर्नेट् । 'सूयत्यात्०' (४।२।७०) इति नत्वे च डीनः २ । अयमपि विहायसां गताविलन्ये । शेषं भ्वादिडीङ्वत् । **'व्रीङ्च्** वरणे' । व्रीयते अव्रेष्ट 'संयोगात्' (२।१।५२) इतीयादेशे विव्रिये । अनुस्वारेत्वान्नेट् तस्य नत्वे व्रीणः २ । 'व्रींश वरणे' व्रीणाति । इति ईदन्ताः सप्त, डीङोऽन्ये षडनिटश्च ⁂ वृत् स्वादिः ⁂ सूयत्यादिर्दिवाद्यन्तर्गणो नवको वर्त्तितः सम्पूर्ण इत्यर्थः ।

**'पीङ्च्** पाने' । चैत्रो जलं पीयते । अपेष्ट पिप्ये पेता पेषीष्ट । पीतः २ । उणादौ पीपूङो ह्रस्वश्च (१२५) इति छे पिच्छम् । गुलुञ्छपिलिपिञ्छै० (१२६) इति निपातनात् पिञ्छम् । पीविशिकुणिपृषिभ्यः कित् (१६३) इति ढे पीढम् । पीङः कित् (८२१) इति लौ पीलुर्गजवृक्षौ । 'माङ्च् माने' इत्यपि कश्चिदधीते । मायते मितम् । क्ये 'ईर्व्यञ्जन०' (४।३।९७) इतीत्वे मीयते । 'नेर्ङ्माद०' (२।३।७९) इति णत्वे प्रणिमायते । शित्त्वादत्र नेत्वम् । 'मांक् माने' माति । 'माङ्क् मानशब्दयोः' मिमीते । **'ईङ्च्** गतौ' ईयते प्रतीयते उदीयते ऐष्ट । 'गुरुनाम्यादेः०' (३।४।४८) इति परोक्षाया आमि अयाञ्चक्रे । व्यपदेशिवद्भावाद्गुरुनाम्यादित्वं आमं नेच्छन्त्यन्ये तन्मते ईये । एता । 'य एच्चातः' (५।१।२८) इति ये उपेयम् । अलि प्रत्ययः । **'प्रीङ्च्** प्रीतौ' प्रीयते अप्रेष्ट पिप्रिये प्रेता प्रीतः । णौ नामिनो वृद्धौ प्राययति । 'नाम्युपान्त्य०' (५।१।५४) इति के प्रियः । 'प्रींग्श् तृप्तिकान्त्योः' प्रीणीते प्रीणाति । 'प्रीगुण् तर्पणे' । 'युजादेः०' (३।४।१८) इति वा णिचि 'धूग्प्रीग०' (४।२।१८) इति नोऽन्ते प्रीणयति पक्षे प्रयते प्रयति । इति ईदन्तास्त्रयोऽनिटः । **'युजिंच्** समाधौ' । समाधिश्चित्तवृत्तेर्निरोधः । युज्यते । विनिसमन्वभिप्राङ्पूर्वोऽपि । वियुज्यते । क्ये युज्यते । 'सिजाशिषावात्मने' (४।३।३५) इति कित्त्वे अयुक्त अयुक्षातां अयुक्षत । युयुजे युयुजिमहे । युक्षीष्ट । योक्ता योक्ष्यते । योयुजीति योयोक्ति । योजयति अयूयुजत् । युज्यमानः



Jain Education International For Personal & Private Use Only www.jainelibrary.org

योक्ष्यमाणः युयुजानः । युक्तः युक्तवान् । 'गत्यर्थाकर्मक०' ( ५।१।११ ) इति कर्त्तरि क्ते 'कुशलायुक्ते०' ( २।२।९७ ) इति वा सप्तम्यां आयुक्तो देवार्चायां देवार्चाया वा । योक्ता योक्तुम् । 'कुप्यभिद्य०' ( ५।१।३९ ) इति क्यपि निपातनात् योज्यतेऽनेनेति युग्यं वाहनम् । घ्यणि योग्यमन्यत् । कर्मणोऽणि न्यङ्क्वादीति गत्वे गोयोगः । घ्यणि 'निप्राद्युजः०' (४।१।११६) इति गत्वाभावे नियोक्तुं शक्यं नियोज्यम् प्रयोज्यम् । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के 'न्यङ्कूद्ग०' ( ४।१।११२ ) इति गत्वे युगम् । क्विपि युज् इत्यत्र युनक्तेर्ग्रहणान्नोन्ताभावे युक् युजौ युजः अश्वयुक् । अस्यापि नोऽन्तः इत्यन्ये । युङ् युञ्जौ युञ्जः । 'युजभुज०' ( ५।२।५० ) इति घिनणि योगशीलो योगी । 'नीदांव्०' ( ५।२।८८ ) इति करणे त्रटि योक्त्रम् । घञि योगः । 'करणाधारे' ( ५।३।१२९ ) अनटि योजनम् । णौ 'णिवेत्त्या०' ( ५।३।१११ ) इत्यने योजना । 'क्रुत्संपदा०' ( ५।३।११४ ) इति क्विपि युजमापन्ना मुनयः । उणादौ युयुजि० ( २७७ ) इति किल्याने युजानः सारथिः । तिजियुजेर्ग च ( ३४५ ) इति किति मे युग्मम् । 'युजूंपी योगे' । युनक्ति । 'युजण् संपर्चने' । 'युजादेः' ( ३।४।१८ ) इति वा णिचि योजयति योजति । '**सृजिंच्** विसर्गे' सृज्यते मालां चैत्रः । उत्सृज्यते । उपविनिव्युत्संपूर्वोऽपि । कर्मकर्त्तर्यैकधाताविति । क्ये, सृज्यते माला स्वयमेव । सिचो लुक्यपि कित्त्वं प्रति स्थानित्वात् 'अः सृजिदृशोऽकिति' ( ४।४।१११ ) इति न अत् । असृष्ट असृक्षाताम् असृक्षत । ससृजे सृक्षीष्ट । स्रष्टा स्रक्ष्यते । अस्रक्ष्यत । सिसृक्षते सरीसृज्यते । सरि ३ सृजीति सरि ३ स्रष्टि । सृष्टः २ । 'पाणिसमवायाभ्यां' (५।१।१८) इति कापवादे घ्यणि पाणिसर्ग्या समवसर्ग्या रज्जुः । 'संवेः सृजः' (५।२।५७) इति घिनणि संसर्गशीलः संसर्गी विसर्गी । घञि निसर्गः । 'क्रुत्संपदा०' ( ५।३।११४ ) इति कर्मणि क्विपि 'ऋत्विग्दिश्०' ( २।१।६९ ) इति निर्देशाद्दतो रत्वे स्रक् । 'श्वादिभ्यः' ( ५।३।९२ ) इति क्तौ सृष्टिः । उणादौ स्यन्दिसृजिभ्यां सिन्धरज्जौ च ( ७१७ ) इति रज्जुः । 'सृजंत् विसर्गे' सृजति । इति जान्तौ द्वावनिटौ । '**वृतूचि** वरणे' वृत्यते ऊदित्त्वात् क्त्वि वेट् वृत्वा वर्त्तित्वा । वेट्त्वात् क्तयोर्नेट् वृत्तः वृत्तवान् । 'वृतूङ् वर्त्तने' इत्यस्यैव वरणे दिवादित्वं विधीयते । तेन वरणे 'द्युद्भ्योऽद्यतन्याम्' ( ३।३।४४ ) 'वृद्भ्यः स्यसनोः' ( ३।३।४५ ) इति वात्मनेपदं नास्ति । अवर्तिष्ट वर्त्तिष्यते अवर्त्तिष्यत । वरणादन्यत्र तु अवृतत् वर्त्स्यति अवर्त्स्यदित्यपि भवति । अन्ये तु वा वृतूचि वरणे इत्यधीयते । दिवादित्वं वा प्रतिपन्नास्तन्मते वरणेऽपि पक्षे शवि वर्त्तते । 'द्युद्भ्य०' इत्यद्यतन्यां अवर्त्तिष्ट । पक्षे शेषात्परस्मैपदे द्युताद्यङि अवृतत् 'वृद्भ्यः स्यसनोः' ( ३।३।४५ ) इति वात्मनेपदे वर्त्तिष्यते । पक्षे 'शेषात्परस्मै' ( ३।३।१०० ) इति परस्मैपदे 'न वृद्भ्यः' ( ४।४।५५ ) इतीड्निषेधे वर्त्स्यति । सनि विवर्त्तिष्यते । पक्षे 'प्राग्वत्' ( ३।३।७४ ) इति परस्मैपदे विवृत्सति । केचित्तु वाशब्दादिरनेकस्वरोऽयं धातुरित्याहुः । वावृत्यते । ततो वावृत्यमाना सा । इति तान्त एकः सेट् । अथ कांश्चिद्धातून् कण्ठतो निर्दिशति ।

पर्दिच् गतौ । पद्यते ४ ।

**पर्दिच्** गतौ इति गतिर्यानं ज्ञानं च । पद्यते । 'नेर्ङ्मादा०' ( २।३।७९ ) इति नेर्णत्वे प्रणिपद्यते । आपद्यत् संनिरुपपूर्वोऽप्येवम् । क्ये पद्यते । अद्यतन्यां सूत्रम्

## ञिच् तेपदस्तलुक् च ॥ ११ ॥ [ सि० ३।४।६६ ]

पद्यतेरद्यतन्यास्ते परे ञिच् स्यात्त लुक् च । अपादि अपत्साताम् अपत्सत ५ । पेदे ६ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पत्सीष्ट ७ । पत्ता ८ । पत्स्यते ९ । अपत्स्यत १० । 'युधिंच् सम्प्रहारे' । युध्यते । सिजाशिषोरत्र किच्वात् अयुद्ध ५ । युयुधे ६ । युत्सीष्ट ७ । योद्धा ८ । योत्स्यते ९ । 'बुधिं मनिंच् ज्ञाने' । बुध्यते । अबुद्ध ४ । अबोधि ५ । बुबुधे ६ । भुत्सीष्ट ७ । बोद्धा ८ । भोत्स्यते ९ । 'जनैचि प्रादुर्भावे' ॥ ११ ॥

'ञिच्०' त लुक् चेति । निमित्तभूतस्य तकारस्य च लुक् । उदपादि भिक्षा, समपादि विद्या । त इति किम् ? समपत्साताम् । पदेरात्मनेपदित्वात्त इति आत्मनेपदप्रथमत्रिकैकवचनं तकारो गृह्यते । न परस्मैपदमध्यमत्रिकबहुवचनम् । ञकारो 'ञ्णिति' ( ४।३।५० ) इति विशेषणार्थः । चकारो 'न कर्मणा ञिच्' ( ३।४।८८ ) इत्यत्र विशेषणार्थः । क्तयोः संपन्नः २ । यङि 'वञ्चस्रंस०' ( ४।१।५० ) इति पूर्वस्य नीः आपनीपद्यते । सनि 'रभलभ०' ( ४।१।२१ ) इति स्वरस्येति द्वित्वाभावे प्रपित्सते । 'लषपतपदः' ( ५।२।४१ ) इत्युकणि उपपादनशीलः उपपादुकः । 'भूषाक्रोध०' ( ५।२।४२ ) इत्यने पदनो धर्मस्य । 'पदरुज०' ( ५।३।१६ ) इति कर्त्तरि घञि पादः । 'समज०' ( ५।३।९९ ) इति क्यपि निपद्या । 'वर्षादयः क्लीबे' ( ५।३।२९ ) इत्यलि पदम् । 'क्रुत्सम्पदा०' (५।३।११४) इति क्विपि संपद् प्रतिपद् । 'विशपत०' ( ५।४।८१ ) इति णमि गेहानुप्रपादमास्ते गेहं गेहमनुप्रपादम् । 'जातेः संपदा च' ( ७।२।१३१ ) इति स्साति सर्वमग्निसात्सम्पद्यते । उणादौ अर्त्तीरि० ( ३३८ ) इति मे पद्मम् । मीवृधि० ( ३८७ ) इति रे पद्रः ग्रामः । छविछिवि० (७०६) इति वौ निपातनात् पदविः । ङ्यां पदवी मार्गः । मुञ्चा० ( ६४६ ) इति तौ पत्तिः । कसिपदि० ( ८३५ ) इति णिदूः पादूः । के ( कपि ) पादुका । 'पदणि गतौ' उपपादयते । 'विदिंच् सत्तायाम्' । सत्ता भावः । विद्यते । क्ये विद्यते । अवित्त अवित्साताम् विविदे । अनुस्वारेत्वान्नेट् वेत्ता वित्तः । 'किंकिलास्त्यर्थयोर्भविष्यन्ती' ( ५।४।१६ ) अस्ति नाम विद्यते नाम तत्र भवान् परदारान् प्रकरिष्यते । नावकल्पयामि न श्रद्दधे । 'शकधृष०' ( ५।४।१० ) इति तुमि भोक्तुम् । 'विदक् ज्ञाने' वेत्ति । विदितः । 'विद्लृंती लाभे' विन्दते विन्दति वित्तः । वित्तं धनं प्रतीतं च । 'विदिंप् विचारणे' विन्ते । 'ऋह्रीघ्रा०' ( ४।२।७६ ) इति क्तयोस्तस्य नत्वे वित्तम् विन्नम् । 'विदिण् चेतनाख्याननिवासेषु वेदयते । 'खिदिंच् दैन्ये' खिद्यते अखित्त चिखिदे खेत्ता खिन्नः । 'खिदंत् परिघाते' खिन्दति । 'खिदिंप् दैन्ये' खिन्ते । इति दान्तास्त्रयोऽनिटश्च । 'युधिंच् सम्प्रहारे' इति सम्प्रहारो हननम् युध्यते अयुद्ध युयुधे युयुधिमहे युत्सीष्ट योद्धा योत्स्यते युयुत्सते योयुत्सते योयुध्यते योयोद्धि योयुधीति । 'चल्याहारा०' ( ३।३।१०८ ) इति फलवत्यपि परस्मैपदे चैत्रः काष्ठं योधयति अयूयुधत् 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के युधः 'सहराज०' ( ५।१।१६७ ) इति क्वनिपि सहयुद्धवान् सहयुध्वा राजयुध्वा 'स्थादिभ्यः०' ( ५।३।८२ ) आयुध्यन्तेऽनेनेति आयुधम् । 'शासूयुधि०' ( ५।३।१४१ ) इति खलपवादे ने दुर्योधनः सुयोधनः । आधारेऽनदि आयोधनम् 'अनो रुधिंच् कामे' काम इच्छा । अनुपूर्वो रुधिः कामे दिवादिः अनुरुध्यते । अन्वरुद्धः अनुरुरुधे अनुरोद्धा अनुरुद्धः २ । 'समनुवि०' ( ५।२।६३ ) इति घिनणि अनुरोधशीलोऽनुरोधी, कामादन्यत्र रुधादित्वात् 'रुधां०' ( ३।४।९२ ) इति श्ने अनुरुणद्धि अनुरुन्धे । 'बुधिं मनिंच् ज्ञाने' बुध्यते 'दीपजन०' ( ३।४।६७ ) इति कर्त्तर्यद्यतन्यात्मनेपदे वा ञिचि तलुकि च अबोधि । पक्षे 'धुड्ह्रस्वा०' ( ४।३।७० ) इति सिचो लुकि अबुद्ध । अत्र वर्णे सकारे परतो विधिरिति वर्णविधित्वेन

१ अत्र वेत्तेर्विदितं वित्तेर्विन्नं वित्तं च विद्यतेर्विन्नम् । वित्तं धने प्रतीते च विन्दतेर्विन्नमन्यत्र ॥ इति च हैमधातुपारायणे । सं०

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सिचः स्थानिवद्भावो नास्तीति सिज्लुकि आदेर्न चतुर्थः, किन्त्वं तु वर्णविधेरभावात् स्थानित्वम् तेनात्र न गुणः । एवमन्यत्रापि अभुत्सातां अभुत्सत । बुबुधे बोद्धा । 'ज्ञानेच्छा०' (५।२।९२) इति सति क्ते राज्ञां बुद्धः । 'चल्याहारार्थ०' (३।३।१०८) इति फलवत्यपि परस्मैपदे बोधयति पद्मं रविः । बोधयति शिष्यं धर्मम् । 'नाम्युपान्त्य०' (५।१।५४) इति के बुधः । 'अजातेः०' (५।१।१५४) इति णिनि प्रतिबोधशीलः प्रतिबोधी । गम्यादित्वात् वर्त्स्यति साधुः । उणादौ जीणृशीदी० (२६१) इति किति ने बुध्नो मूलं रुद्रश्च । युयुजि० (२७७) इति किल्लाने बुधानः सूरिः । किलिपिलि० (६०८) इत्यौ बोधिः तत्त्वज्ञानम् । 'बुधृग् बोधने' बोधते बोधति अबुधत् । 'बुध अवगमने' बोधति । इति धान्तास्त्रयोऽनिटः । **मनिं** मन्यस्वेत्यतिकुत्सने वा कर्मणि चतुर्थी न त्वा तृणाय तृणं वा मन्यते अनुमन्यते अवमन्यते अवमंस्त मेने मंसीष्ट मन्ता मंस्यते मिमंसते मंमन्यते मंमनीति 'यमिरमि०' (४।२।५५) इति नलुकि मंमतः मंमनति मानयति अमीमनत् मत्वा । 'ज्ञानेच्छा०' (५।२।९२) इति सति क्ते राज्ञां मतः । 'मन्याण्णिन्' (५।१।११६) 'क्यङ्मानि०' (३।२।५०) इति पुंस्त्वे दर्शनीयमानी भार्यायाः । 'कर्तुः खश्' (५।१।११७) पटुमात्मानं मन्यते पटुमन्यः । 'परतः स्त्री०' (३।२।४९) इति पुंस्त्वापवादे खितीति ह्रस्वे पट्विमन्या । पक्षे 'असरूपोऽपवादे०' (५।१।१६) इति णिनि पटुमानी । 'समज०' (५।३।९९) इति क्यपि मन्या कृकाटिकासिरा । संज्ञायामन्यत्र स्त्रियां क्तौ मतिः । उणादौ कीचकपेचक० (३३) इत्यके निपातनात् मेनका । मनेर्मत्मातौ च (१००) इत्यङ्गे मतङ्ग ऋषिः हस्ती च । मातङ्ग हस्त्यन्त्यजातिश्च । शाशपिमनिकनिभ्यो दः (२३७) मन्दः । मनेरुदेतौ चास्य वा (६१२) इत्यौ मुनिः, मेनिः संकल्पः, मनिर्धूमवर्त्तिः । भृमृतॄ० (७१६) इत्युः मनुः प्रजापतिः । मनि-जनिभ्यां धतौ च (७२१) इत्युः मधु क्षौद्रं सीधु च । मधुः असुरश्चैत्रश्च मासः । कुसिकमि० (७७३) इति तुनि मन्तुः आगः । युजिशुन्धि० (८०१) इति युः मन्युः । असू (९५२) इत्यसि मनः । रुधर्त्ति० (९९७) इति उसि मनुः प्रजापतिः । मांसमिति तु मातेर्मोवावदि० (५६४) इति से । मठर इत्यपि मठतेः ऋच्छिचटि० (३९७) इत्यरे । 'मनूयी बोधने' मनुते । 'मनिण् स्तम्भने' मानयते । अलि मानः । '**अनिच्** प्राणने' अन्यते आनिष्ट 'अस्यादे०' (४।१।६८) इति पूर्वस्यात्वे आने अनितः । णान्तोऽयमित्येके अण्यते आणिष्ट आणे । 'अन श्वसक् प्राणने' अनिति 'द्वित्वेऽप्यन्तेऽप्य०' (२।३।८१) इति णत्वे प्राणिति । '**जनैचि** प्रादुर्भावे' इति प्रादुर्भाव उत्पत्तिः ॥ ११ ॥ अत्र सूत्रम्

## जाज्ञाजनोऽत्यादौ ॥ १२ ॥ [ सि० ४।२।१०४ ]

**ज्ञाजनोः शिति जा स्यान्नत्वनन्तरेऽत्यादौ । जायते ४ ॥ १२ ॥**

**'जाज्ञा०'** शितीत्येव । क्ये **'ये नवा'** (४।२।६२) क्ङिति ये परे आः वा स्यात् । इति वा आत्वे ज्ञायते जन्यते । अत्यादाविति किम्? जाज्ञाति जजन्ति ॥ १२ ॥ अद्यतन्यां 'दीपजन' (३।४।६७) इति वा ञिचि सूत्रम्

## न जनवधः ॥ १३ ॥ [ सि० ४।३।५४ ]

**अनयोः कृति ञ्णिति औ च वृद्धिर्न स्यात् । अजनि-अजनिष्ट ५ । गमहनजनेत्युपान्त्यलुकि,**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जज्ञे ६ । जनिषीष्ट ७ । 'दीपैचि दीप्तौ' दीप्यते ४ । दीपजनबुधीति ञिज्विकल्पे अदीपि अदीपिष्ट ५ । दिदीपे ६ । दीपिषीष्ट ७ ।**

**॥ इत्यात्मनेपदिनः ॥**

**'न जन०'** स्पष्टम् । अजनीति 'अजनि रजनिजानिर्मानिनि द्रावय द्राग् रुषमुपसि पुनस्ते सास्तु नायं क्षणोऽस्याः । विकचविविधसूनानूनसौगन्ध्यमुग्धे तुदति सुदति यूनः श्लेष्मदोषो वसन्ते ॥ १ ॥ **स्वकृतिः ।** सनि, जिजनिषति । यङि, 'ये नवा' ( ४।२।६२ ) इति वा आत्वे जाजायते जंजन्यते । त्यादौ तु न जादेशः जंजन्ति जंजनीति । 'आः खनिसनिजनः' ( ४।२।६० ) इति नस्य आत्वे जंजातः । 'गमहन०' ( ४।२।४४ ) इत्युलुकि जंजति । जंज्ञन्तीति वाक्ये शतरि 'जाज्ञा०' ( ४।२।१०४ ) इति जादेशे, 'अश्नातः' ( ४।२।९६ ) इत्यालुकि जंजत् अत्यर्थं जायमान इत्यर्थः । 'कगेवनू०' ( ४।२।२५ ) इति ह्रस्वे, 'चल्या०' ( ३।३।१०८ ) इति फलवत्यपि परस्मैपदे जनयति ( धर्मम् ) अजीजनत् । ञिणम्परे वा दीर्घः । अजानि अजनि । जानं जानम्, जनं जनम् । जायमानम् जन्यमानम् जनिष्यमाणम् । जज्ञानः । ऐदित्त्वात् क्तयोर्नेट् । 'आः खनि०' इत्यात्वे जातः २ । पक्षे भावे क्ते जातं चैत्रेण । साप्यादपि 'श्लिषशीङ्०' ( ५।१।९ ) इति क्ते अनुजातः कनीं चैत्रः, अनुजाता कनी चैत्रेण । विजाता वत्सं गौः विजातो वत्सो गवा, विजातं गवा । अकर्मका अपि हि सोपसर्गाः सकर्मका भवन्ति जनित्वा । वात्वे प्रजाय प्रजन्य । जनिता जनितुम् जनितव्यम् । करणे घञि अभिजनः गोत्रम् । 'भव्यगेय०' ( ५।१।७ ) इति निपातनाद्वा कर्त्तरि घ्यणि जन्यश्चैत्रः, पक्षे भावे जन्यं चैत्रेण । अचि जनः । 'वन्याङ् पञ्चमस्य' ( ४।२।६५ ) विजावा । अनोर्जनेर्डः खयनुजः । सप्तम्याः मन्दुरे जातः मन्दुरजः । 'अजातेः पञ्चम्याः ( ५।१।१७० ) सन्तोषजं सुखम् । कचिद् इति डे अनुजः प्रजाः पूर्वजः । 'भ्राज्यलङ्कृ०' ( ५।२।२८ ) इतीष्णौ प्रजनिष्णुः । क्तौ जातिः । अनटि जायतेऽस्यामपत्यमिति जननी । उणादौ दृकॄनृ० ( २७ ) इत्यके जनकः । स्थार्त्ति० ( १०९ ) इति घे जङ्घा । नमितनि० ( १३९ ) इति टे नो लुकि च जटा । जनिपणि० ( १४० ) इति टे दीर्घे च जाण्टः पक्षिविशेषः । ऋशिजनिपुणिकृतिभ्यः कित् ( ३६१ ) इति किति ये वा आत्वे जाया जन्यं रणः । जठरक्रकर० ( ४०३ ) इत्यरे निपातनात् जठरम् । पदिपठि० ( ६०७ ) इः जनिः वधूः कुलाङ्गना भगिनी प्रादुर्भावश्च । कृवापाजि० ( १ ) इत्युणि जानुः । जानीति निर्देशाद्वृद्धिः । मनिजनिभ्यां धतौ च ( ७२१ ) इत्युः जतु । कृसि० ( ७७३ ) इति तुनि जन्तुः । हृषिपुषि० ( ७९७ ) इति णाविष्णुः जनयिष्णुः । यजिशुन्धि० ( ८०१ ) इति युः जन्युः अपत्यं पिता प्रादुर्भावः वायुः प्रजापतिः प्राणी च । जनिहनि० ( ८०९ ) इति रौ तादेशे च जत्रु सन्धिरुरोंऽसमः मेघो घर्मावसानं च । कमिजनिभ्यां बूः ( ८४७ ) जम्बूः वृक्षविशेषः । मन् ( ९११ ) इति मनि जन्म । रुधर्त्ति० ( ९९७ ) इत्युसि जनुः जनुषी । इति नान्तास्त्रयो मनिंवर्जाः सेटश्च । **दीपैचि** इति । सुगमम् । सनि दिदीपिषते । यङ्लुपि देदीप्ति देदीपीति । णौ दीपयति । ङे 'भ्रासभ्लास०' ( ३।४।७३ ) इति वा ह्रस्वे अदीदिपत् अदिदीपत् । दीप्यमानः दीपिष्यमाणः दिदीपानः । ऐदित्त्वात् नेटि दीप्तः २ । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के दीपः । 'स्म्यजस०' ( ५।२।७९ ) इति रे दीप्रः । 'इङित०' ( ५।२।४४ ) इत्यने, 'न णीङ्य०' ( ५।२।४५ ) इति निषिद्धे तृनि दीपिता । क्तौ दीप्तिः । **'तर्पिंच् ऐश्वर्ये वा'** । 'तपं धूप सन्तापे' इत्यस्यैवैश्वर्ये अर्थे दिवादित्वमात्मनेपदित्वं च वा विधीयते । तप्यते । अतप्त तेपे तप्ता तप्तः । पक्षे ऐश्वर्येऽपि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भ्वादित्वात् प्रतपति । प्रतताप । नन्द्याद्यने तपनः 'द्विषंतप०' ( ५।१।१०८ ) इति निपातनात् द्विषन्तपः परन्तपः । एके तु 'तपिंच् ऐश्वर्ये' इति धात्वन्तरं दिवादिमाहुः, अन्ये तु भ्वादेरैश्वर्ये सन्तापे च श्यात्मनेपदे वेच्छन्ति । इति पान्तौ द्वौ आद्यः सेट्, द्वितीयोऽनिट् । 'पूरैचि आप्यायने' आप्यायनं वृद्धिः । पूर्यते । क्येऽपि पूर्यते 'दीपजन०' ( ३।४।६७ ) इति वा ञिचि अपूरि अपूरिष्ट । पुपूरे पूरिषीष्ट पूरिता पूरिष्यते । सनि पुपूरिषते यङि पोपूर्यते यङ्लुपि पोपूरीति पोपूर्ति पोपूर्त्तः पोपुरति । पूरयति अपूपुरत् । 'णौ दान्तशान्त०' ( ४।४।७४ ) इति वा निपातनात् पूर्णं पूरितः पूर्यमाणः । पूरिष्यमाणः पुपूराणः 'इङित०' ( ५।२।४४ ) इत्यने पूरणशीलः पूरणः । 'चर्मोदरात्पूरेः' ( ५।४।५६ ) इति णमि चर्मपूरं ददाति उदरपूरं भुङ्क्ते । वृष्टिमाने उलुक् चास्य वा गोष्पदपूरं वृष्टो मेघः गोष्पदप्रम् । 'ऊर्ध्वात्पूःशुषः' ( ५।४।७० ) ऊर्ध्वपूरं पूर्णः । 'घूरैङ्, जूरैचि जरायाम्' जरा वयोहानिः । घूर्यते अघूरिष्ट । जुघूरे । ऐदित्वात् क्तयोर्नेट् 'रदाद०' ( ४।२।६९ ) इति क्तयोस्तस्य नत्वे घूर्णः २ । जूरै जूर्यते अजूरिष्ट जुजूरे जूर्णः २ । 'धूरैङ् गूरैचि गतौ' धूर्यते गूर्यते अधूरिष्ट अगूरिष्ट दुधूरे जुगूरे धूर्णः २ गूर्णः २ । 'कुत्संपदा०' ( ५।३।११४ ) इति क्विपि धूर्यत इति धूः । मूदिगूरिभ्यां टिद्गजौ चान्तौ ( ४०४ ) इत्यरे गूर्जरः । टित्त्वात् गूर्जरी । 'शूरैचि स्तम्भे' तालव्यादिः शूर्यते अशूरिष्ट शुशूरे । शूर्णः २ । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के शूरः । 'तूरैचि त्वरायाम्' गतित्वरायामित्यन्ये तूर्यते अतूरिष्ट तुतूर । तूर्णः । ध्यणि तूर्यम् । 'नाम्युपान्त्य०' इति के तूरम् । 'इङित०' ( ५।२।४४ ) इत्यने तूरणशीलः, तूरणः । उणादौ कावावी० ( ६३४ ) इति णौ तूर्णिस्त्वरा 'घूरादयो हिंसायां च' षडपि हिंसायां चकारात् यथायथमुक्तेषु जरादिषु तान्येवोदाहरणानि । 'चूरैचि दाहे' चूर्यते अचूरिष्ट चुचूरे । चूर्णः २ । उणादौ कावावी० ( ६३४ ) इति णौ चूर्णिः वृत्तिः । इति रान्ता अष्टौ सेटः । 'क्लिशिच् उपतापे' । क्लिश्यते क्येऽप्येवम् अक्लेशिष्ट चिक्लिशे चिक्लिशिमहे क्लेशिषीष्ट क्लेशिता क्लेशिष्यते । 'वौ व्यञ्ज०' ( ४।३।२५ ) चिक्लिशिषते चिक्लेशिषते । चेक्लिश्यते । चेक्लेष्टि, चेक्लीशीति । क्लेशयति । अचिक्लिशत् । पूङ्क्लिशीति क्तक्त्वासु वेट् क्लिष्टः २ क्लिशितः २ । क्लिष्ट्वा । 'क्षुधक्लिश०' ( ४।३।३१ ) इति किस्त्वे क्लिशित्वा 'निन्दहिंस०' ( ५।२।६८ ) इति णके क्लेशकः । उणादौ क्लिशः के च ( ५३० ) इति शे केशा मूर्द्धजाः । कीनाश इति तु कनेरीश्चातः ( ५३४ ) इत्याशे कनतेः । किशोर इत्यपि कोरचोर० ( ४३४ ) इति निपातनात् ओरे कृशेः । 'क्लिशौश् बाधने' क्लिश्नाति । 'लिशिंच् अल्पत्वे' लिश्यते अद्यतन्यां 'हशिटो नाम्युपान्त्य०' ( ३।४।५५ ) इति सकि अलिक्षत । लिलिशे लेष्टा लिष्टः । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के लिशः । घञि लेशः । 'लिशं भक्तौ' लिशति । 'काशिच् दीप्तौ' काश्यते अकाशिष्ट चकाशे काशितः । णौ ङे 'उपान्त्यस्य०' ( ४।२।३५ ) ह्रस्वे अचीकशत् । ऋदिदयमित्येके तन्मते ह्रस्वाभावे अचकाशत् अचि 'नामिनः काशे' ( ३।२।८७ ) इति दीर्घे नीकाशः प्रतीकाशः । घञि अवकाशः काशः । उणादौ वनिकणि० ( १६२ ) इति ठे काष्ठम् दारु, काष्ठा दिक् । 'काशृङ् दीप्तौ' काशते । 'वाशिच् शब्दे' वाश्यते पशुः । अवाशिष्ट काकः । ववाशे वाशिता । णौ ङे अवीवशत् । ऋदिदयमित्येके तेषां मते ह्रस्वाभावे अववाशत् । 'क्टेट०' ( ५।३।१०६ ) इत्यः वाशा । 'नाम्नि पुंसि च' ( ५।३।१२१ ) इति णके वाशिका । नन्द्याद्यने वाशनः । उणादौ वाश्यसि० ( ४२३ ) इत्युरे वाशुरः शकुनिर्गर्दभश्च । वाशुरा रात्रिः । इति शान्ताश्चत्वारो लिशंचुवर्जाः सेटश्च । ⁂ इत्यात्मनेपदिनः । ⁂

Jain Education International For Personal & Private Use Only www.jainelibrary.org

*'णहींच् बन्धने' । नह्यते ४ । 'नहाहोर्धतौ' अनात्सीत् ५ ननाह ६ नह्यात् ७ नद्धा ८ नत्स्यति ९ । नह्यते ४ अनद्ध, अनत्साताम् ५ नेहे ६ नत्सीष्ट ७ नत्स्यते ९ ॥ १३ ॥

इति महोपाध्यायश्रीकीर्तिविजयगणिशिष्योपाध्यायश्रीविनयविजयगणिविरचितायां
हैमलघुप्रक्रियायां दिवादयः समाप्ताः ।

अथोभयपदिषु **'शकींच् मर्षणे'** । मर्षणं क्षमा । फलवत्कर्त्तर्यात्मनेपदे शक्यते, अन्यत्र परस्मैपदे शक्यति । अशक्त अशाक्षीत् । शेके शशाक । शक्ता । शक्तुम् । शक्तः २ । 'शकः कर्मणि' ( ४।४।७३ ) क्ते वाऽनिट् शकितः शक्तो वा घटश्चैत्रेण कर्त्तुम् । सनि 'रभलभ०' ( ४।१।२१ ) इति स्वरस्येत्वे द्वित्वाभावे च शिक्षते शिक्षति । 'शकितकि०' ( ५।१।२९ ) इति ये शक्यम् । अचि शकः । वनि शका । 'णस्वर०' ( २।४।४ ) इति ङ्यां रत्वे च शकरी । क्तौ शक्तिः । बाहुलकात् घञि शक्यतेऽनेन भोक्तुमिति शाकम् । 'शकधृष०' ( ५।४।९० ) इति तुमि शक्यते भोक्तुम् । उणादौ दिव्यवि० ( १४२ ) इत्यटे शकटम् । कृशकुशाखेरोटः ( १६० ) शकोटः बाहुः । शकेरुनिः ( ६८४ ) शकुनिः । शकेरुन्तः ( २२३ ) शकुन्तः यम्यजि० ( २८८ ) इत्युने शकुनम् । भीवृधि० ( ३८७ ) इति रे शक्रः । जठरक्रकर० ( ४०३ ) इत्यरे ( किदरे ) शकरो हस्तिमल्लः । शामाश्या० ( ४६२ ) इत्यले शङ्कः मनोज्ञदर्शनो मधुरवाक् शक्तश्च । मृदिकन्दि० ( ४६५ ) इत्यले शकलम् । शकेरुन्तिः ( ६६६ ) शकुन्तिः । कृपिशकिभ्यामटिः ( ६३० ) शकटिः । शक ऋत् ( ८९१ ) शकृत् । अनीदयं **मर्षणे** श्यविकरणोऽर्थान्तरे तु श्नुविकरणः स्वादिपतित एव इत्येके । शक्यति मृष्यते इत्यर्थः । पुष्यादित्वादङि अशकत् । मर्षणादन्यत्र श्नौ शक्नोति । लृदित्त्वादङि अशकत् । **अन्ये** तु शकि भाषितो मर्षणे इति पठन्ति व्याचक्षते च मर्षणे शक्नोतेः परस्मैपदं श्ये विकल्प्यते । अङि टौ च शक्यते शक्यति । अशकीत् अशकत् । शक्ता शकिता । अन्यत्र शक्नोति । अशकत् शक्ता । इति कान्तोऽनिट् । **'शुचृगैच् पूतिभावे'** पूतिभावः क्लेदः । शुच्यते शुच्यति 'ऋदिच्छ्वि०' ( ३।४।६५ ) इति वाङि अशुचत् अशोचीत् । अशोचिष्ट शोचिता । ऐदित्त्वात् क्तयोर्नेट् शुक्तः २ । 'शुच शोके' शोचति । इति चान्तः सेट् । **'रञ्जींच् रागे'** । रज्यते रज्यति । अरङ्क्त अराङ्क्त । अराङ्क्षीत् । ररञ्जे ररञ्ज रङ्क्ता । 'नो व्यञ्जनस्यानुदितः' ( ४।१।४५ ) व्यञ्जनान्तस्यानुदितो धातोरुपान्त्यस्य क्ङिति परे लुक् स्यात् इति न लोपे रक्तः २ । **'अकट्घिनोश्च रञ्जेः'** ( ४।२।५० ) रञ्जेरकटि घिनणि शवि चोपान्त्यनस्य लुक् स्यादिति नलुकि रजकः । रागी, रजः रजनम् रजनिरित्यौणादिककित्प्रत्ययान्ताः । 'रञ्जीं रागे' रजते रजति । इति जान्तोऽनिट् । **'शपींच् आक्रोशे'** शप्यते शप्यति । अशप्त अशाप्सीत् शेपे शप्ता शप्तः २ । घञि शापः उणादौ शाशपि० ( २३७ ) इति दे शब्दः । 'शपीं आक्रोशे' शपते शपति । इति पान्तोऽनिट् । **'मृषीच् तितिक्षायाम्'** तितिक्षा क्षमा । मृष्यते मृष्यति 'परेर्मृषश्च' ( ३।३।१०४ ) इति फलवत्कर्त्तर्यपि परस्मैपदे परिमृष्यति अमर्षीत् अमर्षिष्टम् अमर्षिषुः । अमर्षिष्ट अमर्षिषाताम् । ममर्ष ममृषतुः ममृषुः । ममर्षिथ ममृषिम । ममृषे ममृषिमहे । मृष्यात् मर्षिषीष्ट । मर्षिता २ । मरीमृषते । मरी ३ मृषीति । मरि ३ मृष्टि । मर्षयति अमीमृषत् । 'ऋत्तृष०' ( ४।३।२४ ) इति क्त्वो वा कित्त्वे मृषित्वा मर्षित्वा । परिमृष्यः 'मृषः क्षान्तौ' ( ४।३।२८ ) इति क्तयोः मर्षितः २ । क्षान्तेरन्यत्र धातूनामनेकार्थत्वाद्भूषणादिषु कित्त्वे मृषितः २ । नन्द्यादने मर्षणः । 'शासूयुधि०' ( ५।३।१४१ ) इति खलपवादेऽने दुर्मर्षणः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'मृषू सहने च' मर्षति । 'मृषण् क्षान्तावदन्तः मृषयति । 'मृषणि तितिक्षायाम्' युजादेरिति वा णिचि मर्षयते मर्षते । इति षान्तः सेट् । *'णहींच्' इति । नह्यति नह्यते णोपदेशत्वात्-'अदुरुपसर्ग०' ( २।३।११ ) इति णत्वे प्रणह्यते । 'वावाप्योः०' ( ३।२।१५६ ) इति पिवी अपिनह्यते पिनह्यते । अनात्सीत् अनाद्धां अनात्सुः । अनद्ध अनत्साताम् । नेहे ननाह । सनि निनत्सति । यङि नानह्यते । यङ्लुपि नानहीति नानद्धि । नद्धः । अपिनद्धः २ पिनद्धः २ । नद्ध्वा संनह्य । घञि सन्नाहः । 'नीदांव्०' ( ५।२।८८ ) इति त्रटि नद्ध्री । 'क्रुत्संपदा०' ( ५।३।११४ ) इति क्विपि, 'गतिकारकस्य०' ( ३।२।८५ ) इति दीर्घे उपनह्यते उपानत् । उणादौ ऋपृनहि० ( ५५७ ) इत्युषे नहुषो राजा । नहेर्भ च ( ६२१ ) इति णिदिः नाभिः अन्त्यः कुलकरश्च मध्यं देहावयवश्च । नभ इति तु नभ्यतेरसि ( ९५२ ) नख इत्यपि नास्य खमस्तीति बहुव्रीहौ नखादित्वाद्दभावे । इति हान्तोऽनिट् । इत्युभयपदिनः । →✻ इति दिवादिगणः श्यविकरणः ✻← ॥ १४० ॥

पुष्यादयः सप्तषष्टिः सूयत्याद्या नवाष्ट च ।<br>
शमादयः शतं चत्वारिंशं सर्वे दिवादयः ॥ १३ ॥

यां शिष्योद्धुतकीर्त्तिकीर्त्तिविजयश्रीवाचकाहर्म्मणे<br>
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः ।<br>
तस्यां शासितसाधुशब्दसरणौ स्वोपज्ञसत्प्रक्रिया-<br>
वृत्तौ सुष्ठु दिवादयः श्यविकृताः पूर्णीकृता धातवः ॥ १ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अथ स्वादयः ।

'षुंगट् अभिषवे'

अथ स्वादयो वर्णक्रमेण निर्दिश्यन्ते । तत्रापि प्रसिद्ध्यनुरोधेनादौ 'षुंगट् अभिषवे' अभिषवः क्लेदनं सन्धानाख्यं पीडनमन्थने वा । स्नानमिति चान्द्राः । शिति प्रत्यये सूत्रम्

### स्वादेः श्नुः ॥ १ ॥ [ सि० ३।४।७५ ]

स्वादेः कर्तृविहिते शिति श्नुः स्यात् । उश्नोरिति गुणे, सुनोति सुनुतः सुन्वन्ति ॥ १ ॥

'स्वादे:०' स्पष्टम् ॥ १ ॥ वादौ मादौ च प्रत्यये सूत्रम्

### वम्यविति वा ॥ २ ॥ [ सि० ४।२।८७ ]

असंयोगात्परस्य प्रत्ययस्य उतो लुग् वा स्यात् अविति वादौ मादौ च परे । सुन्वः-सुनुवः सुन्मः-सुनुमः १ । सुनुयात् २ । सुनोतु-सुनुतात् । असंयोगादेरिति हेर्लुक्, सुनु-सुनुतात् सुनवानि ३ । असुनोत् । ४ । धूग्सुस्तोरितीटि, असावीत् ५ । सुषाव ६ । सूयात् ७ । सोता ८ । सोष्यति ९ । असोष्यत् १० । सुनुते सुन्वाते सुन्वते । सुन्वहे-सुनुवहे १ । सुन्वीत २ । सुनुताम् सुनवै ३ । असुनुत ४ । असोष्ट ५ । सुषुवे ६ । सोषीष्ट ७ । सोता ८ । सोष्यते ९ । असोष्यत १० ॥ २ ॥

'वम्य०' असंयोगात्परस्य प्रत्ययस्य उत इति । प्रत्ययादिति ओरिति च 'असंयोगादोः' ( ४।२।८६ ) इति सूत्रात्पञ्चम्यन्तमनुवर्त्तमानमपि व्यधिकरणषष्ठ्यन्ततया विपरिणम्यते । असंयोगात्परो य उकारस्तस्य प्रत्ययसम्बन्धिनो लुग्वा स्यादित्यर्थः । वमीति किम् ? सुनुतः । अवितीति किम् ? सुनोमि । ओरित्येव क्रीणीमः । प्रत्ययस्येत्येव । युवः युमः । असंयोगादित्येव तक्ष्णुवः तक्ष्णुमः । असंयोगादित्योर्विशेषणादिहापि न भवति आप्नुवः आप्नुमः । यदि च असंयोगाद्य उकारान्तः प्रत्यय इति प्रत्ययविशेषणं स्यात्तदात्रापि स्यात् ॥ २ ॥ उपसर्गयोगे सूत्रम्

### उपसर्गात्सुग्सुवसोस्तुस्तुभोऽट्यप्यद्वित्वे ॥ ३ ॥ [ सि० २।३।३९ ]

अद्वित्वे सति सुनोति सुवति स्यति स्तौति स्तोभतीनां सकारस्योपसर्गस्थान्नाम्यादेः परस्य सस्य षः स्यात् अट्यपि । अभिषुणोति । शिड्नान्तरेऽपि, निःषुणोति । अट्यपि, अभ्यषुणोत् । 'चिंगट् चयने' । चिनोति ४ । अचैषीत् ५ ॥ ३ ॥

'उप०' अद्वित्वे इति, द्विर्वचनाभावे । सुनोति सुवति स्यति स्तौति स्तोभतीनां सकारस्योपसर्गस्थात् नाम्यन्तस्थात्कवर्गात्परस्य षो भवति अट्यप्यडागमेऽपि सति अड्व्यवधानेऽपीत्यर्थः । सुग् अभिषुणोति परिषुणोति । शिड्नान्तरेऽपीत्यधिकारान्निःषुणोति दुःषुणोति । अभिषुण्वन्तं प्रयुङ्क्ते अभिषावयति । अत्रोपसर्गसम्बन्धे सति णिः ॥ ण्यन्तानां तूपसर्गसम्बन्धे न भवति । अभिसावयति परिसावयति ॥ अट्यपि, अभ्यषुणोत् पर्यषुणोत् । गिन्निर्देशात् सौतिसवत्योर्माभूत् । 'षुंक् प्रसवैश्वर्ययोः' अभिसौति । 'षुं प्रसवैश्वर्ययोः' अभिसवति । सुवः 'षुत् प्रेरणे' अभिषुवति परिषुवति । अट्यपि अभ्यषुवत् पर्यषुवत् । शनिर्देशात्सूतिसूयत्योर्न भवति । 'षूङौक् प्राणिगर्भविमोचने' अभिसूते । 'षूङौच् प्राणिप्रसवे' अभिसूयते । सो 'षोंच् अन्तकर्मणि' अभिष्यति परिष्यति ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

अष्यपि, अभ्यष्यत् पर्यष्यत्। 'ष्टुंक् स्तुतौ' अभिष्टौति परिष्टौति। सु तं दुःष्टुतम्। अष्टयपि, अभ्यष्टौत् प्रत्यष्टौत्। 'स्तुभ ष्टभुङ् स्कभुङ् ष्टुभुङ् स्तम्भे' अभिष्टोभते परिष्टोभते। अष्ट्यपि, अभ्यष्टोभत पर्यष्टोभत। उपसर्गादिति किम्? दधि सुनोति, मधु सुनोति। पूजायां सोः पूजातिक्रमयोश्चातेरुपसर्गत्वाभावादिह न भवति। सुस्तुतं अतिस्तुतम्। येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञेति धात्वन्तरयोगे न भवति। निर्गताः सावकाः अस्मान्निःसावको देशः। अभिसावकीयतीत्यत्र सावकीयतेरभिना योगो न तु सुनोतेरिति (न भवति)। शिड्नान्तरेऽपीत्यधिकारादडाव्यवधाने न प्राप्नोतीत्यट्यपीति ग्रहणम्। अपिशब्दोऽभावार्थः। अन्यथाऽट्येव स्यात्। अद्वित्वे इति किम्? अभिसुसूषति। अत्र 'णिस्तोरेव०' (२।३।३७) इति सूत्रे षणि णिस्तोरेवेति नियमात् द्वितीयसकारस्य मूलधातुरूपस्य षत्वं न, प्रथमस्य तु अद्वित्व इति निषेधान्न, अभिसिषासति। अभ्यसिषासत्। अत्र पूर्वसकारस्य षत्वं न भवति, मूलधातोस्तु यथाप्राप्तं षत्वं भवत्येव। षणि नियमात् अत्र कृतषत्वसनोभावान्नियमाप्राप्त्या द्वितीयस्यावयवस्य मूलधातुरूपस्य 'नाम्यन्तस्था०' (२।३।१५) इत्यादिना षत्वं स्यादेवेत्यर्थः। केचित्तु उपसर्गपूर्वाणां सुनोत्यादीनां पञ्चानामपि सन्नन्तस्तौतिवर्जितानां द्वित्वे सति मूलप्रकृतेरपि षत्वं नेच्छन्ति। अभ्यसूसवत् अभिसुसाव अभिसोसूयते। सो अभ्यसीसयत् अभिसेसीयते अभिसिसासति। स्तू अभितोस्तूयते अभितुस्ताव अभ्यतुस्तवत्। **स्तुभ** तुस्तुभे अभितोस्तुभ्यते अभ्यतुस्तुभत्। इत्यादि। पदादौ प्रतिषेधे प्राप्ते वचनम्। एवं ह्यस्तन्यामभ्यषुणोदिति सिद्धम्। अद्यतन्यां अभ्यषावीत् अभ्यष्टौत्। अद्वित्वे इत्युक्तेः पूर्वस्य षत्वाभावे उत्तरस्य तु षोपदेशत्वा'न्नाम्यन्तस्थे'ति षत्वे परोक्षायां अभिसुषुवे अभिसुषाव। अभिषूयात् अभिषोषीष्ट। अभिषोता। **'सुगः स्यसनि'** (२।३।६२) सुनोतेः सस्य स्ये सनि च षो न भवति। अभिसोष्यति अभ्यसोष्यत। परिसोष्यति पर्यसोष्यत्। सनि सुसूषतेः क्विप् सुसूः अभिसुसूः। अत्र धातोः षणि षत्वं 'णिस्तोरेव०' (२।३।३७) इति नियमेन निषिद्धमपि परे रुत्वे षत्वस्यासत्त्वात् 'सो रुः' (२।१।७२) इति रुत्वे कृते वर्णविधौ स्थानित्वाभावात् षणो भावेन अनिषेधात् पुनः प्राप्तं सत् 'सुगः स्यसनि' इति पुनर्निषिध्यते। सुसूषतीति नोदाह्रियते णिस्तोरेव षणेति नियमेनैव व्यावर्त्तितत्वात्। अभिसुसूषतीत्यपि नोदाह्रियते। अद्वित्वव्यावृत्त्यैव निवर्त्तितत्वात्। यङि सोषूयते अभिसोषूयते। सोषवीति सोषोति। अभिसोषवीति अभिसोषोति। 'आसुयुवपिरपिलपित्रपिडिपिदभिचम्यानमः' (५।१।२०) आङ्पूर्वाभ्यां सौतिनमिभ्यां यौत्यादिभ्यश्च घ्यण् भवति इति यापवादे घ्यणि आसाव्यम्। 'संचाय्यकुण्डपाय्य०' (५।१।२२) इति घ्यणि निपातनात् राज्ञा सोतव्यो राजा सूयतेऽस्मिन्निति राजसूयः क्रतुः। 'सोमात्सुगः' (५।१।१६३) इति भूते क्विपि सोमसुत्। 'सुयजो र्ङ्वनिप्' (५।१।१७२) सुत्वान्। उणादौ सुसितनितुसेर्दीर्घश्च वा (२०३) इति ते सूतः सारथिः। सुतः पुत्रः। वृतुकुसुभ्यो नोन्तश्च (२४०) इति दे सुन्दो दैत्यः। सोरू च (२६३) इति ने सूना वधस्थानम्। स्वसिरसि० (२६९-२७४) इत्यने सवनं (यज्ञादि)। युसुकु० (२९७) इति पे ऊत्वे च सूपः। अर्त्तीरि० (३३८) इति मे सोमः। ऋज्यजि० (३८८) इति किति रे सुरः सुरा। 'सुं प्रसवैश्वर्ययोः'। सवति। षुंक् प्रसवैश्वर्ययोः। सौति। टित्त्वं स्वादित्वज्ञापनार्थं सर्वत्र। इत्युदन्त एकः। **'षिंगट् बन्धने'**। सिनुते सिनोति। षोपदेशत्वात्

१ विशेषविहितत्वेन पूर्वं कृतमपि षत्वं परस्मिन्नडागमेऽसिद्धं स्यादिति। २ न पर्यष्टौत्, परिपूर्वस्य 'स्तुस्वञ्ज' इति विकल्पभणनात्।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'नाम्यन्तस्था०' (२।३।१५) इति षत्वे सिष्ये सिषाय। सेता। **'सेर्ग्रासे कर्मकर्त्तरि'** (४।२।७३) सिनोतेः सिनातेर्वा परस्य क्तयोस्तकारस्य ग्रासे कर्मणि कर्तृत्वेन विवक्षिते नकारो भवति। सिनो ग्रासः स्वयमेव। ग्रास इति किम्? सितं कर्म स्वयमेव। कर्मकर्त्तरीति किम्? सितो ग्रासो मैत्रेण। सितो गलो ग्रासेन। 'प्रसितोत्सुका०' (२।२।४९) इति आधारे वा तृतीयायां केशैः केशेषु वा प्रसितः। परिनिविपूर्वस्य **'सयसितस्य'** (२।३।४७) इति षत्वे परिषितः निषितः विषितः। अचि परिषयः निषयः विषयः। णके सायकः। 'दाद्धेसि०' (५।२।३६) इति रौ सयनशीलः सेरुः। 'नीदांव्०' (५।२।८८) इति त्रटि सेत्रम्। उणादौ सुसि० (२०३) इति किति ते वा दीर्घे च सीता जनकात्मजा सस्यं हलमार्गश्च। सितः शुक्लो वर्णः। सेर्वा (२६२) इति किति ने सिनः कायः वस्त्रं बन्धश्च। कित्त्वाभावे सेना चमूः। चिजि० (३९२) इति रे दीर्घे च सीरं हलम्। ऋज्यजि० (३८८) इति किति रे सिरा। कृसिकम्यमि० (७७३) इति तुनि सेतुः। **'शिंगट्** निशाने' निशानं तनूकरणम्। शिनुते शिनोति। शिश्ये शिशाय। शेता। शितः। **'डुमिंगट्** प्रक्षेपणे'। मिनुते मिनोति। मिम्ये मिमाय। मितः। 'यबक्ङिति' (४।२।७) 'मिग्मीग०' (४।२।८) इत्यात्वे निमाय प्रमाता। खलचलि तु नात्वम्। दुर्मयः मयः प्रमयः। सनि 'मिमी०' (४।१।२०) इति स्वरस्येति द्वित्वाभावे च प्रमित्सते प्रमित्सति। ड्वित्त्वात्रिमक् मानेन निर्वृत्तं मित्रिमम्। उणादौ मिगः खलश्चैच (४९७) मेखला गिरिनितम्बो रशना च। चात् कलप्रत्यये मेकलो नर्मदाप्रभवोऽद्रिः ऋषिश्च। मिवहिचरि० (७२६) इति णिद्धः मायुः पित्तं मानं शब्दश्च। गोमायुः शृगालः। मयुः किन्नरः उष्ट्रः प्रक्षेपः बाहुलकादात्वाभावः। **चिंगट्** इति चिनुते चिनोति। 'नेर्ङ्मादा०' (२।३।७९) इति नेर्णत्वे प्रणिचिनुते ॥ ३ ॥ परोक्षायामुपयोगिसूत्रम्

## चेः किर्वा ॥ ४ ॥ [ सि० ४।१।३६ ]

**सन्परोक्षयोर्द्वित्वे सति पूर्वात्परस्य चेः किर्वा स्यात्। चिकाय-चिचाय, चिक्यतुः-चिच्यतुः ६। चीयात् ७। चेता ८॥ चिनुते ४। अचेष्ट अचेढ्वम् ५। चिक्ये चिच्ये चिच्याते ६। चेषीष्ट चेषीढ्वम् ७। 'धूगट् कम्पने' धूनोति ४। धूगसुस्तोः, अधावीत् ५। दुधाव ६। धूनुते ४। धूगौदित इतीड्विकल्पे अधोष्ट अधविष्ट ५। दुधूवे ६। धोषीष्ट धविषीष्ट ७। धोता, धविता ८। धोष्यते धविष्यते ९। 'स्तृंगट् आच्छादने'। स्तृणोति ४। अस्तार्षीत् ५। संयोगाद्दर्त्तेरिति गुणे, तस्तरतुः तस्तर्थ ६। स्तर्यात् ७। स्तर्ता ८। स्तरिष्यति ९। स्तृणुते ४ ॥ ४ ॥**

**'चेः कि०'** सनि वा कित्त्वे चिकीषति चिचीषति। णौ 'चिस्फुरोर्नवा' (४।२।१२) इति वात्वे, 'अर्त्तिरी०' (४।२।२१) इति पौ चापयति (चाययति)। 'संचाय्यकुण्डपाय्यराजसूयं क्रतौ' (५।१।२२) इति घ्यणि निपातनात् संचाय्यः क्रतुः। 'य एचातः' (५।१।२८) इति ये संचेयमन्यत्। 'धाय्यापाय्यसान्नाय्यनिकाय्यमृड्मानहविर्निवासे' (५।१।२४) इति निपातनात् निकाय्यो निवासः, निचेयोऽन्यः। परिचाय्योपचाय्यानाय्यसमूह्यचित्यमग्नौ' (५।१।२५) इति निपातनात् परिचाय्य (उपचाय्यश्चाग्निः, परिचेयः उपचेयश्चान्यः। अग्निचित्या) (५।१।३७) इति भावे क्यपि (निपातनात्) अग्नेश्चयनं अग्निचित्या। **'अग्नेश्चेः'** (५।१।१६४) कर्मणः पराच्चिनोतेर्भूतेऽर्थे वर्त्तमानात् क्विप् भवति। अग्निं चितवान् अग्निचित्। **कर्मण्यग्न्यर्थे** (५।१।१६५)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्येन इव चीयतेऽस्मै श्येनचित् रथचक्रचित् ( अभ्यर्थक इष्टचय उच्यते )। 'हस्तप्राप्ये चेरस्तेये ( ५।३।७८ ) हस्तेनोपायान्तरनिरपेक्षेण प्राप्तुं शक्यं हस्तप्राप्यम् । तद्विषयाच्चिनोतेर्भावाकर्त्रोर्घञ् भवति । न चेद्धात्वर्थः स्तेये चौर्ये भवति । हस्तप्राप्यशब्देन प्रत्यासत्तिः प्राप्यस्य लक्ष्यते । तेन प्रत्यासत्तिविषये धात्वर्थे विधानम् । पुष्पप्रचायः फलावचायः फलोच्चायः । हस्तप्राप्य इति किम् ? पुष्पप्रचयं करोति तरुशिखरे । अस्तेय इति किम् ? स्तेयेन पुष्पप्रचयं करोति । 'चितिदेहावासोपसमाधाने कश्चादेः' ( ५।३।७९ ) चीयत इति चितिर्यज्ञेऽग्निविशेषस्तदाधारो वा । देहः शरीरम् । आवासो निवासः । उपसमाधानमुपर्युपरि राशीकरणम् । एष्वर्थेषु चिनोतेर्भावाकर्त्रोर्घञ् तत्सन्नियोगे चादेः ककारादेशो भवति । चितौ, आकायमग्निं चिन्वीत । देहे कायः शरीरः । आवासे ऋषिनिकायः । उपसमाधाने गोमयनिकायः । कथं काष्ठनिचयः ? बहुत्वमात्रविवक्षायाम् । एष्विति किम् ? चयः । चः क इत्येव सिद्धे आदिग्रहणमादेरेव यथा स्यात् । तेन चेयङ्लुपि निकेचाय इत्येव भवति । 'सङ्घेऽनूर्ध्वे' ( ५।३।८० ) न विद्यते कुतश्चिदूर्ध्वमुपरि किञ्चिद्यस्मिन् सोऽनूर्ध्वस्तस्मिन् सङ्घे प्राणिसमुदाये चिनोतेर्भावाकर्त्रोर्घञ् तत्सन्नियोगे चादेः को भवति । वैयाकरणनिकायः तार्किकनिकायः । सङ्घ इति किम् ? सारसमुच्चयः प्राण( प्रमाण )समुच्चयः । अनूर्ध्व इति किम् ? सूकरनिचयः । सूकरा हि उपर्युपरि चीयन्ते । पूर्वेणापि व्यावृत्तिबलान्न भवति । माने ( ५।३।८१ ) [ माने गम्यमाने धातोर्भावाकर्त्रोर्घञ् भवति । सा च द्वेधा संख्या परिमाणं च । एको निघासः, द्वौ निघासौ, एकस्तण्डुलावक्षायः, एकस्तण्डुलनिश्चायः, एकः कारः, द्वौ कारौ त्रयः काराः द्वौ सूर्पनिष्पावौ । समित्संग्राहः तण्डुलसंग्राहः मुष्टिरित्यर्थः । मान इति किम् ? निश्चयः । अल एवायमपवादः । त्यादिभिस्तु बाध्यते । एका तिलोच्छृतिः द्वे प्रसृती ] । उणादौ 'चिजि०' ( ३९२ ) इति रे दीर्घे च चीरं, जीर्णं वस्त्रं वल्कलं च । चिमिदिशंसिभ्यः कित् ( ४५४ ) इति किति त्रे चित्रं आश्चर्यं आलेख्यं वर्णश्च । चित्रा नक्षत्रम् इति इदन्ताश्चत्वारोऽनिटः । धूगट् इति । धूनोतीत्यादि स्पष्टम् । णौ 'धूग्प्रीगोर्नः' ( ४।२।१८ ) इति ने धूनयति । 'ऋधूसूखनिचरसहार्तेः' ( ५।२।८७ ) इति इत्रे धूयतेऽनेनेति धवित्रमित्येके । वेट्त्वात् क्तयोर्नेट् अवधूतः २ । 'युवर्ण०' ( ५।३।२८ ) इत्यलि धवः । उणादौ क्षुधून्दि० ( २९ ) इत्यादिना कित्यके धुवका आवपनविशेषः । विलिभिलि० ( ३४० ) इति किति मे धूमः । कृधूतनि० ( ४४० ) इति किति सरे धूसरः । उदन्तोऽनिट् चायमित्यन्ये । धुनुते धुनोति । धुतः २ । 'धूत् विधुवने' धुवति । 'धूग्श् कम्पने' । धुनाति धुनीते । 'धूग्ण् कम्पने' धूनयति । णिजभावे धवति धवते । इत्यूदन्त एकः सेटः । 'स्तृंगट्' इति । स्तृणोतीत्यादि स्पष्टम् ॥ ४ ॥ आत्मनेपदे सिजाशिषोः सूत्रम्

## संयोगादृतः ॥ ५ ॥ [ सि० ४।४।३७ ]

**संयोगात्परो य ऋत्ततः परयोरात्मनेपदे सिजाशिषोरादिरिड्वा स्यात् । अस्तरिष्ट अस्तृत ६ । तस्तरे ६ । स्तरिषीष्ट ७ । 'वृगट् वरणे' वृणोति ४ । अवारीत् ५ । ववार ववरिथ ववृव ६ । व्रियात् ७ । वृतो नवेति वा दीर्घे, वरिता वरीता ८ । वरिष्यति वरीष्यति ९ । वृणुते ४ ॥ ५ ॥**

---

१ प्रतिषु केवलं सूत्रं दृष्टम्, वृत्तिस्तु सिद्धहेमबृहद्वृत्तेर्गृहीता — संपादकः । २ केचित्तु 'चिगण् चयने' इति चुरादौ पठन्ति, तस्य च घटादित्वं चिस्फुरोर्नवेत्यात्वाभावं नेच्छन्ति । तन्मते चययति । आत्वमप्यन्ये चाययति । णिजभावे तु चयते चयति इत्यधिकं धातुपारायणे — संपादकः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'संयो०'** प्रकटार्थम् । क्ये 'क्ययङाशीर्ये' ( ४।३।१० ) इति गुणे आस्तर्यते । यङि तास्तर्यते । विस्तीर्ण इति तु स्तृणातेः । **'कृंगट् हिंसायाम्'** । कृणोति कृणुते । अकार्षीत् अकृत । चकार चक्रे । कर्त्ता । 'डुकृंग् करणे' करोति, करति । **वृंगट्** इति । परोक्षाथवि 'ऋवृव्येद इट्' ( ४।४।८० ) इतीटि ववरिथेति । 'स्कसृवृ०' ( ४।४।८१ ) इत्यत्रास्य वर्जनात् ववृव ववृमेति । आत्मनेपदे वृणुते इत्यादि स्पष्टम् ॥ ५ ॥ अद्यतन्यां सूत्रम् ।

## इट् सिजाशिषोरात्मने ॥ ६ ॥ [ सि० ४।४।३६ ]

**वृभ्यामृदन्तेभ्यश्च परयोरात्मनेपदे सिजाशिषोरादिरिड्वा स्यात् । अवरिष्ट अवरीष्ट अवृत ५ । वव्रे ६ । वृषीष्ट-वरिषीष्ट ७ ।**

### →≻ इत्युभयपदिनः । ≺←

**'इट्०'** आशिषि दीर्घाभावे वरिषीष्टेति । सनि 'इवृध०' ( ४।४।४७ ) इति वेट् विवरीषति वुवूर्षति । 'ऋवर्णश्र्यूर्णुग०' ( ४।४।५७ ) इति किति नेट् वृत्वा । वृतः वृतवान् । 'वर्योपसर्यावद्य-पण्यमुपेयर्तुमतीगर्ह्यविक्रेये' ( ५।१।३२ ) इति निपातनात् वर्यमुपेयम् । स्त्री वर्या । अन्यस्तु 'दृवृग् स्तुजुषेतिशासः' ( ५।१।४० ) इति क्यपि वृत्यः । बाहुलकाद् घ्यणि ण्यन्ताद्वा ये वार्यम् । 'भृवृ-जितृतपदमेश्च नाम्नि' ( ५।१।११२ ) इति खे पतिंवरा कन्या । 'युवर्ण०' ( ५।३।२८ ) इत्यलि वरः । 'नेर्वृः' ( ५।३।७४ ) इति घञि नीवारा व्रीहयः । **'वृगो वस्त्रे'** ( ५।३।५२ ) प्रपूर्वाद्वृणोते-र्वस्त्रविशेषे वाच्ये अल् भवति प्रवरः । पक्षे घञि 'घञ्युपसर्गस्य०' ( ३।२।८६ ) इति दीर्घे प्रावारः । उणादौ विचिपुषि० ( २२ ) इति के वृकः । जृकृतृ० ( १७३ ) इत्यण्डे वरण्डः कुड्यं तृणकाष्ठादिभारश्च । तृकृशृपृ० ( १८७ ) इत्यणे वरणः वृक्षविशेषः । कृगृशृदृ० ( ४४१ ) इति वरटि वर्वरः कामः चन्दनं लुब्धकः । वर्वरी नदी भार्या च । वृग्नक्षि० ( ४५६ ) इत्यत्रे वरत्रा । ण्यन्तात् स्वरेभ्य० ( ६०६ ) इत्यौ वारिः गजग्रहणगर्त्ता । वारि जलम् । अजिस्था० ( ७६८ ) इति णौ वर्णुः ह्रदः वार्द्धारौ ( ९४४ ) इति निपातनात् क्विपि वार्जलम् । वरूथ इति तु जृवृभ्या-मूथः ( २३६ ) इति वृणातेः । वर्ण इत्यपि, इणुर्विश० ( १८२ ) इति णे वृणातेः । इति ऋदन्ता-स्रयो वृग्वर्जा अनिटश्च । एते नवोभयपदिनः ।

'हिंट् गतिवृद्ध्योः' । हिनोति ४ । अदुरुपसर्गेति णत्वे, प्रहिणोति । अहैषीत् ५ । अङे हिहनो हो घ इति, जिघाय ६ । हीयात् ७ । हेता ८ । हेष्यति ९ । 'श्रुंट् श्रवणे' । श्रौती-त्यादिना, शृणोति ४ । अश्रौषीत् ५ । शुश्राव शुश्रोथ ६ । 'शक्लृंट् शक्तौ' । शक्नोति शक्नुतः । भ्रूश्नोरित्युवादेशे, शक्नुवन्ति । संयोगादेर्हेश्च लोपाभावः । शक्नुवः । शक्नुहि ४ । लृदित्वादङ् अशकत् ५ । शशाक ६ । एवं 'आप्लृंट् व्याप्तौ' । आप्नोति ।

### →≻ इति परस्मैपदिनः । ≺←

हिंट् इति । अदुरुपसर्ग० ( २।३।७७ ) इति णत्वे प्रहिणोति । सनि जिघीषति । यङि जेघी-यते । ङे तु घाभावे प्राजीहयत् । हेता । प्रहितः । 'सातिहेति०' ( ५।३।९४ ) इति क्तौ निपातनात् हेतिः । अचि अलि वा हयः । गौरादित्वात् ङ्यां हयी अश्वा उणादौ घुयुहि० ( २४ ) इति किति के दीर्घे च हीकः पक्षी । क्षुहिभ्यां वा ( ३४१ ) इति वा किति मे हिमम् हेमम् । मनि हेम ३३

Jain Education International For Personal & Private Use Only www.jainelibrary.org

( ९११ ) क्रुसिकमि० ( ७७३ ) इति तुनि हेतुः । इति इदन्तोऽनिट् । '**श्रुंट्** श्रवणे' । गताविलन्ये । [ श्रोतिकृश्विति शृःशृणोति ] 'समो गमृच्छि०' ( ३।३।८४ ) इत्यात्मनेपदे संशृणुते । कर्मणि तु सति परस्मैपदे संशृणोति हितम् । 'स्कसृवृ०' ( ४।४।८१ ) इत्यत्र श्रोर्वर्जनादिडभावे शुश्रोथेति । सनि 'श्रुवो नाङ्०' ( ३।३।७१ ) इत्यात्मनेपदे शुश्रूषते धर्मम् । आङ्प्रतेस्तु परस्मैपदे आशुश्रूषति प्रतिशुश्रूषति । 'प्रत्याङः श्रुवार्थिनि' ( २।२।५६ ) इति चतुर्थ्यां मैत्राय प्रतिश्रृणोति आश्रृणोति । श्रोता । श्रुतः २ । णौ सनि 'श्रुस्रुद्रुप्रुप्लुच्योर्वा' ( ४।१।६१ ) इति पूर्वस्योतो वेत्वे शिश्रावयिषति शुश्रावयिषति । ङे 'असमानलोपे०' ( ४।१।६३ ) इति सन्वद्भावे अशिश्रवत् अशुश्रवत् । 'ग्रहादिभ्यः०' ( ५।१।५३ ) इति णिनि श्रावी । गणनिपातनात् ह्रस्वः श्रवीत्येके । 'श्रुसद०' ( ५।२।१ ) इति भूतमात्रे वा परोक्षा शुश्राव । पक्षे अश्रौषीत् अश्रृणोत् । 'तत्र क्वसु०' ( ५।२।२ ) इति क्वसौ शुश्रुवान् । विपूर्वात् 'क्षुश्रोः' ( ५।३।७१ ) इति घञि विश्रावः । 'श्वादिभ्य' ( ५।३।९२ ) इति क्तौ श्रूयतेऽनयेति श्रुतिः । करणेऽनटि श्रवणं कर्णः । उणादौ तृकृशृ० ( १८७ ) इत्यणे श्रवणः अश्वत्थः कर्णश्च । हुयामा० ( ४५१ ) इति त्रे श्रात्रम् । कावावी० ( ६३४ ) इति णौ श्रोणिः । अस् ( ९५२ ) इत्यसि श्रवः । '**टुदुंट्** उपतापे' दुनोति दुदाव दोता । 'दुगोरूच' ( ४।२।७७ ) इति क्तयोस्तस्य नत्वे ऊत्वे च दूनः । 'वा ज्वलादि०' ( ५।१।६२ ) इति वा णे दावः । पक्षे अचि दवः । ट्वित्वादथौ ददथुः । 'दुं गतौ' दवथुः । इत्युदन्तावनिटौ च । '**पृंट्** प्रीतौ' प्रणोति पपार थवि 'ऋतः' ( ४।४।७९ ) इति नेट् पपर्थ । पर्त्ता । सनि पुपूर्षति । 'पृंक् पालनपूरणयोः' पिपर्त्ति । '**स्मृंट्** पालने च' चकारात्प्रीतौ । जीवनेऽपीत्यन्ये, । स्मृणोति सस्मार सस्मर्थ स्मर्त्ता । पोपान्त्योऽयमित्येके । स्पृणोति पस्पार स्पर्त्ता । इति ऋदन्तावनिटौ च । **शक्लृंट्** इति अनिट्त्वात् शक्तश्चैत्रः । '**शकः कर्मणि**' ( ४।४।७३ ) अस्य कर्मणि विहितयोः क्तयोरादिरिड्वा स्यात् । शक्तः शकितो वा धर्मः कर्तुं चैत्रेण । सनि 'रभलभ०' ( ४।१।२१ ) इति स्वरस्य इत्वे द्वित्वाभावे च शिक्षति । 'शको जिज्ञासायाम्' ( ३।३।७३ ) इत्यात्मनेपदे विद्याः शिक्षते । 'शकितकि०' ( ५।१।२९ ) इति ये शक्यः । 'शकधृष०' ( ५।४।९० ) इति ( तुमि ) शक्नोति भोक्तुम् । 'शकींच् मर्षणे' शक्यते शक्यति । '**तिक, तिग, षघट्** हिंसायाम्' । आद्यावास्कन्दनेऽपीत्यन्ये, तिक्नोति तितेक तेकिता । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के तिकः । इति कान्तौ द्वौ, तत्राद्योऽनिट् द्वितीयः सेट् । **तिग,** तिग्नोति तितेग तेगिता 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के तिगः । इति गान्तः सेट् । **षघट्,** 'षः स०' ( २।३।९८ ) इति सत्वे सघ्नोति ससाघ षोपदेशत्वात् 'णिस्तोरेव०' (२।३।३७) इति सत्वे सिषाघयिषति । अषोपदेशोऽयमित्येके । सिसाघयिषति । 'तिघ[व]षघ हिंसायामन्ये पेठुः' । तिघ्नोति [व] षघ्नोति इति घान्तः सेट् । '**राधं साधंट्** संसिद्धौ' संसिद्धिः फलसंपत्तिः । 'यद्वीक्ष्ये०' ( २।२।५८ ) इति चतुर्थ्यां मैत्राय राध्नोति । रराध आरराध गुरुम् । '**अवित्परोक्षासेट्थवोरेः**' ( ४।१।२३ ) राधेर्हिंसायां वर्त्तमानस्य अविति परोक्षायां थवि च सेटि स्वरस्य एकारो भवति, न चायं द्विर्भवति । रेधतुः रेधः । रेधिथ शत्रुम् । अपरेधतुः अपरेधुः अपरेधिथ अपरेधिव अपरेधिम । वध इत्येव आरराधिथ । अनिट्त्वात् राद्धा राद्धः । सनि '**राधेर्वधे**' ( ४।१।२२ ) वधे वर्त्तमानस्य राधेः सकारादौ सनि परे स्वरस्य इकारो भवति, न चास्य द्विः । प्रतिरित्सति अपरित्सति । वध इति किम् ? आरिरात्सति गुरून् । 'ग्रहादिभ्यः०'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

( ५।१।५३ ) इति णिनि अपराधी, उपराधी । घञि राधः । 'घञ्युपसर्गस्य०' ( ३।२।८६ ) इति वा दीर्घे अनूराधः । क्तौ राद्धिः । 'राधंच् वृद्धौ' राध्यति । **साधं,** साध्नोति ससाध । अषोपदेशत्वात् षत्वाभावे सिसात्सति, सिसाधयिषति । णौ नन्द्याद्यने साधनः । उणादौ कृवापाजि० ( १ ) इत्युणि साधुः । **'ऋधूट्** वृद्धौ' ऋध्नोति । ऋत्यारित्युपसर्गावर्णस्यारि प्रार्ध्नोति परार्ध्नोति । 'अनात०' ( ४।१।६९ ) इति पूर्वस्यात्वे आनन्ते च आनर्ध आनृधतुः । आर्धिता । क्त्वि वेट् ऋध्वा अर्धित्वा । सनि 'इवृध०' ( ४।४।४७ ) इति वेट् अर्दिधिषति । पक्षे 'ऋध ईर्त्' ( ४।१।१७ ) ईर्त्सति । वेट्त्वात् क्तयोर्नेट् ऋद्धः ऋद्धवान् । 'ऋधूच् वृद्धौ' ऋध्यति । इति धान्तास्त्रयस्तत्राद्यावनिटावन्त्यः सेट् । **आप्लृंट्** इति आप्नोति । लृदित्त्वादङ् आपत् । आप । आप्ता । 'गत्यर्थ०' ( ५।१।११ ) इति वा कर्त्तरि क्ते प्राप्तो धर्मम् । पक्षे कर्मणि प्राप्तो धर्मोऽनेन । भावे प्राप्तमनेन । सनि **'ज्ञप्यापो ज्ञीपीप् न च द्विः'** ( ४।१।१६ ) सिसनि ज्ञपेरापेश्च सकारादौ सनि परे यथासङ्ख्यं ज्ञीप् ईप् इत्यादेशौ वा भवतः । न चानयोरेकस्वरोंऽशो द्विर्भवति । आदेशे कृते द्वित्वं प्राप्नोतीति निषिध्यते । आदेशसंयोगे च निषेधादन्यत्र द्वित्वं भवत्येव । सिसनीति किम् ? जिज्ञपयिषति । 'इवृध०' इत्यादिना वेट्, अनेन ईपि द्वित्वाभावे च ईप्सति । यपि 'वाप्नोः' ( ४।३।८७ ) इति णेर्वा अय् प्रापय्य प्राप्य । 'व्याप्ये क्तेनः' ( २।२।९९ ) इति कर्मणि सप्तम्यां समाप्तमनेन श्रुतमितीष्टादेरितीति समाप्ती श्रुते । क्तौ प्राप्तिः । आपोप्च ( २३८ ) इति दे अब्दः । आपः क्विप् ह्रस्वश्चेति आपो जलम् । अम्भ इति तु अमेर्भहौ चान्तौ ( ९६२ ) इत्यमेरसि । **'तृपट्** प्रीणने' । क्षुभ्नादित्वाण्णत्वाभावे तृप्नोति अतर्पीत् ततर्प तर्पिता तृपितः । 'तृपौच् प्रीतौ' । तृप्यति । तृप्तः । इति पान्तौ द्वौ । आद्योऽनिट् द्वितीयः सेट् । **'दम्भूट्** दम्भे' दभ्नोति अदम्भीत् ददम्भ । **दम्भः ।** ( ४।१।२८ ) दम्भेरवित्परोक्षायां स्वरस्य एः स्यात्तत्सन्नियोगे नस्य लुक्, न च द्विः । इति स्वरस्यैत्वे, नलुकि द्वित्वाभावे च देभतुः । **'थे वा'** ( ४।१।२९ ) दम्भेः स्वरस्य थे परे एर्वा स्यात् । देभिथ ददम्भिथ । दम्भिता । सनि 'इवृध०' ( ४।४।४७ ) इति वेटि दिदम्भिषति पक्षे **'दम्भो धिप् धीप्'** ( ४।१।१८ ) न च द्विः धिप्सति, धीप्सति । ऊदित्त्वात् क्त्वि वेट् दब्ध्वा दम्भित्वा । क्तयोर्नेट् दब्धः २ । उणादौ ऋज्यजि० इति किति रे दभ्रः । इति भान्तः सेट् । **'कृवुट्** हिंसाकरणयोः' 'औतिकृवु०' ( ४।२।१०८ ) इति कृ आदेशे कृणोति । **'धिवुट्** गतौ' प्रीणनेप्यन्ये 'औति०' इति धि आदेशे धिनोति । उदित्त्वान्नोन्ते अधिन्वीत अधिन्विष्टाम् अधिन्विषु । दिधिन्व दिधिन्वतुः दिधिन्विम । धिन्व्यात् धिन्विषीष्ट । धिन्विता । धिन्विष्यति । सनि दिधिन्विषति । देधिन्व्यते । धिन्वयति । न्यदिधिन्वन् । धिन्वत् । धिन्विता । धिन्वितुम् । धिन्वित्वा । धिन्वितः २ । वान्तौ द्वौ सेटौ । **'ञिधृषाट्** प्रागल्भ्ये' । धृष्णोति अधर्षीत् दधर्ष धर्षिता । 'धृषशसः प्रगल्भे' ( ४।४।३६ ) इति क्तयोर्नेट् । धृष्टः २ । ञीत्त्वात् 'ज्ञानेच्छा०' ( ५।२।९२ ) इति सति क्तः । प्रागल्भ्यार्थादन्यत्र इदि 'न डीङ्शीङ्पूङ्धृषिक्ष्विदिस्विदिमिदः' ( ४।३।२७ ) इति कित्त्वाभावाद्गुणे धर्षितः २ । आदित्त्वात् 'वा भावारम्भे' ( ४।४।७२ ) इति वा नेट् । धृष्टमनेन धर्षितमनेन प्रधृष्टः प्रधर्षितः । क्विपि 'ऋत्विगृदिश्०' ( २।१।६१ ) इति गत्वे निर्देशादेव द्वित्वे दधृग् । 'त्रसिगृधि०' ( ५।२।३२ ) इति क्तौ धर्षणशीलो धृष्णुः । 'तृषिधृषिस्वपो नजिङ्' ( ५।२।८० ) इति नजिङि धृष्णक् । 'शासूयुधि०' ( ५।३।१४१ ) इति खलपवादे ने दुर्द्धर्षणः । 'शक-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

धृष०' ( ५।४।९० ) इति तुमि धृष्णोति गन्तुम् । 'धृष प्रसहने' । 'युजादे'रिति वा णिचि धर्षयति धर्षति इति षान्तः सेट् । इति ॥ इति परस्मैपदिनोऽष्टादश ॥

'**अशौटि व्याप्तौ**' । **अश्नुते । अश्नुवीत ४ । आशिष्ट आष्ट ५ । ऋदाद्यशाविति नुमि, आनशे ६ । अशिषीष्ट अक्षीष्ट ७ । अशिता अष्टा ८ । अशिष्यति अक्ष्यति ९ । आशिष्यत् आक्ष्यत् १० ।**

**॥ इत्यात्मनेपदिनः ॥**

इति महोपाध्यायश्रीकीर्त्तिविजयगणिशिष्योपाध्यायश्रीविनयविजयगणिविरचितायां हैमलघुप्रक्रियायां स्वादयो धातवः पूर्णाः ।

'**ष्टिघिट्** आस्कन्दने' । 'षः स०' ( २।३।९८ ) इति षस्य सत्वे निमित्ताभाव इति टस्य तत्वे । 'इङित०' ( ३।३।२२ ) इत्यात्मनेपदे स्तिघ्नुते । षोपदेशत्वात् 'नाम्यन्तस्था०' ( २।३।१५ ) इति षत्वे तिष्टिघे । स्तेघिता । **अशौटि** इति । सनि ऋस्मिपूङ्ञ्जशौ० ( ४।४।४८ ) इतीटि, 'स्वरादेः०' ( ४।१।४ ) इति द्वितीयांशस्य द्वित्वे अशिशिषते । 'अट्यर्त्ति०' ( ३।४।१० ) इति यङि अशाश्यते । वेट्त्वात् क्तयोर्नेट् अष्टः अष्टवान् । णौ आशयति । ङे आशिशत् । अष्टा अशिता । अष्ट्वा अशित्वा । अष्टुम् अशितुम् । कृवापा० ( १ ) इत्युणि अश्नुते तेजसा सर्वं केदारं वा इति आशुः सूर्यो व्रीहिश्च अशनं वा । आशु क्षिप्रम् । अश्नुते इति वा आशुः शीघ्रगामी शीघ्रकारी च । श्वशुरकुकुन्दुर० ( ४२६ ) इति निपातनात् आशुपूर्वात् शुपूर्वाद्वाऽश्नोतेर्वा उर प्रत्यय आकारलोपश्च श्वशुरः जम्पत्योः पिता । स्त्रियां 'नारीसखी०' ( २।४।७६ ) इति निपातनादूङि श्वश्रूः । मीज्यजि-मामद्यशौचसिकिभ्यः सरः ( ४३९ ) इति सरप्रत्यये अक्षरं वर्णः मोक्षपदं आकाशं च । अश्नोतेरीच्चादेः ( ४४२ ) इति वरट्प्रत्यये ईश्वरो विभुः, ईश्वरी स्त्री । इष्यशिमसिभ्यस्तकक् ( ७७ ) इति तककि अष्टकास्तिस्रोऽष्टम्यः पितृदैवत्यं कर्म । षप्यशौभ्यां तन् ( ९०३ ) 'षप समवाये' । सप्त अष्टौ । उभे सक्ष्ये । लटिखटि० ( ५०५ ) इति वे अश्वः भावाब्दि० ( ५६४ ) इति से अक्षाः प्रासकाः । अक्षाणि इन्द्रियाणि रथचक्राणि च । अशोरश्चादिः ( ६२२ ) इति णिति इप्रत्यये धातो रादित्वे च राशिः समूहः, नक्षत्रपादनवरूपश्च मेषादिः । सदिवृति० ( ६८० ) इत्यनौ अशनिः इन्द्रायुधम् । अशो रश्चादिः ( ६८८ ) इति मौ रश्मिः । तङ्किवङ्कि० ( ६९२ ) इति रौ अश्रिः कोटिः । अशेराञ्नोन्तश्च ( ७१९ ) उप्रत्ययेऽकारात्परो नोन्तः अंशुः रश्मिः सूर्यश्च । प्रांशुर्दीर्घश्च । अशेर्यश्चादिः ( ९५८ ) इत्यसि यशः । अशेर्डित् खः प्रत्ययो भवति । अश्नुते इति खं आकाशं इन्द्रियं च । नास्ति खमस्मिन्नखः । शोभनानि खान्यस्मिन् सुखम् । दुःष्ठानि खान्यस्मिन् दुःखम् । 'अशश् भोजने' अश्नाति । इत्यात्मनेपदिनौ द्वौ । 'उभयपदिनो नवाऽ-ष्टादश च परस्मैपदस्पृशो ज्ञेयाः । द्वावात्मनेपदस्थावेकोनत्रिंशदित्येवम्' । ॥ इति स्वादयः ॥

यां शिष्योद्धुतकीर्तिकीर्तिविजयश्रीवाचकाहर्म्मणे
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः ।
तस्यां शासितसाधुशब्दसरणौ स्वोपज्ञसत्प्रक्रिया-
वृत्तौ धातव इत्यमी निगदिताः स्पष्टं टितः स्वादयः ॥ १ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अथ तुदादयः ।

तुदींत् व्यथने ।

अथ तुदादयस्तितो वर्णक्रमेण प्रदर्श्यन्ते । तत्र प्रसिद्ध्यनुरोधेनादौ '**तुदींत्** व्यथने' । तित्त्वं तुदादित्वज्ञापनार्थं सर्वत्र ज्ञेयम् । ( ईदित्त्वात् 'ईगितः' ( ३।३।९५ ) इति फलवत्कर्त्तर्यात्मनेपदे ) ।

### तुदादेः शः ॥ १ ॥ [ सि० ३।४।८१ ]

**एभ्यः कर्तृविहिते शिति शः स्यात् । तुदति १ । तुदेत् २ । तुदतु ३ । अतुदत् ४ । अतौत्सीत् ५ । तुतोद ६ । तुद्यात् ७ । तोत्ता तोत्तारौ ८ । तोत्स्यति ९ । अतोत्स्यत् १० । तुदते १ । तुदेत २ । तुदताम् । अतुदत ४ । अतुत्त अतुत्साताम् । तुतुदे ६ । तुत्सीष्ट ७ । 'भ्रस्जींत् पाके' ॥ १ ॥**

'**तुदा०**' अनिट्त्वात् तोत्ता । तुन्नः २ । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के तुदः । 'बहु-विध्वरुस्तिलात्तुदः' ( ५।१।१२४ ) इति खशि बहुंतुदः विधुंतुदः तिलंतुदः अरुंतुदः । शतरि 'अवर्णादश्न०' ( २।१।११५ ) इति वान्तादेशे तुदती तुदन्ती स्त्री कुले वा । 'अजाते०' ( ५।१।१५४ ) इति णिनि शृङ्खलतोदी । 'नीदांव्०' ( ५।२।८८ ) इति करणे त्रटि तोत्त्रम् । करणे घञि प्रतोदः । उणादौ तुदिमदि० ( १२४ ) इति छकि तुच्छः स्तोकः । नाम्युपान्त्य० ( ६०९ ) इति किदिः, तूदीवर्मत्या० ( ६।३।२१८ ) इति सूत्रनिर्देशाद्दीर्घे 'इतोऽक्त्यर्थात्' ( २।४।३२ ) इति ङ्यां तूदी नाम ग्रामः । तुदादिविषि० ( ५ ) इति किदः तुदः । नीनूरमि० ( २२७ ) इति किति थे तुत्थं चक्षुष्यो धातुविशेषः । तुदादिवृजि० ( २७३ ) इति कित्यने तुदनः । इति दान्त एकोऽनिट् । **भ्रस्जींत्** इति । 'शिदवित्' ( ४।३।२० ) इति सूत्रप्रामाण्यात् ङिति शप्रत्यये ॥ १ ॥ सूत्रम्

### ग्रहव्रश्चभ्रस्जप्रच्छः ॥ २ ॥ [ सि० ४।१।८४ ]

**एषां सस्वरान्तस्था क्ङिति य्वृत्स्यात् । सस्य शषौ इति सस्य शत्वे, तृतीयस्तृतीयचतुर्थे इति शस्य जत्वे, भृज्जति ४ ॥ २ ॥**

'**ग्रह०**' एषामित्यादि । स्पष्टम् । एषामुदाहरणानि त्वेवम् । जगृहतुः जगृहुः गृह्यते गृहीतः जिघृक्षति गृह्णाति जरीगृह्यते जरीगृहीति । वृश्च्यते वृक्णः वृश्चति वरीवृश्च्यते । भृज्ज्यते भृष्टः भृज्जति बरीभृज्ज्यते । पृच्छ्यते पिपृच्छिषति पृष्टः पृच्छति परीपृच्छ्यते पृच्छा । क्ङितीत्येव । ग्रहीता वव्रश्चतुः बभ्रज्जतुः पप्रच्छतुः प्रश्नः । व्यचिवशिव्रश्चिभ्रस्जिपृच्छीनां पञ्चानां यङ्लुबन्तानां नेच्छन्त्यन्ये । तस् वा व्यक्तः नाम्नि तिक् वाव्रक्ति, वावष्टः वावष्टिः, वाव्रष्टः वाव्रष्टिः, वाभ्रष्टः वाभ्रष्टिः, पाप्रष्टः, पाप्रष्टिः, अन्ये तु 'प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहणम्' इति न्यायात् यङ्लुप्यपि मन्यन्ते तेन वेविक्तः वेविक्तिः, वरिवृष्टः वरिवृष्टिः, बरिभृष्टः बरिभृष्टिः, परिपृष्टः परिपृष्टिः । अपरे तु विचतिवृश्चतिभृज्जतिपृच्छतीनां नित्यं य्वृत्, ज्यादीनां त्वनित्यमिति मन्यन्ते । तेनेदं सिद्धम् 'तस्यास्त्रयस्त्रीनपि विव्यधुः शरैरिति । अन्ये तु विविधुरित्येवाहुः ॥ २ ॥ अशिति सूत्रम्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## भृज्जो भर्ज् ॥ ३ ॥ [ सि० ४।४।६ ]

भृज्जतेरशिति भर्ज् वा स्यात् । अभार्क्षीत् । संयोगस्यादाविति स्कलुकि, अभ्राक्षीत् ५ । बभर्ज-बभ्रज्ज बभर्जतुः-बभ्रज्जतुः । संयोगाद्वित्परोक्षायाः किखाभावः बभर्जिथ बभर्ष्ठ, बभ्रज्जिथ बभ्रष्ठ ६ । भृज्यात् ७ । भर्ष्टा-भ्रष्टा ८ । भर्क्ष्यति भ्रक्ष्यति ९ ॥ भृज्जते ४ । अभर्ष्ट-अभ्रष्ट ५ । बभर्जे बभ्रज्जे ६ । भर्क्षीष्ट-भ्रक्षीष्ट ७ । 'क्षिपींत् प्रेरणे' । क्षिपति ४ । अक्षैप्सीत् ५ । क्षेप्ता ८ । क्षेप्स्यति ९ ॥ क्षिपते ४ । अक्षिप्त ५ । प्रँत्यभ्यतेः क्षिपः ( ३।३।१०२ ) परस्मैपदमेव । 'दिशींत् अतिसर्जने' दाने इत्यर्थः । दिशति ४ । अदिक्षत् ५ । देष्टा ८ ॥ दिशते ४ । अदिक्षत ५ । दिक्षीष्ट ७ । 'कृषींत् विलेखने' । कृषति कृषते ४ । स्पृशमृशेति वा सिजि, स्पृशादिसृपो वेत्यादागमे, अक्राक्षीत्-अकार्क्षीत्-अकृक्षत् ५ । क्रष्टा-कर्ष्टा ८ ॥ अकृष्ट ५ । कृक्षीष्ट ७ । क्रक्ष्यते-कर्क्ष्यते ९ । 'मुच्ऌंती मोक्षणे' १ 'षिचींत् क्षरणे' २ 'विद्ऌंती लाभे' ३ 'लुप्ऌंती छेदने' ४ 'लिपींत् उपदेहे' ५ 'कृतैत् छेदने' ६ 'खिदंत् परिघाते' ७ 'पिशत् अवयवे' ८ इत्यष्टौ मुचाद्यो ज्ञेयाः ॥ ३ ॥

'भृज्जो०' स्पष्टम् । भृज्यादिति । ननु परत्वाद् भर्जादेशे कथमत्र य्वृद्भवतीत्यत्रोच्यते परत्वाद्भर्जादेशेऽपि स्थानिवद्भावेन पूर्वेण स्वरेण सह य्वृद्भवति । तथा च पक्षद्वयेऽपि भृज्यात् इति तुल्यमेव रूपम् । एवं भृज्यते । भृष्टः भृष्टवान् । बरीभृज्यते इत्यादिष्वपि क्ङिति रूपद्वयस्यापि य्वृद्भवनेन तुल्यरूपत्वमेव । 'भृज्जो भर्ज्' इत्यत्र लुप्ततिवृनिर्देशो यङ्लुप्निवृत्त्यर्थः । बरी रि ऱ् भृज्जीति । अत्र द्वित्वे स(ति)पूर्वस्य भर्जादेशो मा भूत् । किं चात्र 'लुप्यय्वृल्लेनत्' (७।४।११२) इति परिभाषायां अय्वृल्लेनदित्युक्तेर्यङ्लुप्यपि य्वृत् सिद्धम् । सनि 'इवृध०' ( ४।४।४७ ) इति वेटि भर्जादेशविकल्पे च बिभर्क्षति-बिभ्रक्षति-बिभर्जिषति-बिभ्रज्जिषति इति चातूरूप्यम् । 'ऋवर्णो०' ( ५।१।१७ ) इति घ्यणि, 'क्तेऽनिट०' ( ४।१।१११ ) इति गत्वे, निमित्ताभावे दन्त्य सः । तस्य 'तृतीय०' ( १।३।४९ ) इति दः भ्रद्ग्यं भर्ग्यं । भर्गः भ्रद्गः । भर्जनं भ्रज्जनम् । भ्रष्टुं भर्ष्टुम् । कर्मणो णि नाम्युत्तरेत्युदादेशे उद्भ्रज्यः । भीमादित्वादपादानक्तौ भृज्यतेऽस्यां भृष्टिः । उणादौ सूधूभूभ्रस्जिभ्यो वा ( २७४ ) एभ्यो नः स च किद्वा भवति । भृज्जनं अन्तरिक्षं अम्बरीषः पाकश्च । भ्रज्जनः पावकः । जिभृस्तृ० ( ४४७ ) इति त्रटि वृद्धौ च भ्राष्ट्रम् । स्पशिभ्रस्जेः स्लुक् च ( ७३१ ) आभ्यां किदुः प्रत्ययः सकारस्य लुग् भवति । भृगुः प्रपातः ब्रह्मणश्च सुतः । 'ग्रहव्रश्च०' ( ४।१।८४ ) इति य्वृत् । 'न्यङ्कूद्गमेघादयः' ( ४।१।११२ ) इति गत्वम् । इति जान्त एकोऽनिट् । **क्षिपींत्** इति । उपसर्गयोगे विशेषसूत्रम् 'प्रँत्य०' ( ३।३।१०२ ) प्रतिक्षिपति । अभिक्षिपति । अतिक्षिपति । ईदित्त्वात्फलवति प्राप्तस्यात्मनेपदस्यापवादोऽयम् । क्षेप्ता । क्षिप्तः । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के क्षिपः । 'त्रसिगृधि०' ( ५।२।३२ ) इति क्नौ क्षेपशीलः क्षिप्नुः । 'क्षिपरटः' ( ५।२।६६ ) इति घिनणि परिक्षेप्यम्भसाम् । 'वादेश्च णकः' ( ५।२।६७ ) इति णके परिक्षेपकः । उणादौ धूधून्दि० ( २९ ) इति कित्यके क्षिपकः वायुः । क्षिपकादित्वादित्वाभावे क्षिपका आयुधम् । ऋज्यजि० ( ३८८ ) इति किति रे क्षिप्रं शीघ्रम् । क्षिपेः कित् ( ६४२ ) इत्यणौ क्षिपणिः आयुधम् बडिशबन्धकः चर्मकृता पाषाणसर्जनी च । क्षिपेरणुक् ( ७७० ) इति कित्यणौ क्षिपणुः समीरणः । 'क्षिपंच् प्रेरणे' क्षिप्यति । इति पान्त एकोऽनिट् । **दिशींत्** इति देष्टा दिष्टं दैवम् । 'कुत्सम्पदा०' ( ५।३।११४ ) इति क्विपि 'ऋत्विग्दिश्०' ( २।१।६९ ) इति षापवादे गे दिश्यते सेति दिक् । भिदाद्यङि दिशा । 'श्वादिभ्यः'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

( ५।३।९२ ) इति क्तौ दिष्टिः वितस्तिः । 'नाम्ना ग्रहादिशः' ( ५।४।८३ ) इति णमि नामादेशं दत्ते । 'तृतीयोक्तं वा' ( ३।१।५० ) इति वा समासः । पक्षे नामान्यादेशम् । उणादौ वृमिथिदिशिभ्यस्थ यत्याश्चान्ताः ( ६०१ ) एभ्यः किद्ाः प्रत्ययो यथासङ्ख्यं थकार यकार स्त्यकाराश्चैषामन्ता भवन्ति इत्याप्रत्यये, दिष्ट्या आनन्दोक्तौ निपातः । इति शान्तोऽनिट् । **कृषींत्** विलेखने । कृषति कृषते इत्यादि व्यक्तम् । उणादौ कृषेर्गुणवृद्धी च ( ३१ ) वेत्यके कर्षकः । कृषकः परशुः । कार्षकः कृषकः कुटुम्बी । पापुलि० ( ४१ ) इति कितीके कृषिकः पामरस्तृणजातिश्च । धृवीह्वा० ( १८३ ) इति णे कृष्णो वर्णो विष्णुर्मृगश्च । नाम्युपान्त्य० ( ६०९ ) इति किदिः कृषिः कर्षणं कर्षणभूमिश्च । कृषिचमि० ( ८२९ ) इत्यूः कर्षूः कुल्या अङ्गारपरिखा गर्त्तश्च । 'कृषं विलेखने' कर्षति ।

अथ मुचादयोऽष्टौ । तत्राद्याः पञ्चानिट उभयपदिनश्च त्रयः परस्मैपदिनस्तत्राद्यान्तौ सेटौ मध्यमोऽनिट् इति । **मुचॢंतीति** मोक्षणे ॥ ३ ॥ अत्र सूत्रम्

## मुचादितृफदृफगुफशुभोभः शे ॥ ४ ॥ [ सि० ४।४।९९ ]

एषां शे परे स्वरान्नोऽन्तः स्यात् । मुञ्चति १ । अमुञ्चत् ४ । लृदित्त्वादङ्, अमुचत् ५ । मोक्ता ८ । मुञ्चते ४ । अमुक्त ५ ॥ सिञ्चति । ह्वालिप्सिच इत्यङि, असिचत् ५ । सिञ्चते ४ । वात्मने, असिचत्-असिक्त ५ ॥ विन्दति ४ । अविदत् ५ । वेत्ता ८ । अवित्त ५ । वेत्स्यते ९ ॥ लुम्पति ४ । अलुपत् ५ । लुम्पते ४ । अलुप्त ५ । लिम्पति ४ । अलिपत् ५ । अलिपत अलिप्त ५ ।

॥ इत्युभयपदिनः ॥

'कृतैत् छेदने' । मुचादित्वान्नोऽन्ते, कृन्तति ४ । अकर्तीत् ५ । चकर्त ६ । कृत्यात् ७ । कर्तिता ८ । कर्तिष्यति ९ । अकर्तिष्यत् १० । 'मृंत् प्राणत्यागे' ॥ ४ ॥

'**मुचादि०**' एषामिति । मुचादीनां तृफादीनां च । तत्र मुचादयोऽनुपदं वक्ष्यन्ते । तृफादयश्चैवम् । '**तृफ तृंफत्** तृप्तौ' । '**दृफ दृंफत्** उत्क्लेशे' । '**गुफ गुंफत्** ग्रन्थने' । '**शुभ शुम्भत्** शोभार्थे' । '**उभ उम्भत्** पूरणे' । तृफादयः सनकारान्ताश्च तुदादिषु पठ्यन्ते, तत्र तुम्फादीनां शे नस्य 'नो व्यञ्जनस्यानुदितः' ( ४।२।४५ ) इति लुग्भवतीति तृफादीनां नविधानम् । विधानसामर्थ्याच्चास्य लोपो न भवतीति । तृफति तृम्फतीत्यादि द्वैरूप्यं सिद्धम् । एषामिति किम् ? तुदति । श इति किम् ? मोक्ता मोक्तुम् । अद्यतन्यामात्मनेपदे 'धुड्ह्रस्वात्०' ( ४।३।७० ) इति सिचो लुपि अमुक्तेति । सनि अव्याप्यस्य मुचेर्मोग्वेति मोकादेशे द्वित्वाभावे च एकधाताविति कथस्य 'भूषार्थ०' ( ३।४।९३ ) इति प्रतिषेधे मोक्षते वत्सः स्वयमेव पक्षे मुमुक्षते । घञि निर्मोकः । उणादौ मावावदि० ( ५६४ ) इति से मोक्षः । नाम्युपान्त्य० ( ६०९ ) इति किदौ मुचिः । न मुञ्चति न न मुञ्चति वा नमुचिः । नखादित्वात्साधुः । सूत्रमिति तु सुमूखन्युषिभ्यः कित् (४४९) इति त्रटि 'मूङ् बन्धने' इत्यस्य रूपम् । **षिचींत्** इति । सिञ्चति । षोपदेशत्वात् 'नाम्यन्तस्था०' ( २।३।१५ ) इति षत्वे सिषेचे । सिषेच । सोपसर्गस्य च 'स्थासेनि०' ( २।३।४० ) इत्यादिना सस्य षत्वे अभिषिञ्चति । अड्व्यवायेऽपि अभ्यषिञ्चत् । द्वित्वेऽपि, अभिषिषिक्षति । सोपसर्गात् सिञ्चतेर्णौ अभ्यषीषिचत् । ण्यन्तस्योपसर्गयोगे पूर्वस्य न षत्वम् अभ्यसीषिचत् । 'णिस्तोरेव०' ( २।३।३७ ) इति नियमात् षत्वाभावे सिसिक्षति । यङि 'सिचो यङि' ( २।३।६० ) इति निषेधे सेसिच्यते असेसि-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

च्यत । अनिट्त्वात् सेक्ता सिक्तः । 'नीदांव्०' (५।२।८८) इति करणे त्रटि सेक्त्रम् । सिंह इति हिंसेः सिम् च (५८८) इति हे हिंसेः । इति चान्तौ द्वावनिटौ । **विदॢंती** इति । विन्दतीति । अद्यतन्यां लदित्वादङि अविदत् । आत्मनेपदे 'धुड्ह्रस्वात्०' (४।३।७०) इति सिचो लुपि अवित्त । वेत्ता । वित्तः वित्तवान् । वित्तं धनप्रतीते इति निपातनान्नत्वाभावे वित्तं धनं प्रतीतं च । क्वसौ 'गमहनविद्लविशदृशो वा' (४।४।८३) इति वेटि विविदिवान् विविद्वान् । 'लिम्पविन्दः' (५।१।६०) इति शे विन्दः । अणपवादे 'निगवादे०' (५।१।६१) इति शे गोविन्दः । अरविन्दः । 'यावतो विन्दजीवः' (५।४।५५) इति णमि यावद्वेदं भुङ्क्ते । इति दान्तोऽनिट् । **लृप्लृंती** इति । लुम्पतीत्यादि । लोप्ता । लुप्तः । घञि लोपः उणादौ हुयामा० (४५१) इति त्रे लोप्त्रमपहृतं द्रव्यम् । **'लिपींत्** उपदेहे' इति उपदेहो वृद्धिः । 'ह्वालिपूसिचः' (३।४।६२) इत्यङि अलिपत् । 'वात्मने' (३।४।६३) अलिपत अलिप्त । 'लिम्पविन्दः' (५।१।६०) इति शे लिम्पः । 'निगवादे०' (५।१।६१) इति शे निलिम्पा नाम देवाः । णके स्त्रियामपि विलेपिका अ(नु?)लेपिका । →ॐ इत्युभयपदिनः ।←   अथ परस्मैपदिनः । **कृतैत्** इति । कृन्ततीत्यादि स्पष्टम् । सादावशिति 'कृतचृत०' (४।४।५०) इति वेट्त्वात् क्तयोर्नेट् कृत्तः कृत्तवान् । ऐदित्वात् यङ्लुबन्तादनेकस्वरादपि क्तयोर्नेट् चरीकृत्तः चरीकृत्तवान् । क्विपि कृत् । नन्द्याद्यने कर्तनः । उणादौ कृतिपुतिलतिमिदिभ्यः कित् (७६) इति किति तिके कृत्तिका नक्षत्रम् । कृत्यशौभ्यां स्नक् (२९४) कृत्स्नं सर्वम् । कृतेः कृकृच्छ्रौ च (३९५) इति रे कूरः कृच्छ्रम् । नदिवल्लयर्त्तिकृतेररिः (६९८) कर्तरिः । 'कृतैप् वेष्टने' कृणत्ति । तान्त एक सेट् । 'खिदंत् परिघाते' परिताप इत्यन्ये । खिन्दति अखेदीत् चिखेद खेत्ता खिन्नः । भिदाद्यङि खिदा । 'खिदिंच् दैन्ये' खिद्यते । 'खिदिंप् दैन्ये' खिन्ते इति दान्त एकोऽनिट् । **पिशत्** अवयवे पिंशति अपेशीत् पिपेश पेशिता उणादौ पिशेराचक् (११६) पिशाचः । प्रज्ञाद्यणि पैशाचः । कुशिपिशि० (२१२) इति किति ते पिशितं मांसम् । पिशिमिथि० (२९०) इति कित्युने पिशुनः । मृदिकन्दि (४६५) इत्यले पेशलः । किलिपिलि० (६०८) इत्यौ पेशिर्मांसलेशः । इति शान्त एकः सेट् । →ॐ वृत् मुचादिः ।←

अथ प्रकृतवर्णक्रमेणैव धातवो निर्दिश्यन्ते । **'रिं पिंत्** गतौ' । रियति अरैषीत् रिराय 'योऽनेकस्वरस्य' (२।१।५६) इति यत्वस्य बहिरङ्गत्वेनाऽन्तरङ्गे 'भ्वादेर्नामिन०' (२।१।६३) इति दीर्घे कर्तव्येऽसिद्धत्वाद्दीर्घाभावे रियतुः । रेता । रितः २ । पियति अपैषीत् पिपाय पेता पितः । धुयुहिपितुशो दीर्घश्च (२४) पीकः उपस्थः । पिक इति तु पापुलि० (४१) इति किति के पिबतेः । **'धिंत्** धारणे' धियति अधैषीत् दिधाय दिध्यतुः । धेता । धितः २ । **'क्षिंत्** निवासगत्योः' क्षियति अक्षैषीत् चिक्षाय 'योऽनेकस्वरस्य' (२।१।५६) इति यापवादे 'संयोगात्' (२।१।५२) इतीयादेशे चिक्षियतुः चिक्षियुः । क्षेता । क्षितः २ । क्षितो ग्रामः । क्षितमनेन । कर्मभावाभ्यामन्यत्र **'क्षेः क्षी चाध्यार्थे'** (४।२।७४) ध्यार्थौ भावकर्मणी ततोऽन्यस्मिन्नर्थे विहितयोः क्तयोस्तकारस्य क्षि इत्येतस्मात्परस्य नकारो भवति । तत्सन्नियोगे चास्य क्षी इत्ययमादेशो भवति । कर्त्तरि क्षीणः क्षीणवान् मैत्रः । अधिकरणे इदमेषां क्षीणम् । अध्यार्थ इति किम् ? 'क्षितमस्य' भावे क्तः । 'क्षिंपश् हिंसायाम्' इत्यस्य सानुबन्धत्वान्न ग्रहणम् । **अन्यस्तु** तस्यापि ग्रहणमिच्छति । **'वाक्रोशदैन्ये'** (४।२।७५) आक्रोशे दैन्ये च गम्यमाने प्रागुक्तं वा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्यात् । आक्रोशे क्षीणायुः क्षितायुर्जाल्मः । दैन्ये क्षीणकः क्षितकः तपस्वी । अध्यार्थ इत्येव । क्षितं जाल्मस्य क्षितं तपस्विनः । कश्चित्तु भावेऽपि विकल्पमिच्छति । क्षीणमनेन क्षितमनेन । क्षेर्भाव-कर्मणोर्भाषायां [ लक्षणशास्त्रस्य न भवति किन्तु च्छन्दस्येवेत्यर्थः ] क्त एव नास्तीति कश्चित् । 'क्षेः क्षीः' ( ४।३।८९ ) यपि प्रक्षीय । निरनुबन्धनिर्देशात् 'क्षिणूग् हिंसाया'मित्यस्य न भवति । प्रक्षित्य । अस्यापि ग्रहणमित्यन्ये । **'क्षय्यजय्यौ शक्तौ'** ( ४।३।९० ) क्षेतुं शक्यः क्षय्यो व्याधिः । शक्यं क्षेतुं क्षय्यं बहुना । शक्ताविति किम् ? अर्हे क्षेयम् । 'जीणृदृक्षिपरिभूवमाभ्यमाव्यथः' ( ५।२।७० ) एभ्यः शीलादौ सत्यर्थे इन् स्यात् । क्षीति क्षिक्षितोर्ग्रहणम् । क्षयशीलः क्षयी । स्त्रियां क्तौ क्षितिः । भिदाद्यङि क्षिया । आधारे 'पुंनाम्नि०' ( ५।३।१३० ) इति घे क्षयो गृहम् । वसतिः शरणं क्षय इति **हेमकोष**वचनात् । उणादौ अर्त्तीरि० ( ३३८ ) इति मे क्षेमम् । हुयामा० ( ४५१ ) इति त्रे क्षेत्रम् । 'क्षि क्षये' क्षयति । 'क्षिग्श् हिंसायाम्' क्षिणाति । इति इदन्ताश्चत्वारोऽनिटः । **'षूत् प्रेरणे'** सुवति । 'उपसर्गात्सुग०' ( २।३।३९ ) इति षत्वे अभिषुवति । अड्व्यवायेऽपि अभ्यषुवत् । सुषाव सुषुवतुः । सविता । किति 'उवर्णात्' ( ४।४।५८ ) इति नेट् सूतः २ । सूत्वा । सनि 'ग्रहगुहश्च०' ( ४।४।५९ ) इति नेट् 'णिस्तोरेव०' ( २।३।३७ ) इति नियमात्षत्वाभावे सुसूषति । 'प्रात्सूजोरिन्' ( ५।२।७१ ) प्रसवशीलः प्रसवी । 'षूङौक् प्राणिगर्भविमोचने' सूते । 'षूङौच् प्राणिप्रसवे' सूयते । इत्यूदन्त एकोऽनिट् । **मृंत्** इति ॥ ४ ॥ अत्र सूत्रम्

## म्रियतेरद्यतन्याशिषि च ॥ ५ ॥ [ सि० ३।३।४२ ]

**अद्यतन्याशिषि च म्रियतेरात्मनेपदं स्यात् । अद्यतन्यामाशिषि शिद्विषये च नान्यत्र । ऋतो रिः इति रित्वे इयादेशे म्रियते ४ । अमृत ५ । ममार ६ । मृषीष्ट मृषीयास्ताम् ७ । मर्ता मर्तारौ ८ । मरिष्यति ९ । अमरिष्यत् १० । कॄत् विक्षेपे । गॄत् निगरणे । ॠतां क्ङितीर् गिरति ॥ ५ ॥**

**'म्रिय०'** 'ऋवर्णात्' ( ४।३।३६ ) इति सिजाशिषोरात्मने कित्त्वाद्गुणाभावे अमृत मृषीष्ट । शिदादेरन्यत्र परस्मैपदे ममार मम्रतुः । 'हनृतः०' ( ४।४।४९ ) इतीटि मरिष्यति । मर्ता । मृतः । सनि मुमूर्षति । अचि अमरः । उणादौ लूम्रो वा ( २०२ ) इति वा किति ते मृतो गतप्राणः । मर्तः ऋषिः प्राणी पुरुषश्च । स्वार्थे ये मर्त्यः । मृशीपसिवस्यनिभ्यस्तादिः ( ३६० ) इति तादौ ये वा मर्त्यो मनुष्यः । मुरत्युक् ( ८०५ ) मारयति मृत्युः कालो मरणं च । इति ऋकारान्तोऽनिट् । **कॄत्** विक्षेपे । किरति इति । 'अपस्किरः' ( ३।३।३० ) इत्यात्मनेपदे 'अपाच्चतुष्पात् पक्षिशुनिहृष्टान्नाश्रयार्थे' ( ४।४।९५ ) इति स्सटि अपस्किरते वृषभो हृष्टः । हर्षाद्विलिख्य तटं विक्षिपतीत्यर्थः । अपस्किरते कुक्कुटो भक्ष्यार्थी । अपस्किरते श्वा आश्रयार्थी । भक्ष्यार्थी कुक्कुटोऽवकरमाश्रयार्थी श्वा च भस्म विक्षिपतीत्यर्थः । कर्मकर्त्तर्येकधाताविति ञिक्यात्मनेषु प्राप्तेषु 'भूषार्थ०' ( ३।४।९३ ) इति ञिक्ययोः प्रतिषेधे अवकिरते पांसुः स्वयमेव । 'इट्सिजाशिषोरात्मने' ( ४।४।३६ ) वृतः परयोरात्मनेपदविषययोः सिजाशिषोरादिरिड्वा स्यात् । 'वृतो नवा०' ( ४।४।३५ ) इति वेटो दीर्घेऽनिट् सिच् 'ऋवर्णात्' ( ४।३।३६ ) इति कित्त्वे अवाकीर्ष्ट पांसुः स्वयमेव । पक्षे अवाकरिष्ट । करिता करीता । किति 'ऋवर्णश्र्यू०' ( ४।४।५७ ) इति नेट् कीर्णः २ । कीर्त्वा । 'ऋस्मिपूङ्०' ( ४।४।४८ ) इति सनीटि चिकरिषति चिकरीषति । अस्येटो न दीर्घ इत्येके । 'वौ विष्किरो वा' ( ४।४।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

९६ ) इति वा स्सटि, 'असोङ्०' ( २।३।४८ ) इति षत्वे विष्किरो विकिरश्च पक्षी । 'युवर्ण०' ( ५।३।२८ ) इत्यलि 'वर्चस्का०' ( ३।२।४८ ) इति निपातनादवस्करः वर्चस्कम् । अवकरोऽन्यः । **'किरो लवने'** ( ४।४।९३ ) उपात्परस्य किरतेस्सडादिर्भवति, लवने लवनविषयश्चेत्तदर्थो भवति । उपस्कीर्य मद्रका लुनन्ति । 'उपात् किरो लवने' ( ५।४।७२ ) इति णम् । लवन इति किम् ? उपकिरति पुष्पम् । **'प्रतेश्च वधे'** ( ४।४।९४ ) प्रतेरुपाच्च परस्य किरतेर्वधे हिंसायां विषयेऽभिधेये वा स्सडादिर्भवति । प्रतिस्कीर्णं हते वृषल ते भूयात् । हिंसानुबन्धी विक्षेपस्ते भूयादित्यर्थः । अभिधेये यथा 'सटाच्छटाभिन्नघनेन बिभ्रता नृसिंह सैंहीमतनुं तनुं त्वया । स मुग्धकान्तास्तनसङ्गभङ्गुरैरुरोविदारं प्रतिचस्करे नखैः ॥ १ ॥ इति **माघे** प्रथमसर्गवृत्तम् ॥ ४७ ॥ उरो विदार्य हत इत्यर्थः । 'द्वितीयया' ( ५।४।७८ ) इति णम् । वध इति किम् ? प्रतिकीर्णं उपकीर्णं बीजम् । विक्षिप्तमित्यर्थः । उन्निपूर्वस्य 'किरो धान्ये' ( ५।३।७३ ) इति घञि उत्कारो निकारो धान्यस्य । अलि उत्करो निकरोऽन्यस्य । उणादौ ऋतष्टित् ( ९ ) इति अप्रत्ययः । सरूपे द्वे रूपे कर्करः क्षुद्राश्मा । कर्करी गलन्तिका । दृकृनॄ० ( २७ ) इत्यके करको जलभाजनम् । करकोऽब्दोपले इति वचनाद्वर्षोपले त्रिलिङ्गः । करकः करकं करका । किरोङ्को रो लश्च वा ( ६२ ) करङ्कः समुद्रः । कलङ्को लाञ्छनम् । कूर्चचूर्चादयः ( ११३ ) इति चटि निपातनात् कूर्चं श्मश्रु आसनं तन्तुवायोपकरणं यतिपवित्रकं च । कूर्चमिव कूर्चकः कूर्चिकेति च भवति । किरो लश्च वा ( १४७ ) इति किलाटे किलाटः किराटः । तृकृकृपि० ( १५१ ) इति कीटे किरीटम् । विहडकहोड० ( १७२ ) इत्यडे निपातनात् केरडस्वैराज्ये राजा । क्रोडं अङ्कः । जकृतॄ० ( १७३ ) इत्यण्डे करण्डः । इणुर्विश० ( १८२ ) इति णे कर्णः । कृगॄपॄ० ( १८८ ) इति कित्यणि किरणः । ऋकृवॄ० ( १९६ ) इत्युणि करुणा दया । करुणः करुणाविषयः । करुणं दैन्यम् । कृशृस्तृभ्य ऊर् चान्तस्य ( २९८ ) इति पे कूर्पं भ्रूमध्यम् । कृशॄगॄ० ( ३२९ ) इत्यभे करभस्त्रिवर्ष उष्ट्रः । कृशॄपॄ० ( ४१८ ) इतीरे करीरो वनस्पतिविशेषो वंशाद्यंकुरः कुम्भश्च । गौरादित्वात् ङ्यां करीरी । कृतॄभ्यामीषः ( ५५३ ) करीषः । नाम्युपान्त्य० ( ६०९ ) इति किदिः किरिः सूकरः । कृम ऋत उर् च ( ७३४ ) इत्युः कुरुः । 'कॄग्श् हिंसायाम्' कृणाति कृणीते । **गॄत्** इति । निगरणं भोजनम् । गिरतीत्यादि प्रक्रिया व्यक्ता ॥ ५ ॥ अत्रोपयोगि सूत्रम्

## नवा स्वरे ॥ ६ ॥ [ सि० २।३।१०२ ]

**गिरते रस्य लो वा स्यात् स्वरे परे । गिलति ४ । अगारीत् ५ । जगार ६ । गीर्यात् ७ । गरिता गरीता ८ । 'अवात्' ( ३।३।६७ ) गिर आत्मनेपदम् । अवगिरते । सम्पूर्वात्प्रतिज्ञार्थाद्वा स्याद् । वादं संगिरते संगिरति । 'ओव्रश्चौत् छेदने' । वृश्चति ४ । वेट्त्वात् अव्रश्चीत् । सकारापदिष्टं शकारस्यापि अव्राक्षीत् ५ । वव्रश्च वव्रश्चिथ वव्रष्ठ ६ । वृश्च्यात् ७ । व्रष्टा व्रश्चिता 'प्रच्छंत् ज्ञीप्सायाम्' । ग्रहव्रश्चेति य्वृत् पृच्छति ४ ॥ ६ ॥**

**'नवा०'** स्पष्टम् । 'अवात्' ( ३।३।६७ ) इति सूत्रं स्पष्टम् । सम्पूर्वादित्यत्र सूत्रमेवम् **'समो गिरः'** ( ३।३।६६ ) इति । **ननु** समं विना प्रतिज्ञायां गिरतेर्वृत्तिर्न दृश्यते ततः किं समग्रहणेन ? । **सत्यम्** । केवलोऽप्यन्योपसर्गपूर्वोऽपि प्रतिज्ञायां वर्त्तते । 'अवादि'ति सूत्रवृत्तौ पृथग्योगात्प्रतिज्ञायामिति निवृत्तमिति भणनादन्यथा पृथग्योगादित्युक्तेरानर्थक्यं स्यादिति । कर्मकर्त्तरि किरादित्वाद् 'भूषार्थ०' ( ३।४।९३ ) इति क्यञ्ञ्योः प्रतिषेधे निगिरते ग्रासः स्वयमेव । 'इड्सिजा०' ( ४।४।३६ )

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति वेटि 'वृतो नवा०' (४।४।३५) इति वेटो दीर्घे न्यगीर्ष्ट न्यगरिष्ट न्यगरीष्ट ग्रासः स्वयमेव । णौ फलवत्कर्त्तरि 'ईगितः' (३।३।९५) इत्यात्मनेपदाभावे, 'चल्याहारार्थ०' (३।३।१०८) इति परस्मैपदे निगारयति ग्रासं चैत्रं मैत्रः । 'गृलुप०' (३।४।१२) इति गर्ह्यार्थाद्यङि 'ग्रो यङि' (२।३।१०१) इति लत्वे निजेगिल्यते । यङ्लुपि निजागलीति । 'ऋस्मिपूङ्०' (४।४।४८) इति सनीटि जिगगरिषति जिगरीषति । अस्येटो दीर्घं नेच्छन्त्येके । 'ऋवर्णश्र्यू०' (४।४।५७) इति किति नेट् । 'ऋल्वादे०' (४।२।६८) इति तो नत्वे गीर्णः गीर्णवान् । क्तौ गीर्णिः । गीर्त्वा । 'नाम्युपान्त्य०' (५।१।५४) इति के गिरः लत्वे गिलः । अणपवादे लिहाद्यलि अजगरः ओदनगरः । कापवादेऽच्यलि वा गरः लत्वे गलः । 'न्युदो ग्रः' (५।३।७२) इति घञि निगारः उद्गारः । बाहुलकाद्घञि णे वा अगारम् । उणादौ ऋतष्टित् इति सरूपे च द्वे रूपे गर्गरो राजर्षिः । गर्गरी महाकुम्भः । गम्यमि० (९२) इति गे गर्गः ऋषिः । दम्यमि० इति ते गर्तः । गृदृरमि० (३२७) इति भे गर्भः । कृशृगॄ० (३२९) इत्यभे गरभः गर्भ एव । लटिखटि० (५०५) इति वे गर्वः । ग्रहाह्ला० (५१४) इति वे निपातनात् ग्रीवा । नाम्युपान्त्य० (६०९) इति किदिः गिरिः । ग्रो मादिर्वा (८९०) अस्मादुत् प्रत्ययः स च मकारादिर्वा । गर्मुत् गरुडः आदित्यः मधुमक्षिका तृणं सुवर्णं च । गरुत् बर्हिः अजगरः मरकतमणिः तेजसां वर्त्तिश्च । इति ऋदन्तौ द्वौ सेटौ च । **'लिखत्** अक्षरविन्यासे' । लिखति अलेखीत् लिलेख लेखिता लिखितः 'नाम्युपान्त्य०' (५।१।५४) इति कापवादे लिहाद्यचि लेखः । भिदाद्यङि निपातनात् लेखा, करणाधारे 'व्यञ्जनाद् घञ्' (५।३।१३२) इति घञि लेखः । उणादौ ध्रुधून्दि० (२९) इति कित्यके लिखकः चित्रकः । कुटादिरयमित्येके लिखनीयम् । इति खान्त एकः सेट् । **'जर्च झर्चत्** परिभाषणे' तर्जनेऽपीत्येके, । जर्चति अजर्चीत् जजर्च जर्चिता जर्चितः । झर्चति अझर्चीत् जझर्च झर्चिता चादिरयमित्यन्ये । णके चर्चकः । **'त्वचत्** संवरणे' संवरणमाच्छादनम् त्वचति अत्वचीत् तत्वाच त्वचिता; अचि त्वचः । क्विपि सिरामांसादि त्वचतीति त्वक् । **'ऋचत्** स्तुतौ' ऋचति आर्चीत् 'अनात०' (४।१।६९) इति पूर्वस्यात्वे ने आनर्च आनृचतुः । अर्चिता । 'ऋदुपान्त्यादकृपिचृदृचः' (५।२।४१) इत्यत्र ऋचो वर्जनात् 'ऋवर्ण०' (५।१।१७) इति ध्यणि के सेट्त्वात् कत्वाभावे अर्च्यः । बाहुलकात् कर्त्तरि करणे वा 'क्रुत्संपदा०' (५।३।११४) इति क्विपि ऋक् । आर्चिरिति तु रुच्यर्चि० (९८९) इत्यर्चेः । **औव्रश्चौत्** इति दन्त्योपान्त्योऽयम् । 'सस्य शषौ' (१।३।६१) इति शे 'ग्रहव्रश्च०' (४।१।८४) इति य्वृति वृश्चति । वव्रश्चेति संयोगान्तत्वादवित्परोक्षायाः कित्त्वाभावान्न य्वृत् वव्रश्चतुः वव्रश्चुः । औदित्वाद्वेट् । संयोगादिति शस्य लुकि 'यजसृज०' (२।१।८७) चस्य षत्वे व्रष्टा । पक्षे व्रश्चिता । वेट्त्वात् क्तयोर्नेट् 'सूयत्या०' (४।२।७०) इति तस्य नत्वे, 'क्तादेशोऽषि (२।१।६१) इति नस्यासत्वेन शस्य लुकि चस्य कत्वे च वृक्णः वृक्णवान् । अषीतिवचनात् षत्वे कर्त्तव्ये नत्वं सिद्धमेवेति धुडभावात् 'यजसृज०' (२।१।८७) न षत्वम् । क्लि 'जृव्रश्च०' (४।४।४१) इतीति 'क्त्वा' (४।३।२९) इति कित्त्वाभावान्न य्वृत् व्रश्चित्वा । क्विपि मूलवृट् । उणादौ पापुलि० (४१) इति कितीके वृश्चिकः । ऋजिरिषि० (५६७) इति से वृक्षः । इति चान्ताः सेटः पञ्च । **'ऋछत्** इन्द्रियप्रलयमूर्तिभावयोः' इन्द्रियाणां प्रलये मोहे मूर्तिभावे च । गतावप्यन्ये । 'स्वरेभ्यः' (१।३।३०) इति छस्य द्वित्वे ऋच्छति । 'समो गमृच्छि०' (३।३।८४) इत्यात्मनेपदे समृच्छते 'गुरुनाम्यादेर०' (३।४।४८) इत्यत्र ऋच्छो वर्जनादामभावे 'अनात०' (४।१।६९) इति पूर्वस्यात्वे ने च आनर्च्छ

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आनर्च्छतुः आनर्च्छुः । ऋच्छिता । ऋच्छितः । ऋचिच्छिषति । **'विछत् गतौ'** । 'गुपौ धूपविच्छि-पणिपनेरायः' ( ३।४।१। ) इति स्वार्थिके आयप्रत्यये 'स्वरेभ्यः' इति छस्य द्वित्वे विच्छायति । 'अशवि ते वा' (३।४।४) इति वा आये विच्छिता विच्छायिता । ननु विच्छेस्तौदादिकत्वेन शविषयत्वेन शवविषयाभावात् विच्छायतीत्यादौ शिद्विविषयेऽपि आयविकल्पः प्राप्नोति । नैवम् । शवोऽपवादत्वेन शप्रत्ययस्यापि शव्शब्देनाभिधानाददोषः, एवं चाशवीत्यनेनाशितीत्यर्थः सिद्धो भवति । अशितीत्येव वा पठनीयम् । शतरि 'अवर्णादश्न०' ( २।१।११५ ) इति वान्तादेशे विच्छन्ती विच्छती स्त्री कुले वा । **द्रमिलास्तु** शे नित्यमायं तुदादिपाठबलाच्चायव्यवायेपि पक्षे नलोपमिच्छन्ति विच्छायन्ती विच्छायती । यथा जुगुप्सते इति सना व्यवधानेप्यात्मनेपदम् । विच्छो नञ् विश्नः । 'विछण् भाषार्थः' विच्छयति । **'उछैत् विवासे'** । विवासोऽतिक्रमः । 'स्वरेभ्यः' इति छस्य द्वित्वे उच्छति । 'गुरुनाम्यादेर०' ( ३।४।४८ ) इति परोक्षाया आमि उच्छाञ्चकार । उच्छिता । ऐदित्त्वात्क्तयोर्नेट् 'अनुनासिके च०' ( ४।१।१०८ ) इति छस्य शत्वे, 'यजसृज०' इति शस्य षत्वे व्युष्टः २। व्युष्टा नाडिः, व्युष्टं प्रातः । सनि उचिच्छिषति॥ छस्य द्वित्वे पूर्वस्य चत्वं नेच्छन्त्येके । तन्मते उछिच्छिषतीत्यपि ॥ एवमन्यत्रापि शतरि वान्तादेशे उच्छति उच्छन्ती स्त्री कुले वा । **'मिछत् उत्क्लेशे'** । उत्क्लेशो बाधनम् । छस्य द्वित्वे मिच्छति । मिमिच्छ । मिच्छिता । मिच्छितः । मिच्छती मिच्छन्ती स्त्री कुले वा । पिछेति **द्रमिलाः** । पिच्छा आचामः । **'उछुत् उञ्छे'** उञ्छ उच्चयः । उदित्त्वान्ने 'तवर्गस्य०' ( १।३।६० ) इति नस्य ञे उञ्छति । परोक्षाया आमि उञ्छाञ्चकार । उञ्छिता । घञि उञ्छः । उञ्छती उञ्छन्ती स्त्री कुले वा । **प्रछंत्** इति ज्ञीप्सायामिति ज्ञीप्सा जिज्ञासा । 'स्वरेभ्यः' ( १।३।३० ) इति छस्य द्वित्वे 'ग्रहव्रश्च०' ( ४।१।८४ ) इति य्वृति पृच्छति । 'समो गमृ०' ( ३।३।८४ ) इत्यात्मनेपदं संपृच्छते । आङ्पूर्वस्य तु 'नुप्रच्छः' ( ३।३।५४ ) इति सूत्रेणात्मनेपदम् 'आपृच्छस्व प्रियसखममुं शैलमाश्लिष्टसानुम्' इति **मेघदूते** ॥ ६ ॥ अद्यतन्यां सिचि सूत्रम्

## अनुनासिके च छ्वः शूट् ॥ ७ ॥ [ सि० ४।१।१०८ ]

**अनुनासिकादौ क्वौ धुडादौ च प्रत्यये धातोः छ्वोः शूटौ स्याताम् । अप्राक्षीत् ५ । पप्रच्छ ६ । पृच्छ्यात् ७ । प्रष्टा ८ । प्रक्ष्यति ९ । ( आङ्पूर्वात्पृच्छतेरात्मनेपदम् ) आपृच्छते । 'सृजंत् विसर्गे' सृजति ४ । अः सृजिदृशोऽकिति अस्राक्षीत् ५ । ससर्ज ६ । सृजिदृशीति वेटि सस्रष्ठ–ससर्जिथ ६ । सृज्यात् ७ । स्रष्टा ८ । 'टुमस्जोंत् शुद्धौ' मज्जति ४ ॥ ७ ॥**

**'अनु०'** कण्ठ्यम् । पप्रच्छ । संयोगान्तत्वात् 'इन्ध्यसंयोग०' ( ४।३।२१ ) इति कित्त्वाभावान्न य्वृत् पप्रच्छतुः पप्रच्छुः । अनिट्त्वात् प्रष्टा पृष्टः । 'ऋस्मिपूङ्०' ( ४।४।४८ ) इति इटि, 'रुद-विद०' ( ४।३।३२ ) इति सनः कित्त्वे पिपृच्छिषति । 'दिद्युद्दद्०' ( ५।२।८३ ) इति निपातनात् प्रश्नशीलः प्राट्, शब्दप्राट्, प्राड्विवाकः निर्णेता । 'यजिस्वपि०' ( ५।३।८५ ) इति ने, 'अनुनासिके च०' इति छस्य शे प्रश्नः । भिदाद्यङि पृच्छा । उणादौ लूधूप्रच्छिभ्यः कित् ( ६७१ ) इति नौ प्रश्निः रश्मिः । इति छान्ताः षट् प्रच्छंवर्जाः सेटश्च । **'उब्जत् आर्जवे'** उब्जति । परोक्षाया आमि उब्जाञ्चकार । उब्जितः । 'न बदनं संयोगादिः' ( ४।१।५ ) इति बस्य प्रतिषेधात् 'स्वरादे०' ( ४।१।४ ) रिति द्वितीयांशस्य जेरेव द्वित्वे उब्जिजिषति 'भावाकर्त्रोः' ( ५।३।१८ ) घञि उद्गादित्वात् गत्वे अभ्युद्गः समुद्गः । आधारे व्यञ्जनादिति घञि न्युब्जितः । शेतेऽस्मिन्निति न्युब्जो

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रोगः । 'भुजन्युब्जं पाणिरोगे' ( ४।१।१२० ) इति निपातनादत्र न गत्वम् । उब्जती उब्जन्ती स्त्री कुले वा । ओज इति उषेर्ज च ( ९५९ ) इत्यस्युषेः । **सृजंत्** इति । सृजतीत्यादि व्यक्तम् । 'सृजः श्राद्धे ञिक्यात्मने तथा' ( ३।४।८४ ) इति ञिक्यात्मनेपदेषु असर्जि मालां धार्मिकः । कर्मकर्त्तरि सृज्यते माला स्वयमेव । असर्जि माला स्वयमेव । सृजती सृजन्ती स्त्री कुले वा । उणादौ स्यन्दि-सृजिभ्यां सिन्धरज्जौ च ( ७१७ ) इत्युः रज्जादेशश्च रज्जुः । '**रुजोंत्** भङ्गे' । 'रुजार्थस्य०' ( २।२।५१३ ) इति वा कर्मणः कर्मत्वे शेषषष्ठ्यां चौरस्य चौरं वा रुजति रोगः । अनिट्त्वात् नेट् रोक्ता । ओदित्त्वात् 'सूयत्यादि०' ( ४।२।७० ) इति क्तयोस्तस्य नत्वे 'क्तादेशोऽषि' ( २।१।६१ ) इति नस्यासत्त्वेन धुटि 'चजः०' ( २।१।८६ ) इति गे रुग्णः २ । 'कूलादुद्रुज०' ( ५।१।१२२ ) इति खशि कूलमुद्रुजः समुद्रः । क्विपि 'गतिकारकस्य०' ( ३।२।८५ ) इति दीर्घे नीरुक् । 'पदरुज०' ( ५।३।१६ ) इति कर्त्तरि घञि रोगः । भिदाद्यङि रुजा । उणादौ रुक्मग्रीष्म० ( ३४६ ) इति निपातनात् रुक्मम् । '**भुजोंत्** कौटिल्ये' । निभजति । भोक्ता । ओदित्त्वात् 'सूयत्यादी'ति क्तयोस्तस्य नत्वे भुग्नः । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के भुजः । 'ऋवर्ण०' ( ५।१।१७ ) इति घ्यणि भोग्यम् । 'स्थादिभ्यः' ( ५।३।८२ ) इति भावे के भुजः कौटिल्यम् । भुजेन गच्छति भुजगः । करणाधारे 'व्यञ्जनाद्०' ( ५।३।१३२ ) इति घञि भोगः सर्पकायः । 'भुजंप् पालनाभ्यवहारयोः' भुनक्ति । 'भुनजोऽत्राणे' ( ३।३।४७ ) इत्यात्मनेपदे भुङ्क्ते । '**टुमस्जोंत्** शुद्धौ' इति शुद्ध्या स्नानं ब्रुडनं च लक्ष्यते । 'सस्य शषौ' ( १।३।६१ ) इति शे, 'तृतीयस्तृतीय०' ( १।३।४९ ) इति शस्य जत्वे मज्जति ७ ॥

## मस्जेः सः ॥ ८ ॥ [ सि० ४।४।११० ]

**मस्जेः स्वरात्परस्य सस्य स्थाने धुटि परे नोन्तः स्यात् । अमाङ्क्षीत् अमाङ्क्ताम् ५ । ममज्ज ममज्जिथ-ममङ्क्थ ६ । मज्ज्यात् ७ । मङ्क्ता ८ । मङ्क्ष्यति ९ । 'णुदंत् प्रेरणे' नुदति १० । पाणिनीयास्त्वेनमुभयपदिनं पठन्ति । नुनुदे ।**

'मस्जेः सः' ( ४।४।११० ) इति धुटि सस्य नत्वे मङ्क्ता । ओदित्त्वात् 'सूयत्यादीति क्तयोस्तस्य नत्वे, 'नो व्यञ्जनस्य०' (४।२।४५) इति नलुकि मग्नः २ । 'जनशो न्युपान्त्ये तादिः क्त्वा' (४।३।२३) इति क्त्वो वा कित्त्वे मक्त्वा मङ्क्त्वा । 'ऋवर्ण०' ( ५।१।१७ ) इति घ्यणि, 'क्तेऽनिट०' ( ४।१।१११ ) इति जस्य गे, 'तृतीयस्तृतीय०' ( १।३।४९ ) इति सस्य दे मद्ग्यं । अचि मज्जः । नाम्युत्तरपदस्येत्युदे उदके मज्ज उदमज्जः । द्वित्त्वादथौ मज्जथुः । अनटि मज्जनम् । भिदाद्यङि मज्जा । उणादौ भृमृतॄ० ( ७१६ ) इत्युः, उद्गादित्वाद्गत्वे मद्गुर्जलवायसः । उक्षितक्षि० ( ९०० ) इत्यनि मज्जा अस्थिसारः, मज्जानौ । मञ्जूषेति तु मञ्जेः सौत्रस्य खलिफलि० ( ५६० ) इत्यूषे । **जर्ज झर्झत्** परिभाषणे जर्जति अजर्जीत् जजर्ज जर्जितः । जर्जती जर्जन्ती स्त्री कुले वा इति जान्ताः षट् । झर्झति अझर्झीत् जझर्झ । जर्जरझर्झरौ तु जृषझृषो ऋतष्ठित् ( ९ ) इत्यप्रत्यये सरूपे द्वे च । '**उदूझत्** उत्सर्गे' दोपान्त्योऽयम् । 'तवर्गस्य०' ( १।३।६० ) इति दस्य जे उज्झति औज्झीत् । उज्झाञ्चकार । 'न बदनं०' ( ४।१।५ ) इति दस्य प्रतिषेधात्, 'स्वरादे' ( ४।१।४ ) इति द्वितीयांशस्य झेरेव द्वित्वे उजिझिषति । 'कुप्यभिद्य०' ( ५।१।३९ ) इति क्यपि निपातनात् उज्झत्युदकमिति उद्ध्यो ह्रदः । क्विपि पदान्ते 'पदस्य' ( २।१।८९ ) इति संयोगान्तलुकि उत् उद् [ उज्झती उज्झन्ती



Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्त्री कुले वा ] इति ज्ञान्तौ द्वौ सेटौ । **'जुडत्** गतौ' जुडति अजोडीत् जुजोड जोडिता जुडिता । घञि जोडः । **'पृडत् मृडत्** सुखने' पृडति अपर्डीत् पपर्ड पर्डिता पृडितः ॥ मृडति अमर्डीत् ममर्ड मर्डिता मृडितः । **'क्षुधक्लिशकुषगुधमृडमृदवदवसः'** ( ४।३।३१ ) एभ्यः परः क्त्वा सेट् किद्वद्भवति इति क्त्वः कित्त्वाद्गुणाभावे मृडित्वा । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के मृडस्तद्भार्यां तु 'वरुणेन्द्र०' ( २।४।६२ ) इति ङ्यामानन्ते च मृडानी । **'कडत्** मदे' भक्षणे । इत्यन्ये । कडति अकाडीत् चकाड । अचि कडः लत्वे कलः । केचित्तु कुटादिरयम् कुटादित्वाच्च न वृद्धिरित्याहुः । तन्मते णके कडकः । उणादौ कुकडीकटिचटेरम्बः ( ३२१ ) कडम्बः जातिविशेषः जनपदविशेषश्च । सृपृप्रथिचरिकडिकर्देरमः ( ३४७ ) इत्यमे कडमः शालिः । ऋफिडादित्वाल्लत्वे कलमः स एव । अग्यङ्गि० ( ४०५ ) इत्यारे कडारः पिङ्गलः । वृग्रक्षि० ( ४५६ ) इत्यत्रे कडत्रम् । लत्वे कलत्रं दारा जघनं च । वन्धिवहि० ( ) इतीत्रे कडित्रं लेख्यचर्म । कटित्रमपि तदेव । कडेरेवराङ्गरौ ( ४४५ ) अस्मात् एवर अङ्गर इत्येतौ प्रत्ययौ भवतः । कडेवरं मृतशरीरम् । लत्वे कलेवरम् । कडङ्गरं बुसः । कलह इति ( कलतेः ) कृपृकटि० ( ५८९ ) इत्यहे । कलिरित्यप्यस्यैव पदिपठि० ( ६०७ ) इत्यौ । इति डान्ताश्चत्वारः सेटः । **'पृणत्** प्रीणने' । पृणति 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के पृणः' 'लोकम्पृण०' ( ३।२।११३ ) इति निपातनात् नोन्ते लोकस्य पृणः लोकम्पृणः । **'तुणत्** कौटिल्ये' तुणति उणादौ कुगुहु० ( १७० ) इति किड्डे तुण्डम् । बाहुलकान्न दीर्घः । **'मृणत्** हिंसायाम्' मृणति उणादौ 'कुलिपिलि०' ( ४७६ ) इति किस्याले मृणालं बिसम् । **'द्रुणत्** गतिकौटिल्ययोश्च' चकाराद्धिंसायाम् । द्रुणति 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के द्रुणः । अचि द्रोणः । ङ्यां द्रुणी द्रोणी । **'पुणत्** शुभे' । शुभं शुभविषया क्रिया । पुणति 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के पुणः निपुणः । उणादौ सृणीकास्तीक० ( ५० ) इतीके निपातनात् पुणेर्डरचान्तः पुण्डतेर्वा अर पुण्डरीकम् । कुहुगुहुनी० (१७०) इति किति डे पुण्डः भिन्नवर्णः बाहुलकान्न दीर्घः । एवं मुण्डादिष्वपि । ऋशिजनि० ( ३६१ ) इति किति ये पुण्यम् । खुरक्षुर० ( ३९६ ) इति निपातनात् पुण्ड्रम् । **'मुणत्** प्रतिज्ञाने' मुणति । उणादौ कुगुहुनी० (१७०) इति किति डे मुण्डः । **'कुणत्** शब्दोपकरणयोः' कुणति । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के कुणः । उणादौ कुगुहुनी० ( १७० ) इति किति डे कुण्डम् । 'भाजगोण०' ( २।४।३० ) इति ङ्यां कुण्डी अमत्रम् । कुण्डाऽन्या उणादौ कल्यलि० ( २४६ ) इतीन्दकि कुणिन्दः म्लेच्छः । कुलिपिलि० ( ४७६ ) इति किस्याले कुणालं नगरम् । **'घुण घूर्णत्** भ्रमणे' घुणति । के घुणः । लिहाद्यचि घोणा नासिका । घूर्णति । 'घुणि घूर्णि भ्रमणे' घोणते घूर्णते । इति णान्ता नव सेटश्च' । **'चृतैत्** हिंसाग्रन्थयोः'। चृतति । सादौ 'कृतचृत०' ( ४।४।५० ) इति वेट् चर्त्स्यति चर्तिष्यति । चिचृत्सति चिचर्तिषति । असिच इति वचनात् सिचि नित्यमिट् अचर्तीत् । वेट्त्वात् क्तयोर्नेट् चृत्तः २ । ऐदित्त्वात् यङ्लुपि अनेकस्वरादपि क्तयोर्नेट् । चरीचृत्तः २ । 'ऋदुपान्त्या०' ( ५।१।४१ ) इत्यत्र चृतो वर्जनात्, 'ऋवर्ण०' ( ५।१।१७ ) इति घ्यणि चर्त्यम् । इति तान्तः सेट् । **'णुदंत्'** इति 'पाठे धात्वादेः' ( २।३।९७ ) इति णस्य ने नुदति । 'अदुरुपसर्ग०' ( २।३।७७ ) इति णत्वे प्रणुदति । 'ऋह्रीघ्रा०' ( ४।२।७६ ) इति क्तयोस्तस्य वा नत्वे नुन्नः २ । नुत्तः २ । 'शोकापनुद०' ( ५।१।१४३ ) इति के शोकापनुदः पुत्रः । घञि प्रणोदः । **पाणिनीयास्त्वित्ति । तथाहुर्धातुपारायणे श्रीहेमसूरयः** । ईदिदयमित्येके । तन्मते 'ईगितः' (३।३।९५) इति फलवत्कर्त्तर्यात्मनेपदे नुदते । नुनुदे । 'स गरुद्वनदुर्गदुर्ग्रहान्कद्रु कीटान्दशतः सतः क्वचित् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तुतुदे तनुकण्डुपण्डितः पटुचञ्चूपुटकोटिकुट्टनैः' ॥ १ ॥ इति **नैषधीयप्रयोगो**ऽपि । उणादौ ग्लानुदिभ्यां डौः ( ८६८ ) नौः । **षद्लृंत्** अवसादने । 'श्रौति०' ( ५।२।१०८ ) इति सीदादेशे सीदति । लृदित्त्वादङि असदत् । षोपदेशत्वात् 'नाम्यन्तस्था०' ( २।३।१५ ) इति षत्वे सिषत्सति । ज्वलादिपठितेनैव सिद्धे इहास्य **पाठः** 'अवर्णादश्न०' ( २।१।११५ ) इति वान्तादेशार्थः । सीदती सीदन्ती स्त्री कुले वा । 'वा ज्वलादि०' ( ५।१।६२ ) इति णविकल्पार्थः । सादः सदः । अनिट्त्वात् सत्ता । '**शद्लृंत्** शातने' इति तु न पठितव्य एव शित्यात्मनेपदित्वेन शतुरभावेन्तादेशविकल्पाप्राप्तेः । अशददित्यादेस्तु तेनैव सिद्धेः । इति दान्तावनिटौ च । '**विधत्** विधाने' विधति 'वौ व्यञ्जनादेः०' ( ४।३।२५ ) इति क्त्वासनोर्वा कित्त्वे विधित्वा वेधित्वा । विविधिषति विवेधिषति । के विधः । उणादौ विधेर्वा ( ९७२ ) अस्मादस् स च किद्वा वेधाः विद्वान् सर्ववित् प्रजापतिश्च । विधाः स एव । इति धान्तः सेट् । '**जुन, शुनत्** गतौ' जुनति जुजोन । शुनति शुशोन । के शुनः वायुः । उणादौ कीचकपेचक० ( ३३ ) इति निपातनात् शुनकः । इति नान्तौ सेटौ । '**छुपंत्** स्पर्शे' छुपति चुच्छोप छोप्ता । इति पान्तोऽनिट् । '**रिफत्** कथनयुद्धहिंसादानेषु' रिफति रिरेफ रेफिता । रिफितः । न्युपान्त्य इति व्यावृत्तिबलात् 'ऋतृषमृष०' ( ४।३।२४ ) इति 'वौ व्यञ्जनादेः' ( ४।३।२५ ) इति च वा कित्त्वाभावे 'क्त्वा' ( ४।३।२९ ) इति नित्यमकित्त्वे रेफित्वा **स्वरादि**रयमित्ये**के** ऋफति । णौ अर्फयति । '**तृफ, तृम्फत्** तृप्तौ' । मुचादीत्यनेन विधानबलात् 'नो व्यञ्जनस्य०' ( ४।२।४५ ) इति नस्यालुकि तृम्फति अतर्फीत् ततर्फ तर्फिता तृफित्वा तृफितः । ऋदुपान्त्यादिति क्यपि तृफ्यः । **तृम्फ** नो व्यञ्जनस्येति नलुपि तृफति । अतृम्फीत् ततृम्फ 'ऋत्तृष०' इति क्त्वो वा कित्त्वे तृफित्वा तृम्फित्वा । **पान्तावेतावित्यन्ये** । तृपति । शे न लुक् नेष्यते तृम्पति । '**ऋफ ऋम्फत्** हिंसायाम्' । ऋफति । 'अनात०' ( ४।१।६९ ) इति पूर्वस्यात्वे ने च आनर्फ आनृफतुः । अर्फिता । ऋफितः । सनि अर्फिफिषति । 'क्त्वा' ( ४।३।२९ ) इति क्त्वः कित्त्वाभावे अर्फित्वा । 'ऋदुपान्त्याद्०' ( ५।१।४१ ) इति क्यपि ऋफ्यः । ऋम्फ्यः । 'नो व्यञ्जनस्या०' इति न लुपि ऋफति । 'अनात०' इति पूर्वस्यात्वे ने च आनृम्फ । ऋम्फित्वा । ऋम्फितः । 'ऋत्तृष०' इति क्त्वो वा कित्त्वे ऋफित्वा ऋम्फित्वा । **इकारोपान्त्यो रा**दिश्चायमित्य**न्यः** । **तन्मते** शे नलोपानिष्टौ रिम्फति रिरिम्फ । '**दृफ दृम्फत्** उत्क्लेशे' मुचादीति ने दृम्फति अदर्फीत् ददर्फ दर्फिता दृफितः । 'क्त्वा' इति क्त्वः कित्त्वाभावे दर्फित्वा । **दृम्फ** 'नो व्यञ्जन०' ( ४।२।४५ ) इति नलुकि दृफति अदृम्फीत् ददृम्फ दृम्फिता । 'ऋत्तृष०' इति क्त्वो वा कित्त्वे दृफित्वा दृम्फित्वा । '**गुफ गुम्फत्** ग्रन्थने' मुचादीति ने गुम्फति अगोफीत् जुगोफ गोफिता गुफितः । 'क्त्वा' इति कित्त्वाभावे गोफित्वा । न्युपान्त्यव्यावृत्तिबलात् 'ऋत्तृष०' इति 'वौ व्यञ्जनादेः' इति चात्र वा न कित्त्वम् । गुम्फ 'नो व्यञ्जनस्या०' इति न लुपि गुफति अगुम्फीत् जुगुम्फ गुम्फिता । 'ऋत्तृष०' इति क्त्वो वा कित्त्वे गुफित्वा गुम्फित्वा । इति फान्ता नव सेटश्च । '**उभ उम्भत्** पूरणे' 'मुचादि०' ( ४।४।९९ ) इति ने उम्भति । औभीत् उवोभ उभिता उभितः । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के उभौ । उणादौ उभेर्द्वित्रौ च ( ६१५ ) इत्यौ द्वौ त्रयः । उम्भ 'नो व्यञ्जनस्या' ( ४।२।२५ ) इति नलुकि उभति । औम्भीत् उम्भाञ्चकार उम्भिता उम्भित्वा । '**शुभ शुम्भत्** शोभार्थे' । 'मुचादि०' ( ४।४।९९ ) इति ने शुम्भति अशोभीत् शुशोभ । शोभिता के शुभम् । भिदाद्यङि निपातनात् शोभा । उणादौ ऋज्यति० ( ३८८ ) इति किति रे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शुभ्रम् । 'शुभि दीप्तौ' शोभते । शुम्भ 'नों व्यञ्जनस्या०' ( ४।२।२५ ) इति नलुकि शुभति अशुम्भीत् शुशुम्भ शुम्भिता शुम्भित्वा । '**शुम्भ** भाषणे' चेत्यर्थभेदात्पाठः । ( भ्वादौ सुम्भ निशुम्भनाद्यर्थौ दन्त्यादिरित्येके ) । '**दृभैत्** ग्रन्थे दृभति क्त्वेति किस्त्वाभावाद्गुणे दर्भित्वा । ऐदित्वात् क्तयोर्नेट् दृब्धः दृब्धवान् । घञि सन्दर्भः । उणादौ दृभिचपेः स्वरान्नोन्तश्च ( ८४१ ) आभ्यामूः स्वरान्नोन्तश्च । दृन्भूः सर्पजातिः वनस्पतिः वज्रः ग्रन्थकारः । बाहुलकान्नकारस्य 'म्नां धुड्०' ( १।३।३९ ) इति मकारो न भवति । 'लुभत् विमोहने' विमोहनं व्याकुलीकरणम् 'सहलुभेच्छ०' ( ४।४।४६ ) इति वेटि लोब्धा लोभिता । '**लुभ्यञ्चेर्विमोहार्चे**' ( ४।४।४४ ) लुभ्यञ्चिभ्यां यथासङ्ख्यं विमोहेऽर्चायां चार्थे वर्त्तमानाभ्यां परेषां क्तक्तवतुक्त्वामादिरिड्वा भवति [ विमोहो विमोहनमाकुलीकरणम् अर्चा पूजा ] विलुभितः सीमन्तः । विलुभिताः केशाः । विलुभितवान् । धातूनामनेकार्थत्वाद्विमोहादन्यत्र वेट्त्वान्नेट् लुब्धः २ । 'लुभच् गार्ध्ये' लुभ्यति अलुभत् इति भान्ताः षट् सेटश्च । '**कुरत्** शब्दे' कुरति अकोरीत् । चुकोर कोरिता कुरितः । कुरुच्छुरं इत्यत्र कुग एव ग्रहणात् 'भ्वादे०' ( २।१।६३ ) इति दीर्घे कूर्यते । आशिषि कूर्यात् । तस्यापि न दीर्घ इत्येके कुर्यात् । उणादौ मृद्युन्दि० ( ३९९ ) इति किदरे कुररः जलपक्षी । किति कुटिकुरि० ( ५१८ ) इति कित्यवे कुरवः पुष्पवृक्षजातिः । '**क्षुरत्** विलेखने' क्षुरति । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के क्षुरः । '**खुरत्** छेदने च' छेदनं विलेखनम् चकाराद्विलेखने । खुरति । के खुरः । क्रोडादित्वात् 'असहनञ्०' ( २।४।३८ ) इति ङ्यभावे कल्याणखुरा । '**घुरत्** भीमार्थशब्दयोः' । घुरति । घञि घोरः । उणादौ इदुदुपान्त्याभ्यां० ( १७ ) इति किदः सरूपद्वित्वं पूर्वस्य चोदन्तः घुरुघुरः । जजल० ( १८ ) इत्यादिनिपातनात् पूर्वस्योद्भावे घुर्घुरः । अनुकरणशब्दौ । '**पुरत्** अग्रगमने' पुरति । के पुरम् । क्विपि पूः । पुरुष इति तु विदिपृभ्यां० ( ५५८ ) इति कित्युषे पृणातेः । पुरुरित्यप्यस्यैव पृकाहृषि० ( ७२९ ) इति कित्यौ । '**मुरत्** संवेष्टने' मुरति । के मुरः । मुरमुरः ( १७ ) अनुकरणशब्दः । मुर्मुर ( १०—१८ ) इत्यपि । '**सुरत्** ऐश्वर्यदीप्त्योः' सुरति । अषोपदेशत्वात्षत्वाभावे सुसोर । षोपदेशोऽयमित्येके । तन्मते 'नाम्यन्तस्था०' ( २।३।१५ ) इति षत्वे सुषोर । सोरिता । 'नाम्युपान्त्य०' (५।१।५४) इति के सुरः देवः । सुरा मद्यम् । उणादौ 'इदुदुपान्त्याभ्यां०' ( १७ ) इति किदः सरूपद्वित्वं च पूर्वस्य चोदन्तः । सुरुसुरः अनुकरणशब्दोऽयम् । '**स्फर स्फलत्** स्फुरणे' चलन इत्येके । स्फरति अस्फारीत् पस्फार स्फरिता । अचि स्फरः । कुटादिरयमित्यन्ये । तत्पाठबलाच्च णके वृद्ध्यभावे स्फरकः । घञि स्फारः । इति रान्ता अष्टौ सेटश्च ८ । स्फलति अस्फालीत् पस्फाल स्फलिता । णौ क्ते आस्फालितः । अनटि आस्फालनम् । कुटादिरयमित्येके । तत्पाठबलाच्च णके स्फलकः । '**किलत्** श्वैत्यक्रीडनयोः' किलति चिकेल केलिता केलितः । उणादौ किलेः कित् ( ५७५ ) इत्यासे किलासः सिध्मम् । किलाट इति तु किरो लश्च वा ( १४७ ) इत्याटे रस्य वा लत्वे किरतेः । इदुदुपान्त्याभ्यां० ( १७ ) इति किदः सरूपद्वित्वं पूर्वस्येदन्तः किलिकिलः अनुकरणशब्दः । बहुलं गुणवृद्धी चादेः ( १९ ) इति पूर्वस्य गुणवृद्ध्योश्च केलिकिलः कैलिकिलश्च हासशीलः । किलिपिलि० (६०८) इत्यौ केलिः । '**इलत्** गतिस्वप्नक्षेपणेषु' इलति ऐलीत् इयेल । एलिता । के इला । लिहाद्यचि घञि वा एलः । स्त्रियां एला । णौ एलयति । '**हिलत्** हावकरणे' हिलति । उणादौ इदुदुपान्त्याभ्यां० ( १७ ) इति हिलिहिलः अनुकरणशब्दः । बहुलं गुणवृद्धी चादेः ( १९ ) इति हेलिहिलः हैलिहिलश्च विलासशीलः । '**शिल सिलत्** उञ्छे' । शिलति । के शिलम् । स्त्रिया-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मापि शिला। शेलुरिति तु शेतेलौ॥ **सिल** सिलति। अषोपदेशत्वात्षत्वाभावे सिसेल। षोपदेशोऽयमित्येके। तन्मते 'नाम्यन्तस्था०' (२।३।१५) इति षत्वे सिषेल। 'नाम्युपान्त्य०' (५।१।५४) इति के सिलम्। '**तिलत्** स्नेहने' तिलति। के तिलः। 'तिलण् स्नेहने' तेलयति। '**चलत्** विलसने' चलति। चलती चलन्ती स्त्री कुले वा। णौ कम्पने एव घटादित्वाद् ह्रस्वाभावे चालयति। '**चिलत्** वसने' चिलति अचेलीत् चिचेल। लिहाद्यचि चेलम्। '**विलत्** वरणे' दन्त्योष्ठ्यादिः। विलति। घञि आवेलः। णावचि वेला। '**बिलत्** भेदने' ओष्ठ्यादिः। बिलति अबेलीत् बिबेल उणादौ बिलिभिलि० (३४०) इति किति मे बिलमं प्रकाशम्। बिलाल इति तु बिडालस्य लत्वे। '**णिलत्** गहने' 'पाठे०' (२।३।९७) इति णस्य नत्वे निलति। णोपदेशत्वात् 'अदुरुपसर्ग०' (२।३।७७) इति नेर्णत्वे प्रणिलति। 'मिलत् श्लेषणे' मिलति अमेलीत् मिमेल मिलिता मिलितः मेला। इति लान्तास्त्रयोदश सेटश्च।

'**स्पृशंत्** संस्पर्शने' स्पृशति ४। अस्प्राक्षीत् अस्पार्क्षीत्। अस्पृक्षत् ५। स्प्रष्टा स्पर्ष्टा ८। *स्प्रक्ष्यति स्पर्क्ष्यति ९। 'विशंत् प्रवेशने' अविक्षत् ५। वेष्टा ८। वेक्ष्यति ९। निपूर्वाद्विश* आत्मनेपदं भवति। निविशते। एवं '**मृशंत्**' आमर्शने। '**इषत्** इच्छायाम्' गमिषद्यमश्छः। इच्छति ४। ऐषीत् ऐषिष्टम् ५। इयेष ६।

इति परस्मैपदिनः।

**स्पृशंत्** इति स्पृशति। 'स्पृशमृश०' (३।४।५४) इति वा सिचि, 'स्पृशादि सृपो वा' (४।४।११२) इति वा स्वरात्परो अः अस्प्राक्षीत् अस्पार्क्षीत् पक्षे 'हशिट०' (३।४।५५) इति सकि अस्पृक्षत् इति त्रैरूप्यम्। पस्पर्श। 'पदरुजविशस्पृशो घञ्' (५।३।१६) इति घञि स्पर्शो व्याधिः। 'स्पृशोऽनुदकात्' (५।१।१४९) इति क्विपि, 'ऋत्विग्दिश्०' (२।१।६९) इति षापवादे गे घृतस्पृग्। उदकात् 'कर्मणोऽण्' (५।१।७२) इत्यणि उदकस्पर्शः। उणादौ स्पृशेः श्वः पार् च (५२३) अस्मात् श्वः प्रत्ययोऽस्य च पार् इत्यादेशः पार्श्वं स्वाङ्गं समीपं च। पार्श्वो भगवान् तीर्थङ्करः। पर्शूरिति तु प्रः शुः (८२५) इति शौ पृणातेः। '**रुशं रिंशत्** हिंसायाम्'। रुशति। 'हशिट०' (३।४।५५) इति सकि अरुक्षत् रुरोश रोष्टा रुष्टः॥ रिशति अरिक्षत् रिरेश रेष्टा रिष्टः। **विशंत्** इति। 'निविशः' (३।३।२४) इत्यात्मनेपदे निविशते। 'वाभिनिवेशः' (२।२।२२) इत्याधारस्य वा कर्मत्वे ग्रामं ग्रामे वा अभिनिविशते। सकि अविक्षत्। वेष्टा। प्रविष्टः। क्वसौ 'गमहन०' (४।४।८३) इति वेटि विविशिवान्। 'पदरुज०' (५।३।१६) इति घञि वेशो वेश्या वाटः। 'अजातेः शीले' (५।१।१५४) इति णिनि संवेशी। 'विशपत०' (५।४।८१) इति णमि गेहानुप्रवेशमास्ते गेहंगेहमनुप्रवेशमास्ते। उणादौ जृविशिभ्यामन्तः (२१९) इत्यन्ते वेशन्तः पल्वलम्। विष्टपोलपवातपादयः (३०७) इत्यपे निपातनात् विष्टपं जगत् इति। विश्धातोर्व्याख्याने **पारायणे**। विषेस्तोन्तश्चेति किदप्प्रत्यये विष्टपं जगत् इत्यु**णादिविवरणे**। विशेरिफक् (३०९) विशिपः राशिः। निघृषी० (५११) इति किति वे विश्वम्। **मृशंत्** इति आमर्शनं स्पर्शः। अद्यतन्यां अम्राक्षीत्। अमार्क्षीत् पक्षे 'हशिट०' (३।४।५५) इति सकि अमृक्षत् इति स्पृशतिवत्त्रैरूप्यम्। अनिट्त्वात् म्रष्टा मर्ष्टा। मृष्टः २। 'ऋदुपान्त्या०' (५।१।४१) इति क्यपि मृश्यम्। उणादौ युयुजि० (२७७) इति कित्याने मृशानः। '**लिशं ऋषैत्** गतौ'। लिशति अलिक्षत् लेष्टा लिष्टः। घञि लेशः। 'लिशिंच् अल्पत्वे' लिश्यते।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति शान्ताः षट् अनिटः । **ऋषै** ऋषति । 'ऋत्यारि'ति प्रार्षति । आर्षीत् । आनर्ष आनृषतुः । 'क्त्वा' (४।३।२९) इति कित्त्वाभावे अर्षित्वा । ऐदित्त्वात् क्तयोर्नेट् ऋष्टः ऋष्टवान् । 'ऋदुपान्त्या०' इति क्यपि ऋष्यः । उणादौ ऋषिवृषि० (३३१) इति कित्यभे ऋषभो वृषभश्च पुङ्गवः भगवांश्चादितीर्थङ्करः । ऋजिरिषि० (५६७) इति किति से ऋक्षः । नाम्युपान्त्य० (६०९) इति किदिः ऋषिः । इमुषि० (६५१) इति किति तौ ऋष्टिः खड्गः । **इषत्** इति । तादौ 'सहलुभेच्छ०' (४।४।४६) इति वेटि एष्टः एषिता । 'क्त्वा' इति कित्त्वाभावाद्गुणे, वेट्त्वात् क्तयोर्नेट् इष्टः इष्टवान् । 'ऋवर्ण०' (५।१।१७) इति घ्यणि एष्यः । 'प्रस्यैषैष्योढो-ढ्यूहेस्वरेण' (१।२।१४) इत्यैत्वे प्रैषः प्रैष्यः । 'विन्द्विच्छू' (५।२।३४) इति निपातनात् एषणशील इच्छुः । के इषः आश्वयुजः । 'श्वादिभ्यः' (५।३।९२) इति क्तौ इष्यतेऽनया इष्टिः 'मृगयेच्छा०' (५।३।१०१) इति निपातनात् इच्छा । 'करणाधारे' (५।३।१२९) इत्यनटि एषणः । स्त्रियां गौरादित्वात् ङ्यां एषणी वैद्यशलाका । 'कृत्सम्पदा०' (५।३।१२४) इति किपि इट् । उणादौ इष्यशिमशिभ्यस्तकक् (७७) इष्टका । मस्जीष्यशिभ्यः सुक् (८२६) इति सुकि इक्षुः । **उणादिविवरणे** तु 'इषश् आभीक्ष्ण्ये' इक्षुर्गुडादिप्रकृतिरिति लिखितम् । **'इषच् गतौ'** अन्विष्यति । **'मिषत् स्पर्द्धायाम्'** मिषति । उन्मिषितम् । के अनिमिषा देवाः । आमिषम् । लिहाद्यचि मेषः निमेषः उन्मेषः । इति षान्तास्त्रयः सेटः । **'वृहौत्** उद्यमे' उद्यम उद्धरणम् । वृहति । औदित्त्वात् वेटि अवर्हीत् । पक्षे 'हशिट०' (३।४।४५) इति सकि अवृक्षत् । वेट्त्वात् क्तयोर्नेट् वृढः परिवृढः । घञि उद्वर्हः वर्हः । 'बृह वृद्धौ' वर्हति । **'तृहौ तृंहौ स्तृहौ स्तृंहौत्** हिंसायाम्' । तृहति । वेटि अतर्हीत् पक्षे सकि अतृक्षत् । ततर्ह । तर्हिता तर्ढा । क्तयोर्नेट् आतृढः २ । **तृंहौ** 'नो व्यञ्जनस्या०' (४।२।४५) इति नलुकि तृहति । अतृंहीत् अतृक्षत् ततृंह, तृंहिता-तृण्ढा । क्तयोर्नेट्, 'नो व्यञ्जनस्या०' इति नलुकि तृढः २ । **स्तृहौ**, स्तृहति अस्तर्हीत् तस्तर्ह स्तर्हिता स्तर्ढा । स्तृढः, **षोपदेशोऽयमित्येके** । तन्मते 'णिस्तोरेवा०' (२।३।३७) इति षत्वे तिष्टर्हयिषति । **स्तृंहौ** नलुकि स्तृहति अस्तृंहीत्-अस्तृक्षत् तस्तृंह स्तृंहिता स्तृण्ढा । स्तृण्ढः २ । स्तृहती स्तृहन्ती स्त्री कुले वा । अयमपि 'षोपदेशोऽयमित्येके । 'तृहप् हिंसायाम्' । 'तृहः श्नादीत्' (४।३।६२) इति तृणेढि ।

अथ तुदाद्यन्तर्गणः कुटादिस्तत्र प्रसिद्ध्यनुरोधेनादौ **'कुटत्** कौटिल्ये' कुटति । 'कुटादेः०' (४।३।१७) इति ङित्त्वात् गुणाभावे कुटिता कुटितुम् कुटित्वा । ञ्णिति तु ङित्त्वाभावाद्गुणे उत्चुकोट उत्कोटयति उत्कोटकः उदकोटि उत्कोटः । 'णिद्वान्त्यो णव' (४।३।५८) अहमुचुकोट । णित्त्वाभावे तु ङित्त्वाभावान्न गुणः अहमचुकुट । के कुटः । कुकुटः । प्रत्यासत्तेर्न्यायाद्यत्कार्यं कुटादेर्ङि(द्)द्वारा प्राप्नोति । तस्मिन्नेव कार्ये ङित्त्वं नत्वात्मनेपदादौ, तेन चुकुटुषतीत्यादौ सन्नन्तस्य ङित्त्वाभावादात्मनेपदं न भवति । उणादौ भुजिकुटि० (३०५) इति कित्यपे कुटपः प्रस्थचतुर्भागः । 'ऋछिचटि०' (९७) इत्यरे कुटरः मर्कटः । बाहुलकाद्गुणे कोटरं छिद्रम् । घसिवशि० (४१८) इतीरे कुटीरम् । कल्यनि० (४८१) इतीले कुटिलम् । रुचिकुटि० (५०२) इति मलकि कुड्मलः विष्णुः मुकुलं च । कृशृकुटि० (६१९) इति वा णिदिः कोटिः कुटिः । **'गुंत्** पुरीषोत्सर्गे' गुवति । 'सिचिपरस्मै०' (४।३।४४) इति वृद्ध्यभावे न्यगुषीत् जुगाव । ङित्त्वाद्गुणाभावे गुता गुतुम् गुतव्यम् । 'दुगोरू च' (४।२।७७) इति क्तयोस्तस्य नत्वे गूनः २ । उणादौ पथयूथ० (२३१) इति निपातनात् गूथं पुरीषम् । **दीर्घान्तः सेट् चायमित्येके** । तन्मते न्यगुवीत् गुविता गुवितव्यम् । 'गुङ्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शब्दे' गवते। 'ध्रुंत् गतिस्थैर्ययोः' ध्रुवति। 'सिचि परस्मै०' इति वृद्ध्यभावे अध्रुवीत्। अचि ध्रुवः। 'कुत्सिता०' (७।३।३३) इति कपि ध्रुवकः। गुपिमिथि० (४८३) इतीले ध्रुविल ऋषिः। सेडयमित्येके। तन्मते न्यध्रुवीत् ध्रुविता। किति 'उवर्णात्' (४।४।५८) इति नेट् ध्रुतः २। ङित्त्वेन कित्त्वं बाध्यते इति न्याये ध्रुवितः। 'ध्रुं स्थैर्ये' ध्रुवति। इत्युदन्तावनिटौ च। 'णुत् स्तवने' 'पाठे०' (२।३।९७) इति नत्वे नुवति अनुवीत् नुनाव नुविता नुवितुम्। णोपदेशत्वात् 'अदुरुपसर्गे०' ५ (२।३।७७) इति णत्वे, किति 'उवर्णात्' (४।४।५८) इतीडभावे प्रणुतः २। ङित्त्वेन कित्त्वस्य बाधनादिट्प्रतिषेधाभावे नुवितः। प्रणुवित इत्यन्ये। एवं धुवित इत्यत्रापि दृश्यम्। 'धूत् विधूनने'। धुवति अधुवीत् दुधाव धुवितव्यम् किति 'उवर्णात्' इतीडभावे धूतः २। अनटि धू(धु ?)वनम्। उणादौ ध्रुधून्दि० (२९) इत्यके धुवकं धूननम्। धुवका आवपनविशेषः। 'धूगूट् कम्पने' धूनुते धूनोति। धूग्श् कम्पने' धुनाति धुनीते। 'धूगण् कम्पने' 'युजादेः०' (३।४।१८) इति वा णिचि धूनयति। पक्षे धवते धवति। इत्यूदन्तौ सेटौ। 'कुचत् सङ्कोचने' कुचति अकुचीत् चुकोच कुचिता। सङ्कुचितुम्। 'नाम्युपान्त्य०' (५।१।५४) इति के कुचौ। ञ्णिति तु ङित्त्वाभावात् णौ कोचयति। घञि के सेट्त्वात् कत्वाभावे सङ्कोचः। 'कुच सम्पर्चनादौ' सङ्कोचति। 'व्यचत् व्याजीकरणे'। 'व्यचोऽनसि' (४।१।८२) व्यचेः सस्वरान्तस्था अस् वर्जिते क्ङिति प्रत्यये य्वृद्भवति। विचति। अव्याचीत्। 'ज्याव्येव्यधि०' (४।१।७१) इति पूर्वस्य इत्वे विव्याच। कुटादेरिति ङित्त्वे, विचिता। विचितुम्। 'व्यचोऽनसि' इत्यत्रासुवर्जनात् उणादौ अस् (९५२) इत्यसि य्वृदभावे उरुव्यचाः। पितृव्यचाः वृश्चिकः। इति चान्तौ सेटौ। 'गुजत् शब्दे' गुजति अगुजीत्। जुगोज गुजिता गुजितुम्। ञ्णिति ङित्त्वाभावात् गुणे अगोजि गोजयति। 'गुज अव्यक्ते शब्दे' गोजति। इति जान्तः सेट्। 'घुटत् प्रतीघाते' घुटति अघुटीत् जुघोट। कुटादेरिति ङित्त्वाद्गुणाभावे घुटिता। अघोटि। घोटकः गादिर्डान्तश्चायमित्येके गुडति के अयोगुडः। 'चुट छुट त्रुटत् छेदने' चुटति अचुटीत् चुचोट चुटिता। घञि चोटः। णौ नन्द्याद्यने उच्चोटनः। णके चोटकः। छुट छुटति अच्छुटीत् चुच्छोट छुटिता अच्छोटि। भाव इति णके छोटिका। णौ छोटयति। त्रुट 'भ्रासभ्लास०' (४।२।३६) इति वा श्ये त्रुट्यति त्रुटति। अत्रुटीत् तुत्रोट त्रुटिता त्रुटितः। ञ्णिति ङित्त्वाभावाद्गुणे अत्रोटि त्रोटकः। त्रोटयति। उणादौ किलिपिलि० (६०८) इति णावि त्रोटिः। 'तुटत् कलहकर्मणि' तुटति अतुटीत् तुतोट तुटिता। ञ्णिति तु गुणे अतोटि। णके तोटकः। उणादौ नाम्युपान्त्य० (६०९) इति किदिः तुटिः। 'मुटत् आक्षेपप्रमर्दनयोः'। मुटति अमुटीत् मुमोट मोटिता। ञ्णिति तु गुणे अमोटि मोटकः। 'मुट प्रमर्दने' मोटति। 'मुटण् संचूर्णने' मोटयति। 'स्फुटत् विकसने' स्फुटति अस्फुटीत् पुस्फोट स्फुटिता। ञ्णिति गुणे स्फोटकः। णौ स्फोटयति। के स्फुटः। 'स्फुटृ विकसने' स्फोटति अस्फोटत्। 'स्फुटि विकसने' स्फोटते। 'पुट लुठत् संश्लेषणे' पुटति के पुटः। 'जातेरयान्त०' (२।४।५४) इति ङ्यां पुटी। ञ्णिति गुणे, घञि पोटा चेटी णावचि वा। 'पुटत् संचूर्णने' भाषार्थे वा, पोटयति। इत्यष्टौ टान्ताः सेटः। 'लुठत् संश्लेषणे' लुठति अलुठीत् लुलोठ लुठिता। ञ्णिति गुणे अलोठि लोठयति। डान्तोऽयमित्यन्ये। लुडति अलुडीत् लुलोड लुडिता। 'लुठ उपघाते' लोठति। 'लुठि प्रतीघाते' लोठते इति ठान्तः सेट्। 'कृडत् घसने' घसने भक्षणे घनत्वे इत्यन्ये। घनत्वं सान्द्रत्वम्। कुडति अकुडीत् चकर्ड कुडिता कुडितुम्। ञ्णिति तु गुणे अकर्डि कर्डयति। 'कुडत् बाल्ये

Jain Education International For Personal & Private Use Only www.jainelibrary.org

च' चकाराद् घसने, कुडति अकुडीत् चुकोड कुडिता । ञ्णिति गुणे अकोडि कोडयति । उणादौ पतितमि० ( ९८ ) इत्यङ्गे कुडङ्गः । कितिकुडि० ( ५१८ ) इत्यवे कुडवः, लत्वे कुलवः । 'कुडुङ् दाहे' कुण्डते । 'कुडुण् रक्षणे' कुण्डयति । '**गुडत्** रक्षायाम्' गुडति के गुडः स्त्रियामपि गुडा हस्तिसन्नाहः । 'तिक्कृतौ०' (५।१।७१) इत्यके लत्वे च गुलिका । गुडाद्वा ह्रस्वार्थे कपि ञ्णिति गुणे गोलकं युग्मम् । घञि भूगोलः । 'गुडुण् वेष्टने' गुण्डयति । '**जुडत्** बन्धने' जुडति जुडिता । ञ्णिति अजोडि जोडयति । 'जुडत् गतौ' जुडति जोडिता जोडितुम् । '**तुडत्** तोडने' तोडनं भेदः । तुडति तुडिता अतोडि तोडयति । उणादौ नाम्युपान्त्य० ( ६०९ ) इति किदिः तुडिः । '**लुड थुड, स्थुडत्** संवरणे' लुडति थुडति स्थुडति । अलुडीत् अथुडीत् अस्थुडीत् । लुलोड तुथोड तुस्थोड । लुडिता थुडिता स्थुडिता । लोडयति थोडयति स्थोडयति । के स्थुलं पटकुटी । '**वुडत्** उत्सर्गे च' चकारात् संवरणे, वुडति अवुडीत् वुवोड वुडिता अवोडि वोडयति '**व्रुड भ्रुडत्** सङ्घाते' संवरणेऽप्यन्ये, व्रुडति अव्रुडीत् वुव्रोड व्रुडिता अव्रोडि । व्रोडयति । **भ्रुड** भ्रुडति अभ्रुडीत् बुभ्रोड भ्रुडिता भ्रोडयति । '**दुड हुड त्रुडत्** निमज्जने' दुडति अदुडीत् दुदोड दुडिता अदोडि दोडयति । हुडति अहुडीत् जुहोड हुडिता अहोडि होडयति । त्रुडति अत्रुडीत् तुत्रोड त्रुडिता अत्रोडि त्रोडयति । घञि दोडः । लत्वे स्त्रियामपि दोला दोडा । उणादौ नाम्युपान्त्य० ( ६०९ ) इति किदिः हुडिः । पृकाहृपि० (७२९) इति किदुः हुडुः मेषः । हुडिः सङ्घातेऽपीत्यन्ये । इति डान्ताश्चतुर्दश सेटश्च । '**चुणत्** छेदने' चुणति अचुणीत् चुचोण चुणिता । अचोणि चोणयति । इति णान्तः सेट् । '**डिपत्** क्षेपे' डिपति अडिपीत् डिडेप डिपिता डेपयति अडेपि 'आसुयु०' ( ५।१।२० ) इति घ्यणि डेप्यम् । 'डिपच् क्षेपे' डिप्यति, डेपिता 'डिपण् क्षेपे' डेपयति । 'डिपिण् संघाते' डेपयते । इति पान्तः सेट् । 'छुरत् छेदने' छुरति अच्छुरीत् चुच्छोर आशिषि कुरुच्छुरु इति दीर्घप्रतिषेधे छुर्यात् । छुरिता । के छुरः 'तिक्कृतौ०' ( ५।१।७१ ) इत्यके छुरिका । ञ्णिति तु अच्छोरि छोरयति । '**स्फुरत्** स्फुरणे' चलन इत्यन्ये, । '**निर्नेः स्फुरस्फुरलोः**' ( २।३।५३ ) निर्निभ्यां परयोः स्फुरतिस्फुलत्योः सकारस्य षो वा स्यात् । निःष्फुरति, निःस्फुरति, निष्फुरति निस्फुरति । वचनभेदो यथासङ्ख्यनिवृत्त्यर्थः । '**वेः**'( २।३।५४ ) वेः परयोः स्फुरस्फुलोः सस्य षो वा स्यात् । विष्फुरति विस्फुरति । णौ '**चिस्फुरोर्नवा**' (४।२।१२) चिनोतेः स्फुरतेश्च णौ परे स्वरस्यात्वं वा भवति । विस्फालयति विस्फोरयति । विष्फारयति विष्फोरयति । स्फुरस्फुलोर्घञि सन्ध्यक्षरस्याकारो भवति विस्फारः विष्फारः । घञीति किम् । विस्फोरकः । ञ्णितोऽन्यस्य ङित्त्वान्न गुणः । स्फुरिता । स्फुरितुम् स्फुरितः । के स्फुरः । सस्फुरः । क्तौ स्फूर्त्तिः । इति रान्तौ द्वौ सेटौ । '**स्फुलत्** सञ्चये च' चकारात् स्फुरणे चलने इत्यन्ये । स्फुलति । निःष्फुलति निःस्फुलति निष्फुलति निस्फुलति । विष्फुलति विस्फुलति । विपूर्वाण्णिगि विस्फोलयति विष्फोलयति । घञि विष्फालः विस्फालः । स्फुलिता स्फुलिष्यति । उणादौ स्फुलिकलि० ( १०२ ) इतीङ्गे स्फुलिङ्गः इति लान्तः सेट् ॥ इति परस्मैपदिनः ॥

'**ओविजैति भयचलनयोः**' प्रायोऽयमुत्पूर्वः । उद्विजते ४ । ( विजेरिट् ङिद्वत्स्यात् ) उद्विजता ८ । '**ओलस्जैति व्रीडे**' लज्जते ४ । अलज्जिष्ट ५ । ललज्जे ६ । लज्जिषीष्ट ७ । '**जुँषैति प्रीतिसेवनयोः**' जुषते १० । इत्यात्मनेपदिनः ।

इति महोपाध्यायश्रीकीर्तिविजयगणिशिष्योपाध्यायश्रीविनयविजयगणिविरचितायां
हैमलघुप्रक्रियायां तुदादयः समाप्ताः ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

'**कुङ् कूङत् शब्दे**' कुवते । अद्यतन्यां 'धुड्ह्रस्वाद्०' (४।३।७०) इति सिच्लोपे अकुत अकुषाताम् । चुकुवे । यङि चोकूयते । कुटादेरिति ञिणतोऽन्यस्य ङित्त्वान्न गुणः । अनुस्वारेत्त्वान्नेट् कुता । कुतुम । कुतः । इत्युदन्तोऽनिट् । **कूङ कुवते** अकुविष्ट चुकुवे । ञिणतोऽन्यस्य ङित्त्वान्न गुणः । 'उवर्णात्' (४।४।५८) इति नेट् कूतः कूतवान् । कूत्वा । अकूतम् । इत्यूदन्तः सेट् । '**गुरैति** उद्यमे' गुरते अगुरिष्ट जुगुरे । ङित्त्वान्न गुणः । गुरिता गुरितुम् । ऐदित्त्वात् क्तयोर्नेट् गूर्णः २ । ञ्णिति गुणे '**वापगुरोर्णमि**' (४।२।५) अपपूर्वस्य गुरैति इत्यस्य धातोः सन्ध्यक्षरस्य स्थाने णमि प्रत्यये परे आकारादेशो वा भवति । अपगारम् अपगारम्, अपगोरम् अपगोरम् । अभीक्ष्णमपगूर्य अपगूरणं पूर्वं वा खणम् चाभीक्ष्ण्ये इत्याभीक्ष्ण्ये प्राक्काले च खणम्, द्वित्वं च शब्दशक्तिस्वाभाव्यात्, केवलः खणम् आभीक्ष्ण्यं न द्योतयतीति द्वित्वमपेक्षते अस्यपगारं अस्यपगोरं युध्यन्ते । 'द्वितीयया' (५।४।७८) इति णम् । णौ आगोरयति । आगूरयतीति तु गूर्यतेः । इति रान्तः एकः ।

वृत् कुटादिः । इत्येकोनचत्वारिंशत् परिमाणः कुटादिस्तुदाद्यन्तर्गणः सम्पूर्णः ।

अथ प्रकृतवर्णक्रमेणैवोच्यन्ते । '**पृङत्** व्यायामे' व्यायाम उद्योगः । 'रिः शक्या०' (१।३।११०) इति राविधि व्याप्रियते व्यापृत व्यापप्रे व्यापर्त्ता व्यापर्त्तुम् । व्यापृतः २ । 'हनृ०' (४।१।४९) इतीटि व्यापरिष्यति । घञि व्यापारः । '**दृङत् आदरे**' । आद्रियते आदृत आदरिष्यति । 'ऋस्मिपूङ्०' (४।४।४८) इति सनीटि आदिदरिषते । 'दृवृग्०' (५।१।४०) इति क्यपि आदृत्यः । 'पुरन्दरभगन्दरौ' (५।१।११४) इति निपातनात् पुरो दारयति पुरन्दरः शक्रः । भगन्दरो रोगः । 'जीण्०' (५।२।७२) इतीनि आदरशील आदरी । 'युवर्ण०' (५।३।२८) इत्यलि आदरः । दर्भ इति तु गृदृरमि० (३२७) इति दृणातेः । उणादौ दृसुषि० (६५१) इति किति तौ दृतिर्भस्त्रा । '**धृंङत् स्थाने**' धारण इत्यन्ये । ध्रियते अधृत दध्रे धर्त्ता धरिष्यते 'ऋस्मिपूङ' (४।४।४८) इति सनीटि दिधरिषते । 'ऋवर्ण०' (५।१।१७) इति ध्यणि धार्यः । 'न्यायावाय०' (५।३।१३४) इत्याधारे घञि आधारः । 'धृंग् धरणे' धरते धरति । इति ऋदन्तास्त्रयोनिटः । ओविजैति धातुं (पृष्ठ ७२०) कण्ठतो निर्दिशति । **ओविजैतीति** । इडागमे सूत्रम् 'विजे०' (४।३।१८) स्पष्टम् । उदविजि उदविजिषाताम् उद्विजिषत ५ । उद्विजिजे ६ । उद्विजिता ८ । इट एव ङित्त्वं नान्यत्र उद्वेजनम् । ऐदित्त्वात् क्तयोर्नेट् २ । उद्विग्नः २ । 'सूयत्याद्योदितः' (४।२।७०) इति क्तयोस्तस्य नत्वम् । णौ क्ते उद्वेजितः । 'व्यञ्जनाद्०' (५।३।१३२) इति करणे घञि वेगः । '**ओलजैङ् ओलस्जैति** व्रीडे' लजते अलजिष्ट ललजे लजिता । ऐदित्त्वात् क्तयोर्नेट् ओदित्त्वात् 'सूयत्या'दीति क्तयोस्तस्य नत्वे लग्नः लग्नवान् । नादिरयमिति **चन्द्रः** नग्नः । ओलस्जैधातुं (पृष्ठ ७२०) कण्ठतो निर्दिशति 'सस्य शषौ' (१।३।६१) इति शे, तस्य 'तृतीयस्तृतीय०' (१।३।४९) इति जे लज्जते अलज्जिष्ट ललज्जे लज्जिता । ऐदित्त्वात् क्तयोर्नेट् । ओदित्त्वात्तस्य नत्वे, 'संयोगस्यादौ०' (२।१।८८) इति सलुकि लग्नः २ । भिदाद्यङि लज्जा । उणादौ लस्जीर्ष्यिशलेरालुः (८३२) इत्यालौ लज्जालुर्लज्जाशीलः । **भ्वादौ युक्तपाठावप्येतौ प्रसिद्ध्यनुरोधादिह पठितौ** । '**ष्वञ्जित्** सङ्गे' 'षः स०' (२।३।९८) इति से । '**स्वञ्जश्च**' (२।३।४५) उपसर्गस्थान्नाम्यादेः परस्य स्वञ्जेः सकारस्य द्वित्वेऽप्यद्यपि षः स्यात् । 'नो व्यञ्जनस्या०' (४।२।४५) इति नलुकि अभिष्वजते प्रतिष्वजते परिष्वजते । एवमभिषिष्वङ्क्षते अभिषाष्वज्यते अभ्यष्वजत अभ्यषष्वञ्जत् णौ ङे रूपम् ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

अस्यानिट्त्वेऽपि नत्रा निर्दिष्टस्यानित्यत्वादिति अस्वञ्जिष्ट अस्वञ्जिषाताम् । परोक्षायां स्वादेरेव षत्वम् । 'स्वञ्जेर्नवा' (४।३।२२) इति सूत्रेण परोक्षाया वा कित्त्वे परिषस्वजे परिषस्वञ्जे । परिनिपूर्वस्य 'स्तुस्वञ्जश्चाटि नवा' (२।३।४९) इत्यड्व्यवाये वा षत्वे पर्यष्वजत २ व्यष्वजत २ अनुस्वारेत्त्वात् परिष्वङ्क्ता परिष्वङ्क्तुम् परिष्वक्तः । 'जनशो न्युपान्त्ये तादिः क्त्वा' (४।३।२३) इति क्त्वो वा कित्त्वे स्वक्त्वा स्वङ्क्त्वा । स्वङ्क्तुम् । घञि परिष्वङ्गः । क्तौ स्वक्तिः । परिष्वक्तिः । इति जान्ताश्चत्वारः ४ । तत्र त्रयः सेटः अन्त्योऽनिट् । जुँषैतिधातुं (पृष्ठ ७२०) कण्ठतो निर्दिशति । **जुषैतीति** जुषते अजोषिष्ट जुजुषे जोषिता जोषितुम् । ऐदित्त्वात् क्तयोर्नेट् जुष्टः २ । 'ह्वृग्०' (५।१।४०) इति क्यपि जुष्यः । क्विपि 'सजुषः' (२।१।७३) इति निर्देशात् सहस्य सत्वे षस्य रुत्वे सजूः सजुषौ । 'जुषण् परितर्कणे' 'युजादेः०' (३।४।१८) इति वा णिचि जोषयति जोषति ॥

आत्मनेपदिनोऽत्रैकादशोभयपदा दश । परस्मैपदिनः सप्तत्रिंशशतममीषु च ।
मुचादयोऽष्टावेकोनचत्वारिंशत् कुटादयः । अष्टपञ्चाशदधिकं शतं सर्वे तुदादयः ॥ १ ॥

यां शिष्योद्धुतकीर्तिकीर्तिविजयश्रीवाचकार्हर्मणे
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः ।
तस्यां शासितसाधुशब्दसरणौ स्वोपज्ञसत्प्रक्रिया-
वृत्तौ साधु तुदादयः शविकृताः पूर्णाः सुखं धातवः ॥ १ ॥



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अथ रुधादयः ।

**'रुधूंपी आवरणे'**

अथ रुधादयः श्नविकरणा वर्णक्रमेण प्रदर्श्यन्ते । तत्र पूर्वमुभयपदिनस्तत्रापि प्रसिद्ध्यनुरोधात्पूर्वं रुधिधातुं निर्दिशति । **रुधूंपीति** । अत्र सूत्रम्

### रुधां स्वराच्छ्नो न लुक् च ॥ १ ॥ [ सि० ३।४।८२ ]

रुधादीनां स्वरात्परः कर्तर्यर्थे शिति श्नः स्यात्तद्योगे प्रकृतेर्नलुक् च । रुणद्धि । अविति शिति श्नास्त्योर्लुगित्यकारलुकि रुन्द्धः रुन्धन्ति । रुणत्सि रुन्द्धः रुन्द्ध । रुणध्मि रुन्ध्वः रुन्ध्मः १ । रुन्ध्यात् २ । रुणद्धु रुन्द्धि-रुन्द्धात् रुणधानि ३ । अरुणत् २ अरुन्धन् ४ । ऋदित्त्वाद्वाङि, अरुधत् अरौत्सीत् ५ । रुरोध ६ । रुन्ध्यात् ७ । रोद्धा ८ । रोत्स्यति ९ । अरोत्स्यत् १० ॥ रुन्द्धे रुन्धते १ । रुन्धीत २ । रुन्द्धाम् रुणधै ३ । अरुन्द्ध ४ । अरुद्ध ५ । रुरुधे ६ । रुत्सीष्ट ७ । **'युजूंपी योगे'** युनक्ति युङ्क्तः १ । अयुनक् २ । ४ । अयुजत् अयौक्षीत् ५ । युयोज ६ । युक्ता ८ । युङ्क्ते ४ । अयुक्त ५ । युयुजे ६ । युक्षीष्ट ७ । योक्ता ८ । **'भिदूंपी विदारणे'** भिनत्ति भिन्तः ४ । अभिदत् अभैत्सीत् ५ । भिन्ते ४ । अभित्त ५ । **'छिदूंपी द्वैधीकरणे'**

→ इत्युभयपदिनः । ←

**'रुधां०'** तद्योगे नलुक् चेति प्रकृतिनकारस्य लुगन्वाचीयते, प्रत्ययनकारस्य तु विधानसामर्थ्यान्न भवति । शकारः 'श्नास्त्योर्लुक्' ( ४।२।९० ) इत्यत्र विशेषणार्थः । रुणद्धीत्यादि व्यक्तम् । 'श्नां धुड्वर्गेऽन्त्योपदान्ते' ( १।३।३९ ) इत्रत्य श्नामिति बहुवचनाण्णत्वापवादे ने रुन्धः । ह्यस्तन्यां **'सेः स्द्धां च रुर्वा'** ( ४।३।७९ ) धातोर्व्यञ्जनात्परस्य सेर्लुक्, सकारदकारधकाराणां च यथासंभवं रुर्वा भवति । इति सिचो लुकि धकारस्य रुत्वे अरुणस्त्वम् । अरुणत्त्वम् । रोरुदित्करणं उत्वादि कार्यं यथा स्यात् । अरुणोऽत्र । अद्यतन्यां अरुधदिति, पक्षे सिचि 'व्यञ्जनानामनिटि' ( ४।३।४५ ) इति वृद्धौ अरौत्सीत् । आत्मनेपदे 'धुड्ह्रस्वाद्०' ( ४।३।७० ) इति सिज्लुकि अरुद्ध । कर्मकर्त्तरि रुध इति ञिच्प्रतिषेधे अरुद्ध गौः स्वयमेव । रोद्धा । रोद्धुम् । रुद्धः । केऽरुधः प्ररुधः । 'प्रहादिभ्यः' ( ६।३।६३ ) इति णिनि अपरोधी उपरोधी । 'समनुव्यवाद्रुधः' ( ५।२।६३ ) इति घिनणि संरोधशीलः संरोधी अनुरोधी विरोधी अवरोधी । 'उपपीडरुधकर्षस्तत्सप्तम्याः' ( ५।४।७५ ) इति णमि व्रजोपरोधं गाः सादयति । 'तृतीयोक्तं वा' ( ३।१।५० ) इति समासः । पक्षे व्रजेनोपरोधं व्रजोपरोधम् । उणादौ शुषीषि० ( ४१६ ) इति कितीरे रुधिरम् । इति धान्त एकोऽनिट् । **'रिचूंपी विरेचने'** । विरेचनं निस्सारणम् । रिणक्ति । ऋदित्त्वाद्वाङि, अरिचत्, पक्षे अरैक्षीत् । रिरेच । रेक्ता । रेक्तुम् । रिक्तः ॥ रिङ्क्ते अरिक्त रिरिचे । उणादौ नीनूरमि० ( २२७ ) इति किति थे रिक्थम् । 'रिचण् वियोजने च' 'युजादे०' ( ३।४।१८ ) इति वा णिचि रेचयति रेचति । **'विचूंपी पृथग्भावे'** । विनक्ति अविचत् अवैक्षीत् । विवेच । वेक्ता ॥ विङ्क्ते अविक्त विविचे विविक्तः । घञि 'क्तेनिट०' ( ४।१।१११ ) इति चस्य कत्वे विवेकः । इति चान्तावनिटौ । युज्-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

धातुं कण्ठतो निर्दिशति । **युजूंपी**त्यादि स्पष्टम्, 'उत्स्वराद्युजेरयज्ञतत्पात्रे' ( ३।३।२६ ) इत्यात्मनेपदनियमे उद्युङ्क्ते प्रयुङ्क्ते । नेह द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति । यज्ञे यद्यज्ञपात्रं तद्विषयस्यैव युज्यर्थस्य वर्जनादिहात्मनेपदमेव । रन्धने यज्ञपात्रं प्रयुङ्क्ते यज्ञे रन्धनपात्रं प्रयुङ्क्ते । योक्ता योक्तुम् वियुक्तः । 'युजिँच् समाधौ' युज्यते । इति जान्तोऽनिट् । **भिदू** धातुं कण्ठतः पठति । **भिदूंपीति** 'रदादमूर्च्छमदः क्तयोर्दस्य च' ( ४।२।६९ ) इति नत्वे भिन्नः २ । भित्तं शकलम् भिन्नमन्यत् । 'कुप्यभिद्योध्यसिध्यतिष्यपुष्ययुग्याज्यसूर्यं नाम्नि' ( ५।१।३९ ) इति क्यपि निपातनात् भिनत्ति कूलानीति भिद्यो नदः । 'कर्मणोऽण्' ( ५।१।७२ ) इत्यणि काष्ठभेदः । 'असरूपोपवादे वोत्सर्गः प्राक्क्तेः' ( ५।१।१६ ) इति क्विपि काष्ठभिद् । 'वेत्तिच्छिदभिदः कित्' ( ५।२।७५ ) इति किति घुरे भिदुरं काष्ठम् । भिदाद्यङि भिदा विदारणम्, भित्तिरन्या । उणादौ कृतिपुति० ( ७६ ) इति किति तिके भित्तिका कुड्यम् । विहाविशापचिभिद्यादेः केलिमः ( ३५४ ) विपूर्वाभ्यां 'ओहांक् त्यागे' 'शोंच् तक्षणे', इत्येताभ्यां पच्यादिभ्यश्च कित् एलिमः प्रत्ययो भवति । भिनत्तीति भिदेलिमस्तस्करः । ऋज्यजि० ( ३८८ ) इति किति रे भिद्रं अदृढम् । शुषीषि० ( ४१६ ) इति किति इरे भिदिरः अशनिः । 'नाम्युपान्त्य०' ( ६०९ ) इति किदिः भिदिः वज्रम् । एवं '**छिदूंपी** द्वैधीकरणे' अद्वैधस्य पृथक्त्वे, छिनत्ति । अच्छिदत् अच्छैत्सीत् । चिच्छेद ॥ छिन्ते अच्छित्त छेत्ता छिन्नः । क्विपि रज्जुच्छित् । 'वेत्ति०' ( ५।२।७५ ) इति किति घुरे छिदुरा रज्जुः । भिदाद्यङि छिदा द्वैधीभावः । छित्तिः विच्छित्तिश्चान्या । उणादौ ऋज्यजि०' ( ३८८ ) इति किति रे छिद्रम् । शुषीषि० ( ४१६ ) इति किति इरे छिदिरः उन्दुरः, छिदिरं शस्त्रम् । 'नाम्युपान्त्य०' ( ६०९ ) इति किदिः छिदिः छेत्ता परशुश्च । '**क्षुदूंपी** संपेषे' क्षुणत्ति अक्षुदत् अक्षौत्सीत् चुक्षोद ॥ क्षुन्ते अक्षुत्त क्षोत्ता क्षुण्णः २ । उणादौ 'ऋज्यजि०' ( ३८८ ) इति किति रे क्षुद्रः । '**ऊछृदृंपी** दीप्तिदेवनयोः' वमनेऽप्यन्ये, । छृणत्ति अछृदत् अछर्दीत् । छृन्ते 'कृतचृत०' इति सूत्रे सिचो वर्जनात् 'धूगौदितः' ( ४।४।३८ ) इत्यनेनापि वेट्त्वाभावात् सिचः 'स्ताद्यशित०' (४।४।३२) इति नित्यमिटि अछर्दिष्ट । अशिति सादौ 'कृतचृतनृतच्छृदतृदोऽसिचः सादेर्वा' ( ४।४।५० ) इति वेटि छर्त्स्यति छर्दिष्यति । सिचि तु नित्यमिटि अच्छर्दीत् । णौ ङे 'ऋद्वर्णस्य' ( ४।२।३७ ) इति ऋतो वा ऋत्त्वे अचिच्छृदत् । ऊदित्त्वात् क्त्वि वेट् छृत्त्वा छर्दित्वा । वेट्त्वात् क्तयोर्नेट् छृण्णः २ । ऋदुपान्त्याद०' ( ५।१।४१ ) इति क्यपि छृद्यम् । उणादौ रुच्यर्चिशुचिहुसृपिछादिछृदिभ्य इस् ( ९८९ ) इतीसि छर्दिर्वमनम् । '**ऊतृदूंपी** हिंसानादरयोः' तृणत्ति ऋदित्त्वाद्वाङि अतृदत् अतर्दीत् । आत्मनेपदे तु अतर्दिष्ट तर्दिता । अशिति सादौ 'कृतचृत० ( ४।४।५० ) इति वेटि तर्त्स्यति तर्दिष्यति । ऊदित्त्वात् क्त्वि वेट् तृत्त्वा तर्दित्वा । क्तयोर्नेट् तृण्णः २ । उणादौ पदिपठि०' ( ६०७ ) इत्यौ वितर्दिः । स्वार्थे के वितर्दिका वेदिः । इति दान्ताः पञ्च । तत्राद्यस्त्रयोऽनिटः शेषौ द्वौ सेटौ । इति नवोभयपदिनः ।

'**भञ्जोप् आमर्दने**' । भनक्ति भङ्क्तः १ । अभनक् २ । अभनजम् ४ । अभाङ्क्षीत् ५ । बभञ्ज ६ । भज्यात् ७ । भङ्क्ता ८ । भङ्क्ष्यति ९ । '**भुजंप्** पालनाभ्यव्यवहारयोः' । भुनक्ति १ । दिवि अभुनक् ४ । अभौक्षीत् ५ । बुभोज ६ । भुज्यात् ७ । ॥ १ ॥

अथ परस्मैपदिषु '**पृचैप्** संपर्के' । पृणक्ति । ह्यस्तन्यां 'व्यञ्जनादेः०' ( ४।३।७८ ) इति दिवो लुकि अपृणक् । अद्यतन्यां अपर्चीत् । पपर्च पपृचतुः । सम्पर्चिता । ऐदित्त्वात् क्तयोर्नेट् सम्पृक्तः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

२। 'समः पृचैप्ज्वरेः' (५।२।५६) इति घिनणि संपर्कशीलः संपर्की। घञि 'क्तेऽनिट०' (४।१।१११) इति के पर्कः। मधुना पर्कः मधुपर्कः। संपर्कः। 'पृचैकृङ् संपर्चने' पृक्ते। 'पृचण् संपर्चने। 'युजादेः०' (३।४।१८) इति वा णिचि संपर्चयति, संपर्चति। 'वृचैप् पूरणे' (वरणे हैं० धा० पारायणे) वृणक्ति वृङ्क्तः वृञ्चन्ति। दिवि अवृणक्। अवर्चीत्। ववर्च ववृचुः। वर्चिता। ऐदित्त्वात् क्तयोर्नेट् वृक्तः २। घञि 'क्तेऽनिट्०' (४।१।१११) इति के वर्कः। जान्तोऽयमित्यन्ये। जान्तोऽपि वर्जनार्थ इत्येके वृञ्जन्ति ववर्ज। घञि वर्गः। 'तञ्चू तञ्चौप् सङ्कोचने' तनक्ति तङ्क्तः तञ्चन्ति। दिवि अतनक्। अतञ्चीत् अतञ्चिष्टाम् अतञ्चिषुः। ततञ्च। तञ्चिता। ऊदित्त्वात् क्त्वि वेट् तङ्क्त्वा तञ्चित्वा। क्तयोर्नेट् तक्तः २। उणादौ ऋज्यजि० (३८८) इति किति रे न्यङ्क्वादित्वात् के तक्रम्। औदिदयमित्येके। तन्मते औदित्त्वाद्वेट्। तङ्क्ता तञ्चिता। अद्यतन्यां अताङ्क्षीत् अताङ्क्ताम् अताङ्क्षुः। पक्षे प्राग्वत्। इति चान्तास्त्रयः सेटः। तञ्जौ तनक्ति तङ्क्तः। अताङ्क्षीत् अताङ्क्ताम् अताङ्क्षुः। पक्षे, अतञ्जीत् अतञ्जिष्टाम् अतञ्जिषुः। औदित्त्वाद्वेट् तङ्क्ता तञ्जिता क्तयोर्नेट् तक्तः २। 'जनशो न्युपान्त्ये तादिः क्त्वा' (४।३।२३) इति क्त्वो वा कित्त्वे तक्त्वा तङ्क्त्वा। इटि तञ्जित्वा। 'क्त्वा' (४।३।२९) इति कित्त्वाभावान्न नो लुक्। भञ्जौप् धातुं व्यक्तया पठति (पृष्ठ ७२४)। भनक्तीत्यादि। 'व्यञ्जनानां०' (४।३।४५) इति वृद्धौ अभाङ्क्षीत्। बभञ्ज। 'भञ्जेर्ञौ वा' (४।२।४८) इति वा नलुकि अभाजि अभञ्जि। यङि 'जपजभ०' (४।१।५२) पूर्वस्य म्वागमे बम्भजति। अनिट्त्वात् भङ्क्ता। ओदित्त्वात् 'सूयत्याद्योदितः' (४।२।७०) इति क्तयोस्तस्य नत्वे भग्नः २। 'जनशो०' (४।३।२३) इति क्त्वो वा कित्त्वे भक्त्वा भङ्क्त्वा। 'भञ्जिभासि०' (५।२।७४) इति घुरे भङ्गुरं काष्ठम्। घञि भङ्गा धान्यविशेषः, भङ्गोऽन्यः।

भुजंप् धातुमपि स्पष्टं पठति (पृष्ठ ७२४)। अभ्यवहारो भोजनम्। भुङ्क्तेऽन्नमित्यादि पालनार्थे भुनक्ति भुवमित्यादि ॥ १ ॥ त्राणादन्यत्र

## भुनजोऽत्राणे ॥ २ ॥ [ सि० ३।३।३७ ]

पालनादन्यार्थाद् भुनक्तेः कर्त्तर्यात्मनेपदं स्यात्। भुङ्क्ते ४। अभुक्त ५। बुभुजे ६। भुक्षीष्ट ७। अँञ्जौप् व्यक्तिम्रक्षणकान्तिगतिषु। अनक्ति अङ्क्तः १। अञ्ज्यात् २। अनक्तु अङ्ग्धि अङ्क्तात् ३। आनक् २। ४। ॥ २ ॥

भुङ्क्तेऽन्नमित्यादि। भुङ्क्ते भूमिमखिलामित्यादिप्रयोगास्तु भूमिफलभोक्तृत्वविवक्षयेति। भोक्ता। गत्यर्थे वा कर्त्तरि क्ते भुक्तश्चैत्रोऽन्नम्। पक्षे कर्मणि भुक्तमन्नं चैत्रेण। पक्षे भावे भुक्तं चैत्रेण। णौ 'गतिबोध०' (२।२।५) इत्यणिक्कर्तुः कर्मत्वे 'चल्याहारार्थ०' (३।३।१०८) इति फलवत्कर्त्तर्यपि परस्मैपदे भोजयति चैत्रं पयो मैत्रः। 'ऋवर्ण०' (५।१।१७) 'क्तेऽनिट०' (४।१।१११) इति गे भोग्या भूः। 'भुजो भक्ष्ये' (४।१।११७) इति गत्वाभावे भोज्यमन्नम्। 'व्यञ्जनाद्०' (५।३।१३२) इति करणे घञि 'भुजन्युब्जं०' (४।१।१२०) इति निपातनात् भुजः पाणिः। विश्वाद्भिदिभुजिभ्याम् (९५६) विश्वपूर्वाभ्यामाभ्यामसूप्रत्ययो भवति। विश्वभोजा अग्निर्लोकपालश्च। 'भुजोंत् कौटिल्ये' निभुजति। अँञ्जौप्धातुं स्पष्टं पठति। अञ्जौप् व्यक्तिम्रक्षणगतिष्विति व्यक्तिः प्रकटता, म्रक्षणं घृतादिसेकः। तत्र केवलस्य म्रक्षण एव वृत्तिः, सोपसर्गस्य तु शेषयोरिति विवेकः। अनक्ति। व्यनक्ति। अभ्यनक्ति। अङ्क्तः अञ्जन्ति ॥ २ ॥ अद्यतन्यां सूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## सिचोऽञ्जेः ॥ ३ ॥ [ सि० ४।४।८४ ]

**अञ्जेः सिच आदिरिट् स्यात् । आञ्जीत् ५ । आनञ्ज ६ । अज्यात् ७ । औदित्त्वात् अङ्क्ता अञ्जिता ८ । 'शिष्लृंप् विशेषणे' शिनष्टि शिंष्टः शिंषन्ति १ । शिंष्यात् २ । शिनष्टु । शिन् ष हि इति स्थिते । हेर्धिः, धुटस्तृतीयेति षस्य डः, तवर्गश्चवर्गेति धेर्ढिः । म्नां धुड्वर्गे इति नस्य णः ॥ ३ ॥**

**'सिचो०'** सिच इति किम् ? अङ्क्ता अञ्जिता । औदित्त्वाद्विकल्पे प्राप्ते नित्यार्थं वचनम् । 'अनात०' (४।१।६९) इति पूर्वस्यात्वे नोऽन्ते च आनञ्ज । 'ऋस्मिपूङ्०' (४।४।४८) इति सनीटि 'न बदनं०' (४।१।५) इति नस्य द्वित्वाभावे 'स्वरादे०' (४।१।४) इति जेर्द्वित्वे अञ्जिजिषति । 'जनशो०' (४।३।२३) इति वा क्त्वः किंत्त्वे अक्त्वा अङ्क्त्वा । इटि अञ्जित्वा । क्तयोर्नेट् अक्तः २ । आञ्जयति आञ्जिजत् । 'कुप्यभिद्य०' (५।१।३९) इति निपातनात् आज्यं घृतम् । संज्ञाया अन्यत्र 'ऋवर्ण०' (५।१।१७) इति घ्यणि, 'क्तेऽनिट०' (४।१।१११) इति गे अङ्ग्यम् । उणादौ पाट्यञ्जिभ्यामलिः (७०२) अञ्जलिः । अञ्ज्यवेरिष्णु (७६४) अञ्जिष्णुर्भानुरग्निश्च । अञ्जयतेः कित् (७७७) इति तुनि अक्तुः इन्द्रः । असू (९५२) इत्यसि अञ्जः स्नेहः । **'ओविजैप** भयचलनयोः' विनक्ति विङ्क्तः । 'विजेरिट्' (४।३।१८) इति इटो ङित्त्वात् न गुणः उदविजीत् उदविजिष्टाम् । विवेज विविजिम । उद्विजिता । ओदित्त्वात् 'सूयत्याद्योदितः' (४।२।७०) इति क्तयोस्तस्य नत्वे उद्विग्नः २ । 'ओविजैति भयचलनयोः' उद्विजते । इति जान्ताः पञ्च सेटः । **'कृतैप्** वेष्टने' कृणत्ति कृन्तः । अकृणत् । सिचि अकर्तीत् । चकर्त । कर्तिता । सादावशिति 'कृतचृत०' (४।४।५०) इति वेटि कर्त्स्यति कर्तिष्यति । वेट्त्वात् क्तयोर्नेट् कृत्तः २ । ऐदित्त्वात् यङ्लुप्यनेकस्वरादपि क्तयोर्नेट् चरीकृत्तः २ । 'क्त्वा' (४।३।२९) इति कित्त्वाभावाद्गुणे कर्तित्वा । उणादौ कृति० (७६) इति के कृत्तिका । कृतेस्तर्क च (७०३) इत्युः तर्कुः सूत्रवेष्टनशलाका । इति तान्तः सेट् । **'उन्दैप्** क्लेदने' उनत्ति उन्तः उन्दन्ति । औन्दीत् । 'गुरुनाम्यादेः०' (३।४।४८) इति परोक्षाया आमि उन्दाञ्चकार । उन्दिता । सनि 'न बदनं०' (४।१।५) इति नस्य द्वित्वाभावे, 'स्वरादेः०' (४।१।४) इति देरेव द्वित्वे उन्दिदिषति । ऐदित्त्वात् क्तयोर्नेट् 'ऋह्रीघ्राघ्रात्रोंदनुदविन्तेर्वा' (४।२।७६) इति क्तयोस्तस्य वा नत्वे समुन्नः २ समुत्तः २ । 'दशनावोदे०' (४।२।५४) इति निपातनात् अवोदः । मनि उ(ओ?)द्मः उ(ओ?)द्मनी । उणादौ धुधून्दि० (२९) इति किल्के उदकम् । उन्देर्न लुक् च (२७१) इत्यने ओदनः । ऋज्यजि० (३८८) इति किति रे उद्रः ऋषिः । समुन्दन्त्यार्द्रीभवन्ति वेलाकाले नद्योऽस्मादिति समुद्रः । इन्द्र इति तु मीवृधि० (३८७) इति रे इन्दतेः । मृधुन्दि० (३९९) इति किरे उदरम् । वाश्यसि० (४२३) इत्युरे उन्दुरः । ऋजिरिषि० (५६७) इति किति से उत्सः प्रस्रवणम् । इति दान्तोऽनिट् । शिष्लंप्धातुं पाठतः प्रकटयति । **शिष्लृंप्** विशेषणे इति । विशेषणं गुणान्तरोत्पादनम् । शिनष्टि विशिनष्टीत्यादौ ॥ ३ ॥

## धुटो धुटि स्वे वा ॥ ४ ॥ [ सि० १।३।४८ ]

**व्यञ्जनात्परस्य धुटो धुटि स्वे परे लुग्वा स्यात् । इति डलोपे, शिण्ढि शिनषाणि ३ । अशि-**

नट्-ड् ४ । अशिषत् ५ । शिशेष ६ । शिष्यात् ७ । शेष्टा ८ । शेक्ष्यति ९ । 'हिंसुतृहप् हिंसायाम्' उदितः स्वरादिति नागमे, तल्लोपे च, हिनस्ति हिंस्तः हिंसन्ति १ । हिंस्यात् २ । हिनस्तु हिन्धि ३ । व्यञ्जनादेः सश्च दः । अहिनत्-द् ४ । अहिंसीत् ५ । जिहिंस ६ । हिंस्यात् ७ । हिंसिता ८ । ॥ ४ ॥

'धुटो०' पञ्चम्या हौ शिण्ढीति । अत्र श्नस्याकारलोपो श्नामिति वर्गान्त्ये कर्त्तव्ये 'न सन्धिः' (१।३।५२) इति स्थानी न भवति । एवमन्यत्रापि । अद्यतन्यां लृदित्त्वादङि अशिषत् । विशिशेष । अनुस्वारेत्त्वान्नेट् शेष्टा । शेष्टुम् शिष्टः । 'ऋवर्ण०' (५।१।१७) इति घ्यणि विशेष्यः । कर्मण्यात्मनेपदे 'हशिट०' (३।४।५५) इति सकि व्यशिक्षन्त । घञि विशेषः । विनयादित्वात् स्वार्थे इकणि वैशेषिकः । 'शिषण् असर्वोपयोगे' युजादित्वाद्वा णिचि शेषयति । अलि विशेषः । पक्षे शेषति । घञि शेषः । 'पिष्लृंप् संचूर्णने' । 'जासनाट०' (२।२।१४) इति वा कर्मणः कर्मत्वे 'शेषे' (२।२।८१) इति षष्ठ्यां चौरस्य चौरं वा पिनष्टि । हिंसार्थादन्यत्र धानाः पिनष्टि । षान्तत्वात् 'अकखाद्यषान्ते पाठे वा' (२।३।८०) इति नेर्णत्वाभावे प्रनिपिनष्टि । लृदित्त्वादङि अपिषत् । कर्मण्यात्मनेपदे 'हशिट०' इति सकि अपिक्षन्त । अनुस्वारेत्त्वान्नेट् पेष्टा पेष्टुम् । पिष्टः । घञि पेषः । 'शुष्कचूर्ण०' (६।४।६०) इति णमि शुष्कपेषं पिनष्टि । चूर्णपेषम् । रूक्षपेषम् । 'स्वस्नेहार्थात्०' (५।४।६५) इति णमि तैलपेषं पिनष्टि । उणादौ पिषेः पिन्पिण्यौ च (३६) इत्याके पिनाकम् रुद्रधनुः । पिण्याकस्तिलखलः । इति षान्तावनिटौ । **हिंसुतृहपौ** कण्ठतो निर्दिशति । हिनस्तीत्यादि । हिंसार्थवर्जनात् क्रियाव्यतिहारेऽपि नात्मनेपदम् व्यतिहिंसन्ति । 'हुधुटो०' (४।२।८३) इति हेर्धौ 'सोधि वा' (४।३।७२) इति वा सो लुकि हिन्धीति । 'व्यञ्जनादेः सश्च दः' (४।३।७८) इति दो लुकि सस्य दत्वे च अहिनद् इति 'सेः स्द्धां०' (४।३।७९) इति सिचो लुकि सस्य वा रुत्वे च अहिनस्त्वम् अहिनत्त्वम् । हिंसिता । हिंसितः । अचि हिंसः । 'निन्दहिंसक्लिशखादविनाशिव्याभाषासूयानेकस्वरात्' (५।२।६८) इति णके । हिंसाशीलो हिंसकः । 'स्म्यजसहिंसदीपकम्पकमनमो रः' (५।२।७९) इति रे हिंस्रः । 'क्तेट०' (५।३।१०६) इत्यः हिंसा । उणादौ खलिहिंसिभ्यामीनः (२८६) हिंसीनः श्वापदः । कृशृपृ० (४१८) इतीरे हिंसीरो हिंस्रः । हिंसेः सिम् च (५८८) अस्माद् हः प्रत्ययोऽस्य च सिमित्यादेशः सिंहः । इति (सान्तः) सेट् । ॥ ४ ॥ **तृहप्** इति अत्र सूत्रम्

## तृहः श्नादीत् ॥ ५ ॥ [ सि० ४।३।६२ ]

तृहः श्नात्पर ईत् स्यात् व्यञ्जनादाविति । तृणेढि तृण्ढः । शिड्हेऽनुस्वार इति तृंहन्ति । तृणेक्षि तृणेह्मि १ । तृंह्यात् २ । तृणेढु । हौ तृण्ढि तृणहानि ३ । अतृणेट् अतृण्ढाम् अतृंहन् ४ । अतर्हीत् ५ । ततर्ह ६ । तृह्यात् ७ । तर्हिता ८ । ॥ ५ ॥

इति महोपाध्यायश्रीकीर्तिविजयगणिशिष्योपाध्यायश्रीविनयविजयगणिविरचितायां

हैमलघुप्रक्रियायां रुधादयः समाप्ताः ।

'तृह०' सर्वं व्यक्तम् । तृहितः २ । तृणमिति तु भ्रूणतृणेति (१८६) निपातनाण्णे तरतेः । सनि तितर्हिषति । यङि तरीतृह्यते । यङ्लुपि तरितृहीति ततर्ढि तर्तृढः ३ । तर्तृहति । णौ तर्हयति । अतीतृहत् अततर्हत् । इति हान्तः सेट् १४ । →⁂ इति परस्मैपदिनः । ⁂←

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**खिदिंप्** दैन्ये'। खिन्ते अखिन्त चिखिदे अनुस्वारेत्वान्नेट् खेत्ता । 'खिदिंच् दैन्ये' खिद्यते । 'खिदंत् परिघाते' खिन्दति । '**विदिंप्** विचारणे' विन्ते अवित्त विविदे वेत्ता । 'ऋह्रीघ्राधात्रोन्दनुदविन्तेर्वा' (४।२।७६) इति क्तयोस्तस्य वा नत्वे विन्नः २ । वित्तः २ । इति दान्तौ द्वावनिटौ । '**ञिइन्धैपि** दीप्तौ' इन्द्धे । 'धुटो धुटि स्वे वा' (१।३।४८) इति वा दलुकि इन्धे समिन्धे तेजस्वी भवतीत्यर्थः । ऐन्धिष्ट । 'जागुषसमिन्धेर्नवा' (३।४।४९) इति परोक्षाया वा आमि समिन्धाञ्चक्रे । पक्षे 'इन्ध्यसंयोगात्परोक्षा किद्वत्' (४।३।२१) इति परोक्षायाः कित्त्वान्नलुकि द्वित्वे च समीधे समीधिमहे । इन्धिता । ऐदित्त्वात् क्तयोर्नेटि वेट्त्वात् सति क्ते समिद्धः २ । सनि इन्दिधिषति । णौ समिन्धयति । ङे ऐधिधत् । संपदादित्वात् क्विपि समित् । 'दशनावोदैधोद्मप्रश्रथहिमश्रथम्' (४।२।५४) इति निपातनात् नो लुकि घञि एधः । उणादौ ऋज्यजि० (३८८) इति रे वीध्रं विमलम् । येन्धिभ्यां यादैधौ च (९६८) आभ्यामस् यथासङ्ख्यं याद एध इत्यादेशौ भवतः । एधः इन्धनम् । इति धान्तः सेट् । इत्यात्मनेपदिनस्त्रयः ।

'नवाऽत्रोभयपदिन आत्मनेपदिनस्त्रयः । परस्मैपदिनः शेषाः १४ षड्विंशतिरमी समे' ॥ १ ॥

यां शिष्योद्धुतकीर्त्तिकीर्त्तिविजयश्रीवाचकाद्दर्मणे
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः
तस्यां शासितसाधुशब्दसरणौ स्वोपज्ञसत्प्रक्रिया-
वृत्तौ साधु रुधादयः अविकृता पूर्णाः सुखं धातवः ॥ १ ॥

## अथ तनादयः ।

**'तनूयी विस्तारे' 'कृगतनादेरुः' 'उश्नोः'** । तनोति तनुतः तन्वः-तनुवः ४ । अतानीत्-अतनीत् ५ । ततान ६ । तन्यात् ७ । तनिता ८ । तनुते तन्वहे-तनुवहे ४ ।

अथ तनादय उविकरणा वर्णक्रमेण प्रदर्श्यन्ते । तत्र पूर्वमुभयपदिन उच्यन्ते । **तनूयी**ति 'वम्यविति वा' (४।२।८७) इति वोतो लुकि तनुवः तन्व इत्यादि । 'व्यञ्जनादेर्वोपान्त्यस्यातः' (४।३।४७) इति वृद्धिविकल्पे अतानीत् अतनीत् इति । आत्मनेपदे अद्यतन्यां सूत्रम्

### तन्भ्यो वा तथासि न्णोश्च ॥ १ ॥ [ सि० ४।३।६८ ]

**तनादिभ्यः परस्य सिचस्ते थासि च परे लुप् वा स्यात्तद्योगे न्णोश्च लुप् न चेद् । अतत अतनिष्ट, अतनिषाताम् अतनिषत । अतथाः अतनिष्ठाः ५ । तेने ६ । तनिषीष्ट ७ । 'षणूयी दाने' सनोति ४ । असानीत्-असनीत् ५ । ससान ६ । सनुते ४ । ॥ १ ॥**

**'तन्भ्यो०'** इह परस्मै इति निवृत्तम् । थासूग्रहणम् थासूसाहचर्याच्च तप्रत्ययो आत्मनेपदसम्बन्ध्येव गृह्यते, तेनेह न भवति । अतनिष्ट यूयम् । 'तनः क्ये' (४।२।६३) इति नस्य वा आत्वे तायते तन्यते । 'इवृध०' (४।४।४७) इति सनि वेट् । **'तनो वा'** (४।१।१०५) तनोतेर्धुडादौ स्वरस्य दीर्घो वा भवति । तितांसति तितंसति पक्षे तितनिषति । ऊदित्त्वात् क्त्वि वेट् 'यमिरमि०' (४।२।५५) इति नलुकि तत्वा तनित्वा इति । वेट्त्वात् क्तयोर्नेट् ततः । यङि तंतन्यते । यङ्लुपि तंतनीति तंतन्ति । 'अहन्पञ्चम०' (४।४।१०७) इति दीर्घे तन्तान्तः । 'यमिरमी'त्यत्र तनादेरिति गणनिर्देशाद्यङ्लुपि नान्तलुक् तंतनति । अद्यतन्यां अतंतनीत्-अतंतानीत् अतंतनिषाताम् । अतंतानिषाताम् । यङ्लुबन्तात् सनि 'इवृध०' इति वेटि तंतनिषति तंतांसति-तंतंसति । तानयति । अतीतनत् । क्तयोर्गणनिर्देशादन्तलोपाभावे 'अहन्पञ्चमस्य' (४।१।१०७) इति दीर्घे च तंतान्तः बंवान्तः । अन्यत्रान्तलोपो भवति यंयतः रंरतः नंनतः इति । 'तन्व्यधी०' (५।१।६४) इति णे तानः अवतानः । 'तिक्कृतौ०' (५।१।७१) इति तिकि 'न तिकि दीर्घश्च' (४।२।५९) एषां तिकि प्रत्यये लुग्दीर्घश्च न भवतः । इति दीर्घनलुकोरभावे तन्तिः तन्त्री । क्विपि 'गतिकारकस्य०' (३।२।८५) इति दीर्घे 'गमां क्वौ' (४।२।५८) इति नलुकि परीतत् । घञि वितानः सन्तानः । स्त्रियां क्तौ ततिः पङ्क्तिः । 'यपि' (४।२।५६) इति नलुकि प्रतत्य । उणादौ सुसितनितुसेर्दीर्घश्च वा (२०३) इति किति ते दीर्घविकल्पे च तातः पिता । ततं वाद्यविशेषः । कृधूतनि० (४४०) इति किति सरे तसरः कौशेयसूत्रम् । तसरः सूत्रवेष्टनम् । त्रसरस्तु पट्टसूत्रमित्येके । त्रद् (४४६) इति त्रटि तत्रं प्रधानम् । कुगुवलिमलिकणितन्याम्यक्षेरयः (३६५) इत्ययप्रत्यये तनयः पुत्रः । भूमृतृ० (७१६) इत्युः तनुः । कृसिकम्यमिगमितनिमनि० (७७३) इति तुनि तन्तुः । कृपिचमि० (८२९) इत्यूः तनूः कायः । तनेर्डउः (७४८) सन्वच्च तितउः परिवपनम् । तनेर्ड्वच् (८७२) त्वक् । तोकम् तुगिति च तौतेः के किकि च (२१) तण्डुल इत्यपि तण्डेरुले (४८५) । **षणूयीति** 'षः स०' (२।३।९८) इति से निमित्ताभावाण्णस्य ने 'व्यञ्जनादेः०' (४।३।४७) इति वृद्धिविकल्पे असानीत् असनीत् । 'तनो वा' (४।१।१०५) इति सिजूनयोर्वा लुपि ॥ १ ॥ सूत्रम्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## सनस्तत्रा वा ॥ २ ॥ [ सि० ४।२।६९ ]

**सनो नलुपि सत्या वा स्यात्। असात असत असनिष्ट, असाथाः असथाः असनिष्ठाः ५। सेने ६। 'क्षणूग् क्षिणूग् हिंसायाम्' क्षणोति ४। नश्विजागृशसेति वृद्धिनिषेधे अक्षणीत् ५। चक्षाण ६। क्षण्यात् ७। क्षणिता ८। क्षणुते ४।**

'**सन०**' सनोतेस्तत्र लुपि सत्यामऽन्तस्य वा आकारो भवति असात असत, असाथाः असथाः। तत्रेति किम्? असनिष्ट असनिष्ठाः। केचिदात्वं न मन्यन्ते, नित्यमेवान्ये। 'इवृध०' (४।४।४७) इति वेटि, '**सनि**' (४।२।६१) खनिसनिजनां धुडादौ सनि परतोऽन्तस्यात्वं भवति। तत्र खनिजनोरिटा भवितव्यमिति धुडादिः सन्न भवतीति सनिरेवात्रावशिष्यते, 'नाम्यन्तस्था०' (२।३।१५) इति षत्वे सिषासति। धुडादाविति किम्? इडागमे सिसनिषति। अत्र सनि षत्वभूते 'णिस्तोरेव०' (२।३।३७) इति नियमान्न षत्वम्, णौ तु षत्वं स्यादेव सन्वन्तं प्रयुङ्क्ते सानयति। सानयितुमिच्छति सिषानयिषति। णौ ङे असीषनत्। औदित्त्वात् क्त्वि वेट् 'आः खनिसनिजनः' (४।२।६०) इत्यात्वे सात्वा पक्षे सनित्वा। वेट्त्वात् क्तयोर्नेट् सातः २। '**ये नवा**' (४।२।६२) खनादीनां क्ङिति प्रत्यये परेऽन्तस्याकारो वा भवति सायते सन्यते। सासायते संसन्यते। प्रसाय प्रसन्य प्रसत्य तनादित्वान्नलुक् 'तिकृतौ०' (५।१।७१) इति तिकि 'न तिकि दीर्घश्च' (४।१।५९) इति दीर्घनलुगभावे सन्तिः। '**तौ सनस्तिकि**' (४।२।६४) सन् इत्येतस्य तिकि प्रत्यये परे तौ नलुगाकारौ वा भवतः। सतिः सातिः। पक्षे सन्तिरिति प्रागुक्तमेव। 'षण भक्तावित्यस्या'पि सन्रूपत्वात् सतिः सातिः सान्तिः॥ 'अहन्पञ्चमस्यं०' (४।१।१०७) इत्यादिना दीर्घः। सातिहेति० (५।३।९४) इति क्तौ निपातनात् सातिः। उणादौ कृवापा० (१) इत्युणि सानुः प्रस्थः। '**क्षणूग् क्षिणूग्**' इति 'रषृवर्णात्०' (२।३।६३) इति नस्य णत्वे क्षणोति। ऊदित्त्वात् क्त्वि वेटि। 'यमिरमि०' (४।२।५५) इति नलुकि क्षत्वा। पक्षे इटि क्षणित्वा। क्तयोर्नेट् क्षतः २। तिकि दीर्घलुकोः प्रतिषेधे 'न्नां०' (१।३।३९) इति णत्वापवादे नस्य ने क्षन्तिः। स्त्रियां क्तौ क्षतिः। **क्षिणू** क्षिणोतीत्यादि 'रषृवर्णा०' (२।३।६३) इति नो णे उपान्त्यगुणं नेच्छन्त्येके। क्षिणुतः क्षिण्वन्ति। क्षिणुते। इत्यादि। क्षेणिता। क्षेणितुम्। औदित्त्वात् क्त्वि वेट् 'यमिरमि०' (४।२।५५) इति नलुकि क्षित्वा। इटि 'वौ व्यञ्जनादेः०' (४।३।२५) इति वा कित्त्वे क्षिणित्वा। क्षेणित्वा। क्तयोर्नेट्। क्षितः २। तिकि क्षिन्तिः २। क्तौ क्षितिः। **अमुं न पठन्त्येके। 'ऋणूयी गतौ'** 'रषृवर्णात्०' इति नस्य णे 'लघो०' (४।३।४) इति गुणे अर्णुते। अर्णोति आर्णिष्ट आर्णीत् आनृणे आनर्ण अर्णिता अर्णितुम्। सनि 'अयि रः' (४।१।६) इति रस्य प्रतिषेधे 'स्वरादेर्द्वितीयः' (४।१।४) इति नेरेव द्वित्वे अर्णिनिषति। ऊदित्त्वात् क्त्वि वेट्। 'यमिरमि०' (४।२।४५) इति नलुकि ऋत्वा। इटि 'क्त्वा' (४।३।२९) इति कित्त्वाभावाद्गुणे अर्णित्वा। ऋतः २। क्तौ ऋतिः। '**तृणूयी अदने**' अदाने इत्यन्ये। 'रषृवर्णात्' इति नस्य णत्वे तर्णुते तर्णोति अतर्णिष्ट अतर्णीत् ततृणे ततर्ण। ऊदित्त्वात् क्त्वि वेट्। 'यमिरमि०' (४।२।५५) इति नलुकि तृत्वा इटि 'क्त्वा' इति कित्त्वाभावे तर्णित्वा। तृणः २। तिकि तृन्तिः। क्तौ तृतिः। '**घृणूयी** दीप्तौ'। 'लघो०' इति गुणे 'रषृवर्णात्०' इति नस्य णे घर्णुते घर्णोति अघर्णिष्ट अघर्णीत् जघृणे जघर्ण घर्णिता घर्णितुम्। ऊदित्त्वात् क्त्वि वेट् घृत्वा। इटि 'क्त्वा' इति कित्त्वाभावे घर्णिता। घृतः २। घृतम्। तिकि घृतिः। णान्तोऽयमित्येके। 'तवर्गस्य०' (१।३।६०) इति तस्य टे घृण्टिः। 'नाम्युपान्त्य०' (५।१।५४)

इति के घृणा । क्तौ घृतिः । उणादौ नाम्युपान्त्य० ( ६०९ ) इति किदिः घृणिः । उविकरणे ऋण-तृण-घृण-धातूनां गुणं नेच्छन्त्येके । ऋणुते ऋणोति । तृणुते तृणोति । घृणुते घृणोति । अकारोपान्त्यो णान्तश्चायमिति **शिवः** । घणोति जघाण । घतः २ । तिकि घण्टिः ।

इत्युभयपदिनः सप्त नान्ताः सेटश्च ।

**'वनूयि याचने'** । वनुते । अवत अवनिष्ट । 'अनादेशादेः०' ( ४।१।२४ ) इत्येत्वस्य 'नशसददo' ( ४।१।३० ) इति प्रतिषेधे ववने । वनिता । वनिषीष्ट । ऊदित्त्वात् क्त्वि वेट् 'यमिरमि०' ( ४।२।५५ ) इति नलुकि वत्वा । क्तयोर्नेट् वतः २ । णौ **'कगेवनूजनैजॄषक्नस्रञ्जः'** ( ४।२।२५ ) एषां णौ परे ह्रस्वो भवति । ञिणम्परे तु वा दीर्घः । उपवनयति । उपावानि । उपावनि । अवानि । अवनि । उपवानं २ । उपवनं उपवनम् । वानं २ । वनं वनम् अनुपसर्गस्य 'ज्वलह्वलह्मलग्लास्नावनूवमनमोऽनुपसर्गस्य वा' ( ४।२।३२ ) एषामनुपसर्गाणां णौ परे ह्रस्वो वा भवति । वनयति वानयति । तिकि वन्तिः । नञ्समासे अवन्तिः राजा । क्तौ वतिः । उणादौ वनिकणि० ( १६२ ) इति ठे वण्ठः अभिनिविष्टः । वनिवपिभ्यां णित् ( ४२१ ) इतीरे वानीरः वेतसः कीचकपेचक० ( ३३ ) इति निपातनात् वनीपकः याचकः । वनिष्ठुरिति तु वनिपूर्वस्य तिष्ठतेः क्वौ 'वन षण भक्तौ' वनति । **'मनूयि बोधने'** मनुते । 'तन्भ्यो वा०' ( ४।३।६८ ) इति नसिचोर्वा लुक् न चेट् । अमत अमनिष्ट अमथाः अमनिष्ठाः । मनिता मनितुम् । ऊदित्त्वात् क्त्वि वेट् 'यसिरमि०' ( ४।२।५५ ) इति नलुकि मत्वा । इटि मनित्वा । मतः २ । 'मनिंच् ज्ञाने' मन्यते ।

इत्यात्मनेपदिनौ नान्तौ सेटौ ।

'सप्तैवोभयपदिनः आत्मनेपदिनावुभौ । परस्मैपदभाग्नास्ति नव सर्वे तनादयः' ॥ १ ॥

यां शिष्योऽद्भुतकीर्तिकीर्तिविजयश्रीवाचकाहर्मणे
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः ।
तस्यां शासितसाधुशब्दसरणौ स्वोपज्ञसत्प्रक्रिया-
वृत्तौ साधु यितस्तनादय इमे पूर्णाः सुखं धातवः ॥ १ ॥





## अथ क्र्यादयः ।

**डुक्रींग्श् द्रव्यविनिमये ।**

अथ क्र्यादयः श्नाविकरणा वर्णक्रमेण प्रस्तूयन्ते । तत्रादौ सम्प्रदायात् क्रीधातुः । 'डुक्रींग्श् द्रव्यविनिमये' । विनिमयः परिवर्त्तः । शित्त्वं क्र्यादित्वज्ञापनार्थम्, गित्त्वमुभयपदार्थम् । सूत्रम्

**क्र्यादेः ॥ १ ॥ [ सि० ३।४।७९ ]**

क्र्यादीनां कर्तृविहिते शिति श्नाः स्यात् । क्रीणाति । 'एषामीर्व्यञ्जनेऽदः' इतीत्वे क्रीणीतः । 'श्नश्नात' इत्यालोपे क्रीणन्ति १ । क्रीणीयात् २ । क्रीणातु क्रीणीतात् क्रीणीहि ३ । अक्रीणात् ४ । अक्रैषीत् ५ । चिक्राय चिक्रियतुः चिक्रयिथ-चिक्रेथ ६ । क्रीयात् ७ । क्रेता ८ । क्रेष्यति ९ । अक्रेष्यत् १० ॥ क्रीणीते क्रीणाते क्रीणते ४ । अक्रेष्ट ५ । चिक्रिये ६ । क्रेषीष्ट ७ । परिव्यवात् क्रियः ( ३।३।२७ ) आत्मनेपदमेव एवं 'प्रींग्श् तृप्तिकान्त्योः' प्रीणाति १० । प्रीणीते १० । 'मींग्श् हिंसायाम्' अदुरुपसर्गेति णत्वे, प्रमीणाति ४ ॥ १ ॥

'क्र्या०' स्पष्टम् । एषामिति श्नुक्तजक्षपञ्चतः श्नाप्रत्ययानामाकारस्य शित्यविति व्यञ्जनादौ परत ईकारो भवति । दासंज्ञं वर्जयित्वा । व्यञ्जन इति किम् ? क्रीणते । अद इति किम् ? दत्तः । अवितीत्येव क्रीणाति । णौ 'णौ क्रीजीङः' ( ४।२।१० ) इत्यात्वे क्रापयति । णौ सनि चिक्रापयिषति । णौ ङे अचिक्रपत् । क्ते क्रपितः । 'परिक्रयणे' ( २।२।६७ ) इति वा चतुर्थ्यां शताय परिक्रीतः । पक्षे करणे तृतीया शतेन परिक्रीतः । परिक्रीयते नियतकालं स्वीक्रीयते येन तत् परिक्रयणं वेतनादि । 'क्रीतात्करणादेः' ( २।४।४४ ) ङ्यां अश्वक्रीती । 'य एचातः' ( ५।१।२८ ) इति ये 'क्रय्यः क्रयार्थे' ( ४।३।९१ ) इति निपातनादयि क्रय्या गौः, क्रयार्थादन्यत्र क्रेयम् । क्रेतव्यमात्रके क्रेयम् । 'क्रय्यं न्यस्तं क्रयाय यत्' **इत्यभिधानचिन्तामणौ** । 'निन्द्ये व्याप्यादिन्विक्रयः' ( ५।१।१५९ ) इति इनि सोमविक्रयी । निन्द्यादन्यत्र 'कर्मणोऽण्' ( ५।१।७२ ) धान्यविक्रायः । सनि चिक्रीषति । यङि चेक्रीयते । यङ्लुकि चेक्रेति चेक्रीतः चेक्रियति । क्रीणन् 'अवर्णादश्न०' ( २।१।११५ ) इति श्नावर्जनात् अन्तादेशाभावे क्रीणती । क्रीणन् क्रीणानः । क्वसुकानोः चिक्रीवान् चिक्रियाणः । क्रीतः २ । अच्यलि क्रयः । ड्वित्वात् त्रिमक् क्रीत्रिमम् । उणादौ क्रीकल्यलि० ( ३८ ) इतीके क्रयिकः क्रेता । कावावी० ( ६३४ ) इति णौ क्रेणिः क्रयविशेषः इतीदन्तोऽनिट् । **'षिंग्श् बन्धने'** । 'षः स०' ( २।३।९८ ) इति से सिनाति सिनीते 'सिचि परस्मै०' ( ४।३।४४ ) इति वृद्धौ असैषीत् असैष्टां असैषुः । असेष्ट असेषाताम् असेषत । सिषाय सिष्ये । सनि 'णिस्तोरेवा०' ( २।३।३७ ) इति नियमान्न षत्वम् सिसीषति । **'सेर्ग्रासे कर्मकर्तरि'** ( ४।२।७३ ) सिनोतेः सिनातेर्वा परस्य क्तयोस्तकारस्य ग्रासे कर्मणि कर्तृत्वेन विवक्षिते नकारो भवति । सिनो ग्रासः स्वयमेव । ग्रास इति किम् ? सितं कर्म स्वयमेव । कर्मकर्त्तरीति किम् ? सितो ग्रासो मैत्रेण । सितो गलो ग्रासेन । सिनोतेरेव नत्वमित्येके । तन्मते सितो ग्रासः स्वयमेव । कर्मकर्त्तुरन्यत्र सितः पाशेन । 'षिंग्ट् बन्धने' सिनुते सिनोति । इति इदन्तोऽनिट् । **प्रींग्श्** इति तृप्तिकान्त्योरिति तृप्तिः सौहित्यम्, कान्तिरभिलाषः । अद्यतन्यां अप्रैषीत् अप्रेष्ट । पिप्रिये पिप्राय । णौ 'धूग्प्रीगोर्नः' ( ४।२।१८ ) इति ने प्रीणयति । अपिप्रीणत् 'धूग्प्रीगो'रिति गिन्निर्देशात् यङ्लुपि न नोऽन्तः ये प्राययति । शेषं क्रीवत् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'नाम्युपान्त्य०' ( ५।१।५४ ) इति के प्रियः । 'प्रीङ्च् प्रीतौ' प्रीयते । 'प्रीगण् तर्पणे' 'युजादेः०' ( ३।४।१८ ) इति वा णिचि ( प्रीणयते प्रीणयति ) प्रयते प्रयति । '**श्रींग्श् पाके**' श्रीणाति श्रीणीते । शिश्राय शिश्रिये । श्रेता । श्रीतः २ । '**मींग्श् हिंसायाम्**' एकदेशविकृतस्यानन्यत्वात् प्रमीणीते ॥ १ ॥ अक्ङिति सूत्रम्

## मिग्मीगोऽखलचलि ॥ २ ॥ [ सि० ४।२।८ ]

**अनयोर्यपि खल् अच् अल् वर्जेऽक्ङिति च विषये आः स्यात् । अमासीत् ५ । ममौ मिम्यतुः । ममिथ-ममाथ ६ । मीयात् ७ । माता ८ । प्रमीणीते ४ । अमास्त ५ । मिम्ये ६ । मासीष्ट ७ । 'ग्रहीश् उपादाने' ग्रहव्रश्चेति य्वृति, गृह्णाति १ । गृह्णीयात् २ । गृह्णातु ३ । ॥२॥**

'**मिग्मी०**' अयं भावः । मिनोतिमीनात्योर्यपि खलचल्वर्जितेऽक्ङिति च विषयभूते आकारोऽन्तादेशो भवति । यथा निमाय निमाता निमातुम् निमातव्यम् न्यमासीत् । '**मीग्श् हिंसायाम्**' । प्रपूर्वः प्रयुज्यते । प्रमाय प्रमाता प्रमातव्यम् प्रमातुम् प्रामासीत् । अखलचलीति किम् ? ईषत्प्रमयः दुःप्रमयः । अचि मयः प्रमयः । सानुबन्धनिर्देशो यङ्लुपि निवृत्त्यर्थः निमेमेति । यवक्ङित्येव । निमितः २ प्रमीतः २ । निमेमीयते प्रमेमीयते । मिग्मीग इति किम् ? 'मीङ्च् हिंसायाम्' इति दैवादिकस्य मा भूत् मेता मेतुम् । अस्याप्यात्वमिच्छन्त्यन्ये माता मातुम् । विषयव्याख्यानात् प्रागात्वे पश्चात् द्वित्वे ममौ इति । 'शासूयुधि०' ( ५।३।१४१ ) इति खलपवादेऽने दुर्मानम् सुमानम् । णौ प्रमापयति । अमीमयत् । मीतः २ । मीत्वा मिमीषति । मिमापयिषति । उणादौ मीमसि० ( ४२७ ) इत्यूरे बाहुलकान्नात्वं मयूरः । इति ईदन्तावयोऽनिटश्च । '**युंग्श् बन्धने**' युनीते युनाति । अयौषीत् अयोष्ट । युयुवे युयाव । योता । '**स्कुंग्श् आप्रवणे**' 'स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कोः श्ना च' ( ३।४।७८ ) स्तम्भ्वादिभ्यश्चतुर्भ्यो वक्ष्यमाणेभ्यः सौत्रेभ्यो धातुभ्यः स्कुगश्च कर्त्तरि विहिते शिति श्ना श्नुश्च प्रत्ययो भवति । स्कुनाति स्कुनीते स्कुनुते । इति उदन्तावनिटौ । '**क्नूग्श् शब्दे**' । क्नूनीते क्नूनाति । अक्नविष्ट अक्नावीत् । चुक्नुवे चुक्नाव । क्नविता । किति 'उवर्णात्' ( ४।४।५८ ) इति नेट् क्नूतः २ । क्नूत्वा । '**द्रूग्श् हिंसायाम्**' गतावित्यन्ये, । द्रूणीते द्रूणाति । अद्रविष्ट अद्रावीत् दुद्रुवे दुद्राव द्रविता द्रवितुम् । इत्यूदन्तौ सेटौ । '**ग्रहीश् उपादाने**' इति । उपादानं स्वीकारः । गृह्णातीत्यादि स्पष्टम् ॥ २ ॥ पञ्चम्या हौ सूत्रम्

## व्यञ्जनाच्छ्नाहेरानः ॥ ३ ॥ [ सि० ३।४।८० ]

**व्यञ्जनात्परस्य श्नायुक्तस्य हेरानः स्यात् । गृहाण ३ अगृह्णात् ४ । ॥ ३ ॥**

'**व्यञ्ज०**' स्पष्टम् ॥ ३ ॥ अद्यतन्यां सिच् इति सूत्रम्

## गृह्णोऽपरोक्षायां दीर्घः ॥ ४ ॥ [ सि० ४।४।३४ ]

**ग्रहेर्यो विहित इट् तस्य दीर्घः स्यात्, न तु परोक्षायाम् । नश्वीति वृद्धिनिषेधे दीर्घस्य स्थानिवद्भावात् इट ईतीति सिचो लुक् । अग्रहीत् अग्रहीष्टाम् अग्रहीषुः ५ । जग्राह जगृहतुः जगृहुः । जग्रहिथ ६ । गृह्यात् गृह्यास्ताम् गृह्यासुः ७ । ग्रहीता ग्रहीतारौ ८ । ग्रहीष्यति ९ । अग्रहीष्यत् १० । गृह्णीते १ । गृह्णीत २ । गृह्णीताम् ३ । अगृह्णीत ४ । अग्रहीष्ट । हान्तस्येति वा ढत्वे**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अग्रहीढ्वम् अग्रहीध्वम् ५ । जगृहे जगृहिढ्वे-ध्वे ६ । ग्रहीषीष्ट ग्रहीषीढ्वम्-ध्वम् । 'पूग्श् पवने' ॥ ४ ॥**

**'गृह्णो०'** स्पष्टम् । 'न श्वि०' (४।३।४९) इति वृद्धिनिषेधे इति 'व्यञ्जनादेर्वोपान्त्यस्यातः' (४।३।४७) इति प्राप्ताया वृद्धेः 'न श्विजागृशसक्षणम्ह्येदितः' (४।३।४९) इति निषेधे सतीत्यर्थः । दीर्घस्य स्थानिवद्भावादिति न चायं वर्णविधिः इट इति वर्णसमूहाश्रयत्वात् । विहितविशेषणं किम् ? यङन्ताद्विहितस्य मा भूत् । जरीगृहिता । जरीगृहितुम् । लुप्तविवृनिर्देशात् यङ्लुपि न भवति जरीगर्हिता । जरीगर्हितुम् । अपरोक्षायामिति किम् ? जगृहिम । 'रुदविद०' (४।३।३२) इति क्त्वासनोः कित्त्वे गृहीत्वा । 'ग्रहगुहश्च०' (४।४।५९) इति सनि इण्निषेधे जिघृक्षति । भावकर्मणोः 'स्वरग्रहदृशहन्भ्यः स्यसिजाशीःश्वस्तन्यां ञिड् वा' (३।४।६९) इति वा ञिदि ग्राहिष्यते ग्रहिष्यते । अग्राहिषाताम् अग्रहिषाताम् । ग्राहिषीष्ट ग्रहिषीष्ट । ग्राहिता ग्रहिता । **'पदास्वैरिबाह्यापक्ष्ये ग्रहः'** (५।१।४४) एष्वर्थेषु ग्रहः क्यप् स्यात् । घ्यणोऽपवादः । प्रगृह्यते विशेषेण ज्ञायते प्रगृह्यं पदम्—यत् स्वरेण न सन्धीयते, अग्नी इति । अवगृह्यते नानावयवसात्क्रियते अवगृह्यं पदम् यथा पच् शव् तिव् इत्यवयवाः । अस्वैरिणि, गृह्यन्ते इति गृह्याः परतन्त्राः गृह्याः कामिनः रागादिपरतन्त्रा इत्यर्थः । बाह्यायां ग्रामगृह्या श्रेणिः । नगरगृह्या सेना बाह्येत्यर्थः । स्त्रीलिङ्गनिर्देशो लिङ्गान्तरेऽनभिधानख्यापनार्थः । पक्ष्ये त्वया गृह्यते । मया गृह्यते इति त्वद्गृह्या मद्गृह्याः । गुणगृह्या वचने विपश्चितः, तत्पक्षाश्रिता इत्यर्थः । एष्विति किम् ? ग्राह्यं वचः । **'गेहे ग्रहः'** (५।१।५५) गेहेऽभिधेये ग्रहः को भवति गृहं गृहाणि । गृहाः पुंसि बहुवचनान्त एव । **दुर्गस्त्वेकवचनान्तमेवाह** । उपचाराद्दारा गृहाः । 'वा ज्वलादि दुनीभूग्रहास्रोर्णः' (५।१।६२) इति णे व्यवस्थितविभाषेयम् । तेन ग्राहो जलचरो मकरादिः । पक्षे विग्रहः । अनुपसर्गादित्येव । प्रग्रहः शुचिभरीचिदीप्तयः । 'ग्रहादिभ्यः०' (५।१।५३) इति णिनि ग्राही । असरूप इति णके ग्राहकः । तृचि गृहीता 'धनुर्दण्डत्सरुलाङ्गलाङ्कुशर्ष्टियष्टिशक्तितोमरघटाद्ग्रहः' (५।१।९२) एभ्यः पराद्ग्रहेरच् स्यात् । धनुर्गृह्णाति । धनुर्ग्रहः । दण्डग्रहः । त्सरुग्रह इत्यादि । **'सूत्राद्धारणे'** (५।१।९३) सूत्रं कर्पासादि । लक्षणसूत्रं वा विशेषेण गृह्यते । सूत्रात्कर्मणः पराद्ग्रहेर्ग्रहणपूर्वके धारणेऽर्थे वर्त्तमानादच् प्रत्ययो भवति । सूत्रं गृह्णाति सूत्रगृहः प्राज्ञः सूत्रधारो वा सूत्रमुपादाय धारयतीत्यर्थः । **अन्ये** त्ववधारण एवेच्छन्ति तन्मते सूत्रग्रहः प्राज्ञ एवोच्यते । धारण इति किम् ? सूत्रग्राहः । 'कर्मणोऽण्' (५।१।७२) इत्यण् । यो हि सूत्रं गृह्णाति न तु धारयति स एवमुच्यते । 'रजःफलेमलाद्ग्रहः' (५।१।९८) एभ्यः कर्मभ्यः पराद्ग्रहेरिर्भवति । रजोग्रहिः कञ्चुकः । फलेग्रहिर्वृक्षः । सूत्रनिर्देशादेत्वम् । मलग्रहिः कम्बलः । रजोमलाभ्यां केचिदेवेच्छन्ति । **'सृग्लहः प्रजनाक्षे'** (५।३।३१) प्रजनाक्षविषये धात्वर्थे वर्त्तमानाभ्यां सर्तिग्लहिभ्यां भावाकर्त्रोरल् भवति । गवामुपसरः । प्रजनो गर्भग्रहणम् । तदर्थं स्त्रीषु पुंसां प्रथमं सरणमुपसर उच्यते । अक्षाणां ग्लहो ग्रहणमित्यर्थः । ग्रहेः सूत्रनिपातनात् लत्वम् 'ग्रहूङ् ग्लहूङ् अदने' इति ग्लहिः प्रकृत्यन्तरं वा । प्रजनाक्ष इति किम् ? उपसारो भृत्यै राज्ञाम् । ग्रहः ग्लहो वा पादस्य **'वर्षविघ्नेऽवाद्ग्रहः'** (५।३।५०) अवपूर्वाद्ग्रहेर्वर्षविघ्ने वाच्ये भावाकर्त्रोरल्वा भवति । अवग्रहोऽवग्राहो वा वृष्टिप्रतिबन्धः । अन्यत्र अवग्रहोऽर्थस्य **'प्राद्रश्मितुलासूत्रे'** (५।३।५१) प्रपूर्वाद्ग्रहेरेष्वर्थेषु भावाकर्त्रोरल् वा भवति प्रगृह्यते इति प्रग्रहः । अश्वादेः संयमनरज्जुस्तुलासूत्रं चोच्यते । अन्यस्तु प्रग्राहः । **'ग्रहः'** (५।३।५५) उत्पूर्वाद्ग्रहे-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भावाकर्त्रोर्घञ् भवति । अलोऽपवादः । उद्ग्राहः । उद इत्येव ग्रहः विग्रहः । **'न्यवाच्छापे'** ( ५।३।५६ ) न्यवाभ्यां पराच्छापे आक्रोशे गम्ये ग्रहेर्भावाकर्त्रोर्घञ् भवति । निग्राहो हते वृषल भूयात् । अवग्राहो हते जाल्म भूयात् । शाप इति किम् ? निग्रहश्चौरस्य । अवग्रहः पदस्य । **'प्राल्लिप्सायाम्'** ( ५।३।५७ ) प्रपूर्वाद्ग्रहेर्लिप्सायां गम्यायां भावाकर्त्रोर्घञ् भवति । पात्रग्राहेण चरति पिण्डपातार्थी भिक्षुः । स्रुवयस्य प्रग्राहेण चरति दक्षिणार्थी द्विजः । लिप्सायामिति किम् ? स्रुवः प्रग्रहः । ( स्रुवस्य ग्रहः ) । **'समो मुष्टौ'** ( ५।३।५८ ) सम्पूर्वाद्ग्रहेर्मुष्टिविषये धात्वर्थे भावाकर्त्रोर्घञ् भवति । मुष्टिरङ्गुलिसन्निवेशो न परिमाणम् । तत्र 'माने' इत्येव सिद्धत्वात् । संग्राहो मल्लस्य । अहो मौष्टिकस्य सङ्ग्राहः । मुष्टेर्दार्ढ्यमुच्यते । मुष्टाविति किम् ? संग्रहः शिष्यस्य । **'यज्ञे ग्रहः'** ( ५।३।६५ ) परिपूर्वाद्ग्रहेर्यज्ञविषये प्रयोगे भावाकर्त्रोर्घञ् भवति । पूर्वपरिग्राहः उत्तरपरिग्राहः । वेदेर्यज्ञाङ्गभूताया ग्रहणविशेष एताभ्यामभिधीयते । यज्ञ इति किम् ? परिग्रहः कुटुम्बिनः । स्त्रियां क्तौ 'तेर्ग्रहादिभ्यः' ( ४।४।३३ ) इतीटि गृहीतिः निगृहीतिः । **'कृग्ग्रहोऽकृतजीवात्'** ( ५।४।६१ ) अकृतजीव इत्येताभ्यां व्याप्याभ्यां यथासङ्ख्यं करोति गृह्णातिभ्यां तस्यैव धातोः सम्बन्धे सति णम्वा भवति । अकृतकारं करोति, अकृतं करोतीत्यर्थः । जीवग्राहं गृह्णाति, जीवन्तं गृह्णातीत्यर्थः । **'हस्तार्थाद्ग्रहवर्त्तिवृतः'** ( ५।४।६६ ) हस्तार्थात् करणवाचिनः शब्दात् परेभ्यो ग्रहवर्त्तिवृद्भ्यस्तस्यैव धातोः सम्बन्धे णम्वा भवति । हस्तग्राहं गृह्णाति, एवं करग्राहं पाणिग्राहम् । हस्तेन गृह्णातीत्यर्थः । एवं हस्तवर्त्तं ३ वर्त्तयति हस्तेन वर्त्तयतीत्यर्थः । हस्तवर्त्तं ३ वर्त्तते हस्तेन वर्त्तते इत्यर्थः । वर्त्तिवृत इति वर्त्ततेर्ण्यन्तस्याऽण्यन्तस्य च ग्रहणम् । अण्यन्तान्नेच्छन्त्येके । **'नाम्ना ग्रहादिशः'** ( ५।४।८३ ) नामशब्देन द्वितीयान्तेन योगे तुल्यकर्तृकेऽर्थे वर्त्तमानाद्ग्रहेरादिशश्च धातोः सम्बन्धे णम्वा भवति । नामानि ग्राहं नामग्राहमाह्वयति । नाम्नी देवदत्तो ग्राहं नामग्राहं देवदत्त आह्वयति । 'यस्य येनाभिसम्बन्धो दूरस्थस्यापि तेन स' इति न्यायाद्देवदत्तव्यवधानेऽपि भवति । नामान्यादेशं नामादेशं ददाति । पक्षे नाम गृहीत्वा नामादिश्य दत्ते । सर्वत्रात्र 'तृतीयोक्तं वा' ( ३।१।५० ) इति समासः । उणादौ ऋहृसृ० ( ६३८ ) इत्यणौ ग्रहणिः प्रवाहिका । इति हान्तः ।

अथ क्र्याद्यन्तर्गणः प्वादिः 'प्वादेर्ह्रस्वः ( ४।२।१०५ ) इति ह्रस्वप्रयोजनो द्वाविंशतिकः प्रदर्श्यते । **'पूग्श् पवने'** इति । पवनं शुद्धिः । शेषं स्पष्टम् । सूत्रम्

## प्वादेर्ह्रस्वः ॥ ५ ॥ [ सि० ४।२।१०५ ]

**प्वादेः शित्यत्यादौ ह्रस्वः स्यात् । पुनाति ४ । अपावीत् ५ । पुपाव ६ । पूयात् ७ । पविता ८ । पुनीते ४ । अपविष्ट ५ । पुपुवे ६ । पविषीष्ट ७ । पविष्यते ९ । अपविष्यत १० । एवं 'लूग्श् छेदने' लुनाति १० । लुनीते १० । 'धूग्श् कम्पने' धुनाति १० । धुनीते १० । 'स्तॄग्श् आच्छादने' प्वादित्वात् ह्रस्वे, स्तृणाति ४ । अस्तारीत् ५ । तस्तार ६ । स्तीर्यात् ७ । स्तरिता-स्तरीता ८ । स्तृणीते ४ । इट्सिजाशिषोरिति वेटि, वृतो नवेति दीर्घे, अस्तरिष्ट अस्तरीष्ट । ऋवर्णादिति सिचः किच्चे, अस्तीर्ष्ट ५ । 'वृग्श् वरणे' वृणाति ४ । अवारीत् ५ । ववार ६ । वूर्यात् ७ । वरिता-वरीता ८ । वृणीते ४ । अवरिष्ट-अवरीष्ट-अवृष्ट ५ । स्कृच्छृतोऽकि सति गुणे, ववरे ६ । वरिषीष्ट-वूर्षीष्ट ७ ॥ ५ ॥**

—॥ इत्युभयपदिनः ।॥—



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'प्वादे०'** अस्मादावित्ति-तिवादिश्चेदनन्तरो न भवति । यथा पोपोति पोपवीति । अत्र ह्रस्वो न भवति । किति 'उवर्णात्' ( ४।४।५८ ) इति नेट् पूतः २ । **'पूदिव्यञ्चेर्नाशाद्यूतानपादाने'** ( ४।२।७२ ) पू-दिव-अञ्च इत्येतेभ्यो यथासङ्ख्यं नाशे द्यूतेऽनपादाने चार्थे परस्य क्तस्य नः स्यात् । पूना यवा विनष्टा इत्यर्थः । आद्यूनः । 'आद्यूनः स्यादौदरिकः विजिगीषाविवर्जिते' **इत्यभिधानचिन्तामणौ ।** समक्तौ शकुनेः पक्षौ सङ्गताविल्यर्थः । नाशद्यूतानपादान इति किम् ? पूतं धनम् । उदक्तं जलं कूपात् । **कथं व्यक्तमञ्जे**र्भविष्यति । 'पुव इत्रो दैवत' ( ५।२।८५ ) इति इत्रे पवित्रोऽर्हन् । 'ऋषिनाम्नोः करणे' ( ५।२।८६ ) पवित्र ऋषिः । पवित्रं दर्भादि । 'हलक्रोडास्ये पुवः' ( ५।२।८९ ) इति त्रटि हलसूकरयोः पोत्रं मुखमित्यर्थः । 'निरभेः पूल्वः' ( ५।३।२१ ) इति घञि निष्पावः 'न ख्यापूगू०' ( २।३।९० ) इति निषेधात् स्वरादिति णत्वाभावेऽनटि प्रपवनम् । परिपवनम् । णौ 'णेर्वा' ( २।३।८८ ) इति णत्वविकल्पाभावे प्रपावनम् । परिपावनम् । उणादौ हुपूञ्नीप्रस्तुप्रतिहृप्रतिप्रस्थाभ्य ऋत्विजि ( ८६३ ) इति तृप्रत्यये पोता ऋत्विगित्यर्थः । पुत्रादयः ( ४५५ ) इति सूत्रेण निपातनात् पुनाति पवते वा पितृपूतिमिति पुत्रः । **यदाहुः** 'पूतीति नरकस्याख्या दुःखं च नरकं विदुः' । पुन्नाम्नो नरकात्त्रायते इति व्युत्पत्तिस्तु **संज्ञाशब्दानामनेकधा व्याख्यानं** लक्षयति । 'पुङ् पवने' पवते । क्र्यादिषु 'पूगश् पवने' इत्यारभ्य वृत्करणपर्यन्ताः प्वादयस्ततः **परेषां** ह्रस्वो न भवति । यथा व्रीणाति व्रीणाति । आगणान्तात् प्वादय **इत्यन्ये ।** वृत्करणं ल्वादिपरिसमाप्त्यर्थम् । **तन्मते** व्रिणातीत्येव भवति । जानातीत्यत्र विधानसामर्थ्यात् न ह्रस्वः ।

–॥ अथ प्वाद्यन्तर्गण एकविंशतिको ल्वादिः ऋल्वादेः ( ४।२।६८ ) इति नत्वार्थः प्रदर्श्यते ।॥–

**'लूग्श् छेदने'** लुनातीत्यादि सर्वं व्यक्तम् । सनि 'ग्रहगुहश्च सनः' ( ४।४।५९ ) ग्रहिगुहिभ्यामुवर्णान्ताच्च धातोर्विहितस्य सन आदिरिड्वा भवति । लुलूषति । पुपूषति । णौ सनि 'ओर्जान्तस्थापवर्गेऽवर्णे' ( ४।१।६० ) धातोर्द्वित्वे सति पूर्वस्योकारान्तस्याऽवर्णान्ते जान्तस्थापवर्गे परतः सनि परे इकारोऽन्तादेशो भवति । लिलावयिषति । णौ ङे 'असमानलोपे०' ( ४।१।६३ ) इति सन्वत्त्वे अलीलवत् । 'उवर्णात्' ( ४।४।५८ ) उवर्णादेकस्वराद्धातोर्विहितस्य कित इड् न भवति । 'ऋल्वादेरेषां तो नोऽप्रः' ( ४।२।६८ ) पृवर्जितादृकारान्ताद्धातोर्ल्वादिभ्यश्च परेषां क्तिक्तक्तवतूनां तो नः स्यादिति नत्वे लूनिः । लूनः २ । 'पुसृल्वोऽकः साधौ' ( ५।१।६९ ) इत्यके साधु लुनाति लवकः । 'लूधूसूखनिचरसहार्त्तेः' ( ५।२।८७ ) इतीत्रे लूयतेऽनेन लवित्रम् । 'निरभेः पूल्वः' ( ५।३।२१ ) इत्यलपवादे घञि अभिलावः । उणादौ धाल्लूशिङ्घिभ्य ( ७० ) इत्याणकप्रत्यये लवाणकः कालः तृणजातिर्दात्रं च । लूञो वा ( २०२ ) इति ते तस्य च वा कित्त्वे लूता क्षुद्रजन्तुः । पक्षे लोतः बाष्पं लवनं वस्त्रः कीटजातिश्च । स्वरेभ्यः ( ६०६ ) इत्यौ लविर्दात्रम् । लूधू० ( ६७९ ) इति किति नौ लूनिः लवनम् । मनि लोम । **धूग्श्** इति । सिचि 'धूगौदितः' ( ४।४।३८ ) इतीड्विकल्पे प्राप्ते 'धूगसुस्तोः परस्मै' ( ४।४।८५ ) एभ्यः परस्य सिचः परस्मैपदे नित्यमिट् । अधावीत् अधाविष्टां अधाविषुः । आत्मनेपदे तु इड्विकल्पे अधोष्ट अधविष्ट । 'ऋल्वादे०' ( ४।२।६८ ) इति तो नत्वे धूनिः धूनः २ । 'धूग्ट् कम्पने' धूनोति । 'धूत् विधुनने' धूवति । 'धूग्ण् कम्पने' युजादित्वाद्वा णिचि धूनयति धवते धवति । इत्यूदन्तास्त्रयः सेटः । **स्तृग्श्** इति । आशिष्यात्मनेपदे आस्तरिषीष्ट । आस्तीर्षीष्ट । सनि 'इवृध०' ( ४।४।४७ ) इति वेटि आतिस्तरिषति आतिस्तीर्षति । किति 'ऋवर्णश्रि०' ( ४।४।५७ ) इति नेट् । 'ऋल्वादे'रिति नत्वे आस्तीर्णिः आस्तीर्णः २ । णौ ङे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सन्वद्भावे 'स्मृदृत्वरप्रथम्रदस्तृस्पशेरः' (४।१।६५) इति पूर्वस्य अत्वे अतस्तरत्। 'ऋवर्णे०' (५।१।१७) इति घ्यणि आस्तार्यः। 'अयज्ञे स्त्रः' (५।३।६८) इत्यलपवादे घञि शङ्खप्रस्तारः। यज्ञे तु बर्हिःप्रस्तरः। 'वेरशब्दे प्रथने' (५।३।६९) इति घञि पटस्य विस्तारः। शब्दे तु 'दधातु पुष्टिं मयि विस्तरो गिराम्'। छन्दोनाम्नि विष्टारः पङ्क्तिः। वृक्षासनयोर्विष्टरः। 'वेः स्त्रः' (२।३।२३) इति षत्वम्। 'अवात् तृस्तृभ्याम्' (५।३।१३३) इति करणे आधारे घञि अवस्तारः। अलि घे वा आस्तरो वस्त्रभेदः। तृस्तृतन्द्रितन्त्र्यविभ्य ईः (७११) स्तरीः तृणं धूमो नदीशय्या च। सृहृभृधृस्तृसुभ्य ईमन् (९१८) इतीमनि स्तरीमा प्रावारः। **'कॄग्श् हिंसायाम्'**। कृणाति कृणीते। अकरीत् अकरीषुः। अकरीष्ट अकीर्ष्ट। चकार। 'स्कृच्छृतोऽकि परोक्षायाम्' (४।३।८) इति गुणे चकरे। करिता करीता। सनि 'इवृध०' (४।४।४७) इति वेटि चिकरिषते। कीर्णिः। कीर्णः २। क्ये कीर्यते। उणादौ कॄगॄशॄ० (४४१) इति वरटि कर्वरो व्याघ्रः विष्किरः अञ्जलिश्च। कर्बरी भूमिः शिवा च। कॄपॄकटि० (५८९) इत्यहे करहः धान्यावपनम्। ह्रस्वान्तोऽयमित्येके 'कृत् विक्षेपे किरति। **वॄग्श्** इति। वृणाति वृणीते इत्यादि स्पष्टम्। वूर्णिः वूर्णः २। सनि 'इवृध०' (४।४।४७) इति वेटि विवरिषति विवरीषति वुवूर्षति। यङि वावूर्यते। वावरीति वावर्त्ति वावूर्त्तः। वावुरति। णौ वारयति। णौ ङे अवीवरत्। क्वसौ वुवूर्वान्। काने ववराणः। वूर्त्वा। प्रवूर्य। उणादौ ऋकॄवृधृदारिभ्य उणः (१९६) इत्युणे वरुणः प्रचेता। ह्रस्वान्तोऽयमिति **नन्दी**। इत्युभयपदिनः १६।॥ ५॥

**'ज्यांश् हानौ' ज्याव्यधः क्ङितीति य्वृति।**

ज्यांश् हानौ इति। वयोहानावित्येके। य्वृति सति सूत्रम्

## दीर्घमवोन्त्यम् ॥ ६ ॥ [ सि० ४।१।१०३ ]

**वेगूवर्जस्य य्वृदन्त्यं दीर्घं स्यादिति दीर्घे, प्वादेरिति ह्रस्वे च, जिनाति ४। अज्यासीत् ५। ज्याव्याधिवचेरिति पूर्वस्य इत्वे, जिज्यौ ६। जीयात् ७। ज्याता ८। ज्यास्यति ९। 'बन्धंश् बन्धे' बध्नाति। बधान ४। अभान्त्सीत् ५। बबन्ध ६। बध्यात् ७। बन्द्धा ८। भन्त्स्यति ९। 'अशश् भोजने' अश्नाति। अशान ४। आशीत् ५। आश ६। अश्यात् ७। अशिता ८। 'मुषश् स्तेये' मुष्णाति मुषाण ४ अमोषीत् ५ मुमोष ६ मुष्यात् ७ मोषिता ८ एवं 'पुषश् पुष्टौ' पुष्णाति १०। इत्यादि। 'ज्ञांश् अवबोधने'। जाज्ञाजनोऽत्यादौ। जानाति ४ अज्ञासीत् ५ जज्ञौ ६ ज्ञायात्-ज्ञेयात् ७ ज्ञाता ८ ज्ञास्यति ९ अज्ञास्यत् १०। ज्ञो(३।३।८२)-ऽकर्मत्वे आत्मनेपदम्। जानीते ॥ ६॥**

**इति परस्मैपदिनः।**

इति महोपाध्यायश्रीकीर्तिविजयगणिशिष्योपाध्यायश्रीविनयविजयगणिविरचितायां हैमलघुप्रक्रियायां त्र्यादयः समाप्ताः।

'दीर्घ०' वेगूवर्जनात् उतः उतवान् इत्यादौ दीर्घो न भवति। अन्त्यमिति किम्? सुप्तः उप्तः। परोक्षायां थवि 'सृजिदृशि०' (४।४।७८) इति वेटि जिज्यिथ जिज्याथ। अणपवादे 'आतो डः' (५।१।७६) इति डे ब्रह्मज्यः। 'ऋल्वादेः०' (४।२।६८) इति ने जीनः २। क्तिमपीच्छन्त्येके जीनिः। 'ग्लाहाज्यः' (५।३।११८) एभ्यो भावे निः स्यात्। ज्यानिः। सनि जिज्यासति। यङि



Jain Education International For Personal & Private Use Only www.jainelibrary.org

जेजीयते । जेजेति जेजयीति । णौ ज्यापयति । णौ ङे अजिज्यपत् । जिनन् जिनन्तौ जिनतीति जीवान् जिज्यानं जित्वा । 'ज्यश्च यपि' (४।१।७६) ज्या इत्यस्य वेगश्च यपि परे य्वृन्न भवति प्रज्याय । जिन इति जीणृशी० (२६१) किति ने जयतेः । इत्याकारान्त एकः । 'रींश् गतिरेषणयोः' रेषणं हिंसा 'प्वादे०' (४।२।१०५) रिति ह्रस्वे रिणाति अरैषीत् रिराय 'योऽनेकस्वरस्य' (२।१।५६) इति यत्वस्य बहिरङ्गत्वेन भ्वादेरिति दीर्घमन्तरङ्गं प्रत्यसिद्धत्वात् पूर्वस्य दीर्घाभावे रिर्यतुः रिर्युः । णौ 'अर्त्ति०' (४।२।२१) इति पौ 'पुस्पौ' (४।३।३) इति गुणे रेपयति । णौ ङे अरीरिपत् । 'लींश् श्लेषणे' लीनाति 'यबक्ङिति' (४।२।७) लीङ्लिनोर्वा' (४।२।९) इति वा आत्वे व्यलासीत् व्यलैषीत् । लिलाय लिल्यतुः । विलाता विलेता । विलास्यति विलेष्यति । सनि लिलीषति । लेलीयते लुप्तनिवृनिर्देशात् यङ्लुपि न आः, लेलेति लेलयीति । णौ 'लीङ्लिन०' (३।३।९०) इत्यात्मनेपदे आत्वे च जटाभिरालापयते । श्येनो वर्त्तिकामुल्लापयते अभिभवतीत्यर्थः । 'लो लः (४।२।१६) इति ले विलालयति । पक्षे 'अर्त्तिरी०' (४।२।२१) इति पौ विलापयति । 'लियो०' (४।२।१५) इति ने विलीनयति । पक्षे 'नामिन०' (४।३।५१) इति वृद्धौ विलाययति । तौ नत्वे लीनः २ । लीनिः । 'लीङ्च् श्लेषणे' लीयते । 'लीण् द्रवीकरणे' युजादित्वाद्वा णिचि विलीनयति विलयति । यपि वा आत्वे विलाय विलीय । 'व्लींश् वरणे' गतावित्यन्ये । व्लिनाति । अव्लैषीत् । विव्लाय । 'संयोगात्' (२।१।५२) इतीयादेशे विव्लियतुः । व्लेता । व्लीनः २ । व्लीनिः । णौ 'अर्त्तिरी०' (४।२।२१) पौ व्लेपयति । 'ल्वींश् गतौ' ल्विनाति । अल्वैषीत् । लिल्वाय लिल्वियतुः । ल्वेता । ल्वीनः २ । प्वादिरयमस्य नेच्छन्त्येके तन्मते ल्वीनाति । 'ऋल्वादे०' (४।२।६८) नत्वाभावे ल्वीतः २ ल्वीतिः । 'ल्पींश् श्लेषणे' इत्यप्येके पठन्ति 'प्वादे०' (४।२।१०५) रिति ह्रस्वे ल्पिनाति अल्पैषीत् । लिल्पाय लिल्पियतुः । ल्पीनः २ । ल्पीनिः । इति ईदन्ताश्चत्वारोऽनिटः । 'कॄ मॄ शॄश् हिंसायाम्' । कृणाति अकारीत् चकार । 'स्कृच्छृत०' (४।३।८) इति गुणे चकरतुः । 'वृतो नवा०' (४।४।३५) इतीटो वा दीर्घः करिता करीता । किति 'ऋवर्णश्रि०' (४।४।५७) इति नेट् कीर्णः २ कीर्णिः । 'इवृध०' (४।४।४७) इति सनि वेट् चिकरिषति चिकरीषति चिकीर्षति । उभयपदिषु पठितोऽप्ययं फलवत्कर्त्तरि परस्मैपदार्थमिह पठितः । 'कृत् विक्षेपे' किरति । मॄ, मृणाति । अमारीत् ममार ममरतुः मरिता मरीता । मूर्णः मूर्णवान् । मूर्णिः । उणादौ म्र उत् (८८९) मरुत् वायुर्देवो गिरिशिखरं च इति धातुपारायणे । उणादिविवरणे तु 'मृंत् प्राणत्यागे' इत्यस्य रूपमुक्तम् । शॄ शृणाति व्यशारीत् विशशार । 'ऋः शॄदॄप्रः' (४।४।२०) एषां धातूनां परोक्षायां ऋकारोऽन्तादेशो भवति विशश्रतुः । पक्षे 'स्कृच्छृत०' (४।३।८) इति गुणे विशशरतुः । विशरिता विशरीता । शीर्णः २ । शीर्णिः । अचि शरः । सनि शिशरीषति शिशरिषति शिशीर्षति । विशारयति । व्यशीशरत् । क्ये शीर्यते । शाशीर्यते । शाशरीति शाशर्त्ति । क्वसौ वा ऋकारादेशे विशश्रृवान् । विशश्राणः । पक्षे विशिशीर्वान् विशशिराणः । शीर्त्वा । विशीर्य । 'शॄवन्देरारुः' (५।२।३५) इत्यारौ शरणशीलः शरारुः । 'शॄकमगमहनवृषभूस्थ उकण्' (५।२।४०) विशारुकः । 'पुन्नाम्नि घः' (५।३।१३०) इति घे शृणन्ति तेन शरः । 'श्रोर्वायुवर्णनिवृते' (५।३।२०) इति घञि शारो वायुः वर्णश्च । नीशारः हिमानिलापहं वस्त्रम् । 'गौरिवाकृत नीशारः प्रायेण शिशिरे कृशः' । उणादौ किच (१०) इति किदः धातोः रूपद्वित्वं च शिशिरः । जॄपॄदॄशॄवृमृभ्यो द्वे रश्चादौ (४७) एभ्यः इकः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

द्वे रूप एषां चादौ रो भवति शर्शरीकः क्रिमिः । शर्शरीका माङ्गल्याभरणम् । शृङ्गशार्ङ्गादयः ( ९६ ) इति गे निपातनात् शृङ्गं विषाणं गिरिकूटं च । शार्ङ्गः पक्षी । पतितमि० ( ९८ ) इत्यङ्गे शरङ्गः पक्षिविशेषः । अनिशृ० ( १४५ ) इत्याटे शराटः शकुन्तः । शृङ्गाट इति तु कपाटविराट-शृङ्गाटप्रपुन्नाटादयः ( १४८ ) इत्याटे निपातनात् श्रयते । मृजृशृकम्यमिरमिरपिभ्योऽठः ( १६७ ) इत्यठे शरठः आयुधः । तृकृशृ० ( १८७ ) इत्यणे शरणं गृहम् । परात् श्रो डित् ( २५५ ) परपूर्वात् शृ इत्यस्मात् डित् वध प्रत्ययो भवति परश्वधः आयुधजातिः । कृशृसृभ्यः ऊर् चान्तस्य ( २९८ ) इति पे शूर्पः धान्यपवनभाण्डम् । कृशृगृ० ( ३२९ ) इत्यभे शरभः श्वापदविशेषः । अर्त्तीरि० ( ३३८ ) इति मे शर्म सुखम् । धाभ्राजिशृंरमियाज्यर्त्तेरन्यः ( ३७९ ) इत्यन्यप्रत्यये शरण्यस्त्राता । कृशृपृ० ( ४१८ ) इतीरे शरीरम् । श्वशुरकुकुन्दुर० ( ४२६ ) इत्युरे निपातनात् शृ इत्यस्य गुणः कोऽन्तश्च । शर्कुरस्तरुणः । किशृवृभ्यः करः ( ४३५ ) इति करप्रत्यये शर्करा । कृगृशृ० ( ४४१ ) वरटि शर्वरः सायाह्नो रुद्रो हिंस्रश्च । शर्वरं तमः अन्नं च । शर्वरी रात्रिः । श्रो नोन्तो ह्रस्वश्च ( ४९८ ) इति खले शृङ्खला । लटिखटि० ( ५०५ ) इति वे शर्वो रुद्रः । शृणातेरावः ( ५२० ) शरावः । ऋजिशृपृभ्यः कित् ( ५५४ ) इति किति ईषे शिरीषो वृक्षः । नाम्युपान्त्य० ( ६०९ ) इति किदिः शिरिः हिंस्रः । कृशृकुटि० ( ६१९ ) इति वा णिदिः शारिः द्यूतोपकरणं हस्तिपर्याणं शारिका च । शरिः हिंसा शूलश्च । ऋद्धृशृस्तृसृकुषृषिभ्यः कित् ( ६३५ ) इति किति णौ शीर्णिः रोगः अवयवश्च । नीसावृयुशृवलिदलिभ्यो मिः ( ६८७ ) इति मौ शर्मिः मृगः । कुण्ड्रि० ( ६९५ ) इति रौ निपातनात् शरारिः आतिः । जृशृ० ( ७०५ ) इति ङिति वौ शीविः हिंस्रः । भृमृतृ० ( ७१६ ) इत्युः शरुः शरः क्रोधः आयुधं हिंस्रश्च । उवर्ण इति ये शरव्ये हितं शरव्यं वेध्यम् । किमः श्रो णित् ( ७२५ ) इत्युः किंशारुः धान्यशूकम् । ऋतृशृमृन्नादिभ्यो रो लश्च ( ७२७ ) एभ्यो णिदुः प्रत्ययो रेफस्य च लकारो भवति शालुः कषायो हिंस्रश्च । पराङ्भ्यां ख-निभ्यां डित् ( ७४२ ) पराङ्पूर्वाभ्यां यथासङ्ख्यं शृखनिभ्यां डिदुः प्रत्ययो भवति । परान् शृणाति परशुः कुठारः आखुः । शृदृभसेरत् ( ८९४ ) शरत् ऋतुः । मन् ( ९११ ) सर्वत्र धातुभ्यो बहुलं मन् प्रत्ययो भवति इति मनि शर्म सुखम् । मिथिरञ्जि० ( ९७१ ) इति किल्यसि शिरः । 'पृश् पालनपूरणयोः' । पृणाति अपारीत् पपार । 'ऋशृदृप्रः' ( ४।४।२० ) इति ऋत्वे निपप्रतुः निपप्रुः । पक्षे 'स्कृच्छृतो०' ( ४।३।८ ) इति गुणे पपरतुः पपरुः । पूर्यात् 'वृतो नवा०' ( ४।४।३५ ) इतीटो वा दीर्घे परिता परीता । पिपरिषति पिपरीषति पुपूर्षति । पोपूर्यते । पापरीति पापर्त्ति पापूर्त्तः पापुरति । पापरीषि पापर्षि । क्ये पापूर्यते । पापूर्यात् । पापरीतु । अपापः अपापरीत् अपापूर्त्ता अपापरुः । अपापः अपापराः पारयति अपीपरत् । शतरि पृणत् पृणन्ती । क्तौ निपपृवान् । काने निपप्राणम् । पक्षे निपुपूर्वात् निपुपुराणम् । किति 'ऋवर्णश्रि०' ( ४।४।५७ ) इति नेट् । 'ऋल्वादे०' ( ४।२।६८ ) इत्यत्र प्रो वर्जनात्तो नत्वाभावे पूर्त्तः पूर्त्तिः । 'णौ दान्तशान्तपूर्ण०' ( ४।४।७४ ) इति ते निपातनमस्यापीत्येके पूर्णः । पारितः । अस्मादेव निपातनात् पूरेर्णौ पूर्णः पूरितः । ण्यभावे तु पूर्णः । 'युवर्ण०' ( ५।३।२८ ) इत्यलि परः । उणादौ पृपलिभ्यां टित् पिप् च पूर्वस्य ( ११ ) आभ्यां टित् अः प्रत्ययो भवति, अनयोश्च सरूपे द्वे भवतः । पूर्वस्य स्थाने पिप् इत्यादेशो भवति । पृणाति छायया पिप्परी वृक्षजातिः । किच्च ( १० ) ऋकारान्ताद्धातोर्यथादर्शनं किदकारः प्रत्ययो भवति धातोश्च सरूपे द्वे रूपे भवतः । पूर्यते जलघातेन पुर्पुरः फेनः । इणुर्विश० ( १८२ ) इति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

णे पर्णम् । कॄगॄपॄ० ( १८८ ) इति किल्यणे पुरणः समग्रयिता समुद्रः पर्वतविशेषश्च । आपा० ( २९६ ) इति पे पर्प्पः प्लवः शङ्खः समुद्रः शस्त्रं च । क्षुपॄप्रथि० ( ३४७ ) इत्यमे परमः उत्कृष्टः । ऋजिशॄपॄभ्यः कित् ( ५५४ ) इति किति ईषे पुरीषं विष्ठा । विदिपॄभ्यां कित् ( ५५८ ) इति उषे पुरुषः पुमान् आत्मा च । पॄका० ( ७२९ ) इति किदुः पुरुः महान् राजा च । स्नामदिपद्यर्तिपॄशकिभ्यो वन् ( ९०४ ) इति वनि पर्वसन्धिः पूर्णं पूण्यतिथिश्च । रुद्यर्ति० ( ९९७ ) इत्युसि परुः पर्व समुद्रः धर्मश्च । गॄपॄदुर्वि० ( ९४३ ) इति किपि पूः पुरी । **'वॄश् भरणे'** वरणे इत्यन्ये, ओष्ठ्यादिः । वृणाति अवारीत् । ववार । 'स्कृच्छृतो०' ( ४।३।८ ) इति गुणे ववरतुः ववरुः । 'वृतो नवा०' ( ४।४।३५ ) इतीटि वा दीर्घे वरिता वरीता । 'इवृध०' ( ४।४।४७ ) इति सनि वेट् विवरिषति विवरीषति । 'नामिनोऽनिट्' ( ४।३।३३ ) इति सनः कित्त्वे, 'ओष्ठ्यादुर्' ( ४।४।११७ ) इत्युरि वुवूर्षति । किति 'ऋवर्णश्रि०' ( ४।४।५७ ) इति नेट् । 'ऋल्वादे०' ( ४।२।६८ ) इति तो नत्वे वूर्णः २ । उणादौ ऋतष्टित् ( ९ ) इत्यः सरूपद्वित्वं च वर्वरः म्लेच्छजातिः, वर्वरी कुञ्चितः केशः । वृधृपॄ० ( ७०९ ) इति नसौ वर्णसिः भूमिः । **'भॄश्** भर्जने च' भर्जनं पाकः चाद्भरणे' भर्त्सन इत्यन्ये । भृणाति अभारीत् । बभार बभरतुः । बिभरिषति बिभरीषति बुभूर्षति । भूर्णः २ । भूर्णिः । उणादौ ऋतष्टित् ( ९ ) इत्यः सरूपद्वित्वं च भर्भरः छद्मवान् भर्भरी श्रीः । किच ( १० ) इत्यप्रत्यये भुर्भुरः सञ्चयः । **'दॄश्** विदारणे' भय इत्यन्ये । दृणाति अदारीत् । ददार 'ऋः शॄदॄप्रः' ( ४।४।२० ) इति ऋत्वे दद्रतुः दद्रुः । पक्षे ददरतुः ददरुः । दरिता दरीता । दिदरिषति दिदरीषति दिदीर्षति । णौ दारयति । णौ ङे 'स्मृदृत्वरप्रथम्रदस्तृस्पशेरः' ( ४।१।६५ ) इति सन्वद्भावापवादे अत्वे अददरत् । दीर्णः दीर्णिः । अचि दरः । गौरादित्वात् ङ्यां दरी । उणादौ कृवापाजि० ( १ ) इत्युणि दारु काष्ठं भव्यं च । ऋतष्टित् ( ९ ) इत्यः सरूपद्वित्वं च दर्दरो वाद्यविशेषः । दर्दरी सस्यलुण्टिः । दॄकॄ० ( २७ ) इत्यके दरको भीरुः । जॄपॄदॄ० ( ४७ ) इतीके दर्दरीको वादित्रविशेषः । दुरो द्रः कूटश्च दुर् च ( १५६ ) दुरपूर्वात् दृणातेः किदूटः उटश्च प्रत्ययौ, दुर्वास्यादेशो भवति । दर्दूरूटो दुर्मुखः । दर्दुरुटः अदेशकालवाची । ऋकृवॄधृदारिभ्य उणः ( १९६ ) एभ्यः उणः प्रत्ययो भवति । णौ दारेरिति णिगन्तस्यास्य उणे दारुणः उग्रः । श्वशुर० ( ४२६ ) इत्युरे निपातनात् दर्दुरो मण्डूकः । लटिखटि० ( ५०५ ) इति वे दर्वो हिंस्रः । दर्वा जनपदः । स्वरेभ्य इः ( ६०६ ) दरिः महाभिदा । दॄपॄवॄभ्यो विः ( ७०४ ) दर्विः तर्दूः । तृदॄभ्यां दूः ( ८४६ ) दर्दूः कुष्ठभेदः । शॄदॄभसेरद् ( ८९४ ) दरद् क्षत्रियः । दरदो जनपदः । **दरत्वेषदर्थेऽव्ययम् । प्राकृते दरेत्यर्द्धाल्पे । स एष संस्कृते कविभिर्भ्रान्त्या प्रयुक्तः ।** 'दरदलितहरिद्रापिञ्जराण्यङ्गकानि' द्रो ह्रस्वस्य ( ८९८ ) इति सदि दृषच्छिला । 'दॄ भये' दरति । णौ घटादित्वात् ह्रस्वे दरयति । दृणातेर्दारयति । **'जॄश्** वयोहानौ' जृणाति अजारीत् । जजार जजरतुः जजरुः । जरिता जरीता । जीर्णः २ । जीर्णिः । क्त्वि 'जॄव्रश्च०' ( ४।४।४१ ) इतीटि जरित्वा जरीत्वा । 'जॄषूच् जरसि' जीर्यति । षित्त्वादङि जरा । 'जॄण् वयोहानौ' । णिचि जरति जारयति । **'नॄश्** नये' नृणाति अनारीत् ननार ननरतुः ननरुः । क्ये नीर्यते । नरिता नरीता । नीर्णः २ । नीर्णिः । अचि नरः । स्त्रियां 'नारीसखीपङ्गूश्वश्रू' ( २।४।७६ ) इति निपातनात् ङ्यां नारी । णौ घटादित्वात् ह्रस्वे नरयति । **'गॄश्** शब्दे' गृणाति अगारीत् । जगार जगरतुः जगरुः । गरिता गरीता । गीर्णः २ । गीर्णिः । 'न गृणाशुभरुचः' ( ३।४।१३ ) इति निषेधादस्य यङ् न

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भवति । गर्हितं गृणाति । सनि जिगरिषति जिगरीषति जिगीर्षति । गारयति । अजीगरत् । 'युवर्ण०' (५।३।२८) इत्यलि गरः । उणादौ कृग्र ऋत उद् च (७३४) आभ्यां किदुः ऋकारस्य उद् गुरुः आचार्यः । 'गृत् निगरणे' गिरति । 'ऋश् गतौ' । ऋणाति ४ । आरीत् । आर आरतुः । 'वृतो नवा०' (४।४।३५) इतीटो वा दीर्घे अरिता अरीता । किति 'ऋवर्णश्रि०' (४।४।५७) इति नेट् । 'ऋल्वादे०' (४।२।२८) इति तो ने समीर्णः । समीर्णिः । 'इवृध०' (४।४।४७) सनि वेट् । अरिरिषति अरिरीषति । इडभावपक्षे इरादेशे दीर्घत्वे सनो द्वित्वे पूर्वस्य इत्वे द्वयोः षत्वे च ईर्षिषति । इत्येकादश ॠदन्ताः सेटः ⟶॥ वृत्प्वादिः २२ ल्वादिः २१ ।॥⟵

'क्षिषश् हिंसायाम्' । क्षिणाति अक्षैषीत् । चिक्षाय 'संयोगात्' (२।१।५२) इति यापवादे इयि चिक्षियतुः चिक्षियुः । अनुस्वारेत्त्वान्नेट् क्षेता । सानुबन्धत्वात् 'क्षेः क्षीः चाध्यार्थे' (४।२।७४) इति क्तयोस्तस्य नत्वाभावे क्षितः २ । श्वादित्वात् क्तौ क्षितिः । षित्वादङि क्षिया । दीर्घान्तोऽयमित्येके । क्षीतः २ । 'क्षि क्षये' क्षयति इति इदन्तोऽनिट् । 'व्रींश् वरणे' । व्रीणाति । प्वादिरयमित्येके । 'प्वादे०' (४।२।१०५) इति ह्रस्वे व्रिणाति । अव्रैषीत् । विव्राय । यापवादे 'संयोगात्' (२।१।५२) इतीयादेशे विव्रियतुः । व्रेता । व्रीतः २ । व्रीतिः । उणादौ व्रियो हिक् (७१०) व्रीहिः । 'भ्रींश् भरणे' भय इत्यन्ये, भ्रीणाति । प्वादिरप्ययमित्यन्ये । तन्मते ह्रस्वे भ्रिणाति । अभ्रैषीत् । बिभ्राय । बिभ्रियतुः । भ्रेता । भ्रीतः २ । भ्रीतिः । 'युवर्ण०' (५।३।२८) इत्यलि भ्रयः । इति दीर्घ ईदन्तावनिटौ । 'हेठश् भूतप्रादुर्भावे' भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः । 'तवर्गस्य०' (१।३।६०) इति नस्य णत्वे हेठ्णाति । 'व्यञ्जनाच्छनाहेरानः' (३।४।८०) हेठान, अहेठीत् । जिहेठ । हेठिता । हेठितः । 'हेठि विबाधायाम्' हेठते इति ठान्तः सेट् १ । 'मृडश् सुखने' । नो णत्वे मृड्णाति । हौ मृडान । अमार्डीत् । ममर्ड ममृडतुः । मर्डिता । मृडितः । 'क्षुधक्लिशकुषगुधमृडमृद-वदवसः' (४।३।३१) इति क्त्वः कित्त्वे मृडित्वा । 'नाम्युपान्त्य०' (५।१।५४) इति के मृडः । उणादौ ऋचिऋजि० (४८) इति ईके मृडीकं सुखकृत् सुखं च । 'मृडत् सुखने' मृडति । इति डान्तः सेट् १ । 'श्रन्थश् मोचनप्रतिहर्षयोः' । 'नो व्यञ्जनस्यानुदितः' (४।२।४५) इति नलुकि श्रथ्नाति । श्रथान । अश्रन्थीत् । शश्रन्थ । 'वा श्रन्थग्रन्थो नलुक् च' (४।१।२७) अनयोः स्वरस्यावित्परोक्षासेट्थवोरेत्वं भवति । तत्सन्नियोगे नकारस्य लुक् । न चैतौ द्विर्भवतः । श्रेथतुः श्रेथुः पक्षे शश्रन्थतुः शश्रन्थुः । 'स्कस्वृ०' (४।४।८१) इतीटि श्रेथिथ शश्रन्थिथ । श्रन्थिता । श्रथितः । कर्मकर्त्र्येकधातौ (३।४।८६) विति ञिक्यात्मनेपदेषु प्राप्तेषु किरादित्वात् 'भूषार्थ०' (३।४।९३) इति क्यञ्ञ्योरभावे श्रथ्नीते माला स्वयमेव । अश्रन्थिष्ट माला स्वयमेव । 'दशनावोदैधोद्मप्रश्रथहिमश्रथम्' (४।२।५४) इति निपातनात् नलुपि प्रश्रथः हिमश्रथः । 'णिवे-त्त्यासश्रन्थघट्टवन्देरनः' (५।३।१११) इत्यने श्रन्थनम् । 'ऋत्तथ' (४।३।२४) इति क्त्वो वा कित्त्वे श्रथित्वा श्रन्थित्वा । 'श्रथुङ् शैथिल्ये' श्रन्थते । 'श्रथण् सन्दर्भे' । 'युजादे०' (३।४।१८) इति वा णिचि श्रन्थयति श्रन्थति । 'मन्थश् विलोडने' मथ्नाति । हौ, मथान । अमन्थीत् । ममन्थ ममन्थतुः । मन्थिता । मथितः २ । 'ऋत्तृष०' (४।३।२४) इति क्त्वो वा कित्त्वे मथित्वा मन्थित्वा । मन्थितुम् । घञि मन्थः । उणादौ संस्तुस्पृशिमन्थेरानः (२७६) मन्थानः खजकः । 'मन्थ हिंसासंक्लेशयोः' मन्थति । 'ग्रन्थश् सन्दर्भे' सन्दर्भो बन्धनम् । ग्रथ्नाति । हौ, ग्रथान ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अग्रन्थीत् । जग्रन्थ 'वा श्रन्थग्रन्थ०' (४।१।२७) इति एत्वं न लुक् द्वित्वाभावश्च । ग्रेथतुः ग्रेथुः । जग्रन्थतुः जग्रन्थुः । 'स्कसृ०' (४।४।८१) इतीटि ग्रथिथ जग्रन्थिथ । ग्रथ्यात् ग्रन्थिता ग्रन्थिष्यति अग्रन्थिष्यत् । कर्मकर्त्तरि प्राग्वत् ग्रथ्नीते माला स्वयमेव । अग्रन्थिष्ट माला स्वयमेव । सनि जिग्रन्थिषति । यङि जाग्रथ्यते जाग्रथीति जाग्रत्ति । णौ ग्रन्थयति । णौ ङे अजग्रन्थत् । ग्रथ्नत् । ग्रथ्नती । ग्रन्थिष्यत् । ग्रन्थिष्यती । क्वसौ जग्रथ्वान् ग्रेथिवान् । काने जग्रथानम् ग्रेथानम् । ग्रथितः २ । 'ऋत्तृष०' (४।३।२४) इति क्त्वो वा किच्वे ग्रथित्वा ग्रन्थित्वा प्रग्रन्थ्य । ग्रथितुम् । ग्रथितव्यम् । ग्रथनीयम् । उणादौ पदिपठि० (६०७) इति इः । ग्रन्थिः पर्व । 'ग्रथुङ् कौटिल्ये' ग्रन्थते । 'ग्रन्थण् सन्दर्भे' 'युजादे०' (३।४।१८) इति वा णिचि ग्रन्थयति ग्रन्थति । '**कुन्थश् संक्लेशे**' श्लेषण इत्यन्ये, कुथ्नाति । कुथान । अकुन्थीत् । चुकुन्थ । कुन्थिता । कुन्थितः २ । 'ऋत्तृष०' (४।३।२४) इति वा किच्वे कुथित्वा कुन्थित्वा । घञि कुन्थः । स्थादित्वात् के कुथ्यते इति कुथः कुथा कुथं वा वर्णकम्बलः । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) इत्यः । उणादौ भृमृतृ० (७१६) इत्युः कुन्थु सूक्ष्मजन्तुः । ते लुग्वा इत्युत्तरपदलुकि 'कुन्थुदयापरः कुन्थुर्भगवांस्तीर्थंकरः' । 'कुथु हिंसासंक्लेशयोः' उदित्त्वान्ने कुन्थति कुथ्यते । इति थान्ताश्चत्वारः सेटश्च ४ ।

'**मृदश् क्षोदे**' । मृद्नाति । मृदान । अमर्दीत् । ममर्द । मर्दिता । 'अजातेः शीले' (५।१।१५४) इति णिनि नगरमर्दी, क्षुरमर्दी दिवाकीर्त्तिः । सनि मिमर्दिषति । णौ मर्दयति । णौ ङे ऋवर्णस्य गुणापवादे वा ऋत्वे अमीमृदत् अममर्दत् । यङि मरीमृद्यते । यङ्लुपि मरी ३ मर्त्ति । ममृद्वान् ममृदानः मृदितः २ । 'क्षुधक्लिश०' (४।३।३१) इति क्त्वः किच्वे मृदित्वा प्रमृद्य । इति दान्तः सेट् १ । '**गुधश् रोषे**' गुध्नाति । गुधान । अगोधीत् । जुगोध । गोधितः गुधितः २ । 'क्षुधक्लिश०' इति क्त्वः किच्वे गुधित्वा । 'वौ व्यञ्जनादेः सन् चाय्वः' (४।३।२५) इति सनो वा किच्वे जुगुधिषति जुगोधिषति । भिदाद्यङि गोधा । उणादौ कुथिगुधेरूमः (३५३) गोधूमः । 'गुधच् परिवेष्टने' गुध्यति । **बन्धि**धातुं पाठतो (पृष्ठ ७३७) निर्दिशति । बध्नातीत्यादि स्पष्टम् । परोक्षायां संयोगान्तत्वात् 'इन्ध्यसंयोग०' (४।३।२१) इति किच्वाभावे 'गडदबादेः०' (२।१।७७) इति बस्य भत्वे भन्त्स्यतीति । सनि बिभन्त्सति । यङि बाबध्यते । यङ्लुपि बाबन्धीति बाबंत्ति । णौ बन्धयति । णौ ङे अबबन्धत् । बध्नन् भन्त्स्यन् । किलवान्नलुकि बेधिवान् बेधानम् । बद्धः २ । बद्ध्वा निबध्य । '**बन्धेर्नाम्नि**' (५।४।६७) बन्धेरिति प्रकृतिर्नामविशेषणं (च) । बन्धेर्बन्ध्यर्थस्य यन्नाम संज्ञा तद्विषयात्करणवाचिनः पराद्बन्धेर्धातोस्तस्यैव धातोः सम्बन्धे सति णम् वा भवति । क्रौञ्चबन्धं बद्धः । एवं मर्कटबन्धं मयूरिकाबन्धं गोबन्धं महिषीबन्धं अट्टालिकाबन्धं चण्डालिकाबन्धं बद्धः । क्रौञ्चादीनि बन्धनामानि । क्रौञ्चाद्याकारो बन्धः क्रौञ्चादिरित्युच्यते । तेन बन्धेन बद्ध इत्यर्थः । केचित्तूपपदप्रकृतिप्रत्ययसमुदायस्य क्रौञ्चबन्ध इत्यादेः संज्ञात्वं मन्यन्ते, व्युत्पत्तिं च क्रौञ्चेन क्रौञ्चाय क्रौञ्चाद्वा बन्धनमित्यादि यथा कथञ्चित् कुर्वन्ति; **तन्मत**सङ्ग्रहार्थं नाम्नीति प्रत्ययान्तोपाधित्वेन व्याख्येयम् । '**आधारात्**' (५।४।६८) आधारवाचिनः पराद्बन्धेस्तस्यैव धातोः सम्बन्धे णम्वा भवति । चक्रबन्धं बद्धः । एवं चारकबन्धं कूटबन्धं गुप्तिबन्धं बद्धः । चक्रादिषु बद्ध इत्यर्थः । ग्रामेबद्धः हस्ते बद्ध इति बहुलाधिकारान्न भवति । उणादौ दृकृनृ० (२७) इत्यके बन्धकः चारकपालः । गौरादित्वात् ङ्यां बन्धकी पांसुला । भृमनि० (५८) इत्यूके बन्धूकः ।

१ प्रत्ययान्तं चेन्नाम भवतीत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बन्धेः ( १५७ ) इति कित्यूटे वधूटी । दिननग्न० ( २६८ ) इति निपातनात् बन्धेर्ब्रध् च ब्रध्नः रविः । शुषीषि० ( ४१६ ) इति किती रे बधिरः । भृमृत्० ( ७१६ ) इत्युः बन्धुः । इति धान्तौ आद्यः सेट् द्वितीयोऽनिट् । '**क्षुभश्** सञ्चलने' । 'क्षुभ्नादीनाम्' (२।३।९६) इति णत्वाभावे क्षुभ्नाति क्षुभ्नीतः क्षुभ्नन्ति । हौ क्षुभाण । अक्षोभीत् । चुक्षोभ । क्षोभिता । 'क्षुब्धविरिब्ध०' ( ४।४।७० ) इति सूत्रेण मन्थेऽभिधेये क्षुब्ध इति निपात्यते । अन्यत्र क्षुभित इति । सूत्रं चैतत् क्तप्रत्ययप्रकरणे वक्ष्यते । 'क्षुभि सञ्चलने' क्षोभते । 'क्षुभच् सञ्चलने' क्षुभ्यति । पुष्याद्यङि अक्षुभत् । '**णभ तुभश्** हिंसायाम्' । 'पाठे०' ( २।३।९७ ) इति णो ने नभ्नाति । 'अदुरुपसर्गे०' ( २।३।७७ ) इति नो णे प्रणभ्नाति । हौ नभान । अनाभीत् अनभीत् । 'अनादेशादे०' ( ४।१।२४ ) इत्यत एत्वे द्वित्वाभावे च नेभतुः । नेभुः । नभिता । नभितः ॥ **तुभ** तुभ्नाति । तुभान । अतोभीत् । तुतोभ । तोभिता । तुभितः । णभि तुभि हिंसायाम् नभते तोभते । णभ तुभच् हिंसायाम्' नभ्यति तुभ्यति इति भान्तास्त्रयः सेटः ॥ ३ ॥ **खवश्** हेठशवत् । यथा हेठश् अभूतप्रादुर्भावे तथायमपि । वर्णक्रमानुरोधेन तु तत्रैव न पठितः । 'अनुनासिके च०' ( ४।१।१०८ ) इति व ऊटि 'ऊटा' ( १।२।१३ ) इत्यत्र औत्वे खौनाति । ऊटं य्वोरिति वलुकं नेच्छन्त्येके तन्मते खव्नाति । हौ खवान । अखावीत् । जखाव । खविता । खवितुम् । खवित्वा । क्विपि खौः । **चान्तोऽयमित्येके** । चान्तं धात्वन्तरमित्यन्ये । 'तवर्गस्य०' ( १।३।६० ) इति नो ञत्वे खच्ञाति । अखाचीत् । चखाच । खचिता । खचितः २ । इति वान्तः सेट् १ । '**क्लिशौश्** विबाधने' 'तवर्गस्य०' ( १।३।६० ) इति नो ञत्वस्य 'न शात्' ( १।३।६२ ) इत्यभावे क्लिश्नाति । हौ क्लिशान । अक्लेशीत् पक्षे 'हशिट०' ( ३।४।५५ ) इति सकि 'यजसृज०' ( २।१।८७ ) इति शः षे 'षढोः क०' ( २।१।६२ ) इति के सस्य षत्वे अक्लिक्षत् । चिक्लेश । औदित्वाद्वेट् । क्लेष्टा क्लेशिता । क्तक्तवतुक्त्वासु 'पूङ्क्लिशिभ्यो नवा' ( ४।४।४५ ) इति वेट् क्लिष्टः क्लेशितः, क्लिष्टवान् क्लिशितवान् । क्लिष्ट्वा 'वौ व्यञ्जनादेः०' ( ४।३।२५ ) इति विकल्पापवादे 'क्षुधक्लिश०' ( ४।३।३१ ) इति कित्त्वे क्लिशित्वा । सनि 'उपान्त्ये' (४।३।३४) नामिन्युपान्त्ये सति धातोरनिट् सन् किद्भवति । यङि चेक्लिश्यते । चेक्लिशीति चेक्लेष्टि । णो ङे अचिक्लिशत् । उणादौ क्लिशः के च ( ५३० ) अस्मात् शः प्रत्ययोऽस्य च के इत्यादेशो भवति । केशा मूर्द्धजाः । 'क्लिशिच् उपतापे' क्लिश्यते । **क्लिश्यती** त्वात्मनेपदस्यानित्यत्वज्ञापनात् । **अशश्** धातुं पाठतो निर्दिशति (पृष्ठ ७३७) । अश्नातीत्यादि स्पष्टम् । 'भावे चाशिताद्भुवः खः' (५।१।१३०) इति (च) इति निर्देशात् साध्यादपि कर्त्तरि क्ते दीर्घे च आङ्पूर्वादविवक्षितकर्मणो वा क्ते आशितः तृप्तः । 'वेयिवदनाश्वदनूचानम्' ( ५।२।३ ) इति निपातनात् भूतमात्रे क्वसुर्न चेट् । अनाशीत् अनाश्वान् । 'भुजिपत्यादिभ्यः कर्मापादाने' ( ५।३।१२८ ) भुजादिभ्यः पत्यादिभ्यश्च कर्मण्यपादाने चानट् भवति । अश्यते इति अशनम् । 'क्षुत्तृड्गर्द्धेऽशनायोदन्यधनायम् ( ४।३।११३ ) इति क्यनि निपातनादशनायति बुभुक्षुः । क्षुधोऽन्यत्र अशनीयति दातुम् । उणादौ इष्यशि० ( ७७ ) इति तककि अष्टका पितृदैवत्यं कर्म । अश्रिरिति तु तङ्किवङ्कि० ( ६९१ ) इति रावश्नोतेः । 'अशौटि व्याप्तौ' अश्नुते । इति शान्तौ सेटौ २ । '**इषश्** आभीक्ष्ण्ये' आभीक्ष्ण्यं पौनःपुन्यम् । इष्णाति । हौ इषाण । ऐषीत् । इयेष । 'सहलुभेच्छ'० ( ४।४।४६ ) इतीड्वातोऽपीत्येके । एष्टा । एषिता । वेट्त्वात् क्तयोर्नेट् इष्टः २ । '**इषच्** गतौ' अन्विष्यति । 'इषत् इच्छायाम्' इच्छति इष्टः । '**विषश्** विप्रयोगे' । विष्णाति । विषाण । अवैषीत् । विवेष । वेषिता 'वौ व्यञ्जनादेः सन् चायवः' ( ४।३।२५ ) इति क्त्वासनोर्वा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कित्त्वे विषित्वा वेषित्वा । विवेषिषति विविषिषति । विषितः २ । 'नाम्युपान्त्य०' (५।१।५४) इति के विषम् । 'विषू सेवने' वेषति । 'विष्लंकी व्याप्तौ' वेवेष्टि । अविषत् । **'पुष प्लुषश् स्नेहसेचनपूरणेषु'** । प्रुष्णाति । प्रुषाण । अप्रोषीत् । पुप्रोष । प्रोषिता । प्रुषितः । 'क्रुत्सम्पदा'० ( ३।५।११४ ) इति किपि विप्रुट् । निप्रुषी० ( ५११ ) इति किति वे प्रुष्वा निवृत्तिः । **प्लुष,** प्लुष्णाति । प्लुषाण । अप्लोषीत् । पुप्लोष प्लोषिता । प्लुषितः २ । 'प्रुषू प्लुषू दाहे' प्रोषति प्लोषति । 'प्लुषूच् दाहे' प्लुष्यति । **मुषश् धातुं** (पृष्ठ ७३७) साक्षात्पठन्ति । मुष्णातीत्यादि स्पष्टम् । 'रुदविदमुषग्रहस्वपप्रच्छः सन् च' ( ४।३।३२ ) सेडिति निवृत्तम् । एभ्यः परः सन् क्त्वा च किद्वद्भवतः । मुषित्वा मुमुषिषति । उणादौ विचिपुषि०( २२ ) इति किति के मुष्कः पेलः । मुषेर्दीर्घश्च ( ४३ ) इतीके मूषिकः । अजादित्वादापि मूषिका । **'पुषश् पुष्टौ'** । पुष्णाति । पुषाण । अपोषीत् । पुपोष । पोषिता । 'पुष पुष्टौ' पोषति 'पुषंच् पुष्टौ' पुष्यति । पोष्टा । **'कुषश् निष्कर्षे'** । निष्कर्षो बहिष्कर्षणम् । कुष्णाति । कर्मकर्त्तरि 'कुषिरञ्जेर्व्याप्ये वा परस्मै च' ( ३।४।७४ ) आभ्यां व्याप्ये कर्त्तरि शिद्विषये परस्मैपदं वा भवति । तत्सन्नियोगे श्यश्च क्यात्मनेपदापवादौ । कुष्णाति पादं देवदत्तः, कुष्यति कुष्यते पादः स्वयमेव । कुष्यन् कुष्यमाणो वा पादः स्वयमेव । पक्षे 'एकधातौ०' ( ३।४।८६ ) इति क्ये आत्मनेपदे च कुष्यते पादः स्वयमेव । ह्यौ कुषाण । अकुष्णात् **'निष्कुषः'** ( ४।४।३९ ) निर्निष्संबद्धात् कुषः परस्य स्ताद्यशित आदिरिड्वा भवति । निःपूर्वनियमात्केवलादन्यपूर्वाच्च नित्य एवेट् । कोषिता प्रकोषिता । अद्यतन्यां निरकोषीत् । पक्षे इडभावे 'हशिट०' ( ३।४।५५ ) इति सकि निरकुक्षत् । निश्चुकोष । निष्कोष्टा निष्कोषिता । निष्कोक्ष्यति निष्कोषिष्यति । 'वौ व्यञ्जनादेः०' ( ४।३।२५ ) इति क्त्वासनोर्वा कित्त्वे कुषित्वा कोषित्वा कुष्ट्वा । निश्चुकुषिषति निश्चुकोषिषति । इडभावपक्षे निश्चुकुक्षति । 'उपान्त्ये' इत्यत्र कित्त्वम् । **'क्तयोः'** ( ४।४।४० ) निष्कुषः परयोः क्तयोरादिरिड् नित्यं भवति । पृथग्योगाद्वेति निवृत्तम् । निष्कुषितः निष्कुषितवान् । कुषेः कित् ( ८० ) इतीतके कुषीतक ऋषिः । कुषेर्वा ( १६४ ) इति वा किति ठे कुष्ठं व्याधिर्गन्धद्रव्यं च । कोष्ठः कुसूल उदरं च । प्रुषिप्लुषिशुषिकुष्यशिभ्यः सिक् ( ७०७ ) इति सिक्प्रत्यये कुक्षिः । सिविकुटिकुठिकुकुषिकृषिभ्यः कित् ( ७५३ ) इति कित्याकौ कुषाकुर्मूषिकोग्निः परोपतापी च । इति षान्ताः सप्त सेटश्च ७ । **'ध्रसूश् उञ्छे'** ध्रस्नाति । ह्यौ ध्रसान । अध्रासीत् २ । दध्रास । ध्रसिता । ऊदित्त्वात् क्त्वि वेट् ध्रसित्वा ध्रस्त्वा । वेट्त्वात् क्तयोर्नेट् ध्रस्तः २ । इति सान्तः सेट् १ । अथ **ज्ञाधातुं** कण्ठतो निर्दिशति (पृष्ठ ७३७) । **ज्ञांश्** इति । फलवत्कर्त्तरि 'ज्ञोऽनुपसर्गात्' (३।३।९६) इत्यात्मनेपदे धर्मं जानीते । 'पदान्तरे गम्ये वा' ( ३।३।९९ ) स्वां गां जानीते जानाति वा । उपसर्गात्तु 'शेषात्०' (३।३।१००) इति परस्मैपदे अवजानासि माम् । 'निह्नवे ज्ञः' (३।३।६८) शतमपजानीते । संप्रतेरस्मृतौ इत्यात्मनेपदे 'समो ज्ञोऽस्मृतौ' वा ( २।२।५१ ) इति व्याप्ये वा तृतीयायां मात्रा संजानीते मातरं संजानीते । नित्यं शब्दं प्रतिजानीते । 'अननोः सनः' ( ३।३।७० ) धर्मं जिज्ञासते । अनोस्तु पुत्रमनुजिज्ञासति पाठाय । कर्मण्यसति 'ज्ञः' ( ३।३।८२ ) इत्यात्मनेपदे 'अज्ञाने ज्ञः षष्ठी' ( २।२।८० ) इति करणे षष्ठ्यां सर्पिषो जानीते । सर्पिषा करणभूतेन प्रवर्त्तत इत्यर्थः । ज्ञेयात् ज्ञायादिति । अङ्किति आशिषि तु ज्ञासीष्ट । अनुस्वारेत्वान्नेट् ज्ञात्वा । ज्ञातुम् । 'ज्ञानेच्छा०' ( ५।२।९२ ) सति के ज्ञातः । णौ **'मारणतोषणनिशाने ज्ञश्च'** ( ४।२।३० ) एष्वर्थेषु वर्त्तमानस्य

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जानातेर्णिचि अणिचि च णौ ह्रस्वो भवति। ञिणम्परे तु वा दीर्घः। चकारो णिचि चेत्यस्यानुकर्षणार्थः। मारणे संज्ञपयति पशुम्। तोषणे ज्ञपयति गुरुम् विज्ञपयति राजानम्। निशाने ज्ञपयति शरान् प्रज्ञपयति शस्त्रम्। अज्ञापि अज्ञपि। ज्ञापम् २ ज्ञपम् २। निशानं तेजनं तीक्ष्णीकरणम्। अन्ये तु निशामने इच्छन्ति। निशामनमालोचनं प्रणिधानमाहुः। इह सर्वत्र सूत्रे णिचि अणिचि च णौ रूपसाम्येऽप्यर्थभेदः। एकत्र स्वार्थोऽन्यत्र प्रयोक्तृव्यापारः। स्वार्थे प्रथममेव मारणे वर्त्तते, अन्यत्र प्रथमं मरणे ततो मारणे अन्यत्र ज्ञापयति। णौ ङे व्यजिज्ञपत्। 'इवृध०' (४।४।४७) इति सनि वेट् जिज्ञपयिषति। पक्षे 'ज्ञप्यापो ज्ञीपीप्०' (४।१।१६) इति ज्ञीपि ज्ञीप्सति। 'नाम्युपान्त्यप्रीकृगृज्ञः कः' (५।१।५४) इति कै ज्ञः। 'उपसर्गादातः' (५।३।११०) इति ङे प्रज्ञः। प्रज्ञायणि प्राज्ञः। प्राज्ञश्चेति ङे पथिप्रज्ञः। 'णौ दान्त०' (४।४।७४) इति क्ते वा निपातनात् संज्ञप्तः पशुः। पक्षे सेट्क्तयोरिति णे लुकि संज्ञपितः। उपसर्गादित्यङि प्रज्ञा उपज्ञा। यङि जाजायते। त्यादौ तु न जा, जाज्ञाति जाज्ञेति जाज्ञीतः जाज्ञति। शतरि तु यङ्लुपि जाज्ञातीति वाक्ये 'जाज्ञाजन०' (४।२।१०४) इति जा आदेशे 'श्नश्चातः' (४।२।९६) इत्यालुकि जन् अत्यर्थं जानन् इत्यर्थः। उणादौ पुज्ञायजिषपिपदिवसिवितसिभ्यस्तिः (६४६) इति तौ ज्ञातिः बन्धुः। ज्ञायते इति वा स्त्रियां क्तौ ज्ञातिः। ज्ञानं ज्ञातिरिति तु नास्ति; प्रसिद्धेनापहृतत्वात्। इति परस्मैपदिनः॥ ४३॥

'**वृङ्श्** संभक्तौ'। संभक्तिः संसेवा। 'एषामी०' (४।२।९७) इतीत्वे वृणीते। 'इट्सिजाशिषो०' (४।४।३६) इति वेटि, 'वृतो नवा०' (४।४।३५) इति वा दीर्घे अवरिष्ट अवरीष्ट। पक्षे 'नामिनोऽनिट्' (४।३।३३) इति सनः कित्त्वे वुवूर्षते। किति 'ऋवर्णश्रि०' (४।४।५७) इति नेट् वृतः २। वृत्वा। 'वर्योपसर्या०' (५।१।३२) इति ये निपातनात् वर्यमुपेयम्। वार्यमन्यत्। 'भृवृजि०' (५।१।११२) इति खे पतिंवरा कन्या। धृङ्भिक्षिलुपिजल्पिकुट्टाट्टाकः वराकः वराकी। 'युवर्ण०' (५।३।२८) इत्यलि वरः। जृशृदृगृवृस्तृभ्यो द्वे रश्चादौ (४७) एभ्य इको द्वे रूपे एषां त्वादौ रः वर्वरीकः संवरणं उरणः पतत्री केशसंघातश्च। वर्वरीका सरस्वती। **धातुपारायणे** 'वृङ्श् संभक्तौ' इति धातोः **उणादिविवरणे** तु 'वृग्ट् वरणे' इति धातुः। वृङ् एण्यः (३८२) वरेण्यः। 'वुगृट् वरणे' वृणुते वृणोति। 'वृगश् वरणे' वृणाति वृणीते। 'वृगण् आवर्णे' युजादेरिति वा णिचि वारयति। पक्षे वरते वरति। इत्यात्मनेपदी १।

'षोडशोभयपदिनः एक एवात्मनेपदे। त्रयश्चत्वारिंशदिह परस्मैपदिनः स्मृताः'॥ १॥

'द्वाविंशतिः प्वादयोऽत्र ल्वादयश्चैकविंशतिः। क्र्यादयो धातवश्चैवं षष्टिः स्युः सर्वसङ्ख्यया'॥ २॥६॥

यां शिष्योद्धुतकीर्त्तिकीर्त्तिविजयश्रीवाचकाहर्म्मणे
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः।
तस्यां शासितसाधुशब्दसरणौ स्वोपज्ञसत्प्रक्रियावृत्तौ आविष्कृताः शितो गुणभृतः पूर्णाः अमी क्र्यादयः॥ १॥



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# अथ स्वार्थिकप्रत्ययान्ताः ।

अथ स्वार्थिकप्रत्ययान्तान् धातून् निरूपयति । सूत्रम्

## गुपौधूपविच्छिपणिपनेरायः ॥ १ ॥ [ सि० ३।४।१ ]

एभ्यः पञ्चभ्यः स्वार्थे आयः प्रत्ययो भवति । गोपायति ४ । धूपायति ४ । पणायति ४ । पनायति ४ । 'कमेर्णिङ्' ( ३।४।२ ) 'ऋतेर्डीयः' ( ३।४।३ ) ॥ १ ॥

'**गुपौ०**' एभ्यः पञ्चभ्य इति '**गुपौ** रक्षणे' । '**तप धूप** सन्तापे' भ्वादिषु परस्मैपदिनौ । '**विछत्** गतौ तुदादिः परस्मैपदी । '**पणि** व्यवहारस्तुत्योः' '**पनि** स्तुतौ' भ्वादिष्वात्मनेपदिनौ । पणायतीति व्यवहरति स्तौति वेत्यर्थः । व्यवहारार्थात्पणेर्नेच्छन्त्यन्ये । शतस्य पणते । अनुबन्धस्याशवि आयप्रत्ययाभावपक्षे चरितार्थत्वादायप्रत्ययान्ताभ्यां पणिपनिभ्यामात्मनेपदं न भवति । ततश्च 'शेषात्परस्मै' ( ३।३।१०० ) इति परस्मैपदम् । गुपाविलौकारो गुपि गोपन इत्यस्य निवृत्त्यर्थो यङ्लुबन्तनिवृत्त्यर्थश्च । गोपायतीत्यादि । शिद्भिभक्तिचतुष्टयं स्पष्टम् । अशिति इड्विकल्पे त्रैरूप्यं यथासम्भवं ज्ञेयम् । यङि जोगुप्यते जोगुपीति जोगोप्ति । णौ गोपायति गोपयति । आयस्यादन्तत्वेन उपान्त्य इति ह्रस्वाभावे अजुगोपायत् अजुगोपत् । गोपायन् । गोपायिष्यन् गोप्स्यन् गोपिष्यन् । गोपायितः २ । 'वेटोपतः' ( ४।४।६२ ) इतीट्प्रतिषेधे गुप्तः २ । गोपायित्वा गुप्त्वा गोप्त्वा । भावकर्मणोः गोपाय्यते । अद्यतन्यां अगोपायि अगोपि अगोपिषाताम् अगोपायिषाताम् । 'सिजाशिषा०' ( ४।३।३५ ) इति कित्त्वे अजुगुप्साताम् । ध्वमि अगोपायिध्वम् ढ्वम् ढ्वम् । अगुबूध्वम् ढ्वं ध्वम् । अगोपिध्वम् ढ्वं ढ्वम् । जुगुप्सति । 'वौ व्यञ्जना०' ( ४।३।२५ ) इति वा कित्त्वे जुगोपिषति जुगुपिषति । एवं धूपायति । अधूपायीत् अधूपीत् इड्विकल्पाभावाद्रूपद्वयमेव अधूपायिष्टाम् । धूपायाञ्चकार । दुधूप । धूपाय्यात् धूप्यात् । धूपायिता धूपिता । धूपायिष्यति धूपिष्यति । दुधूपायिषति दुधूपिषति । दोधूप्यते । दोधूपीति दोधूप्ति । णौ धूपाययति धूपयति । आयस्यादन्तत्वेन अदुधूपायत् अदुधूपत् । धूपाय्यमानं धूप्यमानम् । धूपायाञ्चकवान् दुधूप्वान् । भावकर्मणोः अधूपायि अधूपि । '**विछत्** गतौ' । 'स्वरेभ्यः' ( १।३।३० ) इति छस्य द्वित्वे विच्छायति । अविच्छायीत् अविच्छीत् । विच्छायाञ्चकार विविच्छ । विच्छायिता विच्छिता । शतरि 'अवर्णादश्न०' ( २।१।११५ ) इति वान्तादेशे विच्छन्ती विच्छती स्त्री कुले वा । **द्रमिला**स्तु शे नित्यमायम्, तुदादिपाठबलाद्यायव्यवायेऽपि पक्षे नलोपमिच्छन्ति विच्छायन्तीति विच्छायती, यथा जुगुप्सते इति सन् व्यवाये(व्यवधाने)ऽप्यात्मनेपदम् । विच्छो नञ् विश्नः । 'विच्छण् भासार्थः' विच्छयति । **पणायती**ति 'विनिमेयद्यूत०' ( २।२।१६ ) इति वा कर्मत्वे शेषषष्ठ्यां च शतं शतस्य वा पणायति । अपणायीत् अपणिष्ट । पणायाञ्चकार पेणे । पणायिता पणिता । पंपण्यते । **पनायती**ति पनेरिदित्वादात्मनेपदमित्यन्ये । पनायते जिनम् । एवं पणेरपि । पंपनीति पंपन्ति पंपान्तः पंपनति । पनाययति पनयति । ( पनति ? ) आयस्यादन्तत्वेन अपपनायत् अपीपनत् ।

'**कमूङ्** कान्तौ' भ्वादिरात्मनेपदी अत्र सूत्रम्

---

१ जयादित्यप्रभृतयः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## कमेर्णिङ् ॥ २ ॥ [ सि० ३।४।२ ]

**कामयते ४ ॥**

**'कमे०'** ( ३।४।२ ) कमेर्धातोः स्वार्थे णिङ् स्यात् । णकारो वृद्ध्यर्थः । ङकार आत्मनेपदार्थः । कामयते । अद्यतन्यादौ 'अशवि ते वा' ( ३।४।४ ) इति णिङ्विकल्पात् णिङभावे 'णिश्रिद्रुस्रुकमः कर्त्तरि ङः' ( ३।४।५८ ) इति ङे अचकमत । पक्षे णिगि अचीकमत् । परोक्षायां णिङभावे च कमेर्णिङि कमयाञ्चक्रे । कमिषीष्ट कामयिषीष्ट । कमिता कामयिता । कमिष्यते कामयिष्यते । अकमिष्यत् अकामयिष्यत् । सनि चिकमिषते , चिकामयिषते । यङि चंकम्यते । लुपि चङ्कमीति चङ्क्रन्ति चङ्क्रान्तः चङ्कमति । चङ्कमीषि चङ्कंसि । 'शिड्हेऽनुस्वारः' ( १।३।४० ) चङ्कन्थः चङ्कन्थ । चङ्कमीमि चङ्क्म्मि 'मो नो म्वोश्च' ( २।१।६७ ) इति मकारस्य नकारः । णिङि यङ् न स्यादनेकस्वरत्वादिति भृशं कामयते इति वाक्यमेव । णिगि 'अमो कम्यमिचमः' ( ४।२।२६ ) इति ह्रस्वाभावे कामयति २ । अचीकमत् २ । अकामि । कामयमानः । कम्यमानं काम्यमानं च । कमानः । कामयाञ्चक्राणः । ऊदितो वेट् कान्त्वा कमित्वा कामयित्वा । वेट्त्वान्नेट् कान्तः । णिङि कामितः कमिता कामयिता । कमितुं कामयितुम् । कम्यं काम्यम् । भावकर्मणोः कम्यते काम्यते अद्यतन्यां 'अमो कम्यमि०' ( ४।२।२६ ) इति वृद्धिनिषेधाभावे अकामि । णिङ्यपि अकामि अकमिषाताम् 'अमो कमे'ति ह्रस्वाभावे अकामयिषाताम् । **'ऋत घृणागतिस्पर्द्धेषु'** भ्वादिः परस्मैपदी । अत्र सूत्रम्

## ऋतेर्ङीयः ॥ ३ ॥ [ सि० ३।४।३ ]

ऋतीयते ४ ॥

**'ऋत०'** प्रत्ययस्य ङित्त्वादात्मनेपदम् । ऋतीयते इत्यादि सर्वं व्यक्तम् ॥ १ ॥ अद्यतन्यादौ सूत्रम्

## अशवि ते वा ॥ ४ ॥ [ सि० ३।४।४ ]

गुपादिभ्यः सप्तभ्योऽशव्विषये आयादयो वा स्युः । अगोपायीत् । औदित्त्वादिड्वा । अगोपीत् । व्यञ्जनानामनिटीति वृद्धौ अगौप्सीत् । गोपायामास । जुगोप ६ । गोपायात्-गुप्यात् ७ । गोपायिता-गोपिता-गोप्ता ८ । आर्तीयीष्ट । ङीयाभावे आर्तीत् ५ । ऋतीयाञ्चक्रे-आनर्त ६ । ऋतीयिषीष्ट ऋत्यात् ७ । ऋतीयिता-अर्त्तिता ८ । ऋतीयिष्यते-अर्त्तिष्यति ॥ ४ ॥

**'अश०' ननु** विच्छेस्तौदादिकत्वेन शव्विषयत्वाभावाच्छित्यपि आयविकल्पः प्राप्नोति । नैवम् शवोऽपवादत्वात् शप्रत्ययस्यापि शव्शब्देनाभिधानाददोषः । एवं च 'अशवि०' इत्यनेनाशितीत्यर्थः सिद्धो भवति । अशितीत्येव वा पठनीयमेव । शेषं सर्वं स्पष्टं व्याख्यातप्रायं च ।

## धातोः कण्ड्वादेर्यक् ॥ ५ ॥ [ सि० ३।४।८ ]

कण्डूयति ४ । अकण्डूयीत् । कण्डूयामास ६ । कण्डूयिता ७ । एवं कण्डूयते ४ । अकण्डूयिष्ट ५ ।

॥ इति स्वार्थिकप्रत्ययान्ताः ॥

**'धातोः कण्ड्वा०'** द्विविधाः कण्ड्वादयः, धातवो नामानि च । कण्ड्वादिभ्यो धातुभ्यः यक्प्रत्ययो भवति कण्डूयति । क्ये कण्डूय्यते । अद्य० अकण्डूयीत् अकण्डूयिष्ट अकण्डूयि । कण्डूयाञ्चकार चक्रे वा । कण्डूयिता । एवं भिषज्यति । 'अतः' ( ४।३।८२ ) इत्यलुकि 'योऽशिति' ( ४।३।८० ) इति यलुकि अभिषजत् । अभिषजि । अत्रालुकः स्थानित्वान्न वृद्धिः । भिषजाञ्चकार । भिषजिता ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'क्यो वा' (४।३।८१) इत्यत्र यकोऽपि वालुग् इत्यनेन भिषजिता भिषज्यिता इत्यादि प्रक्रिया स्पष्टा। धातोरिति किम्? नाम्नो मा भूत्। कण्डूः कण्ड्वौ कण्ड्वः। कण्डूग् इति गकारः फलवति कर्त्तरि आत्मनेपदार्थः। '**कण्डूग्** गात्रविघर्षणे'। '**महीङ्** वृद्धौ पूजायां च' ङकार आत्मनेपदार्थः। सर्वत्र महीयते पूजां लभते। '**हृणीङ्** रोषणे लज्जायां च'। 'फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः। त्वयाद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी हृणीयते' ॥ १ ॥ इति **नैषधीये**। '**वेङ्** वेष्टने' वेयते वेष्टयति। '**लाङ्** विलयने' लायते विलीयते। '**वेङ् लाङ् वेट् लाट्** एते धौर्त्ये पूर्वभावे स्वप्ने च। आद्ययोर्ङ आत्मनेपदार्थः। **लिट्** अल्पार्थे कुत्सायां च लिट्यति इति **क्रियारत्नसमुच्चये**। **मन्तु** रोषवैमनस्ययोः। **मन्तु** अपराधे रोष इत्येके इति **सिद्धान्तकौमुद्याम्**। मन्तूयति। **चन्द्रस्तु** ञितमाह मन्तूयते इति कौमुद्याम् **वल्गु** पूजायां माधुर्ये च वल्गूयति। **असु** उपतापे दोषप्रकटनेऽपि। असूयति। अस् असूञ् इत्येके। अस्यति। असूयति असूयते इति **कौमुद्याम्**। वेट्लाद् इत्यन्ये। लेट् (**लिट्** सिद्धहेमबृहद्वृत्तौ)) **लोट्** धौर्त्ये पूर्वभावे स्वप्ने च दीप्ताविल्यन्ये। लेट्यति लोट्यति। लेटिता। **उरस्** बलार्थः। उरस्यति बलवान् भवतीत्यर्थः। **उरस्** ऐश्वर्ये इत्यन्ये। **उषस्** प्रभातीभावे धौर्त्ये स्वप्ने च। परितापे इत्यन्ये। **इरस्** ईर्ष्यायाम्। इरस्यति इरञ् ईर्ष्यायाम्। हलि चेति दीर्घे ईर्य्यति ईर्य्यते इति **कौमुद्याम्** **तिरस्** आच्छादने। तिरस्यति आच्छादयति। **इयस् इमस्** ईर्ष्यायाम्। इयस्यति इमस्यति। **इस्** इस्यति। **पयस्** प्रवेशने। पयस्यति प्रविशति। पयस् प्रसृतौ इति **कौमुद्याम्**। **संभूयस्** प्रभूतार्थे। संभूयस्यति। प्रभूतो भवति। '**दुवस्** परितापपरिचारणयोः'। **दुरज्** ईर्ष्यायाम्। **भिषज्** चिकित्सायाम्। **भिष्णज्** उपसेवायाम्। भिषज्यति। भिष्णज्यति। 'अतः' (४।३।८२) इत्यलुक्। **रेखा** श्लाघासादनयोः। **लेखा** स्खलने च। अदन्तोऽयमित्येके। लेख्यति इति **कौमुद्याम्**। **एला वेला केला खेला** विलासे। इलेत्यन्ये। खल इत्यन्ये। एला वेला सेवने कालक्षेपे वा इत्यन्ये। **गोधा** अर्थः संप्रदायगम्यः। **मेधा** आशुग्रहणे। मेधायति। **मगध** परिवेष्टने। नीचदास्ये इत्यन्ये इति **कौमुद्याम्**। 'अतः' इत्यलुक् मगध्यति। **इरध** अर्थः। संप्रदायगम्यः। **इषुध** शरधारणे। **कुकुभ** क्षेपे। **कुषुभ** इति **कौमुद्याम्**। **सुख दुःख** क्रियायाम्। सुख्यति दुःख्यति। सुखं दुःखं वानुभवतीत्यर्थः। **अगद** नीरोगत्वे। **गद्गद** वाक्स्खलने। गद्गदङित्येके। गद्गद्यते। **तरण वरण** प्रसिद्धार्थौ। चरणगतौ इति **कौमुद्याम्**। **उरण** ५० अर्थः संप्रदायगम्यः। **तुरण** त्वरायाम्। **पुरण भरण** गतौ। **चुरण** गतिचौर्ययोः। **भुरण** धारणपोषणयुद्धेषु। **तंतस् पंपस्** दुःखार्थे। **अरर** आरात्कर्मणि। **समर** युद्धे। **सपर** पूजायाम्। **लेला** दीप्तौ। **लाट** जीवने २। **अंवर संवर** संभरणे ४। एते चत्वारः **कौमुद्याम्**। एवं चतुःषष्टिपरिमाणः कण्ड्वादिः। आकृतिगणोऽयम्। कण्डूयतेः सनि '**सन्यङश्च**' (४।१।३) इति आद्यांशस्यैकस्वरस्य द्वित्वे प्राप्ते विशेषसूत्रम्। '**कण्ड्वादेस्तृतीयः**' (४।१।९) कण्ड्वादेर्धातोर्द्विर्वचनभाज एकस्वरस्तृतीय एवावयवो द्विर्भवति। कण्डूयितुमिच्छति कण्डूयियिषति। असूयितुमिच्छति असूयियिषति। असूयन्तं प्रायुङ्क्त प्रयोक्तृव्यापारे णिगि ङे आसूयियत् ॥ २ ॥

---

१ कण्डुग् गकार 'इगितः' इत्यात्मनेपदार्थः। महीङ् हृणीङ् वेट् लाङ् ङकार आत्मनेपदार्थः। मन्तु वल्गु असु वेट् लाट् वेटलाद् इत्यन्ये। लिट् लोट् उरस् उषस् इरस् तिरस् इयस् इमस् अस् पयस् सम्भूयस् दुवस् दुरज् भिषज् भिष्णुक् रेखा लेखा एला वेला केला खेला खल इत्यन्ये। गोधा मेधा मगध इरध इषुध कुषुम्भ सुख दुःख अगद गद्गद गद्गदङित्येके। तरण वरण उरण तुरण पुरण भुरण चुरण भरण तपुस तम्पस अरर सपर समर इति कण्ड्वादिः। इत्थं तु मुद्रितसिद्धहेमबृहद्वृत्तावर्थरहिताः सङ्गृहीताः।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# अथ चुरादयः ।

**'चुरण् स्तेये'** ।

अथ स्वार्थिकप्रत्ययान्तप्रक्रमादेव चुरादिधातुगणं वर्णक्रमेण निरूपयति । तत्राप्यादौ संप्रदायात् चुरण् इति । णित्त्वं चुरादिज्ञापनार्थम् । सूत्रम् ।

## चुरादिभ्यो णिच् ॥ १ ॥ [ सि० ३।४।१७ ]

**एभ्यः स्वार्थे णिच् स्यात् । वर्त्तमाना तिव् । 'कर्त्तर्यनद्भ्यः शव्' गुणेऽयादेशे 'लघोरुपान्त्यस्य' इति पूर्वस्य गुणे चोरयति १ । चोरयेत् २ । चोरयतु चोरयतात् ३ । अचोरयत् ४ । णिश्रीत्यादिना ङे ॥ १ ॥**

**'चुरा०'** स्वार्थिकत्वेनान्तरङ्गत्वाद्विशेषविधानाच्च कर्त्रादिकारकापेक्षत्वेन बहिरङ्गेभ्यः सामान्यविहितेभ्यश्च तिवादिभ्यः प्रागेव स्वार्थे णिच्, णिजन्तस्यापि क्रियार्थत्वाद्धातुत्वे 'शेषात्०' ( ३।३।१०० ) इति परस्मैपदे चोरयतीति । णिचो गित्त्वाभावात्कर्त्रर्थात्मनेपदं नास्ति । चन्द्रस्तु णिच्यप्युभयपदित्वमभ्यासीत्, णिद्विकल्पं च । अद्यतन्यां 'णिश्रि०' ( ३।४।५८ ) इति ङे ॥ १ ॥ सूत्रम्

## उपान्त्यस्यासमानलोपिशास्वृदितो ङे ॥ २ ॥ [ सि० ४।२।३५ ]

**समानलोपिशास्वृदिद्वर्जस्य धातोरुपान्त्यस्य ङपरे णौ ह्रस्वः स्यात् । तत 'आद्योंश एकस्वर' इति द्वित्वे चुचुरि इति द्वित्वे ॥ २ ॥**

**'उपा०'** अत्र नित्यमपि द्विर्वचनं बाधित्वा प्रागेव ह्रस्व ओणेर्ऋदित्करणात् ज्ञापकात् । तद्धि माभवानोणिणदित्यत्र ऋदित्त्वेन ह्रस्वत्वप्रतिषेधार्थं क्रियते । यदि च पूर्वमेव द्वितीयस्य द्वित्वं स्यात्तदानुपान्त्यत्वादेव ह्रस्वत्वाप्राप्त्या किं ऋदित्करणेन ? । एवं मा भवानटिटदित्यादि सिद्धम् । ङपरे णाविति न धातुर्विशिष्यते, किन्तु तदुपान्त्य इति णेः पूर्वस्याधातुत्वेऽपि ह्रस्वो भवति । तेन गोनावमाख्यत् अजूगुनत् । केचिदौतः स्थानिवद्भावेनोपान्त्यत्वाभावात् ह्रस्वं नेच्छन्ति तेनाजुगोनत् । णाविति किम् ? ङे उपान्त्यस्येतावत्युच्यमाने अलीलवदित्यादौ अन्तरङ्गावपि वृद्ध्यावादेशावदीदपदित्यादौ प्वागमं ( च ) बाधित्वा वचनसामर्थ्यात् णेरुपान्त्यस्य लूसम्बन्धिन ऊकारस्य ह्रस्वः प्रसज्यते । लू णिङ इति स्थिते ङपरे णिः तावदन्त्यः स्वरस्तदा लूपान्त्यस्वर ऊकार एव । वचनसामर्थ्यादित्यस्यायमर्थः । यदि वृद्धावादेशौ स्याताम् तदा णिः तावदन्त्यः स्वर उपान्त्यस्तु वकारो भवति नतु कोपि स्वर इति ह्रस्वत्वाभावेन ङे उपान्त्यस्य ह्रस्वो भवतीति वचनमनर्थकं स्यादित्येतद्वचनसामर्थ्यात् ण्युपान्त्यस्य ऊकारस्य ह्रस्वत्वे अलीलवदितीष्टरूपं न सिद्ध्यति । णिग्रहणानुवृत्तौ तु ङपरे णावुपान्त्यस्य ह्रस्व इति अलीलवदपीपचदित्यादौ सर्वत्रापि ह्रस्वः सिद्ध्यति । ङे इति किम् ? याचयति । उपान्त्यस्येति किम् ? अचकाङ्क्षत् । वचनादेकवर्णव्यवधाने भवति नत्वनेकवर्णव्यवधाने । असमानलोपि शास्वृदित इति किम् ? राजानमतिक्रान्तवान् अत्यरराजत् । लोमान्यनुमृष्टवान् अन्वलुलोमत् । स्वामिनमाख्यत् असस्वामत् । तादृशमाख्यत् अततादृत् ।

१ अयमर्थः 'स्वरस्य परे' इति स्वरादेशः स्थानी, अत्र तु स्वरव्यञ्जनादेशः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवं यत्रान्त्यस्वरादिलोपस्तत्र स्थानिवद्भावाभावान्न सिद्ध्यतीति वचनम् । यत्र तु स्वरस्यैव लोपस्तत्र लोपस्य स्वरादेशत्वात् 'स्वरस्य परे०' (७।४।११०) इति स्थानिवद्भावेनैव सिद्ध्यति । मालामाख्यदममालत् । मातरमाख्यदममातत् । 'शारण् दौर्बल्ये' अस्माददन्ताण्णिज् । अशशारत् । 'शूरणि विक्रान्तौ' अस्माददन्ताण्णिज् शूरमाख्यत् अशुशूरत् । अन्यथास्यात्मनेपदित्वादचं विना परस्मैपदं न स्यात् । **ननु** यत्रापि स्वरव्यञ्जनलोपस्तत्राप्यवयवावयविनोरभेदनयेन स्वरादेश एवेति स्थानिवद्भावेनैव सिद्ध्यति किमसमानलोपिवचनेन ? **सत्यं** स्थानिवद्भावस्यानित्यत्वख्यापनार्थं वचनम् । तेन वास्या परिच्छिन्नवान् पर्यवीवसत् । स्वादुकृतवान् असिस्वददित्यादि सिद्धम् । अत्रेकारोकारयोः 'नामिनोऽकलिहलेः' (४।३।५१) इति वृद्धौ कृतायामन्त्यस्वरादिलोपादसमानलोपित्वम् । **ननु** च परत्वात् प्रथमं लोपेनैव भवितव्यम् । **नैवम्** कलिहलिवर्जनात्परमपि लोपं वृद्धिर्बाधते । अत एव तत्र कलिहलिवर्जनमर्थवत् । 'शासू' अशशासत् । आशासोपीच्छत्यन्यः आशशासत् । ऋदित् 'ओणृ अपनयने' मा भवानोणिणत् । 'ओखृ' मा भवानोचिखत् । 'एजृ' मा भवानेजिजत् । 'याचृ' अययाचत् । 'सेकृ' असिसेकत् । **येषां** मते षोपदेशस्तन्मते असिषेकदिति । 'लोकृ' अलुलोकत् । 'ढौकृ अडुढौकत्' । शासेरृदित्करणं यङ्लुब्निवृत्त्यर्थम् । अशाशसत् । **अन्ये** तु अशाशासदित्यपीच्छन्ति । वदति स्म वीणा तां प्रायुङ्क्त परिवादकः तमप्यन्यः प्रायुङ्क्त अवीवदत् वीणां परिवादकेनेति तु णिजात्याश्रयणात् सिद्धम् ॥ २ ॥ चुचुरि इति जाते अत्र सूत्रम्

## लघोर्दीर्घोऽस्वरादेः ॥ ३ ॥ [ सि० ४।१।६४ ]

**नास्ति समानलोपो यस्मिंस्तस्मिन् ङपरे णौ अस्वरादेर्धातोर्द्वित्वे पूर्वस्य लघोर्लघुनि धात्वक्षरे परे दीर्घः स्यात् ॥ ३ ॥**

**'लघो०'** व्यक्तम् । लघोरिति किम् ? अचिक्षणत् । अस्वरादेरिति किम् ? और्णुनवत् । उरुरिवाचरतीति क्विप्लोपे णौ औरिरवत् । लघुनीत्येव अततक्षत् । णावित्येव अचकमत् । ङ इत्येव रिरमयिषति । असमानलोप इत्येव अचकथत् । अददृषत् । णिजात्याश्रयणादवीवदद्वीणां परिवादकेनेति ॥ ३ ॥ अत्रोपयोगिसूत्रम्

## णेरनिटि ॥ ४ ॥ [ सि० ४।३।८३ ]

**अनिट्यशिति प्रत्यये णेर्लुक् स्यात् । अचूचुरत् अचूचुरताम् अचूचुरन् ५ । धातोरनेकस्वरादाम् । चोरयामास ६ । चोर्यात् ७ । चोरयिता ८ । चोरयिष्यति ९ । अचोरयिष्यत् १० । 'पूजण् पूजायाम्' पूजयति ४ । अपूपुजत् ५ । 'चितण् संवेदने' चेतयति ४ । अचिचेतत् ५ । 'चितुण् स्मृत्याम्' उदितः स्वरान्नोऽन्तः चिन्तयति ४ । अचिचिन्तत् ५ । 'कृतण् संशब्दने' ॥ ४ ॥**

**'णेर०'** प्रकटम् । यथा अततक्षत् अररक्षत् आटिटत् आशिशत् । कारणा कारकः कार्यते प्रकार्य । इय् य् गुण वृद्धि दीर्घतागमानां बाधकोऽयम् । अनिटीति विषयसप्तम्यपि तेन चेतन इत्यत्र प्रागेव णेर्लोपे 'इङितो व्यञ्जनाद्यन्तात्' (५।२।४४) इत्यनः सिद्धः । अनिटीति किम् ? कारयिता । अशितीत्येव । कारयति । चोरयाञ्चक्रे चोरयांबभूव । चोरयामाहे, हं नेच्छन्त्येके चोरयामासे । कर्मकर्त्तर्येकधाताविति ञिक्यात्मनेपदिषु प्राप्तेषु 'णिस्नु०' (३।४।९२) इति ञिचो 'भूषार्थसन्०' (३।४।९३) इति क्यस्य च निषेधादात्मनेपदे चोरयते । अचूचुरत गौः स्वयमेव । इदि चोरयि-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पीष्ट । चोरयिष्यते गौः स्वयमेव । सनि चुचोरयिषति । णिजन्तस्यानेकस्वरत्वाद्यङ् न भवति । चोरयन्तं प्रायुङ्क्तेति णिजन्ताण्णिगि 'णेरनिटि' इति णिचो लुक्यपि णिजात्याश्रयणात् समानलोपित्वाभावादुपान्त्यस्येति ह्रस्वे लघोर्दीर्घे च अचूचुरत् । चोरयन् । चोरयन्ती । चोर्यमाणम् २ । चोरयिष्यन् । चोरयिष्यन्ती चोरिष्यन्ती । चोरिष्यमाणम् चोरयिष्यमाणम् । चोरयाञ्चकृवान् बभूवान् आसिवान् । चोरयाञ्चक्राणम् बभूवानम् आसानम् । सेट्क्तयोरिति णेर्लुकि चोरितः२ । चोरयित्वा । चोरयितव्यम् । चोरयितुम् । चोरणीयम् । चोर्यम् । अचि चोरः । गौरादित्वात् ङ्यां चोरी । प्रज्ञाद्यणि चौरः । 'णिवेत्ति०' (५।३।१११) इत्यने चोरणा । णिचोऽनित्यत्वादभावे 'भिदादयः' (५।३।१०८) इत्यङि निपातनात् चुराशीलमित्यधिकस्य अङ्स्याछत्रादेरित्यङि चुराशीलमस्य चौरः । 'अणञेये०' (२।४।२०) इति ङ्यां चौरी । 'युवर्ण०' (५।३।२८) इत्यलि चोरः ।

इह पिचुणप्रभृतीनां सनकारनिर्देशमकृत्वोदित्करणं चुरादिणिचोऽनित्यत्वज्ञापकम्, न च चिन्त्यते इत्यादौ नलोपाभावार्थम् । ततो णिच्लुकः स्थानित्वेनोपान्त्याभावान्नलुकोऽप्रसङ्गात्, तेन चोरति चिन्ततीत्यादि सिद्धम् । इदमन्यदपि ज्ञापकम् । घुषेरविशब्दे इति प्रतिषेधः । तत्रैकस्वरादित्यधिकारेण चुरादिपठितस्य विशब्दनार्थस्य घुषेर्णिजन्तस्यानेकस्वरत्वादेवेट्प्रतिषेधाभावे सिद्धेऽपि घुषेरविशब्दे प्रतिषेधात् ज्ञाप्यते अनित्यश्चुरादि णिजिति । तेन 'महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः' । स्वाभिप्रायं नानाशब्दैराविःकृतवन्त इत्यर्थः इत्यपि सिद्धम् । 'चुरादिभ्यो णिच्' (३।४।१७) इत्यत्र बहुवचनमाकृतिगणार्थम् । तेन संवाहयतीत्यादि सिद्धम् । **'पृण् पूरणे'** । पारयति । अपीपरत् । पारयाञ्चकार । 'साहिसाति' (५।१।५९) इति शे पारयः । ऋदन्तोऽयमित्येके । **'घृण् स्रवणे'** घारयति । इति ऋदन्तौ द्वौ । **'श्वल्क वल्कण् भाषणे'** । श्वल्कयति वल्कयति । अचि वल्कः तरुत्वक् । वल्कलमिति तु वलिपुषेः कलक् (४९६) इति कलकि । **'नक्क धक्कण् नाशने'** नक्कयति धक्कयति । **'चक्क चुक्कण् व्यथने'** चक्कयति । उणादौ मुरलोरल० (४७४) इति निपातनादले चक्कलम् चक्कलकम् । चुक्कयति । अच्यलि वा चुक्कः । चिक्केति **कौशिकः** । फनसतामरसादय इति निपातनात् चिक्कसं चिक्कणम् । 'यवक्षोदे तु चिक्कसः' इति **कोषः** । **'टकुण् बन्धने'** उदित्त्वान्ने टङ्कयति 'पुन्नाम्नि०' (५।३।१३०) इति घे टङ्कः दृषद्दारकः । अनटि टङ्कनम् । 'णिवेत्त्या०' (५।३।१११) इत्यने टङ्कना । **'अर्कण् स्तवने'** अर्कयति । अच्यलि वा अर्कः । इत्यष्टौ कान्ताः । **'पिचण् कुट्टने'** पिचयति । पिचुरिति तु पचेरिच्चातः (७३५) इति पचेरो रूपम् । **'पचुण् विस्तारे'** उदित्त्वान्ने प्रपञ्चयति । ङे प्रापपञ्चत् । अलि प्रपञ्चः । इति चान्तौ द्वौ । **'म्लेच्छण् म्लेच्छने'** म्लेच्छनमव्यक्ता वाक् । म्लेच्छयति । इति छान्तः एकः । **'ऊर्जण् बलप्राणनयोः'** प्राणनं जीवनम् । ऊर्जयति । 'दिद्युद्दद०' (५।२।८३) इति क्विपि ऊर्क् । 'रात्सः' (२।१।९०) इति नियमादत्र संयोगान्तलुक् नास्ति । ऊर्जो विन्वलावस-वान्तः ऊर्जस्वी ऊर्जस्वलः । भिदाद्यङि ऊर्जा । क्ते ऊर्जितम् । **'तुजु पिजण् हिंसाबलदाननिकेतनेषु'** निकेतनं गृहम् । उदित्त्वान्ने तुञ्जयति पिञ्जयति । उणादौ ऋच्छिचटि० (३९७) इत्यरे पिञ्जरः । पिञ्जिमञ्जि० (४८८) इत्यूले पिञ्जूलः हस्तिबन्धनपाशः । **लुजु**मप्येके पेठुः लुञ्जयति । लोकृ तर्केति पाठेऽनयोः पुनः पाठोऽर्थभेदार्थः सकर्मकार्थं आत्मनेपदार्थश्च । तुञ्जयते पिञ्जयते । **'क्षजुण् कृच्छ्रजीवने'** उदित्त्वान्ने क्षञ्जयति । 'क्षजुङ् गतिदानयोः' क्षञ्जते । घटादित्वात् ञिणम्परे णौ वा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दीर्घे अक्षाञ्जि अक्षञ्जि । **पूजण्** धातुं (पृष्ठ ७५०) साक्षात्पठति पूजयति । 'य एचातः' (५।१।२८) इति पूज्यः । णके पूजकः । याजकादित्वात् 'कर्मजा तृचा च' (३।१।८३) इति प्रतिषिद्धोऽपि षष्ठीसमासो भवति । गुरूणां पूजयति गुरुपूजकः । 'ज्ञानेच्छा०' (५।२।९२) इति सति क्ते 'क्तयोरसदाधारे' (२।२।९१) इत्यत्र सदर्थस्य वर्जनात्प्रतिषेधाभावे 'कर्त्तरि' (२।२।८६) इति षष्ठ्यां राज्ञां पूजितः । 'ज्ञानेच्छा०' (३।१।८६) इति निषेधाभावात्र षष्ठीसमासः । भीषिभूषि० (५।३।१०९) इत्यङि पूजा । '**गज मार्जण्** शब्दे' गाजयति मार्जयति । '**तिजण्** निशाने' तेजयति 'णिवेत्ति०' (५।३।१११) इत्यने तेजना । '**वज व्रजण्** मार्गणसंस्कारगत्योः' मार्गणो बाणस्तस्य संस्कारे गतौ, मार्गसंस्कारेऽपीत्यन्ये । वाजयति व्राजयति । '**रुजण्** हिंसायाम्' रोजयति । इति जान्ता एकादश ११ ॥ '**नटण्** अवस्यन्दने' अवस्यन्दनं भ्रंशः । 'जासनाट०' (२।२।१४) इति कर्मणो वा कर्मत्वे 'शेषे' (२।२।८१) इति षष्ठ्यां चौरस्योन्नाटयति । '**तुट चुट चुटु छुटण्** छेदने' तोटयति चोटयति उदित्त्वान्ने चुण्टयति छोटयति आच्छोटयति । 'नाम्नि पुंसि च' (५।३।१२१) इति णके छोटिका । अनटि आच्छोटनम् । '**कुट्टण्** कुत्सने च' चकारात् छेदने, कुट्टयति । वृङ्भिक्षीति टाके कुट्टाकः । इक्षुकुट्टाकः । कुट्टाकी । अलि कुट्टः । रम्यादित्वात्कर्त्तर्यनटि कुट्टनी । उणादौ कुट्टिवेष्टि० (३४९) इतीमे कुट्टिमं संस्कृतभूतलम् । '**पुट्ट चुट्ट षुट्टण्** अल्पीभावे' पुट्टयति चुट्टयति । 'षः स०' (२।३।९८) इति से सुट्टयति । षोपदेशत्वात् 'णिस्तोरेव०' (२।३।३७) इति षत्वे सुषुट्टयिषति । अषोपदेशोऽयमनादरार्थश्चेत्यन्ये । तन्मते षत्वाभावे सुसुट्टयिषति । '**पुट मुटण्** संचूर्णने' पोटयति । अचि पोटा चेटी । मोटयति अनटि मोटनम् । '**अट्ट स्मिटण्** अनादरे' अट्टयति । अलि अट्टः । अचि अट्टा । अट्टां करोति अट्टायते । स्मेटयति । अषोपदेशत्वात् 'णिस्तोरेव०' (२।३।३७) इति षत्वाभावे सिस्मेटयिषति । '**अट्ट** अल्पीभावे' इत्येके । '**लुण्टण्** स्तेये च' चकारादनादरे, लुण्टयति । वृङ्भिक्षि इति टाके लुण्टाकः । लुण्टाकी । णिजभावे 'क्तेट०' (५।३।१०६) इत्यः लुण्टा । '**स्निटण्** स्नेहने' स्नेहयति । '**घट्टण्** चलने' घट्टयति । अलि संघट्टः । 'णिवेत्ति०' (५।३।१११) इत्यने घट्टना । 'पुंनाम्नि०' (५।३।१३०) इति करणाधारे घे घट्टः नद्यवतरणस्थानम् । अचि अरघट्टः । '**खट्टण्** संवरणे' खट्टयति मुखम् । '**षट्ट स्फिटण्** हिंसायाम्' 'षः स०' (२।३।९८) इति से सट्टयति । षोपदेशत्वात् 'णिस्तोरेव०' (२।३।३७) इति षत्वे सिषट्टयिषति । णके सट्टकम् । अयं बलदाननिकेतनेष्वपीत्यन्ये । स्फेटयति णके, स्फेटकः 'पुन्नाम्नि०' (५।३।१३०) इति घे स्फेटः संस्फेटश्च युद्धम् । '**स्फिटण्** अनादरे' इत्यन्ये । '**स्फुटुंण्** परिहासे' उदित्त्वान्ने स्फुण्टयति । '**कीटण्** वर्णने' बन्ध इत्यन्ये, कीटयति अचि कीटः । '**वटुण्** विभाजने' वण्टयति । डान्तोऽयमित्येके । वण्डयति अचि वण्डः । '**रुटण्** रोषे' रोटयति अचि मामरोटः । इति टान्तास्त्रयोविंशतिः २३ । '**शठ श्वठ श्वठुण्** संस्कारगत्योः' शाठयति श्वाठयति श्वण्ठयति । '**शुठण्** आलस्ये' शोठयति । '**शुठुण्** शोषणे' शुण्ठयति । अचि गौरादित्वात् ङ्यां शुण्ठी । '**गुठुण्** वेष्टने' उदित्त्वान्ने गुण्ठयति । 'णिवेत्ति०' (५।३।१११) इत्यने गुण्ठना । क्ते अवगुण्ठितः । इति ठान्ताः षट् ६ । '**लडण्** उपसेवायाम्' लाडयति । लत्वे, उपलालयति । '**स्फुडुण्** परिहासे' उदित्त्वान्ने स्फुण्डयति णके स्फुण्डिका । '**ओलडुण्** उत्क्षेपे' उदित्त्वान्ने ओलण्डयति 'सेट्क्तयोः' (४।३।८४) इति णेर्लुकि ओलण्डितः । ओदिदयमित्येके । 'लण्डयति' । णिजो टोरनित्यत्वात् 'सूयत्यादि०'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(४।२।७०) इति क्तयोस्तस्य नत्वे लण्डः लण्डवान् । ओदित्करणबलात् णिज्व्यवायेऽपि नत्वमित्यन्ये लण्डिनः । लण्डिनवान्। लडुण् अपीति चान्द्राः । अवलन्दयत्युष्ट्रम्, **'पीडण् गहने'** गहनं बाधा, पीडयति । ङे 'भ्राजभास०' (४।२।३६) इति वा ह्रस्वे अपीपिडत् अपिपीडत् । 'भीषिभूषि०' (५।३।१०९) इत्यत्र बहुवचनादङि पीडा । **अवगाहने इत्यन्ये** । तिलपीलकः । **'तडण् आघाते'** ताडयति । उणादौ णिचोऽनित्यत्वादभावे शलिबलि० (३४) इत्याके तडाकं सरः । तडेरागः (९७) तडागं सरः । हस्रुरुहि० (८८७) इतीति तडित् । कमिवसि० (६१८) इति णिदिः ताडिः, वृक्षजातिः । **खड खडुण् भेदे** । खाडयति । खण्डयति । **कडुण् खण्डने च** । चकारात् भेदे **'खुडुण् खण्डने'** इत्येके खुण्डयति खुण्डितः । **'कुडुण् रक्षणे'** उदित्त्वान्ने कुण्डयति। **'गुडुण् वेष्टने च'** चकाराद्रक्षणे, । उदित्त्वान्ने गुण्डयति । **'चुडुण् छेदने'** चुण्डयति । **'मडुण् भूषायाम्'** उदित्त्वान्ने मण्डयति । 'भूषाक्रोधार्थ०' (५।२।४२) इत्यने मण्डनशीलो मण्डनः । 'युवर्ण०' (५।३।२८) इत्यलि मण्डः । 'णिवेत्ति०' (५।३।१११) इत्यने मण्डना । **'भडुण् कल्याणे'** उदित्त्वान्ने भण्डयति । 'णिवेत्ति०' इत्यने भण्डना । **द्वान्तोऽयमित्यन्ये** भन्दयति । उणादौ णिचोऽनित्यत्वादभावे भन्देर्नलुक् च वा (३।३।९१) इति रकि भद्रम् भन्द्रं च कल्याणम् । **'भडुङ् परिभाषणे'** भण्डते भण्डः । **'पिडुण् संघाते'** पिण्डयति । **'ईडण् स्तुतौ'** ईडयति । **'चडुण् कोपे'** ने च चण्डयति । अचि चण्डः । 'नवा शोणादेः' (२।४।३१) इति वा ङ्यां चण्डी चण्डा । **'जुड चूर्ण वर्णण् प्रेरणे'** प्रेरणं दलनम्, जोडयति लत्वे जोलयति । क्ते जोडितम् । इति डान्ताः सप्तदश १७ । चूर्णयति । अलि चूर्णः । उणादौ स्वरेभ्य इः (६०४) इति इः चूर्णिः । वर्णयति वर्णना । **'चूण् तूणण् संकोचने'** चूणयति । 'युवर्ण०' (५।३।२८) इत्यलि चूणः । तूणयति तूणः । उणादौ जम्बीराभीर० (४२२) इतीरे तूणीरः । **'श्रणण् दाने'** विश्राणयति । 'णिवेत्ति०' (५।३।१११) इत्यने विश्राणना । क्लीबेऽनटि विश्राणनम् । 'भीषिभूषि०' (५।३।१०९) इत्यत्र बहुवचनादपवादेऽङि श्राणा यवागूः । 'यमोऽपरिवेषणे' इत्यत्र णिचो ग्रहणादेषु घटादेरिति ह्रस्वो नास्ति । णिजभावपक्षे तु णिगि ह्रस्वे श्रणयति । **'पूणण् संघाते'** । पूणयति । इति णान्ताः षट् । **"चितुण्"** धातुं (पृष्ठ ७५०) साक्षान्निर्दिशति । 'चितुण् स्मृत्याम्' चिन्तयत्यादि । स्पष्टम् । 'णिवेत्ति०' (५।३।१११) इत्यनापवादे 'भीषिभूषि०' (५।३।१०९) इत्यङि चिन्ता । भीष्यादिभ्योऽनापवादे अप्रत्यये णेर्लुकि भीषादीनां सिद्धावङ्विधानं णेर्लुकोऽनित्यत्वज्ञापनार्थम्। तेन णेर्लुगभावे 'संयोगात्' (२।१।५२) इतीयादेशे चिन्तिया । **तथा** च 'न यमेन न जातवेदसा न कुबेरेण न वज्रपाणिना । मघवो युधि सुप्रकम्पया श्वसनेनैव वसुन्धरायते' ॥ १ ॥ अत्र सुप्रपूर्वात्कम्पेः खलि णेर्लुगभावे यादेशे च सुप्रकम्पया इति सिद्धम् । ज्ञापकेन कचिदेव णिलुगभावो ज्ञाप्यते । आमादिषु तु सर्वत्राव्यभिचारार्थमयादेशे आमन्तादिति वचनम्। **'पुस्त बुस्तण् आदरानादरयोः'** पुस्तयति । अलि पुस्तं लेप्यकर्म । णके पुस्तकम् । **अयं** वन्दने इति **चन्द्रः** । बुस्तयति । उणादौ स्वरेभ्य इः (६०६) बुस्तिः शष्कुली । **'मुस्तण् संघाते'** मुस्तयति अचि मुस्ता । 'कृतण्' धातुं (पृष्ठ ७५०) पाठतो निरूपयति । **'कृतण् संशब्दने'** इति । संशब्दनं ख्यातिः ॥ ४ ॥ अत्र विशेषसूत्रम्।

## कृतः कीर्तिः ॥ ५ ॥ [ सि० ४।४।१२२ ]

**कृतणः कीर्तः** इत्यादेशः स्यात् । कीर्त्तयति ४ । ॥ ५ ॥ ३४

---

१ कथमप्यत्र 'चितिण् संवेदने' इति मूले वर्णितोऽपि त्रुटितो ज्ञायते—संपादकः ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'कृत०'** कृत ऋदुपदेशोऽचीकृतदित्यत्र ऋकारश्रवणार्थः । यत 'ऋद्दवर्णस्य' ( ४।२।३७ ) इत्यत्र वर्णग्रहणसामर्थ्यात्कीर्त्यादेशो बाध्यते । ततश्च दीर्घऋकारस्य ह्रस्वऋकारे अचीकृतदित्यत्र ऋकारश्रवणं स्यादन्यथा धातुपाठे कीर्तण् इत्येव पठ्येत । **ननु** ऋत इत्यत्र ह्रस्व एव क्रियताम् तथा 'ऋद्दवर्णस्य' इत्यत्र वर्णग्रहणं न कर्त्तव्यं स्यात् । **नैवम्**–तथा सति 'कृतैत् छेदने' 'कृतैप् वेष्टने' इत्येतयोरपि ग्रहणं स्यात् । इकारान्तनिर्देशो मङ्गलार्थः ॥ ५ ॥ ङे विशेषसूत्रम्

## ऋद्दवर्णस्य ॥ ६ ॥ [ सि० ४।२।३७ ]

**उपान्त्यस्य ऋवर्णस्य ङपरे णौ वा ऋः स्यात् । अचीकृतत्-अचिकीर्तत् ५ । 'गणण् सङ्ख्याने' गणयति ४ । ॥ ६ ॥**

**'ऋद्द०'** ऋवर्णस्येति अवीवृतत् अववर्तत् । अवीवृधत् अववर्द्धत् । अमीमृजत् अममार्जत् । अदीदृशत् अददर्शत् इति ह्रस्वऋकारान्तोदाहरणानि । अचीकृतदिति दीर्घऋकारान्तोदाहरणम् । वचनसामर्थ्यादर् कीर्त्यादेशौ बाध्येते । उपान्त्यस्येत्येव अचीकरत् । **ननु** ऋद्दत् इत्येवास्तु किं वर्णग्रहणेन । **नैवम्**–तथासत्यचीकृतदिति न स्यात् । **अथ** पाठे कृतण् इति पठिष्यते । **नैवम्**–तथा ऋद्दत इत्यस्यान्यत्र चरितार्थत्वादत्र कीर्त्यादेश एव स्यात् । **अथ** कीर्त इत्यपठनादेवास्यापि ऋद्भविष्यतीति चेत् । **नैवम्**–एवं यदाऽनिलो णिश्चुरादीनामिति णिजभावस्तदा कृतण् इति पाठे कृततीति न स्यात् किन्तु कर्त्ततीत्यनिष्टं स्यादिति वर्णग्रहणं सार्थकम् । तत्र ह्रस्वाधिकारेणैव सिद्धे ऋत्करणमचीकृतदित्यत्र गुणनिषेधार्थम् । ह्रस्वकरणसामर्थ्याद्गुणो न भविष्यतीति न वाच्यम् । **'लघोरुपान्त्यस्य'** ( ४।३।४ ) इति गुणप्राप्त्या ह्रस्वस्य चरितार्थत्वादिति । 'सातिहेति०' ( ५।३।९४ ) इति निपातनापवादे क्तौ कीर्त्तिः । उणादौ स्वरेभ्य० ( ६०६ ) इति इः कीर्त्तिः । **'स्वर्त पथुण्** गतौ' अषोपदेशत्वात् 'णिस्तोरेव०' ( २।३।३७ ) इति न षत्वम् । सिस्वर्तयिषति । षोपदेशोऽयमिति **नन्दी** । 'णिस्तोरेव०' इति षत्वे सिष्वर्तयिषति । अयं कृच्छ्रजीवनेऽपीत्यन्ये । इति तान्ताः षट् ६ । **पथुण्** पन्थयति परिपन्थयति । **'श्रथण्** प्रतिहर्षे' प्रतियत्न इत्यन्ये । श्राथयति । 'श्रथण् बन्धने चे'ति युजादौ पठिष्यमाणोऽप्यर्थभेदादिह पुनरधीतः । आत्मनेपदे न रूपान्यत्वार्थं इह पाठ इत्येके । **'पृथण्** प्रक्षेपणे' । पर्थयति । अयं **पर्थण्** इत्येके । **पार्थण्** इत्यन्ये पर्थयति पार्थयति । **'प्रथण्** प्रख्याने' । प्रक्षेपणे इत्यन्ये प्राथयति । ङे 'स्मृद्दत्वर०' ( ४।१।६५ ) इति सन्वद्भावापवादे पूर्वस्यात्वे अपप्रथत् । इति थान्ताश्चत्वारः । **'छदण्** संवरणे' छादयति । ऊर्जने घटादित्वाद् ह्रस्वे छदयति । 'णौ दान्तशान्त०' ( ४।४।७४ ) इति क्ते वा निपातनात् छन्नः छादितः । णके उच्छादकः । 'कर्मजा तृचा च' ( ३।१।८३ ) इति प्रतिषिद्धोऽपि याजकादित्वात्षष्ठीसमासः राज्ञोच्छादकः । क्विपि **'छदेरिस्मन्त्रट् क्वौ'** ( ४।२।३३ ) इति ह्रस्वे तनुच्छत् । करणाधारे 'पुन्नाम्नि०' ( ५।३।१३० ) इति घे 'एकोपसर्गस्य०' ( ४।२।३४ ) इति ह्रस्वे छदः प्रच्छदः उरश्छदः । उणादौ त्रट् ( ४४६ ) इति त्रटि छत्रम् । हुयामा० ( ४५१ ) इति त्रे ह्रस्वाभावे छात्रः । मनि ( ९११ ) छद्म । रुच्यर्चि० ( ९८९ ) इतीसि छदिः । अदन्तोऽप्ययमित्येके छदयति । 'छदण् अपवारणे' युजादेरिति वा णिचि छादयति छदयति । रूपान्यत्वार्थं चेह पाठः छादयते अत्रात्मनेपदं सिद्धम् । **'चुदण्** सञ्चोदने' सञ्चोदनं नोदनम् । चोदयति । 'य एचातः' ( ५।१।२८ ) इति ये चोद्यम् । 'णिवेत्ति०' ( ५।३।१११ ) इत्यने चोदना । भिदाद्यङि निपातनात् चूडा । **'मिदुण्** स्नेहने' उदित्त्वान्ने

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मिन्दयति । अचि मन्दः कुष्ठी । **टान्तो**ऽयमित्येके मिण्टयति । नायमुदिदिति **कौशिकः** मेदयति । **'गुर्दण्** निकेतने' पूर्वनिकेतने इत्येके । पूर्वनिकेतनमाद्यो निवासः । 'भ्वादे:०' (२।१।६३) इति दीर्घे गूर्दयति । **छर्दण्** वमने' छर्दयति । उणादौ पदिपठि० (६०७) इति इः छर्दिः । सान्तस्तु रुच्यर्चि० (९८९) इति छृणत्तेः । इह **'गर्दण्** शब्दे' इत्येके पेठुः । गर्दयति गर्दभः । भ्वादौ गर्दति अयं गर्जे इत्यपरे । इति दान्ताः पञ्च ५ ।। **'बुधुण्** हिंसायाम् । उदित्त्वान्ने बुन्धयति । **टान्तो**ऽयमित्येके बुण्ठयति । **वर्धण्** छेदनपूरणयोः वर्धयति । **'गर्धण्** अभिकाङ्क्षायाम्' गर्धयति । **'बन्ध बधण्** संयमने' बन्धयति । **बधण्** बाधयति । ङे अबीबधत् । 'बधि बन्धने' बीभत्सते । इति धान्ताः पञ्च ५ ।। **'छपुण्** गतौ छम्पयति । **'क्षपुण्** क्षान्तौ' ने क्षम्पयति । **ष्टूपण्** समुच्छ्राये' । 'षः स०' (२।३।९८) इति से स्तूपयति । षोपदेशत्वात् 'णिस्तोरेव०' (२।३।३७) इति षे तुष्टूपयिषति । अषोपदेशोऽयमित्यन्ये तुस्तूपयिषति । **'डिपण्** क्षेपे' डेपयति । **'ह्लपण्** व्यक्तायां वाचि' ह्लापयति । **'डपु डिपुण्** संघाते' अभिमर्दन इत्येके, । ने डम्पयति डिम्पयति । **भान्ता**वित्येके डम्भयति डिम्भयति । अचि, डिम्भः । **'शूर्पण्** माने' तालव्यादिः । शूर्पयति । अचि 'पुन्नाम्नि०' (५।३।१३०) इति करणे घे वा शूर्पः । इति पान्ताः अष्टौ ८ । **'शुल्बण्** सर्जने च' चकारान्माने, । तालव्यादिः । शुल्बयति । अचि शुल्बम् । **'डबु डिबुण्** क्षेपे' ने, डम्बयति विडम्बयति । उणादौ जठर० (४०३) इत्यरे आडम्बरः । **डिबु** ने डिम्बयति । अचि डिम्बमशस्त्रकलहः । केचित्तु **दभदभुदिभूनपि** भान्तानिहाधीयते दाभयति दम्भयति दिम्भयति । **सम्बण्** सम्बन्धे । सम्बयति । **षो**पदेशोऽयमित्यन्ये 'णिस्तोरेव०' (२।३।३७) इति षत्वे सिषम्बयिषति । तालव्यादिरयमिति **द्रमिलाः** शम्बयति शम्बलम् । **साम्बे**त्येके साम्बयति । अलि साम्बः । **'कुबुण्** आच्छादने' ने, कुम्बयति । 'भीषिभूषि०' (५।३।१०९) इत्यङि कुम्बा । **'लुबु तुबुण्** अर्दने' ने, लुम्बयति । उणादौ स्वरेभ्य इः (६०६) लुम्बिः । **तुबु** ने, तुम्बयति । अचि गौरादित्वात् ङ्यां तुम्बी । 'तिकृतौ०' (५।१।७१) इत्यके तुम्बकः । **तुपुण्** इत्यप्यन्ये तुम्पयति । **पुर्बण्** निकेतने 'भ्वादेः' (२।१।६३) इति दीर्घे पूर्बयति । अचि पूर्बः पूर्ब इत्य**मरकोशः** । ओष्ठ्यान्तेषु पठितस्तत्प्रकृत्यनुरोधाद्वान्तेष्वयमस्माभिरिहाधीतः । इत्यष्टौ बान्ताः ।। **'यमण्** परिवेषणे । अपरिवेषण इत्यन्ये, । यामयत्यतिथींश्चन्द्रमसं वा । परिवेषणादन्यत्र यमोऽपरिवेषणे णिच्चि चेति ह्रस्वे यमयति । अयीयमत् । यामयामास । इति मान्तः । **'व्ययण्** क्षेपे' व्याययति । इति यान्तः । **'यत्रुण्** संकोचने' यन्त्रयति नियन्त्रयति । ङे, न्ययन्त्रत् । 'णिवेत्ति०' (५।३।१११) इत्यने यन्त्रणा । **'कुद्रुण्** अनृतभाषणे' ने, कुन्द्रयति । ङे, अचुकुन्द्रत् । **गा**दिरयमित्यन्ये गुन्द्रा भद्रमुस्तः । **'श्वभ्रण्** गतौ' श्वभ्रयति । अचि श्वभ्रम् । इति रान्तास्त्रयः ।। **'तिलण्** स्नेहने' तेलयति । णिचोऽनित्यत्वादभावे 'नाम्युपान्त्य०' (५।१।५४) इति के तिलाः । उणादौ कीचक० (२९) इति निपातनात् तिलकम् । **'जलण्** अपवारणे' जालयति, णके जालकम्, अचि जालम् । अयं लजणिति **नन्दी** । लाजयति । अचि लाजाः । **'क्षलण्** शौचे' शौचं शौचकर्म क्षालयति । क्षालितम् । 'पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा' इति **नैषधीये** । 'पुलण् समुच्छ्राये' पोलयति । **'बिलण्** भेदे' ओष्ठ्यादिः बेलयति । उणादौ णिचोऽनित्यत्वादभावे बिलिभिलि० (३४०) इति किति मे बिलमं प्रकाशम् । निघृषि० (५११) इति किति वे बिल्वम् । भिलेति **कौशिकः** भेलयति भिलमम् । **'तलण्** प्रतिष्ठायाम्' तालयति उत्तालयति । अचि तालः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वार्थे के तालिका । णिचोऽनित्यत्वात् तलयति । अचि तलम् । '**तुलण्** उन्माने' तोलयति । 'भीषिभूषि०' ( ५।३।१०९ ) इत्यङि तोला । बाहुलकात् 'णिवेत्ति०' ( ५।३।१११ ) इत्यने तोलना । णिजभावे 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के तुलः । आपि तुला । भिदाद्यङि तुला । तुलयतीति तुलशब्दाण्णिज् 'बहुलम्' ( ५।१।२ ) इति णिजि रूपम् । '**दुलण्** उत्क्षेपे' दोलयति । अचि स्त्रियामापि दोला । 'सेट्क्तयोः' ( ४।३।८४ ) इति णेर्लुक्कि दोलितः । 'भीषभूषि०' इत्यङि दोला । णिजभावे नाम्युपान्त्य० ( ६०९ ) इति किदिः दुलिः कच्छपी । अन्दोलयतीति तु रूढेः, यथा प्रेङ्खोलयति वीजयति '**मूलण्** रोहणे' मूलयति । अचि मूलम् । उणादौ 'स्वरेभ्य०' ( ६०६ ) इति इः मूलिः । मुलेति **नन्दी** मोलयति । णिजभावे 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के मुलः । '**कल किल पिलण्** क्षेपे' । कालयति गाः । अचि कालयति क्षेपयति स्वेषु स्वेषु पर्यायेषु भावानिति कालः । 'कलण् सङ्ख्यानगत्योः' अदन्तः संकलयति । अचि कलः । **किल** केलयति । उणादौ स्वरेभ्य० ( ६०६ ) इति इः केलिः । **पिल,** पेलयति । अचि पेलम् । पेल्यन्ते वस्त्रादीन्यस्यामिति बाहुलकादनडपवादः शंसिप्रत्ययादिभ्यः, भिदादित्वाद्वाङि पेला । '**पलण्** रक्षणे' पालयति । '**इलण्** प्रेरणे' एलयति । 'उपसर्गस्यानिणे०' ( १।२।१९ ) इत्यलोपे प्रेलयति परेलयति । ङे, ऐलिलत् । अचि एला । '**चलण्** भृतौ' चालयति । 'चल कम्पने' । चलति ( कम्पते ) । घटादित्वाद् ह्रस्वे चलयति । 'चलत् विकसने' 'अवर्णादश्नो०' ( २।१।११५ ) इति शतुर्वा अन्तादेशे चलती चलन्ती स्त्री कुले वा । इति लान्ताः षोडश १६ ॥ '**सान्त्वण्** सामप्रयोगे' सान्त्वयति । असोपदेशत्वात् 'णिस्तोरेव०' ( २।३।३७ ) इति षत्वाभावे सिसान्त्वयिषति । **षो**पदेशोऽयमित्येके सिषान्त्वयिषति । साम सान्त्वप्रयोगे इति **चन्द्रः** सामयति । ङे 'उपान्त्यस्या०' ( ४।२।३५ ) इति ह्रस्वे असीसमत् । 'सामण् सान्त्वने' अदन्तः, अससामत् । इति वान्तः । '**धूशण्** कान्तीकरणे' धूशयति । दन्त्योऽयमित्येके धूसयति । जठरक्कर० ( ४०३ ) इत्यरे धूसरः । मूर्द्धन्योऽयमित्यन्ये धूषयति । इति शान्तः । '**श्लिषण्** श्लेषणे' श्लेषयति । '**लूषण्** हिंसायाम्' । लूषयति । '**रुषण्** रोषे' रोषयति । '**प्युषण्** उत्सर्गे' प्योषयति । णिचोऽनित्यत्वात् पुप्योष । इति षान्ताश्चत्वारः । '**पसुण्** नाशने' उदित्त्वान्ने पंसयति । उणादौ पंसेर्दीर्घश्च ( ७१८ ) इत्यौ पांसुः पार्थिवं रजः । '**जसुण्** रक्षणे' उदित्त्वान्ने जंसयति '**दहुण्** इत्यप्येके' दंहयति । पुंसण् अभिमर्दने' पुंसयति । क्ते उत्पुंसितम् । उणादौ नञः पुंसेः ( ३२ ) इत्यके नखादित्वान्नञोऽदभावे नपुंसकम् । '**ब्रूस पिस जस बर्हण्** हिंसायाम्' । ब्रूसयति । पेसयति । गतावयमित्येके । बलदाननिकेतनेष्वपीत्यन्ये । 'पिसृ गतौ' पेसति । ऋदनुबन्धत्वात् णौ ङे ह्रस्वाभावे अपिपेसत् । **एके** त्वाहुः नायमृदित्, तथा णिचोऽनित्यत्वाच्चौरादित्वेनैव पेसतीति प्रयोगसिद्धौ भ्वादौ पाठोऽस्यात्मनेपदार्थः पेसते । **जस,** 'जासनाट०' ( २।२।१४ ) इति कर्मणो वा कर्मत्वे 'शेषे' ( २।२।८१ ) इति षष्ठ्यां चौरस्योज्जासयति । इति षान्ताः षट् ६ । **बर्ह,** बर्हयति । '**ष्णिहण्** स्नेहने' 'षः स०' ( २।३।९८ ) इति से स्नेहयति । षोपदेशत्वात् 'णिस्तोरेव०' ( २।३।३७ ) इति षत्वे सिष्णेहयिषति । इति हान्तः । '**म्रक्षण्** म्लेच्छने' म्रक्षयति । अनटि म्रक्षणम् । भ्वादौ 'म्रक्ष रोषे' । म्रक्षति । **भक्षण्** अदने भक्षयति । णिगि 'भक्षेर्हिंसायाम्' ( २।२।६ ) इत्यणिकर्तुः कर्मत्वे भक्षयति गोर्यवान् । भक्षयति गां यवान् मैत्रः । अत्र यवानां प्रसवप्ररोहादिधर्मत्वेन चेतनत्वाद्भक्षणे प्राणवियोगलक्षणा हिंसास्त्येव । हिंसाया अन्यत्र 'गतिबोध०' ( २।२।५ ) इति प्राप्तमपि कर्मत्वं न भवतीति' हेतुकर्तृ०' ( २।२।४४ ) इति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कर्त्तरि तृतीयायाम् भक्षयति पिण्डीं शिशुना मैत्रः । 'शीलिकामि०' ( ५।१।७३ ) इत्यणपवादे णे मांसभक्षा स्त्री । 'युवर्ण०' ( ५।३।२८ ) इत्यलि भक्षः । **'पक्षण् परिग्रहे'** पक्षयति । कर्मण्यणि धर्मपक्षः । इति त्रयः क्षान्ताः ।

**'लक्षीण्** दर्शनाङ्कनयोः' । अङ्कनं चिह्नम् । ईदित्त्वात् 'ईगितः' ( ३।३।९५ ) इति फलवत्कर्त्तरि आत्मनेपदे लक्षयते, अन्यत्र 'शेषात्०' ( ३।३।१०० ) इति परस्मैपदे लक्षयति । 'णिवेत्ति०'५ ( ५।३।१११ ) इत्यने लक्षणा । 'करणाधारे' ( ५।३।१२९ ) इत्यनटि लक्षणम् । उणादौ तृकृशृ० ( १८७ ) इत्यणे लक्षणम् । लक्षेर्मोऽन्तश्च ( ७१५ ) इति ईः लक्ष्मीः । इत्युभयपदी क्षान्तः ।

इति सामान्यतश्चुरादयो द्विपञ्चाशं शतम् । तत्रैक उभयपदी, शेषाः परस्मैपदिनः ।

**इतोऽर्थविशेषे आलक्षिणः ।** इतः परं प्रायः प्रागुक्ता अप्यर्थविशेषे ये लक्षिण्पर्यन्ताश्चुरादयश्चेति सूत्रोक्तास्ते प्रस्तूयन्ते ।

**'ज्ञाण्** मारणादिनियोजनेषु' । मारणादयो **'मारणतोषणनिशाने ज्ञश्च'** ( ४।२।३० ) इति सूत्रोक्तास्तेषु नियोजने चार्थे जानातिश्चुरादिः । मारणे संज्ञपयति पशुम् । तोषणे विज्ञपयति गुरुम् । निशाने उत्तेजने प्रज्ञपयति शस्त्रम् । एषु त्रिष्वर्थेषु 'मारणतोषण०' इति सूत्रेण ह्रस्वः । नियोजने आज्ञापयति भृत्यम् अत्र ह्रस्वाभावः । उक्तार्थेभ्योऽन्यत्र तु क्र्यादित्वात् जानाति । क्ये, विज्ञप्यते आज्ञाप्यते । व्यजिज्ञपत् आजिज्ञपत् । व्यज्ञपि व्यज्ञापि । आज्ञापि इटि व्यज्ञपयिषाताम् । आज्ञापयिषाताम् । ञिटि व्यज्ञपिषाताम् आज्ञापिषाताम् । विज्ञपयाञ्चकार आज्ञापयाञ्चकार । विज्ञप्यात् आज्ञाप्यात् । ज्ञपयिषीष्ट ज्ञापयिषीष्ट । ज्ञपिषीष्ट ज्ञापिषीष्ट । ज्ञपयिता ज्ञापयिता । ज्ञपिता ज्ञापिता । विज्ञपयिषति आज्ञापयिषति । ञिटि विज्ञपयिष्यते आज्ञापयिष्यते । 'ऋध०' ( ४।४।४७ ) इति वेटि जिज्ञपयिषति, पक्षे 'ज्ञप्याप०' ( ४।१।१६ ) इति ज्ञीपि ज्ञीप्सति । ज्ञापेस्तु जिज्ञापयिषति । 'णौ दान्त०' (४।४।७४) इति वा निपातनात् ज्ञप्तः २ । विज्ञप्तः २ । एवं आज्ञप्तः २ । आज्ञापितः २ । विज्ञपय्य आज्ञाप्य । विज्ञपयिता ३ तुम् तव्यम् । आज्ञापयिता आज्ञापयितुम् आज्ञापयितव्यम् । संज्ञपयतीत्यत्र ज्ञाण्ज्ञांशोर्णिचि णिगि च रूपसाम्येऽप्यर्थभेदोऽस्ति । एकत्र स्वार्थोऽन्यत्र प्रयोक्तृव्यापारः । ज्ञाण् हि प्रथममेव स्वार्थे मारणे वर्तते । अन्यस्तु प्रथमं मरणे ततो मारणे इत्यर्थः । एवं विज्ञपयतीत्यादावपि । इत्यादन्तः । **'च्युण्** सहने' हसने इत्येके । च्यावयति शरान्, सहते इत्यर्थः । अन्यत्र 'च्युङ् गतौ' च्यवते । इत्युदन्तः । **'भूण्** अवकल्कने' । अवकल्कनं मिश्रीकरणम् । भावयति दध्योदनम् । विकल्कने इति **नन्दी** भावयेद्ब्राह्मणं तपः । अवकल्पने इत्यन्ये । भावयति साधुः समयम् । 'भू सत्तायाम्' भवति । प्राप्तौ तु 'भूङ्' इति वा णिङि भावयते । पक्षे ङित्त्वात् 'इङित०' ( ३।३।२२ ) इत्यात्मनेपदे भवते । इत्यूदन्तः । **'बुक्कण्** भषणे' भाषण इत्येके । आभाषणे इत्यन्ये । बुक्कयति श्वा चौरम् । भषणादन्यत्र 'बुक्क भाषणे' । बुक्कति । **'रक लक रग लगण्** आस्वादने' राकयति लाकयति । आसादने इत्येके आराकयति आलाकयति धर्मम् । इति कान्तास्त्रयः । **'रग** रागयति । **'लग** लागयति । अन्यत्र 'रगे शङ्कायाम्' रगति । 'लगे सङ्गे' लगति । णिगि 'घटादेः०' ( ४।२।२४ ) इति ह्रस्वे रगयति लगयति । **'लिगुण्** चित्रीकरणे' ने लिङ्गयति शब्दम् । स्त्रीपुंनपुंसकलिङ्गैश्चित्रीकरोतीत्यर्थः । उल्लिङ्गयति । अचि लिङ्गम् । अन्यत्र 'लिगु गतौ' लिङ्गति आलिङ्गति । इति गान्तास्त्रयः । **'चर्चण्** अध्ययने' चर्चयति शास्त्रम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अचर्चत् । 'भीषिभूषि०' (५।३।१०९) इत्यङि चर्चा । अन्यत्र 'चर्चत् परिभाषणे' इति केचित् चर्चति । '**अञ्चण्** विशेषणे' विशेषणमतिशयः । अञ्चयत्यर्थम् व्यक्तीकरोतीत्यर्थः । अन्यत्र 'अञ्चू गतौ च' । अञ्चति । '**मुचण्** प्रमोचने' मोचयति शरान् । प्रयोजने इत्य**न्ये** मोचयति कुण्डले प्रयोजयतीत्यर्थः । अन्यत्र 'मुचि कल्कने' मोचते । 'मुच्लृंती मोक्षणे' मुञ्चति मुञ्चते । इति चान्तास्त्रयः ३ । '**अर्जण्** प्रतियत्ने' । प्रतियत्नः संस्कारः । अर्जयति हिरण्यम् । निवेशयतीत्यर्थः । ङे आर्जिजत् । अन्यत्र 'अर्ज सर्ज अर्जने' अर्जति । '**भजण्** विश्राणने' विश्राणनं विपचनम् । भाजयति विभाजयति । अच्यलि वा भाजः । स्त्रियां 'भाजगोण०' (२।४।३०) इति ङ्यां भाजी पक्वा चेत्, भाजाऽन्या । अन्यत्र तु 'भजीं सेवायाम्' भजते भजयति । इति जान्तौ द्वौ । '**चट स्फुटण्** भेदे' । चाटयति उच्चाटयति । अनटि उच्चाटनम् । 'उच्चाटनीयः करतालिकाना'मिति **नैषधीये** । णिचोऽनित्यत्वाच्चटयति दोलायां । उच्चटति चित्रम् । विचटति । उणादौ दृकॄनृ० (२७) इत्यके चटका । **स्फुट** स्फोटयति । स्फोट्यते । अपुस्फुटत् । आस्फोटयाञ्चकार । अर्थान्तरे तु 'स्फुटृ विशरणे' स्फोटति । स्फुटि विकसने' स्फोटते । 'स्फुटत् विकसने' स्फुटति । '**घटण्** संघाते' घाटयति उद्घाटयति अनटि उद्घाटनम् । उद्घाटितः कपाटः । अर्थान्तरे तु 'घटिष् चेष्टायाम्' घटते । णिगि घटादित्वात् ह्रस्वे घटयति ।

**हन्त्यर्थाश्च** येऽन्यत्र हन्त्यर्था हिंसार्थाः पठ्यन्ते तेऽप्यत्र चुरादौ वेदितव्याः । 'हनंक् हिंसागत्योः' घातयति । 'हिसु तृहप्' हिंसयति तर्हयति । तत्तद्गणपाठसामर्थ्यात्तु हन्ति हिनस्ति तृणेढीत्यादयोपि । अनेनैव सिद्धेऽन्येषां हिंसार्थानां चुरादौ पाठः आत्मनेपदादिगतरूपभेदार्थः । **अन्ये तु** चटास्फुटौ घट च (श्च ?) हन्त्यर्था इत्याद्यं पाठं मन्यन्ते । अस्यार्थश्चट इत्ययं धातुराङ्पूर्वश्च स्फुट इति, घट इत्ययं च त्रयोऽप्येते हन्त्यर्था हिंसार्थाश्चुरादौ भवन्ति । चाटयति आस्फोटयति घाटयति । अर्थान्तरे तु न चुरादित्वम् चटति आस्फुटति । **अपरे** त्वन्यथा व्याचक्षते । 'चट आस्फुटौ' आस्फुटत्यर्थे चुरादिः चाटयति । घट च(श्च ?) आस्फुटत्यर्थे चुरादिः घाटयति । अन्यत्र च चटति घटते । इति टान्तास्त्रयः ॥ ३ ॥ '**कणण्** निमीलने' काणयति चक्षुः । अचि काणः । अर्थान्तरे तु 'कण शब्दे' कणति । घटादित्वाण्णिगि ह्रस्वे कणयति । इति णान्तः । '**यतण्** निकारोपस्कारयोः' । निकारः खेदनम् । यातयत्यरिम् 'णिवेत्ति०' (५।३।१११) इत्यने यातना तीव्रव्यथा । उपस्कारे यातयति दरिद्रो नागरस्य धनम् । धनाय यातयति छिद्रं राजा, प्रच्छादयतीत्यर्थः । प्रतियातयति (प्रति)बिम्बयतीत्यर्थः । अर्थान्तरे तु 'यतैङ् प्रयत्ने' यतते । **निरश्च प्रतिदाने** निरः परो यो यतिः (सः) प्रतिदानेऽर्थे चुरादिः । निर्यातयति ऋणम् । शातयतीत्यर्थः इति तान्तः । '**शब्दण् उपसर्गाद्** भाषाविष्कारयोः । भाषे आविष्कारे चार्थे शब्द इत्ययं धातुरुपसर्गात्परश्चुरादिः । विशब्दयति प्रशब्दयति प्रतिशब्दयति । प्रतिश्रु(ति)कामाविष्करोतीत्यर्थः । योगविभागोऽत्रेति **नन्दी** शब्द उपसर्गादित्येकः शब्द इत्ययं धातुरुपसर्गात्परश्चुरादिः । प्रशब्दयति (विशब्दयति) भाषाविष्कारयोरित्य**परः** । अनुपसर्गार्थोऽयमारम्भः । पूर्वस्तु भाषणाविष्कारार्थः शब्दयति विशब्दयति । **अन्यस्तु** शब्दः शब्दक्रियायामित्यधीते शब्दयति । भषणस्यापि शब्दविशेषक्रियारूपत्वादत्रैवान्तर्भावः । तत उपसर्गादाविष्कार इति पठित्वा प्रशब्दयति विशब्दयतीत्याविष्कारमात्रे उदाहरन्ति । '**षूदण्** आस्रवणे' । क्षरण इत्येके । 'षः स०' (२।३।९८) इति से सूदयति । षोपदेशत्वात् 'णिस्तोरेव०' (२।३।३७) इति षत्वे सुषूदयिषति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनटि सूदनम् । अर्थान्तरे तु 'षूदि रक्षणे' । सूदते । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के सूदः । **'आङः क्रन्दण् सातत्ये'** आङः परः क्रन्द इत्ययं धातुः सातत्येऽर्थे चुरादिः । आक्रन्दयति । अलि आक्रन्दः । अर्थान्तरे तु 'क्रदु रोदनाह्वानयोः' आक्रन्दति । **'ष्वदण्** आस्वादने' संवरण इत्यन्ये । 'षः स०' ( २।३।९८ ) इति से स्वादयति । 'नाम्यन्तस्था०' ( २।३।१५ ) इति षत्वे असिष्वदत् । अर्थान्तरे तु 'ष्वदि आस्वादने' मैत्राय स्वदते दधि । **आस्वादः सकर्मकात्** आङ्-पूर्वात् स्वदतेः सकर्मकाण्णिज् भवति । आस्वादयति यवागूम् । **अन्ये** तु 'ग्रसण् ग्रहणे' 'पुषण् धारणे' 'दलण् विदारणे' 'लोकृ तर्केति भासार्थदण्डकः' 'पूरण् आप्यायने' 'स्वदण् संवरणे' इति क्रमेण पठित्वा व्याख्यान्ति, ग्रसिमारभ्य आस्वदः स्वदमभिव्याप्य यो धातुः पठितस्तस्मात्सकर्मकक्रियावचनादेव णिज् भवति । ततोऽकर्मकेभ्यो णिजो व्यावृत्तिः । **'मुदण्** संसर्गे' । मोदयति सक्तून् सर्पिषा । मोदयत्युष्णा आपः शीताभिरद्भिः । उभयत्र संसृजतीत्यर्थः । 'नाम्नि पुंसि च' ( ५।३। १२१ ) णके मोदकः । अर्थान्तरे तु 'मुदि हर्षे' मोदते इति दान्ताः षट् ६ । **शृधण्** प्रसहने' प्रसहनमभिभवः, अप्रसहन इत्येके, । अप्रसहनममर्षः । शर्धयत्यरिम् । ङे 'ऋद्वर्णस्य' ( ४।२।३७ ) इति गुणापवादे ऋतो वा ऋति अशीशृधत् अशशर्धत् । अर्थान्तरे 'शृधूङ् शब्दकुत्सायाम्' शर्धते । 'शृधूग् उन्दे' शर्धते शर्धति । इति धान्तः । **'कृपण्** अवकल्कने' । अवकल्कनं मिश्रीकरणं सामर्थ्यं च । कल्पयति । अवकल्पन इत्यन्ये । कल्पयति वृत्तिं राजा । **चन्द्रस्तु** भूकृपौ द्वावप्यवकल्कने चिन्तने इति व्याख्यानात् सम्भावयति अवकल्पयति । अर्थान्तरे तु 'कृपौङ् सामर्थ्ये' कल्पने । इति पान्तः । **'जभुण्** नाशने' जम्भयति । क्ये जम्भ्यते । जभणिति **चन्द्रः** । **'जभः स्वरे'** ( ४।४।१०० ) इति स्वरात्परे ने जम्भयति । क्ये जम्भ्यते । अर्थान्तरे तु 'जभुङ् गात्रविनामे' जम्भते । इति भान्तः । **'अमण्** रोगे' । 'अमोऽकम्यमिचमः' ( ४।२।२६ ) इत्यत्रामो वर्जनात् यमोऽपरिवेषणे इत्यत्र नियमार्थत्वाद् ह्रस्वाभावे 'रुजार्थस्या०' ( २।२।१३ ) इति वा कर्मणोऽकर्मत्वे शेषषष्ठ्यां आमयति चौरस्य ज्वरः । अलि आमः । उणादौ कुगुवलि० ( ३६५ ) इत्यये आमयो रोगः । श्वन्मातरिश्वन्० ( ९०२ ) इत्यनि निपातनात् अरीनामयतीत्यर्यमा रविः । अर्थान्तरे तु 'अम गतौ' घञि अमः । इति मान्तः । **'चरण्** असंशये' विचारयत्यर्थान् । 'णिवेत्ति०' ( ५।३। १११ ) इत्यने विचारणा । **अन्ये** तु 'चरण् संशये' इति पठन्ति । विचारणा हि संशये सति भवतीति चाहुः । अर्थान्तरे तु 'चर भक्षणे' चरति । **'पूरण्** आप्यायने' पूरयति । अर्थान्तरे तु 'पूरैचि आप्यायने' । पूर्यते । इति रान्तौ । **'दलण्** विदारणे' दालयति विदारयतीत्यर्थः । अर्थान्तरे तु 'दल ञिफला विशरणे' दलति । णिगि घटादित्वाद् ह्रस्वे दलयति । इति लान्तः । **'दिवण्** अर्दने' देवयति शत्रून् परिदेवयति अतिदेवयति । अतिपूर्वादेव णिजित्येके । अर्थान्तरे तु 'दिवूच् क्रीडायाम्' दीव्यति इति वान्तः । **'पश पषण्** बन्धने' पाशयति पाशैरश्वम् इति शान्तः । **'पषण्** पाषयति पाशैरश्वम् । दन्त्यान्त्योऽयमित्येके । अर्थान्तरे तु 'पषी बाधनस्पर्शनयोः' । मूर्द्धन्यान्तस्तालव्यान्तोऽयं दन्त्यान्तश्चा**चार्यभेदेन** पशते पशति, पषते पषति, पसते पसति । **'पुषण्** धारणे' पोषयति आभरणम् धारयतीत्यर्थः । अर्थान्तरे तु 'पुष पुष्टौ' पोषति । 'पुषंच् पुष्टौ' पुष्यति । 'पुषश् पुष्टौ' पुष्णाति । **'घुषण्** विशब्दने' विशब्दनं विशिष्टशब्दकरणं नानाशब्दनं वा । घोषयति उद्घोषयति । अविशब्दने इत्येके । अपघोषयति पापम् अपह्नुते इत्यर्थः । ऋदित्करणं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चुरादिणिचोऽनित्यत्वे लिङ्गम् । तेन 'ऋदिच्छ्वि०' (३।४।६५) इति वाऽङि अघुषत् । पक्षे अघोषीत् । घोषति । 'जुघुषुः पुष्यमाणवा' इति विशब्दनेऽपि भवति । नायमृदिदिति **कौशिकः** । अर्थान्तरे तु 'घुषृ शब्दे' घोषति । **'आङः क्रन्दे'** सातत्ये इत्यन्ये । आङः परो घुषिः क्रन्देऽर्थे चुरादिर्भवति । आघोषयति । 'णिवेत्ति०' (५।३।१११) इत्यने आघोषणा । **अन्ये** त्वाङः क्रन्दः सातत्य इति पठन्ति । आङः परात्क्रन्देऽर्थे णिज् भवति । आक्रन्दयति नित्यम् । अन्यत्र आक्रन्दति । **'भूष तसुण्** अलङ्कारे' भूषयति कन्याम् । 'भूष अलङ्कारे' भूषति । इति षान्ताश्चत्वारः ४ । **तसु** ने उत्तंसयति । 'पुन्नाम्नि०' (५।३।१३०) इति करणे घे अवतंसः । 'तसु अलङ्कारे' तंसति । **'जसण्** ताडने' जासयति । 'जासनाट०' (२।२।१४) इति षष्ठ्यां चौरस्योज्जासयति । अर्थान्तरे तु 'जसूच् मोक्षणे' जस्यति । 'जसण् हिंसायामिति' पठितोऽप्यर्थभेदात्पुनरधीतः । **'त्रसण्** वारणे' । धारणे इति **नन्दी** । ग्रहण इत्येके । त्रासयति मृगान् निराकरोतीत्यर्थः । अर्थान्तरे तु 'त्रसैच् भये' त्रस्यति त्रसति । **'वसण्** स्नेहच्छेदावहरणेषु' । स्नेहे, वासयति वसा । छेदे वासयति वृक्षम् । अवहरणे वासयत्यरीन् मारयतीत्यर्थः । 'वसं निवासे' वसति वणिक् । आच्छादने वस्ते । **'ध्रसण्** उत्क्षेपे' उञ्छ इत्येके । ध्रासयति । अर्थान्तरे तु 'ध्रसूश् उञ्छे' ध्रस्नाति । उकारादी इमावित्येके । उध्रासयति उध्रस्नाति । **'ग्रसण्** ग्रहणे' ग्रासयति फलम् । अर्थान्तरे तु 'ग्रसूङ् अदने' ग्रसते । **'लसण्** शिल्पयोगे' लासयति दारु भ्रमादिना तक्ष्णोतीत्यर्थः । अर्थान्तरे तु 'लस श्लेषणक्रीडनयोः' लसति । भ्वादौ पाठः शिल्पयोगेऽपि णिजभावार्थः । एवमन्यत्रापि । षान्तोऽयमित्येके । लाषयति दारु । अन्यत्र 'लषी कान्तौ' लषति लष्यति । तालव्यान्त इति **कौशिकः** । इति सान्ताः सप्त ७ । **'अर्हण्** पूजायाम्' अर्हयति । ङे आर्जिहत् । 'णिवेत्ति०' (५।३।१११) इत्यने अर्हणा । इति हान्तः एकः । **'मोक्षण्** असने' मोक्षयति शरान् । 'युवर्ण०' (५।३।२८) इत्यलि मोक्षः । अन्यत्र मोक्षति ।

अथ वर्णक्रमेण **भासार्थाः** । लोकृ १ तर्क २ रघु ३ लघु ४ लोचृ ५ विछ ६ अजु ७ तुजु ८ पिजु ९ लजु १० लुजु ११ भजु १२ पट १३ पुट १४ लुट १५ घट १६ घट्ट १७ वृत १८ पुथ १९ नद २० वृध २१ गुप २२ धूप २३ कुप २४ चीव २५ दशु २६ कुशु २७ त्रसु २८ पिसु २९ कुसु ३० दसु ३१ वर्ह ३२ वृहु ३३ बलह ३४ अहु ३५ वहु ३६ महुण् ३७ भासार्थाः । **लोकृ,** लोकयति विलोकयति । 'ऋदित्त्वादुपान्त्यस्य ह्रस्वाभावे अलुलोकत् । अन्यत्र 'लोकृङ् दर्शने' लोकते । **तर्क** तर्कयति 'युवर्ण०' (५।३।२८) इत्यलि तर्कः वितर्कः । क्ते तर्कितः । गणान्तरेष्वपठिता अप्यत्र दण्डके पाठाद्धातव एवेत्यर्थान्तरे तर्कयति । इति कान्तौ । **रघु लघु** उदित्त्वान्ने रङ्घयति लङ्घयति । अन्यत्र 'रघुङ् गतौ' रङ्घते । लङ्घते । इति घान्तौ । **लोचृ** लोचयति आलोचयति । ऋदित्त्वादुपान्त्यस्य ह्रस्वाभावे अलुलोचत् । अन्यत्र 'लोचृङ् दर्शने' लोचते । इति चान्तः । **विछ,** 'स्वरेभ्यः' (१।३।३०) इति द्वित्वे विच्छयति । अन्यत्र 'विछत् गतौ' 'अशवि ते वा' (३।४।४) इति वाये विच्छायति विच्छति । इति छान्तः । **अजु** अञ्जयति । अन्यत्र 'अञ्जौप् व्यक्त्यादौ' व्यनक्ति । **तुजु** तुञ्जयति । अन्यत्र 'तुजु बलने च' तुञ्जति । **'पिजु** पिञ्जयति । अस्य चुरादौ 'पिजुण् हिंसाबलदाननिकेतनेष्विति पठितेऽप्यत्र पुनः पाठोऽर्थविशेषार्थ आत्मनेपदार्थः सकर्मकार्थश्च । अन्यत्र 'पिजुकि संपर्चने' पिङ्क्ते । **लजु** लञ्जयति । अन्यत्र 'लजु भर्त्सने' लञ्जति । **लुजु,** लुञ्जयति अन्यत्र लुञ्जति । **भजु** भञ्जयति अन्यत्र 'भञ्जौप् आमर्दने' भनक्ति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति जान्ताः षट् उदितश्च । **पट** पाटयति । अन्यत्र 'पट गतौ' पटति । 'पटण् ग्रन्थे' अदन्तः पटयति । **पुट** पोटयति । अन्यत्र 'पुटत् संश्लेषणे' पुटति । '**लुट** लोटयति' अन्यत्र 'लुटि प्रतीघाते' लोटते । 'लुट्च् विलोटने' लुट्यति । **घट** घाटयति । अन्यत्र 'घटिष् चेष्टायाम्' घटते । णिगि 'घटादे०' (४।२।२४) इति ह्रस्वे घटयति । 'घटण् संघाते' इति पठितोऽपि सकर्मकार्थमर्थविशेषार्थं च पुनरिहायमधीतः । **घुटु** उदित्त्वान्ने घण्टयति । अचि घण्टा । अन्यत्र घण्टति । इह **रुटनटौ** टान्तौ **लडुतडौ** च डान्तौ केचिदधीयते । **रुट** रोटयति अन्यत्र 'रुटि प्रतीघाते' रोटते । **नट** नाटयति । अन्यत्र 'णट नृतौ' नटति । भ्वादिरात्मनेपदीति **नन्दी** नटते । **लडु** उदित्त्वान्ने लण्डयति । **तड** ताडयति । अन्यत्र तडति । इति टान्ताः पञ्च । ५ ॥ **वृत** वर्तयति । अन्यत्र 'वृतूङ् वर्तने' वर्तते । इति तान्तः १ । **पुथ** पोथयति । अन्यत्र 'पुथच हिंसायाम्' पुथ्यति । इति थान्तः । **नद** नादयति अन्यत्र 'णद अव्यक्ते शब्दे' नदति । इति दान्तः । **वृध** वर्धयति । अन्यत्र 'वृधूङ् वृद्धौ' वर्धते । इति धान्तः । **गुप** गोपयति । अन्यत्र 'गुपू रक्षणे' गोपायते । **धूप** धूपयति । अन्यत्र 'धूप सन्तापे' धूपायति । **कुप** कोपयति । अन्यत्र 'कुपच् कोपे' कुप्यति । इति पान्तास्त्रयः । **चीव** चीवयति । अन्यत्र चीवृग् ऊषीवत् चीवते चीवति । इति वान्तः । **दशु** दंशयति । अन्यत्र 'दंशं दशने' दशति । **कुशु** कुंशयति । अन्यत्र कुंशति । इति शान्तौ द्वावुदितौ च । **त्रसु** त्रंसयति । अन्यत्र त्रंसति । **पिसु** पिंसयति । अन्यत्र पिंसति । **कुसु** कुंसयति । अन्यत्र कुंसति । **दसु** दंसयति । अन्यत्र दंसति । इति सान्ताश्चत्वार उदितश्च । **वर्ह** वर्हयति । अन्यत्र 'वर्हिं प्राधान्ये' वर्हते । **वृहु** वृंहयति । 'णिवेत्ति०' (५।३।१११) इत्यने वृंहणा । **वल्ह** वल्हयति । अन्यत्र 'वल्हि प्राधान्ये' वल्हते । **अहु** अंहयति । अन्यत्र 'अहुङ् गतौ' अंहते । **वहु** वंहयति । **महु** मंहयति । अन्यत्र 'वहुङ् महुङ् वृद्धौ' वंहते मंहते । इति हान्ताः षट् ६ । लोकृतर्कादयः स्वार्थे णिचमुत्पादयन्ति । **भासार्थाश्चेति पारायणम्** । भासयति दिशः दीपयति इन्धयति प्रकाशयति । गणान्तरपाठस्त्वेषामात्मनेपदादिकार्यार्थः ।

इति अर्थविशेषे चुरादयः परस्मैपदिनः चतुरशीतिः ८४ ।

**अथात्मनेपदिनः** । '**युणि** जुगुप्सायाम्' इदित्त्वादात्मनेपदे यावयते धर्मं जाल्मः । 'य एचातः' (५।१।२८) इति ये याव्यम् । अन्यत्र 'युंगृश् बन्धने' युनीते युनाति । युजिरयमित्येके योजयते । इति उदन्तः । '**गृणि** विज्ञाने' विज्ञापने इत्येके । गारयते । अन्यत्र 'गॄत् निगरणे' गिरति । 'गॄश् शब्दे' गृणाति । कृणीति **चन्द्रः** । कारयते । इति ऋदन्तः । '**वञ्चिण्** प्रलम्भने' प्रलम्भनं मिथ्याफलाख्यानम् । वञ्चयते । 'णिवेत्ति०' (५।३।१११) इत्यने वञ्चना । अन्यत्र 'वञ्चू गतौ' वञ्चति । इदित्त्वादेव णिजन्तादात्मनेपदे सिद्धे 'प्रलम्भे गृधिवञ्चेः' (३।३।८९) इति तद्विधानं णिगन्तादफलवत्कर्त्रर्थमित्येके । इति चान्तः । '**कुटिण्** प्रतापने' कोटयते उत्कोटयते । अन्यत्र 'कुटत् कौटिल्ये' कुटति इति टान्तः । '**मदिण्** तृप्तियोगे' तृप्तिशोधन इत्यन्ये, । तृप्तेः शोधनं संपत्तिः । मादयते । अन्यत्र 'मदैच् हर्षे' माद्यति । हर्षग्लपनयोर्घटादित्वाण्णिगि ह्रस्वे मदयति । '**विदिण्** चेतनाख्याननिवासेषु' वेदयते सुखम् । चेतयते इत्यर्थः । आवेदयते धर्मम् आख्यातीत्यर्थः । वेदयते गृहम् । निवासं करोति इत्यर्थः । विवादेऽप्यन्ये प्रवेदयते वादिना । अन्यत्र 'विदक् ज्ञाने' वेत्तीत्यादि । इति दान्तौ द्वौ । '**मनिण्** स्तम्भे' स्तम्भो गर्वः । मानयते । विमानयते वृषलः । पक्षे



Jain Education International For Personal & Private Use Only www.jainelibrary.org

मनतीति **चन्द्रः** । अन्यत्र 'मनिंच् ज्ञाने मन्यते । इति नान्तः । '**बलि भलिण्** आभण्डने' आभण्डनं निरूपणम् । बलिरोष्ठ्यादिः । उद्बालयते । भालयते निभालयते । अन्यत्र वलि संवरणे' वलते । 'भलि परिभाषणादौ' । भलते इति लान्तौ । '**दिविण्** परिकूजने' । देवयते गात्री । अन्यत्र 'दिवूच् क्रीडादौ' दीव्यति । इति वान्तः । '**वृषिण्** शक्तिबन्धे' । आवर्षयते ग्रामः शक्तिं बध्नातीत्यर्थः । तवर्गतुर्यादिरयं सामर्थ्यवारणार्थ इत्येके । धर्षयतेऽरीन् । केचिदिममुदितं णिचोऽनित्यत्वार्थं पठन्ति, तन्मते शक्तिबन्धेऽपि णिचोऽभावादात्मनेपदाभावे वर्षति । ऊदित्वात् क्त्वि वेट् वृष्ट्वा वर्षित्वा । अर्थान्तरे तु 'वृषू सेचने' वर्षति । इति षान्तः । '**कुत्सिण्** अवक्षेपे' । 'भीषिभूषि०' (५।३।१०९) इत्यत्र बहुवचनादङि कुत्सा । बाहुलकात् 'णिवेत्ति०' (५।३।१११) इत्यने कुत्सना । इति सान्तः । '**लक्षिण्** आलोचने' । लक्षणं लक्षयते । अन्यत्र 'लक्षीण् दर्शनाङ्कनयोः' । लक्षयति लक्षयते । णिचोऽनित्यत्वात् लक्षते ।

इत्यर्थविशेषे चुरादयः आत्मनेपदिनस्त्रयोदश १३ ।

**अथात्मनेपदिन एवार्थान्तरेपि चुरादयः** । '**हिष्कि किष्किण्** हिंसायाम्' हिष्कयते । क्ते, हिष्कितम् । हिक्कितमिति 'हिक्की अव्यक्ते शब्दे' इत्यस्य । किष्कयते । उणादौ पृकाहृषि० (७२९) इत्युः किष्कुः वितस्तिः । किष्किन्धेति तु किमप्यन्तर्दधातीति पृषोदरादित्वाद्धधातेः । '**निष्किण्** परिमाणे' निष्कयते । अचि निष्कः । इति कान्तास्त्रयः ३ । '**तर्जिण्** संतर्जने' । तर्जयते । करणेऽनटि तर्जनी । यत्तु लक्ष्ये तर्जयतीति परस्मैपदं दृश्यते तथा भर्त्सयति निशामयति भालयति कुत्सयति वञ्चयति निवेदयतीत्यादि तत् भ्वादौ 'राजृग् टुभ्राजीति' पुनर्भ्राजिग्रहणेनात्मनेपदस्यानित्यत्वज्ञापनात् सिद्धम् । इति जान्तः । '**कूटिण्** अप्रमादे' अप्रदान इत्यन्ये । कूटयते । अलि कूटः । 'कूटण् दाहे' अदन्तः कूटयति । '**त्रुटिण्** छेदने' त्रोटयते रज्जुम् । डान्तोऽयमित्येके त्रोडयते तृणम् । इति टान्तौ । '**शठिण्** श्लाघायाम्' शाठयते । अचि शाठः । 'णिवेत्ति०' (५।३।१११) इत्यने शाठना । शटेति **नन्दी** । शलेति **कौशिकः** । इति ठान्तः । '**कूणिण्** सङ्कोचने' । कूणयते मुखम् । क्ते कूणितं चक्षुः । उणादौ स्वरेभ्य० (६०६) इत्यौ कूणिः । '**तूणिण्** पूरणे' तूणयते । अलि तूणः । उणादौ 'जम्बीराभीर०' (४२२) इतीरे तूणीरः । तूलेति **चन्द्रः** । '**भ्रूणिण्** आशायाम्' आशङ्कायामित्येके भ्रूणयते । अलि भ्रूणः । इति णान्तास्त्रयः । '[1]**चितिण्** संवेदने' चेतयते । अशिति विषये णेर्लुकि व्यञ्जनान्तत्वात् 'इङित०' (५।२।४४) इत्यने चेतनाशीलः चेतनः । अप्रत्ययापवादे 'णिवेत्ति०' (५।३।१११) इत्यने चेतना । 'रम्यादिभ्य०' (५।३।१२६) इति कर्त्तर्यनटि चेतनः । 'चितै संज्ञाने' चेतति । '**वस्ति गन्धिण्** अर्दने' वस्तयते । अचि वस्तः । उणादौ स्वरेभ्य० (६०६) इत्यौ वस्तिः । इति तान्तौ । **गन्धि,** गन्धयते । अलि गन्धः । अनटि गन्धनम् । उणादौ गन्धेरर्इ चान्तः (५०८) इति वे गन्धर्वः । इति धान्तः । '**डपि डिपि डम्पि डिम्पि डम्भि डिम्भिण्** संघाते' । डापयते डेपयते डम्पयते डिम्पयते । इति पान्ताश्चत्वारः । ४ ।। डम्भयते डिम्भयते । अचि डिम्भः । इति भान्तौ । '**स्यमिण्** वितर्के' । 'यमोऽपरिवेषणे' इत्यत्र ण्यधिकारेऽपि णिज्ग्रहणं नियमार्थम् । तेन 'अमोऽकम्यमि०' (४।२।२६) इति ह्रस्वाभावे स्यामयते । 'स्यमू शब्दे' स्यमति । णिगि 'अम०' इति ह्रस्वे स्यमयति । '**शमिण्** आलोचने' शामयति निशामयति । 'णौ दान्त०' (४।४।७४) इति

[1] ७५२ पृष्ठे फुटनोटे चिंतितोऽयमत्र निर्दिष्ट उपलब्धः । संपादकः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्ते वा निपातनात् शान्तः । पक्षे 'सेट्क्तयोः' ( ४।३।८४ ) इति णेर्लुकि शामितः । 'शमूच् उपशमे' शाम्यति । णिगि 'शमोऽदर्शने' ( ४।२।२८ ) इति अदर्शने शमयति रोगम् । **'कुस्मिण्** कुस्मयने' मतिदृष्टे बुद्धयुत्प्रेक्षितेऽर्थे इत्यन्ये, । कुत्सितं स्मयनं कुस्मयनम् । कुस्मयते प्रकुस्मयते आकुस्मयते । क्ये कुस्म्यते । 'धातोरनेकस्वर०' ( ३।४।४६ ) इत्यामि कुस्मयाञ्चक्रे । ङे अचुकुस्मत । सनि चुकुस्मयिषते । कुस्मयिता कुस्मयितव्यम् । क्विपि णिलुको 'न सन्धि०' ( ७।४।१११ ) इति स्थानित्वप्रतिषेधस्य स्कोर्लुक्यभावात् स्थानित्वे 'संयोगस्यादौ०' ( २।१।८८ ) इति सस्य लुगभावे संयोगान्तलोपे तु णिलुको 'न सन्धि०' इति स्थानित्वप्रतिषेधात् 'पदस्य' ( २।१।८९ ) इति मलुकि सुकूः । साधुकूः । 'णिवेत्ति०' ( ५।३।१११ ) इत्यने कुस्मना । कुस्मयित्वा प्रकुस्म्य । कुपूर्वेण स्मिङैव कुस्मयते इति प्रयोगसिद्धे व्यर्थोऽयमिति चेत् । नैवमनिष्टापत्तेः । तथाहि 'गतिकन्य०' ( ३।१।४२ ) इति समासस्य नाम्नैव सह विधानात्तिवाद्यन्तेन सहाभावे 'प्रथमोक्तं प्राक्' ( ३।१।१४८ ) इति प्राक्त्वानियम इति स्मयतेकु इत्यपि स्यात् । उपसर्गस्य च धातोः प्राक्त्वानियमात् कुप्रस्मयते । अडागमस्य च धात्वादित्वात्कोरग्रतः पातेः । कस्मयत । क्ये 'दीर्घश्च्वि०' ( ४।३।१०८ ) इति दीर्घे कुस्मीयते । एकस्वरत्वाच्च परोक्षाया आमभावे कुसिस्मिये । अद्यतन्यां सिचि कस्मेष्ट । सनि 'ऋस्मि०' ( ४।४।४८ ) इतीटि 'णिस्तोरेव०' ( २।३।३७ ) इति नियमात्षत्वाभावे कुसिस्मयिषते । तृचि तव्ये च अनुस्वारेत्त्वादिडभावे कुस्मेता कुस्मेतव्यम् । क्विपि 'ह्रस्वस्य तः०' ( ४।४।११३ ) इति ते( न्ते ) कुस्मित् । स्त्रियां भावाकर्त्रोः क्तौ कुस्मितिः । क्त्वि कुस्मित्य इत्यादीनि रूपाणि स्मिङः प्राप्नुवन्ति । अथ कथं कुस्मतीति ? कुपूर्वात्स्मयतेः 'क्वचित्' ( ५।१।१७१ ) इति डे कुस्म इवाचरतीति क्विपि क्रियार्थत्वाद्धातुत्वे 'शेषात्०' ( ३।३।१०० ) इति परस्मैपदे भविष्यति । कुस्मनाम्नस्तु णिज् बाहुलकान्नेष्यते । इति मान्तास्त्रयः । ३ ॥ **'गूरिण्** उद्यमे' गूरयते उद्गूरयते खड्गम् । 'णिवेत्ति०' ( ५।३।१११ ) गूरणा । आगूरणा । 'गूरैचि गतौ' गूर्यते । **'तन्त्रिण्** कुटुम्बधारणे' कुटुम्बं परिवारः । उपलक्षणं चैतत् । तन्त्रयते । तन्त्रयाञ्चक्रे । अच्यलि वा तन्त्रम् । कर्मणोऽणि स्वतन्त्रः । उणादौ परिपठि० ( ६०७ ) इत्यौ तन्त्रिः वीणासूत्रम् । तृस्तृतन्द्रि० ( ७११ ) इति ईः तन्त्री शुष्कस्नायुः आलस्यं च । कुटुम्बेत्यपि धातुरिति **चान्द्रा** । कुटुम्बयते । **'मन्त्रिण्** गुप्तभाषणे' मन्त्रयते । 'ग्रहादिभ्यः०' ( ५।१।५३ ) इति णिनि मन्त्री । अलि मन्त्रः । उणादौ परिपठि० ( ६०७ ) इति इः मन्त्रिः सचिवः । इति रान्तास्त्रयः । **'ललिण्** ईप्सायाम्' लालयति । अचि लालः । कुत्सितो लालः कुलालः । कर्मणोऽणि कुं लालयते कुलालः । 'णिवेत्ति०' ( ५।३।१११ ) इत्यने लालना । णिचोऽनित्यत्वात् 'इङित०' ( ५।२।४४ ) इत्यने लालनाशीला ललना । क्ते ललितः । लालेति तु भिक्षाच्छभल्ल०' ( ४६४ ) इति निपातनाल्ले लातेः । 'लड विलासे' ऋफिडादित्वात् डस्य लत्वे ललति । 'णिगि जिह्वोन्मन्थने' घटादित्वात् ह्रस्वे ललयति श्वा जिह्वाम् । **'गलिण्** स्रावणे' इत्यप्येके । गालयते उद्गालयते । 'गल अदने' गलति । इति लान्तः । **'स्पशिण्** ग्रहणश्लेषणयोः' । स्पाशयति । ङे 'स्मृदृत्वर०' ( ४।१।६५ ) इति सन्वद्भावापवादे पूर्वस्य अत्वे अपस्पशत् । 'णौ दान्तशान्त०' ( ४।४।७४ ) इति क्ते वा निपातनात् स्पष्टः । स्पाशितः । अयं स्पशीत्येके स्पशते स्पशति । व्यञ्जनाद् घञि स्पाशः । **'दंशिण्** दशने' दंशयति । 'णिवेत्ति०' ( ५।३।१११ ) इत्यने दशना । अनटि दंशनम् । 'दशुण् भासार्थः' दंशयति । दंशं दशने दशति । **'दाशिण्** दाने' इत्यप्येके दाशयते । 'दाशृग् दाने दाशते दाशति । इति शान्तौ । **'दंसिण्** दर्शने च' चकाराद्दशने । दंसयते ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्ते दंसितः । पृषोदरादित्वाट्टे नस्यात्वे च दासी । 'दसुण् भासार्थः' दंसयति । अन्यत्र दंसति । '**भर्त्सिण्** संतर्जने' भर्त्सयते । 'णिवेत्ति०' ( ५।३।१११ ) इत्यने भर्त्सना । इति सान्तौ । '**यक्षिण्** पूजायाम्' यक्षयते । अलि यक्षः । उणादौ सात्मन्० ( ९१६ ) इति मनि यक्ष्मा रोगः । इति क्षान्तः । इत्यर्थान्तरेऽपि चुरादय आत्मनेपदिन एकत्रिंशत् ३१ ।

# इतोऽदन्ताः ।

इत ऊर्ध्वं युजादेः प्रागऽदन्तत्वं धातूनां विधीयते । ततश्च 'अतः' ( ४।३।८२ ) इत्यलुकः स्थानित्वात् गुणवृद्ध्योः समानलोपित्वाच्च सन्वद्भावदीर्घोपान्त्यह्रस्वानामभावः । यथा सुखयति रचयति; अत्र 'अतः' इत्यलुकः स्वरादेशत्वेन पूर्वविधिं प्रति स्थानित्वाद्गुणवृद्ध्यभावः । अररचत् असुसुखत्; अत्र समानलोपित्वात् 'असमानलोप०' ( ४।१।६३ ) इति पूर्वस्य सन्वद्भावो लघोर्दीर्घ इति दीर्घश्च न भवति । असुसूचत् अत्रोपान्तह्रस्वाभावः । अङ्कादीनां तूक्तफलाभावेऽपि पूर्वाचार्यानुरोधेनादन्तेषु पाठः; णिजभावेऽनेकस्वरत्वाद्यङ्निवृत्त्यर्थ इत्येके । **द्रमिलास्त्वे**वंप्रकाराणामत्त्वविधानसामर्थ्याद्लोपाभावं मन्यन्ते; ततश्च 'ञ्णिति' ( ४।३।५० ) इति वृद्धौ प्वागमे च दुःखापयति लज्जापयति वण्टापयति रंहापयति अर्थापयते सत्रापयते गर्वापयते इत्युदाहरन्ति । ते हि 'ञ्णिति' इति' वृद्धिं स्वरमात्रस्येच्छन्ति । '**अङ्कण्** लक्षणे' अङ्कयति । सनि 'स्वरादेर्द्वितीयः' ( ४।१।४ ) इति केर्द्वित्वे अङ्किकयिषति । अनदन्त एवायमित्येके । 'अकुङ् लक्षणे' अङ्कते । '**श्लेष्कण्** दर्शने' श्लेष्कयति । णिजभावेऽप्यदन्तत्वार्थोऽस्य पाठस्तेनानेकस्वरत्वाद्यङ् न भवति । एवं मूत्रिरूक्षिगर्विप्रभृतीनां पाठे प्रयोजनमुन्नेयम् । अनदन्ता एवैत इत्येके । इति कान्तौ । '**सुख दुःखण्** तत्क्रियायाम्' । सुखनं दुःखनं च तत्क्रिया सुखयति असुसुखत् । अचि सुखम् । दुःखयति । अचि दुःखम् । इति खान्तौ । '**अङ्गण्** पदलक्षणयोः' अङ्गयति । अञ्जिगयिषति । अस्यापि पूर्वाचार्यानुरोधेनादन्तेषु पाठः । इति गान्तः । '**अघण्** पापकरणे' अघयति । सनि अजिघयिषति । इति घान्तः । '**रचण्** प्रतियत्ने' रचयति अररचत् रचयाञ्चकार । 'णिवेत्ति०' ( ५।३।१११ ) इत्यने रचना । '**सूचण्** पैशुन्ये' सूचयति । अषोपदेशत्वात्षत्वाभावे असुसूचत् । 'अट्यर्त्ति०' ( ३।४।१० ) इति यङि सोसूच्यते । स्मिप्रभृतिसाहचर्यादेकस्वराणामेव षोपदेशः, अत एव सूत्र सत्र सङ्ग्राम ( साम ) सभाज स्थूल स्तन स्तेन ( स्तोम ) सुखानामषोपदेशत्वात् सोसूत्र्यते सिसत्रयिषते इत्यादौ न षत्वम् । णके सूचकः । अचि सूचः । गौरादित्वात् ङ्यां सूचयति सूत्रमार्गमिति सूची । 'नाम्नि पुंसि च' ( ५।३।१२१ ) इति णके भीरुष्ठानादित्वात्षत्वे विषूचिका । उणादौ रुक्मग्रीष्म० ( ३४६ ) इति मे निपातनात् सूक्ष्मः । पुत्रादयः ( ४५५ ) इति त्रे निपातनात् सूत्रम् । स्वरेभ्य० ( ६०६ ) इत्यौ सूचिः । इति चान्तौ । '**भाजण्** पृथक्कर्मणि' भाजयति विभाजयति अवभाजयति । क्ते भाजितम् । क्त्वो यपि विभाज्य । '**सभाजण्** प्रीतिसेवनयोः' प्रीतिदर्शनयोरित्यन्ये । सभाजयति । क्ये सभाज्यते । ङे अससभाजत् । अनटि सभाजनम् । '**लज लजुण्** प्रकाशने' लजयति अललजत् । '**लजु** ने लञ्जयति । 'लजुण् भासार्थः' इति जान्ताश्चत्वारः । ४ । '**कूटण्** दाहे' आमन्त्रणेऽपीत्येके । कूटयति । ङे अचुकूटत् । अचि कूटम् । '**पट वटण्** ग्रन्थे' ग्रन्थो वेष्टनम् । पटयति रज्जुम् वेष्टयतीत्यर्थः । एवं वटयति । एवं विभाजनेऽप्ययमित्यन्ये । ङे अपपटत् अववटत् । '**खिटण्** भक्षणे' खेटयति । ङे अचिखेटत् । णके खेटकं फलकः । अलि खेटो ग्रामः । 'णिवेत्ति०'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(५।३।१११) इत्यने आखेटना। नायं खेटः, खेड इति **देवनन्दी** खेडयति। '**खोटण्** प्रक्षेपे' खोटयति। ङे, अचुखोटत्। अलि खोटः। डान्तोऽयमिति **देवनन्दी** खोडयति। दान्त इत्यन्ये खोदयति। '**पुटण्** संसर्गे' पुटयति। ङे अपुपुटत्। '**वटुण्** विभाजने' वण्टयति। वण्टापयतीत्येके। टान्ताः सप्त ७। **शठ श्वठुण्** सम्यग्भाषणे। शठयति श्वण्ठयति। ङे अशशठत् अशश्वण्ठत्। 'शठ कैतवे' च शठति। णिगि शाठयति। 'शठ श्वठ श्वठुण् संस्कारगत्योः' शाठयति श्वाठयति। श्वण्ठयति। इति ठान्तौ। '**दण्डण्** दण्डनिपातने दण्डयति। दण्डादेर्नाम्नो णिचि दण्डयतीत्यादि सिद्धौ दण्डण्प्रभृतीनां पाठो यथाभिधानं णिचं विनापि प्रयोगार्थः, अत एवादन्तत्वमप्यनेकस्वरकार्यार्थं फलवत्। इति डान्तः। '**व्रणण्** गात्रविचूर्णने'। व्रणयति। ङे अवव्रणत्। अचि व्रणः। 'व्रण शब्दे' व्रणति। णिगि व्राणयति। '**वर्णण्** वर्णक्रियाविस्तारगुणवचनेषु'। वर्णक्रिया वर्णनं क्रियाकरणं वा। कथां वर्णयति सुवर्णं वर्णयति। विस्तारवर्णनेयम्। गुणवचनं स्तुतिः शुक्लाद्युक्तिर्वा। राजानमुपवर्णयति। 'नाम्नि पुंसि च' (५।३।१२१) इति णके वर्णकः। '**पर्णण्** हरितभावे' पर्णयति। अचि पर्णम्। '**कर्णण्** भेदे' कर्णयति। आकर्णयति। '**तूणण्** संकोचने' तूणयति मुखम्। ङे असमानलोपित्वादुपान्त्यस्येति ह्रस्वे अतुतूणत्। अङ्कादिष्वदन्तेषु धातुषु वर्णानुक्रमेणागतं प्रसिद्धप्रयोगात् गणधातुं (पृष्ठ ७५४) पाठतो निरूपयति। '**गणण्** सङ्ख्याने'। गणयति ॥ ६ ॥ इति ङे सूत्रम्।

## ई च गणः ॥ ७ ॥ [सि० ४।१।६७]

**गणेर्ङपरे णौ द्वित्वे पूर्वस्य ईरश्च स्याताम्। अजीगणत् अजगणत्। 'कथण् वाक्यप्रबन्धे' कथयति। अत इत्यकारलोपेन समानलोपित्वान्न सन्वद्भावः। अचकथत् ५। ७।**

'**ई च०**' स्पष्टम्। णके गणकः। 'कर्मजा तृचा च' (३।१।८३) इति प्रतिषिद्धोऽपि 'पत्तिरथौ गणकेन' (३।१।७९) इति षष्ठीसमासः। पत्तिगणकः रथगणकः। स्त्रियामपि गणयति धनागममिति गणिका। अलि गणः। 'णिवेत्ति०' (५।३।१११) इत्यने गणना। '**कुण गुण केतण्** आमन्त्रणे'। आमन्त्रणं गूढोक्तिः। कुणयति गुणयति। अचुकुणत् अजुगुणत्। इति णान्ता अष्टौ। **केत** केतयति संकेतयति। अचिकेतत्। क्ते केतितः। क्त्वो यपि सङ्केत्य। अयं निश्रावणनिमन्त्रणयोरपीत्येके। '**पतण्** गतौ वा' वाशब्दो णिजदन्तत्वयोर्युगपद्विकल्पार्थः। पतयति। ङे अपपतत्। 'शीङ्श्रद्धा०' (५।२।३७) इत्यालावामन्तेति णेरयि पतनशीलः पतयालुः। पक्षे पतति। 'व्यञ्जनादे०' (४।३।३७) इति वा वृद्धौ अपातीत् अपतीत्। 'पत्लृ गतौ' पतति अपतत्। '**वातण्** गतिसुखसेवनयोः,' सुखसेवनयोरित्येके। वातयति। ङे अववातत्। नायं वातः किन्तु वा इत्येके वापयति। निर्वाप्य गतः। इति तान्तास्त्रयः। कथण् धातुं (पृष्ठ ७६५) पाठतो दर्शयति। '**कथण्** वाक्यप्रबन्धे' इति। वाक्यप्रतिबन्ध इत्यन्ये। प्रतिबन्धो विच्छेदो दीरणात् (?)। वदने इत्यपरे। कथयति। ङे अचकथत्। णके कथकः। वाक्यप्रबन्धे भीषिभूषि० (५।३।१०९) इत्यङि कथा। 'पुन्नाम्नि०' (५।३।१३०) इत्याधारे घे आगत्य कथ्यतेऽस्मिन्निति आस्कथः। वर्चस्कादित्वात्सोऽन्तः। क्त्वो यपि लघोरिति णेरयि संकथय्य। कथमचीकथत्? 'भूरिदाक्षिण्यसम्पन्नं यत्त्वं सान्त्वमचीकथः' इति प्रयोगं दृष्ट्वा ये गणयतेरन्यस्यापि पूर्वस्येत्वमिच्छन्ति तन्मते भविष्यति, प्रकृत्यन्तरं वान्वेष्यम्। '**श्रथण्** दौर्बल्ये' श्रथयति। ऋफिडादित्वाल्लत्वे श्लथयति। ङे अशश्लथत्। 'श्रथण् प्रतिहर्षे'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रथयति । 'श्रथण् बन्धने च' 'युजादेः०' ( ३।४।१८ ) इति वा णिचि श्राथयति श्रथति । 'श्रथुङ् शैथिल्ये' श्रन्थते । इति थान्तौ **'छेदण्** द्वैधीकरणे' छेदयति । ङे अचिच्छेदत् । क्ते छेदितम् । क्त्वो यपि विच्छेद्य । **'गदण्** गर्जे' गर्जो मेघशब्दः, गदयति । ङे अजगदत् । 'गद व्यक्तायां वाचि' गदति । णिगि गादयति । ङे अजीगदत् । इति दान्तौ । **'अन्धण्** दृष्ट्युपसंहारे' अन्धयति । सनि 'न बदन०' ( ४।१।५ ) इति नस्य द्वित्वाभावे धेरेव द्वित्वे अन्दिधयिषति । इति धान्तः । **'स्तनण्** गर्जे' गर्जो मेघशब्दः । स्तनयति । ङे अतस्तनत् । अषोपदेशत्वात् षत्वाभावे तिस्तनयिषति । उणादौ हृषिपुषि० ( ७९७ ) इतीत्नौ स्तनयित्नुर्मेघः । 'स्तन शब्दे' स्तनति । णिगि शब्दादन्यत्र न घटादित्वम् स्तानयति । **'ध्वनण्** शब्दे' ध्वनयति । ङे अदध्वनत् । 'ध्वन शब्दे' ध्वनति । णिगि शब्दादन्यत्र घटादित्वाभावे ध्वानयति । **'स्तेनण्** चौर्ये' स्तेनयति । ङे अषोपदेशत्वात् षत्वाभावे अतिस्तेनत् । अचि स्तेनः । **'ऊनण्** परिहाणे' ऊनयति । ङे मा भवान् ऊनिनत् । अचि ऊनः । क्ते ऊनितम् । इति नान्ताश्चत्वारः । **'कृपण्** दौर्बल्ये' कृपयति । ङे अचकृपत् । नन्द्यादित्वादने कृपणः । स्त्रीत्वे कृपणा । 'मृगया०' ( ५।३।१०१ ) इति निपातनादनपवादेऽङि कृपा । 'कृपौङ् सामर्थ्ये' कल्पते 'कृपण् अवकल्कने' कल्पयति । **'रूपण्** रूपक्रियायाम्' । रूपक्रिया राजमुद्रादिरूपस्य करणम् । रूपयति । णके रूपकम् । अलि रूपम् । 'णिवेत्ति०' ( ५।३।१११ ) इत्यने रूपणा । रूपदर्शनं वा रूपक्रिया । निरूपयति निरूपणा । **'क्षप लाभण्** प्रेरणे' क्षपयति । अचि क्षपा । इति पान्तास्त्रयः ३ । लाभयति ङे अललाभत् । अच्यलि वा लाभः । **लभणिति सभ्याः ।** लभितम् । विलभना । 'डुलभिंष् प्राप्तौ' लभते । णिगि लम्भयति । इति भान्तः । **'भामण्** क्रोधे' भामयति । ङे अबभामत् । 'भामि क्रोधे' भामते । णिगि ङे अबीभमत् । **'गोमण्** उपलेपने' गोमयति भूमिम् । ङे अजुगोमत् । उणादौ गयहृदय० ( ३७० ) इति निपातनादये गोमयं गोशकृत् । **'सामण्** सान्त्वने' सान्त्वनं प्रीणनम् । सामयति । अससामत् । अषोपदेशत्वात् षत्वाभावे सिसामयिषति । **'श्रामण्** आमन्त्रणे' श्रामयति । अशश्रामत् । **'स्तोमण्** श्लाघायाम्' स्तोमयति । ङे अतुस्तोमत् । अलि स्तोमः । 'ज्योतिरायुर्भ्यां०' ( २।३।१७ ) इति षत्वे अग्निष्टोमः । इति मान्ताः पञ्च ५ । **'व्ययण्** वित्तसमुत्सर्गे' वित्तसमुत्सर्गस्त्यागः, गतावित्येके । व्यययति । ङे, अवव्ययत् । वित्तेति धात्वन्तरमित्येके । वित्तयति वित्तितः वित्तयित्वा । इति यान्तः । **'सूत्रण्** विमोचने' विमोचनं मोचनाभावो ग्रन्थनमिति यावत् । सूत्रयति । ङे असुसूत्रत् । 'अत्यर्ति०' ( ३।४।१० ) इति यङि सोसूत्र्यते । अचि सूत्रम् । 'हेतुतच्छीला०' ( ५।१।१०३ ) इत्यत्र सूत्रस्य वर्जनात् कर्मणोऽणि सूत्रकारः । **'मूत्रण्** प्रस्रवणे' मूत्रयति । ङे अमुमूत्रत् । 'अत्यर्ति०' इति मोमूत्र्यते । **'पार तीरण्** कर्मसमाप्तौ' पारयति । अपपारत् । अलि पारम् । 'साहिसाति०' ( ५।१।५९ ) इति शे पारयः । क्ते पारितम् । 'णिवेत्ति०' ( ५।३।१११ ) इत्यने पारणा । **तीर** तीरयति । अच्यलि वा तीरम् । **'कत्र गात्रण्** शैथिल्ये' कत्रयति । ङे अचकत्रत् । क्ते कत्रितम् [ कत्थणिति **देवनन्दी** कत्थयति । अयं कर्त्रण् इत्येके कर्त्रयति कर्त्रितम् ] **चन्द्र**स्तु कर्तृणिति ऋदितं मन्यते । कर्त्रयति । **गात्र** गात्रयति । अजगात्रत् । **'चित्रण्** चित्रक्रियाकदाचिद्दृष्ट्योः' चित्रयति आलेख्यं करोति कदाचित्पश्यति वेत्यर्थः । वैचित्र्यकरणार्थोऽयं न चित्रक्रियार्थ इत्यन्ये, तन्मते चित्रयति चित्रं सम्पादयति कदाचित्पश्यति वेत्यर्थः । क्ते चित्रितम् । 'णिवेत्ति०' ( ५।३।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

१११ ) इत्यने चित्रणा । '**छिद्रण्** भेदे' छिद्रयति । ङे अचिच्छिद्रत् । अचि छिद्रम् । '**मिश्रण्** संपर्चने' संपर्चनं श्लेषः । मिश्रयति । ङे अमिमिश्रत् । अचि मिश्रः । '**वरण्** ईप्सायाम्' वरयति कन्याम्, ङे अववरत् । '**स्वरण्** आक्षेपे' स्वरयति असस्वरत् । आक्षेपादन्यत्र 'ॠस्वृ शब्दोतापयोः' स्वरति । णिगि स्वारयति । '**शारण्** दौर्बल्ये' तालव्यादिः । शारयति । ङे अशशारत् । शरेति **नन्दी** अशशरत् । '**कुमारण्** क्रीडायाम्' । कुमारयति । ङे अचुकुमारत् । अचि कुमारः, कुत्सितो मारोऽस्येति कमेरत उच्च ( ४०९ ) इत्यारे कामयतेर्वा । इति त्रयोदश रान्ताः । १३ । लान्तोऽयमित्येके । कुमालयति । '**कलण्** सङ्ख्यानगत्योः । कलयति । ङे अचकलत् । 'कलि शब्दसङ्ख्यानयोः' कलते । णिगि कालयति । 'कलण् क्षेपे' कालयति गाः । '**शीलण्** उपधारणे' उपधारणमभ्यासः परिचयो वा । शीलयति । ङे अशिशीलत् '**वेल कालण्** उपदेशे' वेलयति । ङे अविवेलत् । अचि वेला । **काल** कालयति । ङे अचकालत् । कालोपदेश इत्यर्थनिर्देश इत्येके । '**पल्यूलण्** लवनपवनयोः' पल्यूलयति । ङे अपपल्यूलत् पल्पूलेत्येके । वल्यूलेत्यन्ये । पल्पूलेत्यपरे । इति लान्ताश्चत्वारः । '**अंशण्** समाघाते' समाघातो विभाजनम् अंशयति रिक्थम् । अलि अंशः । **चन्द्रो** दन्त्यान्तमाह । व्यंसयति मयूरव्यंसकः । इति शान्तः । '**पषण्** अनुपसर्गः' । पषण् इत्ययं धातुरनुपसर्गो णिचमुत्पादयति । पषयति अपपषत् । गत्यर्थोऽयमित्येके । अनुपसर्ग इति किम् ? प्रपषति [ 'पषी बाधनस्पर्शनयोः' पषते पषति । 'पषण् बन्धने' पाषयति ] तालव्यान्तोऽयमित्येके । केचित्त्विमं तालव्यान्तमधीत्य व्याचक्षते पशेतिधातुरर्थानिर्देशात् भ्वादिश्चुरादिश्च । अनुपसर्गश्चुरादिरदन्तः [ पशयति । अनुपसर्ग इति किम् ? प्रपशति ] तालव्यान्त एव वादन्त इत्यन्ये । पशयति पाशयति । '**गवेषण्** मार्गणे' गवेषयति । ङे अजगवेषत् । अनटि गवेषणम् । '**मृषण्** क्षान्तौ' क्षान्तिस्तितिक्षा । मृषयति । ङे अममृषत् । अनटि मृषणम् । 'मृषीच् तितिक्षायाम्' मृष्यति मृष्यते । 'मृषण् तितिक्षायाम्' 'युजादेः०' ( ३।४।१८ ) इति वा णिचि मर्षयति मर्षति । इति षान्तास्त्रयः ३ । '**रसण्** आस्वादनस्नेहयोः' । रसयति । ङे अररसत् । अलि रसः । उणादौ स्वसिरसि० ( २६९ ) इत्यने रसना । 'रस शब्दे' रसति । णिगि रसयति । घञि रासः । '**वासण्** उपसेवायाम्' वासयति । ङे अववासत् । णके वासकः । 'णिवेत्ति०' ( ५।३।१११ ) इत्यने वासना । 'वसण् स्नेहादौ' वासयति । ङे अवीवसत् । '**निवासण्** आच्छादने' निवासयति । ङे अनिनिवासत् । सनि निनिवासयिषति । क्त्वि वासयित्वा । निपूर्वस्य वासण् इत्यस्य ङे न्यववासत् । क्त्वो यपि निवास्य । इति सान्तास्त्रयः ३ । '**चहण्** कल्कने' कल्कनं दम्भः । चहयति । ङे अचचहत् । ञिणम्परे तु णिचि 'चहणः शाठ्ये' ( ४।२।३१ ) इति वा दीर्घे अचाहि अचहि । चाहं चाहम्, चहं चहम् । 'चह कल्कने' चहति । णिगि चाहयति । ङे अचीचहत् । '**महण्** पूजायाम्' महयति । ङे, अममहत् । 'पुन्नाम्नि०' ( ५।३।१३० ) इति घे महः उत्सवः । गौरादित्वात् ङ्यां मही । 'मह पूजायाम्' महति । उणादौ महेर्णिद्वा ( २८५ ) इतीने महिनं राज्यम् [ भ्वादेस्तु ] माहिनं तदेव । श्रुदक्षि० ( ३७३ ) इत्याय्ये 'आमन्त०' ( ४।३।८५ ) इति णेरयि महयाय्यः अश्वमेधः । मह्यविभ्यां टित् ( ५४७ ) इतीषे महिषः सैरिभो राजा च । महिषी सैरिभी राजपत्नी च । स्वरेभ्य० ( ६०६ ) इति इः महिः । द्रुहिवृद्दि० ( ८८४ ) इति कतरि महान् । '**रहण्** त्यागे'

रहयति । ङे अररहत् । अलि विरहः । 'रह त्यागे' रहति । णिगि राहयति । **'रहुण्** गतौ' । उदित्त्वान्ने रंहयति । अदन्तत्वबलात् 'अतः' (४।३।८२) इति लुकं बाधित्वानुपान्त्यस्याप्यतो 'ञ्णिति' (४।३।५०) इति वृद्धौ 'अर्त्तिरी०' (४।२।२१) इति पौ रंहापयति । 'रहु गतौ' रंहति । **'स्पृहण्** ईप्सायाम्' 'स्पृहेर्व्याप्यं वा' (२।२।२६) इति व्याप्यस्य वा सम्प्रदानत्वे पुष्पेभ्यः स्पृहयति । अकर्मकत्वात् गत्यर्थेति कर्त्तरि क्ते पुष्पेभ्यः स्पृहितो मैत्रः । पक्षे पुष्पाणि स्पृहयति । कर्मणि क्ते पुष्पाणि स्पृहितानि मैत्रेण । ङे अपस्पृहत् । 'शीङ्श्रद्धा०' (५।२।३७) इत्यालौ 'आमन्त०' (४।३।८५) इति णेरयि स्पृहाशीलः स्पृहयालुः । 'भीषिभूषि०' (५।३।१०९) इत्यङि स्पृहा । उणादौ श्रुदक्षि० (३७३) इत्याय्ये स्पृहयाय्यं घृतम् । इति हान्ताः पञ्च ५ । **'रूक्षण्** पारुष्ये' रूक्षयति । ङे अरुरूक्षत् । अचि रूक्षः । अनदि रूक्षणम् । क्त्वो यपि विरूक्ष्य । इति क्षान्तः । ❋ इत्यदन्ताः परस्मैपदिनो ऽशीतिः ८२ । ❋

अथादन्तेष्वेव कुहणिमभिव्याप्यात्मनेपदिनः । **'मृगणि** अन्वेषणे' मृगयते । 'मृगयेच्छा०' (५।३।१०१) इति शे निपातनात् मृगया । क्ते मृगितम् । इति गान्तः । **'अर्थणि** उपयाचने' । अर्थयते । पूर्वाचार्यानुरोधाददन्तेष्वस्य पाठः । एवं सत्रिगर्व्योरपि । केचिददन्तपाठबलादतो लुकं बाधित्वोपान्त्यस्यापि 'ञ्णिति' (४।३।५०) वृद्धौ 'अर्त्तिरी०' (४।२।२१) इति पौ अर्थापयते सत्रापयते । गर्वापयते इत्याहुः । ङे आर्तिथत । सनि आर्तिथयिषते । क्ते अर्थितम् । अलि अर्थः । 'णिवेत्ति०' (५।३।१११) इत्यने प्रार्थना । इति थान्तः । **'पदणि** गतौ' पदयते । ङे अपपदत् । इति दान्तः । **'संग्रामणि** युद्धे' संग्रामयते शूरः । असंग्रामयत । सनि अषोपदेशत्वात्षत्वाभावे सिसंग्रामयिषते । अलि 'पुन्नाम्नि०' (५।३।१३०) इत्याधारे घे वा संग्रामः । क्त्वि संग्रामयित्वा । अयं परस्मैपदीत्येके संग्रामयति । इति मान्तः । **'शूर वीरणि** विक्रान्तौ' । शूरयते । ङे अशुशूरत् । अचि शूरः । 'शूरैचि स्तम्भे' शूर्यते णिगि ङे अशुशूरत् ॥ वीरयते । अचि वीरः । 'य एचातः' (५।१।२८) इति भावे ये वीर्यम् । **'सत्रणि** संदानक्रियायाम्' सन्तानक्रियायामित्येके । सत्रयते शत्रून् । ङे असतत्रत् । अषोपदेशत्वात्षत्वाभावे सिसत्रयिषते । इति रान्तास्त्रयः ३ ॥ **'स्थूलणि** परिबृंहणे' । परिबृंहणं पीनत्वम् । स्थूलयते । ङे अतुस्थूलत् । सनि अषोपदेशत्वात्षत्वाभावे तुस्थूलयिषते । अचि स्थूलः । इति लान्तः । **'गर्वणि** माने' गर्वयते । अजगर्वत् । अलि गर्वः । इति वान्तः । 'गृहणि ग्रहणे' गृहयते । ङे अजगृहत् । 'शीङ्श्रद्धा०' (५।२।३७) इत्यालौ गृहयालुः करलीलया श्रियः । क्ते गृहितम् । **'कुहणि** विस्मापने' कुहयते । अचुकुहत् । णके, कुहकम् । भिदाद्यङि कुहा नाम नदी । 'णिवेत्ति०' (५।३।१११) इत्यने कुहना दम्भचर्या । उणादौ मिवमि० (५१) इत्युके कुहुकं आश्चर्यम् । पृकाहृषि० (७२९) इति किदुः कुहुः नष्टचन्द्रामावास्या । नृतिशृधिरुषिकुहिभ्यः० (८४४) किदूः कुहूः सैव । 'सा नष्टेन्दुः कुहुः कुहूरि-त्यभिधानचिन्तामणौ । इति हान्तौ ।

इत्यदन्ता आत्मनेपदिन ११ इत्यदन्ता धातवस्त्रिणवतिः ९३ ॥ ७ ॥

३२ **युजण्** संपर्चने इति । अथ विकल्पितणिचो युजादयस्तत्र सूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## युजादेर्न वा ॥ ८ ॥ [ सि० ३।४।१८ ]

**एभ्यो णिज् वा स्यात् । 'युजण् संपर्चने' योजयति योजति १० । 'षहण् मर्षणे' साहयति सहति १० ॥ ८ ॥**

इति श्रीमहोपाध्यायश्रीकीर्तिविजयगणिशिष्योपाध्यायश्रीविनयविजयगणिविरचितायां हैमलघुप्रक्रियायां चुरादयः समाप्ताः ।

**'युजा०'** स्पष्टम् । इह युजादीनां नियतो णिज्विकल्पः, चुरादीनां तु यथादर्शनं णिजनित्य इति णिज्विकल्पपक्षे शव् योजति । क्ये योज्यते [ युजिंच् समाधौ ] युज्यते । अद्यतन्यां ङे उपान्त्यह्रस्वे अयूयुजत् । अयोजीत् अयोजिष्टां अयोजिषुः । णिजि इटि अयोजयिषाताम् । ञिटि णिजभावे इटि च अयोजिषाताम् अयोजिषत । अयोजयिषत । योजयाञ्चकार । युयोज युयुजतुः । योज्यात् युज्यात् । योजयिषीष्ट योजिषीष्ट । योजयिता योजिता । योजयिष्यति योजयिष्यते योजिष्यति योजिष्यते । भावकर्मणोरात्मनेपदम् । युयोजयिषति । 'वौ व्यञ्जनादेः' ( ४।३।२५ ) इति क्त्वासनोर्वा किच्वे युयोजिषति युयुजिषति । णिजभावे यङ् भवति । योयुज्यते योयुजीति योयोक्ति योयुक्तः योयुजति । णिगि योजयति । ङे अयूयुजत् । योजयत् योजन् । योज्यमानम् युज्यमानम् । योजयिष्यन् योजिष्यन् । योजयाञ्चकृवान् । ययुज्वान । प्रयोजितः २ तवान् । योजयित्वा योजित्वा युजित्वा । प्रयोज्य प्रयुज्य । योजयिता योजिता । योजनीयम् । योज्यम् । **'लीण् द्रवीकरणे'** 'लियो नोऽन्तः०' ( ४।२।१५ ) इति नेन्ते घृतं विलीनयति । पक्षे 'नामिन०' ( ४।३।५१ ) इति वृद्धौ विलाययति । 'लीङ्लिनोर्वा' ( ४।२।९ ) इति वात्वमस्यापीत्येके । तन्मते 'लो लः' ( ४।२।१६ ) वा ले विलालयति विलापयति । 'लीङ्लीनोर्चाभिभवे चाचाकर्त्तर्यपि' ( ३।३।९० ) इत्यात्मनेपदमात्वं चास्यापि णिच्यपीत्येके कस्त्वामुल्लापयते आलापयते । णिजभावे विलयते । क्ये विलीन्यते । विलाय्यते । अन्यमते विलाल्यते विलाप्यते । विलीयते । ङे व्यलीलिनत् व्यलीलयत् । व्यलीललत् । व्यलीलपत् । व्यलीनि व्यलायि व्यलालि । व्यलापि । व्यलायि । इटि व्यलीनयिषाताम् व्यलाययिषाताम् व्यलालयिषाताम् व्यलापयिषाताम् व्यलयिषाताम् । ञिटि णेर्लुकि व्यलीनिषातामित्यादि । व्यलायिषाताम् । विलीनयाञ्चकारेत्यादि । विलिलाय विलिल्यतुः० । विलिलनियिषति । विलिलाययिषति विलिलयिषति । अणिचि यङि वेलेलीयते विलेलयीति विलेलेति । विलीनितः, विलायितः विलयितः । विलीन्य विलाय्य विलीय । विलीनयिता विलायिता विलयिता । 'लीङूच् श्लेषणे' लीयते । 'लींश् श्लेषणे' लिनाति । **'मीण् मतौ'** मतिर्मननम्, गतावित्यन्ये, । माययति मयति । **'प्रींगण् तर्पने'** गित्त्वस्य णिजभावे फलवत्कर्त्तर्यात्मनेपदार्थत्वाण्णिचि 'धूग्प्रीगो०' ( ४।२।१८ ) रिति नेन्ते 'शेषात्०' ( ३।३।१०० ) इति परस्मैपदे प्रीणयति । क्र्यादेरेव नमिच्छन्त्येके तन्मते 'नामिन०' ( ४।३।५१ ) इति वृद्धौ प्राययति, पक्षे प्रयते प्रयति । इति त्रय ईदन्ताः । **'धूगण्** कम्पने 'धूग्प्रीगोर्नः' ( ४।२।१८ ) इति ने धूनयति । नं नेच्छन्त्येके धावयति । पक्षे गित्त्वादुभयपदप्राप्तौ धवते धवति । इति ऊदन्तः । **'वृगण् आवरणे'** वारयति । पक्षे गित्त्वादुभयपदे वरते वरति । इति ऋदन्तः । **'जॄण् वयोहानौ'** जारयति । 'णिवेत्ति०' ( ५।३।१११ ) इत्यने जारणा । पक्षे जरति । ज्रीति **नन्दी** । ज्राययति ज्रयति इति **धातुपारायणे** 'जॄषूच् जरसि' जीर्यते 'जॄष् वयोहानौ' जृणाति इति ॠदन्ताः । **'चीक शीकण्** आमर्षणे' चीकयति चीकति । शीकतिस्तालव्यादिः शीकयति ।

हैं० प्रका० उत्त० ९७

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शीकति । ङे अशीशिकत् । 'शीकृङ् सेचने' शीकते । णिगि ङे ऋदित्त्वात् ह्रस्वाभावे अशिशीकत् । इति कान्तौ '**मार्गण्** अन्वेषणे' मार्गयति मार्गति । अमार्गीत् । इति गान्तः । '**पृचण्** पर्चने' संपर्चयति संपर्चति । यङि परीपृच्यते । '**रिचण्** विरेचने च' चकारात्संपर्चने । रेचयति रेचति । '**वचण्** भाषणे' संदेशने इत्येके । वाचयति वचति । यजादीत्यत्र यौजादिकस्या-ग्रहणाद् य्वृदभावे 'क्ये वच्यते । ङे अवीवचत् । 'वचंक् भाषणे' वक्ति । क्ये उच्यते । '**अर्चिण्** पूजायाम्' अर्चयति । पक्षे इदित्त्वादात्मनेपदे शवि अर्चते । 'अर्च पूजायाम्' अर्चति । इति चान्ताश्चत्वारः । '**वृजैण्** वर्जने' वर्जयति वर्जति । क्ये वर्ज्यते । वृज्यते । ङे अववर्जत् अवीवृजत् । अवर्जीत् अवर्जिष्टाम् अवर्जि अविर्जिषाताम् अवर्जयिषाताम् । वर्जयाञ्चकार । ववर्ज ववृजतुः । ववर्जिथ ववर्जिम । वर्ज्यात् वृज्यात् । वर्जयिष्यति वर्जिष्यति । वरीवृज्यते । व रि री वृजीति । वर्जयित्वा वर्जित्वा । ऐदित्त्वात्क्तयोर्नेट् अपवृक्तः २ । घञि वर्गः । '**मृजौण्** शौचालङ्कारयोः' । 'मृजोऽस्य०' (४।३।४२) इति वृद्धौ मार्जयति । 'णिवेत्ति०' (५।३।१११) इत्यने मार्जना । क्ते 'सेट्क्तयोः' (४।३।८४) इति णेर्लुकि मार्जिता रसाला । मर्जितेति रूढेः । पक्षे मार्जति । औदित्त्वाद्वेट् मार्जिता मार्ष्टा । वेट्त्वात् क्तयोर्नेट् मृष्टः २ । इति जान्तौ २ । '**कठुण्** शोके' औदित्त्वान्ने कण्ठयति उत्कण्ठयति । कण्ठति उत्कण्ठति । इति ठान्तः । '**श्रन्थ ग्रन्थण्** सन्दर्भे' सन्दर्भो बन्धनम् । श्रन्थयति श्रन्थति । ग्रन्थयति ग्रन्थति । '**क्रथ अर्दिण्** हिंसायाम्' क्राथयति । चौरस्योत्क्राथयति । 'क्नथ क्रथ क्लथ हिंसार्थाः' णिगि घटादित्वात् ह्रस्वे चौरमुत्क्रथयति । **अथ** लाघवार्थं थान्तमध्ये एवार्थानुगुण्येन **दान्तः** । **अर्दि** इदित्त्वस्य णिजभावे आत्मनेपदे सार्थकत्वाण्णिचि परस्मैपदे अर्दयति । पक्षे अर्दते । परस्मैपद्ययमित्येके । अर्दति । '**श्रथण्** बन्धने च' चकारात् हिंसायाम् । मोक्षणे इत्येके । श्रथयति श्राथयति श्रथति । अयं 'श्रन्थण् हिंसार्थ' इत्यन्ये । श्रन्थयति श्रन्थति । इति थान्ताश्चत्वारः ४ । '**वदिण्** भाषणे संदेशने इत्येके । वादयति संवादयति । पक्षे इदित्त्वादात्मनेपदे वदते क्ये वद्यते । 'वद व्यक्तायां वाचि' वदति । यजादित्वात् य्वृति उद्यते । '**छदण्** अपवारणे' छादयति । 'छदण् संवरणे' । ऊर्जने घटादित्वात् ह्रस्वे छदयति । '**आङः सदण्** गतौ' । आङः परः सद इत्ययं धातुर्गतावर्थे युजादिः । आसादयति आसीदति । आसदतीत्येके । अनुस्वारेत्त्वान्नेडित्यन्ये । आसत्ता । आसात्सीत् । आङोऽन्यत्र सीदति गतेरन्यत्र सीदति । 'षद्लृं विशरणादौ' असदत् । '**छृदण्** संदीपने' छर्दयति छर्दति । 'कृतचृत०' (४।४।५०) इत्यत्र तृदसाहचर्येण रुधादेरेव ग्रहणात्सादाविड्विकल्पाभावे छर्दिष्यति । ऐदिदयमित्यमित्येके 'डीयश्व्यैदितः क्तयोः' (४।४।६१) नेट् छृण्णः २ । इति दान्ताश्चत्वारः । '**शुन्धिण्** शुद्धौ' शुन्धयति शुन्धते । अनिदिदित्येके शुन्धति । क्ते शुन्धितम् । इति धान्तः । '**तनूण्** श्रद्धाघाते' श्रद्धोपकरणयोरित्यन्ये । तानयति तनति । क्त्वि उदित्त्वाद्वेट् तान्त्वा तनित्वा । वेट्त्वात् क्तयोर्नेट् नितान्तः २ । 'तन्व्यधीण्श्वसातः' (५।१।६४) णे तानः श्रद्धाहीनो जनः । **उपसर्गाद्दैर्घ्ये** उपसर्गपूर्वस्तनू दैर्घ्ये युजादिः । आतानयति वितानयति प्रतानयति । आतनति वितनति प्रतनति । '**वन** श्रद्धोपहिंसनयो'रिति **चान्द्रं पारायणम्** । '**मानण्** पूजायाम्' । मानयति मानति । अयं मनणित्येके । मनति । इति नान्तौ । '**तपिण्** दाहे' तापयति । पक्षे इदित्त्वादात्मनेपदे । तपते । '**तृपण्** प्रीणने' संदीपन इत्येके । तर्पयति तर्पति । क्ते तृपितम् । अयं '**चृतण् हपण्**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

संदीपने' इत्येके । चर्तयति चर्तति । दर्पयति दर्पति । 'आप्लृण् लम्भने' लम्भनं प्राप्तिः । आपयति आपति । लृदित्त्वादङि आपत् । क्ते आपितम् । 'वाप्नोः' (४।३।८७) इति यपि णेर्वाय् अस्यापीत्येके । प्रापय्य प्राप्य वा गतः । इति पान्तास्त्रयः । 'दृभैण् भये' दर्भयति दर्भति । ऐदित्त्वात् क्तयोर्नेट् दृब्धः २ । इति भान्तः । 'ईरण् क्षेपे' । गताविल्येके । ईरयति ईरति । इति रान्तः । 'मृषिण् तितिक्षायाम्' मर्षयति । पक्षे इदित्त्वादात्मनेपदे मर्षते । 'मृषण् क्षान्तौ' अदन्तः मृषयति, णिचोऽ-५ नित्यत्वात् मृषति अदन्तत्वान्न गुणः । अर्चि अर्दि शुन्धि तपि वदि मृषयः षडपि परस्मैपद इति **भीमसेनीयाः** । 'शिषण् सर्वोपयोगे उपयोग उपयुक्तत्वं इति **धातुपारायणे** । 'शिषण् असर्वोपयोगे' अनुपयुक्तत्वे इति **क्रियारत्नसमुच्चये** । शेषयति शेषति । **विपूर्वोऽतिशये** अतिशय उत्कर्षः । विपूर्वः शिषिरतिशये विशेषयति विशेशति । क्ये विशिष्यते । सिचि व्यशेषीत् 'शिष्लृंप् विशेषणे' विशिनष्टि । व्यशिषत् । 'जुषण् परितर्कणे' परितर्पण इत्येके । जोषयति जोषति । 'धृषण् प्रसहने' प्रसहनमभिभवः । धर्षयति धर्षति । ऋदुपान्त्यादिति क्यपि प्रधृष्यम् । आदिदयमित्येके । तन्मते 'नवा भावारम्भे' ( ४।४।७२ ) इति क्तयोर्वा नेट् प्रधृष्टमनेन न डीङिति किस्वाभावे प्रधर्षिमनेन प्रधृष्टः २ प्रधर्षितः २ । इति षान्ताश्चत्वारः ४ । 'हिसुण् हिंसायाम् उदित्त्वान्ने हिंसयति हिंसति । इति सान्तः । गर्हण् निन्दने' गर्हयति गर्हति । 'गर्हि कुत्सने' गर्हते । षहणधातुं ( पृष्ठ ७६९ ) पाठतो निरूपयति । षहण् 'षः स०' (२।३।९८) इति सत्वे साहयति । 'सहति कलभेभ्यः परिभवम्' । 'षहि मर्षणे' सहते । इति हान्तौ । इति युजादयश्चत्वारिंशत् ॥ ४० ॥

## बहुलमेतन्निदर्शनम् ।

यदेतद्भ्वस्यादिधातुपरिगणनं तद्बाहुल्येन निदर्शनत्वेन ज्ञेयम् । तेनात्रापठिता अपि क्विप्रभृतयो **लौकिकाः**, स्तम्भूप्रभृतयः **सौत्राश्चुलुम्पादयश्च वाक्यकरणीया** धातव उदाहार्याः । वर्द्धते हि धातुगणः । यल्लक्ष्यम् ।

> मिलन्त्याशासु जीमूता विक्लवन्ते दिवि ग्रहाः ।
> उपक्षपयति प्रावृट् क्षीयन्ते कामिविग्रहाः ॥ १ ॥ इत्यादि ।
> मुसलक्षेपहुंकारस्तोभैः कलमखण्डिनि ।
> कुचविष्कम्भमुत्तम्भन्निरकुञ्चतीव ते स्वरः ॥ २ ॥
> नीपानन्दोलयन्नेष प्रेङ्खोलयति मे मनः ।
> पवनो वीजयन्नाशा ममाशामुचुलुम्पति ॥ ३ ॥

तावत् खरः प्रखरमुल्लयाञ्चकार ।

यद्वा बहुलमेतन्निदर्शनमित्यस्यायमर्थः । भूवादिगणाष्टकोक्ताः स्वार्थणिजन्ता अपि बहुलं भवति, चुरादिपाठस्तु निदर्शनार्थः । यदाहुः ।

'निवृत्तप्रेषणाद्धातोः प्र( प्रा ? )कृतेऽर्थे णिजिष्यते' । रामो राज्यमकारयत् । अकरोदित्यर्थः । रञ्जयति वस्त्रं रजतीत्यर्थः । भेदयति कुल्यान् भिनत्तीत्यर्थः । तापयति वाचयति वाहयति घातयति । तपति वक्ति वहति हन्तीत्यर्थः ।

---

१ मुद्रितप्रतौ तु क्रियारत्नसमुच्चयसादृश्यं दृश्यते–संपादकः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'यो लङ्कां समदीदहत्परमिदं योऽलीलवत्काननम्
योऽखंवीरसमीरमद्रिरिदरीर्यो भीभरद्राक्षसैः ।
सोऽस्माकं कटके कदापि न तथा वीरेषु सम्भाव्यते
दूतत्वेन यतस्ततः प्रतिदिनं सम्प्रेष्यते साम्प्रतम्' ॥ १ ॥

एवं यथालक्ष्यदर्शनं भ्वादिधातूनां स्वार्थिकणिजन्तत्वं प्रयोज्यम्, नतु सर्वेषाम्, व्यवस्थाविप्लव-प्रसङ्गात् ।

यद्वा बहुलमेतन्निदर्शनमित्यस्यायमर्थः । प्रयोज्यव्यापारेऽपि प्रयोक्तृव्यापारानुप्रवेशो णिगं विनापि बुद्ध्यारोपात् बहुलं भवति । 'जजान गर्भं मघवा' । इन्द्रोऽजीजनदित्यर्थः[1] ।

वान्ति पर्णशुषो वाता वान्ति पर्णमुचोऽपरे ।
वान्ति पर्णरुहोऽप्यन्ये ततो देवः प्रवर्षति ॥ १ ॥

इत्यादि यथालक्ष्यदर्शनं ज्ञेयम् । यद्वा नाम्नो णिज् बहुलमित्येव सिद्धे सूत्रमूत्रच्छिद्रान्धदण्डादयः उदाहरणार्थास्तेनादन्तेष्वनुक्ता अपि बहुलं द्रष्टव्याः । तेन 'स्कन्ध समाहारे' 'ऊष छुरणे' 'स्फुट प्रकटभावे' 'वस निवासे' इत्यादयोऽपि भवन्ति । यथा ओजयत्योजः । तडित्खचयतीवाशाः । पांसुर्दिशां मुखमतुत्थयदुत्थितोद्रेः । इत्यादीनि लक्ष्याणि ज्ञेयानि ।

'त्रयोदशाद्याश्चत्वारः शताः सर्वे चुरादयः । केचिदर्थविशेषेण केचित्सामान्यतोऽपि च' ॥ १ ॥
'तत्र चोभयपद्येकः पञ्चपञ्चाशदेव च । आत्मनेपदिनः शेषाः परस्मैपदिनः स्मृताः' ॥ २ ॥
एवं च भ्वादयो नव धातुगणाः समाप्ताः ॥ ८ ॥

यां शिष्योद्भुतकीर्त्तिकीर्त्तिविजयश्रीवाचकाहर्म्मणे
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः ।
तस्यां शासितसाधुशब्दसरणौ स्वोपज्ञसत्प्रक्रिया-
वृत्तौ धातुगणा नव प्रकटिता व्याख्यानतो भ्वादयः ॥ १ ॥

---

१ 'एकं द्वादशधा जज्ञे' जनितमित्यर्थः । षड्भिर्हलैः कृषति, कर्षतीत्यर्थः । उपयोगित्वाद्धातुपारायणात्संगृहीतम् संपादकः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अथ णिगन्तप्रक्रिया ।

एवं चैषां धातूनां स्वतन्त्रकर्तृकक्रियाप्रक्रिया निरूप्य प्रयोजकपरतन्त्रकर्तृकक्रियाप्रक्रियां निरूपयितुमाह ।

### प्रयोक्तृव्यापारे णिग् ॥ १ ॥ [ सि० ३।४।२० ]

**कुर्वन्तं यः प्रयुङ्क्ते तँद्व्यापारे वाच्ये धातोर्णिग् वा स्यात् । गकार उभयपदार्थः । णकारो वृद्ध्यर्थः । भवन्तं प्रयुङ्क्ते नामिनोऽकलिहलेरिति वृद्धौ, भावयति ४ । भवन्तं प्रायुङ्क्त णिश्रीति ङागमे उपान्त्यस्याऽसमानलोपीति ह्रस्वे, णौ यत् कृतं कार्यं तत्सर्वं स्थानिवद्भवतीति न्यायात्, भू इति द्वित्वे ह्रस्वत्वे भूभवि इति स्थिते ॥ १ ॥**

**'प्रयो०'** तँद्व्यापारे वाच्ये इति, व्यापारश्च प्रेषणाध्येषणनिमित्तभावाख्यानाभिनयज्ञानप्राप्तिभेदैरनेकधा । तत्र तिरस्कारपूर्वको व्यापारः प्रेषणम् । सत्कारपूर्वकस्त्वध्येषणं ॥ पचन्तं प्रयुङ्क्ते पाचयतीत्यत्र प्रेषणाध्येषणेन वा यथासम्भवं प्रयोक्तृत्वम् ॥ वसन्तं प्रयुङ्क्ते वासयति भिक्षा अत्र निमित्तभावेन ॥ राजानमागमयति रात्रिं विवासयति कथकः अत्राख्यानेन, आख्यानेन हि बुद्ध्यारूढा राजादयः प्रयुक्ताः प्रतीयन्ते ॥ कंसं घातयति बलिं बन्धयति नटः, अत्राभिनयेन तथा सरसमभिनयति यथा कंसवधाय बन्धनाय वाऽयमेव नारायणं प्रयुङ्क्ते इति श्रोतुः प्रतीतिर्भवति ॥ पुष्पेण चन्द्रं योजयति गणकः अत्र ज्ञानेन ॥ उज्जयिन्याः प्रदोषे प्रस्थितो माहिष्मत्यां सूर्यमुद्गमयति, रैवतकात्प्रस्थितः शत्रुञ्जये सूर्यं पातयति । अत्र प्राप्त्या ॥ ननु कर्त्तापि करणादीनां प्रयोजक इति तद्व्यापारेऽपि णिग् प्राप्नोति । कटं करोतीत्यत्र जायमानं जनयतीत्यर्थप्रतीतेः । नैवम् । प्रयोक्तृग्रहणसामर्थ्यात् कर्त्तारं यः प्रयुङ्क्ते तस्यैव व्यापारे णिग् । यदि च व्यापारमात्रे णिग् स्यात् तदा व्यापारे णिग् इत्येवोच्येत । तथा क्रियां कुर्वन्नेव कर्त्ताभिधीयते तेन तूष्णीमासीने प्रयोज्ये मां पृच्छतु भवानित्यत्र णिग् न स्यात् । पञ्चम्या बाधितत्वाद्वा । अयं भावः । सव्यापारेपि प्रयोज्ये पदत्वात् 'प्रैषानुज्ञावसरे०' (५।४।२९) इति विहितया पञ्चम्या णिग् बाध्यते । तर्हि पाचयतीत्यादावपि पञ्चमी प्राप्नोति । नैवम्, प्रैषरूपे प्रयोक्तृव्यापारे णिग्, प्रैषविशिष्टे कर्त्तरि तु वाच्ये पञ्चमी भवतीति विवेकात् । प्रक्रिया सर्वा स्पष्टा । ङ परे णौ भूभवि स्थिते इति ॥ १ ॥ अत्रोपयोगिसूत्रम् ।

### असमानलोपे सन्वल्लघुनि ङे ॥ २ ॥ [ सि० ४।१।६३ ]

**नास्ति समानलोपो यत्र तस्मिन् ङपरे णौ द्वित्वे पूर्वस्य लघुनि धात्वक्षरे परे सनीव कार्यं स्यात् । यथा अवर्णान्ते जान्तस्थापवर्गे परे सनि पूर्वस्य ओरिः स्यात् । यथा च सनि पूर्वस्यात इः स्यात्तथात्रापि । ततो लघोर्दीर्घोऽस्वरादेरिति दीर्घे, णेरनिटीति णिलोपे, अबीभवत् ५ । ॥ २ ॥**

**'अस०'** अबीभवत् इति । एवं अजीजवत् अचीयवत् अरीरवत् । अलीलवत् अपीपवत् अमीमवत् । सनि 'श्रुस्रुद्रुप्रुप्लुच्योर्वा' (४।१।६१) इत्युक्तमिहापि तथा अशिश्रवत् अशुश्रवत्, असिस्रवत् असुस्रवत्, अदिद्रवत् अदुद्रवत्, अपिप्रवत् अपुप्रवत्, अपिप्लवत् अपुप्लवत्, अचि-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

च्यवत् अचुच्युवत् । अन्यस्य न भवति । अनूनवत् अजूहवत् । लघुनीति किम्? अततक्षत् अबभाणत् अचिकनत् अचिक्रमदित्यादौ अनेकव्यञ्जनव्यवधानेऽपि स्यादीनामित्त्वबाधकत्वादस्य शासनात्सन्वद्भावो भवति, न तु स्वरव्यञ्जनव्यवायेऽपि तेन अजजागरत् । णावित्येव अचकमत । असमानलोप इति किम्? अचकथत् । दृषदमाख्यत् अददृषत् । पटुं लघुं कपिं हरिं चाख्यत् अपीपटत् अलीलघत् अचीकपत् अजीहरदित्यादौ तु वृद्धौ कृतायां सन्ध्यक्षरलोप इत्यसमानलोपित्वात्सन्वद्भावः । णाविति जात्याश्रयणाद्वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन । यद्यप्यत्र णेर्णौ लोपोऽभूत्तथापि न समानलोपः । यतो णाविति जात्यामेकवचनम् । ततश्च यः कश्चित् णिग् स सर्वोऽपि निमित्ततयोपात्तः । अतः स लुप्तोऽपि निमित्तमेव । एवमपीपठन्माणवकमुपाध्यायेन ॥२॥
परोक्षाया आमादेशे सूत्रम्

## आमन्ताल्वाय्येत्न्वय् ॥ ३ ॥ [ सि० ४।३।८५ ]

**एषु पञ्चसु णेरय् स्यात् । भावयामास ६ । भाव्यात् ७ । भावयिता ८ ॥ भावयते ४ । अबीभवत ५ ॥ पाचयति ४ । अपीपचत् ५ । पाचयते ४ । अपीपचत ५ ॥ कारयति ४ । अचीकरत् ५ । कारयते ४ । अचीकरत ५ ॥ रावयति ४ । अरीरवत् ५ ॥ लावयति ४ । अलीलवत् ५ ॥ पावयति ४ । अपीपवत् ५ ॥ शासयति ४ । अशशासत् ५ ॥ 'ढौकृङ् गतौ' ढौकमानं प्रयुङ्क्ते ढौकयति ४ । अडुढौकत् ५ । शास्वृदितो वर्जनात् ह्रस्वनिषेधः । राजयति ४ । अरराजत ५ । स्वरन्तं प्रयुङ्क्ते ॥ ३ ॥**

**'आम०'** एषु पञ्चस्विति आम अन्त आलु आय्य इत्नुषु । तत्र आम् परोक्षायाः, शेषा औणादिकाः । यथा गण्डयन्तो मेघः । गण्डयते प्रसाधकः । स्पृहयालुः स्पृहावान् । गृहयालुर्ग्रहणशीलः । गृहयालुः करलीलया श्रियः । स्पृहाय्यः स्पृहावान् । महयाय्यः अश्वमेधः । स्तनयित्नुर्गदयित्नुश्च मेघः ॥ ३ ॥ अत्र विशेषसूत्रम् ।

## घटादेर्ह्रस्वो दीर्घस्तु वा ञिणम्परे ॥ ४ ॥ [ सि० ४।२।२४ ]

**घटादीनां णौ ह्रस्वः स्यात् ञिणम्परे तु णौ वा दीर्घः । स्मरयति ४ । ॥ ४ ॥**

**'घटा०'** स्मरयतीति । इह च घटादीनामनेकार्थत्वेऽपि पठितार्थेष्वेव घटादिकार्यविज्ञानम् । तेन स्मृं आध्याने इत्यस्य घटादित्वात् ह्रस्वे स्मरयति । 'चिन्ताया'मित्यस्य तु घटादित्वाभावात् ह्रस्वाभावे स्मारयतीति रूपं स्यात् । घटादयश्च प्रागुक्ता एव ॥ ४ ॥ अत्र विशेषमाह

## स्मृदृत्वरप्रथम्रदस्तृस्पशेरः ॥ ५ ॥ [ सि० ४।१।६५ ]

**एषां ङपरे णौ द्वित्वे पूर्वस्यात् । असस्मरत् ॥ ५ ॥**

**'स्मृदृ०'** एषामिति 'स्मृं चिन्तायाम्' 'स्मृं आध्याने' वा 'दृश् विदारणे' 'ञित्वरिष् संभ्रमे' 'प्रथिष् प्रख्याने' 'म्रदिष् मर्दने' 'स्तृग्श् आच्छादने' 'स्पशि'रिति सौत्रो धातुः । स्मरन्तं दृणन्तं त्वरमाणं प्रथमानं म्रदमानं स्तृणन्तं स्पशन्तं प्रयुङ्क्ते 'प्रयोक्तृ०' ( ३।४।२० ) णिग् । ततोऽद्यतन्यां ङे सन्वद्भावापवादे पूर्वस्य अत्वे असस्मरत् अददरत् । अत्र परत्वाद्दीर्घोऽपि न भवति । अतत्वरत् अपप्रथत् अमम्रदत् अतस्तरत् अपस्पशत् ॥ ५ ॥ अत्र विशेषमाह

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## वा वेष्टचेष्टः ॥ ६ ॥ [ सि० ४।१।६६ ]

**'वेष्टि वेष्टने' 'चेष्टि चेष्टायाम्' अनयोर्ङपरे णौ पूर्वस्याद्वा स्यात् । वेष्टमानं चेष्टमानं प्रायुङ्क्त अववेष्टत्-अविवेष्टत् । अचचेष्टत्-अचिचेष्टत् ॥ ६ ॥**

'**वा वे०**' स्पष्टम् । 'उपान्त्यस्यासमानलोपी'ति सूत्रस्य विशेषमाह ॥ ६ ॥

## भ्राजभासभाषदीपपीडजीवमीलकणरणवणभणश्रणह्वे-हेठलुटलुपलपां नवा ॥ ७ ॥ [ सि० ४।२।३६ ]

**एषां सप्तदशानां ङपरे णावुपान्त्यस्य ह्रस्वो वा स्यात् । ह्रस्वे च पूर्वस्य सन्वद्भावो लघोर्दीर्घश्च । अबिभ्रजत्-अबभ्राजत् । अबीभसत्-अबभासत् । अदीदिपत्-अदिदीपत् । वर्तमानं प्रायुङ्क्त अवीवृतत् । ऋद्वर्णस्येति ऋत्वे गुणाभावः । पक्षे लघोरुपान्त्यस्येति गुणे, अववर्तत् । स्नापयति ॥ ७ ॥**

'**भ्राज०**' एषां सप्तदशानामिति । 'राजृग् टुभ्राजि दीप्तौ' । भासि टुभ्रासि टुभ्लासि दीप्तौ' 'भासि च व्यक्तायां वाचि' 'दीपैचि दीप्तौ' 'पीडण् गहने' 'जीव प्राणधारणे' 'मील श्मील क्ष्मील निमेषणे' । अणरणादिषु शब्दार्थेषु चतुर्दशसु धातुषु द्वादशद्वितीयपञ्चमषष्ठाः 'कणरणवणभण' इति चत्वारो धातवः, 'शण श्रण दाने' 'ह्वेंग् स्पर्द्धायाम्' 'हेठि विबाधायाम्' 'उठ रुठ लुठ उपघाते' । 'लुठत् संश्लेषणे वा' 'लुप्लंती छेदने' 'रप लप जल्प व्यक्ते वचने' । भ्राजमानं भासमानं भाषमानं दीप्यमानं पीडयन्तं जीवन्तं मीलन्तं कणन्तं रणन्तं वणन्तं भणन्तं श्रणन्तं ह्वयन्तं हेठमानं लोठन्तं लुप्यन्तं लपन्तं प्रायुङ्क्त णौ ङे उपान्त्यस्य ह्रस्वविकल्पे सर्वत्र रूपद्वयम् । अदिदीपत् इति । एवं अबीभषत् अबभाषत् । अपीपिडत् अपिपीडत् । अजिजीवत् अजीजिवत् । अमीमिलत् अमिमीलत् । अचीकणत् अचकाणत् । अरीरणत् अरराणत् । अबीबणत् अबबाणत् । अबीभणत् अबभाणत् । अशिश्रणत् । अशश्राणत् । अजूहवत् अजुहावत् । अजीहिठत् अजिहेठत् । अलूलुठत् अलुलोठत् । अलूलुपत् अलुलोपत् । अलीलपत् अललापत् । बहुवचनं शिष्टप्रयोगानुसारेणान्येषामपि परिग्रहार्थम् ॥ ७ ॥

## स्वपेर्यङ्ङे च ॥ ८ ॥ [ सि० ४।१।८० ]

**स्वपेर्यङि ङे किति च सस्वरान्तस्था य्वृत् स्यात् । ततो द्वित्वे लघोरुपान्त्यस्येति गुणे ह्रस्वत्वे दीर्घे च असूषुपत् ॥ ८ ॥**

अवीवृतत् असूषुपत् इति प्रयोगद्वयप्रक्रिया स्पष्टा ॥ ८ ॥ पुनरत्र धातुविशेषे प्रक्रियाविशेषमाह ।

## अर्तिरीव्लीह्रीक्नूयिक्ष्माय्यातां पुः ॥ ९ ॥ [ सि० ४।२।२१ ]

**एषामादन्तानां च णौ पुरन्तः स्यात् । अर्पयति । स्वरादेर्द्वितीय इति द्वित्वे, आर्पिपत् । रेपयति । 'क्नूयैङ् शब्दोन्दनयोः' 'क्ष्मायैङ् विधूनने' ॥ ९ ॥**

'**अर्ति०**' एषामिति । अर्ति 'ऋंक् गतौ' 'ऋं प्रापणे' वेत्यनयोर्ग्रहणं सामान्यतो निर्देशात् आरतं प्रयुङ्क्ते अर्पयति । तिव् निर्देशे यङ्लुपि 'रिरौ च लुपि' ( ४।१।५६ ) इति रागमो रिः रीर्वा तत आरतं अरिअतं अर्रतं वा प्रयुङ्क्ते णौ प्वागमाभावे अरारयति अरियारयति अर्यारयति । रीति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'रीङ्च् श्रवणे' 'रींश् गतिरेषणयोः' रियमाणं रिणन्तं प्रयुङ्क्ते रेपयति । 'व्लींश् वरणे' व्लीनन्तं प्रयुङ्क्ते व्लेपयति । 'ह्रींक् लज्जायाम्' जिह्रियन्तं प्रयुङ्क्ते 'पुस्पौ' (४।३।३) इति गुणे ह्रेपयति । 'क्ष्मायैङ् शब्दोन्दनयोः' क्ष्मायमानं प्रयुङ्क्ते । 'क्ष्मायैङ् विधूनने' क्ष्मायमानं प्रयुङ्क्ते ॥ ९ ॥ अत्र सूत्रम्

## य्वोः प्वय् व्यञ्जने लुक् ॥ १० ॥ [ सि० ४।४।१२१ ]

**पौ य्वर्जव्यञ्जनादौ च य्वोर्लुक् स्यात् । क्नोपयति क्ष्मापयति । दापयति । अदीदपत् ॥ १० ॥**

'य्वो०' स्पष्टम् । ततः 'पुस्पौ' (४।३।३) इति गुणे क्नोपयति । आदन्त दापयति । ङे अदीदपत् । एवं धापयति अदीधपत् ॥ १० ॥ अत्र विशेषसूत्रमाह

## णौ क्रीजीङः ॥ ११ ॥ [ सि० ४।२।१० ]

**एषां त्रयाणां णौ आत् स्यात् । क्रापयति । जापयति । अध्यापयति ॥ ११ ॥**

'णौ क्री०' एषामिति । डुक्रींगृश् द्रव्यविनिमये' 'जिं ज्रि अभिभवे' 'इङ्क् अध्ययने' क्रापयतीत्यादि अध्यापयतीति ॥ ११ ॥ अत्र ङे विशेषसूत्रम्

## णौ सन्ङे वा ॥ १२ ॥ [ सि० ४।४।२७ ]

**सन्परे ङपरे च णौ इङो गा वा स्यात् । अध्यजीगपत्-अध्यापिपत् ॥ १२ ॥**

'**णौ सन् ङे०**' व्यक्तम् । 'अर्त्तिरीव्ली०' (४।२।२१) इति सूत्रे बहुवचनं व्याप्त्यर्थम् । तेनादन्तस्य नाम्नोऽपि पुरन्तः स्यात् । यथा सत्यापयति अर्थापयति वेदापयति 'सत्यार्थवेदस्याः' (३।४।४४) इत्यात्वम् । प्रिय प्रापयति । स्थिर स्थापयति स्फिर स्फापयति पोरुकारः पुस्पावित्यत्र विशेषणार्थः ॥ १२ ॥ पुनरप्यत्र धातुविशेषात् प्रक्रियाविशेषानाह

## चिस्फुरोर्नवा ॥ १३ ॥ [ सि० ४।२।१२ ]

**चिस्फुरोर्णौ स्वरस्याद्वा स्यात् । चापयति-चाययति । स्फारयति स्फोरयति ॥ १३ ॥**

'**चिस्फु०**' 'चिंग्ट् चयने' 'स्फुरत् स्फुरणे' चापयति-चाययतीत्यत्र ङे अचीचपत्-अचीचयत् । अपुस्फुरत्-अपस्फुरत् ॥ १३ ॥

## वियः प्रजने ॥ १४ ॥ [ सि० ४।२।१३ ]

**गर्भाधाने वियो णावाद्वा स्यात् । पुरो वातो गाः प्रवापयति २ ॥ १४ ॥**

'**वियः०**' 'वींक् प्रजनकान्त्यसनखादनेषु' । प्रवियतीः प्रयुङ्क्ते प्रवापयति । ङे, प्रावीवपत् प्रावीवयत् । वातेः प्रजने वृत्तिर्नास्तीत्यारम्भः ॥ १४ ॥ '**घ्रां** गन्धोपादाने' इत्यस्य जिघ्रन्तं प्रयुङ्क्ते घ्रापयतीत्यत्र ङे विशेषसूत्रम्

## जिघ्रतेरिः ॥ १५ ॥ [ सि० ४।२।३८ ]

**अस्य ङपरे णौ इर्वा स्यात् । अजिघ्रिपत्-अजिघ्रपत् । तिष्ठतेरिर्नित्यम् अतिष्ठिपत् ॥ १५ ॥**

'**जिघ्र०**' तिवृनिर्देशो यङ्लुब्निवृत्त्यर्थः । अजिघ्रपत् । णौ विशेषबोधार्थत्वाद् 'गतिबोध०' (२।२।५) इत्यणिक्कर्तुः कर्मत्वे चैत्रो मैत्रं गन्धं घ्रापयति । ये तु दृशेरन्यस्य विशेषबोधार्थस्य नेच्छन्ति, तन्मते घ्रापयति मैत्रेण चैत्र इति । तिष्ठन्तं प्रयुङ्क्ते स्थापयति इत्यस्य ङे सूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## तिष्ठतेः ॥ १६ ॥ [ सि० ४।२।३९ ]

अयं भावः । तिष्ठतेरुपान्त्यस्य ङे परे णावित्यकारो भवति । अतिष्ठिपत् ।

'प्रत्यतिष्ठिपदिदं खलु तीर्थम्, रायसिंह इह वर्धमानभूः । शासनाद्विजयदेवगुरोः सद्वाचकेन विनयाद्विजयेन ॥ १ ॥ इति **शत्रुञ्जयतीर्थे सहस्रकूटप्रशस्तौ**'[1] ।

अतिष्ठिपतां अतिष्ठिपन् । तिवूनिर्देशो यङ्लुब्निवृत्त्यर्थः । अतास्थपत् । योगविभागो नित्यार्थः ॥ १६ ॥

## सिध्यतेरज्ञाने ॥ १७ ॥ [ सि० ४।२।११ ]

**अज्ञानार्थस्य सिध्यतेर्णौ स्वरस्यात् स्यात् । अन्नं साधयति । सिध्यति तत्त्वं निश्चिनोति तं प्रयुङ्क्ते सेधयति तपः साधुम् ॥ १७ ॥**

**'सिद्ध्य०'** अज्ञान इति किम् ? तपस्तपस्विनं सेधयति सिद्ध्यति जानीते ज्ञानविशेषमासादयति तं तपः प्रयुङ्क्त इत्यर्थः स्वान्येनैवैनं कर्माणि सेधयन्ति, अस्यानुभवविशेषमुत्पादयन्तीत्यर्थः । सिध्यतेरिति किम् ? 'षिधू गत्या'मिति भौवादिकस्य मा भूत् । अन्नं सेधयति । तपः सेधयति । साधिनैव सिद्धे सिद्ध्यतेरज्ञाने सेधयतीति प्रयोगनिवृत्त्यर्थं वचनम् ॥ १७ ॥

## णावज्ञाने गमुः ॥ १८ ॥ [ सि० ४।४।२४ ]

**अज्ञानार्थयोरिणिकोर्गमुः स्यात् । गमयति ग्रामम् । अधिगमयति प्रियम् । ज्ञाने तु प्रत्याययति ॥ १८ ॥**

**'णाव०'** इणिकोरिति 'इणूक् गतौ' 'इंकू स्मरणे' इत्येतयोः । गमुरित्यत्रोकारः 'स्वरहनगमोः सनि धुटि' ( ४।१।१०४ ) इत्यत्र विशेषणार्थः । अज्ञान इतीणो विशेषणं नेकोऽसम्भवात् । धात्वन्तरेणैव सिद्धे णाविको ज्ञानादन्यत्रेणश्च स्वरूपान्तरनिवृत्त्यर्थं वचनम् । कथमर्थान् गमयन्ति शब्दाः ? गमिनैव सिद्धम् ॥ १८ ॥

---

१ मुनिवर्यश्रीकनकविजयप्रेषितः संपूर्णलेखस्त्वित्थम्—श्री सहस्रकूटनो शिलालेखः जमणी बाजुः

अर्हम् । ए६० ॥ स्वस्तिश्री संवत १७१० वर्षे ज्येष्ठशुक्लषष्ठीतिथौ गुरुवारे उग्रसेनपुरवास्तव्य उकेशज्ञातीय वृद्धशाखीय उहाडगोत्र सा। वर्धमानभाल्हादे पु। सा मानसिंह थानसिंह रायसिंह कनकसिंह उग्रसेन ऋषभदासैः सा। जगतसिंह जीवणदासप्रमुखपरिवारयुतैः स्वपितृवचनात् तत्पुण्यार्थम् श्रीसहस्रकूटतीर्थं कारितम् स्वप्रतिष्ठायां प्रतिष्ठापितम् ।

तपागच्छे भ। श्रीहीरविजयसूरि पट्टप्रभाकर भ। श्रीविजयसेनसूरिपट्टालंकारपातिशाहि श्री जिहांगीरप्रदत्तमहातपा-बिरुदधारि अनेकराजाधिराजप्रतिबोधकारि भट्टारक श्री० श्रीविजयदेवसूरीश्वर आचार्य श्री विजयप्रभसूरिनिर्देशात् श्रीहीर-विजयसूरिशिष्यरत्न महोपाध्याय ५ कीर्तिविजय ग। शिष्योपाध्याय श्री विनयविजयगणिभिः प्रतिष्ठितं श्रीरस्तु ॥

श्री शत्रुंजय महातीर्थ कार्यकर पंडित श्री ५ शांतिविजय ग। देवविजय ग। मेघविजय ग। साहाय्यतः सिद्धमिदम् सुत्रधार मनजीः

डावी बाजुनोः प्रवेश करतां जमणी बाजुः

ए६० उँ नमः । प्रत्यतिष्ठिपदिदं खलु तीर्थम् रायसिंह इह वर्धमानभूः शासनाद्विजयदेवगुरोः सद्वाचकेन विनयाद्वि-जयेन ॥ १ ॥ श्रीविजयसिंहसूरिः स जयतु तपगच्छमौलिमाणिक्यं अजनिष्ट यदुपदेशात् । सहस्रकूटाभिधं । तीर्थम् ॥ २ ॥ दिक्शशिजैलधिमितेब्दे १७१० सितषष्ठ्यां ज्येष्ठमासि तीर्थेऽस्मिन् । अर्हद्बिंबसहस्रं स्थापितमष्टोत्तरं वंदे ॥ ३ ॥ यावज्जयति सुमेरुस्तावज्जीयात् प्रकृष्टसौभाग्यः । श्रीशत्रुंजयमूर्धनि सहस्रकूटकिरीटोऽयम् ॥ ४ ॥



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## रुहः पः ॥ १९ ॥ [ सि० ४।२।१४ ]

**रुहेर्णौ पो वा स्यात् । रोपयति-रोहयति वा तरुम् । 'लियो नोऽन्तःस्नेहद्रवे' (४।२।१५) घृतं विलीनयति विलाययति वा ॥ १९ ॥**

'**रुहः०**' पो वा स्यादिति । रुहेर्णौ परतः पकारोऽन्तादेशो भवतीत्यर्थः । रोहत्यर्थे रुप्यतिर्न-दृश्यते इति योगारम्भः । '**लियो०**' ली इति, 'लींश् श्लेषणे,' 'लीङ्च् श्लेषणे' अनयोः सामान्येन ग्रहणम् । लियः स्नेहद्रवेऽर्थे गम्यमाने णौ परे नोऽन्तोऽवयवो भवति । विलाययति इति वृद्धावायादेशः । लियः इतीकारप्रश्लेषादीकारान्तस्यैव भवति । कृतात्वस्य वक्ष्यमाणौ लकारपकारौ भवतः । घृतं विलालयति विलापयति । स्नेहद्रव इति किम् ? अयो विलाययति । पूर्वान्तकरणाद् व्यलीलिनदित्यत्रोपान्त्यह्रस्वो भवति । एवमुत्तरेष्वपि ॥ १९ ॥

## लीङ्लीनोर्वा ॥ २० ॥ [ सि० ४।२।९ ]

**अनयोर्यपि खलचलवर्जे क्ङिति च आद्वा स्यात् ॥ २० ॥**

'**लीङ्०**' अनयोरिति लीयतेर्लिनातेश्च ॥ यपि यथा विलाय पक्षे विलीय ॥ क्ङिति यथा विलाता विलेता । विलास्यते विलेस्यते । विलास्यति विलेस्यति । व्यलासीत् । व्यलैषीत् ॥ अखलचलीत्येव ईषद्विलयः, विलयः, विलयो वर्त्तते । 'यबक्ङिति' ( ४।२।७ ) इत्येव लीनः विलीनः लीयते लेलीयते लिनाति । ङित्तिपतिवो निर्देशात् यङ्लुपि न भवति लेलेति । 'लीण् द्रवीकरणे' इति यौजादिकस्य च न भवति, विलयति ॥ २० ॥

## लो लः ॥ २१ ॥ [ सि० ४।२।१६ ]

**लारूपस्य णौ स्नेहद्रवे गम्ये लोऽन्तो वा स्यात् । घृतं विलालयति विलापयति वा । स्नेहद्रव इति किम् ? जटाभिरालापयते ॥ २१ ॥**

'**लो लः**' ला इत्यस्येति । लातेर्ली इत्यस्य च कृतात्वस्य स्नेहद्रवेऽर्थे णौ परे लोऽन्तो वा भवति । घृतं विलालयति विलापयति । घृतं व्यलीललत् । स्नेहद्रव इति किम् ? जटाभिरालापयति । श्येनो वर्त्तिकामुल्लापयते । 'लीङ्लिनोर्चाभिभवे चाच्चाकर्त्तर्यपि' ( ३।३।९० ) इत्यनेनात्वमात्मनेपदं च ॥२१॥

## पातेः ॥ २२ ॥ [ सि० ४।२।१७ ]

**णौ लोऽन्तः स्यात् । पालयति । 'धूग्प्रीगोर्नः' ( ४।२।१८ ) धूनयति । प्रीणयति ॥२२॥**

'**पातेः**' पृथग्योगाद्वेति निवृत्तम् । पातेरिति 'पांक् रक्षणे' इत्यस्य । पालयति इत्यत्र ङे अपीपलत् इति रूपम् । 'पलण् रक्षणे' इति चौरादिकेनैव सिद्धे पातेर्लोऽन्तः स्यादिति वचनम्, तिवृनिर्देशो धात्वन्तरनिवृत्त्यर्थः । 'पां पाने' 'पैं शोषणे' वा पाययति यङ्लुब्निवृत्त्यर्थश्च पापाययति ।

'**धूग्प्री०**' धूग् इति धूगट् धूगश् धूगण् वा धूनयति । ङे अदूधुनत् । प्रीग् इति प्रीग्श् प्रीगण् वा प्रीणयति । अपीप्रिणत् । यौजादिकयोर्नेच्छन्त्येके धावयति प्रापयति ॥ २२ ॥

## वो विधूनने जः ॥ २३ ॥ [ सि० ४।२।१९ ]

**वा इत्यस्य विधूननेऽर्थे जोऽन्तः स्यात् । पक्षेणोपवाजयति ॥ २३ ॥**

'**वो०**' वा इत्यस्येति वांक् इत्यस्य न तु वै इत्यस्य विधूनने वृत्त्यभावात् । न च विधूनने इति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

व्यावृत्तेर्वैयर्थ्यमिति वाच्यम्; सूत्रे ज व: इति सामान्यभणिते पक्षेणोपवाजयति । एवं पुष्पाणि प्रवाजयति । अवीवजत् । विधूनन इति किम्? ओवै केशानावापयति शोषयतीत्यर्थः । वजिनैव सिद्धे वाते रूपान्तरनिवृत्त्यर्थं वचनम् ॥ २३ ॥

## पाशाछासावेव्याह्वो यः ॥ २४ ॥ [ सि० ४।२।२० ]

**एषां सन्नानां णौ योऽन्तः स्यात् । पाययति ॥ २४ ॥**

**'पाशा०'** एषामिति । 'पां पाने' 'पैं शोषणे' । पिबन्तं पायन्तं वा प्रयुंक्ते पाययति । पातेस्तु लकार उक्तः ॥ २४ ॥ ङे पा इत्यस्य विशेषसूत्रम्

## ङे पिबः पीप्य् ॥ २५ ॥ [ सि० ४।१।३३ ]

**ण्यन्तस्य पिबतेर्ङे परे पीप्य् स्यान्न च द्विः । अपीप्यत् । शाययति । अवच्छाययति । अवसाययति । वाययति । व्याययति । ह्वाययति ॥ २५ ॥**

**'ङे पिब०'** इति निर्देशात् पातेर्न भवति अपीपलत् । लुप्तविनिर्देशात् यङ्लुप्यपि न भवति अपापयत् । ङ इति किम्? पाययति । 'शोंच् तक्षणे' श्यन्तं प्रयुङ्क्ते शाययति । 'छोंच् छेदने' अवच्छयन्तं प्रयुङ्क्ते अवच्छाययति । अवस्यन्तं प्रयुङ्क्ते अवसाययति । 'वेंग् तन्तुसन्ताने' 'व्येंग् संवरणे' 'ह्वेंग् स्पर्द्धाशब्दयोः' वयन्तं व्ययन्तं ह्वयन्तं प्रयुङ्क्ते । वाययति व्याययति ह्वाययति । ङे अशीशयत् अचिच्छयत् अवासीसयत् अवीवयत् अविव्ययत् ॥ २५ ॥ ह्वेंगो ङे विशेषमाह । सूत्रम्

## णौ ङसनि ॥ २६ ॥ [ सि० ४।१।८८ ]

**ह्वेगः सस्वरान्तस्था ङपरे सन्परे च णौ विषये य्वृत् स्यात् । श्राजभासेत्यादिना वोपान्त्यस्य ह्रस्वे अजूहवत्-अजुहावत् । 'श्वेर्वा' (४।१।८९) य्वृत् अशूशवत्-अशिश्वयत् । 'स्फायः स्फाव्' (४।२।२२) णौ । स्फावयति । 'शदिरगतौ शात्' (४।२।२३) पुष्पाणि शातयति । गतौ तु गाः शादयति ॥ २६ ॥**

**'णौ ङ०'** णौ विषये इति विषयसप्तमीविज्ञानादन्तरङ्गमपि यकारागमं बाधित्वा य्वृत् स्यात् । **'श्वे०'** (४।१।८९) य्वृत् इति । श्वयतेः सस्वरान्तस्था ङपरे सन्परे च णौ विषये य्वृद्वा भवति । विषयविज्ञानादन्तरङ्गमपि वृद्ध्यादिकं य्वृता बाध्यते । कृते च तस्मिन् वृद्धिस्तत आवादेश उपान्त्यह्रस्वत्वम् । ततो णिकृतस्य स्थानित्वात् शोर्द्वित्वं ततः पूर्वदीर्घ इति क्रमः । णाविलेव अशिश्वियत् । **'स्फा०'** (४।२।२२) स्फायतिर्णौ परे स्फाव् इत्ययमादेशः स्यात् । अभेदनिर्देशोऽन्ताधिकारनिवृत्त्यर्थः । स्फायमानं प्रयुङ्क्ते स्फावयति । **'शदि०'** (४।२।२३) शीयतेरगतावर्थे णौ परे शात् इत्ययमादेशः स्यात् । 'शद्लृं शातने' शीयमानानि पुष्पाणि प्रयुङ्क्ते शातयति । गतौ त्विति गोपालो गाः शादयति गमयतीत्यर्थः ॥ २६ ॥

## ञ्णिति घात् ॥ २७ ॥ [ सि० ४।३।१०० ]

**हन्तेर्ञ्णिति घात् स्यात् । घातयति ॥ २७ ॥**

**'ञ्णिति०'** घ्नन्तं प्रयुङ्क्ते घातयति । एवं घातः घञ् । घातकः णकः । साधुघाती णिन् । घातं घातम् ख्णम् । ञ्णिति इति किम्? हतः ॥ २७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ऊदुषो णौ ॥ २८ ॥ [ सि० ४।२।४० ]

**दुषेरुपान्त्यस्य णौ ऊत् स्यात् । दूषयति ॥ २८ ॥**

'ऊदु०' दुष्यन्तं प्रयुङ्क्ते दूषयति । प्रदूष्य गतः । णाविति किम् ? दोषो वर्त्तते । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानादिह न भवति । दोषणं दुट् क्विप् । दुषमाचष्टे दुषयति । अयं हि णिज् न दुष्धातोः सम्बन्धी, किन्तु 'णिज् बहुलं नाम्नः०' इति विहितत्वात् नामसम्बन्धी । यद्वा तस्माद्धातोरनन्तरः प्रत्ययस्तत्प्रत्ययोऽयं तु णिस्तादृशो न भवतीति पुनर्णिग्रहणं ङनिवृत्त्यर्थम् । तेन सामान्येन णौ भवति न तु ङपर एवेत्यर्थः । ह्रस्वे सति अवूदुषत् । ह्रस्वो न भवतीत्यन्ये । तन्मतसंग्रहार्थमूकारप्रश्लेषो विधेयः । अदुदूषदिति । दुष्यन्तं प्रायुङ्क्त णिग् गुणः । अनेन ऊकारः ॥ २८ ॥

## चित्ते वा ॥ २९ ॥ [ सि० ४।२।४१ ]

**चित्तकर्तृकस्य दुषेरूद्वा स्यात् । चित्तं दोषयति दूषयति वा मैत्रः । गोहः स्वरे इत्यूत्वे गूहयति ॥ २९ ॥**

'चित्ते०' सप्तम्याश्चित्तविषयस्येत्यर्थस्तस्य च चित्तकर्तृकस्येति तात्पर्यम् । चित्तग्रहणेन प्रज्ञाया अपि ग्रहणात् प्रज्ञां दूषयति दोषयति वा । अथ केषाञ्चिद्धातूनां णौ परे ह्रस्वो भवति । तान् दर्शयति ॥ २९ ॥

## घटादेर्ह्रस्वः दीर्घस्तु वा ञिणम्परे ॥ ३० ॥ [ सि० ४।२।२४ ]

**घटादेर्ह्रस्वे दीर्घस्तु वा ञिणम्परे णौ वर्तते । घटयति । अघाटि-अघटि । घाटं २। घटं २ । व्यथयति । अव्याथि-अव्यथि । व्याथं २ । व्यथं २ ॥ ३० ॥**

'घटा०' स्पष्टम् । घटादयः प्रागुक्ताः । हिडयति । अहीडि अहिडि । हीडं २ । हिडं २ । अक्षाञ्जि-अक्षञ्जि । क्षाञ्जं २ क्षञ्जं २ । अदाक्षि अदक्षि । दाक्षं २ । दक्षं २ । क्षञ्जिदक्षादीनां घटादिपाठबलादनुपान्त्यस्यापि दीर्घः । वा ञिणम्परे इत्येव ह्रस्वविकल्पे सिद्धे दीर्घवचनं हेडेरिकारस्य दीर्घत्वार्थमस्य ह्रस्वविकल्पे हि पक्षे एकारश्रुतिः स्यात् । न च वाच्यं क्षञ्जेरपि दीर्घत्वार्थं यतस्तस्यानेन ह्रस्वविकल्पसामर्थ्यादेवानुपान्त्यस्यापि ञिणति (इति) दीर्घः स्यात् । णिग् यङ् व्यवहितेपि णौ ञिणम्परे दीर्घत्वार्थं च । णिग् व्यवाये शमयन्तं प्रयुङ्क्ते णिग्, तदन्तात् ञौ णमि अशामि-अशमि । शामं २ । शमं २। यङ्व्यवाये शंशमयतेर्ञौ णमि अशंशामि-अशंशमि । शामं २ शमं २ । अत्र योऽसौ (णौ) णिर्लुप्यते यश्च यङोऽकारस्तस्य स्थानिवद्भावेन घटादीनां व्यवहितत्वादानन्तर्यं नास्तीति ञिणम्परे न स्यात् ह्रस्वविकल्पः । दीर्घग्रहणे तु दीर्घविधिं प्रति स्थानिवद्भावप्रतिषेधादानन्तर्यमेव सिद्ध्यति । ॥ ३० ॥

## कगेवनूजनैजॄष्क्नसूरञ्जः ॥ ३१ ॥ [ सि० ४।२।२५ ]

**एषां षण्णां णौ ह्रस्वो भवति । ञिणम्परे तु णौ वा दीर्घः । कगयति । जनयति । 'णौ मृगरमणे' ( ४।२।५१ ) रञ्जेर्नौ लुक् । रजयति मृगान् । अराजि-अरजि ॥ ३१ ॥**

'कगे०' कगे सौत्रो धातुः । एके कगेधातुं सर्वधात्वर्थेषु मेनिरे । यथा कगति याति भुङ्क्तेऽस्तीत्यादि । अन्ये कगे इति नोच्यते इत्यर्थे जगुः; यथा कगति न वक्तीत्यर्थः । ऐदित्त्वात् 'व्यञ्जनादेर्वोपान्त्यस्यातः' ( ४।३।४७ ) इति प्राप्ता वृद्धिः 'न श्विजागृ०' ( ४।३।४९ ) इति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बाधिता न स्यात् । अकगीदिति कगन्तं प्रयुङ्क्ते णिग् 'ञ्णिति' उपान्त्यवृद्धिः अनेन ह्रस्वः कगतीति । एवं अकागि-अकगि । कागं २ । कगं २ । 'वनूयि याचने' । उपवन्वानं प्रयुङ्क्ते उपवनयति । उपावानि उपावनि । अवानि-अवनि । उपवानं उपवनं । वानं २ । वनं २ । 'जनैचि प्रादुर्भावे' । जायमानं प्रयुङ्क्ते जनयति । अजानि अजनि । जानं २ । जनं २ । 'जृष्च् जरसि' । जीर्यन्तं प्रयुङ्क्ते जरयति । अजारि अजरि । जारं २ जरं २ । 'क्नसूच् ह्वृतिदीप्त्योः' । क्नसयति । अक्नासि अक्नसि । क्नासं २ । क्नसं २ । रञ्जेर्णौ विशेषमाह । 'णौ०' (४।२।५१) रञ्जेरुपान्त्यस्य नकारस्य णौ परे मृगाणां रमणे क्रीडायामर्थे लुग् भवति । मृगरमण इति किम् ? रञ्जयति रजको वस्त्रम् । रञ्जयति सभां नटः । अनेन लोपे 'कगेवनूजनै०' इति वा दीर्घे अराजि अरजि । राजं २ । रजं २ । नलोपे वचनस्य चरितार्थत्वात् मृगरमणाभावे नलोपाप्रवृत्तौ दीर्घो न स्यात् । अरञ्जि । रञ्जं २ ॥ ३१ ॥

## अमोऽकम्यमिचमः ॥ ३२ ॥ [ सि० ४।२।२६ ]

**कम्यमिचमिवर्जस्यामन्तस्य णौ ह्रस्वः स्यात्, ञिणम्परे तु वा दीर्घः रमयति ॥ ३२ ॥**

**'अमो०'** रमयतीति० । एवं अरामि अरमि । रामं २ । रमं २ । दमयति । अदामि अदमि । दामं २ । दमं २ । कथं सङ्क्रामयतीति ? सङ्क्रामन्तं करोतीति शत्रन्ताण्णिचि भविष्यति । अकम्यमिचम इति किम् ? कामयते । अकामि । कामं २ । आमयति । आमं २ । आचामयति । आचामि । आचामं २ ॥ ३२ ॥

अत्रादिशब्दानुवृत्तेः । **'पर्यपात्स्खदः'** (४।२।२७) आभ्यां परः स्खदेर्णौ परे ह्रस्वो भवति । ञिणम्परे तु वा दीर्घः । परिपूर्वक 'स्खदिष् खदने' परिस्खदमानं प्रयुङ्क्ते परिस्खदयति । पर्यस्खादि पर्यस्खदि । परिस्खादं २ । परिस्खदं २ । अपस्खदयति । अपास्खादि अपास्खदि । अपस्खादं २ । अपस्खदं २ । अवादप्यन्ये । अवस्खदयति । स्खदेर्घटादिपाठेन सिद्धे नियमार्थं वचनम् । अन्योपसर्गपूर्वस्य मा भूत् । प्रस्खादयति । अन्ये तु निषेधाधिकारेऽपपरिस्खद इति पठित्वा पर्यपपूर्वस्य स्खदेर्निषेधमिच्छन्ति । तन्मते परिस्खादयति । पर्यस्खादि । परिस्खादं २ । एवं अपस्खादयतीति । पर्यपाभ्यामन्यत्र प्रस्खदयति । प्रास्खादि प्रस्खदीत्यादि भवति । **'शमोऽदर्शने'** (४।२।२८) अदर्शनेऽर्थे वर्त्तमानस्य शमेर्णौ परे ह्रस्वो भवति । ञिणम्परे तु वा दीर्घः । शमयति रोगम् । निशमयति श्लोकान् । अशामि अशमि । शामं २ । शमं २ । अदर्शन इति किम् ? निशामयति रूपम् । अदर्शन एव केचिदिच्छन्ति । तेषामुदाहरणप्रत्युदाहरणयोर्विपर्ययः । **'यमोऽपरिवेषणे णिचि च'** (४।२।२९) अपरिवेषणे वर्त्तमानस्य यमेर्णिचि अणिचि च णौ ह्रस्वो भवति । ञिणम्परे तु वा दीर्घः । यमयति । अयामि-अयमि । यामं २ । यमं २ । अपरिवेषणे इति किम् ? यामयत्यतिथीन् । यामयति चन्द्रमसं यमः । परिवेषणे इत्यन्ये तन्मते उदाहरणप्रत्युदाहरणयोर्व्यत्यासः । णाविति सिद्धे अस्य णिचि वेति वचनादन्येषां णिचि न भवति । 'स्यमिण् वितर्के' स्यामयते । अस्यामि । स्यामं २ । 'शमिण् आलोचने' । निशामयति । न्यशामि । शामम् २ ॥३२॥

अथ कतिचिद्धातून् साक्षान्निर्दिशति

## मारणतोषणनिशाने ज्ञश्च ॥ ३३ ॥ [ सि० ४।२।३० ]

**एष्वर्थेषु ज्ञो णौ ह्रस्वः स्यात् । संज्ञपयति पशुम् । विज्ञपयति गुरुम् । प्रज्ञपयति शस्त्रम् ॥ ३३ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'मार०'** चकारो णिचि चेत्यस्यानुकर्षणार्थः । संज्ञपयति पशुमिति मारयतीत्यर्थः । विज्ञपयति गुरुमिति तोषयतीत्यर्थः । निशानं तेजनम् तीक्ष्णीकरणं प्रज्ञपयति शस्त्रं तीक्ष्णीकरोतीत्यर्थः । अन्ये तु निशामने इच्छन्ति । निशामनमालोचनं प्रणिधानमाहुः । अज्ञापि अज्ञपि । ज्ञापं २ । ज्ञपं २ । इह पूर्वत्र सूत्रे णिचि अणिचि णौ रूपसाम्येऽप्यर्थभेदः । एकत्र स्वार्थोऽन्यत्र प्रयोक्तृव्यापारः । अत्रादि-शब्दात् । **'चहणः शाठ्ये'** ( ४।२।३१ ) चहेश्चौरादिकस्य शाठ्ये वर्त्तमानस्य णिचि णौ परे ह्रस्वः स्यात्, ञिणम्परे तु वा दीर्घः । चहयति । चाहिष्यते चहिष्यते । अचाहि अचहि । चाहं २ चहम् २ । णित्करणात् भौवादिकस्य न भवति । चाहयति । अचाहि । चाहं २ । शाठ्य इति किम् ? अचहि । चहं २ । चहयत्येतददन्तत्वात् सिद्धम्, दीर्घार्थं वचनम् ॥ ३३ ॥ सूत्रम्

## ज्वलह्वलह्मलग्लास्नावनूवमनमोऽनुपसर्गस्य वा ॥ ३४ ॥ [ सि० ४।२।३२ ]

एषामष्टानामनुपसर्गाणां णौ ह्रस्वो वा स्यात् । ज्वलयति-ज्वालयति । अनुपसर्गस्येति किम् ? प्रज्वलयति । णिजन्तादपि णिग् । चोरयन्तं प्रयुङ्क्ते चोरयति । णिलुपि स्वरादेशत्वात् स्थानिवद्भावेनोपान्त्यत्वाभावान्न ह्रस्वः । अचुचोरत् ॥ ३४ ॥

**'ज्वल०'** एषामष्टानामिति । 'ज्वल ह्वल चलने' 'ज्वल दीप्तौ च' ज्वलन्तं ह्वलन्तं ह्मलन्तं ग्लायन्तं स्नान्तं वन्वानं वमन्तं नमन्तं प्रयुङ्क्ते ज्वलयति ज्वालयति । एवं ह्वलयति ह्वालयति । ह्मलयति ह्मालयति । ग्लपयति ग्लापयति । स्नपयति स्नापयति । वनयति वानयति । वमयति वामयति । नमयति नामयति । णिजन्तादपीत्यादि वार्त्तिकं स्पष्टम् ॥ ३४ ॥ अथ क्वचिण्णिगन्तानामात्मनेपदं नियमयति ।

## अणिक्कर्मणिक्कर्तृकाण्णिगोऽस्मृतौ ॥ ३५ ॥ [ सि० ३।३।८८ ]

अणिगवस्थायां यत्कर्म तदेव णिगवस्थायां कर्त्ता यस्य तस्माण्णिगन्तादस्मृत्यर्थात् कर्त्तर्यात्मनेपदमेव स्यात् । आरोहयते हस्ती हस्तिपकम् ॥ ३५ ॥

**'अणि०'** अस्य सूत्रस्य सविस्तरव्याख्यानं भ्वादिधातुषु विशिष्टार्थोपसर्गादेरिति कारिकामुद्दिश्यौपाधिकात्मनेपदप्रक्रमे निरूपितमस्तीति । ततो ( पृष्ठ ५९९ ) ज्ञेयम् । एवमनन्तरवक्ष्यमाणसूत्रद्वयस्यापि । अथैतेषां क्वचित् परस्मैपदं नियमयति ॥ ३५ ॥

## अणिगि प्राणिकर्तृकानाप्याण्णिगः ॥ ३६ ॥ [ सि० ३।३।१०७ ]

अणिगवस्थायां यः प्राणिकर्तृकोऽकर्मकश्च धातुस्तस्माण्णिगन्तात्परस्मैपदमेव स्यात् । आसयति चैत्रम् ॥ ३६ ॥ [ पृष्ठ ६०२ ]

## चल्याहारार्थेङ्बुधयुधप्रुद्रुस्रुनशजनः ॥ ३७ ॥ [ सि० ३।३।१०८ ]

चल्याहारार्थेभ्य इङादिभ्योऽष्टाभ्यश्च णिगन्तेभ्यः परस्मैपदमेव स्यात् । चलयति । घटादित्वात् ह्रस्वः । इत्यादि ॥ ३७ ॥ [ पृष्ठ ६०३ ]

इति महोपाध्यायश्रीकीर्तिविजयगणिशिष्योपाध्यायश्रीविनयविजयगणिविरचितायां
हैमलघुप्रक्रियायां णिगन्तप्रक्रिया समाप्ता ।

**'अणिगि०'** 'चल्या०' स्पष्टम् । इत्यादीनि ।

एवं णिगन्तधातूनां प्रक्रिया प्रतिपादिता । अथ सन्नन्तधातूनां लेशतः सा निरूप्यते ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अथ सन् प्रक्रिया ।

### तुमर्हादिच्छायां सन्न तत्सनः ॥ १ ॥ [ सि० ३।४।२१ ]

**योधातुरिषेः कर्म इषिणैव च समानकर्तृकः स तुमर्हस्तस्मादिच्छायामर्थे सन् वा स्यात् । नत्विच्छासन्नन्तात् । पठितुमिच्छति सागमे इडागमे च ॥ १ ॥**

'**तुम०**' तुमर्हादिति किम् ? अकर्मणोऽसमानकर्तृकाच्च मा भूत् । गमनेनेच्छति । भोजनमिच्छति मैत्रस्य । इच्छायामिति किम् ? भोक्तुं व्रजति । अतत्सन इति किम् ? चिकीर्षितुमिच्छति सन्नन्तात्सन्न भवति । तद्ग्रहणं, किम् ? जुगुप्सिषते; अत्र स्वार्थिकसन्नन्तात् सन् । सनोऽकारः किम् ? अर्थान् प्रतीषिषति । नकारः सन् ग्रहणेषु विशेषणार्थः । कथं नदीकूलं पिपतिषति श्वा मुमूर्षति ? पतितुमिच्छतिमर्त्तुमिच्छति इति वाक्यवदुपमानाद्भवति ॥ १ ॥ अत्रोपयोगिसूत्रम् ।

### सन्यङश्च ॥ २ ॥ [ सि० ४।१।३ ]

**सन्नन्तस्य यङन्तस्य चाद्य एक स्वरोंऽशो द्विः स्यात् ॥ २ ॥**

'**सन्य०**' स्पष्टम् ॥ २ ॥ पुनरप्युपयोगिसूत्रम् ।

### सन्यस्य ॥ ३ ॥ [ सि० ४।१।५९ ]

**द्वित्वे पूर्वस्यातः सनि परे इः स्यात् । नाम्यन्तस्थेति षत्वे, पिपठिषति ४ । अपिपठिषीत् ५ । पिपठिषाञ्चकार ६ । पिपठिष्यात् ७ । पिपठिषिता ८ । पिपठिषिष्यति ९ । अपिपठिषिष्यत् १० । स्वरादेर्द्वितीयः ( ४।१।४ ) इति द्वित्वे, अटितुमिच्छति अटिटिषति । घस्लृ-सनद्यतनीघञचलि । ( ४।४।१७ ) अत्तुमिच्छति जिघत्सति । अजिघत्सीत् ॥ ३ ॥**

'**सन्य०**' यथा पिपक्षति पिपासति । इणः सनि 'स्वरादेर्द्वितीय' इति सकारस्य द्वित्वेऽनेन पूर्वस्य इत्वे प्रतीषिषति । ह्रायकमिच्छति ह्रायकीयति । ह्रायकीयितुमिच्छति जिह्रायकीयिषति । स्वरादि-धातूनां विशेषमाह । '**स्वरा०**' (४।१।४) अयमर्थः स्वरादे( र्धातो )र्द्वित्वभाजो द्वितीयोंऽश एकस्वरो द्विर्भवति । नत्वाद्यः । अटिटिषति । एवं अश्नातुमिच्छति अशिशिषति । प्राक्तु स्वरे स्वरविधे-रित्येव अट् णिग् अट्य० ङे टिटि इति द्वित्वे 'णेरनिटि' ( ४।३।८३ ) इति णिग्लोपे आटिटत् । अत्र णिग्लोपात् प्रागेव द्वितीयस्यावयवस्य द्वित्वम् । एवमाशिशत् । प्रार्णुनाव प्रोर्णुनविषति; अत्र वृद्धिगुणाभ्यां प्राग् द्वित्वम्, द्वित्वरूपे परे कार्ये णत्वशास्त्रस्यासत्त्वात् द्वित्वे कृते णत्वम् । अरिरिषति अरिरीषतीत्यत्र क्विटः कार्यित्वं न निमित्तत्वम् ततो द्वित्वनिमित्तस्य स्वरादिप्रत्ययस्याभावात् प्राग्गुणलक्षणः स्वरविधिरेव । 'ऋंकू गतौ' ऋ प्रापणे वा । अर्त्तुमिच्छति सनि 'ऋस्मिपूङ्जशौ०' ( ४।४।५८ ) इतीटि गुणे ततो द्वितीयस्य द्वित्वे अरिरिषति । 'ऋश् गतौ' अरीतुमिच्छति 'इवृध०' ( ४।४।४७ ) इत्यनेन इटि ततो गुणे द्वित्वे 'वृतो नवा०' ( ४।४।३५ ) इति दीर्घे अरिरीषति ।

द्वित्वप्रक्रमात् द्वित्वे विशेषा उच्यन्ते '**नाम्नो द्वितीयाद्यथेष्टम्**' ( ४।१।७ ) स्वरादेर्नाम-धातोर्द्वित्वे द्वितीयादारभ्यैकस्वरोऽवयवो यथेष्टं द्विरुच्यते । यो य इष्टो यथेष्टम् । 'योग्यतावीप्सा०' ( ३।१।४० ) इत्यव्ययीभावः । अशिश्वीयिषति अश्वीयियिषति अश्वीयिषिषति । '**अन्यस्य**' ( ४।१।८ ) [ **स्वरादेरन्यस्य** ] व्यञ्जनादेर्नामधातोर्द्वित्वे एकस्वरोऽवयवो यथेष्टं प्रथमो द्वितीयतृतीया-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दिर्वान्यतमो द्विरुच्यते। पुपुत्रीयिषति पुतित्रीयिषति पुत्रीयिषिषति पुत्रीयियिषति। पुत्रीयन्तं प्रायुङ्क्त अपुपुत्रीयत् अपुतित्रीयत् अपुत्रीयियत्। **पुनरेकेषाम्** (४।१।१०) एकेषामाचार्याणां मते द्वित्वे कृते पुनर्द्वित्वं स्यात्। सुसोषुपिषते। भृशं पुनः पुनर्वा स्वपिति सोषुप्यते। भृशाद्यर्थे यङ् 'स्वपेर्यङ्‌ङे च' (४।१।८०) इति य्वृत्। द्वित्वे पूर्वस्य गुणे सोषुपितुमिच्छति सन्। अत इत्यनेन विषयेऽस्य लोपात् स्वरस्य परे इत्यनेन स्थानित्वाभावे यो लुक् सिद्धः। प्राणिणिषयतेर्ङे प्राणिणिषत्। 'द्वित्वेप्यन्ते०' (२।३।८१) इति द्वित्व इति वचनात् द्वयोरेव णत्वम्। न तृतीयस्य। बुभोभूयिषते। एकेषामिति किम्? सोषुपिषते। प्राणिणिषत्। बोभूयिषते। **'यिः सन्वेर्ष्यः'** (४।१।११) ईर्ष्यतेर्द्वित्वे यिः सन्वा द्विः स्यात्। 'सूक्ष्यं ईक्ष्यं ईर्ष्य ईर्ष्यार्थाः। ईर्ष्यियिषति। ऐर्ष्यियषत्। ईर्ष्यिषिषति। ऐर्ष्यिषिषत्। अर्त्तेर्विशेषमाह। **'घस्लृ०'** (४।४।१७) सूत्रमदादिप्रकरणे (पृष्ठ ६३१) व्याख्यातम्॥ ३॥ ग्रहादीनां विशेषमाह।

## ग्रहगुहश्च सनः॥ ४॥ [ सि० ४।४।५९ ]

**आभ्यामुवर्णान्ताच्च विहितस्य सन आदिरिट् न स्यात्॥ ४॥**

**'ग्रह०'** उवर्णान्ताच्चेति यथा रुरूषति तुतूषति लुलूषति पुपूषति। यौतेस्तु 'इवृध०' (४।४।४७) इत्यादिना इड्विकल्पः। यियविषति युयूषति। गुहेरिटमपीच्छत्यन्यः। 'जुगूहिषन्मत्तगजोऽभ्यधावत'॥ ४॥ ग्रहधातोः सन्युपयोगि सूत्रम्।

## रुदविदमुषग्रहस्वपप्रच्छः सन् च॥ ५॥ [ सि० ४।३।३२ ]

**एभ्यः क्त्वा सन् च किद्वत्स्यात्। कित्त्वाद्ग्रहव्रश्चेति य्वृति, हो धुट् पदान्ते इति हस्य ढत्वे, गडदबादेरिति घत्वे, जिघृक्षति॥ ५॥**

'रुद०' प्रक्रिया स्पष्टा॥ ५॥ गुहधातोः सन्युपयोगिसूत्रम्

## उपान्त्ये॥ ६॥ [ सि० ४।३।३४ ]

**नामिन्युपान्त्ये सति धातोः सन्ननिट् किद्वत् स्यात्। जुघुक्षति। बिभित्सति॥ ६॥**

**'उपा०'**॥ ६॥ उवर्णान्तानां सन्युपयोगिसूत्रम्

## नामिनोऽनिट्॥ ७॥ [ सि० ।४।३।३३ ]

**नाम्यन्तस्य धातोरनिट् सन् किद्वत् स्यात्। बुभूषति। रुरुदिषति विविदिषति। मुमुषिषति। स्वपेर्यङ्‌ङे चेति य्वृत्, स्वापयितुमिच्छति सुषुप्सति॥ ७॥**

**'नामि०'** स्पष्टम्। स्वपधातोः 'रुदविद०' (४।३।३२) इति सनः कित्त्वे 'स्वपेर्यङ्‌ङे च' (४।१।८०) इति य्वृत्। एवं पिपृच्छिषतीत्यत्र 'ग्रहव्रश्च०' (४।१।८४) इति य्वृत्। रुदविदमुषो 'वौ व्यञ्जनादेः सन् चाय्वः' (४।३।२५) इति विकल्पे, ग्रहेस्तु 'क्त्वा' इति प्रतिषेधे प्राप्ते वचनम्। स्वपिप्रच्छोः सन्नर्थमेव। क्त्वा हि किदेव॥ ७॥ णिगन्तस्य स्वपेः सनि विशेषमाह

## स्वपो णावुः॥ ८॥ [ सि० ४।१।६२ ]

**स्वपेर्णौ सति द्वित्वे पूर्वस्य उः स्यात्। सुष्वापयिषति॥ ९॥**

३२ **'स्वपो०'** णौ सतीति। सन्नीति निवृत्तम् कार्यान्तरविधानात्। सुष्वापयिषतीति। एवं स्वपेर्णौ

Jain Education International For Personal & Private Use Only www.jainelibrary.org

णके क्यनि, णौ ङे च स्वापयतीति स्वापकस्तमिच्छति स्वापकीयति । स्वापकीयन्तं प्रायुङ्क्त णौ ङे द्वित्वेऽनेन पूर्वस्य उत्वे असुष्वापकीयत् । स्वापेः क्विबन्तात्कर्त्तुः क्विपि यङ् स्वापयतीति स्वाप् । स्वाप् इवाचरतीति स्वापति । भृशं पुनः पुनर्वा स्वापति सोष्वाप्यते । अन्ये तु णौ सति द्वित्वनिमित्तानन्तर्य एवेच्छन्ति । स्वापकीयतेः सनि सिष्वापकीयिषति । णाविति किम् ? स्वपितीति स्वापक इति णकान्तात् क्यनि सनि च सिष्वापकीयिषति । स्वपो णाविति किम् ? स्वापं चिकीर्षति सिष्वापयिषति । अत्र न स्वपेर्णिः, घञा व्यवधानात् । स्वपो णौ सति द्वित्व इति किम् ? भृशाद्यर्थे यङ्लुप्, स्वपेर्यङ्लुप्यपि य्वृत्, ततो द्वित्वम् सोषुपतं प्रयुङ्क्ते णिग् सोषोपयति, सोषोपयितुमिच्छति सन् 'णिस्तोरेव०' (२।३।३७) इति षत्वम् । सोषोपयिषति । अत्र यङ्लुबन्तात् द्वित्वे सति णिः, न तु णौ सति द्वित्वम् । ननु स्वापकीयन्तं प्रायुङ्क्त अस्वापकीयदित्यादौ स्वपो णावित्युकारः कथं नेत्यत्रोच्यते ? । नायं स्वपेरकारः किन्तु णकप्रत्ययस्येति ॥ ८ ॥

केषाञ्चित् प्रक्रियाविशेषमाह

## स्वरहनूगमोः सनि धुटि ॥ ९ ॥ [ सि० ४।१।१०४ ]

स्वरान्तस्य हन्गमोश्च धुडादौ सनि दीर्घः स्यात् । 'जेर्गिः सन्परोक्षयोः' ( ४।१।३५ ) जिगीषति । 'चेः किर्वा' ( ४।१।३६ ) चिचीषति चिकीषति । स्तोतुमिच्छति तुष्टूषति । कृगो दीर्घे सति इर् चिकीर्षति । हन्तुमिच्छति सनि द्वित्वे अडे हिहनेति घत्वे दीर्घे च जिघांसति ॥ ९ ॥

'स्वर०' स्पष्टम् । कृगो दीर्घे सनि इर् इति 'नामिनोऽनिट्' ( ४।३।३३ ) इति सनः कित्वात् 'ऋतां क्ङितीर्' ( ४।४।११६ ) इति इर् । इङादित्रयस्य विशेषमाह ॥ ९ ॥

## सनीङश्च ॥ १० ॥ [ सि० ४।४।२५ ]

इङ इणिकोश्चाज्ञाने सनि गमुः स्यात् । अज्ञान इति इण एव विशेषणं नान्ययोरसम्भवात् ॥ १० ॥

'सनी०' स्पष्टम् ॥ १० ॥ सन्नन्तस्यात्मनेपदादिव्यवस्थामाह सूत्रम् ।

## प्राग्वत् ॥ ११ ॥ [ सि० ३।३।७४ ] सनः

सनः पूर्वो यो धातुस्तस्मादिव सन्नन्तात् कर्त्तर्यात्मनेपदं स्यात् । गमोऽनात्मने इतीड्निषेधः । इङ् अधिजिगांसते विद्याम् । इण् जिगमिषति ग्रामम् । इंक् मातुरधिजिगमिषति । ज्ञाने त्विणः प्रतिषियिषति । "णौ सन्ङे वेति" वा इङो गादेशे अधिजिगापयिषति अध्यापिपयिषति ॥११॥

'प्राग्व०' सनः पूर्वो यो धातुरिति अयं भावः । यत्पूर्वस्य धातोरनुबन्धेनोपपदेनार्थविशेषेणात्मनेपदं दृष्टम्, तत्सन्नन्तादपि दिश्यते । अनुबन्धेन 'शीङ् शेते' शिशयिषते । एधि एधते एदिधिषते । लोलूयते लोलूयिषते । श्येनायते शिश्येनायिषते । उपपदेन निविशते, निविविक्षते ॥ अर्थविशेषेण शास्त्रस्य क्रमते बुद्धिः, विक्रंसते उभयेन, आक्रमते चन्द्रः आचिक्रंसते । यत्पुनः सप्रत्यय ( धातु ) निमित्तं तन्नातिदिश्यते शिशत्सति मुमूर्षति । अत्र हि न शदिम्रियती एव निमित्ते, किं तर्हि ? शिदाशीरद्यतन्योऽपि । अनुबन्धादिनिमित्तमपि यद्विशेषविधानबाधया प्राङ् दृष्टं तन्नातिदिश्यते । यथानुकरोति अनुचिकीर्षति । तिजादीनां तु अर्थविशेषेषु केवलानामप्रयोगात्सन्नन्तसमुदायार्थमेवानुबन्धविज्ञानम् । तेन तितिक्षते जुगुप्सते मीमांसते इत्यादौ प्राग् दृष्टमप्यात्मनेपदमनुबन्धसामर्थ्याद्भवति । यथा कुस्मिङ् चित्रङ् महीङ् हृणीङ् । अनुबन्धो णिच् क्यन् यगन्त-



Jain Education International For Personal & Private Use Only www.jainelibrary.org

समुदायार्थः विकुत्सयते चित्रीयते महीयते हृणीयते । अवयवे कृतं (३।) लिङ्गं समुदायस्य विशेषकं भवति, यं समुदायं सोऽवयवो न व्यभिचरति । यथा गोः सक्थनि कर्णे वा कृतं चिह्नं गोरेव विशेषकं भवति न गोमण्डलस्य । सन्नन्तं च समुदायं तिजादयोऽर्थविशेषेषु न व्यभिचरन्ति, णिगन्तं पुनर्व्यभिचरन्ति । ननु सन्नन्तमपि व्यभिचरति तेजयति गोपायति मानयति । नैवम्, अर्थविशेषेषु न व्यभिचार इत्युक्तत्वात् । 'गुप्तिजो गर्हाक्षान्तौ सन्' (३।४।५) इति अधिजिगांसते विद्यामिति । एवं जिगांस्यते । संजिगांसते । समेतुमिच्छति अनेन गम्वादेशे गम्लं गतावित्यनेन सह इणादेशस्य गमेरभेदोपचाराद्गम्लकार्यमात्मनेपदं प्राग्वदित्यनेन स्यादन्यथा सनः प्रागात्मनेपदादर्शनान्न स्यात् । उपचारे तु 'समो गमृच्छी'ति दृष्टम् । अधिजिगांस्यते माता । 'स्वरहन्०' (४।१।१०४) इति सूत्रे गम्विति इणि किङादेशस्य गमेर्ग्रहणाद्गच्छतेर्दीर्घो न भवति । संजिगंसते वत्सो मात्रा । इङा-देशस्यैव गमेरिच्छन्त्येके तन्मते इण् जिगंसते संजिगंसते । 'इंक्' अधिजिगंस्यते मातेत्येव भवति । सनीति किम् ? स्तुतः । धुटीति किम् ? यियविषति । प्रथमं गुणं बाधित्वा दीर्घे सकृद्गत इति प्रवर्त्तते इति रूपं न सिद्ध्यति । एवं जिगमिषतीत्यादावपि सनो धुडादित्वाभावान्न दीर्घः । सन्परे णौ विशेषमाह । (पृष्ठ ७८५) **'णौ सन् ङे वा'** (४।४।२७) सन्परे ङपरे च णौ इङो गादेशो वा भवतीति भावः । ङपरे णावपि गादेशो वा अध्यजीगपत् अध्यापिपत् । गादेशाभावे 'णौ क्रीजीङः' (४।२।१०) इत्यात्वम् । णाविति किम् ? अधिजिगांसते । सन् ङे इति किम् ? अध्यापयति ॥ ११ ॥ केषाञ्चिद्विशेषमाह ।

## वौ व्यञ्जनादेः सन्चाऽय्वः ॥ १२ ॥ [ सि० ४।३।२५ ]

वौ उदित्युपान्त्ये सति व्यञ्जनादेः धातोः परः क्त्वा सन् च सेटौ किद्वा स्याताम् न तु य्वन्तात् । दिद्युतिषते-दिद्योतिषते । लिलिखिषति-लिलेखिषति । अय्व इति किम् ? दिदेविषति । वृञ्चः स्यसनोरित्यात्मनेपदविकल्पे, न वृञ्च इति परस्मैपदे इड्निषेधे च, विवृत्सति-विवर्तिषते । कृतचृतनृतेतीड्विकल्पे निनृत्सति निनर्तिषति ॥ १२ ॥

**'वौ०'** वौ इति उकारे इकारे च उपान्त्ये सतीत्यर्थः । सनः कित्त्वे गुणाभावः । पक्षे गुणः । क्त्व उदाहरणानि वक्ष्यन्ते । लिलेखिषतीति । एवं मुमुदिषते मुमोदिषते । शिश्वितिषते शिश्वेतिषते । वाविति किम् ? वर्त्तित्वा विवर्त्तिषते । व्यञ्जनादेरिति किम् ? उषित्वा उषिषिषति । सेडित्येव । भुक्त्वा बुभुक्षते । देवित्वा दिदेविषति । विश्च य् च वियू, वियिवाचरति क्विप् तस्य लुक् वेयनम् । पूर्वं (क्त्वायां) वेयित्वा वेयितुमिच्छति विवेयिषतीति यकारान्तस्य क्त्वासनोः कित्त्वाभावे उदाहरणम् । 'वृञ्चः स्यसनोः' (३।३।४५) इत्यादि व्यक्तम् । 'कृतचृत०' (४।४।५०) इति चिकृत्सति चिकर्तिषति चिचृत्सति चिचर्तिषति । निनृत्सति २ । चिच्छर्दिषति २ । तितृत्सति तितर्दिषति । विशेषतोऽस्य व्याख्यानं नृतैच् धातुप्रकरणे (पृष्ठ ६७५) उक्तमिति ततो ज्ञेयम् ॥ १२ ॥ पुनः केषाञ्चिद्विशेषमाह ।

## इवृधभ्रस्जदम्भश्रियूर्णुभरज्ञपिसनितनिपतिवृद्दरिद्रः सनः ॥ १३ ॥ [ सि० ४।४।४७ ]

इवन्तादृधादिभ्य ऋदन्तेभ्यो दरिद्रश्च सन आदिरिड् वा स्यात् । दिव् । अनुनासिके च च्छ्वः शूट् (४।१।१०८) दुद्यूषति-दिदेविषति ॥ १३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इवृ० इवन्तो दिव्धातुः । 'अनुनासिके च०' इति अनुनासिकादौ कौ धुडादौ च प्रत्यये धातोर्वकारस्य ऊट् स्यात्, ततः सनो धुडादित्वात् वकारस्य ऊत्त्वम् । ततो द्यू द्यू इति द्वित्वे दुद्यूषति । इडागमपक्षे सनो धुडादित्वाभावादूत्वाभावे वकारान्तत्वा'द्वौ व्यञ्जनादे'रिति सनः कित्त्वाभावेन गुणे दिदेविषति । एवं षिवू सुस्यूषति सिसेविषति । ष्ठिवू तुष्ठ्यूषति तिष्ठेविषति ॥ १३ ॥ 'ऋधूट् वृद्धौ' । 'ऋधौचू वृद्धौ वा' । अर्द्धितुमिच्छति । सनि सूत्रम्

## ऋध ईर्त् ॥ १४ ॥ [ सि० ४।१।१७ ]

**ऋधः सादौ सनि ईर्त् स्यात्, न चास्य द्विः । ईर्त्सति अर्दिधिषति । बिभर्जिषति-बिभ्रक्षति । भर्जादेशे बिभर्क्षति-बिभर्जिषति ॥ १४ ॥**

'**ऋध०**' सादाविति किम् । अर्दिधिषति; अत्र सनः सादित्वाभावात् ईर्तादेशाभावः । 'भ्रस्जींत् पाके' भ्रष्टुं भर्ष्टुं वा इच्छतीति सनि चातूरूप्यम् ॥ १४ ॥ 'दम्भूट् दम्भे' । दम्भितुमिच्छति सनि सूत्रम्

## दम्भो धिप्धीप् ॥ १५ ॥ [ सि० ४।१।१८ ]

**दम्भेः सि सनि धिप्धीपौ स्याताम् । न च द्विः । धिप्सति-धीप्सति । दिदम्भिषति । शिश्रीषति-शिश्रयिषति ॥ युः सौत्रो धातुः । युयूषति ॥ १५ ॥**

'**दम्भो०**' सुगमम् । 'श्रिग् सेवायाम्' । श्रयितुमिच्छति सनि अनेनेड्विकल्पे द्वैरूप्यम् । 'युग्श् बन्धने' योतुमिच्छति 'युक् मिश्रणे' इति वा यवितुमिच्छति । सनि इडभावपक्षे स्वरहन्गमोरिति दीर्घे युयूषति ॥ १५ ॥ पक्षे युयु इति द्वित्वे सूत्रम्

## ओर्जान्तस्थापवर्गेऽवर्णे ॥ १६ ॥ [ सि० ४।१।६० ]

**द्वित्वे पूर्वस्य उतोऽवर्णान्ते जान्तस्थापवर्गे परे सनि इः स्यात् । यियविषति ॥ १६ ॥**

'**ओर्जा०**' पूर्वस्य उतः उकारान्तस्येत्यर्थः । इः स्यादिति इकारोऽन्तादेशः स्यादित्यर्थः । क्रमेणोदाहरणानि । 'जुं' सौत्रो धातुः । जिजावयिषति यियविषति यियावयिषति रिरावयिषति लिलावयिषति पिपविषति पिपावयिषति बिभावयिषते । मिमावयिषति । ओरिति किम् ? पापच्चिषते । जान्तस्थापवर्गे इति किम् ? अवतुतावयिषति जुहावयिषति । अवर्णे इति किम् ? बुभूषति । सनीत्येव लुलाव । ननु ण्यन्तानां वृद्ध्यवादेशयोः कृतयोर्द्वित्वे सति पूर्वस्योकारान्तता न सम्भवति । तत्र 'सन्यस्य' ( ४।१।५९ ) इत्यनेनैव सिद्धे किं गुरुणा सूत्रेण ? एतावत्तु विधेयम् । उः पयेऽवर्णे इति पिपविषति यियविषतीत्यत्र पूर्वस्येकारान्तत्वं यथा स्यात् । सत्यम् । णौ यत्कार्यं कृतं तत्सर्वं स्थानिवद्भवतीति न्यायज्ञापनार्थं वचनम् । तेन पुस्फारयिषति चुक्षावयिषति । श्वयन्तं प्रयुङ्क्ते णिग् 'श्वेर्वा' ( ४।१।८९ ) इति णिविषये य्वृत् श्वावयितुमिच्छति शुशावयिषतीत्याद्यपि सिद्धम् । एतच्च ज्ञापकं जान्तस्थापवर्गवदन्यत्राप्यवर्ण एव द्रष्टव्यम् । तेनाचिकीर्तदित्यत्रेकारवतो द्विवचनं सिद्धम् । प्रकृते तु यियविषतीति सिद्धम् ॥ १६ ॥ अत्रायं विशेषः ।

## श्रुस्रुद्रुप्रुप्लुच्योर्वा ॥ १७ ॥ [ सि० ४।१।६१ ]

**शिश्रावयिषति शुश्रावयिषति । प्रोर्णुनूषति प्रोर्णुनविषति । भृगः स्वरहनेति दीर्घे ओष्ठ्यादुर् बुभूर्षति-बिभरिषति ॥ १७ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'श्रुस्रु०' एषां षण्णां सनि परे द्वित्वे सति पूर्वस्योकारस्यान्तस्थायामवर्णान्तायां परत इकारान्तादेशो वा स्यात् । 'श्रुंट् श्रवणे' । णिग् श्रावयितुमिच्छति शिश्रावयिषति शुश्रावयिषति । 'इं दुं द्रुं स्रुं गतौ' । 'प्रुङ् प्लुङ् गतौ' । स्रावयितुं द्रावयितुं प्रावयितुं च्यावयितुमिच्छति सनि सिस्रावयिषति सुस्रावयिषति दिद्रावयिषति दुद्रावयिषति पिप्रावयिषति पुप्रावयिषति । चिच्यावयिषति चुच्यावयिषति । वचनादेकेनावर्णेनान्तस्थाया व्यवधानमाश्रीयते । अवर्ण इत्येव । शुश्रूषति । ओरित्येव सोस्रविषति; कुटिलार्थे यङ्लुबन्तस्य सनि प्रयोगः । अथ प्रकृतं 'ऊर्णुगक् आच्छादने' । प्रोर्णवितुमिच्छति सनि इडभावपक्षे प्रोर्णुनूषति । इडागमे 'वोर्णोः' (४।३।६०) इति इटो ङित्त्वविकल्पे च त्रैरूप्यम् । प्रोर्णुनविषति । प्रोर्णुनुविषतीति । 'इवृध०' (४।४।४७) इति सूत्रे भर इति 'भृंग् भरणे' इत्यस्य शवा निर्देशः । स च यङ्लुपो बिभर्त्तेश्च निवृत्त्यर्थस्तस्य बुभूर्षतीत्येकमेव रूपम् । बिभर्त्तेरपीच्छन्त्येके । इडभावपक्षे गुणमपि बिभर्षति बिभरिषति । तन्मतसङ्ग्रहार्थं कृतगुणस्य भृगो निर्देशस्तेन इडभावपक्षेऽपि गुणो भवति । सूत्रे गुणनिर्देशात् 'नामिनोऽनिट्' (४।३।३३) इति सनः कित्त्वेऽपि गुणः ॥ १७ ॥ ज्ञपीति । अत्र विशेषसूत्रम् ।

## ज्ञप्यापो ज्ञीपीप् न च द्विः ॥ १८ ॥ [ सि० ४।१।१६ ]

**ज्ञपेरापेश्च सिसनि यथासङ्ख्यं ज्ञीपीपौ स्याताम् । ज्ञीप्सति । जिज्ञपयिषति ॥ १८ ॥**

'ज्ञप्या०' स्पष्टम् । ज्ञपीतिकृतह्रस्वस्य निर्देशात् ज्ञापेर्जिज्ञापयिषतीत्येव भवति । सनीति 'वन षण भक्तौ' 'शणूयी दाने' इत्येतयोरुभयोरपि ग्रहणम् । सनितुमिच्छतीति सन् ॥ १८ ॥ अत्रोपयोगिसूत्रम्

## सनि ॥ १९ ॥ [ सि० ४।२।६१ ]

**सनेर्धुडादौ सन्याः स्यात् । सिषासति सिसनिषति ॥ १९ ॥**

'सनि' यद्यप्येतत्सूत्रं बृहद्वृत्तौ 'आः खनिसनिजनः' (४।२।६०) इति सूत्रादनुवृत्तानां खनादीनां धुडादौ सनि परतोऽन्तस्यात्वं भवतीति व्याख्यातम् । तथापि खनिजनोरिटा भवितव्यमिति धुडादिः सन्न भवतीति सनिरेवात्र सूत्रेऽवशिष्यते इति सुष्ठु व्याख्यातमत्र सनेर्धुडादौ सन्याः स्यादिति । इडभावे सिषासतीति । अत्र षत्वभूतः सन्नास्तीति 'णिस्तोरेवेति' नियमाभावात् प्रथमसकारस्य 'नाम्यन्तस्था०' (२।३।१५) इति षत्वं भवति । इवृधेति इडागमे सिसनिषतीति । नन्वत्र नाम्यंतस्थेति षत्वं कुतो न स्यादित्यत्र नियमसूत्रमाह ॥ १९ ॥

## णिस्तोरेवाऽस्वद्स्विद्सहः षणि ॥ २० ॥ [ सि० २।३।३७ ]

**स्वदादिवर्जानां ण्यन्तानां, स्तोरेव च सकारस्य नाम्यादेः परस्य षत्वभूते सनि परे षो भवति । नान्येषामिति षत्वं न भवति ॥ २० ॥**

'णिस्तो०' ण्यन्तानां यथा 'षिवूच् उतौ' सिषेवयिषति । सुष्वापयिषति । 'षिधू गत्याम्' सिषेधयिषति । स्तु तुष्टूषति । स्वदादिपर्युदासः किम् ? 'ष्वदि स्वादि स्वदि आस्वादने' सिस्वादयिषति । 'ष्विदाच् गात्रप्रक्षरणे' सिस्वेदयिषति । 'षहि मर्षणे' सिसाहयिषति । स्तौतिसाहचर्यात्स्वदादिपर्युदासेन सदृशग्रहणाच्च ण्यन्तानामपि षोपदेशानामेव ग्रहणम् । तथा च कृतत्वात् सकारस्य 'नाम्यन्तस्थाकवर्ग०' (२।३।१५) इति सूत्रेणैव सिद्धे नियमार्थं वचनम् । णिस्तोरेव षणि षत्वं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नान्यस्य । तेनेह न भवति । 'षुंगृट् अभिषवे' सुसूषति । 'षिचींत् क्षरणे' सिसिक्षति सिसेविषति । एवकारः षण्येव णिस्तोरिति विपरीतनियमनिवृत्त्यर्थस्तेनेहापि भवति । असीषिवत् तुष्टाव । षणीति किम् ? सिषेव सुष्वाप । षत्वं किम् ? सुषुप्सति । तिष्ठासति । नकारः किम् ? परोक्षासे ङ्यति- सुषुपिषे । कथं प्रतीषिषति अधीषिषति ? षणिनिमित्ते धातोः षत्वनियम उक्तः, इह तु सन एव द्विरुक्तस्य षत्वं न धातोरिति न प्रतिषेधः । सोषुपिषते सेषिविषते इत्यादौ तु यङि द्वित्वं पश्चात् सन्निति न प्रतिषेधः । येषां तु दर्शने द्वित्वेऽपि पुनः सनि द्विरुक्तिस्तन्मते सुसोषुपिषते इत्यत्र षणि परे सस्य षत्वं न भवत्येव ॥ २० ॥ तनीति '**तनूयी** विस्तारे' तनितुमिच्छति । सनि विशेषसूत्रम्

## तनो वा ॥ २१ ॥ [ सि० ४।१।१०५ ]

**तनो धुडादौ सनि दीर्घो वा स्यात् । तितांसति तितंसति तितनिषति ॥ २१ ॥**

'**तनो०**' स्पष्टम् । इडभावपक्षे अनेन दीर्घविकल्पे द्वैरूप्यम् । इडागमे च सनो धुडादित्वा-भावान्न दीर्घः ॥ २१ ॥ पतीति '**पत्लृ** पथे गतौ' पतितुमिच्छति । सनि विशेषसूत्रम्

## रभलभशकपतपदामिः ॥ २२ ॥ [ सि० ४।१।२१ ]

**एषां स्वरस्य सि सनि इः स्यान्न च द्विः । पित्सति पिपतिषति । प्राबुवूर्षति प्राविवरिषति २ । वुवूर्षते विवरिषति २ । तितीर्षति तितरीषति २ । दिदरिद्रासति दिदरिद्रिसति ॥ २२ ॥**

'**रभ०**' व्यक्तम् । 'रभि राभस्ये' आङ्पूर्वकः आरब्धुमिच्छति आरिप्सते । 'डुलभिंष् प्राप्तौ' लब्धुमिच्छति लिप्सते । शक शिक्षति । पत पित्सति । पद पित्सते । सीत्येव पिपतिषति । बहुवचनं शकिंच्शक्लृंटोरुभयोरपि परिग्रहार्थम् । वृत इति 'वृंग्ट् वरणे' 'वृंङ्श् संभक्तौ' इत्यनयोर्दीर्घ-ॠकारान्तस्य च ग्रहणम् । इडभावपक्षे 'स्वरहनगमोः०' ( ४।१।१०४ ) इति दीर्घे 'नामिनोऽनिट्' ( ४।३।३३ ) इति सनः कित्त्वे 'ओष्ठ्यादुर्' ( ४।४।११७ ) प्राबुवूर्षति । इडागमपक्षे 'वृतो नवानाशी०' ( ४।४।३५ ) इति दीर्घविकल्पे द्वैरूप्यम् । 'वृङ्श् संभक्तौ' इत्यस्यात्मनेपदित्वात् वुवूर्षते इत्यादि । दीर्घॠकारान्त'तॄ प्लवनतरणयोः' तरीतुमिच्छति सनि इडभावपक्षे 'नामिनोऽनिट्' इति सनः कित्त्वे 'ॠतां क्ङितीर्' ( ४।४।११६ ) तितीर्षतीति । इडागमपक्षे 'वृतो नवा०' इति इटो दीर्घविकल्पे द्वैरूप्यम् । 'दरिद्रांक्' इति दरिद्रितुमिच्छतीति सनि इड्विकल्पः इति ॥ २२ ॥

'इवृध०' ( ४।४।४७ ) इति सूत्रं समर्थितम् ॥ केषाञ्चिद्विशेषमाह ।

## ऋस्मिपूङञ्जशौकॄगॄदृधृप्रच्छः ॥ २३ ॥ [ सि० ४।४।४८ ]

**एभ्यो दशभ्यः परस्य सन आदिरिट् स्यात् । अरिरिषति सिस्मयिषते पिपविषते अञ्जिजिषति अशिशिषते चिकरिषति चिकरीषति जिगरिषति जिगरीषति आदिदरिषते आदिधरिषते । *उँदिधीर्षुरिति तु भ्वादिकस्य रूपम् । रुदविदेति सनः कित्त्वे, पिपृच्छिषति । आप्तुमिच्छति ईप्सति आरिप्सते लिप्सति ॥ २३ ॥**

'ऋस्मि०' 'ऋंक् गतौ' 'ऋं प्रापणे वा' । अर्त्तुमिच्छति अनेन इडागमे 'स्वरादेर्द्वितीयः' ( ४।१।४ ) इति द्वितीयस्य द्वित्वे अरिरिषतीति । 'ष्मिङ् ईषद्धसने' स्मेतुमिच्छति सिस्मयिषते । 'पूङ् पवने' पवितुमिच्छति पिपविषते । अनुबन्धनिर्देशात् पूगः पुपूषति पुपूषते । अञ्जौप् अञ्जितु-मिच्छति अञ्जिजिषति । 'अशौटि व्याप्तौ' अशितुमिच्छति अशिशिषते । अश्नातेरित्वङस्त्येव ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'कृत् विक्षेपे' 'गृत् निगरणे' करितुं करीतुं वा गरितुं गरीतुं वा इच्छति सनि अनेन इडागमे इटो दीर्घविकल्पे द्वैरूप्यम् । अन्ये तु व्यवस्थितविभाषयास्येटो दीर्घं नेच्छन्ति । 'दृङ्त् अनादरे' 'धृङ्त् स्थाने' आदरितुं आधर्तुं प्रष्टुमिच्छति आदिदरिषते इत्यादि । उँद्दिधीर्षुरित्यादिवार्त्तिक-स्यायमभिप्रायः । प्रच्छसहचरिताः ऋगृधृ इत्येते तौदादिकाः, तेन कृणातेः 'इवृध०' ( ४।४।४७ ) इति इड्विकल्पे इटो दीर्घविकल्पे च त्रैरूप्यम् । चिकीर्षति चिकरीषति चिकरिषतीति । एवं गृणातेर्जिगीर्षति जिगरीषति जिगरिषति । 'धृं धरणे' इत्यस्य तु दीधीर्षतीत्येव भवति । ततश्चास्य उद्दिधीर्षुरिति भवति । तत्र पृङ् ऋवर्णान्तत्वात् 'ग्रहगुहश्च सनः' ( ४।४।५९ ) इति सनि इड्निषेधादनिट्त्वम् । शेषाणामनुस्वारेत्त्वात्, कॄ गॄ इत्येतयोर्दीर्घऋकारान्तत्वात् 'इवृध०' इति इड्विकल्पप्राप्तिः, शेषयोः 'धूगौदितः' इति ( सूत्रेण ) । ऋस्मिपूङ्दृधृप्रच्छामनिट्त्वादप्राप्ते शेषाणां विकल्पे प्राप्ते वचनं रूपं भवति । धृंवत् इत्यस्य तु आदिधरिषुरिति ॥ २३ ॥ शकः सनि विशेषमाह

## शको जिज्ञासायाम् ॥ २४ ॥ [ सि० ३।३।७३ ]

**शकः सन्नन्तादस्मिन्नर्थे आत्मनेपदं स्यात् । विद्यां शिक्षते । अन्यत्र शिक्षति । स्थातुमिच्छति तिष्ठासति ॥ २४ ॥**

**'शको०'** स्पष्टम् । व्याख्यातं च प्रागौपाधिकात्मनेपदप्रकरणे ( पृष्ठ ५८८ ) ॥ २४ ॥

## मिमीमादामित्स्वरस्य ॥ २५ ॥ [ सि० ४।१।२० ]

**एषां दासंज्ञानां च सि सनि इत्स्यान्न च द्विः । मित्सति मित्सते । दित्सति २ । धित्सति २ ॥ २५ ॥**

**'मिमी०'** एषामिति । मि इति 'डुमिंगट् प्रक्षेपणे' इति । मित्सति मित्सते शतम् । ननु 'मिग्-मीगोऽखलचलि' इत्यात्वे माद्वारेणैव सिद्ध्यति । किं मिग्रहणेन ? सत्यम् । 'नामिनोऽनिट्' (४।३।३३) इति सनः कित्त्वादात्वं न प्राप्नोति । मीति, 'मीङ्च् हिंसायाम्' 'मीग्श् हिंसायामि'त्येतयो-र्ग्रहणम् । 'मीण् गतौ' इति यौजादिकस्यापि ग्रहणम् । मित्सति २ । प्रमित्सति प्रमित्सते शत्रून् । मेति 'मांक् माने' 'माङ्क् मानशब्दयोः' 'मेङ् प्रतिदाने' एषां ग्रहणम् । मित्सति प्रमित्सते भूमिम् । अपमित्सते यवान् । मातेर्नेच्छन्त्येके । मिमासति । दासंज्ञकानां चेति दाम्, प्रदित्सति दानम् । देङ्, दित्सते पुत्रम् । डुदांग्क् दित्सति-दित्सते वस्त्रम् । दोंच् दित्सति दण्डम् । ट्धें, धित्सति स्तनम् । डुधांग्क् धित्सति धित्सते श्रुतम् । बहुवचनं व्याप्त्यर्थम्, तेन निरनुबन्धग्रहणेन सानु-बन्धकस्येत्यादि नाश्रीयते । आदिशब्दात् 'एकानुबन्धग्रहणेन द्व्यनुबन्धकस्य', 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्यादयोऽपि नाश्रीयन्ते, तेन डुमिंगट्मेङोरपि ग्रहणम् । स्वरस्येति किम् ? सर्वस्य मा भूत् ॥ २५ ॥

## राधेर्वधे ॥ २६ ॥ [ सि० ४।१।२२ ]

**सि सनि स्वरस्य इः स्यात् । प्रतिरित्सति । अन्यत्र आरिरात्सति गुरून् ॥ २६ ॥**

**'राधे०'** 'राधं साधंट् संसिद्धौ' । उपसर्गयोगे अर्थविशेषस्तत्र वधेर्हिंसायां वर्त्तमानस्याऽस्य सकारादौ सनि स्वरस्य इः स्यान्न च द्विः प्रतिराद्धुमपराद्धुमिच्छति प्रतिरित्सति अपरित्सति शत्रुम् । वध इति किम् ? आराद्धुमिच्छति आरिरात्सति गुरून् ॥ २६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## दीङः सनि वा ॥ २७ ॥ [ सि० ४।२।६ ]

**आ स्यात् (वा)। दिदासते दिदीषते। 'अव्याप्यस्य मुचेर्मोग् वा' (४।१।१९) न च द्विः। मोक्षति-मुमुक्षति। सकर्मणस्तु मुमुक्षति वत्सम् ॥ २७ ॥**

**'दीङः'** 'दीङ्च् क्षये' दातुमिच्छति दिदासते, पक्षे दिदीषते। उपदिदासते-उपदिदीषते। **'अव्या०'** मोक्षति-मुमुक्षतीति। एवं मोक्षते मुमुक्षते वत्सः। मुमुक्षति वत्सं चैत्रः स एवं विवक्षति नाहं मुमुक्षामि स्वयमेव वत्सो मुमुक्षते। भूषार्थेति क्याभावः ॥ २७ ॥

→ अथ सन्प्रक्रमादर्थान्तरविहितमपि सनमाह ←

## गुप्तिजोर्गर्हाक्षान्तौ सन् ॥ २८ ॥ [ सि० ३।४।५ ]

**गुपो गर्हायां तिजः क्षान्तौ च वर्तमानात्स्वार्थे सन् स्यात्। जुगुप्सते तितिक्षते ॥ २८ ॥**

**'गुप्ति०'** गुप इति। **'गुपि** गोपनकुत्सनयोः'। तिज इति **'तिजि** क्षमानिशानयोः'। जुगुप्सते गर्हते इत्यर्थः। तितिक्षते सहते इत्यर्थः। गर्हाक्षान्ताविति किम्? गोपनं गोपायति। तेजनं तेजयति। अनयोरर्थान्तरेऽपि त्यादयो नाभिधीयन्ते इत्यत्यादिना प्रत्युदाहृतम्। त्यादिसमानार्थत्वा'च्छत्रानशा'वपि न भवतः। एवमुत्तरसूत्रद्वयेपि प्रायेण ज्ञेयम्। प्रायेणेति भणनात् गोपते तेजते वधते इत्याद्यपि भवति। केचिच्छत्रानशाविच्छन्ति तेन गोपमानं तेजमानं केतन्तं प्रयुङ्क्ते इत्यपि भवति। अकारः सन्ग्रहणेषु सामान्यग्रहणार्थः। नकारः 'सन्यङश्च' (४।१।३) इत्यत्र विशेषणार्थः ॥ २८ ॥

## कितः संशयप्रतीकारे ॥ २९ ॥ [ सि० ३।४।६ ]

**संशयप्रतीकारार्थात्कितः स्वार्थे सन् स्यात्। विचिकित्सति चिकित्सति ॥ २९ ॥**

**'कित०'** कित इति। 'कित निवासे' इत्यस्य संशयेत्यादि। अनवधारणात्मकः प्रत्ययः संशयः, दुःखहेतोर्निराकारणं प्रतीकारः। विचिकित्सति संशेते इत्यर्थः। चिकित्सति व्याधिं प्रतिकरोतीत्यर्थः। अन्यैर्निग्रहनाशयोः सन्नुक्तस्तत्र निग्रहनाशावपि प्रतीकारभेदौ तेन तत्राप्यनेनैव भवति। क्षेत्रे चिकित्स्यः पारदारिकः निग्राह्य इत्यर्थः। क्षेत्रे चिकित्स्यानि तृणानि नाशयितव्यानीत्यर्थः। संशयप्रतीकार इति किम्? केतनं केतयति ॥ २९ ॥

## शान्दान्मान्बधान्निशानार्जवविचारवैरूप्ये दीर्घश्चेतः ॥ ३० ॥ [ सि० ३।४।७ ]

**एभ्यश्चतुर्भ्यो निशानाद्यर्थेभ्यः स्वार्थे सन् स्यात्। दीर्घश्च द्वित्वे पूर्वस्येतः। शीशांसति २। दीदांसति २। मीमांसते। बीभत्सते ॥ ३० ॥**

इति महोपाध्यायश्रीकीर्तिविजयगणिशिष्योपाध्यायश्रीविनयविजयगणिविरचितायां
हैमलघुप्रक्रियायां सन्प्रक्रिया समाप्ता।

**'शान्०'** एभ्यश्चतुर्भ्य इति। 'शानी तेजने' निशानार्थात्सन्। निशानमुत्तेजनम्। शीशांसति शीशांसते शस्त्रम् उत्तेजयतीत्यर्थः। 'दानी अवखण्डने' आर्जवार्थात्सन् दीदांसति काष्ठम् ऋजूकरोतीत्यर्थः। भ्वादी उभयपदिनौ। 'मानि पूजायाम्' विचारार्थात्सन्। मीमांसते विचारयतीत्यर्थः। 'बधि बन्धने' निन्दितरूपो विरूपस्तस्य भावो वैरूप्यम् तदर्थात् सन्। बीभत्सते विरूपो भवतीत्यर्थः। एभ्य इच्छासनि जुगुप्सिषते बिभत्सिषते। → इति सन्नन्तप्रक्रिया। ←



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अथ यङ्प्रक्रिया ।

अथ यङन्तप्रक्रियां निरूपयितुमाह । सूत्रम्

### व्यञ्जनादेरेकस्वराद्भृशाभीक्ष्ण्ये यङ् वा ॥ १ ॥ [ सि० ३।४।९ ]

अमुख्यक्रियाणामधिश्रयणादीनां क्रियान्तराव्यवधानेन साकल्येन सम्पत्तिः फलातिरेको वा भृशत्वम्, मुख्यक्रियायाः पाकादेः क्रियान्तराव्यवधानेनावृत्तिराभीक्ष्ण्यम् । तद्विशिष्टार्थवृत्ते-र्व्यञ्जनादेरेकस्वराद्धातोर्यङ् वा स्यात् । ङकार आत्मनेपदार्थः । सन्यङश्चेति द्वित्वे ॥ १ ॥

'व्यञ्ज०' स्पष्टम् । धातोरित्येव । तेन सोपसर्गान्न भवति । भृशं प्रात्ति । व्यञ्जनादेरिति किम् ? भृशमीक्षते । एकस्वरादिति किम् ? भृशं चकास्ति । केचिज्जागर्तेरिच्छन्ति जाजाग्रीयते । सर्वस्माद्धातो-रायादिप्रत्ययरहितात्केचिदिच्छन्ति । अयाय्यते दादरिद्र्यते । भृशाभीक्ष्ण्य इति किम् ? पचति । वेति किम् ? पक्षे वाक्यम् । लुनीहि लुनीहीत्येवायं लुनातीत्यादि च यथा स्यात् ॥ १ ॥ अथोपयोगिसूत्रम्

### आगुणावन्यादेः ॥ २ ॥ [ सि० ४।१।४८ ]

यङन्तस्य द्वित्वे पूर्वस्य न्याद्यागमवर्जस्य आगुणौ स्याताम् । भृशं पुनः पुनर्वा पचतीति पापच्यते ४ ॥ २ ॥

'आगु०' यङन्तस्येत्यादि । अयं भावः । धातोर्यङन्तस्य द्वित्वे सति पूर्वस्य न्याद्यागमवर्जस्येति नीमुरीरिंरंतवर्जितस्याकारो गुणश्चासन्नौ भवतः । अटाट्यते वेवीयते लोलूयते । ह्वांक् जेहीयते । पापचीति बेभिदीति लोलवीति । नैतावाकारगुणौ यङ्निमित्ताविति यङ्लुप्यऽपि भवतः । अन्या-देरिति किम् ? वनीवच्यते यंयम्यते नरीनृत्यते नरिनर्त्ति नर्नर्त्ति । ननु चात्रापवादत्वान्न्यायादय एव बाधका भविष्यन्ति किं न्यादिवर्जनेन । सत्यम् । "द्वित्वे सति पूर्वस्य विकारेषु बाधको न बाधक" इति ज्ञापनार्थम् । तेनाचीकरदित्यत्र 'लघोर्दीर्घोऽस्वरादेः' ( ४।१।६४ ) इति सन्वत्कार्यं न बाध्यते । पापच्यते इति । अथाभीक्ष्ण्ययङन्तस्याभीक्ष्ण्ये द्वित्वं कस्मान्न भवति । उक्तार्थत्वात् । यदा तु भृशार्थयङन्तादाभीक्ष्ण्यविवक्षा तदा भवत्येव । पापच्यते पापच्यते इति । यदा त्वाभीक्ष्ण्य-यङन्ताद्भृशार्थविवक्षा तदा न द्वित्वम्-शब्दशक्तिस्वाभाव्यात्तस्यार्थस्य यङैव प्रतिपादितत्वात् । किंच भृशत्वं गुणक्रियाणां साकल्येन संपत्तिः, आभीक्ष्ण्यं प्रधानक्रियाया आवृत्तिरतः प्रधानक्रियायां गुणक्रिया न्यग्भूतेति । तथा भृशार्थयङन्ताभीक्ष्ण्ये आभीक्ष्ण्ययङन्ताद्वा भृशार्थे विवक्षिते यदा पञ्चमी केवला, तदा सा केवला तदर्थद्योतनेऽसमर्थेति तदर्थद्योतने द्विर्वचनमपेक्षते पापच्यस्व पाप-च्यस्वेति ॥ २ ॥ अद्यतन्यादौ सूत्रम्

### अतः ॥ ३ ॥ [ सि० ४।३।८२ ]

अकारान्ताद्धातोर्विहितेऽशिति प्रत्यये तस्यैव धातोर्लुगन्तादेशः स्यात् ॥ ३ ॥

'अतः०' स्पष्टम् । उदाहरणानि, कथयति कुषुभ्यति मगध्यति कुषुभमगधौ कण्ड्वादाव-कारान्तौ स्तः । चैकीर्षितः प्रचिकीर्ष्य । समिधिष्यति दृषदिष्यते । अत इति विहितविशेषणादिह न भवति । गतः ( गतवान् ) । अत इति किम् ? याता वाता । अशितीत्येव । चिकीर्षतु

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लोलूयेत् । चिकीर्ष्यते । चिकीर्ष्यादित्यादौ लोपविधेर्बलीयस्त्वा'दीर्घश्च्वी'त्यादिना दीर्घो न स्यात् । विषयविज्ञानाद्वा प्रागेव लोपः । एतेन लोपात्स्वरादेश इत्याशङ्का निरस्ता । अस्य फलं तु अस्य अकारलोपस्य स्थानिवद्भावेन अदृषदि अपापचि इत्यादौ न वृद्धिः । सस्वरयकारलोपे तु स्थानित्वं न स्यात् समुदायलोपात्, नापि 'न वृद्धिश्चे'ति वृद्धिनिषेधः, तत्र नामिन इत्यधिकारात् । तथा अवध्वंसते क्विप् अवध्वंसमिच्छति क्यन् ततः क्तप्रत्यये अवध्वंसित इत्यत्राकारस्य स्थानित्वात् 'नो व्यञ्जनस्या०' (४।२।४५) इति नलुग् न । सस्वरस्य क्यनो लोपे स्वरव्यञ्जनसमुदायविधित्वात् स्वरस्य परे इति स्थानित्वाभावान्नस्य लुक् स्यादेव ॥ ३ ॥ पापच्य इत्यस्य अद्यतन्यास्ते सिजागमे इडागमे सूत्रम्

## योऽशिति ॥ ४ ॥ [ सि० ४।३।८० ]

**धातोर्व्यञ्जनात्परस्य योऽशिति प्रत्यये लुक् स्यात् । अपापचिष्ट ५ । पापचाञ्चक्रे ६ । पापचिषीष्ट ७ । पापचिता ८ । पापचिष्यते ९ । अपापचिष्यत १० ॥ ४ ॥**

**'यो०'** व्यञ्जनात्परस्येति । व्यञ्जनान्ताद्धातोः परस्य यकारस्याशिति प्रत्यये परे लुक् स्यात् । यथा जङ्गमिता बेभेदिता बेभिदाञ्चक्रे बेभेदिषीष्ट । क्ये बेभिद्यते । सोसूचिता सोसूत्रिता मोमूत्रिता शाशयिता । कुषुभिता मगधकः । सूच्यादीनां णिज्लोपे शयादेशेऽस्य लोपे च व्यञ्जनान्तता । अन्ये तु लाक्षणिकव्यञ्जनान्तेभ्यो यलोपं नेच्छन्ति सोसूच्यिता शाशय्यिता कुषुभ्यिता, तन्मतसङ्ग्रहार्थं व्यञ्जनान्ताद्धातोर्विहितस्येति विशेषणं कार्यम् । धातोरित्येव-ईर्ष्यिता मव्यिता । व्यञ्जनादित्येव । लोलूयिता कण्डूयिता । अशितीति किम् ? बेभिद्यते चेच्छिद्यते । एवं चात इत्यकारलोपेऽनेन यकारलोपे अपापचिष्टेति सिद्धम् । एवं अपापचिषाताम् अपापचिषत ५ पापचाञ्चक्रे ६ पापचिषीष्ट ७ पापचिष्यते ९ अपापचिष्यत १० । पापच्यमानः पापचिष्यमाणः । भावकर्मणोः पापचिष्यमाणं पापच्यमानं पापचाञ्चक्राणः बभूवान् आसिवान् । भावकर्मणोः पापचाञ्चक्राणं बभूवानं आसानं । पापचित्वा पापचितुम् पापचितः २ । एवं सर्वे व्यञ्जनान्ता यङि ज्ञेयास्तत्र इदुदुपान्त्यानामद्यतन्यादौ यङो लुकि उपान्त्यगुणो न कार्यो यङोऽलुकः स्थानित्वेनाप्राप्तेः । 'यथा जिमू अदने' । अजेजिमिष्ट । मुदि अमोमुदिष्ट । वृषू अवरिवृषीष्ट । एवं वृधू वरीवृध्यते ४ । अवरिवृधिष्ट ५ । वृतू, वरीवृत्यते ४ । अवरीवृतिष्ट ५ ॥ ४ ॥ अत्र विशेषमाह

## अट्यर्तिसूत्रिमूत्रिसूच्यशूर्णोः ॥ ५ ॥ [ सि० ३।४।१० ]

**एभ्यः सप्तभ्यो भृशाभीक्ष्ण्ये यङ् वा स्यात् । स्वरादेर्द्वितीय इति ट्यस्य द्वित्वे, व्यञ्जनस्यानादेर्लुगिति पूर्वस्य यलुकि, आत्वे च, अटाट्यते । क्ययङाशीर्ये इति गुणे अयिर इत्यत्र यवर्जनाद्येपरे रो द्वित्वं स्यादेव । अरार्यते सोसूत्र्यते मोमूत्र्यते सोसूच्यते अशाश्यते प्रोर्णोनूयते । दीर्घश्च्वीति दीर्घे, तोष्टूयते ॥ ५ ॥**

**'अट्य०'** भृशं पुनःपुनर्वा अटति अटाट्यते । एवमियर्त्ति ऋच्छति वा अरार्यते । 'सूत्रण् विमोचने' 'मूत्रण् प्रस्रवणे' 'सूचण् पैशून्ये' 'अशौटि व्याप्तौ' । 'अशश् भोजने वा' । अश्नुते अश्नाति वा अशाश्यते । 'ऊर्णुग्क् प्रोर्णोनूयते । अट्यर्त्यशामव्यञ्जनादित्वात्सूत्रिमूत्रिसूचीनामनेकस्वरत्वादूर्णोतेरव्यञ्जनाद्यनेकस्वरत्वात्पूर्वेणाप्राप्ते च वचनम् । 'स्मृं गतौ' इत्यस्य यङि सेस्रीयते । 'ष्टुंग्क् स्तुतौ' । भृशं पुनःपुनर्वा स्तौति तोष्टूयते ॥ ५ ॥ अर्थविशेषे यङमाह



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## गत्यर्थात्कुटिले ॥ ६ ॥ [ सि० ३।४।११ ]

**व्यञ्जनादेरेकस्वराद्गत्यर्थात् कुटिल एवार्थे वर्त्तमानाद्धातोर्यङ् स्यात् ॥ ६ ॥**

**'गत्य०'** कुटिल एवार्थे इति ननु भृशाभीक्ष्ण्ये । तक्रकौण्डिन्यन्यायेन भृशाभीक्ष्ण्ययोर्निषेधार्थं कुटिले इति धात्वर्थविशेषणम् । तक्रं देयमस्मै तक्रदेयः । तक्रदेयः कौण्डिन्यः तक्रकौण्डिन्यः, 'मयूरे'ति देयशब्दलोपः । अयं भावः—विशेषविधिनिषेधौ शेषनिषेधानुज्ञाफलकौ । यथा ब्राह्मणेभ्यो दधि देयम् तक्रं कौण्डिन्यस्येति विशेषविधिना कौण्डिन्यस्य दधिदाननिषेधस्तथा कुटिले इति विशेषविधिनैषां भृशाभीक्ष्ण्यनिषेधः प्रतीयते इति । कुटिल इति किम् ? भृशमभीक्ष्ण्यं वा क्रामति । धात्वर्थविशेषणं किम् ? साधने कुटिले मा भूत् । कुटिलं पन्थानं गच्छति । भृशाभीक्ष्ण्ये कुटिलयुक्त एव यङ् न केवल इत्यन्ये । एवमुत्तरत्रापि । कथं जङ्गम इत्यत्र कुटिलार्थाभावे यङ् प्रत्ययः इत्यत्रोच्यते । नायं यङ्प्रत्ययः किन्तु रूढिशब्दोऽयं लक्षणया स्थावरप्रतिपक्षमात्रे वर्त्तते । यन्मुख्यं प्रवृत्तिनिमित्तं शब्दस्य तत्प्रत्यासत्त्या तदुपलक्षितं धर्मान्तरमुपादाय प्रवृत्तिर्लक्षणा । (तया ?)गमेर्जम् च वा(१२) गमे(रः) प्रत्ययो भवति, सरूपे द्वे भवतः, पूर्वस्य जमित्यादेशो वा भवति । गच्छति पादविहरणं करोतीति जङ्गमश्चरः । गच्छत्यमाध्यस्थ्यं गङ्गमश्चपल इति जङ्गमस्य सिद्धिः ॥ ६ ॥ अत्रोपयोगिसूत्रम् ।

## मुरतोऽनुनासिकस्य ॥ ७ ॥ [ सि० ४।१।५१ ]

**आत्परो योऽनुनासिकस्तदन्तस्य यङि द्वित्वे पूर्वस्य मुरन्तः स्यात् । चङ्क्रम्यते । 'तौ मुमो'रित्यनुस्वारः ॥ ७ ॥**

**'मुर०'** स्पष्टम् । यथा बम्भण्यते बम्भणीति । तन्तन्यते तन्तनीति । जङ्गम्यते जङ्गमीति । यलवानामनुनासिकत्वे 'तयि णयि रक्षणे च' । तंतयँते तंतयँः । चञ्चल्यँते चञ्चलँः । 'मुवैं मव बन्धने' मंमव्यँते । अनुनासिकत्वे तातंयते तातयः । चाचंल्यते चाचलः । मामंव्यते (मामवः) । अत इति किम् ? 'तिम आर्द्रभावे' तेतिम्यते । 'घुणि भ्रमणे' जोघुण्यते । 'भ्रामि क्रोधे' बाभ्रम्यते । अनुनासिकस्येति किम् ? पापच्यते । प्रकृते चङ्क्रम्यते इति सिद्धम् ॥ ७ ॥ पुनरप्यर्थान्तरे यङमाह—

## गॄलुपसदचरजपजभदशदहो गर्ह्ये ॥ ८ ॥ [ सि० ३।४।१२ ]

**गर्ह्यार्थेभ्य एभ्योऽष्टाभ्यो यङ् स्यात् । ऋतां क्ङितीतीरादेशे 'ग्रो यङि' ( २।३।१०१ ) रो ल् स्यात् । निजेगिल्यते । लोलुप्यते । सासद्यते ॥ ८ ॥**

**'गॄलु०'** गर्ह्यार्थेभ्य इति । गर्ह्य एवार्थे वर्त्तमानेभ्यो गॄप्रभृतिभ्योऽष्टभ्यो धातुभ्यो यङ् भवति, न भृशादिषु । निपूर्वः 'गॄत् निगरणे' । गर्हितं निगिरति । अत्रोपयोगिसूत्रम् **'ग्रो०'** स्पष्टम् । निजेगिल्यते इति । गृणातेस्तु यङेव नास्ति केचित्तु तस्यापीच्छन्ति, लत्वं तु नेच्छन्ति । यङीति किम् ? जेगीर्यते । 'लप्लंती छेदने' 'युप रुप लुपच् मोहने' इति वा गर्हितं लुम्पति लुप्यति वा लोलुप्यते । 'षद्लं' गर्हितं सीदति सासद्यते ॥ ८ ॥ गर्हितं चरति; अत्रोपयोगि सूत्रम्

## चरफलाम् ॥ ९ ॥ [ सि० ४।१।५३ ]

**एषां यङि द्वित्वे पूर्वस्य मुरन्तः स्यात् ॥ ९ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'**चर०**' एषामिति । 'चर भक्षणे च' 'फल निष्पत्तौ' 'ञिफला विशरणे' इत्येतेषाम् ॥ ९ ॥ म्वागमे उपयोगिसूत्रम्

## तिचोपान्त्यातोऽनोदुः ॥ १० ॥ [ सि० ४।१।५४ ]

**चरफलां यङि तादौ च प्रत्यये उपान्त्यस्यात उः स्यात्, अनोदिति तस्य गुणो न स्यात् । चञ्चूर्यते, पम्फुल्यते ॥ १० ॥**

'**तिचो०**' चञ्चूर्यते चञ्चुरीति । पम्फुल्यते-पम्फुलीति । तादौ च प्रत्यये इति चूर्तिः ब्रह्मचूर्तिः । प्रफुल्लिः प्रफुल्ल इति ञिफला इत्यस्य यदा फलतिस्मेति क्तस्तदा 'आदितः' ( ४।४।७१ ) इति नित्यमिडभावः । यदा तु फलितुमारब्ध इति तदा 'नवा भावारम्भे' इति वेट् । 'फल निष्पत्तौ' इत्यस्य तु नित्यमिट् । अत इति किम् ? चरन्तं प्रयुङ्क्ते णिग् वृद्धिः चारयतीति क्विप् 'णेरनिटि' ( ४।३।८३ ) इति णिग् लोपः । चारिवाचरति कर्त्तुः क्विप् । गर्हितं चारति चञ्चार्यते । एवं गर्हितं फलति पम्फाल्यते । अत्रैकदेशविकृतस्यानन्यत्वात्प्राप्नोति, परमत इत्युक्तेराकारस्योत्वं न स्यात् । अनोदिति किम् ? चञ्चूर्तिः पम्फुल्लिः । अत्र गुणो न स्यात् । 'जप मानसे च' गर्हितं जपति ॥ १० ॥ अत्रोपयोगि सूत्रम्

## जपजभदशदहभञ्जपशः ॥ ११ ॥ [ सि० ४।१।५२ ]

**एषां षण्णां यङि द्वित्वे पूर्वस्य मुरन्तः स्यात् । जञ्जप्यते जञ्जभ्यते दंदश्यते दंदह्यते बम्भज्यते पंपश्यते । 'सिचो यङि' ( २।३।६० ) षत्वं न स्यात् । सेसिच्यते ॥ ११ ॥**

'**जप०**' स्पष्टम् । यभं जभ मैथुने' । आद्योऽन्तस्थादिर्द्वितीयश्चवर्गादिः । 'जभः स्वरे' ( ४।४।१०० ) इति नोऽन्तागमे गर्हितं जम्भति जञ्जभ्यते जञ्जभीति । आगमशासनमनित्यमिति । 'जभः स्वर' इति नागमाभावः 'दंशं दशने' गर्हितं दशति दंदश्यते दंदशीति । दशिति लुप्तनकारनिर्देशो यङो लुपि दंशेर्नलोपो भवतीति ज्ञापनार्थः । अन्यथान्तरङ्गानपीति न्यायात् प्रथममेव यङो लुपि ङित्प्रत्ययाभावात् नलोपो न स्यात् तच्च 'गृलुप०' ( पृष्ठ ७९४ ) इति सूत्रे ज्ञापितम् । परं द्विर्बद्धं सुबद्धं भवतीति न्यायादत्रापि तं ज्ञापितं गर्हितं दहति दंदह्यते दंदहीति । 'भञ्जौप् आमर्दने' । अत्र गर्हो यङ् नास्ति । भृशं पुनःपुनर्वा भनक्ति बम्भज्यते । '**पशिः**' सौत्रो धातुः भृशं पुनःपुनर्वा पशति पम्पश्यते । अत्र विशेषसूत्रम् । '**सिचो०**' षत्वं न स्यादिति । अयमर्थः सिञ्चतेर्धातोर्यङि परे षो न भवति सेसिच्यते इति एवं अभिसेसिच्यते । परत्वादुपसर्गलक्षणमपि षत्वं बाध्यते । यङीति किम् । अभिषिषिक्षति । ङकारः किम् ? अभिषिच्यते ॥ ११ ॥ केषाञ्चित् यङो निषेधमाह । सूत्रम्

## न गृणाशुभरुचः ॥ १२ ॥ [ सि० ३।४।१३ ]

**एभ्यस्त्रिभ्यो यङ् न स्यात् । निन्द्यं गृणाति । भृशं शोभते । भृशं रोचते ॥ १२ ॥**

'**न गृ०**' एभ्य इति । 'गॄश् शब्दे' 'शुभि दीप्तौ' 'रुचि अभिप्रीत्यां च' । एभ्यो भृशाभीक्ष्ण्यादौ यङ् न भवतीति वाक्यमेव भवति ॥ १२ ॥ केषाञ्चिद्यङि विशेषमाह

## ईर्व्यञ्जनेऽयपि ॥ १३ ॥ [ सि० ४।३।९७ ]



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**गापास्थासादामाहाकां यप्वर्जेक्ङित्यशिति व्यञ्जनादावीः स्यात् । जेगीयते पेपीयते इत्यादि । 'घ्राध्मोर्यङि' (४।३।९८) ईः स्यात् । जेघ्रीयते देध्मीयते । 'तॄ' तेतीर्यते । 'हनो घ्नीर्वधे' (४।३।९९) । जेघ्नीयते । वध इति किम्? गतौ जङ्घन्यते ॥ १३ ॥**

**'ईर्व्य०'** गैं गाङ् वा गीयते जेगीयते । गाङो नेच्छन्त्यन्ये । 'गापास्थासादामाहाकः' (४।३।९६) इति पूर्वसूत्रे मास्थोर्मध्ये पाठाद्धौवादिकयोः पैं पा इत्येतयोर्ग्रहणमुक्तमत्रापि तथैव ज्ञेयम् । तत एव गापादिधातूनामनुवृत्तेः पीयते पेपीयते । अत्र प्राक् स्वरे इत्यधिकारात् प्रागनेन इः पश्चाद्द्वित्वम् । यङो व्यञ्जनादित्वात् । **स्था** स्थीयते तेष्ठीयते । **सो** सीयते सोषीयते । **सैं** सीयते सेसीयते । अषोपदेशत्वान्न षत्वम् । **दासंज्ञ,** दीयते देदीयते । धीयते देधीयते स्तनम् । मा इति मामाङ्मेङां त्रयाणां ग्रहणम् । मीयते मेमीयते । मातेर्नेच्छन्त्यन्ये । मायते मामायते । एवं 'गापास्थासादामा०' इति सूत्रेऽपि मायात् । **हांक्,** हीयते जेहीयते । हाङो न स्यात् हाक इति भणनात् । हायते जाहायते । व्यञ्जन इति किम्? तस्थतुः । अशितीत्येव माहि । क्ङितीत्येव गाता दाता । अयपीति किम्? प्रगाय प्रपाय प्रस्थाय अवसाय प्रदाय प्रधाय प्रमाय प्रहाय । कथं 'निपीय यस्य क्षितिरक्षिणः कथा' इति **नैषधीये? 'पीङ्च्** पाने' इत्यस्य रूपम् । स्वरादावन्त्यलोपविधानात् व्यञ्जनादौ लब्धे व्यञ्जनग्रहणं साक्षाद् व्यञ्जनप्रतिपत्त्यर्थम् । तेन क्विप्लुकि स्थानिवद्भावेनापि न भवति । शंस्थाः पुमान् । शं सुखं तत्र तिष्ठतीति 'शमो नाम्न्यः' (५।१।१३४) इत्यप्रत्ययापवादे 'स्थापास्नात्रः कः' (५।१।१४२) इति के प्राप्तेऽसरूपत्वात् क्विप् । शंस्थाशब्दादन्यत्र लुप्तव्यञ्जनेऽपीच्छन्त्येके, तथा च **जयकुमारः** पां पाने इत्यस्य क्विपि पीरित्याह । **'घ्राध्मो०'** यङीति किम्? घ्रायते ध्मायते । यङ्लुपि जाघ्रीतः दाध्मीतः । **अन्ये** तु यङ्लुप्यपि इच्छन्ति । जेघ्रीतः देध्मीतः । तॄ इति भृशं पुनः पुनर्वा तरति यङि इरादेशे तेतीर्यते ४ । अद्यतन्यां तेतीर्यत इति स्थिते सिचि इटि 'अतः' (४।३।८२) इति यङोऽल्लोपे' योऽशिति (४।३।८०) इति यलोपे अतेतीरिष्ट अतेतीरिषातां अतेतीरिषत ५ । तेतीरांचक्रे ६ तेतीरिषीष्ट ७ तेतीरिता ८ तेतीरिष्यते ९ अतेतीरिष्यत १० । तेतीरित्वा अवतेतीर्यते तेतीरितः तेतीरितुम् तेतीर्यमाणः एवं कॄगॄशॄप्रभृतयो दीर्घॠकारान्ता ज्ञेयाः । किन्तु पॄमॄप्रभृतीनां क्ङिति परे 'ओष्ठ्यादुर्' (४।४।११७) इति पोपूर्यते मोमूर्यते ४ । अद्यतन्यां अपोपूरिष्ट इत्यादि सर्वं प्राग्वज्ज्ञेयम् । **'हनो०'** केचिदिमं विकल्पेनाहुः । 'त्वं तु राजन् चटकमपि न जङ्घन्यसे' । दीर्घनिर्देशाद्यङ्लुप्यपि जेघ्नीतः नेच्छन्त्यन्ये । जङ्घतः इति भवति ॥ १३ ॥

## क्ङिति यि शय् ॥ १४ ॥ [ सि० ४।३।१०५ ]

**शीङः क्ङिति यादौ शय् स्यात् । शाशय्यते ॥ १४ ॥**

**'क्ङिति०'** यादौ इति यकारादौ क्ङिति प्रत्यये शीङः शय् इत्यादेशः स्यात् । शय्यते शाशय्यते संशय्यते संशय्य शय्या । यीति किम्? शिश्यानः । क्ङिति इति किम्? शेयम् । यङ् लुपि न भवति संशेशीय ॥ १४ ॥

## ऋतो रीः ॥ १५ ॥ [ सि० ४।३।१०९ ]

**च्वियङ्यक्येषु परेषु ऋदन्तस्य ऋतो रीः स्यात् । चेक्रीयते ॥ १५ ॥**

**'ऋतो०'** ऋदन्तस्येति धातोरधातोर्वा ऋदन्तस्य श्रुतत्वात्; ऋतः स्थाने रीरित्ययमादेशो

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भवति च्विवयङ्यक्येष्विति । क्रमेणोदाहरणानि पित्रीकरोति पित्रीभवति पित्री स्यात्; चेक्रीयते इति । एवं जेह्रीयते । क्य इति क्यन्क्यङोर्ग्रहणम् । पित्रीयति मात्रीयति पित्रीयते मात्रीयते । ऋत इति किम् ? चेकीर्यते निजेगिल्यते ॥ १५ ॥

## ऋमतां रीः ॥ १६ ॥ [ सि० ४।१।५५ ]

**ऋमतां यङन्तानां द्वित्वे पूर्वस्य रीरन्तः स्यात् । 'नृतेर्यङि' ( २।३।९५ ) नो ण् न स्यात् । नरीनृत्यते परीपृच्छ्यते । क्ययङाशीर्ये इति गुणे ततो द्वित्वे सास्मर्यते । वा परोक्षायङीति य्वृद्विकल्पे शोशूयते शेश्वीयते ॥ १६ ॥**

**'ऋम०'** ऋकारवतां धातूनां यङन्तानां द्वित्वे सति पूर्वस्य रीरन्तो भवति । भृशं पुनःपुनर्वा नृत्यतीति यङि 'रषृवर्णान्नोण०' इति णत्वे प्राप्ते सूत्रम् **'नृते०'** ( २।३।९५ ) स्पष्टम् । यङीति किम् ? हरिरिव नृत्यतीति हरिणर्त्ती नाम कश्चित् । 'पूर्वपदस्थान्नाम्न्यगः' ( २।३।६४ ) इति णत्वम् । एवं दृशृं, दरीदृश्यते । वृतूङ् वरीवृत्यते । वृधूङ् वरीवृध्यते । गृधूच्-जरीगृध्यते । कृपौङ् चलीकॢप्यते इति द्वित्वात् प्रागेव निरपेक्षत्वेन 'ऋरलॢं०' ( २।३।९९ ) इत्यस्य प्रवृत्तौ ततो द्वित्वे ऋकारापदिष्टमिति न्यायेन लृकारस्याप्यत् । 'धृज गतौ' दरीधृज्यते । इकारोपान्त्योऽयमिति केचित् । तन्मते भृशं ध्रिजति देध्रिज्यते । प्रच्छंत् परीपृच्छ्यते, ओव्रश्चौत् वरीवृश्च्यते । ग्रहीश् जरीगृह्यते । 'गृह्णोऽपरोक्षायाम् दीर्घः' ( ४।४।३४ ) इति सूत्रे विहितविशेषणाद्यङन्तस्य इटो न दीर्घः । अद्यतन्यां ते सिचि इटि दीर्घाभावे अजरीगृहिष्ट अजरिगृहिषाताम् । एवं जरीगृहीता जरीगृहीतुम् जरीगृहीतव्यम् । प्रच्छिव्रश्चिग्रहीणां य्वृति ऋकारे कृते ऋमत्त्वम् । ऋमतामिति किम् ? चेक्रीयते जेह्रीयते । कृगहृगोरीभावे कृते द्वित्वमिति ऋमत्त्वं नास्ति । बहुवचनं लाक्षणिकपरिग्रहार्थम् । सास्मर्यते । शोशूयते इत्यादि स्पष्टम् ॥ १६ ॥

## वञ्चस्रंसध्वंसभ्रंशकसपतपदस्कन्दोऽन्तो नीः ॥ १७ ॥ [ सि० ४।१।५० ]

**एषामष्टानां यङि द्वित्वे पूर्वस्य नीरन्तः स्यात् । नो व्यञ्जनस्येति नलुपि वनीवच्यते सनीस्रस्यते इत्यादि । 'व्येस्यमोर्यङि' (४।१।८५) य्वृत् स्यात् । वेवीयते सेसिम्यते । 'चायः कीः' (४।१।८६) यङि । चेकीयते । 'वशेरयङी' (४।१।८३) इति य्वृन्निषेधात् वावश्यते बोभूयते ४ । अबोभूयिष्ट ५ । बोभूयांचक्रे ६ । ॥ १७ ॥**

**॥ इति यङन्तप्रक्रिया ॥**

**'वञ्च०'** एषामिति वञ्चू चञ्चू इत्यादिष्वेकादशसु गत्यर्थेषु भ्वादिधातुषु प्रथमो वञ्चू इति धातुः । 'भ्रशूंङ् स्रंसूङ् अवस्रंसने' 'ध्वंसूङ् गतौ' च 'कस गतौ' 'पतॢ पथे गतौ' 'पदिंच् गतौ' 'स्कन्दूं गतिशोषणयोः' । कुटिलं वञ्चति, भृशं पुनःपुनर्वा स्रंसते, कुटिलं ध्वंसते, भृशं पुनःपुनर्वा भ्रंशते, कुटिलं कसति, कुटिलं पतति, कुटिलं पद्यते, कुटिलं स्कन्दति, एवं गत्यर्थानां कुटिले स्रंस्भ्रंशोर्भृशाभीक्ष्ण्ये यङ् । ततोऽनेन न्यायेन न्यागमे 'नो व्यञ्जनस्य०' ( ४।२।४५ ) इति यथासम्भवं नलोपे वनीवच्यते वनीवञ्चीति, सनीस्रस्यते सनीस्रंसीति, दनीध्वस्यते दनीध्वंसीति, बनीभ्रश्यते बनीभ्रंशीति, चनीकस्यते चनीकसीति, पनीपत्यते पनीपतीति, पनीपद्यते पनीपदीति, चनीस्कद्यते चनीस्कन्दीति । दीर्घविधानात् नी इत्यस्य ह्रस्वो न भवति । **'व्ये स्य०'** व्येंङ् संवरणे 'स्यमू शब्दे' अनयोः सस्वरान्तस्य यङि य्वृद्भवति । भृशं पुनःपुनर्वा व्ययति स्यमति अनेन य्वृति

द्वित्वे 'आगुणावन्यादे' (४।१।४८) इति गुणे वेवीयते वेवयीति। सेसिम्यते सेसिमीति। यङ्लुपि नेच्छन्त्यन्ये। वाव्याति संस्रंति। **'चायः०'** 'चायृग् पूजानिशामनयोः' एतस्य यङि की इत्ययमादेशो भवति। चेकीयते। दीर्घनिर्देशो यङ्लुबर्थः। चेकीतः। वावश्यते इति 'वशक् कान्तौ' भृशं पुनःपुनर्वा वष्टीति यङ्। बोभूयते इत्यादि स्पष्टम्॥ १७॥ इति यङन्तप्रक्रिया।

## अथ यङ्लुबन्तप्रक्रिया।

## बहुलं लुप्॥ १॥ [सि० ३।४।१४]

**यङो लुप् बहुलं स्यात्।**

**क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।**
**विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥ १॥**

**यङ्लुगन्तं परस्मैपदेऽदादिवच्चोह्यम्। 'यङ् तुरुस्तोः' (४।३।६४) इति वा ईडागमे बोभवीति बोभोति बोभूतः बोभुवति। बोभोषि। इत्यादि १। बोभूयात् २। बोभवीतु-बोभोतु बोभूतात्। ङित्त्वेन विच्त्वस्य बाधनान्न गुणः। बोभूहि ३ बोभूतात् ३। अबोभवीत् अबोभोत् अबोभूताम् अबोभवुः ४। पिबैतिदेति सिज्लुपि।**

**तिवा शवानुबन्धेन निर्दिष्टं यद्गणेन च। एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि॥ १॥**

**इति भवतेः सिज्लुपीति गुणनिषेधाभावे अबोभोत् अबोभोताम् अबोभूवन् ५। बोभवाञ्चकार ६। बोभूयात् बोभूयास्ताम् ७।॥ १॥**

अथ यङ्लुबन्तप्रक्रियां निरूपयितुमाह। **'बहुलं०'** बोभोतीति। एवं रोरवीति रोरोति। लालपीति लालप्ति। चङ्क्रमीति चंक्रन्ति। जञ्जपीति जञ्जप्ति। बहुलग्रहणं प्रयोगानुसरणार्थम्। तेन क्वचिन्न भवति। लोलूया पोपूया। अत्रायं विशेषः। **अचि** (३।४।१५) अचि प्रत्यये यङो लुप् भवति। लोलुवः पोपुवः सनीस्रंसः दनीध्वंसः वेव्यः नेन्यः। नित्यार्थं वचनम्। **'नोतः'** (३।४।१६) उकारान्ताद्विहितस्य यङोऽचि परे लुप् न भवति। योयूपः। रोरूपः॥ १॥ किञ्च

## न वृद्धिश्चाविति क्ङिल्लोपे॥ २॥ [सि० ४।३।११]

**अविति प्रत्यये यः क्ङितो ङितश्च लोपस्तस्मिन् सति गुणो वृद्धिश्च न स्यात्। बेभिदिता मरीमृजिता जङ्गमीति जङ्गन्ति। यमिरमिनमिगमीति मृलुपि जङ्गतः गमहनेत्युपान्त्यलुकि जङ्गमति॥ २॥**

**'न वृ०'** अवितीत्यादि स्पष्टम्। क्ङित्प्रत्ययलोपे। यथा यङ्लोपे देद्यः। दासंज्ञायाम् दीङ्च् इत्यस्य च यङि देदीयते इति वाक्ये **'अचि'** (३।४।१५) अचीति सस्वरस्यैव यङो लुप्। अन्यथा स्वरस्येति अलोपस्य स्थानित्वे गुणप्राप्तिर्न स्यात्। एवं वेव्यः नेन्यः लोलुवः पोपुवः। मरीमृजः अत्र ऋतः स्वरे वा इति प्राप्ताया वृद्धेरनेन निषेधे गुणप्राप्तिः साप्यनेन निषिध्यते। क्ङितीति किम्? रागी रागः। अत्र नलोपे वृद्धिप्रतिषेधो मा भूत्। केचित्तु दधीवाचरतीति क्विप् लोपे अप्रत्यये णिगि च दध्या दध्ययति इत्यत्रापि गुणवृद्ध्योः प्रतिषेधमिच्छन्ति, तन्मतसंग्रहार्थम् क्ङिल्लोपे सति अविति प्रत्यये परे गुणवृद्धी न भवत इति व्याख्येयम्। स्वमते अविति प्रत्यये परे निषेधः। विति तु दधयति रोरवीति बोभवीतीत्यादौ गुणो न भवति। स्वमते दधयनं दधया। परमते दध्ययनं दध्या। णिगि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ दध्ययतीत्यत्र ] स्वमते दधयन्तं प्रयुङ्क्ते दधययति । परमते(ऽपि) दधयन्तं प्रयुङ्क्ते दध्ययति । क्विल्लोपे इत्यत्र लुग्लोपोऽदर्शनमात्रं गृह्यते न तु लुग्लुपौ, तद्ग्रहणे दध्येत्यादौ गुणप्रतिषेधो न स्यात् । अत्र हि क्विपो लुग् लुप् वा न, किन्त्वप्रयोगीदित्यदर्शनमात्रमेव । जङ्गन्तीति । 'गमिषद्यमश्छः' ( ४।२।१०६ ) इति सूत्रे 'जाङ्गाजनोऽत्यादौ' ( ४।२।१०४ ) इत्यस्मात्सूत्रादित्यादावित्यनुवर्त्तते । ततो यत्रानन्तरस्तिवादिस्तत्र मकारस्य छो न भवति । एवं जङ्गमीषि जङ्गंसि जङ्गथः । 'समो गमृच्छि०' ( ३।३।८४ ) इत्यत्र प्रकृतिग्रहणात् यङ्लुप्यप्यात्मनेपदमेव । संजंगते संजगमाते संजग्मते । हौ जङ्गहि । अद्यतन्यां दृ दिद्युतादीत्यत्र दृदनुबन्धनिर्देशात् नाङ् । अजङ्गमीत् अजङ्गमिष्टां अजङ्गमिषुः । कर्मोक्तौ अजङ्गामि अजङ्गमि । 'गमो वा' ( ४।३।३७ ) इति 'सिजाशिषावात्मने' ( ४।३।३५ ) वा किव्वे 'यमिरमि०' ( ४।२।५५ ) इत्यन्तलोपे अजङ्गसातां अजङ्गंसाताम् । आत्मनेपदे नेट् । 'गमोऽनात्मने' ( ४।४।५१ ) इत्यत्र प्रकृतेर्ग्रहणात् जङ्गमाञ्चकार इत्यादि । शतरि जङ्गम् । अत् इति स्थिते 'गमहन०' ( ४।२।४४ ) इत्युपान्त्यलोपे गमिष० इति मश्छत्वे 'अघोषे०' ( १।३।५० ) इति गस्य कत्वे जंक् छत् इति रूपं भवति । यमूं यंयमीति यंयन्ति यंयतः । हौ यंयहि गमिवत् । शतरि यंयच्छत् क्रमू चङ्क्रमीति चङ्क्रति । 'अहन् पञ्चमस्य०' ( ४।१।१०७ ) इति दीर्घे च क्रान्तः । चङ्क्रामति । अद्यतन्यां अचङ्क्रमीति । चङ्क्रमामास । 'चमू छमू जमू झमू अदने' । आचंचमीति आचंचंति आचंचान्तः आचंचमति । चंचमीषि चंचंसि । 'शिड्हे०' ( १।३।४० ) इत्यनुस्वारः । चंचान्थः चंचान्थ । चंचमीति । चंचन्मि चंचन्मः ॥ २ ॥

## मो नो म्वोश्च ॥ ३ ॥ [ सि० २।१।६७ ]

**मन्तस्य धातोरन्तस्य पदान्तस्थस्य म्वोश्च परयोर्नः स्यात् । जङ्गन्मि जङ्गन्वः जङ्गन्मः । चङ्क्नीति चङ्क्न्तीत्यादि ॥ ३ ॥**

'मो नो म्वोश्चे'ति मस्य नः । हौ दीर्घे 'शिड्हेऽनुस्वारः' ( १।३।४० ) इत्यनुस्वारे च आचंचाहि । अद्यतन्यां 'न श्वि०' ( ४।३।४९ ) इति वृद्धिनिषेधे अचंचमीत् । शेषं प्राग्वत् । एवं छमूप्रभृतयः । चङ्क्नीति इत्यादि ॥ ३ ॥ सूत्रम् ।

## आः खनिसनिजनः ॥ ४ ॥ [ सि० ४।२।६० ]

**एषां धुडादौ क्ङित्याः स्यात् । चङ्खातः चङ्खनति ॥ ४ ॥**

'आः ख०' एषामिति । 'खनूग् अवदारणे' । खातः २ खात्वा खातिः । सन 'षणूयी दाने' 'वन षण भक्तौ' वा, सातः २ सात्वा सातिः । 'जनैचि प्रादुर्भावे' जातः २ जातिः जात्वा । क्तितीत्येव चङ्खंतिः संसंतिः जंजंतिः । इकिस्तिव् स्वरूपार्थे इत्यक्तिस्तिव् 'ये नवा' ( ४।२।६१ ) खनादीनां ये क्ङिति आ वा स्यात् । खायते खन्यते । चाखायते चङ्खन्यते । प्रखाय प्रखन्य । सायते सन्यते । सासायते संसन्यते प्रसाय । सनतेः प्रसन्य, सनोतेस्तनादित्वाद्यपीति नलुकि प्रसत्य । जायते जन्यते । जाजायते जंजन्यते । प्रजाय प्रजन्य । श्ये तु 'जाङ्गाजनोऽत्यादौ' ( ४।२।१०४ ) इति नित्यं जा आदेशः जायते । य इत्यकारान्तनिर्देशादिह न भवति । खन्यात् सन्यात्, अन्यथा यीति क्रियेत । केचिदत्रापीच्छन्ति खायात् सायात् । क्तितीत्येव । सन्यं जन्यम् । यङ्लुपि संसनीति संसंति संसातः संसनति । जंजनीति जंजन्ति । अनेन नस्य आत्वे जंजातः । 'गमहन०' इत्यलुकि जज्ञति जज्ञन्तीति वाक्ये शतरि 'जाङ्गा०' ( ४।२।१०४ ) इति जादेशे श्नश्चात ( ४।२।९६ ) इत्यलुकि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जंजत् । मनिंच् मंमन्यते ममंनीति मंमन्ति । 'यमिरमि०' (४।२।५५) इति नलुकि मंमतः मंमनति । मनूयि मंमनीति मंमातः मंमनति । तनूयी तंतनीति तंतन्ति । 'यमिरमी'त्यत्र तनादेरिति गणनिर्देशात् यङ्लुपि नकारलुप् न स्यात् । तंतान्तः तंतनति ॥ ४ ॥ अत्र विशेषमाह सूत्रम्

## रिरौ च लुपि ॥ ५ ॥ [ सि० ४।१।५६ ]

ऋमतां यङो लुपि द्वित्वे पूर्वस्य रिरौ रीश्चान्तः स्यात् । चरिकरीति चर्करीति चरीकरीति ३ । चरिकर्ति चर्कर्ति चरीकर्ति ३ । चरिकृतः चर्कृतः चरीकृतः । चरिक्रति ३ । ४ । अचरिकरीत् ३ । ५ । चरिकरामास ३ । ६ । चरिक्रियात् ३ । ७ । चरिकरिता ३ । ८ । नरिनर्ति ३ नरीनृतीति ३ । वरिवर्ति वरीवर्ति ३ । अवरिवृतीत् ३ । जरिगृधीति ३ । जरिगृद्धि ३ । अजरिघर्त् अजरिगृद्धाम् । रुत्वं लुग्दीर्घौ । अजर्घाः । जाग्रहीति-जाग्राढि जागृढ जागृहति । जाग्रहीषि-जाग्रक्षि । जाग्रहिता । पाप्रच्छीति । अनुनासिके चेति शत्वे पापृष्टि पापृष्टः पापृच्छति । पाप्रश्मि पापृच्छ्वः ॥ ५ ॥

इति यङ्लुगन्तप्रक्रिया ।

**'रिरौ०'** अन्तरङ्गानपि विधीन् बहिरङ्गापि लुब्बाधते इति न्यायात्प्रागेव यङो लुपि द्वित्वे चरिकरीति चरीकरीति चर्करीति । चरिकर्त्ति चरीकर्त्ति चर्कर्त्ति ईदागमे त्रयं तदभावे त्रयमिति । विति व्यञ्जनादौ षड्रूपाणि । अन्यत्र रूपत्रयम् । तत्सूचका यथार्हमङ्का इति सर्वत्र ज्ञेयम् । चर्कृतः ३ । चर्क्रति ३ । चर्करीषि ३ । चर्कृथः ३ । चर्कृथ ३ । चर्करीमि ६ । चर्कृवः ३ । चर्कृमः ३ । १ । चर्कृयात् ३ । २ । चर्करीतु ३ । चर्कृतात् ३ । हौ च । चर्कृहि ३ चर्कृतात् ३ । ३ । अचर्करीत् ३ । अचर्कः ३ । अचर्कृताम् ३ । अचर्करुः ३ । अचर्करीः ३ । अचर्कः ३ । ४ । अचर्कारीत् ३ । अचर्कारिष्टाम् ३ । ५ । चर्कराञ्चकार ३ । एवं बभूव ३ । आस ३ । ६ । चर्क्रियात् ३ । ७ । चर्करिता ३ । ८ । चर्करिष्यति ३ । ९ । अचर्करिष्यत् ३ । १० । शतरि चर्क्रत् ३ । स्स्ये चर्करिष्यत् ३ । भावकर्मणोः चर्क्रियमाणम् ३ । इटि चर्करिष्यमाणं ३ । ञिटि चरिकरिष्यमाणं ३ । चरिकराञ्चकृवान् ३ । बभूवान् ३ । आसिवान् ३ । भावकर्मणोः चरिकराञ्चक्राणं ३ आसानं ३ बभूवानं ३ । एवं यङ्लुपि स्तृ हृ धृ मृ भृ प्रभृतय ऋदन्ताः सर्वे धातवो ज्ञेयाः । व्रश्चो ग्रहव्रश्चेत य्वृति 'संयोगस्य०' (२।१।८८) इति शलोपे 'यजसृज०' (२।१।८७) इति चस्य षत्वे असदधिकारविहितत्वात्परे गुणे विधेये शलोपस्यासत्त्वाद्गुणाभावे वरिवृष्टि ३ वरिवृश्चीति ३ । चलिकृप्ति ३ । चलिकृपीति ३ । कृपो द्वित्वात्प्रागेव निरपेक्षत्वेन ऋरलृलमित्यस्य प्रवृत्तौ ततो द्वित्वे ऋकारापदिष्टमिति न्यायेन लृकारस्याप्यलृ चलिकल्पीति । लुपीति किम्? नरीनृत्यते । ऋमतामिति ह्रस्वः किम्? कॄ चाकरीति चाकर्त्ति चाकीर्त्तः चाकिरति । गॄ जागर्ति । अय्वृल्लेनदित्युक्तेर्यङ्लुप्यपि 'ग्रो यङि' (२।३।१०१) इति लत्वम् । तॄ तातर्त्ति । वरिवृतीति इति । एवं वरिवर्त्ति ३ । वरीवृत्तः ३ । वरीवृतति ३ । वरीवृतीषि ३ । वरीवर्त्सि ३ । वरीवृत्थः ३ । वरीवृत्थ ३ । वरीवृतीमि ३ । ६ । वरीवृत्वः ३ । वरीवृत्मः ३ । १ । वरीवर्त्तु ३ । वरीवृतीतु ३ वरीवृतात् ३ । हौ वरिवृद्धि ३ । वरीवृतात् ३ । ह्यस्तन्यां अवरिवर्त्तत् ३ अवरिवृतीत् ३ अवरिवृत्तां ३ अवरीवृतुः ३ । 'व्युक्तजक्षपञ्चतः' (४।२।९३) इत्यनः पुस् । अवरिवृतीः ३ । सिवो लुपि अवरिवर्त् ३ अवरिवृत्तं ३ अवरिवृत्त ३ अवरिवृत्तम् अवरिवृत्व ३ अवरिवृत्म ३ एवं सर्वेऽपि व्यञ्जनान्ता धातवो यङ्लुपि ज्ञेयाः । किन्तु अद्यतन्यादिषु इदुदृदुपान्त्यानामाशीर्यवर्जं सर्वत्रोपान्त्यगुणः स्यात् । यथा जिम,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अजेजेमीत् अजेजेमिष्टां अजेजेमिषुः ५ । जेजेमाञ्चकार । आमो क्त्विस्त्वाद्गुणः ६ । जेजिम्यात् ७ । जेजेमिता ८ । जेजेमिष्यति ९ । अजेजेमिष्यत् १० । अमोमोदीत् अमोमोदिष्टाम् अमोमोदिषुः ५ । मोमोदाञ्चकार ६ । मोमुद्यात् ७ । मोमोदिता ८ । मोमोदिष्यति ९ । अमोमोदिष्यत् १० । अवरिवर्त्तीत् अवरीवर्त्तीत् अवर्वर्त्तीत् । एवं सर्वत्र रूपत्रयं ज्ञेयम् । अवरिवर्त्तिषाताम् ३ । अवरिवर्त्तिषुः ३ । ५ । वरिवर्त्ताञ्चकार ६ । वरिवृत्त्यात् ७ । वरिवर्त्तिता ८ । वरिवर्त्तिष्यति ९ । अवरिवर्त्तिष्यत् १० । तथा इदुदृदुपान्त्यानां क्त्वादिप्रत्ययेषु शतृक्यक्तवर्जेषु गुणः कार्यः । जेजेमित्वा जेजेमिता जेजेमितुम् जेजेमाञ्चक्रवान् जेजेमाञ्चक्राणं । मोमोदित्वा मोमोदिता मोमोदितुम् मोमोदाञ्चक्रवान् । मोमोदाञ्चक्राणं । वरिवर्त्तित्वा वरिवर्त्तिता । वरिवर्त्तितुम् वरिवर्त्ताञ्चकवान् वरिवर्त्ताञ्चक्राणं । शत्रादौ तु न गुणः । जेजिमत् । जेजिम्यमानं । जेजिमितः २ । मोमुदत् मोमुद्यमानं मोमुदितः २ । वरिवृतत् वरिवृत्यमानं वरिवृत्तितः २ । सस्ये तु शतरि गुणः स्यात् । जेजेमिष्यन्नित्यादि । एवं क्षिमू नुदि कृषि वृषूप्रभृतयो ज्ञेयाः । ईदूदृदुपान्त्यानां तु न गुणः उपान्त्यलघोरभावात् । यथा अमेमीलीत् । अदोधूपीत् । 'पां पाने' इत्यस्य यङ्लुपि पापेति पापाति । 'श्रौति०' (५।२।१०८) इत्यत्र प्रकृतिग्रहणेन प्राप्तोऽपि अत्यादावित्यधिकारान्न पिबादेशः । शतरि तु पापेति इति वाक्ये द्वित्वापन्नस्य पिबादेशे 'शुक्रजक्षपञ्चतः' इत्यन्तोऽनादेशे पिबत् इति स्यात् । एवं घ्राध्मोरपि । क्ते पापितः २ । पापित्वा पापितुम् पापिता इत्यादि । अर्त्तेर्यङ्लुपि द्वित्वे ऋतोऽति 'रिरौ च लुपि' इति रागमे अर्क इति रूपम् १ । रिरी आगमे तु पूर्वस्यास्वरे य्वोरियुव् इति इयि अरियृ इति रूपं २ । एके तु पूर्वस्य य्वोरिति सामानाधिकरण्यव्याख्यानमाश्रित्येयादेशं नेच्छन्ति । तन्मते 'इवर्णादेः०' (१।२।२१) इति यत्वे अर्यृ इति रूपं ३ । एषु प्रथमं रूपं विभक्तिषु भाव्यते अररीति अरर्त्ति । अर्कृतः । 'इवर्णादे०' इति रत्वे रो रे लुकि पूर्वस्य दीर्घे च आरति । अररिषि अरर्षि अर्कृथः अर्कृथ । अररीमि अरर्मि अर्कृवः अर्कृमः १ । अर्कृयात् अर्कृयातां अर्कृयुः २ । अररीतु अरर्त्तु अर्कृतात् अर्कृतां आरतु । अर्कृहि अर्कृतात् अर्कृतं अर्कृत । अरराणि अरराव अरराम ३ । ह्यस्तन्यां दिवि स्वरादेस्तास्विति वृद्धौ ईदागमे गुणे आररीत् । ईदागमभावे गुणे व्यञ्जनादिति दिव्लोपे आरः । आर्कृतां । व्युक्तेति पुसि 'पुस्पौ' (४।२।३) इति गुणे आररुः । सिचि ईदागमे गुणे आररीः । ईदागमाभावे गुणे 'सेः स्द्धां०' (४।३।७९) इति सिचूलुकि आरः आर्कृतं आर्कृत । अम्वि आररम् आर्कृव आर्कृम ४ । अद्यतन्यां सिचि इटि ईति 'सिचि परस्मै समानस्य०' (४।३।४४) इति वृद्धौ 'इट०' (४।३।७१) इति सिच् लोपे आरारीत् आरारिष्टाम् आरारिषुः । आरारीः आरारिष्टं आरारिष्ट । आरारिषम् आरारिष्व आरारिष्म ५ । परोक्षाया आमि परोक्षाकार्याभावात् गुणे आरराञ्चकार आरराम्बभूवेत्यादि ६ । आशिषि 'रिः शक्या०' (४।३।११०) इति रिः 'रो रे लुग्०' (१।३।४१) इति र्लुकि दीर्घे च आरियात् आरियास्तां आरियासुः ७ । आरिता ८ । आरिष्यति ९ । आरिष्यत् १० । भावकर्मणोस्तु क्ये 'संयोगादृदर्त्तेः' (४।३।९) इत्यत्र तिवृनिर्देशात्तदनुवृत्तया 'क्ययङाशी०' (४।३।१०) इति गुणाभावे 'रिः शक्या०' इति रि आदेशे रो लुकि पूर्वस्य दीर्घत्वे च आरियते आरियेते आरियन्ते १ । क्ये रित्वादौ च आरियेत् आरियेयातां आरियेरन् २ । आरियतां आरियेतां ४ । अद्यतन्यास्ते ञिचि आरारि । ञिटिटोः आरारिषातां आररिषातां आरारिषत आररिषत । आरारिढ्वम् आरारिड्ढ्वम् आररिध्वम् ३ । ५ । आरराञ्चक्रे आरराम्बभूवे आररामाहे ६ । ञिटि आरारिषीष्ट इटि आररिषीष्ट आरारि-



Jain Education International For Personal & Private Use Only www.jainelibrary.org

षीयाष्टाम् आररिषीयाष्टां आरारिषीड्वम् ध्वम् ढ्वम् आररिषीध्वम् ३ । ७ । आरारिता आररिता ८ । आरारिष्यते आररिष्यते ९ । आरारिष्यत् आररिष्यत् १० । एवं अर्ङ **इति प्रथमरूपस्य रूपाणि समर्थितानि ।** अथ द्वितीयं अरियृ इति रूपं भाव्यते । अरियरीति अरियर्त्ति अरियृतः अयिग्रति १ । अरियृयात् २ । अरियरीतु अरियर्त्तु अरियृतात् ३ । आरियरीत् आरियः आरियारीत् आरियारिष्टाम् ५ । आरियाञ्चकारेत्यादि ६ । आरिग्रियात् ७ । अरियरिता ८ । अरियरिष्यति ९ । आरियरिष्यत् १० । भावकर्मणोस्तु क्ये आरिग्रियते १ । अरिग्रियेत २ अरिग्रियतां ३ । आरिग्रियत आरिग्रियेतां आरिग्रियन्त ४ । आरियारि आरियारिषातां आरियारिषत ५ । आरियराञ्चक्रे ६ । आरियारिषीष्ट आरियरिषीष्ट ७ । आरियारिता आरियरिता ८ । आरियारिष्यते आरियरिष्यते ९ । आरियारिष्यत आरियरिष्यत १० । **इति द्वितीयस्य अरियृ इति रूपस्य रूपाणि ।** अथ तृतीयं अर्यृरूपं भाव्यते । अर्यरीति अर्यर्त्ति अर्यृतः अर्य्रति १ । अर्यृयात् २ । अर्यरीतु अर्यृतु अर्यृतात् । अर्यृताम् अर्यृहि अर्यृतात् ३ । आर्यरीत् आर्यः ४ । आर्यारीत् आर्यरिष्टाम् ५ । आर्यराञ्चकार ६ । आर्य्रिताम् ७ । आर्यरिता ८ । आर्यरिष्यति ९ । आर्यरिष्यत १० । भावकर्मणोस्तु अर्य्रियते १ अर्य्रियेत २ । आर्य्रियतां ३ । आर्य्रियत ४ । आर्यारि आर्यारिषाताम् आर्यरिषाताम् ५ । अर्यराञ्चक्रे ६ । अर्यारिषीष्ट आर्यरिषीष्ट ७ । अर्यारिता-अर्यरिता ८ । अर्यारिष्यति-अर्यरिष्यति ९ । आर्यारिष्यत-अर्यारिष्यत १० । 'समो गमृच्छी'त्यत्रार्तेस्तिव् निर्देशात् यङ्लुपि नात्मनेपदम् । समरर्त्ति समररीति समरियर्त्ति समरियतीति । समर्यर्त्ति समर्यरीति । अरर्त्तीत्यादिवाक्ये शतरि द्वित्वे पूर्वस्य अत्वे रागमे धातोश्च रत्वे 'रो रे लु'गिति रलोपे पूर्वदीर्घत्वे च आरत् अरिग्रत् अर्यत् । मूलधातोस्तु शत्रादिषु ऋच्छन् समृच्छमानः । अर्यमाणं अरिष्यत् । आरिष्यमाणं अरिष्यमाणं । क्वसौ द्वित्वात्प्रागेव परत्वेन 'घसेकस्वरा०' ( ४।४।८२ ) इतीटि पश्चाद् द्वित्वे 'ऋतोऽत्' ( ४।१।३८ ) इत्यत्वे 'अस्यादे०' ( ४।१।६८ ) रित्यात्वे एकस्य स्थाने भवात् अल्पाश्रितो रत्वादेश इत्यवर्णस्येत्परं बाधित्वा 'इवर्णादेः' ( १।२।२१ ) इति रत्वे आरिवान् आरिवांसौ । काने आराणं । बहुस्वरत्वे तु नेट् आरियृवान् आरियृवांसौ । आर्यृवान् आर्यृवांसौ । तृधातोर्यङ्लुपि द्वित्वे पूर्वस्य ह्रस्वत्वे 'ऋतोऽत्' इति अत्वे 'आगुणावन्यादेः' ( ४।१।४८ ) इत्यात्वे ता तॄ इति जातम् । ततश्च तातर्त्ति तातरीति । 'ऋतां क्ङितीर' ( ४।४।११६ ) तातीर्त्तः तातिरति । तातरीषि तातर्षि तातीर्थः तातीर्थ । तातरीमि तातर्मि तातीर्वः तातीर्मः १ । तातीर्यात् २ । तातरीतु-तातर्त्तु-तातरीतात् ३ । अतातरीत् अतातः अतातीर्त्तां अतातीरुः ४ । अतातारीत् अतातारिष्टाम् अतातारिषुः ५ । तातिराञ्चकार ६ । तातीर्यात् ७ । तातरिता-तातरीता १८।८। तातरिष्यति-तातरीष्यति १८।९। अतातरिष्यत् २॥१०॥ तातरित्वा २ । अवतातीर्य । अनेकस्वरात् क्तस्य विहितत्वेन 'ऋवर्णश्र्यूर्णुगः कितः' (४।४।५७) इति इड्निषेधाभावात् इटि, वा इटो दीर्घे च तातिरितः तातिरीतः । तातिरितुं-तातिरीतुं । शतरि तातिरन् । एवं कॄ गॄ शॄ पॄप्रभृतयोऽपि सर्वे दीर्घऋकारान्ता यङ्लुपि ज्ञेयाः । किन्तु पॄगृप्रभृतीनां क्ङिति परे 'ओष्ठ्यादुर्' ( ४।४।११७ ) इति उरादेशः कार्यः । यथा तसि पापूर्त्तः । अन्ति पापुरति । आशिषि पापूर्यात् । क्ये पापूर्यते इत्यादि । पचेर्यङ्लुपि पापचीति पापक्ति पापक्तः पापचति । पापचीषि पापक्षि पापक्थः पापक्थ । पापचीमि-पापच्मि पापच्वः पापच्मः १ । पापच्यात् २ । पापचीतु पापक्तु पापक्तात् । ह्रौ पापग्धि-पापक्तात् ३ । अपापचीत्-अपापक् २ । अपापचीः अपापक् २।४। अपापचीत् अपापचिष्टाम् । पापचाञ्चकार ६ । पापच्यात् ७ । पापचिता

Jain Education International For Personal & Private Use Only www.jainelibrary.org

८ । पापचिष्यति ९ । अपापचिष्यत् १० । शतरि पापचत् । पापचती पापचिष्यत् । भावकर्मणोः पापच्यमानं पापचिष्यमाणं पापचाञ्चकृतवान् चकृवत् चकृषी । पापचामासिवान् मासिवत् मासुषी एते त्रयः शब्दास्त्रिषु लिङ्गेषु विद्वच्छब्दवत्पूर्वविभक्तिषु ज्ञेयाः । भावकर्मणोः पापचाञ्चक्राणं बभूवानं आसानं । पापचित्वा । पापचिता । पापचितुम् । पापचितः २ । पापचितव्यं । पापचनीयम् । दीव्यतेर्यङि देदीव्यते । यङ्लुपि दोदिवीति । 'अनुनासिके च०' (४।१।१०८) इति वस्य ऊटि गुणे च देद्योति । क्ङित्येवोङितिमते तु 'य्वो'रिति च लुकि देदेति देद्यूतः देदिवति । देदिवीषि देद्योषि देदेषि देद्यूथः देद्यूथ । देदिवीमि-देद्योमि देद्युवः देदिवः । अत्र वस्य विकल्पेनानुनासिकत्वात् वा ऊट् पक्षे 'य्वोः०' (४।४।१२१) इति वलोपश्च देद्यूमः १ । देदीव्यात् २ । देदिवीतु-देद्योतु-देदेतु देद्योतात्-देदेतात् । देद्योहि देदेहि देद्योतात् देदेतात् ३ । अदेदिवीत्-अदेद्योत् अदेदेत् अदेद्यूतां अदेदिवुः । अदेदिवीः अदेद्योः अदेदेः ४ । अदेदेवीत् अदेदेविष्टाम् ५ । देदिवाञ्चकार ६ । देदीव्यात् ७ । देदेविता ८ । देदेविष्यति ९ । अदेदेविष्यत् १० । जरीगृधीति (पृष्ठ ) इति गृधूच् ईदागमे 'लघ्वुपान्त्यस्य शिति स्वरे' (४।३।१४) इति गुणाभावे जरिगृधीति ३ । ईदागमाभावे गुणे जरीगर्धि ३ । जरीगृद्धः ३ । जरीगृध्यात् ३।२। जरीगृधीतु ३ जरीगर्धु ३ जरीगर्धां ३ । हौ जरीगृद्धि ३ जरीगृद्धात् ३ । ह्यस्तन्यां दिवि ईदागमे अजर्गृधीत् ३ । ईदागमाभावे 'लघोरुपान्त्यस्य' (४।३।४) इति गुणे 'व्यञ्जनादेः सश्च दः' (४।३।७८) इति दिवो लुपि 'धुटस्तृतीयः' (२।१।७६) इति धस्य दत्वे 'विरामे वा' (१।३।५१) इति प्रथमत्वे च अजर्घत् ३ अजर्घद् ३ अजर्गृद्धाम् ३ अजर्गृधुः ३ । सिचि ईदागमे अजर्गृधीः ३ । पक्षे 'सेः स्धां च रुर्वा' (४।३।७९) इति सिचो लुकि धस्य वा रुत्वे 'गडदबादे०' (२।१।७७) इत्यादि चतुर्थत्वे 'रो र०' इति रलुकि अतो दीर्घे च अजर्घाः ३ अजर्घद् ३ अजर्घत् ३ अजर्गृद्धम् ३ अजर्गृद्ध ३ अजर्गृद्धम् ३ अजर्गृध्व ३ अजर्गृध्म ३।४। अजर्गर्द्धीत् अजर्गर्धिष्टाम् ३।५। जर्गृधाञ्चकार ३ बभूव ३ आस ३।६। जर्गृध्यात् ३।७। जर्गर्द्धिता ३।८। जर्गर्द्धिष्यति ३।९। अजर्गर्द्धिष्यत् ३।१०। गृह्णातेर्यङ्लुपि जरीगृहीति ३ । अत्र 'लुप्यय्वृल्लेनत्' (७।४।११२) इत्यत्र य्वृद्वर्जनात् यङ्लुप्यपि य्वृद्वत्वति जरीगर्द्धि ३ जरीगृढः ३ जरीगृहति ३ । जरीगृहीषि ३ जरीघर्षि ३ जरीगृढः ३ जरीगृढ ३ । जरीगृहीमि-जरीगर्ह्मि ३ जरीगृह्वः ३ जरीगृह्मः ३।१। जरीगृह्यात् ३।२। जरीगृहीतु ३ जरीगर्ढु ३ जरीगृढात् ३ जरीगृढाम् ३ जरीगृहतु ३ । हौ जरीगृढि जरीगृढात् ३ । जरीगृढं ३ जरीगृढ ३ । जरीगृहाणि ३।३। अजरीगृहीत् ३ अजरीघर्ट् ३ अजरीघर्ड् ३ अजरीगृढां ३ अजरीगृहुः । अजरीघर्ट ३ अजरीघर्ड् ३।४। अजरीगृहीत् ३ । 'गृह्णोऽपरोक्षायां दीर्घः (४।४।३४) इत्यत्र गृह्ण इति लुप्तविकरणनिर्देशात् यङ्लुपि इटो दीर्घाभावे अजरीगृहीत् अजरीगर्हिष्टाम् ३ । अजरीगर्हिषुः ३ । अजरीगृहीः अजरीगर्हिष्टं ३ अजरीगर्हिष्ट ३ अजरीगर्हिषम् ३ अजरीगर्हिष्व ३ अजरीगर्हिष्म ३।५। जरीगर्हाञ्चकार ३।६। जरीगृह्यात् ७ । जरीगर्हिता ८ । जरीगर्हिष्यति ९ । अजरीगर्हिष्यत् १० । **कौमुद्यां** तु "गृह्ल ग्रहणे जर्गृहीति ३ जर्गर्ढि ३ जर्गृढः जर्गृहति ३ । अजर्घट् ३ । गृह्णातेस्तु जाग्रहीति जाग्राढि । तस्मादौ ङिन्निमित्तं सम्प्रसारणं तस्य बहिरङ्गत्वेनासिद्धत्वान्न रुगादयः । जागृढः जागृहति । जाग्रहीषि जाग्रक्षि । लुटि जाग्रहिता । ग्रहो लुटीति दीर्घस्तु न तत्रैकाच् इत्यनुवृत्तेः **माधवस्तु** दीर्घमाह । तद्भाष्यादिविरुद्धमित्युक्तम्" । **वृधूङ्** वरीवृधीति ३ वरीवर्द्धि ३ । ह्यस्तन्यां दिवि अवरीवृधीत् ३ । अवरीवर्द् २ । सिचि अवरीवृधीः ३ । धस्य वा रुत्वे अवरीवाः ३ । **स्पर्धि,**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पास्पर्द्धीति पास्पर्द्धि । ह्यस्तन्यां दिवि अपास्पर्द्धीत् दिवो लुकि अपास्पर्द् २ । सिचि अपास्पर्द्धीः । सिचो लुकि धस्य वा रुत्वे अपास्पाः अपास्पर्द् २ । **पूङ्** पोपोति पोपवीति पोपूतः । अत्यादेरित्यधिकारात् प्वादेरिति न ह्रस्वः । **प्रच्छंत्** 'लुप्यय्वृल्लेनत्' (७।४।११२) इत्यत्र य्वृद्वर्जनात् यङ्लुप्यपि य्वृति परिप्रुच्छीति ३ । य्वृति द्वित्वे 'स्वरेभ्यः' (१।३।३०) इति छस्य द्वित्वे 'अनुनासिके च०' (४।१।१०८) इति छद्वयस्यापि शत्वे उपान्त्यगुणे 'यज०' (२।१।८७) इति षत्वे परीपर्ष्टि ३ परीपृष्टः ३ । परीपृच्छति ३ । परीपृच्छीषि ३ । परीपर्क्षि ३ । न य्वृदित्यन्ये । पाप्रष्टि पाप्रच्छीति । पाप्रक्षि पाप्रच्छीषि पाप्रष्टः पाप्रष्ट । पाप्रश्मि पाप्रच्छ्वः पाप्रश्मः । **मस्जोंत् ।** मामज्यते मामजीति मामङ्क्ति । 'नो व्यञ्जनस्य०' (४।२।४५) इति नलुकि मामक्तः मामज्जति । '**हृय हर्य** क्लान्तौ च' चाद्गतौ । जाहयीति जाहर्ति । 'य्वोः प्वय् व्यञ्जने लुक्' (४।४।१२१) इति यलुक् जाहृतः जाह्रयति । जाहर्सि । यलुकि 'मव्यस्याः' (४।४।११३) इत्यात्वे जाहामि जाहावः जाहामः । 'हर्य गतिकान्त्यो'रिति **कौमुद्याम्** । जाहर्य्यति । ह्रौ जाहर्हि अजाहः अजाहर्त्तां अजाहर्युः । '**मुर्वै मव** बन्धने' मव्यविश्रिविज्वरित्वरेरुपान्त्येन (४।१।१०९) मव्यादीनामनुनासिकादौ क्वौ धुडादौ च प्रत्यये वकारस्योपान्त्येन सह ऊद्भवति । मव, मोमा मूः मुवौ मुवः । मूतिः । '**अव** रक्षणादिषु' औणादिको मन् ओम् । ऊः उवौ । ऊतिः । '**श्रिवू** गतिशोषणयोः' श्रिवू श्रोमा । श्रूः श्रुवौ । श्रुतः । श्रूतिः । '**ज्वर** रोगे' । ज्वर जूर्मा । जूः जुरौ जुरः । जूर्त्तिः । '**ञित्वरिष्** संभ्रमे' । **त्वर** तूर्मा । तूः तूरौ । तूर्णः २ । तूर्त्तिः । ज्वरत्वरेरुपान्त्यो वकारात्परः श्रिव्यविमवां तु पूर्वः । एवं चानेनोटादेशे तस्य 'नामिनो गुणोऽक्ङिति' (४।३।१) इति गुणे मामोति मामवीति मामूतः मामवति । मामोषि । मामोमि मामावः मामूवः । मामोतु मामूतात् । मामूहि २ । मामवानि । अमामोत् । अमामोः । अमामवम् । अमामाव अमामूम । अवः स्वरादित्वात् यङ् नास्ति । श्रिवः शेश्रोति शेश्रिवीति शेश्रूतः शेश्रिवति । एवं जाजूर्त्ति जाजूर्त्तः । तातूर्त्ति तातूर्त्तः । '**राल्लुक्**' (४।१।११०) रेफात्परयोर्धातोश्छकारवकारयोरनुनासिकादौ क्वौ धुडादौ च प्रत्यये लुक् स्यात् । शूटोऽपवादः । '**मुर्च्छा** मोहसमुच्छ्राययोः' । मोर्मा मूः मुरौ । मूर्त्तः २ । यङ्लुपि मोमोर्त्ति मोमूर्च्छीति मोमूर्त्तः मोमूर्च्छति । '**हुर्च्छा** कौटिल्ये' । होर्मा । हूः हुरौ । जोहोर्त्ति जोहूर्च्छीति जाहूर्त्तः । 'उर्वै मुर्वै थुर्वै दुर्वै धुर्वै इत्यादयो हिंसायाम्' । तार्मा । धार्मा । तूः तुरौ । धूः धुरौ । तूर्णः धूर्णः । यङ्लुपि तोतोर्त्ति तोतूर्त्तः तोतूर्वति । तोथोर्त्ति । दोदोर्त्ति । दोधोर्त्ति । यङि विवक्षिते 'अजेर्वी' वेवीयते । अस्य यङ्लुग् नास्ति । लुकापहारे विषयत्वासम्भवेन वीभावस्याऽप्रवृत्तेः ।

'यङ्लुबन्तप्रक्रियेयं दिङ्मात्रेणेति दर्शिता । वैयाकरणरूपेभ्यो विशेषः शेष उह्यताम्' ।

इति यङ्लुबन्तप्रक्रिया ।

यां शिष्योद्धुतकीर्त्तिकीर्त्तिविजयश्रीवाचकाहर्म्मणे
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः ।
तस्यां शासितसाधुशब्दसरणौ स्वोपज्ञसत्प्रक्रिया-
वृत्तौ णिक्प्रमुखस्फुटार्थघटनायुक्प्रत्ययप्रक्रिया ॥ १ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# अथ नामधातुप्रक्रिया ।

काम्यक्यन्णिङ्यङन्तानि क्विप्क्यङन्तानि यानि च ।
तानि नामानि धातुत्वं यान्ति ते नामधातवः ॥ १ ॥

अथ नामधातुप्रक्रियां निरूपयतुमाह । काम्येति प्रक्रिया स्पष्टा । काम्यादीन् प्रत्ययानाह । सूत्रम्

## द्वितीयायाः काम्यः ॥ १ ॥ [ सि० ३।४।२२ ]

द्वितीयान्तादिच्छायां काम्यो वा स्यात् । इदमिच्छति इदंकाम्यति ४ । ऐदंकाम्यीत् ५ । इदंकाम्याञ्चकार ६ । इदंकाम्यात् ७ । इदंकाम्यिता ८ । इदंकाम्यिष्यति ९ । ऐदंकाम्यिष्यत् १० ॥ १ ॥

'**द्विती०**' इच्छायामित्यादि सर्वं स्पष्टम् । ऐदंकाम्यिष्यत् इति । अत्र 'योऽशिति' ( ४।३।८० ) इति यस्य न लुक् । धातोर्व्यञ्जनात्परस्य योऽभावात् अत इत्यकारस्य लोपस्तु स्यादेव । समुदायधातोरदन्तत्वात् । एवं पुत्रमिच्छति पुत्रकाम्यति, स्त्रीकाम्यति वस्तुकाम्यति । 'चजः कगम्' ( २।१।८६ ) इति कत्वे वाकाम्यति । 'नामसिद०' ( १।१।२१ ) इति पदत्वम् । अनडुत्काम्यति । अत्र 'स्रंसध्वंस०' ( २।१।६८ ) इति ह्रो दः । 'उः पदान्ते०' (२।१।११८) इति व उत्वे द्युकाम्यति । श्रेयस्काम्यति । तेजस्काम्यति । अत्र 'रोः काम्ये' ( २।३।७ ) सः । हविष्काम्यति । धनुष्काम्यति । 'नामिनस्तयो षः' ( २।३।८ ) अव्ययस्य वर्जनात्सषयोरभावे अधःकाम्यति । बहिःकाम्यति । रोरभावे रेफस्य न सषौ वाःकाम्यति गीःकाम्यति धूःकाम्यति राजकाम्यति । गुणिकाम्यति । एतत्काम्यति । अदस्काम्यति इदंकाम्यति । किंकाम्यति । भवत्काम्यति । त्वत्काम्यति । मत्काम्यति । 'त्वमौ प्रत्ययोत्तर०' (२।१।११) इति मान्तयोस्त्वमौ युवां युष्मान्वा इच्छति युष्मत्काम्यति । अस्मत्काम्यति । स्वःकाम्यति । स्वस्तिकाम्यति । 'सर्वादयोऽस्यादौ' ( ३।२।६१ ) इति पुंवद्भावे सर्वामिच्छति सर्वकाम्यति । भवत्काम्यति । एककाम्यति । एवं क्यन्प्रत्ययेऽपि पुंवत्त्वं ज्ञेयम् । तथा ककारमियेष काम्याञ्चकार । अत्र काम्यस्यादन्तत्वादाम् सिद्धः । अन्यथा अनेकस्वरत्वाभावान्न सिद्ध्यति । णिगि पुत्रकाम्ययति । ङे अन्यस्येति प्रथमादारभ्य यथेच्छं द्वित्वे अपुपुत्रकाम्यत् । अपुतत्रकाम्यत् । सस्वरस्य काम्यस्य फलं समानलोपान्न सन्वद्भावः । शतरि पुत्रकाम्यत् । पुत्रकाम्यिता । पुत्रकाम्यितुम् । पुत्रकाम्यितः । विकल्पपक्षे तु सर्वत्र वाक्यं सिद्ध्यति । काम्येनैव कर्मण उक्तत्वाद्भावकर्त्रोरेव प्रयोगः । भावे एव आत्मनेपदं च । पुत्रकाम्यतेऽनेन पुत्रकाम्यत्यसौ । द्वितीयाया इति किम् ? इष्यते पुत्रः । भ्रातुः पुत्रमिच्छति आत्मनः पुत्रमिच्छति महान्तं पुत्रमिच्छति स्थूलं दर्शनीयमित्यादिषु तु सापेक्षत्वान्न भवति । नह्यन्यमपेक्ष्यमाणोऽन्येन सहैकार्थीभावमनुभवितुं शक्नोति । भ्रातुः पुत्रकाम्यतीत्यादि तु समर्थत्वाद्भवति । अघमिच्छति दुःखमिच्छति इत्यादिषु अपि नहि कोप्यात्मनोऽघादीच्छतीति परस्येत्यपेक्षितत्वात्सापेक्षत्वम् । कथं तर्हि पुत्रकाम्यतीत्यत्र स्वात्मीयता गम्यते ? अन्यस्याश्रुतत्वादिच्छायाश्चात्मविषयत्वात् ॥ १ ॥ इति काम्यः ॥

अथ **क्यन्** उच्यते । सूत्रम्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अमाव्ययात् क्यन् च ॥ २ ॥ [ सि० ३।४।२३ ]

**मान्ताव्ययवर्जाद्द्वितीयान्तादिच्छायां क्यन् काम्यश्च वा स्यात् ॥ २ ॥**

**'अमा०'** क्यन् काम्यश्चेति सूत्रे चकारग्रहणं काम्यार्थम् । अन्यथा मान्ताव्यययोः सावकाशः स क्यना बाध्येत । मान्ताव्ययवर्जनं किम् ? इदमिच्छति स्वरिच्छति इत्यादौ क्यन् न भवति किन्तु वाक्यमेव । काम्यो वा भवति । गोशब्दसन्ध्यक्षरवर्जस्वरनान्तेभ्य एव क्यनमिच्छन्त्यन्ये । गव्यति पुत्रीयति राजीयति । अन्यत्र न भवति । यमिच्छति किमिच्छति । नकारः क्यनीत्यत्र विशेषणार्थः । ककारः क्यग्रहणे सामान्यग्रहणार्थः । वा स्यादिति पक्षे वाक्यमपि भवति ॥ २ ॥

अत्रोपयोगिसूत्रम्

## क्यनि ॥ ३ ॥ [ सि० ४।३।११२ ]

**अवर्णान्तस्य क्यनि ईः स्यात् । पुत्रमिच्छति पुत्रीयति ४ । अपुत्रीयीत् अपुत्रीयिष्टाम् ५ । पुत्रीयामास ६ । पुत्रीयिता ८ । पुत्रीयिष्यति ९ ॥ ३ ॥**

'क्यनि' ईः स्यादिति । 'दीर्घश्च्वियङ्यक्क्येषु च' ( ४।३।१०८ ) इति सूत्रस्यापवादोऽयम् । पुत्रीयतीत्यादि स्पष्टम् । एवं मालीयति खट्वीयति । 'दीर्घश्च्वि०' इति दीर्घे निधीयति दधीयति अग्नीयति ओषधीयति पट्वयति । वस्तूयति 'ऋतो रीः' ( ४।३।१०९ ) दात्रीयति मात्रीयति पित्रीयति भ्रात्रीयति स्वस्रीयति रैयति गव्यति नाव्यति । 'य्यक्ये' ( १।२।२५ ) इति ओदौतोरवावौ । गार्ग्यमिच्छति गार्गीयति । **'आपत्यस्य क्यच्व्योः'** ( २।४।९१ ) व्यञ्जनात्परस्यापत्यस्य यस्य क्यच्व्यौ च लुक् स्यात् । क्य इति सामान्येन निर्देशात् क्यङोऽपि ग्रहणम् । आपत्यस्येति किम् ? संकाशेन निर्वृत्तं साङ्काश्यम् तदिच्छति साङ्काश्यीयति । व्यञ्जनादित्येव कारिकेयीयति एवं वात्सीयति । विद्वांसमिच्छति विद्वस्यति । राजीयति अत्र **'नं क्ये'** ( १।१।२२ ) नान्तं नाम क्ये परे पदं स्यात् । अत्रापि सामान्यग्रहणम् । ततश्च असत्परे इत्यधिकारस्य 'रात्सः' ( २।१।९० ) इति सूत्रावधिकत्वा'न्नाम्नो नोऽनह्नः' ( २।१।९१ ) इति सूत्रेनागतत्वादनेन विहिताया नलुकः क्यविधौ असत्त्वात् क्यनि ईकारः । एवं शमीयति । पथीयति । अर्हयति । अत्र 'रो लुप्यरि' ( २।१।७५ ) इति रः । 'नामसिद्० ' इत्यत्र अयिति प्रतिषेधेन पदान्ताभावात्क्रमेण उत्वगत्वकत्वाद्यभावे दिवमिच्छति दिव्यति । दृश्यति । वाच्यति । समिध्यति । गोदुह्यति । योषित्यति । महत्यति । तद्यति । यद्यति । एतद्यति । अदस्यति । भवत्यति । त्वद्यति । मद्यति । युष्मद्यति । अस्मद्यति । चतुर इच्छति चतुर्यति । अनडुह्यति । गीर्यति धूर्यति, भ्वादेरिति दीर्घः, नेत्यन्ये गिर्यति । धुर्यति । एवं क्यङि अपि पुंस्यति सर्पिष्यति अर्चिष्यति धनुष्यति । प्रतिनियतकर्मसम्बन्धे हि कर्मान्तरायोगादकर्मत्वम् । तेन भावे आत्मनेपदम् । पुत्रीयते । समिध्यते । समिध्यते । अत्र **क्यो वा** ( ४।३।९१ ) धातोर्व्यञ्जनात्परस्य क्यस्याशिति प्रत्यये परे वा लुक् स्यात् । अत्रापि क्यन्क्यङोर्ग्रहणम्, क्यङ्षस्तुनियतविषयत्वाद्व्यञ्जनात् प्राप्तिरेव नास्ति । एवमग्रेऽप्यशिति ज्ञेयम् । अशितीति किम् ? समिध्यति १ समिध्येत् २ समिध्यतु ३ असमिध्यत् । **केचित्तु** यकोपि लुग्विकल्पमिच्छति । भिषजिता भिषज्यिता । तन्मतसंग्रहार्थं ककारेणोपलक्षितो यू क्य् इति व्याख्येयम् । **अन्यस्त्वाह** शिष्य इवाचरिता शिषिता शिष्यितेति यद्यस्ति प्रयोगस्तदा कृतक्यपोऽपि ग्रहणं क्य इति व्यञ्जनात्षष्ठी अतो लुगि कृते लुगर्थो । अन्यथा हि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अतो लुगपवादः क्यलुक् विज्ञायेत । एवं 'योऽशिति' (४।३।८०) इति सूत्रेऽपि । एवं ह्यस्तन्यां महापुत्रमैच्छत् अमहापुत्रीयत् इन्द्रमैश्वर्यमौषधं वा ऐच्छत् ऐन्द्रीयत् । ऐश्वर्यीयत् औषधीयत् । ओस्राङ्गीमैच्छत् । ओस्रीयत् । विषयमैच्छत् अडागमे सयसितस्येत्यनेन षत्वाप्राप्तौ व्यसयीयत् ४ । अद्यतन्यां क्यो वा लोपे असमिध्यित्-असमिधीत् असमिध्यिष्टाम्-असमिधिष्टाम् ५ । समिध्याञ्चकार-समिधाञ्चकार । कीयाञ्चकारेत्यत्र क्यनः सस्वरत्वेनाम् सिद्धः ६ । समिध्यात् समिध्ययात् ७ । समिध्यिता समिधिता ८ । समिधिष्यति । अत्राल्लुकः स्थानित्वान्न गुणः । समिध्यिष्यति ९ । असमिधिष्यत्-असमिध्यिष्यत् १० । सनि 'अन्यस्ये' (४।१।८) इति प्रथमादेर्द्वित्वे पुपुत्रीयिष्यति । पुत्रीयियिषति । एवं सिसमिधिषति समिमिध्यिष्यति । इन्दिद्रियषति । अत्र नकारस्य संयोगादित्वात् 'न बदनं०' (४।१।५) इति नस्य न द्वित्वम् । आह्वायकमिच्छति आह्वायकीयति । आह्वाकीयितुमिच्छति आजिह्वायकीयिषति । णिगि पुत्रीययति । समिधयति । समिध्ययति । ङे, अपुपुत्रीयत् अपुतित्रीयत् अपुत्रीयियत् । अत्र अत इत्यनेन विषयेऽप्यकारलोपात्परनिमित्तत्वाभावात् स्वरस्येति स्थानित्वाभावात् यि इत्यस्य द्वित्वं न तु य इत्यस्य । एवं क्यङादिष्वपि ज्ञेयम् । पुत्रीययाञ्चकारेत्यादि । पुत्रीय्यात् । पुत्रीययिता । पुत्रीययिष्यति । पुत्रीययिष्यन् । पुत्रीयित्वा । पुत्रीयिता । पुत्रीयितुम् । पुत्रीयितः २ ॥ ३ ॥

अत्र विशेषे सूत्रम् ।

## आधाराच्चोपमानादाचारे ॥ ४ ॥ [ सि० ३।४।२४ ]

**मान्ताव्ययवर्जादुपमानाद्द्वितीयान्तादाधाराच्च नाम्न आचारे क्यन् वा स्यात् । पुत्रमिवाचरति पुत्रीयति छात्रम् । प्रासादे इवाचरति प्रासादीयति कुट्याम् ॥ ४ ॥**

**'आधारे०'** स्पष्टम् । द्वितीयान्तादित्यस्योदाहरणम् । पुत्रीयति छात्रमिति । एवं वस्त्रीयति कम्बलम् । पुत्रीयति स्थूलं दर्शनीयं वा । एके तु कर्तुः स्वसम्बन्धिन उपमानान्तात् द्वितीयान्तादाचारे क्विप्क्यनाविच्छन्ति तदभिप्रायेण चिन्तामणिमिवात्मानमाचरन् चिन्तामणीयन् तस्मै 'ॐ नमः पार्श्वनाथाय विश्वचिन्तामणीयते' इति सिद्धम् । वृत्तावन्तर्भावान्न कर्मणः पृथक्प्रयोगः । आधाराच्चेति—यथा प्रासादीयति कुट्याम् । एवं पर्यङ्कीयति मञ्चके, खट्वीयति भूमौ । आचरति अवहरतीत्यर्थः । उपमानादिति किम् ? छात्रादेर्मा भूत् । आधाराच्चेति किम् ? परशुना दात्रेणेवाचरति । उपमानस्य नित्यमुपमेयापेक्षत्वात् सापेक्षत्वेऽप्यसामर्थ्यं न भवति । पित्रीयति श्वशुरम् । मात्रीयति परदारान् 'ऋतो री'रिति रीः । शत्रूयति बन्धून् । कर्मण्यात्मनेपदं पुत्रीयते गुरुणा शिष्यः । स्वजनीयते परः साधुना । सनि तु अशिश्वियीषति वृषभं अश्वीयियिषति अश्वीयिषिषति । क्ये प्रासादीयते । ह्यस्तन्यां प्रासादीयत् । सनि प्रासिसादीयिषति । 'न प्रादि०'रित्यनेन प्रादेरुत्तर एव धातुरिति तस्याडागमो द्विर्वचनं भवतः । सौधीयित्वा प्रासादीय गतः । शेषं प्राग्वत् । इति क्यन् प्रत्ययः । प्रागुद्दिष्टोऽपि बहुवक्तव्यो णिज् 'सूचीकटाह'न्यायेन पश्चाद्व्याख्यास्यते इति क्रमप्राप्तं क्विप्प्रत्ययमाह ॥ ४ ॥ सूत्रम्

## कर्तुः क्विप् गल्भक्लीबहोडात्तु ङित् ॥ ५ ॥ [ सि० ३।४।२५ ]

**कर्तुः उपमानादाचारेऽर्थे क्विप् वा स्यात् । गल्भादिभ्यस्तु स ङित् । अश्व इवाचरति अश्वति प्रगल्भते क्लीबते होडते ॥ ५ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'कर्तु०'** कर्तुः उपमानादिति । कर्तृभूतं यदुपमाननाम तस्मादिति सामानाधिकरण्येन कर्तुरित्यत्र पञ्चमी व्याख्येया । अत्रैव सूत्रे मतांतरे षष्ठीव्याख्यानस्याभिधास्यमानत्वात् । **तथाहुः सूरयः** कर्तुरुपमानान्नाम्न आचारे क्विप् प्रत्ययो वा भवतीति । **सिद्धान्तकौमुद्यामप्युक्तम्**–उपमानात्कर्तुः सुबन्तादाचारे क्यङ् वा स्यादिति । उपमानस्याप्याचरणक्रियायां कर्तृत्वमस्ति । इवस्य क्रियासादृश्यार्थकत्वात् यथाश्व आचरति तथाचरति इत्यर्थात् अश्वतीति । एवं दधयति । गौरिवाचरति गवति । नावति । गोरिव नाव इवाचरणं गवा नावा अप्रत्ययः । राजेवाचरति राजनति । मधुलिडेवाचरति मधुलेहति । गोधुगिवाचरति गोदोहति । मालाति सर्पः । अरयति त्राता । नारीवाचरति नारयति पुमान् । रिपवति विधवति बन्धवति भ्रातरति रायति । अस्य **क्विपो** व्यञ्जनादित्वकित्त्वपित्त्वफलं नेष्यते । **तथाहुः श्रीसूरयः** क्विबिति पूर्वप्रसिद्धस्यानुवाद इति । तेन अरयतीत्यादिषु गुणः । 'नाम सिद्०' इति पदसंज्ञाभावात् राजनतीत्यादौ नलोपाभावः । अयमिवाचरति इदमति किमतीत्यादौ 'अहन् पञ्चम०' (४।१।१०७) इति दीर्घाभावश्च । **अन्ये** तु क्विपः कित्त्वाद्दीर्घमिच्छन्ति । इदामति कीमति । कम् कामति । शम् शामति । एवं राजानति । पन्था इवाचरति पन्थीनति मथीनति ऋभुक्षीणति । **इदमेव** मतान्तरमनुसृत्य व्यालः पश्वतीति **सिन्दूरप्रकरग्रन्थप्रयोगे** गुणाभावः समर्थनीयः । गल्भादिभ्यस्त्विवति ङित्त्वादात्मनेपदं होड इवाचरति होडते । होडो मूर्ख इति **क्रियारत्नसमुच्चये** । एवं अवगल्भते क्लीबते विहोडते । गल्भाञ्चक्रे अवगल्भाञ्चक्रे । यद्यपि 'गल्भि धार्ष्ट्ये' इत्यादिभिर्गल्भते इत्यादीनि सिद्ध्यन्ति परं गल्भाञ्चक्रे इत्यादौ परोक्षाया आम् न सिद्ध्यतीति गल्भादिशब्दग्रहणम् । प्रयोगस्य कर्तृप्रधानत्वेन कर्मविवक्षाभावात् भावे आत्मनेपदं क्यश्च । अश्व्यते एडकेन 'दीर्घश्व्यी'ति दीर्घे अरीयते बन्धुना । विधूयते मुखेन । 'रिः शक्या०' (४।३।११०) इति रत्वे पित्रीयते श्वशुरेण । 'य्यक्ये' (१।२।२५) इति क्यवर्जनादवादेशाभावे गोयते रासभ्या । अत्र 'आत्सन्ध्यक्षरस्य' (४।२।१) इत्यात्वं न । गव्यतीति क्यनन्तप्रयोगे आत्वादर्शनात् 'नं क्ये' (१।१।२२) इत्यत्र 'क्यः शिति' (३।४।७०) इति क्यस्याग्रहणात्पदान्ताभावान्नस्य लुगभावे राजन्यते भृत्येन । अश्वेत् २ । अश्वतु ३ । आश्वत् ४ । आश्वीत् । 'व्यञ्जनादेर्वोपान्त्यस्यातः' (४।३।४७) इति वा वृद्धौ अगावीत् अगवीत् । विः पक्षी स इति वाचारीत् अवावीत् । श्रीरिव श्रयति अश्रायीत् अश्रयीत् अयादेशे वृद्धिः । भावे आश्वि अमालायि अगावि ५ । प्राचः पूर्वस्माद्विधिरित्याश्रयणे स्वरस्य परे इत्यलुकः स्थानित्वे 'न धातोरनेक०' (३।४।४६) इत्यामि अश्वाञ्चकार । हंसाञ्चकार । द्वित्वेऽपि च कृते वृद्धौ जुगाव जुगुवतुः । जुगुविम । एवं विवाय विव्यतुः । शिश्राय शिश्रियतुः । कश्चित्तु प्रत्ययान्तादेकस्वरत्वादप्यामादेशमिच्छति गवाञ्चकार स्वाञ्चकार । भावे अश्वाञ्चक्रे जुगवे ६ । अश्व्यात् गव्यात् राजन्यात् । भावे अश्विषीष्ट ७ । अश्विता ८ । अश्विष्यति ९ । आश्विष्यत् १० । सनि श्वेर्द्वित्वे अशिश्विषति । अश्विषिषति । एवं जिहिंसिषति । जुगविषति । अश्वन्तं प्रयुङ्क्ते अश्वयति ङे आशश्वत् । अत्र श्वद्वित्वम् । गावयति । अजूगवत् । उरुरिवाचरतीति क्विप्लोपे णौ उरावयति । ङे औरिरवत् । द्वित्वे कृते पूर्वस्य लघोरिति न दीर्घः । स्वरादित्वात् शतरि अश्वन् । अश्विष्यन् । अश्वित्वा । अश्विता । अश्वितुम् । अश्वितव्यम् । अश्वितः २ । क्वसौ अशिश्विवान् अशिश्विवांसौ । एवं गवन् गविष्यन् इत्यादि । एके तु कर्तुः स्वसम्बन्धिन उपमानात् द्वितीयान्तात् क्विप्क्यङाविच्छन्ति । अश्वमिवात्मानमाचरति अश्वति गर्दभः । श्येनमिवात्मानमा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चरति काकः श्येनायते । तन्मतसंग्रहार्थं कर्त्तुरिति षष्ठी व्याख्येया । द्वितीयाया इति चानुवर्त्तनीयम् । एवं अ इवाचरति अति अतः अन्ति । परोक्षायां द्वित्वे दीर्घे 'आतो णव औः' ( ४।२।१२० ) इत्यौत्वे अनु आति 'इडेत्पुसि चातो लुक्' ( ४।३।९४ ) इत्यालुकि अतुः उः इति । एवं क इव कति । ख इव खति । परोक्षायां कक सख । मतान्तरे काञ्चकार खाञ्चकार । कविरिव कवयति । अकवायीत्-अकवयीत् । पितेव पितरति । आशिषि पित्रीयात् । भूरिव भवति । अत्र 'पिबैतिदा०'५ ( ४।३।६६ ) इति सिज्लोपो 'भुवो वः परोक्षाद्यन्योरि'त्यादि न भवति । तत्र धातुपाठस्थस्यैव ग्रहणात् अभावीत् । बुभाव । द्रुरिव द्रवति । णिश्रिद्रुस्तु इति ङो न भवति । अद्रावीत् ।

→ इति **क्विप्प्रत्ययः** । ←

अथ क्यङ्प्रत्यय उच्यते सूत्रम् ।

## क्यङ् ॥ ६ ॥ [ सि० ३।४।२६ ]

**कर्तुरुपमानादाचारे क्यङ् वा स्यात् । दीर्घश्च्वीति दीर्घे, हंसायते ४ । अहंसायीत् ५ । हंसायाञ्चक्रे ६ । हंसायिषीष्ट ७ । 'सो वा लुक् च' ( ३।४।२७ ) क्यङि । पयायते पयस्यते । 'ओजोप्सरसः' (३।४।२८) नित्यं सलुक् ओजायते । अप्सरायते । 'ऋतो रीः' ( ४।३।१०९ ) । मात्रीयते । क्यङ्मानिपित्तद्धिते इति पुंवद्भावे श्येनीवाचरतीति श्येतायते काकः ॥ ६ ॥**

'**क्यङ्**' हंसायते इत्यादि स्पष्टम् । पुरुष इवाचरति पुरुषायते स्त्री । सन्ध्यायतेऽलक्तः । गार्ग्य इवाचरति गार्गीयते । वात्सायते । अत्रा'ऽऽपत्यस्य क्यच्व्योः' इति यलोपः । चिन्तामणीयते । ग्रामणीयते । प्रभूयते सेवकः । विधूयते पित्रीयते रैयते गव्यते नाव्यते दधृष्यते मित्रद्रुह्यते मरुत्यते जलमुच्यते सम्राज्यते तद्यते यद्यते एतद्यते इदम्यते किम्यते भवत्यते, त्वद्यते सुतस्ते । मद्यते मद्भृत्यः । युष्मद्यते अस्मद्यते । एवं गल्भायते । क्लीबायते । होडायते । 'उदच उदीच्' ( २।१।१०३ ) 'अच्च प्राग् दीर्घश्च' ( २।१।१०४ ) इति सूत्रयोर्णिक्यवर्जनात् उदङ्ङिवाचरति उदच्यते प्रत्यच्यते । एवमुदञ्चमिच्छति उदच्यति प्रत्यच्यति । क्विप्क्यङोस्तुल्यविषयत्वादसत्युत्सर्गापवादत्वे पर्यायेण प्रयोगः । ककारः सामान्यग्रहणार्थः । ङकार आत्मनेपदार्थः । अत्र विशेषमाह '**सो०**' (३।४।२७) अत्र स इत्यावृत्त्या पञ्चम्यन्तं षष्ठ्यन्तं चाभिसम्बध्यते । सकारान्तात्कर्त्तुरुपमानादाचारेऽर्थे क्यङ् वा स्यात् । अन्त्यसकारस्य च लुग्वा स्यात् । पय इवाचरति पयायते पयस्यते । सरायते सरस्यते । चन्द्रमायते चन्द्रमस्यते । विद्वायते विद्वस्यते । अन्ये त्वप्सरस एव सलोपो नान्यस्य तेन अप्सरायते । अन्यत्र पयस्यते इत्याद्येवेत्याहुः । क्यङ्सिद्धौ लुगर्थं वचनम् । चकारो लुचः क्यङ्सन्नियोगार्थः । अत्रैव विशेषमाह सूत्रम् '**ओजो०**' ( ३।४।२८ ) ओजःशब्दो वृत्तिविषये स्वभावात्तद्वति वर्त्तते । ओजःशब्दादप्सरःशब्दाच्च कर्तुरुपमानभूतादाचारेऽर्थे क्यङ् वा सलोपश्च । ओजस्वीवाचरति ओजायते । अप्सरायते । अन्ये त्वोजःशब्दे शलोपविकल्पमिच्छन्ति । ओजायते ओजस्यते । अथात्र कार्यविशेषमाह 'ऋतो रीः' ( ४।३।१०९ ) इत्यादि स्पष्टम् । श्येतायते इति । श्येतेति सूत्रोक्तानां ङ्यन्तानां तो नत्वसिद्धानां श्येनीप्रभृतीनां 'क्यङ्मानि०' ( ३।२।५० ) इति कृतपुंवद्भावानां रूपाणि । श्येनीवाचरति श्येतायते । एनीव एतायते । हरिणीव हरितायते । भरणीव भरतायते । रोहिणीव रोहितायते । तत्र 'श्येनी शुभ्रा । एनी कर्बुरा शुभ्रा वा । हरिणी नीला । भरणी पाटला धूसरा



Jain Education International For Personal & Private Use Only www.jainelibrary.org

घृतवर्णा वा । रोहिणी रक्ता' इति **क्रियारत्नसमुच्चये** । एवं पट्वीव पटूयते । कुमारीव कुमारायते । गुर्वीव गुरूयते । सपत्नीव सपत्नायते । युवतिरिव युवायते । तरुणीव तरुणायते । पट्वीमृद्व्याविव पट्वीमृदूयते । 'तद्धिताककोपान्त्यपूरणाख्याः' ( ३।२।५४ ) इति पुंवद्भावनिषेधे धार्मिकायते । एकिकायते । पाचिकायते । कारिकायते । चतुर्थीयते । पञ्चमीयते । एकादशीयते 'तद्धितः स्वरवृद्धिहेतुररक्तविकारे' ( ३।२।५५ ) इति पुंवत्त्वाभावे माहेश्वरीयते । सौगतीयते । रक्तविकारे तु स्यात् । कौङ्कुमीव कौङ्कुमायते । 'स्वाङ्गाङ्ङीर्जातिश्चामानिनि' ( ३।२।५६ ) इति पुंवद्भावनिषेधेषु गात्रीयते वानरीयते ब्राह्मणीयते । भावकर्मणोः पुरुषायते कुटिलाभिः । राजायते विद्वद्भिः । ह्यस्तन्यां उत्सुक इवाचरत् औत्सुकायत ४ । अद्यतन्यां औत्सुकायिष्ट । दृषदिवाचारीत् अदृषदिष्ट अदृषयिष्ट । अत्र 'क्यो वा' ( ४।३।८१ ) इति क्यङो वा लुक् । भावकर्मणोः अदृषदि अदृषयि ५ । कयिवाचचार कायाञ्चकार । अत्र क्यनः सस्वरत्वेनाम् सिद्धः । ६ । दृषदिषीष्ट दृषयिषीष्ट ७ स्वरान्तात्तु क्यङो न लुक् पटायिता ८ । दृषदिष्यते दृषयिष्यते ९ । अदृषदिष्यत अदृषयिष्यत १० । सनि पुपुरुषायिषते पुरुरूषायिषते । उत्सुकायिषते । उत्सुकायितः २ । उत्सुकायित्वा उत्सुकायितुम् । उत्सुकायिता । उत्सुकायितव्यम् ॥ ६ ॥ अत्रोपयोगि सूत्रम् ।

## नं क्ये ॥ ७ ॥ [ सि० १।१।२२ ]

**नान्तं नाम क्ये परे पदं न स्यात् । राजीयति राजायते । य्यक्ये इत्ययादेशे गव्यति गव्यते ॥ ७ ॥**

'**नं क्ये**' अत्र क्ये इति क्यन्क्यङोर्ग्रहणम् । तत्र राजीयतीति क्यन उदाहरणं । राजायते इति क्यङ इति । अत्रादिशब्दसंसर्गात् अयं विशेषोऽवधेयः । '**च्व्यर्थे भृशादेः स्तोः**' ( ३।४।२९ ) भृशादिभ्यः कर्तृभ्यः च्व्यर्थे क्यङ् वा स्यात् । सकारतकारयोर्यथासम्भवं लुक् च । च्व्यर्थे इत्यनेन लक्षणया भवत्यर्थविशिष्टमतत्तत्त्वमुच्यते । करोतिस्तु कर्तुरित्यनेन व्युदस्तः, भवत्यर्थे च विधानात् क्यङन्तस्य क्रियार्थत्वम्; भवत्यर्थशब्दाप्रयोगश्च । अभृशो भृशो भवति भृशायते । अस्त्यर्थोऽपि भवत्यर्थ एवेति । अभृशो भृशः स्यात् भृशायते । एवं उन्मनायते वेहायते । अनोजस्वी ओजस्वी भवति ओजायते । अत्र तद्वद्वृत्तेरेव च्व्यर्थ इति धर्मप्रवृत्तेर्न भवति; अनोज ओजो भवति । कर्तुरित्येव भृशं करोति । च्व्यर्थ इति किम् ? भृशो भवति । प्रागतत्तत्त्वमात्रे च्वेर्विधानात् क्यङा च्विर्न बाध्यते । भृशीभवति । अर्थभेदात् अनेन क्यङ् । आचारक्यङपि न बाध्यते भृश इवाचरति भृशायते । एवं अनभिमना अभिमना भवति अभिमनायते ३ । अभ्यमनायत ४ । अभ्यमनायिष्ट ५ । अभिमनायाञ्चक्रे ६ । अभिमनायिषीष्ट ७ । अभिमनायिता ८ । अभिमनायिष्यते ९ । अभ्यमनायिष्यत १० । सनि अभिमिमनायिषते अभिमनिनायिषति । अभिमनायियिषते । णौ अभिमनाययति । ङे अभ्यममनायत् । अभ्यमनानायत् । अभ्यमनायियत् अत्र विषयेऽप्यल्लोपात्परनिमित्तकत्वाभावेनाल्लुकः स्थानित्वाभावात् यि इत्यस्य द्वित्वम् । क्त्वि अभिमनाय्य गतः । भृश उत्सुक शीघ्र चपल पण्डित आण्डर कण्डर फेन शुचि नील हरित मन्द मद्र भद्र शश्वत् संश्वत् तृपत् रेफत् रेहत् वेहत् वर्चस् ओजस् ( बृहद्वृत्तौ न ) उन्मनस् सुमनस् दुर्मनस् अभिमनस् । इति **पञ्चविंशतिको भृशादिगणः** । इति **च्व्यर्थक्यङ्** ॥ ७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथात्र विशेषमाह । सूत्रम्

## डाच् लोहितादिभ्यः षित् ॥ ८ ॥ [ सि० ३।४।३० ]

एभ्यः कर्तृभ्यश्च्व्यर्थे षित् क्यङ् स्यात् ॥ ८ ॥

'डाच्०' स्पष्टम् । एभ्य इति डाच्प्रत्ययान्तेभ्यो लोहितादिभ्यश्चेत्यर्थः ॥ ८ ॥

अत्रोपयोगि सूत्रम् ।

## क्यङ्षो नवा ॥ ९ ॥ [ सि० ३।३।४३ ]

**क्यङ्षन्तादात्मनेपदं वा स्यात् । पटपटायति-पटपटायते । लोहितायति लोहितायते इत्यादि ॥ ९ ॥**

'क्यङ्षो०' स्पष्टम् । पटपटायते इति । अपटत् पटत् भवति पटपटायति पटपटायते । अत्र 'अव्यक्तानुकरणादनेकस्वरात् कृभ्वस्तिना अनितौ द्विश्च' इति डाच् द्वित्वम् । 'डाच्यादौ' ( ७।२।१० १४९ ) इति पूर्वपदसम्बन्धिनस्तकारस्य लुक् च । एवं दमदमा घटघटा झटझटा मदमदा छमछमा कमकमा बणबणा फरफरा इत्यादयः । डाजन्तात् क्यङ्षविधानात् कृभ्वस्तिभिरिव क्यङ्षापि योगे डाज् भवति । अलोहितो लोहितो भवति लोहितायति लोहितायते । लोहित जिह्म श्याम धूम चर्मन् हर्ष गर्व सुख दुःख मूर्च्छा निद्रा कृपा करुणा इति त्रयोदशको **लोहितादिगणः** । बहुवचनमाकृतिगणार्थम् । तेन अमृतं यस्य विषायतीति सिद्धम्, अविषं विषं भवतीत्यर्थाद्विषस्यायस्तद्वदाचरतीति वा । तथा लम्ब शोभा लीला शब्द विभ्रमादयोपि ज्ञेयाः । तत्र शोभादयस्तद्वति वर्त्तमाना अवगन्तव्यास्तेन लम्बायमानं शोभायमानमित्यादि सिद्धम् । लोहितादिषु लोहितादेवेच्छन्त्यन्ये । षकारः 'क्यङ्षो नवा' इत्यत्र विशेषणार्थः । धूमादीनां दशानां स्वतश्चार्थवृत्तीनां प्रकृतिविकारभावाप्रतीतेश्च्व्यर्थो नास्तीति तद्वद्वृत्तिभ्यः प्रत्ययो भवति । अधूमवाम् धूमवान् भवति धूमायति धूमायते । इति **क्यङ्षप्रत्ययः** अत्र इत्यादि शब्दनिर्देशात् **'कष्टकक्षकृच्छ्रसत्रगहनाय पापे क्रमणे'** (३।४।३१) एभ्यः पञ्चभ्यो निर्देशादेव चतुर्थ्यन्तेभ्यः पापे वर्त्तमानेभ्यः क्रमणेऽर्थे क्यङ् स्यात् । कष्टाय कर्मणे क्रामति कष्टायते । एवं कक्षायते कृच्छ्रायते सत्रायते गहनायते । एभ्य इति किम्? कुटिलाय कर्मणे क्रामति । चतुर्थीनिर्देशः किम्? रिपुः कष्टं क्रामति । पाप इति किम्? कष्टाय तपसे क्रामति । क्रमणमत्र न पादविक्षेपः किन्तु प्रवृत्तिमात्रम् । द्वितीयान्तेभ्यः पापचिकीर्षायामित्यन्ये । कष्टं चिकीर्षति कष्टायते । **'रोमन्थाद्व्याप्यादुच्चर्वणे'** ( ३।४।३२ ) क्यङ् स्यात् । अभ्यवहृतं द्रव्यं रोमन्थः उद्गीर्य चवणं उच्चर्वणं । रोमन्थमुच्चर्वयति रोमन्थायते गौः उद्गीर्य चर्वयतीत्यर्थः । उच्चर्वण इति किम्? कीटो रोमन्थं वर्त्तयति उद्गीर्य बहिस्त्यक्तं द्रव्यं पृष्ठान्तेन निर्गतं वा द्रव्यं गुटिकां करोतीत्यर्थः । **'फेनोष्मबाष्पधूमादुद्वमने'** ( ३।४।३३ ) एभ्यश्चतुर्भ्यः कर्मभ्य उद्वमनेऽर्थे क्यङ् स्यात् । फेनमुद्वमति फेनायते । एवमूष्मायते बाष्पायते धूमायते । **'सुखादेरनुभवे'** ( ३।४।३४ ) साक्षात्कारोऽनुभवस्तस्मिन्नर्थे सुखादिभ्यः कर्मभ्यः क्यङ् वा स्यात् । सुखमनुभवति सुखायते । अनुभव इति किम्? सुखं वेदयते प्रसाधकश्चैत्रस्य मुखादिविकारेणानुमानेन निश्चिनोतीत्यर्थः । सुख दुःख तृप्र कृच्छ्र अस्र आस्र अलीक करण कृपण सोढ प्रतीप इत्येकादशकः **सुखादिगणः** । अत्र तृप्रं दुःखम् । अस्रमश्रुरुधिरं वा । अस्रमेवास्रं स्वार्थेऽण् । कृपणं दैन्यम् । **'शब्दादेः कृतौ वा'** ३२

Jain Education International For Personal & Private Use Only www.jainelibrary.org

( ३।४।३५ ) शब्दादिभ्यः कर्मभ्यः करोत्यर्थे क्यङ् वा स्यात् । णिजपवादः । शब्दं करोति शब्दायते । वैरायते कलहायते । वाशब्दो व्यवस्थितविभाषार्थः । तेन यथादर्शनं णिजपि भवति शब्दयति वैरयति । वाधिकारस्तु वाक्यार्थः । शब्द वैर कलह ओघ वेग युद्ध अभ्र कण्व मम मेघ अटा अट्या अटाट्या सीका सोटा कोटा पोटा प्रुष्वा सुदिन दुर्दिन नीहार इत्येकविंशतिकः **शब्दादिगणः** । तत्र कण्वं पापम् । सीका सीत्कारः । सोटा स्त्री । पोटा तु स्त्रीलक्षणा । प्रुषू दाहे वनि प्रुष्वा इति विशेषार्थसहितः क्यङ्प्रत्ययः ॥ ९ ॥

अथ कर्मणः करोत्यर्थे क्यन्प्रत्ययमाह । सूत्रम्

## तपसः क्यन् ॥ १० ॥ [ सि० ३।४।३६ ]

**अस्मात्कर्मणः कृतावर्थे क्यन् वा स्यात् । तपः करोति तपस्यति ॥ १० ॥**

**'तप०'** अत्र यदा व्रतपर्यायस्तपःशब्दस्तदा क्यन्कर्मणो वृत्तावन्तर्भूतत्वादकर्मकत्वम् । यदा तु सन्तापवचनस्तदा तु कर्मणो वृत्तावन्तर्भावेऽपि स्वकर्मणा सकर्मक एव । शत्रूणां तपः करोति तपस्यति शत्रूनिति । यथा व्याकरणसूत्रं करोति व्याकरणं सूत्रयति ॥ १० ॥

## नमोवरिवश्चित्रङोऽर्चासेवाश्चर्ये ॥ ११ ॥ [ सि० ३।४।३७ ]

**एभ्यः कर्मभ्यो यथासङ्ख्यमर्चादिष्वर्थेषु क्यन् वा स्यात् । नमस्यति । वरिवस्यति चित्रीयते ॥ ११ ॥**

**'नमो०'** देवेभ्यः नमः करोति नमस्यति देवान् । सेवार्थे वरिवस्शब्दः । वृणीते 'स्वरेभ्य इः' ( ६०६ ) इति इप्रत्यये वरिः सेवकस्तत्र वसतीति वरिवः सेवा । गुरूणां वरिवः करोति वरिवस्यति गुरून् । चित्रं आश्चर्यं करोति चित्रीयते । कस्येत्यविवक्षितेऽकर्मकत्वम्, जनस्येति विवक्षायां चित्रीयते जनमिति प्राग्वद्भवति 'चित्रीयते विस्मयते इत्यर्थः । विस्मापयते इत्यन्ये' इति **कौमुद्याम्** । ङकार आत्मनेपदार्थः, अवयवे कृतं लिङ्गं समुदायस्यापि विशेषकं भवतीति । अर्चादिष्विति किम् । नमः करोति । वरिवः करोति । नमोवरिवःशब्दमुच्चारयतीत्यर्थः । चित्रं करोति नानात्वमालेख्यं वा करोतीत्यर्थः । **ननु** नमस्यति देवानित्यत्र नमःशब्दसंयोगनिबन्धना चतुर्थी कस्मान्न भवति । उच्यते । नामधातूनामविवक्षितप्रकृतिप्रत्ययभेदानां धातुत्वादनर्थकोऽत्र नमःशब्दः, उपपदविभक्तेर्वाकारकविभक्तिर्बलीयसीति । एवं च नमस्करोति देवानिति वाक्येऽपि द्वितीया सिद्धा । **यद्येवं** नमस्करोति देवेभ्य इति न भवितव्यम् । **नैवम्**–करोतेर्नमःशब्दसम्बन्धेन देवपदेनाऽसम्बन्धात्, कस्मै इति त्वाकाङ्क्षायां देवेभ्य इति सम्बन्धात्, चतुर्थी सम्प्रदाने वेत्यदोष इति । अथात्र इत्यादिशब्दानुवृत्तेरिमे विशेषा ज्ञेयाः । **'अङ्गान्निरसने णिङ्'** ( ३।४।३८ ) अङ्गवाचिनः शब्दात्कर्मणा निरसनेऽर्थे णिङ् वा स्यात् । हस्तौ निरस्यति हस्तयते । पादयते ग्रीवयते । निरसन इति किम् ? हस्तौ करोति हस्तयति । कर्मण इति किम् ? हस्तेन निरस्यति । ङकार आत्मनेपदार्थः । **'पुच्छादुत्परिव्यसने'** ( ३।४।३९ ) पुच्छशब्दात्कर्मण उदसने पर्यसने व्यसने असने चार्थे णिङ् स्यात् । पुच्छमुदस्यति उत्पुच्छयते । पर्यस्यति परिपुच्छयते । व्यस्यति विपुच्छयते । अस्यति पुच्छयते । **'भाण्डात्समाचितौ'** ( ३।४।४० ) भाण्डात्कर्मणः समाचयनेऽर्थे णिङ् वा स्यात् । समाचयनं समा परिणा च द्योत्यते । भाण्डानि समाचिनोति सम्भाण्डयते । **'चीवरात्परिधानार्जने'**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

( ३।४।४१ ) चीवरात्कर्मणः परिधाने अर्जने चार्थे णिङ् वा स्यात् । चीवरं परिधत्ते परिचीवरयते समाच्छादनमपि परिधानम्, चीवरं समाच्छादयति संचीवरयते । चीवरमर्जयति चीवरयते । संमार्जनेऽप्यन्ये । चीवरं संमार्जयति संचीवरयते ॥ ११ ॥ क्यन्प्रत्यये विशेषमाह । सूत्रम्

## क्षुत्तृड्गर्द्धेऽशनायोदन्यधनायम् ॥ १२ ॥ [ सि० ४।३।११३ ]

**एष्वर्थेषु यथासङ्ख्यमशनायादयः क्यन्नन्ता निपात्यन्ते । अशनायति । उदन्यति । धनायति ॥ १२ ॥**

**'क्षुत्तृ०'** एष्वर्थेष्विति । अयं भावः ः क्षुधि गम्यमानायामशनशब्दस्य आत्वम् । तृषि गम्यायामुदकशब्दस्य उदन् इत्यादेशः । गर्द्धे गम्यमाने धनशब्दस्य आत्वं क्यनि परे निपात्यते । क्षुधितोऽशनमिच्छति अशनायति । तृषित उदकमिच्छति उदन्यति । गृद्धो धनमिच्छति धनायति । क्षुत्तृड्गर्द्धे इति किम् ? अशनीयति उदकीयति धनीयति दानाय ॥ १२ ॥

## वृषाश्वान्मैथुने स्सोऽन्तः ॥ १३ ॥ [ सि० ४।३।११४ ]

**आभ्यां मैथुनार्थाभ्यां क्यनि स्सोऽन्तः स्यात् । वृषस्यति गौः । अश्वस्यति वडवा ॥ १३ ॥**

**'वृषा०'** वृषस्यति अश्वस्यतीति वृषाश्वशब्दावत्र मैथुने वर्त्तेते । मनुष्यादावपि हि प्रयुज्येते मैथुनेच्छापर्यायौ वृषस्य अश्वस्येति । 'सा क्षीरकण्ठकं वत्सं वृषस्यन्ती न लज्जिता' शुनी गौश्च स्वं स्वमश्वस्यति 'लक्ष्मणं सा वृषस्यन्ती महोक्षं गौरिवागमत् । 'वृषस्यन्ती कामुकी स्यादि'त्यभिधानचिंतामणौ । मैथुन इति किम् ? वृषीयति अश्वीयति ब्राह्मणी । स्स इति द्विःसकारनिर्देशो दधिस्यतीत्यादौ षत्वनिषेधार्थः ॥ १३ ॥

## अस् च लौल्ये ॥ १४ ॥ [ सि० ४।३।११५ ]

**भोगेच्छातिरेको लौल्यं तत्र गम्ये क्यनि परे नाम्नः स्सोऽस् चान्तः स्यात् । द्विःसकारपाठान्नास्य षत्वम् । दधिस्यति दध्यस्यति ॥ १४ ॥**

**'अस्०'** दध्यस्यतीति । एवं मधुस्यति मध्वस्यति । क्षीरस्यति लवणस्यति । अस्विधानमनकारान्तार्थम् अकारान्तेषु हि 'लुगस्यादेत्यपदे' ( २।१।११३ ) इति लुकि ( सति ) विशेषो नास्ति । अन्यस्तु लुकममृष्यमाणः क्षीरास्यतीत्यादि मन्यते, तच्च न बहुसम्मतम् । लौल्य इति किम् ? क्षीरीयति दानाय ॥ १४ ॥

अथ प्रागुद्दिष्टो णिज्प्रत्ययो विधीयते । सूत्रम्

## णिज् बहुलं नाम्नः कृगादिषु ॥ १५ ॥ [ सि० ३।४।४२ ]

**कृगादीनां धातूनामर्थे नाम्नो णिज् बहुलं स्यात् । त्रन्त्यस्वरादेरित्यन्त्यस्वरादिलुकि मुण्डं करोति मुण्डयति छात्रम् । पटुमाचष्टे पटयति । वृक्षं रोपयति वृक्षयति । कृतं गृह्णाति कृतयति ॥ १५ ॥**

**'णिज्०'** बहुलग्रहणं प्रयोगानुसरणार्थम् । तेन यस्मान्नाम्नो यद् विभक्त्यन्ताद्यस्मिन् धात्वर्थे दृश्यते । तस्मात्तद्विभक्त्यन्तात्तद्धात्वर्थे एव भवतीति नियमः सिद्धः । मुण्डयति छात्रमिति । एवं मिश्रयत्योदनम् । श्लक्ष्णयति वस्त्रम् । लवणयति रूपम् । एष्वप्यक्रव्यर्थ एवेति **कश्चित्** । अमुण्डं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुण्डं करोति मुण्डयतीत्यादि । लघुं करोति लघयति । एवं छिद्रयति कर्णयति दण्डयति अङ्कयति अन्धयति । व्याकरणस्य सूत्रं करोति व्याकरणं सूत्रयति । अत्र सापेक्षत्वेऽपि गणपाठाण्णिज् इष्यते । द्वारस्य उद्घाटं करोति द्वारमुद्घाटयति । ननु व्याकरणशब्दाद्वाक्ये षष्ठी दृश्यते उत्पन्ने च प्रत्यये कथं द्वितीया ? । उच्यते । योऽसौ सूत्रव्याकरणयोः सम्बन्धः स उत्पन्ने प्रत्यये निवर्त्तते । सूत्रयति क्रियासम्बन्धात्तु द्वितीया । "सम्प्रोन्नेः सङ्कीर्णप्रकाशाधिकसमीपे" ( ७।१। १२५ ) इति प्रात् प्रकाशेऽर्थे कटप्रत्यये प्रकटस्तं करोति प्रकटयति । स्वाभिप्रायं प्रमाणयति । साक्षिणं कुतीर्थयति । पर्यन्तयति कुलम् । चिह्नयति दृष्टचरम् । संवर्गयति बन्धून् । खड्गयति दारुमिति । पाम्मिनामुल्लाघं करोति पाम्मिनमुल्लाघयति । त्रिलोकीं तिलकयतीत्याद्यपि द्रष्टव्यम् । अथ तपः करोति तपस्यतीत्यादिवत्कर्मणो वृत्तावन्तर्भूतत्वान्मुण्डिरकर्मकः प्राप्नोति । नैवं सामान्यकर्मान्तर्भूतं विशेषकर्मणा तु सकर्मक एव, मुण्डयति कं छात्रमिति । यद्येवं पुत्रीयतिरपि विशेषकर्मणा सकर्मकः प्राप्नोति पुत्रीयति कं छात्रमिति । सत्यम्, आचारक्यना तु बुद्धेरपहृतत्वादिच्छाक्यनन्तस्य विद्यमानमपि विशेषकर्म न प्रयुज्यते । पुत्रीयति छात्रमित्युक्ते पुत्रमिवाचरति छात्रमिति प्रतीतिर्भवति न तु पुत्रमिच्छतीति । तदुक्तम्–सदपीच्छाक्यनः कर्म तदाचारक्यना हृतं । कौटिल्येनैव गत्यर्थाभ्यासो वृत्तौ न गम्यते ॥ १ ॥ यथा जङ्गम्यते इत्यादौ यद्यपि भृशमभीक्ष्णं वा कुटिलं गच्छति । तथापि कुटिलं गच्छतीत्येव प्रतीयते न तु भृशाभीक्ष्ण्यमिति । मुण्डं बलीवर्दं करोतीत्युभयधर्मविधाने मुण्डं शुक्लं करोति इत्यनुवादे वाऽनभिधानान्न भवति । पटुमाचष्टे करोति वा 'नामिनोऽकलि०' ( ४।३।५१ ) इति वृद्धावन्त्यस्वरलोपे पटयति । पट्वीमाचष्टे करोति वा 'जातिश्च णी'ति पुंवत्त्वे वृद्धावन्त्यस्वरलोपे च पटयति । एवं च लघुं लघ्वीं वा लघयति । एनीमाचष्टे एतयति । श्येनीमाचष्टे श्येतयति । दरदमाचष्टे दारदयति । एवं सुखिनमाचष्टे करोति वा सुखयति । दुःखिनं दुःखयति । कुशलयति । वार्त्तयति । एवं प्रियमाचष्टे करोति वा प्रापयति । स्थिरं स्थापयति । स्फिरं स्फारयति । ऊरुं वरयति । गुरुं गरयति । बहुलं बंहयति । त्रपं त्रपयति । दीर्घं द्राघयति । वृद्धं वर्षयति । वृन्दारकं वृन्दयति 'प्रियस्थिरस्फिरोरुगुरुबहुलदीर्घतृप्रवृद्धवृन्दारकस्येमनि च प्रास्थास्फागरवरबंहत्रपद्राघवर्षवृन्दम्' ( ७।४।३८ ) इत्यनेन णिजि प्रियादीनां दशानां प्राद्या दशादेशा यथासङ्ख्यं स्युरिति । एवं 'पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः' ( ७।४।३९ ) पृथुं पृथ्वीं आचष्टे करोति वा प्रथयति । मृदुं मृद्वीं म्रदयति । भृशं भृशां कृशं कृशां दृढं दृढां परिवृढं परिवृढां आचष्टे करोति वा अनेन रत्वे 'जातिश्च णि०' ( ३।२।५१ ) इति पुंवद्भावे प्रथयति । म्रदयति । भ्रशयति । क्रशयति । द्रढयति । द्रढयित्वा । परिद्रढय्य गतः । परिव्रढयति । अपिप्रथत् अपप्रथत् । अमिम्रदत् अमम्रदत् । अबभ्रशत् । अचक्रशत् । अदद्रढत् । पर्यवव्रढत् । 'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रस्यान्तस्थादेर्गुणश्च नामिनः' (७।४।४२) स्थूलमाचष्टे करोति वा स्थवयति । दूरं दवयति । कथं तर्हि 'दूरयत्यवनते विवस्वती'ति । दूरमततीति दूरात्, दूरातं कुर्वतीत्यर्थः । युवानं यवयति । ह्रस्वं ह्रसयति । क्षिप्रं क्षेपयति । क्षुद्रं क्षोदयति । स्रग्विणमाचष्टे करोति स्रजयति । एवं ओजस्विनं ओजयति । गोमन्तं गवयति । त्वग्वन्तं त्वचयति । कुमुद्वन्तं कुमुदयति । अत्र विन्मतोर्णीष्ठेयसौ लुपिति विन्मतोर्लुप् । कर्तृमन्तमाचष्टे करयति । कर्त्तारमाचष्टे करयति । पयस्विनीं पयस्विनं वा पययति । वसुमन्तं वसयति । एषु पूर्वेण विन्मतोर्लुपि पश्चात् 'त्र्यन्त्यस्वरादेः' ( ७।४।४३ ) इति त्रिशब्दस्यान्त्यस्वरस्य च लुक् । एवं सङ्ग्रामन्तं करोति सङ्ग्रामयति । मातरं भ्रातरं वाचष्टे मातयति । भ्रातयतीत्यत्र त्वव्युत्पन्नस्य

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तृशब्दस्य लोपाभावः । स्त्रीमाचष्टे स्त्रावयति । रै राययति । गो गवयति । नौ नावयति । सूत्रे ङीस्याद्युदुद्स्वरे एव वस्योत्वं भवतीत्युक्तत्वाद्वस्योत्वाभावे नैकस्वरस्येत्यन्त्यस्वरादिलोपनिषेधे 'ञ्णिति' (४।३।५०) इत्युपान्त्यवृद्धौ श्वानयति । ङे अशश्वानत् । **कौमुद्यां** तु "श्वानमाचष्टे शावयति 'नस्तद्धिते' इति टिलोपो भत्वात्सम्प्रसारणम् । अन्ये तु नस्तद्धिते इति नेहातिदिश्यते । इष्टनि तस्यादृष्टत्वात् । ब्रह्मिष्ठ इत्यादौ टेरित्यस्यैव प्रवृत्तेस्तेन शुनयतीति रूपमाहु"रित्युक्तम् । विद्वांसमाचष्टे 'कसुष्मतौ च' (२।१।१०५) इति सूत्रे णिक्यवर्जनादुषादेशाभावेऽन्त्यस्वरादिलोपे विद्वयति । ङे अविविद्वत् । **कौमुद्यां** तु "सम्प्रसारणे वृद्धावावादेशे विदावयतीत्यन्ये । नित्यत्वाट्टिलोपात् प्राक्सम्प्रसारणमन्तरङ्गत्वात्पूर्वरूपम् । टिलोपः । विदयतीति परे" इत्युक्तम् । 'उदच उदीच्' (२।१।१०३) 'अच प्राग् दीर्घश्च' (२।१।१०४) इति यो णिक्यवर्जनात् उदञ्चमाचष्टेऽन्त्यस्वरादिलोपे उदयति । ङे उदायियत् । प्रत्यञ्चं प्रताययति अप्रतायियत् । 'सहसमोः सध्रिसमी' सम्यञ्चमाचष्टे समाययति । अससमायत् । 'तिरसस्तिर्यति' तिराययति । अञ्चेष्टिलोपेनापहारेपि बहिरङ्गत्वेनासिद्धत्वात् तिरसस्तिरिः । ङे अतितिरायत् । सध्र्यञ्चं सध्राययति । अससध्रायत् । विष्वग्द्र्यञ्चमाचष्टे विष्वग्द्राययति । अविविष्वग्द्रायत् । देवद्र्यञ्चं देवद्रायति । अदिदेवद्रायत् । अदद्र्यञ्चं अदद्राययति । आदद्रायत् । अमुद्र्यञ्चममुद्राययति । आमुमुद्रायत् । भुवं भावयति अबीभवत् । भ्रुवं अबुभ्रुवत् । श्रियं श्रीमतीं श्रीमन्तं वाचष्टे श्राययति । अशिश्रायत् । गां अजूगवत् । रायं अरीरवत् । नावं अनूनवत् । स्वश्वं स्वश्वयति असस्वश्वत् इत्यादि । **कौमुद्यां** तु 'उदञ्चमाचष्टे उदीचयति उदैचिचत् । प्रत्यञ्चं–प्रतीचयति इकोऽसवर्णे इति प्रकृतिभावपक्षे–प्रति–अचिचत् । सम्यञ्चमाचष्टे समीचयति । सम्यचिचत् । समि अचिचत्' इत्याद्युक्तमिति ज्ञेयम् । 'अल्पयूनोः कन्वा' (७।४।३३) अल्पं युवानं वाचष्टे कनयति पक्षे अल्पयति यवयति । प्रशस्यमाचष्टे करोति वा श्रयति 'प्रशस्यस्य श्रः' (७।४।३४) वृद्धमाचष्टे ज्ययति । 'वृद्धस्य च ज्यः' (७।४।३५) । बाढं साधयति । अन्तिकं नेदयति । 'बाढान्तिकयोः साधनेदौ, (७।४।३७) बहुमाचष्टे करोति वा भूययति । 'बहोर्णीष्ठे भूय्' (७।४।४०) चिरमाचष्टे चिरं करोति चिरयति । वृक्षमाचष्टे रोपयति वा वृक्षयति । कृतं गृह्णाति कृतयति । एवं वर्णयति । त्वां मां वाचष्टे त्वदयति मदयति । अत्र नित्यत्वादन्त्यस्वरादिलोपात् प्रागेव अदं विश्लेष्य त्वमादेशौ पश्चादप्यन्त्यस्वरादिलोपो 'न लोपात् स्वरादेश' इति न्याया'ल्लुगस्यादेत्यपदे' इत्येव प्रवर्त्तते । ततश्च नैकस्वरस्येति निषेधात् 'ञ्णिति' इति वृद्धिरपि न अधातुत्वात् । युवां युष्मान्वाचष्टे युष्मयति अस्मयति । त्वचं गृह्णाति त्वचयति । त्वचशब्दोऽदन्तस्त्वक्पर्यायः । व्यञ्जनान्तस्य तु 'ञ्णिति' इति वृद्धौ त्वाचयति इति रूपं स्यात्तच्चानिष्टमिति न कृतम् । अत्र व्यञ्जनान्तं त्वक्शब्दं परित्यज्य स्वरान्तपाठेन ज्ञाप्यते; नाम्नोऽप्यतोऽन्त्यस्योपान्त्यस्य अतो 'ञ्णिति' इति सूत्रेण वृद्धिर्भवतीति **उत्पलमतं** स्वस्यापि कश्चित्संमतमस्तीति । यथा त्वां मां वाचष्टे अत्र परत्वात्पूर्वमन्त्यस्वरादिलोपे त्वमादेशेऽन्त्यस्याकारस्य वृद्धौ प्वागमे त्वापयति । मापयतीति । ननु कथं कारापयति वन्दापयति कथापयति लिखापयतीत्यादि । उच्यते । **महाकविप्रयुक्ता** एते प्रयोगाः क्वापि न दृश्यन्ते । यदि च कचन सन्ति तदेवं समर्थनीयाः । करणं कारस्तमनुयुङ्क्ते त्वं कुरुषे चेति प्रेरयतीत्यर्थः । **उत्पलमतेन** अतो 'ञ्णिति' इति वृद्धौ प्वागमे भूत्वेन कारापयतीत्यादि । रूपं दर्शयति रूपयति । रूपं निध्यापयति निरूपयति । लोमान्यनुमार्ष्टि अनुलोमयति । तूस्तानि विहन्ति उद्धन्ति वा वितूस्तयति उत्तूस्तयति केशान् विजटीकरोतीत्यर्थः । तूस्तं केश इत्येके । जटीभूताः केशा इत्यन्ये । पापमित्यपरे । इति **कौमुद्याम्** ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वस्त्रं वस्त्रेण वा समाच्छादयति संवस्त्रयति । वस्त्रं परिदधाति परिवस्त्रयति । तृणान्युत्क्षुत्य शातयति उत्तृणयति । हस्तेनायति क्रामति अतिहस्तयति एवमश्वयति । वर्मणा सन्नह्यते संवर्मयति । तुलां रोपयति तुलयति कनकम् । वीणया उपगायति उपवीणयति । सेनयाऽभियाति 'स्थासेनी'ति षत्वे अभिषेणयति । चूर्णैरवध्वंसयति अवकिरति वा अवचूर्णयति । तूलैरनुकुष्णात्यवकुष्णात्यनुगृह्णात्यवगृह्णाति वा अनुतूलयति अवतूलयति । तूलैः कृत्वा अनुकूलमवाक् च यथा भवति; एवं अन्तरवयवान् बहिर्निष्कासयति पक्ववर्णादाविवेति वास्या छिनत्ति वासयति । परशुना परशयति असिना असयति । श्लोकैरुपस्तौति उपश्लोकयति । हस्तेनापक्षिपति अपहस्तयति । अश्वेन संयुनक्ति समश्वयति । गन्धेनार्चयति गन्धयति । एवं पुष्पयति । बलेन सहते बलयति । शीलेनाचरति शीलयति । एवं सामयति । सान्त्वयति । छन्दसा उपचरति उपमन्त्रयते वा उपच्छन्दयति । पाशेन संयच्छति संपाशयति । पाशं पाशाद्वा विमोचयति विपाशयति । शूरो भवति शूरयति । वीर उत्सहते वीरयति । कूलमुल्लङ्घयति उत्कूलयति । कूलं प्रतीपं गच्छति प्रतिकूलयति । अनुकूलयति । लोष्टानवमर्दयति अवलोष्टयति । पुत्रं सूते पुत्रीयतीत्यादि । आख्यानं नलोपाख्यानं कंसवधं सीताहरणं रामप्रव्रजनं राजागमनं मृगरमणम् । आरात्रिविवासमाचष्टे इत्यादिषु इन्द्रियाणां जयं क्षीरस्य पानं देवानां यागं धान्यस्य क्रयं धनस्य त्यागं ओदनस्य पाकं करोतीत्यादिषु बहुवचनान्न भवति । इन्द्रियजयं करोतीत्यादि समस्ताभिधानेऽपि न भवति । बहुलवचनादेव । अथ हस्तौ निरस्यति हस्तयते इत्यादिवदुत्पुच्छयते इत्यादावप्युपसर्गप्रयोगः प्राप्नोति । नैवम् । यत्रानेकविशेषेण विशिष्टा क्रियाप्रत्ययार्थस्तत्र विशेषाभिव्यक्तये युक्त उपसर्गप्रयोगः यथा विपाशयति । संपाशयति । इति । पाशिक्रिया हि विमोचनसंयमनाद्यनेकविशेषणविशिष्टा सती प्रत्ययवाच्या । ततश्चोपसर्गप्रयोगाभावे एकतरेणापि विशेषणेन वैशिष्ट्यं न प्रतीयते । यत्र त्वेकविशेषणविशिष्टा क्रिया प्रत्ययार्थस्तत्र सन्देहाभावादुपसर्गो न प्रयुज्यते । यथा श्येन इवाचरति श्येनायते । बाष्पमुद्वमति बाष्पायते । हस्तौ निरस्यति हस्तयते । पुत्रमिवाचरति पुत्रीयति । यद्येवमतिहस्तयति उपवीणयतीत्यादावेकैकविशेषणविशिष्टत्वादुपसर्गप्रयोगो न प्राप्नोति । नैवम् । अत्र णिच्प्रत्ययस्य करोति आचष्टे अतिक्रामतीत्याद्यनेकार्थत्वात् सन्देहे तदभिव्यक्त्यर्थं उक्त उपसर्गप्रयोगः । यत्र पुनरेकोपसर्गविशिष्टा क्रिया प्रत्ययार्थस्तत्र शब्दशक्तिस्वाभाव्यादेक एवोपसर्गार्थः प्रत्ययार्थेऽन्तर्भवति, द्वितीयस्तूपसर्गेणैव प्रत्याय्यते । यथा भाण्डं समाचिनोति सम्भाण्डयते । वस्त्रं वस्त्रेण वा समाच्छादयति संवस्त्रयति । तत्रापि शब्दशक्तिस्वाभाव्यात् प्रत्ययेनाऽर्थः प्रतिपाद्यते । न तु समर्थ इति । आभण्ड्यते इत्यादि न भवति । भावकर्मणोः मुण्ड्यते प्रकट्यते । इत्यादि । ह्यस्तन्यां अमुण्डयत् । अभ्यषेणयत् ४ । अद्यतन्यां अमुमुण्डत् । अभ्यषिषेणत् । 'अन्यस्य' इति यथेच्छं द्वित्वे अपप्रकटत् अप्रचकटत् अप्रकटिटत् । स्वापमकरोत् असस्वापत् । नाम्नोऽपि 'स्वपेर्यङ्ङे च' ( ४।१।८० ) इति य्वृतमिच्छन्त्यन्ये । असुषुपत् । अर्यमाख्यत् अयर्यमत् । अददृषत् । राजानमतिक्रान्तवान् अत्यरराजत् । लोमान्यनुमृष्टवान् अन्वलुलोमत् । स्वामिनमाख्यत् असस्वामत् । तादृशमाख्यत् अततादृत् । मातरमाख्यत् अममातद् । स्वादुकृतवान् असिस्वदत् । पटुं लघुं कपिं हरिं वा आख्यत् अपीपटत् अलीलघत् अकीकपत् अजीहरत् । अत्रेकारोकारयोः पूर्वमेव वृद्धौ ततोऽन्त्यस्वरादिलोपे समानलोपित्वाभावात् 'उपान्त्यस्यासमानलोपि०' ( ४।३।३५ ) इति यथासम्भवमुपान्त्यह्रस्वो असमानलोपे सन्वल्लघुनि ङे' ( ४।१।६३ ) इति सन्वद्भावश्च सिद्धः । अन्ये तु नाम्नो वृद्धिमनिच्छन्त इकारोकारयोरेव लोपे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

समानलोपित्वात्सन्वद्भावाभावे अपपटत् अललघत् अककपत् अजहरत् इत्याद्येव स्यादित्याहुः । इं उं वा आख्यत् वृद्धौ स्वरादेरिति द्वितीयस्य द्वित्वे च आयियत् आविवत् । ओतुमाख्यत् स्वरलोपस्य स्थानित्वे न तु द्वित्वे औतुतत् । गोनौर्यद्वा गोसहिता नौ 'मयूरव्यंसक०' ( ३।१।११६ ) इति मध्यलोपिसमासे गोनौः तामाख्यत् अन्त्यस्वरादेरिति औलोपे अजूगुनत् । औतःस्थानित्वेनोपान्त्यत्वाभावान्न ह्रस्व इति **केचित्** । अजूगोनत् । वहेः क्ते ऊढस्तमाख्यत् औजढत् । अत्र परे घित्वे 'हो धुट् पदान्ते' ( २।१।८२ ) इत्यस्यासत्त्वे तदाश्रितत्वात् 'अधश्चतुर्थात्तथोर्धः' ( २।१।७९ ) इत्यस्याप्यसत्त्वे उत्वधत्वयोरसत्त्वादन्त्यस्वरादिलोपस्य च द्वित्वे स्थानित्वादकारेण सह नाम्नो द्वितीयादिति ह्वेति द्विर्वचनम् । एवमूढिमाख्यत् औजिढत् । **केचित्तु** अन्त्यस्वरादिलोपस्य स्थानित्वमनिच्छन्तो ह्वि इति द्वित्वे ऊढमूढिमाख्यत् औजिढदित्येव मन्यंते । ढि इत्यस्य द्वित्वमित्यन्ये । औडिढत् औडढत् इति **कौमुद्याम्** । भावकर्मणोः अमुण्डि ञिटि अमुण्डिषातां इटि अमुण्डयिषातां अमुण्डिध्वम् अमुण्डिड्ढ्वम् अमुण्डयिध्वम् ड्ढ्वम् । एवं अप्रकटि अकलि अहलि अपटि अलघि अकपि अहरि अगोनि । कर्मकर्त्तरि अमुमुण्डत् स्वयमेव पोतः । ५ । परोक्षायां मुण्डयाञ्चकार बभूव आस । प्रकटं दृषदं पटुं कलिं लघुं कपिं हरिं वाचख्यौ चकार वा प्रकटयाञ्चकार । दृषयाञ्चकार । एवं पटयां कलयां लघयां कपयां हरयांचकार । भावकर्मणोः मुण्डयाञ्चक्रे बभूवे आहे इत्यादि । आशीः मुण्ड्यात् दृषद्यात् पट्यात् । भावकर्मणोः ञिटि मुण्डिषीष्ट । इटि मुण्डयिषीष्ट । एवं दृषदयिषीष्ट दृषदिषीष्टेत्यादि ७ । श्वस्तन्यां मुण्डयिता दृषदयिता । पटयिता । भावकर्मणोः मुण्डयिता मुण्डिता ८ । मुण्डयिष्यति दृषदयिषति । भावकर्मणो मुण्डयिष्यते ९ । अमुण्डयिष्यत् । भावकर्मणो अमुण्डयिष्यत १० । सनि मुमुण्डयिषति । दिदृषदयिषति । शुशूरयिषति । स्वापं चिकीर्षति सिष्वापयिषति । अत्र 'स्वपो णावुः' ( ४।१।६२ ) इति पूर्वस्य उः । णेर्घञा व्यवधानात् । इं उं वाख्यातुमिच्छति आयिययिषति आविवयिषति । उनुं उडुं वा आख्यातुमिच्छति उनुनयिषति । उडुडयिषति । अत्रान्त्यस्वरलोपस्य स्थानित्वेन नुडु द्वित्वम् । प्रकटं कर्तुमिच्छति पिप्रकटयिषति । प्रचिकटयिषतीत्यादि । कवलं धवलं च कर्तुमिच्छति चिकवलयिषति । दिधवलयिषति । सेनयाभियातुमिच्छति अभिषिषेणयिषति । अभ्यषिषेणयिषीत । णिगि तु मुण्डयन्तं प्रयुङ्क्ते णेर्लुकि मुण्डयति पटयतीत्याद्येव प्राग्वत् । मुण्डयित्वा । सप्रत्ययस्य प्रादेर्धातुत्वाद्यभावे प्रकटयित्वा । प्रकटयिता । प्रकटयितुम् । प्रकटयितव्यम् । सेट्क्तयोरिति णेर्लुकि प्रकटितः । अत्रादिशब्दसंसर्गात् **'व्रताद्भुजितन्निवृत्त्योः'** ( ३।४।४३ ) व्रतं शास्त्रविहितो नियमः । व्रतशब्दाद्भोजने तन्निवृत्तौ च वर्त्तमानात् कृगादिष्वर्थे णिप्रत्ययो भवति बहुलम् । पय एव मया भोक्तव्यमिति व्रतं करोति गृह्णाति वा पयोव्रतयति । सावद्यान्नं मया न भोक्तव्यमिति व्रतं करोति गृह्णाति वा सावद्यान्नं व्रतयति । अर्थनियमार्थं आरम्भः ॥ १५ ॥

अथ णिच्प्रत्यये केषाञ्चित् कार्यविशेषमाह

## सत्यार्थवेदस्याः ॥ १६ ॥ [ सि० ३।४।४४ ]

**एषां णिच् सन्नियोगे आः स्यात् । सत्यापयति । अर्थापयति । वेदापयति । *प्रियस्थिरेत्यादिना प्राद्यादेशे प्रियमाचष्टे प्रापयति इत्यादि । स्थूलदूरेत्यादिना स्थूलमाचष्टे स्थवयति ॥ १६ ॥**

**इति नामधातुप्रक्रिया ।**

'सत्या०' सत्यमाचष्टे करोति वा सत्यापयति । एवमर्थापयति वेदापयति । अन्त्यस्वरादेरित्या-

* हैम० प्रका० उत्त० १०३

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कारस्य लुग् न भवति विधानसामर्थ्यात् । आदिशब्दसंसर्गात् **'श्वेताश्वाश्वतरगालोडिताह्वरकस्याश्वतरेतकलुक्'** ( ३।४।४५ ) श्वेताश्व अश्वतर गालोडित आह्वरक इत्येतेषां चतुर्णां णिच् सन्नियोगे यथासङ्ख्यं अश्व तर इ तक इत्येषां चतुर्णां लुग् भवति । तत्र श्वेताश्वः प्रतीतः । अश्वतरो वेगसरः । 'वेसरोऽश्वतरो वेगसरश्चे'ति वचनात् गालोडितं गोदोहनं विलोडनं वा । आह्वनकं कुटिलं वाक्यं कुटिलः पुरुषो वेति **क्रियारत्नसमुच्चये** । श्वेताश्वमाचष्टे करोति वा श्वेताश्वेनातिक्रामतीति वा श्वेतयति । एवमश्वयति । गालोडितमाचष्टे करोति वा गालोडयति । एवमाह्वरयति । लुगर्थं वचनम्, णिः सर्वत्र पूर्वेण सिद्ध एव । *प्रियस्थिरेत्यादि । एतच्च सर्वं प्राक् स्फुटीकृतमेव ॥१६॥

इति नामधातुप्रक्रिया ।

यां शिष्योद्धुतकीर्त्तिकीर्त्तिविजयश्रीवाचकाह्नर्मणे
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः ।
तस्यां शासितसाधुशब्दसरणौ स्वोपज्ञसत्प्रक्रिया-
वृत्तौ नामजधातुभिर्विरचिताः पूर्णाः सुखं धातवः ॥ १ ॥

## अथ सौत्रा धातव उच्यन्ते ।

तत्र कण्ड्वादयः प्रागुक्ताः । अथ शेषाः प्राग्वद्वर्णक्रमेण प्रतिपाद्यन्ते । तत्र कचटतपादिवर्णानुबन्धाददादिप्रभृति तत्तद्गणकार्यम्, तदभावे तु शव् । इङित्त्वादीगित्वाच्चात्मनेपदुभयपदित्वम्, तदभावे परस्मैपदित्वमिति ज्ञेयम् । **'स्तम्भू स्तम्भे'** । स्तम्भः क्रियानिरोधः । स्तभ्नाति स्तभ्नोति । 'स्तम्भू स्तुम्भू स्कम्भू स्कोः श्ना च' ( ३।४।७८ ) इति श्ना श्नु । 'नो व्यञ्जनस्य०' ( ४।२।४५ ) इति नलुक् च । क्ये स्तभ्यते । ऊदित्त्वात् क्त्वि वेट् स्तब्ध्वा । सेटः क्त्वः 'क्त्वा' (४।३।२९) किस्वाभावान्नलुगभावे स्तम्भित्वा । वेट्त्वात् 'वेटोपतः' (४।४।६२) इतीड्निषेधे स्तब्धः २ । अद्यतन्यां 'ऋदिच्छ्वि०' ( ३।४।६५ ) इति वाङि अस्तभत् अस्तम्भीत् । **'अङ्प्रतिस्तब्धनिस्तब्धेस्तम्भेः'** ( २।३।४१ ) उपसर्गस्थान्नाम्यन्तस्थाकवर्गात्परस्य स्तम्भः सकारस्य द्वित्वेऽप्यपि षो भवति । न चेदसौ स्तम्भिर्ङे प्रतिस्तब्धे निस्तब्धे च विषये स्यात् । विष्टभ्नाति । प्रतिष्टभ्नाति । 'उदः स्था स्तम्भः सः' ( १।३।४४ ) इति सलुकि उत्तभ्नाति २ पताकाम् । वितष्टम्भ प्रतितष्टंभ । प्रतितष्टभ्यते । अभितिष्टम्भिषति । व्यष्टभ्नात् प्रत्यष्टभ्नात् ङादिवर्जनं किम्? व्यतस्तम्भत् प्रत्यतस्तम्भत् । प्रतिस्तब्धः । निस्तब्धः । **'अवाच्चाश्रयोर्जाविदूरे'** ( २।३।४२ ) अवादुपसर्गात्परस्य स्तम्भः सकारस्याश्रयादिष्वर्थे गम्येषु द्वित्वेप्यप्यपि षः स्यात् । अङे ङि विषयश्चेत् स्तम्भिर्न स्यात् । आश्रय आलम्बनम् । दुर्गमवष्टभ्नाति दुर्गमवष्टभ्यास्ते । अवतष्टम्भ दुर्गं दुर्गमवाष्टभ्नात् । ऊर्ज और्जित्यं अहो वृषलस्यावष्टम्भः । अवष्टब्धो रिपुः शूरेण । अविदूरमनतिविप्रकृष्टमासन्नमदूरासन्नं च गृह्यते । अवष्टब्धा शरत् । आसन्ना भवतीत्यर्थः । अवष्टब्धे सेने । अवादिति किम्? प्रस्तब्धः । चकारो ङे इत्यस्यानुवृत्त्यर्थः, अनुक्तसमुच्चयार्थश्च; तेन उपष्टम्भः उपष्टम्भकः इत्यादावुपादपि भवति । उपावादित्यकृत्वा चकारेण सूचनमनित्यार्थं तेन उपस्तब्ध इत्यपि भवति । आश्रयादिष्विति किम्? अवस्तब्धो वृषलः शीतेन । अनङ इत्येव अवातस्तभत् । एवं चाद्यतन्यां अवाष्टभत् अवाष्टम्भीत् ५ । तस्तम्भ अवतष्टम्भ ६ । स्तभ्यात् अवष्टभ्यात् ३४ ७ । स्तम्भिता अवष्टम्भिता ८ । स्तम्भिष्यति अवष्टम्भिष्यति ९ । अस्तम्भिष्यत् अवाष्टम्भिष्यत्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

१० । भावकर्मणोः अस्तम्भि अस्तम्भिषाताम् । णिगि स्तम्भयति । अवष्टम्भयति । यङि तास्तभ्यते अवतास्तभ्यते । सनि तिष्टम्भिषति । अवतिष्टम्भिषति । शतरि स्तभ्नत् स्तभ्नुवत् । इह वर्णक्रमस्य प्रतिज्ञानेऽपि स्तम्भादयः सौत्रा इति वृद्धोक्तेः स्तम्भ आदावुक्तः । एवं लौकिकवाक्यकरणीयानां धुरि कुविचुलुम्पावपि । यदाहुः कुव्यादयो लौकिकाश्चुलुम्पादयो वाक्यकरणीया इति । 'तन्द्रा आलस्ये' तन्द्राति 'शीङ्श्रद्धा०' (५।२।३७) इत्यालौ तन्द्रालुः इत्यादन्तः २ । 'कि ज्ञाने' कयति ३ ।५ 'पति पतने' । आलौ पतयालुः ४ । 'गृहि ग्रहणे' गृहयालुः ५ । गृहयालुः करलीलयाश्रियः नैषधीये । 'चिरिङ् हिंसायाम्' । चिरिणोति इति इदन्ताश्चत्वारः ४ । 'जुं वेगे' । जवति । अनुस्वारेत्त्वादिडभावे अजौषीत् । 'जुंङ् गता'वित्यस्य तु जवते अजोष्ट इत्यादि ७ । 'कुङ् गतौ' । कवते । कव्यम् ८ । इत्युदन्तौ द्वौ । 'भूङ् प्राप्तौ' । 'भूङः प्राप्तौ णिङ्' (३।४।१९) भुवो धातोः प्राप्तावर्थे णिङ् प्रत्ययो भवति । भावयते भवते प्राप्नोतीत्यर्थः । इत्यूदन्तः ९ । 'तर्क विचारे' । अकारः श्रुति-सुखार्थः । एवमग्रेप्यदन्तवर्जं वाच्यम् । तर्कति १० । 'कक्क कर्क हासे' । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) इत्यप्रत्यये कक्का अचि कक्कः ११ । कर्कति १२ । 'सिक सेचने' । सेकति १३ । 'मर्क संप्रच्छने' मर्कति १४ । 'चक्कि भ्रमणे' । चङ्कते १५ । 'मकि गतौ' मकते १६ । इति कान्ताः सप्त ७ । रिखिलिंखेस्तुल्यार्थः । रेखति चित्रकृत् । 'भिदादयः' (५।३।१०८) इत्यङि निपातना-द्रेखा १७ । इति खान्तः । 'कगे मिथःसम्प्रहारे' । कगति । बहुलमेतन्निदर्शनमिति स्वार्थे णिचि स्वणम् परे 'कगेवनू०' (४।२।२५) इति वा दीर्घे कागं २ कगं २ । मिथोऽभीक्ष्णं प्रहृत्येत्यर्थः । अयं मौने इत्येके । सर्वक्रियाखित्येके । यथा कगति कोऽर्थः ? याति भुङ्क्ते स्वपितीत्यादि । ऐदित्त्वेन 'न श्विजागृ०' (४।३।४९) इति निषेधार्थं 'व्यञ्जनादेर्वोपान्त्यस्यातः' (४।३।४७) इति वृद्ध्यभावे अकगीत् । १८ । इति गान्त एकः । 'अर्घ मूल्ये' । महार्थः । 'कलां नार्घति षोडशीम्' । १९ । इति घान्तः । 'मर्चण् शब्दे' । मर्चयति २० । इति चान्तः । 'मञ्ज सौन्दर्ये च' चात् शब्दे, मञ्जति २१ । 'पञ्ज रोधे' पञ्जति । 'नाम्नि पुंसि च' (५।३।१२१) इति णके पञ्जिका २२ । 'कञ्ज शब्दे' कञ्जति २३ । इति जान्तास्त्रयः । ३ । 'रण्ट् प्राणहरणे' । रण्टति २४ । 'घट्ट शब्दे' उदित्त्वान्नागमे घण्टति २५ । 'मट ह्रासे' ह्रासो ह्रस्वत्वम् । मटति २६ । इति टान्तास्त्रयः ३ । 'कुठ छेदने' । कोठति । 'नाम्युपान्त्य०' (५।१।५४) इति के कुठो वृक्षः २७ । इति ठान्तः । 'क्रुड शब्दे' । क्रोडति । लिहादिभ्यः (५।१।५०) इत्यचि क्रोडः २८ । 'उड संघाते ओडति' २९ । 'वड आग्रहणे' वडति ३० । 'णडण् भ्रंशे' णोपदेशोऽयम् । अत्र हि णडि णटि णुदि णाधयश्चत्वारो नादयोऽपि णोप-देशाः । 'पाठे धात्वादे०' (२।३।९७) इति णो ने तस्य 'अदुरुपसर्गा०' (२।३।७७) इति णत्वं णोपदेशफलम् । नडति । प्रणडति । णिचोऽनित्यत्वादभावे अचि नडस्तृणजातिः । घञि डो लत्वे प्रणालः । ३१ इति डान्ताश्चत्वारः ४ । 'किणत् शब्दगत्योः' किणाति । 'नाम्नि पुंसि च' (५।३।१२१) इति णके केणिका पटकुटी ३२ । इति णान्तः । 'कुत गुंफप्रील्योः' कोतति ३३ । 'पुत गतौ' पोतति ३४ ॥ 'लत आदाने' लतति ३५ । 'सात सुखे' सातति । णिगि 'साहिसाति०' (५।१।५९) इति अनुपसर्गात् शे सातयः सुखकारी ३६ । इति तान्ताश्चत्वारः ४ । 'कथ वाक्यप्रबन्धे' णिगि बाहु-लकात् स्वार्थे णिचि वा । 'भूरिदाक्षिण्यसम्पन्नं यत्त्वं सान्त्वमचीकथः ।' कथणिति चुराद्यदन्तस्य त्वचकथ इति स्यात् ३७ । इति थान्तः । 'उद आघाते' ओदति ३८ । 'क्षद हिंसावरणयोः' क्षदति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

३९। 'सुन्द हिंसासौन्दर्ययोः'। सुन्दति अचि सुन्दोपसुन्दौ दैत्यौ मिथो युद्धा मृतौ ४०। 'कदि वैक्लव्यछेदनयोः' कदते। अनटि कदनम् ४१। इति दान्ताश्चत्वारः ४१। 'मिधृग् मेधाहिंसासंगमेषु' मेधति मेधते 'वौ व्यञ्जनादेः०' (४।३।२५) इति क्त्वो वा किस्वे मिधित्वा मेधित्वा। भिदादित्वाद्यङि निपातनात् मेधा ४२ इति धान्तः। 'धनक् धान्ये' धान्योपलक्षितायां क्रियायामित्यर्थः। यथा 'णील वर्णे' इत्यस्य वर्णोपलक्षितायां क्रियायामित्यर्थो **धातुपारायणे** व्याख्यातः। अन्यथा तु क्रियार्थत्वाद्धातुत्वं न स्यात्। ह्वादिरयं 'ह्वः शिति' (४।१।१२) इति द्विः दधन्ति ४३। इति नान्तः। 'रिप कुत्सायाम्'। रेपति ४४। 'कप कम्पने' कपति ४५। 'क्षुप ह्रासे' क्षोपति 'नाम्युपान्त्य०' (५।१।५४) इति के क्षुपो ह्रस्वशाखा ४६। 'टुप संरम्भे' टोपति घञि आटोपः। इति पान्ताश्चत्वारः। ४७। 'बिम्ब दीप्तौ' बिम्बति ४८ इति बान्तः। 'रिभि स्तुम्भू स्कम्भू स्तम्भे'। विरेभते स्म। 'क्षुब्धविरिब्ध०' (४।४।७०) इति निपातनादिडभावे विरिब्धः स्वरः। विरिभितमन्यत् ४९। स्तुम्भू श्नाश्वोः स्तुभ्नाति स्तुभ्नोति। उदित्त्वाद्वेटि स्तुब्ध्वा स्तुम्भित्वा। वेट्त्वात् क्तयोरिडभावे स्तुब्धः २। ५०। स्कम्भू श्नाश्वोः **स्कभ्नः** (२।३।५५) वेः परस्य स्कभ्नातेः सस्य नित्यं षः स्यात्। श्नानिर्देशः किम्? सश्नोर्मा भूत् इति षत्वे विष्कभ्नाति। श्नौ तु षत्वाभावे विस्कभ्नोति। क्ये विस्कभ्यते। क्त्वि ऊदित्त्वाद्वेटि स्कब्ध्वा स्कम्भित्वा। क्तयोर्नेट् स्कब्धः २। ५१। 'स्कुम्भू विस्तारे च' चात् स्तम्भे। स्कुभ्नाति स्कुभ्नोति। क्ये स्कुभ्यते। स्कुब्ध्वा स्कुम्भित्वा। स्कुब्धः २। लक्ष्यं यथा 'मुसलक्षेपहुंकारस्तोभैः कलमखण्डिनि। कुचविष्कम्भमुत्तभ्नन्निःस्कुभ्नातीव ते स्मरः॥ १॥' स्तोभाः विश्रामाः। विष्कम्भः पृथुत्वं उत्तभ्नन्नूर्ध्वीकुर्वन् निःस्कुभ्नाति नितरां विस्तारयति। ५२। 'दभ वंचने' दभति। 'आसुयुवपि०' (५।१।२०) इति घ्यणि दाभ्यो वञ्चनीयः। बाहुलकात् स्वार्थे णिचि दाभयति ५३। इति भान्ताः पञ्च ५। 'डिम हिंसायाम्' डेमति। 'नाम्युपान्त्य०' (५।१।५४) इति के डिमः प्रबन्धविशेषः। ५४। 'धम शब्दे' धमति ५५। इति मान्तौ द्वौ। 'पीय पाने' पीयति ५६। इति यान्तः। 'उर गतौ' ओरति ५७। 'तुर त्वरणे' तोरति। आङ्पूर्वस्यास्य 'नाम्युपान्त्य०' इति के आतुरो रोगी। केवलस्य तु तुरः शीघ्रगामी। तुरो गच्छतीति नाम्नो गम इति तुरगः ५८। 'तन्द्रि सादमोहयोः'। सादो विषण्णता। मोहो मौढ्यम्। तन्द्रते ततन्द्रे। तन्द्रितः। 'क्तेटो गुरोः०' (५।३।१०६) इत्यप्रत्यये तन्द्रा आलस्यम्। इति रान्तास्त्रयः। 'चुल परिवेष्टने'। 'नाम्युपान्त्य०' इति के निचुलः। अचि चोलः ६०॥ 'उल दाहे' ६१ 'लुल कम्पने' ६२ 'सल गतौ' ६३ 'हल चूर्णने' ६४ (ओलतीत्यादि)॥ भिळण् भेदे भेलयति। णिचोऽनित्यत्वात् भेलस्तरण्डः। डलयोरैक्ये भेडोऽजः ६५ इति लान्ताः षट् ६। 'धन्व तव गतौ।' धन्वति ६६। तवति ६७ इति वान्तौ द्वौ २। 'पशी स्पशी बाधनग्रथनयोश्च' बाधनं प्रतीघातः चाद्गतौ। पशति २। कुटिलार्थे यङि 'जपजभ०' (४।१।५२) इति म्वागमे पम्पश्यते। यङ्लुपि तु पम्पशीति पम्पष्टि ६८। स्पशते २। णौ ङे सन्वद्भावापवादे 'स्मृदृत्वर०' (४।१।६५) इति पूर्वस्य अत्वे अपस्पशत्। 'णौ दान्तशान्त०' (४।४।७४) इति विकल्पेन निपातनात् स्पष्टं स्पाशितम्। अचि स्पशश्चरः। घञि स्पाशो बन्धः लक्ष्यं यथा 'सेयमुभयतः स्पाशा रज्जुः'। ६९। 'ऋशत् गतिस्तुत्योः'। ऋशति ७० इति शान्तः। 'भिष भये' भेषति ७१। 'युषी सेवने' योषति २। उणादौ हृसृ० (८८७) इतीति योषित्। युष्मसीति (८९९) किदिति मदि युष्मत् ७२ इति षान्तौ द्वौ २। 'लुस

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हिंसायाम्' । लोसति ७३ । 'पसी गतिबन्धननिवासेषु' पसते २ गतौ कुटिलार्थे यङि 'जपजभ०' इत्यत्र दन्त्यान्तपरस्यापि पस इष्टत्वान्म्वागमे पम्पस्यते । लुपि पम्पसीति पम्पस्ति । बन्धने बाहुलकात् स्वार्थे णिचि पासयति पाशैरश्वम् । निवासे उणादौ मृशीति ( ३६० ) तादौ ये पस्त्यं गृहम् ७४ । 'भसक् भर्त्सनदीप्त्योः' ह्वादिरयं । 'ह्वः शिति' ( ४।१।१२ ) इति द्वित्वे बभस्ति । क्ते भसितम् ७५ । इति सान्ताश्चयः । ३ । 'लुह हिंसामोहयोः' । लोहति अचि लोहं ७६ । 'रिहं हिंसाकत्थनादौ' । कत्थनं श्लाघा ७७ । इति हान्तौ द्वौ । 'चुक्ष शौचे' । चुक्षति । क्ते चुक्षितः । 'क्लेटो गुरो०' ( ५।३।१०६ ) इति अप्रत्यये चुक्षा शीलमस्य 'अङ्ख्याच्छत्रादे'रित्यङि चोक्षः । तस्य भावः कर्म वा 'पतिराजान्त०' (७।१।६०) इति ट्यणि चौक्ष्यम् ७८ । 'विक्षि विद्योपादाने' विक्षते विक्षितः । 'क्तेट०' इति अप्रत्यये विक्षा ७९ । इति क्षान्तौ द्वौ । **इति स्तम्भ्वादयः सौत्राः एकोनाशीतिः ।**

**अथ लौकिका उच्यन्ते** कुविवर्जाश्च तेऽदन्ताः । 'कुवि वैक्लव्ये' १ 'वीजण् व्यजने' २ । 'हीलण् निन्दायाम्' ३ । अन्दोलण् हिन्दोलण् प्रेङ्खोलण् दोलने । दोलनमुत्क्षेपः ६ । 'रूषण् रूक्षणव्याप्त्योः' ७ इति **लौकिकाः ।**

**अथ वाक्यकरणीयाः ।** चुलुम्प छेदने १ । कुच उद्भेदने २ । घटण् बन्धने ३ । उल्लुडण् उट्टीकने अदन्तः । यथा माघे 'तावत् स्वरः प्रखरमुल्लुडयाञ्चकार' ४ । 'अवधीरण् अवज्ञायाम्' । 'तत्र धर्ममवधीरय धीरः' ५ । 'उद्धुषत् उल्लकस् उच्छुसने' । उद्धुषणमुल्लकसनं च रोमाञ्चः ७ । इति **वाक्यकरणीयाः ।**

इह च केचिल्लौकिका अपि वाक्यकरणीयेषु । तेपि केचिल्लौकिकेषु उक्ता दृश्यन्ते । तेनैषां दृढो विवेक एतत्संज्ञान्वर्थश्च **सम्प्रदायविद्यो**ऽवसेयः ।

**अथैभ्यस्त्रिविधेभ्यः** पृथगेव ये धातुपारायणे उक्ता अदन्ता धातवः, ते उच्यन्ते । 'खचण् बन्धने' । खचयति । अस्यादन्तत्वेनाल्लुकः स्थानित्वादुपान्त्यवृद्ध्यभावः १ । ङे अचखचत् । 'ओजण् बलतेजसोः' ओजयति २ । 'स्फुटण् प्राकट्ये' स्फुटयत्यर्थम् ३ । 'तुच्छण् आच्छादने' ४ । 'स्कन्धण् समाहारे' ५ । स्फुटादेर्नाम्नो णिचि स्फुटयतीत्यादि सिद्धावपि स्फुटण्प्रभृतीनामदन्तेषु पाठ इष्टार्थप्रत्यये सति णिजं विनापि प्रयोगार्थः । अदन्तत्वाच्चैषामनेकस्वरकार्याणि । स्फुटः परोक्षाया आमि स्फुटायाञ्चकारेत्यादि । शीलाद्यर्थे 'निन्दहिंस०' ( ५।२।६८ ) इति णके स्फुटक इत्यादि च स्यात् । अपि चैवंप्रकाराणां धातूनामतो लुकं बाधित्वाऽनुपान्त्यस्याप्यत **उत्पलमतीयेन** 'अतो ञ्णिति' इति सूत्रेण वृद्धौ प्वागमे स्फुटापयति तुच्छापयति स्कन्धापयतीष्यते परैः ५ । 'ऊषण् छेदने' ऊषयति ङे औषिषत् ६ इत्यादि ।

अथ कुशु पिशु कुसु दसु त्रसु **अनुक्तार्थाः ।** एषामेवंविधानामन्येषां चार्थो यथालक्ष्यं निर्णेयः ।

अथ ये **धातवः** श्रीसूरिभिर्धातुपाठेऽन्यथा पठितास्सन्ति परैरन्यथा ये च परैरधिका एव पठिताः सन्ति, ते **परपठितत्वेन विवक्षिता** इहोच्यन्ते । तत्रादौ त्रिंशददन्ताः 'खेडण् लक्षणे' । अदन्तत्वादुपान्त्यस्येति ह्रस्वाभावे ङे अचिखेडत् १ । 'पणण् विक्रये' । ण्यन्तात् 'युवर्णवृद्दवशरण०' ( ५।३।२८ ) इति अलि अदन्तत्वाण्णौ वृद्ध्यभावे विपणो विक्रयः । 'पणि'र्व्यवहारस्तुत्योरित्यस्य त्वलोऽप्राप्त्या घञि विपाण इति स्यात् २ । 'वित्तण् दाने' । वित्तयति । अदन्तत्वविधानसामर्थ्यादतो लुगभावेऽनुपान्त्यस्याप्यतो वृद्धौ वित्तापयतीत्यपि ३ । एवं वक्ष्यमाणेष्वपि । 'कर्त्त कर्त्र कच्छण् शैथिल्ये'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कर्त्तयति कर्त्तापयति ४ कर्त्रयति कर्त्रापयति ५ । कच्छयति कच्छापयति ६ । 'श्लथ शरण् दौर्बल्ये' । श्लथयति । अशश्लथत् । अदन्तत्वात्क्रमेण वृद्धिसन्वद्भावौ न, एवमग्रेऽपि ज्ञेयम् ७ । शरयति । ङे अशशरत् ८ । 'छदण् संवरणे' अर्जन एव छदेर्घटादित्वादूर्जने छदयतीति स्यात्परमर्थान्तरे छादयतीत्येव स्यादस्य त्वदन्तत्वात्संवरणादिरूपार्थान्तरेऽपि छदयतीति सिद्धम् । तथास्यादन्तस्य समानलोपित्वात् ङे अचच्छददिति स्यात् । अनदन्तस्य तु समानलोपित्वाभावात्सन्वद्भावाभावे अचिच्छददिति ९ । 'लभण् प्रेरणे' 'णिवेत्ति०' (५।३।१११) इत्यने विलभना १० । 'श्रपण् पाके' श्रपयति । अशश्रपत् । क्ते निपातनात् शृतं हविः क्षीरं वा ११ । 'खोदण् क्षेपे' खोदयति । अचुखोदत् १२ । 'स्तन ध्वन स्वन स्यम शब्दे' अनेकस्वरत्वाद्यङ् न स्यात् । परोक्षायाश्चामि स्तनाञ्चकारेत्यादि । 'निन्दहिंस०' इति णके स्तनकः १३ । १४ । १५ । १६ । 'षम ष्टम वैक्लव्ये' । षोपदेशावेतौ । अत्र हि षम १ ष्टम २ षेक्रु ३ ष्वष्किं ४ षाधिं ५ षन्ति ६ षुम्भि ७ षुरि ८ षिलि ९ षान्त्वि १० ष्णुसि ११ ष्णसि १२ ष्टृहि १३ ष्टृंहि १४ ष्ट्रक्षयः १५ (धातुपाठे सादयोऽपि) षोपदेशास्तथा च 'षः सोऽष्ट्यै०' (२।३।९८) इति सस्य कृतत्वेन 'नाम्यन्तस्था०' (२।३।१५) इति षत्वम् । यथात्र सिषमिषति तिष्टमिषति । ङे अससमत् अतस्तमत् । समाञ्चकार स्तमाञ्चकार १७ । १८ । 'ललण् ईप्सायाम्' । ङे अललल्त् । 'ललिण् ईप्सायामित्यस्य त्वनदन्तस्यालीललतेति १९ । 'मलण् धारणे' मलयति । 'युवर्ण०' इत्यलि परिमलः २० । वल्पुल वल्पूल पल्पुल पल्पूल वल्पूलण् लवनपवनयोः' । पश्चाप्येते ओष्ठ्यमध्याः । वल्पूलयति क्षेत्रं सबुसधान्यं वा । २५ । 'कुमालण् क्रीडायाम्' कुमालयति । अचि सुकुमालः । २६ । 'पशण्' अनुपसर्गो, वा अदन्तः । अयं चात्रानिर्दिष्टार्थोपि कैश्चिद्गत्यर्थ इष्टः । पशयति पाशयति । अपपशत् अपीपशत् । अनुपसर्ग इति किम् ? प्रपशति प्रपशते । पशी इति सौत्रधातोरुभयपदिनो रूपम् २७ । 'शशण कान्तौ' शशयति शशनम् 'युवर्ण०' (५।३।२८) इत्यलि शशः २८ । 'अंसण् विभाजने' व्यंसयति मयूरव्यंसकः । २९ । 'गहण् गहने' गहयति गहापयतीत्यपि ३० । **इति त्रिंशददन्ताः** 'गाक् जन्मस्तुत्योः' । ह्वादिरयम् । 'ह्वः शिति' (४।१।१२) इति द्वित्वे जगाति ३१ । 'माङ्च माने' मायते । श्यस्य शित्त्वादत्र 'ईर्व्यञ्जनेऽयपि' (४।३।९७) इति इत्वं न तत्राशितीत्युक्तत्वात् 'नेर्ङ्मादा०' (२।३।७९) इति णत्वे प्रणिमायते ३२ । 'किक् ज्ञाने' ह्वादित्वात् चिकेति ३३ । 'क्षि जिरिट् हिंसायाम्' क्षिणोति । क्षिणूयी हिंसायामित्यस्य तु गुणे क्षेणोतीति स्यात् । ३४ । जिरिणोति ३५ । 'चिगण् चये' । अयं चुरादिरपि घटादिः । घटादेर्ह्रस्व इति ह्रस्वत्वे चययति 'चिस्फुरो०' रित्यात्वं त्वस्य नेष्यते **परैः** ञिणम्परेऽनुवादार्थे अचायि-अचयि । चायं २ चयं २ । णिचोऽनित्यत्वादभावे चयति चयते । अचुराद्यघटादेश्चिगट् इत्यस्य तु चिनोति चिनुते । णौ चिस्फुरोरित्यात्वविकल्पाच्चापयति चाययति । ञिणम्परे तु णौ अचापि अचायि । चापं २ । चायं चायमिति स्यात् ३६ । 'दीधीङ् दीप्तिदेवनयोः' । दीधीते क्तौ निपातनाद्दीधितिः ३७ । 'ई वेवीङ् प्रजनकान्त्यसनखादनेषु' । 'ईते गौः' । प्रथमगर्भं गृह्णातीत्याद्यर्थः । ३८ । एवं वेवीते ३९ । 'क्षीषश् हिंसायाम्' क्षीणाति ४० । व्रीश् वरणे' 'भ्रीश् भरणे' । एतौ प्वादी । 'प्वादेर्ह्रस्वः' (४।२।१०५) इति ह्रस्वे व्रिणाति भ्रिणाति । अप्वादिभ्यां त्वाभ्यां व्रीणाति भ्रीणातीत्यादि स्यात् । ४२ । 'प्लीश् श्लेषणे' । ओष्ठ्योपान्त्योऽयम् । प्वादिर्ल्वादिश्च । प्वादित्वाद् ह्रस्वो ल्वादित्वात् तो नः । प्लिनाति । प्लीनः २ । प्लीनिः ४३ । 'ल्वीश् गतौ' । अयं प्वादिल्वादिबाह्यः ह्रस्वाभावे ल्वीनाति । तो नत्वाभावे ल्वीतः ४४ । 'ज्रीण वयोहानौ' । युजादिरयम् । णिज्विकल्पे । ज्राययति । ज्रयति । 'जॄण्' जारयति जरयतीति स्यात् ४५ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'खुंङ् गतौ' खवते चुखुवे खोता खोतुम् ४६ । 'धुग्ट् कम्पने' । धुनुते २ । धुनोति पक्षौ । 'विधुतान्यकृत्याः' । धूगट् इत्यस्य तु धूनोति । 'धूगौदितः' (४।४।३८) इति वेटि धोता । धविता । क्ते विधूत इति स्यात् ४७, 'गूं, गूत् च पुरीषोत्सर्गे' अत्राद्यो भ्वादिर्द्वितीयस्तुदादिरित्यर्थमेव चकारः गवति । अनुस्वारेत्त्वादिडभावे न्यगौषीत् । गूत्वा । गुंङ् इत्यस्य तु गवते इत्यादि ४८ । गूत् कुटादिरयम् । तेन कुटादेरिति ङित्त्वात् सिचि वृद्ध्यभावे उवादेशे न्यगुवीत् । तृजादिष्वपि ङित्त्वादेव गुणाभावे गुविता गुवितुम् । क्तिप्रत्यये उवर्णादितीन्निषेधे गूत्वा ४९ । 'दूट् हिंसायाम्' । दूनोति । 'टुदुंट् उपतापे' इत्यस्य तु दुनोतीत्यादि स्यात् ५० । 'जूं अभिभवे' यमी जरति कर्माणि ५१ । 'घृक् क्षरणदीप्त्योः' । 'सृक् गतौ' । 'हृक् बलात्कारे' । त्रयोऽपि ह्वादयः । जघर्त्ति ससर्त्ति जहर्त्ति ५४ । 'स्पृट् पालनप्रीत्योः' । ओष्ठ्योपान्त्योऽयं । स्पृणोति पस्पार ५५ । 'ऋट् कृग्श् हिंसायाम्' ऋणोति । 'ऋणूयी गतौ' इत्यस्य तु गुणे अर्णुते अर्णोतीत्यादि ५६ । 'कृग्श् ल्वादिरयम्' । ऋल्वादेरिति तो नत्वे कृणः २ । कृणिः । कृग्शस्तु कीर्णः ३ इत्यादि ५७ । वृग्श् वरणे । ल्वादिः । तो नत्वे वृणः ३ । वृग्श्स्तु 'ओष्ठ्यादुर्' वूर्णः ३ । ५८ । अथ ऋृदन्तास्त्रयः ३ । 'चृ भक्षणगत्योः' । चीर्णा चारिर्गवा । आचीर्णं तपः । अस्य च क्तक्तवत्वोरेव प्रयोगो न तु प्रत्ययान्तरे ५९ । 'पृक् पालनपूरणयोः' । ह्वादिरयं । द्वित्वे पूर्वस्य इत्वे ओष्ठ्यादुर् इत्युरि भ्वादेरिति दीर्घे च पूर्त्तः पिपुरति । पिपर्त्तीत्यादि तु पृंक् इत्यनेनापि स्यात् । ६० । 'दृङ्च् भये' । अनेन कर्त्तरि दीर्यते इति सिद्धम् । कर्मकर्त्तरि भावकर्मणोश्च । दीर्यते इति तु 'दृ भये' इत्यनेनापि स्यात् ६१ । 'ज्योंङ् उपनयननियमव्रतादेशेषु' उपनयनं मौञ्जीबन्धः नियमः संयमः व्रतादेशः संस्कारादेशः । क्ते जीतः । 'ज्याव्यध०' (४।१।८१) इति य्वृत् ६२ । 'दकु कृच्छ्रजीवने' ने आदङ्कः आदङ्क इति त्याद्यन्तप्रतिरूपकमव्ययमप्यस्ति ६३ । 'तिकङ् टिकङ् षेकङ् गतौ' । णौ ङे ऋदित्त्वादुपान्त्यह्रस्वाभावे अतितेकत् अटिटेकत् अनृदितोस्त्वनयोरतीतिकत् अटीटिकत् इति स्यात् । 'षेकृ असिषेकत्' ६६ । 'चिक्कण् व्यथने' चिक्कयति ६७ । चखु गतौ । चङ्खति । ६८ । 'खक्ख हसने' । 'क्तेट०' इत्यः खक्खा ६९ । 'लिखत् अक्षरविन्यासे' । कुटादिरयम् । तेन तृजादिषु ङित्त्वाद्गुणाभावे लिखिता लिखितुम् । लिखनीयम् । अकुटादिस्तु लेखिता लेखितुम् लेखनीयमित्यादि स्यात् । लिखतीत्यादि तूभयथापि ७० । घग्घ हसने घग्घितः 'क्तेट०' इत्यप्रत्यये घग्घा ७१ । दघ सघ तिघ चषघट् हिंसायाम् । दघ्नोति । घञि दाघः ७२ । सघ्नोति । (णौ सनि) सोपदेशत्वात्षत्वाभावे सिसाघयिषति । णौ ङे असीसघत् ७३ । तिघ्नोति तितेघ ७४ । चषघ्नोति । अनेकस्वरत्वात् चषघाञ्चकार ७५ । ('मुचि कल्कने' मोचते) ७६ । 'अचूग् अचुग् गतौ' । अचते अचति । आचे आच । अचिता अचितुम् । ऊदित्त्वात् क्त्वि वेट् अक्त्वा अचित्वा ७७ । उदित्त्वान्ने अञ्चते अञ्चति । क्ये नस्य लुगभावे अञ्च्यते । इटि 'कुर्वन्नुदञ्चिते नेत्रे' । अञ्चूग् इत्यस्य तु ऊदित्त्वेन वेट्त्वात् क्तयो'र्वेटोपतः' (४।४।६२) इट् निषेधात् 'अञ्चोऽनर्चायाम्' (४।२।४६) इति नस्य लुकि उदक्ते इति स्यात् ७८ । 'टुयाचृग् याचने' । 'द्वितोऽथुः' (५।३।८३) याचथुः । ऋदित्त्वात् ङे उपान्त्यह्रस्वाभावे अययाचत् । याचति २ इत्यादि तु डुयाचृग् इत्यस्यापि स्यात् ७९ । 'विचृंकी पृथग्भावे' । ह्वादिरयं वेविचति । परेषामिष्टिवशान्निजां शितीत्येत्वम् ८० । 'चर्चत् परिभाषणे' चर्चति । 'नाम्नि पुंसि च' (५।३।१२१) इति णके चर्चिका ८१ । 'खचश् भूतप्रादुर्भावे' । स चातिक्रान्तोत्पत्तिः । खञ्चाति ८२ । 'गुर्चण् निकेतने' । भ्वादेरिति दीर्घे गूर्चयति ८३ । 'पिच्छत् बाधने' । 'क्तेट०' इत्यप्रत्यये पिच्छा ८४ । 'लुजु हिंसाबलदाननिकेतनेषु' । लुञ्जति ८५ । भ्रिज ३६

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गतौ ध्रेजति ८६ । रिजि स्थानार्जनोर्जनेषु । ऊर्जनं प्राणनम् । इट आगमत्वेनानित्यत्वादभावे ऊद्रिक्तः । ८७ । 'ओनजैङ् व्रीडने' । नजते । ओदित्त्वात् क्तस्य तो ने ऐदित्त्वात् क्तयोरिड्निषेधात् नग्नः । स्वार्थे के स्त्रीत्वे नग्निकाऽरजाः स्त्री ८८ । 'मृजैकि संपर्चने' मृक्ते । ऐदित्त्वात् इड्निषेधे मृक्तः २ । ८९ । 'धृजैप् वर्जने' । अन्तौ वृञ्जन्ति ९० । 'मर्ज्जण् शब्दे' क्ते मर्ज्जिता रसाला ९१ । शौटृ गर्वे' । ऋदित्त्वात् ङे अशुशौटत् ९२ । 'यौटृ सम्बन्धे' । सम्बन्धः श्लेषः । यौटति । ङे अयुयौटत् । णके यौटकं युग्मम् ९३ । 'मेटृ म्रेटृ म्लेटृ लौटृ उन्मादे' । मेटति अमिमेटत् इत्यादि ९७ । 'स्फटु विशरणे' । स्फुण्टति वस्त्रम् ९८ । 'मुटु प्रमर्दने' मुण्टति । अचि मुण्टः । ते हुंति कुण्टमुण्टा ९९ । 'नट नृतौ' अणोपदेशत्वात् प्रनटति णौ प्रनाटयति नृतावेवास्य घटादित्वात् १०० । 'णटि नतौ च' चान्नृतौ णोपदेशत्वात् 'अदुपसर्ग०' (२।३।७७) इति णत्वे प्रणयते १०१ । 'अटि अट्टि हिंसातिक्रमयोः । सनि इटि तृतेर्द्वित्वे अतिट्टिषते । अट्ट इति दोपान्त्यस्य तु सनि इटि 'न बदन०' (४।१।५) इति दस्य द्वित्वनिषेधात् स्वरादेरिति द्वितीयांशस्य टेरेव द्वित्वे 'तवर्गस्य०' (१।३।६०) इति डेर्डत्वे 'अघोषे प्रथम०' (१।३।५०) इति डस्य टत्वे अट्टिटिषते । अट्टते इत्यादि तूभयोरपि १०२ अटृति सनि इटि टृतेर्द्वित्वे अटिट्टिषते । क्विपि 'पदस्य' (२।१।८९) इति संयोगान्तलोपे अट् अट्ट् इति दान्त दोपान्त्यस्य तु अत इति स्यात् १०३ । 'मिटुण् स्नेहने' मिण्टयति १०४ । 'सुट्टण् अनादरे' १०५ । 'शटि शलिण् श्लाघायाम्' शाटयते १०६ । शालयते १०७ । 'रुठि प्रतिघाते' रोठते । द्युतादिरयं । ततोऽद्यतन्यां वात्मनेपदे 'लृदिद्द्युतादि०' (३।४।६४) इत्यङि अरुठत् अरोठिष्ट । १०८ । ('वुठुण् हिंसाया' वुण्ठयति) १०९ । 'चुडु अल्पीभावे' । चुण्डति । अचि चुण्डः ११० । 'पिड संघातशब्दयोः' अचि पेडा मञ्जूषा १११ । 'कड्ड कार्कश्ये' क्विपि संयोगान्तलोपे कड् २ । ११२ । 'अड्ड अभियोगे' क्विपि अड् २ । ११३ । 'चुड्ड हावकरणे' हावो भावसूचनं क्विपि चुड् चुट् । चुदृड् इत्यस्य तु चुद् चुत् । चुड्डतीत्युभयोरपि ११४ । 'तुड्ड तोडने' तोडनं दारणम् । यथा **कविरहस्ये** 'तुड्डत्यंहः सकलमचिरात्तोडयत्यश्रियं च' । ११५ । ञिक्ष्विडा अव्यक्ते शब्दे । क्ष्वेडति । अचि क्ष्वेडो विषम् । भिदाद्यङि क्ष्वेडा सिंहनादः ११६ । 'ञिक्ष्विडाङ् मोचनस्नेहनयोः' । द्युतादिरयम् । क्ष्वेडते । अद्यतन्यां अक्ष्विडत् अक्ष्वेडिष्ट । शीलाद्यर्थे इङ्ति इत्यने प्रक्ष्वेडनः । सर्वलोहमयो बाणः ११७ । 'अड्ट् व्याप्तौ' । अड्णोति ११८ । 'ओलडु लडुण् उत्क्षेपे' । लण्डयति । ओदित्करणबलादिड्व्यवधानेपि 'सूयत्याद्योदितः' (४।२।७०) इति तो नत्वे लण्डिनः २ । णिचोऽनित्यत्वादभावे लण्डति । णिचिटोरनित्यत्वादभावे ओदित्त्वात्तस्य नत्वे लण्ड्णः २ । यदि तु ओकारस्य नानुबन्धत्वं किन्तु धात्वंशत्वं तदा ओलण्डयति ओलण्डितः २ । ओलण्डना इत्यादि स्यात् ११९ । 'लडुण् अवलन्दयत्युष्ट्रम्' । १२० । 'त्रुडिण् छेदने' । उत्त्रोडयते तृणम् १२१ । 'फण गतौ' । अघटादिरयं । णौ फाणयति । स्नेहनार्थोऽप्ययं फाणयति घटम् निःस्नेहयतीत्यर्थः । फाण्यते द्रवत्वादिति फाणितम् १२२ । 'अणिच् प्राणने' । प्राणनं जीवनम् । अण्यते १२३ । 'घृणू घणूयी दीप्तौ' । 'न तिकि दीर्घश्च' (४।२।५९) इति दीर्घनिषेधे 'यमिरमि०' इति नलुग् निषेधे घृण्टिः १२४ । घणूते १२५ । 'इतु बन्धने' । इन्तति १२६ । 'ज्युति भासने' उणादौ इति ज्योतिः । १२७ । 'कितक् ज्ञाने' ह्वादिः चिकेत्ति १२८ । 'पतिंच् ऐश्वर्ये' पत्यते पतिः १२९ । 'वावृतूचि वरणे' ततो वावृत्यमानसेति **भट्टिकाव्ये** । ऊदित्त्वात् क्त्वि वावृत्त्वा वावर्त्तित्वा । क्तयोर्नेट् । वृते तु वृत्तवावृत्तौ **अभिधानचिन्तामणौ** १३० । 'ष्वर्त्तण् गतौ' । षपाठात्सस्य षत्वे सिष्वर्त्तयिषति १३१ । 'पर्थ पार्थण् प्रक्षेपणे' । ङे अपपर्थत् । पृथणस्तु अपीपृथदिति द्वितीय-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रूपं स्यात् । अस्य तु तन्न स्यात् । पर्थयतीत्यादि तूभयोरपि १३२ । पार्थयति । ङे अपपार्थत् १३३ । 'पद स्थैर्ये' पदति १३४ । 'कदिष् क्रदिष् क्लदिष् वैक्लव्ये' । कदते क्रदते क्लदते । षित्वादङि कदा इत्यादि १३५ । १३६ । १३७ । 'मन्दि जाड्ये' । मन्दते । क्ये नस्य लुकि मद्यते १३८ । 'खुर्दि गुधि क्रीडायाम्' । खूर्दते १३९ । गोधते । वौ व्यञ्जने इति क्त्वासनोर्वा कित्वे गुधित्वा गोधित्वा । जुगुधिष्यते जुगोधिष्यते १४० । 'ऊवेदृग् ऊबुन्धृग् आलोचने' । वेदते २ । ऊदित्त्वात् वेदित्वा वेत्त्वा वेन्नः २ । ऋदित्त्वाद्वाङि अवेदत् अवेदीत् १४१ । बुन्धते २ । ऋदित्त्वाद्वाङि अबुधत् अबुन्धीत् । (आत्मनेपदेऽङोऽभावे) अबुन्धिष्ट १४२ । 'णुदींत् प्रेरणे' । ईदित्त्वादुभयपदित्वम् । 'नुनुदे तनुकण्डुपण्डित' इति । णुदंत् इत्यस्य तु परस्मैपदमेव १४३ । 'वध हिंसायाम्' वधति लक्ष्यम् । यथा 'कर्णोऽवध्यत संयुगे' 'वधकोऽपि न विद्यते' । अवधि अत्र ञ्णिति कृति ञौ च 'न जनवधः' (४।३।५४) इति वृद्धिनिषेधः । अन्यत्र तु स्यात् । ववाध १४४ । 'णाधृङ् याच्ञोपतापैश्वर्याशीष्षु' । णोपदेशत्वात् प्रणाधते । अणोपदेशस्य तु प्रनाधते इत्यादि स्यात् १४५ । 'साधंच् षाधंट् संसिद्धौ' साध्यत्यन्नम् १४६ । 'षाधंट् सनि षपाठात्सस्य षत्वे सिषात्सति' १४७ । 'गृधिण् वञ्चने' । णिजन्तस्यापीष्टिवशात् 'प्रलम्भे गृधिवञ्चेः' (३।३।८९) इत्यात्मनेपदम् । गर्द्धयते वटुम् । **सूरिमते** तु णिगन्तस्यैव । १४८ । 'मन स्तम्भे' । संममान । मनतीत्यादि तु 'म्नां अभ्यासे' इत्यनेनापि स्यात् १४९ । 'जनक् जनने' । ह्वादिरयम् । जजन्ति । 'जजान गर्भं मघवा' । अन्तर्भूत-णिगर्थत्वादजीजनदित्यर्थः । जज्ञतुः जज्ञुः । जनैचि इत्यस्य तु जायते जज्ञे इत्यादि स्यात् १५० । 'क्षप प्रेरणे' घटादिः । णौ ह्रस्वे, अघटादेरपि 'क्षपण् प्रेरणे' इत्यस्यादन्तत्वाद्वृद्ध्यभावे च क्षपयतीति तुल्यमेव रूपं स्यात् । परं ञिणम्परे णौ घटादेरिति वा दीर्घे अक्षापि अक्षपि । क्षापम् २ क्षपम् २ । अघटादेस्तु अक्षपि । क्षपम् २ । इत्येव स्यादिति विशेषः । १५१ । 'त्रप लज्जायाम्' घटादिः त्रपयति, अत्रापि अत्रपि त्रापं २ त्रपं २ । 'त्रपौषि लज्जाया'मित्यघटादेस्तु णावुपान्त्यवृद्धौ त्रापयति । अत्रापि त्रापमित्येव न तु त्वत्रपि त्रपम् । १५२ । 'सप समवाये' अषोपदेशत्वाषत्वाभावे सिसापयिषति । षोपदेशस्य तु सिषापयिषति । असीषपदित्यादि स्यात् १५३ । 'ह्रेपृङ् गतौ' ह्रेपते । णौ ङे ऋदित्त्वात् उपान्त्यह्रस्वाभावे अजिह्रेपत् १५४ । 'तुप तुम्प तुफ तुम्फ रिंफत् हिंसायाम्' । तुपति । तुपती तुपन्ती स्त्री कुले वा । 'अवर्णादश्न०' (२।१।११५) इति वान्तादेशः । भौवादिकतुपेस्तु तोपतीति स्यात् । इङ्श्योस्तु शतुः 'श्यशवः' (२।१।११६) इति नित्यमन्तादेशे तुपन्तीत्येकमेव रूपं स्यात् । तुम्पति प्रस्तुम्पति गौः । शे परे 'नो व्यञ्जनस्य०' (४।२।४५) इति प्राप्तोऽपि 'नो व्यञ्जनस्ये'ति नलुग्नेष्यते परैः । तुम्पती तुम्पन्ती स्त्री कुले वा । भौवादिकस्य तु तुम्पन्तीत्येकमेव रूपम् । तुफति । भौवादिकस्य तु तोफति । शेषं प्राग्वत् । तुम्फति (शे नस्य लुग्नेष्यते) रिंफति १५९ । 'तृप तृम्पत् तृप्तौ' तृपति तृम्पति । शे नलुग् नेष्यते १६० । 'स्तुप स्तूपण् समुच्छ्राये' । स्तोपयति । अषपाठात् तुस्तोपयिषति अतुस्तुपत् । ष्टूपणस्तु स्तूपयति तुष्टूपयिषति । अतुष्टूपदित्यादि स्यात् । स्तूपण् अषपाठात् अस्तूपयिषति । ङे उपान्त्यह्रस्वे अतुस्तुपत् । स्तूपयतीत्यादि तु ष्टूपणोऽपि स्यात् । १६३ । 'तुपुण् अर्दने' उदित्त्वान्ने तुम्पयति । किति नलुगभावे तुम्प्यते १६४ । 'घर्ब कम्ब खम्ब गम्ब चम्ब तम्ब नम्ब पम्ब बम्ब शम्ब षम्ब गतौ' । घर्बति । क्ते सेट्त्वात् 'क्तेट०' (५।३।१०६) इत्यः घर्बा । एवमग्रेऽपि । कम्ब किति नस्य लुकि कब्यते । कम्बा । शम्ब शम्बा । एवं सर्वेऽपि । षम्ब षस्य सत्वे सम्बति सम्ब्यते १७५ । साम्बण् सम्बन्धे साम्बयति । अलि साम्बः । १७६ । 'कुटुम्बिण् धारणे' कुटुम्बयते



Jain Education International For Personal & Private Use Only www.jainelibrary.org

१७७। 'सुम्भ नभि हिंसायाम्' अषपाठात् सुसुम्भयिषति। असुसुम्भत् १७८। 'नभि' द्युतादिरयम्। ततः परस्मैपदेऽङि प्रानभत्। आत्मनेपदे प्रानभिष्ट। णोपदेशस्य तु प्राणभिष्टेति १७९। 'षुंभ भाषणे च' चात् हिंसायाम्। षोपदेशात् असुषुम्भत्। णौ सनि सुषुंभयिषति। केवलात्तु षत्वापन्ने सनि 'णिस्तोरेव०' (२।३।३७) इति नियमात् षत्वाभावे सुसुम्भिषति। कुपूर्वादचि कुसुम्भः १८०। 'ष्टभुङ् स्तम्भे'। टपरषादिरयमस्य षः सो नेष्यते परैः। उदित्त्वान्ने ष्टम्भते। क्विति नलुगभावे ष्टम्भ्यते। टिष्टम्भिषते। श्रीसूरिपठितस्तु तपरसादिरपि। षोपदेशार्थं 'ष्टभुङ्' पेठे स्तम्भते स्तम्भ्यते। षत्वापन्ने सनि 'णिस्तोरेव०' (२।३।३७) इति नियमात् षत्वाभावे तिस्तम्भिषते। णौ तु षत्वे तिष्टम्भयिषति इति १८१। 'डभु डिभुण् सङ्घाते'। डम्भयति। क्विति नलुगभावे डम्भ्यते १८२। डिम्भयति। अचि डिम्भः १८३। 'दभु दिभुण् वञ्चने' दम्भयति दम्भ्यते १८४। दिम्भयति १८५। 'छद्म गतौ' गतिरत्र प्रस्तावात् छद्मप्रकारे छद्मति। सिचि अच्छद्मीत् णवि चच्छद्म १८६। 'सामण् सान्त्वने'। ङे उपान्त्यह्रस्वे असीसमत् चुराद्यदन्तस्य तु अससामत् १८७। 'तुरक् त्वरणे'। ह्वादिरयम्। तुतोर्ति। १८८। 'षुरत् ऐश्वर्यदीप्त्योः'। षपाठात्सुषोर। अषोपदेशस्य तु सुसोर। सुरतीत्यादितूभयोरपि। १८९। 'गुद्रुण् अनृतभाषणे' ने, गुन्द्रयति। अचि गुन्द्रा मुस्ता १९०। 'स्खल चलने'। घटादिरयम्। स्खलयति। ञिणम्परे णौ वा दीर्घे अस्खालि अस्खलि। स्खालं २ स्खलं २। १९१। एवं 'दल विशरणे' दलयति। अघटाद्योः स्खलद्लोस्तु णौ स्खालयति दालयति। अस्खालि अदालि। स्खालं २। दालं २। इत्येव स्यात्। स्खलति। दलति इत्यादि तूभयोरपि १९२। 'ष्ठल स्थाने' अषपाठात् तिस्थालयिषति। षोपदेशस्य तु तिष्ठालयिषति। स्थलतीत्यादि तूभयथापि।१९३। 'बलि परिभाषणहिंसादानेषु'। ओष्ठ्यादिरयम्। बलते। दन्त्योष्ठ्यवत्वाभावे 'न शसददिवादि०' (४।१।३०) इत्येत्वनिषेधाभावादनादेशादेरित्येत्वे बेले बेलाते १९४। 'षिलत् उञ्छे'। षपाठात्षत्वे सिषेल। अषोपदेशस्य तु सिसेल। सिलतीत्यादि तूभयोरपि १९५। 'पुलत् महत्त्वे' पुलति। भ्वादेस्तु पोलतीति स्यात्। १९६। 'बल वलण् प्राणने'। आद्य ओष्ठ्यादिर्द्वितीयो दन्त्योष्ठ्यादिः। घटादी एतौ। तेन ह्रस्वे बलयति। वलयति। ञिणम्परे णौ वा दीर्घे अबालि-अबलि। बालं २। बलं २। अवालि-अवलि। वालं २ वलं २। १९८। 'मुलण् रोहणे'। मोलयति। णिचोऽनित्यत्वान्नाम्युपान्त्येति के मुलः १९९। 'पालण् रक्षणे'। ण्यन्तादौणादिकः स्वरात्पर इस्ततो ङीः पाली २००। 'गालिण् स्रावणे'। गालयते। उद्गालयते। पालीवत् गाली २०१। 'क्षीवृ निरसने'। क्षीवति। क्ते 'क्षीबोल्लाघ०' इति निपातनस्य क्षीवृङ एवेष्टत्वादस्य क्षीवितः २०२। 'चीवी आदानसंवरणयोः'। णौ ङे उपान्त्यह्रस्वे अचीचिवत्। चीवृगस्तु ह्रस्वाभावे अचिचीवदिति स्यात्। चीवते इत्यादि तूभयोरपि २०३। 'षान्त्वण् सामप्रयोगे'। षपाठात्सस्य षत्वे सिषान्त्वयिषति। अषोपदेशस्य तु सिसान्त्वयिषति। सान्त्वयतीत्यादि तूभयोरपि २०४। 'रश शब्दे'। औणादिकेऽने रशना। मौ रश्मिः २०५। 'वाशृङ्च् शब्दे'। ऋदित्त्वादुपान्त्य ह्रस्वाभावे अववाशत्। वाशिचस्तु उपान्त्यह्रस्वे अवीवशदिति। वाश्यते इत्यादि तूभयोरपि २०६। 'लश लषण् शिल्पयोगे'। लाशयति लाषयति वा दारु। भ्रमादिना तक्ष्णोतीत्यर्थः २०७। 'दाशिण् दाने' दाशयते। ङे अदीदशत। 'दाशृग् दाने' इत्यस्य तु ऋदित्त्वादुपान्त्यह्रस्वाभावे अदादशतेत्यादि २०८। 'खष हिंसायाम्'। खषति। चखाष २०९। 'सुष शूष प्रसवे'। अषपाठात् षत्वाभावे सुसुष। षोपदेशस्य तु सुषुष। सूषतीत्यादि तु द्वयोरपि। शूषति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

२११ । ( 'घषुंङ् करणे' घंषते । 'घसुंङ् करणे' इत्यस्य तु घंसते इत्यादि ) २१२ 'धिषक् शब्दे' । ह्वादिरयम् । द्वित्वे दिधेष्टि २१३ । 'मुषच् खण्डने' । पुष्यादिरयम् । मुष्यति । अमुषत् २१४ । 'धूष धूसण् कान्तीकरणे' । धूषयति २१५ । धूसयति २१६ । 'धृषिण् सामर्थ्यवारणे' । धर्षयतेऽरीन् । २१७ । 'जर्त्स परिभाषणहिंसातर्जनेषु' । जर्त्सति । भ्वादिरयम् । जर्त्सन्ती स्त्री कुले वा । 'श्यशवः' ( २।१।११६ ) इति नित्यमन्तादेशः । २१८ । 'ष्णुसच् अदने' । 'षः स०' ( २।३।९८ ) इति सत्वे स्नुस्यति । षपाठात्षत्वे सुष्णोस २१९ । 'ष्णसूच् निरसने' घटादिरयम् । षः सत्वे । णौ घटादित्वात् ह्रस्वे स्नसयति । ञिणम्परे णौ अस्नासि-अस्नसि । स्नासं २ । स्नसं २ । अघटादि-स्नसेस्तु स्नासयति । अस्नासि । स्नासं २ । स्नस्यतीत्यादि तूभयोरपि २२० । 'दासद् हिंसायाम्' । दास्नोति २२१ । 'उध्रसूश् उञ्छे' । उध्रस्नाति । हौ 'व्यञ्जनाच्छ्नाहेरानः' (३।४।८०) इति उध्रसान । परोक्षाया आमि उध्रसाञ्चकार । सनि उदिध्रसिषति । ऊदित्त्वात् क्त्वि वेट् उध्रस्त्वा उध्रसित्वा । उत्पूर्व(ध्रस्नातेसु उद्ध्रस्नाति) उद्ध्रसान उदध्रास । उदिध्रसिषति उद्ध्रस्येत्यादि स्यात् २२२ । 'उध्रसण् क्षेपे' । उध्रासयति । औदिध्रसत् उत्पूर्वध्रसेस्तु उद्ध्रासयति । उददिध्रसयिषति । उददिध्रसदित्यादि स्यात् २२३ । 'गृहौङ् ग्रहणे' औदित्त्वाद्वेटि गर्ढा गर्हिता । वेट्त्वात् क्तयोर्नेट् गृढः २ । क्तौ गृढिः । 'नाम्युपान्त्य०' ( ५।१।५४ ) इति के गृहं गृहाः २२४ । 'स्रंहूङ् विश्वासे' । दन्त्यादिः । द्युतादिरयम् । स्रंहते सस्रंहे । 'द्युद्भ्योऽद्यतन्याम्' ( ३।३।४४ ) इति वात्मनेपदे । परस्मैपदेऽङि च अस्रहत् अस्रंहिष्ट । औदित्त्वात् क्त्वि वेटि सेटः क्त्वः क्त्वेति कित्त्वाभावे 'नो व्यञ्जनस्य०' (४।२।४५) इति नलुगभावे स्रंहित्वा । इडभावे हो ढत्वादिप्रक्रियया 'ढस्तड्ढे' इति ढलुपि दीर्घे च स्राढा । २२५ । 'ष्टृंहौ ष्टृंहौत् उद्यमे' । षः पाठात् 'षः स०' ( २।३।९८ ) इति कृतसस्य षत्वे तिष्टर्हयिषति । २२६ । ष्टृंहौत् प्राग्वत् । षत्वे तिष्टृंहयिषति । अषोपदेशयोः स्तृहस्तृंहोस्तु तिस्तर्ह-यिषति तिस्तृंहयिषतीत्याद्येव स्यात् । २२७ । 'दहुण् रक्षणे' दंहयति । णिचोऽनित्यत्वादभावेऽपि उदित्त्वान्ने क्ये नस्य लुगभावे दंह्यते २२८ । 'ष्टृक्ष गतौ' णौ सनि तिष्टृक्षयिषति । षपाठात्षः । अषोपदेशस्य तु तिस्तृक्षयिषतीत्यादि स्यात् २२९ । 'जक्षुङ्क गतिदानयोः' । घटादिरयम् । जङ्क्षते । क्तिति नस्य लुगभावे जङ्क्ष्यते । जजङ्क्षे । जङ्क्षिता । क्ते जङ्क्षितः । जङ्क्षा 'क्तेट०' इत्यः । णौ जङ्क्षयति । ञिणम्परे णौ अजाङ्क्षि अजङ्क्षि । जाङ्क्षं २ जङ्क्षं २ । २३० । 'भक्षी अदने' भक्षति भक्षते । बभक्षे २ । भक्षितुम् । भक्षितम् । २३१ । 'ऋक्षट् उपशमने' । ऋक्ष्णोति । अचि ऋक्षम् नक्षत्रम् २३२ ।

→⁂ इति ये परैरन्यथा पठिता अतिरिक्ता वा पठितास्ते परपठिताः द्वात्रिंशदधिके द्वे शते धातवः समाप्ताः । ⁂←

**अथ जैनागमप्रसिद्धा धातवो निर्दिश्यन्ते ।** 'दट(ट्ट ?) आच्छादने' । दटिता पट्टशाला १ । 'विकुर्व विक्रियायाम्' । भ्वादेरिति दीर्घस्यानित्यत्वादभावे विकुर्वति विकुर्वित्वा । २ । 'कुर्व विकरणे' प्राग्वद्दीर्घाभावे कुर्वति । अस्य विपूर्वस्य क्त्वि विकुर्व्य ३ । 'उषण् निवासे' अदन्तः । 'णिवेत्ति०' ( ५।३।१११ ) इत्यने पर्युषणा ४ 'युहं उद्धरणे' निर्यूढम् ५ ।

एवं च लौकिका वाक्यकरणीयाः परपठिता आगमप्रसिद्धाश्चेति **चतुर्विधा धातवः सौत्रा** धातुप्रसङ्गादुक्तास्ततश्च **स च त्रेधा** गणजो नामजः सौत्रश्चेत्यादौ यदुक्तं तन्निर्व्यूढमिति ।

यां शिष्योऽद्भुतकीर्त्तिकीर्त्तिविजयश्रीवाचकाहर्मणे
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः ।
तस्यां शासितसाधुशब्दसरणौ स्वोपज्ञसत्प्रक्रिया-
वृत्तौ पूर्त्तिमगुर्विवेकविशदाः सौत्राः सुखं धातवः ॥

⁂ एवं कर्त्रुक्तौ सर्वधातून्निरूप्य कर्मोक्तौ भावोक्तौ कर्मकर्त्रुक्तौ च निरूपयितुं प्रक्रमते । ⁂

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अथ भावकर्मणोः प्रक्रिया ।

**अथेति** व्यक्तम् । अथ कर्मणुक्तौ प्रत्ययान् दर्शयति । सूत्रम्

### तत्साप्यानाप्यात्कर्मभावे कृत्यक्तखलर्थाश्च ॥ १ ॥ [ सि० ३।३।२१ ]

**तदात्मनेपदं कृत्यक्तखलर्थाश्च प्रत्ययाः सकर्मकाद्धातोः कर्मणि अकर्मकादविवक्षितकर्मकाच्च भावे स्युः ॥ १ ॥**

**'तत्सा०'** अविवक्षितकर्मकादिति । सकर्मका अपि अविवक्षितकर्माणः कर्त्रैकनिष्ठव्यापारा अकर्मका भवन्ति । तेनैषां भावेऽपि प्रयोगः । क्रियते भवता । मृदु पच्यते भवता । पञ्च वारान् भुज्यते भवता । 'कालाध्वभावदेशं वा' ( २।२।२३ ) इत्यादिना कालाध्वभावदेशानां कर्मसंज्ञया अकर्मकत्वस्य च विधानात्तद्योगे कर्मणि भावे चात्मनेपदादीनि भवन्ति । तत्र **कर्मणि** मास आस्यते, क्रोशो गुडधानादिभिर्भूयते, गोदोहः सुप्यते । **भावे** मासमास्यते क्रोशमधीयते ओदनपाकं स्थीयते कुरून् सुप्यते ॥ १ ॥

अथात्र शिति विभक्तौ प्रत्ययान्तरमाह

### क्यः शिति ॥ २ ॥ [ सि० ३।४।७० ]

**सर्वस्माद्धातोर्भावकर्मविहिते शिति क्यः स्यात् । अत्र कर्मणि प्रत्ययविधानेनोक्तत्वात्कर्मणि प्रथमा । कर्मापेक्षाण्यर्थवचनानि च ।**

**नीह्वहिकृषो ण्यन्ता दुहिब्रूप्रच्छिचिरुधिशास्त्यर्थाः ।**
**पचि-याचि-दण्डि-कृ-गृहि-मथि-जिप्रमुखा द्विकर्माणः ॥ १ ॥**
**गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् ।**
**बुद्धिभक्ष्यार्थयोः शब्दकर्मणां च निजेच्छया ॥**
**प्रयोज्यकर्मण्यन्येषां ण्यन्तानामुक्तता मता ।**

**पठ्यते ग्रन्थः शिष्येण, पठ्येते ग्रन्थौ पठ्यन्ते ग्रन्थाः । पठ्यसे त्वं पठ्ये अहम् ॥ २ ॥**

'क्य०' सर्वस्मादित्यादि । तत्र भावे यथा शय्यते भवता । १ शय्येत २ शय्यताम् ३ अशय्यत ४ । भिद्यते कुसूलेन । कर्मणि यथा क्रियते कटः १ क्रियेत २ क्रियतां ३ अक्रियत ४ अक्रियेताम् अक्रियन्त कटाः ४ शितीति किम् ? बभूवे अकारि कटो भवता । अत्र प्रत्ययेनोक्ते कर्मणि का विभक्तिर्भवतीति निर्णेतुमाह **अत्रेत्यादि** । स्पष्टम् । अथ द्विकर्मकानां धातूनां कतरत्कर्मप्रत्ययेनाभिधीयते, के च धातवो द्विकर्माण इति निश्चेतुं साम्प्रदायिकं सार्द्धकारिकाद्वयमाह । **नीह्व०** **गौणे०** इत्यादि स्पष्टम् । **प्रक्रियाकौमुद्यां** तु न्यादीनामष्टानां गत्यर्थाकर्मणां णिगन्तानां मुख्यं कर्मोक्तं स्यात् । गौणं द्वादश दुहादीनाम् ॥ १ ॥ दुहि १ याचि २ प्रच्छि ३ रुधि ४ चि ५ ब्रू ६ भिक्षि ७ जि ८ अर्थि ९ शासि १० मन्थ्यर्थाः ११ दण्डि १२ । नी १ वहि २ हृ ३ ग्रहि ४ कृषि ५ मुषि ६ कृ ७ पचि ८ द्विकर्माणः ॥ २ ॥ न्यादयो–ण्यन्तनिःकर्म–गत्यर्था मुख्यकर्मणि प्रत्ययं यान्ति । दुह्यादि गौणेऽन्ये तु यथारुचि ॥३॥ यथा निन्ये विजनम् अजागरि रजनिम् अगमि मदम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अयाचि सम्भोगम् । गोपी हावमकार्यत भावश्चैनामनन्तेन ४ गोपी विजनं निन्ये इति न्यादिः, रजनिमजागरि इति ण्यन्तनिःकर्मा, मदमगमि इति गत्यर्थः । एषु त्रिषु मुख्यं कर्म गोपी ॥ सम्भोगमयाचि इति दुह्यादि । अत्र गोपी गौणं कर्म अन्यत्र यथारुचीति वचनात् । गोपी हावमकार्यत । गोपीं भावोऽकार्यत इति गौणे मुख्ये च प्रत्ययोत्पत्तिः । अनन्तेनेति सर्वत्र योज्यमित्यादि सोपपत्तिकमेतद्व्याख्यानं च कारकप्रक्रियायां 'कर्तुर्व्याप्यं कर्म' इत्यादिसूत्रव्याख्यानेऽभिहितमिति ततो (पृष्ठ २१५) ज्ञेयम् ॥ २ ॥

अथाशितिविभक्तौ प्रक्रियामाह

## भावकर्मणोः ॥ ३ ॥ [ सि० ३।४।६८ ]

**सर्वसाद्धातोर्भावकर्मविहितेऽद्यतन्यास्ते ञिच् स्यात् तलुक् च । अपाठि अपठिषाताम् अपठिषत ५ । पेठे ६ । पठिषीष्ट ७ । पठिता ८ । पठिष्यते ९ । अपठिष्यत १० । ॠतो 'रिः शक्याशीर्ये' (४।३।११०) । क्रियते १ । क्रियेत २ । क्रियताम् ३ । अक्रियत ४ । अकारि ॥ ३ ॥**

**'भाव०'** सर्वस्मादित्यादि । तत्र भावे यथा आसि अशायि भवता । कर्मणि यथा अकारि कटः । अपाच्योदनश्चैत्रेण । अद्यतन्या द्विवचनादौ सिजागमे इडागमे च रूपपद्धतिः । अपाठि ग्रन्थश्चैत्रेण । अपठिषातां ग्रन्थौ चैत्रेण । अपठिषत ग्रन्थाश्चैत्रेण । ग्रन्थं प्रति चैत्रोऽन्यो वा वक्ति हे ग्रन्थ मया चैत्रेण वा त्वं अपठिष्ठाः । हे ग्रन्थौ युवामपठिषाथाम् । हे ग्रन्था यूयमपठिध्वम् अपठिढ्वम् अपठिड्ढ्वम् । अथ ग्रन्थश्चैत्रमन्यं वा प्रत्याह । हे चैत्र त्वया अन्येन वा अहमपठिषि । आवामपठिष्वहि । वयमपठिष्महि । एवं सर्वासु विभक्तिषु कर्मतापन्नान्यदर्थादित्रयभावना एकद्विबहुवचनेषु कार्या ५ । चैत्रेण ग्रन्थः पेठे । ग्रन्थौ पेठाते । ग्रन्थाः पेठिरे । हे ग्रन्थ त्वं पेठिषे युवां पेठाथे यूयं पेठिध्वे ३ । ग्रन्थोऽहं पेठे आवां पेठिवहे वयं पेठिमहे ६ । ग्रन्थश्चैत्रेण पठिषीष्ट । ग्रन्थौ पठिषीयास्ताम् । ग्रन्थाः पठिषीरन् । हे ग्रन्थ त्वं चैत्रेण पठिषीष्ठाः युवां पठिषीयास्थाम् यूयं पठिषीध्वम् ३ ग्रन्थोहं चैत्रेण पठिषीय आवां पठिषीवहि वयं पठिषीमहि ७ । चैत्रेण ग्रन्थः पठिता ग्रन्थौ पठितारौ ग्रन्थाः पठितारः । हे ग्रन्थ त्वं चैत्रेण पठितासे युवां पठितासाथे यूयं पठिताध्वे । ग्रन्थोऽहं चैत्रेण पठिताहे आवां पठितास्वहे वयं पठितास्महे ८ । चैत्रेण ग्रन्थः पठिष्यते ग्रन्थौ पठिष्येते ग्रन्थाः पठिष्यन्ते । हे ग्रन्थ त्वं पठिष्यसे युवां पठिष्येथे यूयं पठिष्यध्वे । ग्रन्थोऽहं चैत्रेण पठिष्ये आवां पठिष्यावहे वयं पठिष्यामहे ९ । चैत्रेण ग्रन्थोऽपठिष्यत । ग्रन्थौ अपठिष्येताम् ग्रन्था अपठिष्यन्त । हे ग्रन्थ त्वं चैत्रेणापठिष्यथाः युवामपठिष्यथाम् यूयमपठिष्यध्वम् । ग्रन्थोऽहं चैत्रेणापठिष्ये आवामपठिष्यावहि वयमपठिष्यामहि १० । ऋकारान्तधातूनां कार्यविशेषमाह । ॠत इति ऋकारान्तधातूनामित्यर्थः । सूत्रम् **'रिः शक्याशीर्ये'** (४।३।११०) शक्ये आशीर्ये च परे ऋकारस्थाने रिरित्ययमादेशः स्यात् । क्रियते आद्रियते व्याप्रियते ह्रियते ॥ ३ ॥

अथ केषाञ्चिद्धातूनां कासुचिद्विभक्तिषु विशेषमाह

## स्वरग्रहदृशहन्भ्यः स्यसिजाशीःश्वस्तन्यां ञिड् वा ॥ ४ ॥
## [ सि० ३।४।६९ ]

**स्वरान्ताद्ग्रहादेश्च स्यसिजाशीःश्वस्तनीषु ञिड् वा स्यात् । 'नामिनोऽकलिहलेः' (४।३।५१)**

इति वृद्धौ । अकारि, अकारिषाताम्-अकृषाताम्, अकारिषत-अकृषत ५ । चक्रे ६ । कारिषीष्ट-कृषीष्ट ७ । कारिता-कर्त्ता ८ । कारिष्यते-करिष्यते ९ । अकारिष्यत अकरिष्यत १० । ईर्व्यञ्जनेऽयपि (४।३।९७) दीयते ॥ ४ ॥

**'स्वर०'** स्वरान्तादित्यादि स्पष्टम् । भावना प्राग्वत् । स्वरान्तेषु आकारान्तधातूनां विशेषमाह । तत्र दासंज्ञकानां शिति क्यप्रत्यये दीयते इत्यादि स्पष्टम् । एवं दे दीयते । धीयते । गीयते । पीयते स्थीयते । षोंच् सैं सीयते । मामाङ्मेङां मीयते । मातेर्नेच्छन्त्यन्ये । मायते । हाक् हीयते । हाङो न भवति । हायते ॥ ४ ॥

अत्रोपयोगि सूत्रम्

## आत ऐः कृञ्ञौ ॥ ५ ॥ [ सि० ४।३।५३ ]

आदन्तस्य धातोर्ञ्णिति कृति ञौ च ऐः स्यात् । अदायि अदायिषाताम् । पक्षे इश्च स्यादः । अदिषाताम् ५ । ददे ६ । दायिषीष्ट-दासीष्ट ७ । दायिता-दाता ८ । दायिष्यते-दास्यते ९ । गृह्यते ४ । अग्राहि अग्राहिषाताम् अग्रहिषाताम् । अग्राहिढ्वम् अग्राहिध्वम्-अग्रहीढ्वम् । २ । जगृहे ६ । ग्राहिषीष्ट-ग्रहीषीष्ट । ग्राहिषीढ्वम्-ग्रहिषीढ्वम् २ । ७ । ग्राहिता-ग्रहीता ८ । ग्राहिष्यते-ग्रहीष्यते ९ । अदर्शि अदर्शिषाताम्-अदृक्षाताम् ५ । ददृशे ६ । दर्शिषीष्ट दृक्षीष्ट ७ । दर्शिता-द्रष्टा । दर्शिष्यते-द्रक्ष्यते ९ । 'ञिणवि घन्' (४।३।१०१) । अघानि अघानिषाताम् । 'अद्यतन्यां वा त्वात्मने' (४।४।२२) इति वधादेशे, अवधि अवधिषाताम्-अहसाताम् ५ । जघ्ने ६ । घानिषीष्ट । 'हनो वध आशिष्यञौ' (४।४।२१) । वधिषीष्ट ७ । घानिता-हन्ता ८ । घानिष्यते-हनिष्यते ९ ॥ ५ ॥

**'आत०'** ञ्णिति कृतीति । दायः धायः । दायकः धायकः । शतं दायी गोदायो व्रजति । ञौ इति निरनुबन्धग्रहणे सामान्यग्रहणमिति ञिच्ञिटोरुभयोरपि ग्रहणम् । ततश्च अदायि इत्यादि स्पष्टम् । एवमधायि अगायि अमायि अपायि अहायि इत्यादि । अदिषातामिति । एवमस्थायि अस्थायिषाताम्-अस्थिषाताम् । अपाचि अपाचिषाताम्-अपाचयिषाताम् । पाचिषीष्ट-पाचयिषीष्ट । पाचिता पाचयिता । पाचिष्यते-पाचयिष्यते इति णिगन्तत्वेन स्वरान्ता उक्ताः । स्वाभाविकस्वरान्ता अप्येवम् । अचायि-अचायिषाताम्-अचेषाताम् चायिषीष्ट । चायिता चेता । चायिष्यते चेष्यते । एवं शायिष्यते शयिष्यते । स्ताविष्यते-स्तोष्यते । लाविष्यते-लविष्यते । तारिष्यते-तरिष्यते-तरीष्यते साधुना भवाब्धिः । जागुरकर्मकत्वाद्भावे ञिचि ञिटि च जागुर्ञिणवीति वृद्धौ चैत्रेण अजागारि जागारिषीष्ट-जागरीषीष्ट । जागारिता-जागरिता । जागारिष्यते जागरिष्यते । सकर्मकत्वे तु चैत्रेण मैत्रः प्रत्यजागारि प्रत्यजागारिषाताम् प्रत्यजागरिषाताम् प्रत्यजागारिषत-प्रत्यजागरिषत । प्रतिजागारिष्यते २ । णिगन्तत्वे तु चैत्रेण मैत्रोऽजागारि अजागरयिषाताम् अजागरिषाताम् । जागरयिता जागरिता । जागरयिष्यते २ । ञेर्णिगा व्यधानाद्वृद्धिर्न भवति इति स्वरान्तानां स्यसिजादिषु ञिड्विकल्पो दर्शितः । अथ ग्रहदृशहनां दर्शयति । ग्रह गृह्यते इत्यादि । अग्रहीषातामित्यादौ 'गृह्णोऽपरोक्षायां०' (४।४।३४) इति दीर्घः । 'न जनवधः' (४।३।५४) इति वृद्धिनिषेधे अवधि अवधिषातामिति । अहसातामिति । 'हनः सिच्' इति सिचः कित्त्वात् 'नो व्यञ्जनस्य०' (४।२।४५) इति नलुक् ॥ ५ ॥ पुनः केषाञ्चिद्विशेषमाह

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ये नवा ॥ ६ ॥ [ सि० ४।२।६२ ]

**खनिसनिजनां ये छिल्वा वा स्यात् । खायते-खन्यते । सायते-सन्यते । जायते-जन्यते । तनः क्ये ( ४।२।६३ ) आ वा स्यात् । तायते-तन्यते । 'अमो कम्यमिचमः' ( ४।२।२६ ) इति वा दीर्घे, अशामि-अशमि अशामिषाताम्-अशमिषाताम् । ण्यन्तत्वाभावे ॥ ६ ॥**

'ये०' एषामन्तस्य आ वा स्यात् । खायते इति । एवं चाखायते चङ्खन्यते । सासायते संसन्यते । जाजायते जंजन्यते । अखानि अखनिषाताम् अखनिषत । असानि असनिषाताम् असनिषत । 'न जनवधः' ( ४।३।५४ ) इति वृद्धिनिषेधे अजनि अजनिषाताम् अजनिषत । इत्यादि । 'तन०' स्पष्टम् । अतानि अतनिषाताम् अतनिषत । **अमो** कम्यमीत्यादि स्पष्टम् । 'स्वरग्रह०' ( ३।४।६९ ) इति वा ञिटि इटि च रूपपद्धतिः । अशमयिषातामिति । एवं शामिष्यते शमिष्यते । शमयिष्यते । अशामिष्यत अशमिष्यत अशमयिष्यत । शामीषीष्ट शमिषीष्ट शमयिषीष्ट । शामिता शमिता शमयिता । एवं अरामि-अरमि अरामिषाताम्-अरमिषाताम्-अरमयिषाताम् इत्यादि । एवं अदामि अदमि । अगामि-अगमि । 'ज्वलह्वल०' ( ४।२।३२ ) इति ह्रस्वे नम्यते नाम्यते । अनामि-अनमि । एवं सर्वेषाममन्तानां ण्यन्तानां प्रक्रिया । अकम्यमिचम इति किम् ? काम्यते । अकामि । आम्यते । आमि । आचाम्यते आचामि । ण्यन्तत्वाभावे इति ॥ ६ ॥ अत्र सूत्रम्

## मोऽकमियमिरमिनमिगमिवम्याचमः ॥ ७ ॥ [ सि० ४।३।५५ ]

**कम्यादिवर्जमान्तस्य धातोर्ञ्णिति कृति ञौ च वृद्धिर्न स्यात् । अशमीति । निषेधे अकामि । विश्रमेर्वा ( ४।३।५८ ) व्यश्रामि-व्यश्रमि ॥ ७ ॥**

'**मोऽक०**' ञ्णिति कृति यथा शमः तमः दमः शमकः तमकः दमकः । शमी तमी दमी । ञौ यथा अशमि अतमि अदमि । म इति किम् ? पाठः पाठकः अपाठि । कम्यादिवर्जनं किम् ? कामः कामुकः अकामि । यामः यामकः अयामि । रामः रामकः अरामि । नामः नामकः अनामि । आगामुकः आगामि । वामः वामकः अवामि । आचामः आचामकः आचामि । आचम इति किम् ? चमः विचमः चमकः विचमकः अचमि ( व्यचमि ) । **अन्ये** तु सामान्येन निषेधमिच्छन्ति । चामः विचामः । इत्यादि । कथमामः आमकः आमि ? 'अमण् रोगे' इत्यस्य भविष्यति । भौवादिकस्य त्वमेः अमः अमकः । कुक्ष्वाविलेव शशाम । '**विश्र०**' विपूर्वस्य श्रमेर्ञ्णिति कृत्प्रत्यये ञौ च परे वा वृद्धिर्न भवति । विश्रामः विश्रमः । सूर्यविश्रामभूमिः । वीति किम् ? श्रमः श्रमकः ॥ ७ ॥

## ञिख्णमोर्वा ॥ ८ ॥ [ सि० ४।४।१०६ ]

**लभः स्वरान्नोऽन्तो वा स्यात् ञौ ख्णमि च । अलाभि अलम्भि । 'भञ्जेर्ञौ वा' ( ४।२। ४८ ) लोपः स्यात् । अभाजि-अभञ्जि ।**

'**ञि०**' नोऽन्ताभावे वृद्धौ अलाभि पक्षे अलम्भीति । ख्णम्प्रत्यये लाभं २ लंभं २ । **भञ्जे०** भञ्जेरुपान्त्यनकारस्य ञौ परे लुग्वा भवति । नकारस्य लुक् पक्षे उपान्त्यवृद्धिः ।

**भावो धात्वर्थस्तस्यैकत्वादात्मनेपदैकवचनम् । चैत्रेण भूयते १० ।**

अकर्मकादविवक्षितकर्मकाच्च भावे आत्मनेपदादिकं भवतीति प्रागुक्तम् । ततो भावस्वरूपं दर्शयति । भावो धात्वर्थ इत्यादि । **तथाहुः श्रीसूरयः** । भावे च युष्मदस्मत्सम्बन्धिनिमित्तयोः ३३

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कर्तृकर्मणोरभावात् प्रथममेव त्रयं भवति । साध्यरूपत्वाच्च सङ्ख्यायोगो नास्तीति औत्सर्गिकमेकवचनमेव भवति । पाकः पाकौ पाकाः । पाको वर्त्तते । पाकं करोतीत्यादौ चानव्ययकृदभिहितो भावो द्रव्यवत् प्रकाशते इति सङ्ख्यया लिङ्गेन कारकैश्च युज्यते । त्यादिनेवाव्ययेनाभिहितस्त्वसत्त्वरूपत्वान्न युज्यते । कृत्वा । कर्तुम् । उष्ट्रासिका आस्यन्ते हतशायिका शय्यन्ते इति बहुवचनं कृदभिहितेनाभेदोपचाराद्भवतीति ।

काञ्चिदकर्मकधातूनामग्राहं दर्शयितुं **वाक्यप्रकाश**कारिकामाह

**लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणं ।**
**शयनक्रीडारुचिदीप्त्यर्था धातव एते कर्मविमुक्ताः ॥ १ ॥**

**[1]अविवक्षितकर्मकोऽप्यकर्मक एव । पच्यते १० । [2]अकर्मकोऽप्युपसर्गवशात् सकर्मकतामेति । अनुभूयते सुखं साधुना । अन्वभावि, अन्वभविषाताम् अन्वभाविषाताम् ५ ॥ ८ ॥**

लज्जासत्तेत्यादि स्पष्टम् । येषां कर्त्रेकनिष्ठ एव व्यापारः फलं च ते अकर्मका इति तत्त्वम् । यथा लज्जते इत्यादि ।

[1]अविवक्षितकर्मकोऽपीति । यदुक्तम्

'धातोरर्थान्तरे योगात् धात्वर्थेनोपसङ्ग्रहात् । [3]प्रसिद्धेरविवक्षातः कर्मिणोऽकर्मिका क्रिया' ॥ १ ॥

सकर्मकस्याप्यकर्मकत्वं भवतीत्यर्थः । तत्रार्थान्तरे योगो यथा भारं वहति गौरित्यत्र सकर्मकोपि वहति नदी, वहतीत्यत्राकर्मकः । धात्वर्थेनोपसङ्ग्रहो यथा 'जीव प्राणधारणे' इत्यत्र धात्वर्थेनैव कर्मोपसंगृहीतमिति चैत्रो जीवतीत्यत्राकर्मकः, प्राणान् धारयतीत्यर्थः । [3]प्रसिद्धेर्यत्र कर्मातिप्रसिद्धं तत्राकर्मकत्वं यथा

'वर्षति न परं मेघः क्षणदापि मृगाक्षि विप्रयोगे ते । प्रहरति न पञ्चबाणः केवलमबले निमेषोऽपि' ॥१॥

यथा वा 'गर्जति शरदि न वर्षति वर्षति वर्षासु निःस्वनो मेघः' । जलं वर्षतीति प्रतीतमेव । [4]अविवक्षात इति प्रयोक्तुर्निराकाङ्क्षत्वमविवक्षा यथा चैत्रः किमुदासीनस्तिष्ठति भुङ्क्ते पठति वेति क्रियामात्रे एव केनचिज्जिज्ञासिते चैत्रः पठतीत्यविवक्षितकर्मकोऽकर्मकः प्रयुज्यते किं पठतीति प्रष्टुर्जिज्ञासाया अभावात् । [2]अकर्मकोऽपीत्यादि स्पष्टम् । उक्तं च

'[1]सोपसर्गोऽन्यार्थवृत्तिरन्तर्भूतक्रियान्तरः । णिगन्तोऽन्तर्णिगर्थश्च पञ्चोपायः सकर्मकः ॥'

सोपसर्गो यथा भवतिरकर्मकोऽप्यनुभवति सुखमिति सकर्मकः ।१। अन्यार्थवृत्तिर्यथा नदी वहतीत्यत्र वहतिरकर्मकोऽपि भारं वहति इत्यत्र सकर्मकः । २ । अन्तर्भूतक्रियान्तरो यथा जिनो जयति इत्यत्र जयतिरकर्मकोऽपि शत्रून् जयतीत्यत्र सकर्मकः, अभिभवतीति क्रियान्तरस्य अन्तर्भूतत्वात् ।३। णिगन्तो यथा आसयति मैत्रम् । ४ । अन्तर्णिगर्थो यथा नमति पल्लवो वातेनेत्यत्र नमिरकर्मकोऽपि अनंसीद्दण्डं दण्डीत्यत्र सकर्मकः अनीनमदित्यर्थः । यथा वा परिणमति मृदं कुलालः परिणमयतीत्यर्थः । ५ ॥ ८ ॥

अथ **कर्मकर्त्तरिप्रक्रियामाह** । सूत्रम्

## एकधातौ कर्मक्रिययैकाऽकर्मक्रिये ॥ ९ ॥ [ सि० ३।४।८६ ]

**एकस्मिन्धातौ कर्मस्थक्रियया पूर्वदृष्टया एका अभिन्ना सम्प्रत्यकर्मिका क्रिया यस्य तस्मिन्कर्तरि कर्मकर्तृरूपे धातोर्ञिक्यात्मनेपदानि स्युः । उक्तं च 'यत्र कर्मैव कर्तृत्वं याति कर्ता तु**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नोच्यते । ञिक्यात्मनेपदं धातोरुक्तिः सा कर्मकर्त्तरि' ॥१॥ अकारि । स्वरदुहो वा (३।४।९०) ञिच् । अकृत क्रियते करिष्यते वा कटः स्वयमेव । 'पचिदुहेः' (३।४।८७) अपाचि पच्यते पक्ष्यते वा ओदनः स्वयमेव । अदोहि दुग्धे अदुग्ध गौः स्वयमेवेत्यादि । क्वचित् ञिक्यौ न स्याताम् । अलमकृत अलं कुरुते कन्या स्वयमेव । ॥ ९ ॥

इति महोपाध्यायश्रीकीर्त्तिविजयगणिशिष्योपाध्यायश्रीविनयविजयगणिविरचितायां हैमलघुप्रक्रियायामाख्यातप्रक्रिया समाप्ता ।

'एक०' पूर्वदृष्टयेति । पूर्वस्मिन्काले कर्मणः कर्मत्वावस्थायां दृष्टया क्रियया सहैकाभिन्नेति सहार्थे तृतीया । तथेति यथा प्राग्विहितानि ततश्चाद्यतन्यामात्मनेपदे ते ञिच् त लुक् च शिति क्य इति सिद्धम् । अकार्षीत् कटं देवदत्तः । स एवं विवक्षति नाहमकार्षं किन्त्वकारि कटः स्वयमेव । स्वयंशब्द-स्तृतीयार्थे करणकारके वर्त्तते । अत्र विशेषसूत्रम् । 'स्वर०' (३।४।९०) स्वरान्ताद्धातोर्दुहेश्चानन्तरोक्ते कर्त्तरि ञिच् वा न भवति । यथा अकृत कटः स्वयमेव । एवमलविष्ट अलावि केदारः स्वयमेव । अदुग्ध अदोहि गौः स्वयमेव । क्रियते करिष्यते वेति । एवं क्रियमाणः कटः । चक्रे कटः स्वयमेव । अभेदि भिद्यते बिभिदे कुसूलः स्वयमेव । अभैत्सीत् अभिदद्वा कुसूलं देवदत्तः । द्विधा भवन्तं द्वेधा अवीभवत् । स एवं विवक्षते नाहमभिदमभैत्सं वा किन्तु स्वयमेवाभेदि । अत्र करोति कटम् भिनत्ति कुसूलमित्यादौ यैव कटादिकर्मणां निर्वृत्तिर्द्वैधा भवनादिका क्रिया सैव सौकर्यादिविवक्षिते कर्त्तृ-व्यापारे स्वातन्त्र्यविवक्षायां तस्मिन्नेव धातावकर्मिका च । एवं चाकर्मकत्वाद्भावेप्यात्मनेपदं भवति । क्रियते कटेन, भिद्यते कुसूलेन । एकधाताविति किम् ? पचत्योदनं चैत्रः । सिद्ध्यत्योदनः स्वयमेव । नन्वत्र यथा धातुभेदस्तथा धातुभेदे क्रियाभेदोऽप्यस्तीति व्यावृत्तेर्व्यंगवैकल्यम् । नैवम् । स्याद्वादा-श्रयणादत्र धातुभेदे क्रियाभेदो नाश्रीयते । उभयत्र विक्लित्तिलक्षणा क्रियैकैवेति । कर्मक्रिययेति किम् ? साध्वसिश्छिनत्ति । साधु स्थाली पचतीति करणाधिकरणक्रिययैकक्रिये मा भूत् । एकक्रिययेति किम् ? स्रवत्युदकं कुण्डिका, स्रवत्युदकं कुण्डिकायाः । अत्र विसृजति निष्क्रामतीति क्रियाभेदात् । विसर्गो विसर्जनमात्रम् कुण्डिकाकर्तृकं । निष्क्रमणं तु विसर्गानन्तरं गमनमुदककर्तृकमित्यनयोर्भेदः । नन्वत्र विसृजत्युदकं कुण्डिका सा एवं विवक्षति नाहं विसृजामि किन्तु स्वयमेव निष्क्रामतीति विवक्षायां क्रियाभेदान्मा भूत् । परंतु यदा स्वयमेव विसृज्यते इति विवक्ष्यते तदा क्यादयः कुतो न भवन्ती-त्यत्रोच्यते । शब्दशक्तिस्वाभाव्यात् स्वयमेव विसृज्यते इत्यस्य निष्क्रामतीत्ययमेवार्थः प्रतीयते इति । एवं गलन्त्युदकं वलीकानि । गलत्युदकं वलीकेभ्य इत्यत्रापि मुञ्चति पततीति क्रियाभेदान्नैकक्रियत्वम् । अकर्मक्रिय इति किम् ? देवदत्तेन भिद्यमानः कुसूलः पात्राणि भिनत्ति । अन्योन्यमाश्लिष्यतः, हन्त्यात्मानमात्मा । ननु भिद्यमानः कुसूल इत्यादौ व्यावृत्तेर्व्यङ्ग्यवैकल्यम्, यथाऽत्राकर्मक्रियत्वं नास्ति, तथैकक्रियत्वमेकधातुत्वमपि नास्ति यतः प्रथमो भिद्धातुः देवदत्तकर्तृको द्वितीयः कुसूलकर्तृक इति साधनभेदात् क्रियाभेदो धातुभेदश्च । नैवम् । स्याद्वादाश्रयादत्रैवं भेदो नाश्रीयतेऽन्यथा सूत्रमिदं निरवकाशं स्याद्यतोऽकारि कटः स्वयमेवेत्यादिष्वपि प्रथमः कृग् चैत्रकर्तृकः पश्चात्कटकर्तृक इति भेदोऽस्त्येवेति । एकस्य कर्मत्वं कर्तृत्वं च कथमिति चेदुच्यते सर्वमपि हि कर्म्म स्वव्यापारे स्वतन्त्र-तामनुभूय कर्त्तुर्व्यापारेण न्यक्कृतं सत्कर्मतामनुभवति । कर्तृव्यापाराविवक्षायां तु स्वापारतन्त्र्यात् कर्तृत्वमस्या व्यावृत्तमेव । यदाहुः

१ यतः कटं करोतीत्यादिषु स्वव्यापारे जननादिलक्षणे कटादिकर्म स्वातन्त्र्यमनुभवति स्वातन्त्र्याच्च कर्तृत्वम् ।
हैं० प्रका० उत्त० १०५

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'निर्वर्त्त्यादिषु तत्पूर्वमनुभूय स्वतन्त्रताम् । कर्त्रन्तराणां व्यापारे कर्म सम्पद्यते ततः' ॥ १ ॥

'निर्वृत्तप्रेषणं चैव स्वक्रियावयवे स्थितं । निवर्त्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते' ॥ २ ॥ इति ।

केषाञ्चिद्विशेषमाह । **'पचि०'** ( ३।४।८७ ) अयमर्थः । पचिदुहिभ्यामेकधातौ कर्मस्थक्रियया पूर्वदृष्टयाऽकर्मिकया सकर्मिकया वा एकक्रिये कर्त्तरि कर्मकर्तृरूपे ञिक्यात्मनेपदानि स्युः । अपवादविषयं मुक्त्वा । अकर्मिकयेति अकर्मकत्वे पूर्वेण सिद्धमप्यनूद्यते सूत्रारम्भात् । अनेन तु कर्मणि विधीयते । तर्ह्यत्र कर्मणीत्युच्यताम् । नैवम् । एवं कृते पचिदुह्योस्तक्रकौण्डिन्यन्यायेन सत्येव कर्मणि स्यात्, कर्मण्यसति पूर्वेणापि न स्यात् । अपाचि पच्यते ओदनः स्वयमेव । अदोहि दुग्धे अदुग्ध गौः स्वयमेव । दुग्धे इत्यत्र दुहेः किरादित्वात् क्यस्य निषेधः । सकर्मकत्वे उदुम्बरं फलं पचति वायुः । अयमन्तर्भूतण्यर्थो द्विकर्मकः । उदुम्बरात् फलं पाचयति वायुरित्यर्थः । (उदुम्बरः) फलं पच्यते स्वयमेव । अपक्तोदुम्बरः फलं स्वयमेव । गां दोग्धि पयो गोपालकः । दुग्धे अदुग्ध अधुक्षत गौः पयः स्वयमेव । दुहिपच्योः कर्मणि सति 'न कर्मणा ञिच्' इति नित्यं प्रतिषेधः । असति कर्मणि तु 'स्वरदुहो वा' इति विकल्पः । अकर्मकस्य पूर्वेणैव सिद्धे सकर्मकार्थं वचनम् । अत्र चापवादसंग्राहिकां फक्किकामाह । **कँचिदित्यादि** (पृष्ठ ८३३) । तत्र ञिच् निषेधे सूत्रम् **'न कर्मणा ञिच्'** ( ३।४।८८ ) पचिदुहेः कर्मणा योगे कर्मकर्त्तरि ञिच् न स्यात् । अपक्तोदुम्बरः फलं स्वयमेव । अदुग्ध गौः पयः स्वयमेव । कर्मणेति किम् ? अपाच्योदनः स्वयमेव । अदोहि गौः पयः स्वयमेव । कर्मकर्तरीत्येव अपाच्युदुम्बरः फलं वायुना । अदोहि गौः पयो गोपालकेन । **'रुधः'** ( ३।४।८९ ) अस्य कर्मकर्त्तरि ञिच् न स्यात् । अरुद्ध गौः स्वयमेव । कर्मकर्त्तरीत्येव अरोधि गौर्गोपालेन । **'तपः कर्त्रनुतापे च'** ( ३।४।९१ ) तपेर्धातोः कर्मकर्त्तरि कर्त्तरि अनुतापे चार्थे ञिच् न स्यात् । अनुतापग्रहणाद्भावे कर्मणि च । अन्ववातप्त कितवः स्वयमेव । कर्त्तरि अतप्त तपांसि साधुः । भावे अन्वतप्त चैत्रेण । कर्मणि अन्ववातप्त पापः पापेन कर्मणा । कर्त्रनुतापे चेति किम् ? अतापि पृथ्वी राज्ञा । **'णिस्नुश्र्यात्मनेपदाकर्मकात्'** ( ३।४।९२ ) ण्यन्ताद्धातोः स्नुश्रिभ्यां चात्मनेपदविधावकर्मकेभ्यश्च कर्मकर्त्तरि ञिच् न स्यात् । येभ्यः कर्मण्यसत्यात्मनेपदं विधीयते ते आत्मनेपदाकर्मकाः । णिरिति निरनुबन्धग्रहणेन सामान्यग्रहणात् णिग् णिच् णिङां ग्रहणम् । **णिग्** पचत्योदनं चैत्रः तं मैत्रः प्रायुङ्क्त । अपीपचदोदनं चैत्रेण मैत्रः । पुनरोदनस्य सुकरत्वेन कर्तृत्वे अपीपचतौदनः स्वयमेव । यदि वा स्वयं पच्यमानः ओदनः स्वं प्रायुङ्क्त अपीपचतौदनः स्वयमेव । ओदनो विवक्षते नाहमात्मानमपीपचम् । नाहमात्मानं सिद्ध्यन्तमसीसिधम् । किं तर्हि स्वयमेवौदनोऽपीपचत असीसिधत इत्यर्थः । उभयत्र स्वयमेवापाचीत्यर्थः । **णिच्** अचूचुरत् गां चैत्रः । अचूचुरत गौः स्वयमेव । **णिङ्** पुच्छमुत्क्षिपति गौः उत्पुच्छयते गौः । अन्तर्भूतण्यर्थत्वात्सकर्मकत्वे उदपुपुच्छत् गां देवदत्तः । स एवं विवक्षते । नाहं गामुत्पुपुच्छे उदपुपुच्छत गौः स्वयमेव यद्वा उत्पुच्छामकार्षीदिति णिचि उदपुपुच्छत् गां चैत्रः । उदपुपुच्छत गौः स्वयमेव । **स्नु** प्रास्नावीद्गां देवदत्तः । प्रास्नोष्ट गौः स्वयमेव । स्नुरित्यात्मनेपदाभावे इट्, नियमादात्मनेपदाभावे इडभावे 'धुड्ह्रस्वात्०' ( ४।३।७० ) इति सिज्लुकः परत्वेऽपि नित्यत्वादन्तरङ्गत्वाच्च पूर्वमेव गुणस्ततश्च ह्रस्वाभावान्न सिज् लुक् । **श्रि,** उदशिश्रियत दण्डः स्वयमेव । आत्मनेपदाकर्मकः, व्यकार्षीत् सैन्धवं चैत्रः वल्गयति स्मेत्यर्थः । व्यकृत सैन्धवः स्वयमेव । विकरोतिर्वल्गनेऽन्तर्भूतण्यर्थः कर्मस्थक्रियः । व्यकार्षीत् कटं चैत्रः । व्यकृत कटः स्वयमेव । आवधीत् गां गोपः । आहत गौः स्वयमेव । व्यता-

१ स्वव्यापारे स्वातन्त्र्यात् कटादिकर्मणः कर्तृरूपादन्यो वरुटादि कर्ता कर्त्रन्तरं तस्य । २ निवृत्तकर्तृव्यापारम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ऽसीत् पृथिवीं रविः । व्यतप्त पृथिवी स्वयमेव । ञिच् निषेधात् ञिड् भवत्येव । पाचिता । पाचिषीष्ट ओदनः स्वयमेव । प्रास्नाविष्ट प्रास्नाविषीष्ट गौः स्वयमेव । उच्छ्रायिता उच्छ्रायिषीष्ट दण्डः स्वयमेव । आधानिष्ट आघानिषीष्ट गौः स्वयमेव । पृथग्योगादुत्तरेण ञिट्प्रतिषेधो न भवति । **'भूषार्थसन्किरादिभ्यश्च ञिक्यौ'** ( ३।४।९३ ) भूषार्थेभ्यः सन्नन्तेभ्यः किरादिभ्यश्चकारात् णिस्नुश्र्यात्मनेपदाकर्मकेभ्यश्च धातुभ्यः कर्मकर्त्तरि ञिक्यौ न भवतः । ञिङ्क्तसृष्टानुबन्धो ञिच्ञिटो ग्रहणार्थः । **भूषार्थे**—अलमकार्षीत् कन्यां चैत्रः । अलमकृत कन्या स्वयमेव । एवमलङ्करिष्यते अलङ्कुरुते कन्या स्वयमेव । पर्यस्कार्षीत् कन्यां चैत्रः । पर्यस्कृत परिष्करिष्यते भूषयते कन्या स्वयमेव । अममण्डत् कन्यां चैत्रः । अममण्डत मण्डयिष्यते मण्ड्यते कन्या स्वयमेव । भूषिमण्ड्योर्ण्यन्तत्वेनैव निषेधे सिद्धे ञिट्प्रतिषेधार्थं भूषार्थेषूदाहरणम् । अन्यथा पृथग्योगात् ण्यन्तद्वारा ञिट्प्रतिषेधो न स्यात् । किन्तु ञिच एव । उदाहरणदर्शनात् चानयोर्भूषार्थद्वारा ञिच्ञिटोरुभयोरपि निषेधः प्रतीयत इति । **सन्नन्त** अचिकीर्षीत् कटं चैत्रः । अचिकीर्षिष्ट चिकीर्षिष्यते चिकीर्षते कटः स्वयमेव । अबिभित्सीत् कुसूलं चैत्रः । अबिभित्सिष्ट बिभित्सिष्यते बिभित्सते कुसूलः स्वयमेव । एवमवाकीर्ष्ट अवकीर्षीष्ट अवकिरते पांसुः स्वयमेव । अगारीद्ग्रासं चैत्रः । अगीर्ष्ट गीर्षीष्ट गिरते । एवं न्यगीर्ष्ट । निगीर्षीष्ट निगिरते ग्रासः स्वयमेव । दोग्धि गां पयो गोपः । दुग्धे गौः पयः स्वयमेव । कथमदोहि गौः स्वयमेव ? दुहेर्ञिज्विकल्प उक्तः । अवोचत्कथां चैत्रः । अवोचत ब्रूते कथा स्वयमेव । अश्रन्थीन्मालां मालिकः । अश्रन्थिष्ट ( श्रथ्नीते ) श्रन्थते माला स्वयमेव । अग्रन्थीत् ग्रन्थं विद्वान् । अग्रन्थिष्ट ग्रथ्नीते ग्रन्थते ग्रन्थः स्वयमेव । श्रन्थिग्रन्थी क्र्यादौ युजादौ वा, **धातुपारायणे तु** भ्वादिसत्कावपि । अनंसीद्दण्डं दण्डी । अनंस्त नमते दण्डः स्वयमेव । परिणमति मृदं कुलालः । परिणमते मृत्स्वयमेव । कृ गृ दुह ब्रू श्रन्थ् ग्रन्थ् नम् इति **किरादयः सप्त** ७ । बहुवचनं शिष्टप्रयोगानुसरणार्थम् । णिस्नुश्र्यात्मनेपदानां ञिच्प्रतिषेधः पूर्वसूत्रे उदाहृतः । ञिट् त्वेषां पृथग्योगाद्भवत्येवेति चोक्तम् । **क्य**निषेध **उदा**ह्रियते । ण्यन्त, कारयते कटः स्वयमेव । चोरयते गौः स्वयमेव । उत्पुच्छयते गौः स्वयमेव । स्नु, प्रस्नुते गौः स्वयमेव । श्रि, उच्छ्रयते दण्डः स्वयमेव । आत्मनेपदाकर्मकः, विकुर्वते सैन्धवाः स्वयमेव । अन्ये तु णिस्नुश्र्यात्मनेपदाकर्मकेभ्यो ञिटोऽपि प्रतिषेधमिच्छन्ति । तन्मते पाचयिता पाचयिष्यते ओदनः । प्रस्नोता प्रस्नोष्यते । उच्छ्रयिता उच्छ्रयिष्यते । आहन्ता आहनिष्यते । **ननु** स्नुनमावकर्मकौ तत्कथमनयोर्कर्मस्थक्रियत्वमित्य**त्रो**च्यते, स्नुनमोरन्तर्भूतण्यर्थत्वेन सकर्मत्वाद्भवादेः कर्मकर्तृत्वम् । यत्र तु ण्यर्थो नास्ति तत्र कर्तृतैव । यथा प्रस्नौति गौर्दोग्धुः कौशलेन, नमति पल्लवो वातेन । **ननु** कर्मस्थक्रियया एकाकर्मक्रिये कर्त्तरि ञिक्यात्मनेपदानि स्युः, अत्र तु ण्यन्तानां प्रयोजकव्यापारः सन्नन्तानां चेच्छा कर्तृस्थैव क्रियेति ञिक्ययोः प्राप्तिरेव नास्ति, किं निषेधेन । **उच्यते** । प्रयोजकव्यापारस्येच्छायाश्च तदर्थत्वात्करणादिक्रियारूपस्य प्रकृत्यर्थस्य प्राधान्यं तस्य च कर्मस्थत्वाण्णिसन्नन्तानामपि कर्मस्थक्रियत्वम् । तथा ब्रूते कथेत्यत्र वचनं शब्दप्रकाशनफलत्वात् उपाध्यायेनोक्तः करोतीतिवत्प्रेरणार्थत्वाद्वा कर्मस्थक्रियारूपम् । अयं भावः । यथोपाध्यायेनोक्तः करोतीत्यत्र वच्धातोः प्रेरणार्थत्वं तथा अवोचत्कथां कोऽर्थः प्रेरयामास । तथा च प्रेरणा कथानिष्ठेति कर्मस्थक्रियत्वं स्फुटमेवेति । भूषाक्रियाणां च भूषाफलं शोभाख्यं कर्मणि दृश्यते इति कर्मस्थक्रियत्वमेवमन्यत्रापि भावनीयम् । **'करणक्रियया क्वचित्'** ( ३।४।९४ ) एकधातौ पूर्वदृष्टया करणस्थया क्रियया एका कर्मक्रिये कर्त्तरि ञिक्यात्मने-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पदानि कश्चिद्भवन्ति । परिवारयन्ति कण्टकैः पुरुषा वृक्षं तत्र पुरुषा विवक्षन्ति न वयं कण्टकैर्वृक्षं परिवारयामः किन्तु कण्टकाः स्वयमेव वृक्षं परिवारयन्ते । अत्र दृढत्वप्रौढत्वादिधर्मेण स्वातन्त्र्यविवक्षया करणस्य कर्तृत्वम् । सर्वाण्यपि हि कारकाणि क्रियायां स्वव्यापारे स्वातन्त्र्यमनुभूयैव कर्तृव्यापारतिरस्कृतानि कर्मकरणादिव्यपदेशं लभन्ते इति'। अयं च लक्ष्यानुसारेण विधिर्भवति न तु सार्वत्रिक इति क्वचिदित्युक्तम् । तेन साध्वसिश्छिनत्तीत्यादौ स्वातन्त्र्यविवक्षया कर्तृत्वे सत्यपि ञिक्यात्मनेपदानि न भवन्तीति । तथा **मूलफक्किकायां** (पृष्ठ ८३३) कैश्चिद्ग्रहणसामर्थ्यात् कचित् कर्त्रुक्तावपि ञिक्यात्मनेपदानि भवन्ति । सूत्रम्, **'तपेस्तपःकर्मकात्'** (३।४।८५) तपेर्धातोरर्थान्तरवृत्तित्वेन तपःकर्मकात्कर्त्तरि ञिक्यात्मनेपदानि भवन्ति तथा [ यथाविहितानीत्यर्थः ] । तप्यते तपांसि साधुः । तेपे तपांसि साधुः । तपिरत्र करोत्यर्थः । ञिच्तु: "तपःकर्त्रनुतापे" च (३।४।९१) इति निषेधात्र भवति । अन्वतप्त तपः साधुः । तपेरिति किम्? कुरुते तपांसि साधुः । तप इति किम्? उत्तपति सुवर्णं सुवर्णकारः । कर्मेति किम्? तपांसि साधुं तपन्ति दुःखयन्तीत्यर्थः । **'सृजः श्राद्धे ञिक्यात्मने तथा'** (३।४।८४) सृजो धातोः श्रद्धावति कर्त्तरि ञिक्यात्मनेपदानि भवन्ति, यथा विहितानि । असर्जि सृज्यते स्रक्ष्यते मालां धार्मिकः । श्राद्ध इति किम्? व्यत्यसृष्ट माले मिथुनम् । सृजति स्रक्ष्यते मालाम् (मालिकः) ॥ ९ ॥

अत्र च प्रक्रियायां अलङ्कुरुते कन्या स्वयमेवेत्युदाहरणं द्वितीयवृत्तेः पर्यन्तमङ्गलार्थं वृत्तौ च मालाशब्दः पर्यन्तमङ्गलार्थ इति श्रेयः ।

**इत्याख्यातप्रक्रिया** सत्क्रियार्हां सिद्धिं प्राप्ता श्रीगुरूणां प्रसादात् ।
प्रायोऽस्माकं पुण्यकृत्योद्यतानां सोऽयं शश्वद्दत्तहस्तावलम्बः ॥ १ ॥

यां शिष्योद्धुतकीर्त्तिकीर्त्तिविजयश्रीवाचकाहर्मणे
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः ।
तस्यां शासितसाधुशब्दसरणौ स्वोपज्ञसत्प्रक्रिया-
वृत्तौ पूर्णतया व्यराजत गुणैर्वृत्तिर्द्वितीयाद्भुता ॥ १ ॥





Jain Education International For Personal & Private Use Only www.jainelibrary.org

卐 卐 卐 卐 卐 **विश्वहितबोधिदायकश्रीअमीविजयगुरुभ्यो नमः** 卐 卐 卐 卐 卐

ऐँ नमः ।

# अथ कृदन्तप्रक्रिया निरूप्यते ।

ज्योतिस्तत्परिचिन्त्य नित्यमुदितं प्राग् ब्रह्मरूपं स्फुर-
लोकालोकविलोकनैकरसिकैरालोकितं तात्त्विकैः ।
स्यादित्यादिविधिं विधाय विधिवद्व्याधूतधीविक्रियां
वक्तुं व्यक्तमुपक्रमे क्रमगतां कृत्प्रत्ययप्रक्रियाम् ॥ १ ॥

कृदन्तप्रक्रियां निरूपयितुमाह । अथेति तत्र प्रथमं कृत्प्रत्ययान् लक्षयति सूत्रम्

## आतुमोऽत्यादिः कृत् ॥ १ ॥ [ सि० ५।१।१ ]

इत्यादि ॥ १ ॥

**'आतु०'** अस्यायमर्थः । धातोर्विधीयमानस्त्यादिवर्जितो वक्ष्यमाणस्तुमभिव्याप्य प्रत्ययः कृत्संज्ञो भवति । घनघात्यः । घनेन हन्यते इति घनघात्यः । 'ऋवर्णव्यञ्जनात्०' ( ५।१।१७ ) इति घ्यण् । अस्य कृत्संज्ञत्वात् 'कारकं कृता' ( ३।१।६८ ) इति समासः । अत्यादिरिति त्यादयोऽत्र वक्ष्यमाणा अपि न कृत्संज्ञा । एषां कृत्संज्ञत्वे तु प्रणिस्ते इत्यत्र 'निंसनिक्षनिन्दः कृति वा' ( २।३।८४ ) इति णत्वविकल्पः स्यात् ॥ १ ॥ अथात्र अधिकारसूत्रमाह ।

## बहुलम् ॥ २ ॥ [ सि० ५।१।२ ]

**'बहु०'** अयमस्यार्थः । अधिकारोऽयम् । कृत्प्रत्ययो यथानिर्दिष्टादर्थादेरन्यत्रापि बहुलं भवति । पदाभ्यां ह्रियते पादहारकः । गले चोप्यते इति गलेचोपकः । मुह्यतेऽनेनेति मोहनीयं कर्म । स्नात्यनेनेति स्नानीयं चूर्णम् । एवं यानीयोऽश्वः । दीयतेऽस्मै इति दानीयोऽतिथिः । सम्प्रदीयतेऽस्मै इति सम्प्रदानम् । एवं स्पृहणीया विभूतिः । समावर्त्तन्त तस्मादिति समावर्त्तनीयो गुरुः । एवमुद्वेजनीयः खलः । तिष्ठन्त्यस्मिन्निति स्थानीयं नगरम् । एवं शयनीयः पल्यङ्कः ।

इत्यादिशब्दात् । **'असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः'** ( ५।१।१६ ) इतः सूत्रादारभ्य **'स्त्रियां क्तिः'** ( ५।३।९१ ) इत्यतः प्राग् योऽपवादस्तद्विषयेऽपवादेनासमानरूप औत्सर्गिकः प्रत्ययो वा स्यात् । अवश्यलाव्यम् अवश्यलवितव्यम् । ज्ञः ज्ञायकः । नन्दनः नन्दकः नन्दयिता । असरूप इति किम् ? घ्यणि यो न स्यात् । कार्यम् । डविषयेऽण् न स्याद् गोदः । नानुबन्धकृतान्यसारूप्यान्येकस्वरत्वानेकवर्णत्वानीति सारूप्यम् । प्राक्क्तेरिति किम् ? कृतिः चितिः रक्षितं रक्षणम् । अत्र घञादिर्न स्यात् । अपवादे त्यादिविषये त्वसरूपोऽप्युत्सर्गत्यादिर्न प्रवर्त्तते इति । 'श्रुसद०' ( ५।२।१ ) इति सूत्रे वाग्रहणेन ज्ञापयिष्यन्ति ॥ २ ॥

अथ कृत्प्रत्ययाः कस्मामुक्तौ भवन्तीत्याह

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## कर्त्तरि ॥ ३ ॥ [ सि० ५।१।३ ]

**कृदर्थविशेषोक्तिं विना कर्त्तरि स्यात् ॥ ३ ॥**

**'कर्त्त०'** स्पष्टम् । तथैव दर्शयति ॥ ३ ॥

## णकतृचौ ॥ ४ ॥ [ सि० ५।१।४८ ]

**धातोरेतौ स्याताम् । करोतीति कारकः कर्त्ता । सेटां-स्ताद्यशित इतीडागमे एधिता । धूगौदित इति वेटि गोप्ता गोपिता । सहिवहेरिति सोढा वोढा । ञ्णितीत्युपान्त्यवृद्धौ पाचकः ॥ ४ ॥**

**'णक०'** णकारो वृद्ध्यर्थः । चकारः ञ्यन्त्यस्वरादेरित्यत्र सामान्यग्रहणाविघातार्थः । अन्यथा निरनुबन्धेति न्यायात्तृच एव ग्रहः स्यान्न तु तृनः । शेषं सर्वं स्पष्टम् ॥ ४ ॥ सूत्रम्

## अच् ॥ ५ ॥ [ सि० ५।१।४९ ]

**धातोरच् स्यात् । करः हरः ॥ ५ ॥**

**'अच्०'** करः हरः इति । एवं पचः पठः उद्वहः । चकारोऽचीत्यत्र विशेषणार्थः । अत्रायं विशेषः **'सयसितस्य'** ( २।३।४७ ) परिनिविभ्यः परस्य सयसितयोः सस्य षः स्यात् । परिषयः निषयः विषयः । परिषितः निषितः विषितः । सय इति सिनोतेरलंतस्याजन्तस्य घान्तस्य वा परिसयनं अल् परिसिनोति अच् परिसिनोत्यस्मिन् 'पुन्नाम्नि घः' ( ५।३।१३० ) । सित इति क्तान्तस्य रूपम् । स्यतेर्वा नियमार्थं परिनिविपरस्यैव क्तान्तस्य स्यतेर्यथा स्यात् । तेनोपसर्गान्तरपूर्वस्य 'उपसर्गात्सुग्०' ( २।३।३९ ) इत्यादिनापि न भवति । तेन प्रतिसितः । निसित इत्यादि सिद्धम् । योगविभागात् द्वित्वेऽप्यस्त्यपीति निवृत्तम् । तेन विषयमाख्यत् मा विषसयदित्यत्र द्वित्वे सति पूर्वेण व्यवधानादुत्तरस्य न भवति, पूर्वस्य त्वव्यवहितत्वाद्भवत्येव । विषयमैच्छत् कयन् । कयनि ईः । व्यसयीयत् । परिषित इवाचरत् क्यङ् दीर्घश्च्वीति दीर्घे पर्यसितायत । अत्र षत्वं कृतमपि परेऽडागमे सिद्धम् । **कथं** परिषितमाख्यत् । मापरिषिषयत् । **द्वित्वे** सत्युपसर्गात्परस्य पूर्वस्यानेन षत्वमुत्तरस्य तु 'नाम्यन्तस्था०' ( २।३।१५ ) इत्यादिनेति न दोषः ॥ ५ ॥ सूत्रम्

## लिहादिभ्यः ॥ ६ ॥ [ सि० ५।१।५० ]

**एभ्योऽच् स्यात् । लेहः शेषः ॥ ६ ॥**

**'लिहा०'** पृथक् योगो बाधकबाधनार्थः । लेहः शेष इति । एवं सेवः देवः मेधः ५ मेषः मेघः देहः प्ररोहः न्यग्रोधः १० कोपः गोपः सर्पः नर्त्तः दर्शः १५ । एषु नाम्युपान्त्यलक्षणं कं दृशेस्तु वा शं बाधते । यदि हि नित्यं लिहाद्यच् स्यात्तदा दृशः शविधानमनर्थकं स्यात् । अनिमिष इति बहुलाधिकारात्कोऽपि स्यात् । श्वपचः पारापतः कद्वदः कुत्सितं वदति 'रथवदे' ( ३।२।१३१ ) इति कोः कदादेशः । यद्वदः २० अरीन् व्रणयतीत्यरिव्रणा शक्तिः । जारभवा कन्या वरः सारवहः रघूद्वहः । एऽवर्णं बाधते २५ इति पञ्चविंशतिको लिहादिगणः । बहुवचनमाकृतिगणार्थं नदी भषी प्लवी गरी चरी तरी दरी सूदी देवी सेवी चोरी गाही एते द्वादश अजन्ता गौरादिषु द्रष्टव्याः । विशिष्टविषयार्थश्चैषां सप्रत्ययानां पाठस्तेन ये निरुपसर्गोपपदा वा पठितास्ते तथा गृह्यन्ते इति ज्ञेयम् ॥ ६ ॥ सूत्रम्

१ तेन वशा अमर क्षम रण श्लेष अजगरेत्यदयोऽदर्शिता अपि ज्ञेयाः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ब्रुवः ॥ ७ ॥ [ सि० ५।१।५१ ]

**ब्रूगोऽचि ब्रुवः स्यात् । ब्राह्मणब्रुवः ॥ ७ ॥**

**'ब्रुवः'** ब्राह्मणमात्मानं ब्रूते ब्राह्मणब्रुवः । अण्वचादेशगुणबाधनार्थं निपातनम् । जातिमात्रजीवी द्विजब्रुव **इत्यभिधानचिन्तामणौ** । एवं पण्डितब्रुवादयोऽपि ॥ ७ ॥ सूत्रम्

## नन्द्यादिभ्योऽनः ॥ ८ ॥ [ सि० ५।१।५२ ]

**नन्दनः । सहनः ॥ ८ ॥**

**'नन्द्या०'** नन्द्यादयो नन्दनरमणेत्यादि नामगणशब्देभ्यो प्रोद्धृत्य ज्ञेयाः । स प्रत्ययपाठो विशिष्टविषयार्थो रूपनिग्रहार्थश्च । नन्दि वाशि मदि दूषि साधि वर्द्धि शोभि रोचिभ्योऽष्टाभ्यो ण्यन्तेभ्यः संज्ञायाम्—नन्दनः, वाशनः ऋषिः, मदनः दूषणः साधनः वर्द्धनः शोभनः रोचनः । सहिरमिदमिरुचिकृतितपितृदिदहियुपूलूभ्य एकादशेभ्योऽण्यन्तेभ्यः संज्ञायाम्—सहते सहनः । एवं रमणः कान्तः । दमनः ऋषिविशेषः । रोचनः विरोचनः विकर्त्तनः तपनः चतस्रोऽपि सूर्यसंज्ञाः । प्रतर्दनः राजविशेषः । दहनः । यवनः राजा देशश्च । पवनः । लवणः दानविशेषः, निपातनाण्णत्वम् । समः क्रन्दिकृषिहृषिभ्यः संज्ञायामेव संक्रन्दन इन्द्रः । संकर्षणः बलदेवः । संहर्षणः राजविशेषः । कर्मणो दमिअर्दिनाशिसूदिभ्यः सर्वदमनः राजविशेषः । जनार्दनः । चित्तविनाशनः ऋषिविशेषः । मधुसूदनः । असंज्ञायामपि रिपुदमनः कुलदमनः परार्दनः रोगनाशनः अरिसूदनः । नर्दिभीषिभूषिदर्पिजल्पिभ्यः पञ्चभ्यः नर्दयति नर्दनः । बिभीषयते बिभीषणः । भूषयति भूषणः । दर्पयति दर्पणः । जल्पति जल्पनः । नन्द्यादय एकत्रिंशत् । बहुवचनमाकृतिगणार्थम् ॥ ८ ॥ सूत्रम्

## ग्रहादिभ्यो णिन् ॥ ९ ॥ [ सि० ५।१।५३ ]

**गृह्णातीति ग्राही । तिष्ठतीति स्थायी ॥ ९ ॥**

**'ग्रहा०'** एभ्यो नाम गणदृष्टेभ्यो णिन् स्यात् । स्थायीति । एवं उपस्थायी । मन्त्री । संमर्दी । उपावाभ्यां रुधः उपरोधी अवरोधी । अपाद्राधः अपराधी । उदः सहिदसिभासिभ्यः । उत्साही उदासी उद्भासी । नेः श्रुशीविशवसवपरक्षिभ्यः षड्भ्यः निश्रृणोति निश्रावी । निशायी निवेशी निवासी निवापी निरक्षी । नञो व्याहृ संव्याहृ संव्यवहृ याचि व्रज वद वसिभ्यः सप्तभ्यः । न व्याहरति अव्याहारी । असंव्याहारी असंव्यवहारी अयाची अव्राजी अवादी अवासी । नञ्पूर्वात्स्वरान्तादचित्तवत्कर्तृकात् अकारी घर्मस्य बालातपः । अहारी शीतस्य शिशिरः । चित्तवत्कर्तृकान्न भवति अकर्त्ता कटस्य चैत्रः । केचिदनञ्पूर्वादिच्छन्ति कारी हारी । व्यभि(ति ?)भ्यां भुवोऽतीते । विभवति स्म विभावी अभि(अति ?)भावी । विपरीभ्यां भुवो ह्रस्वश्च वा । विभवति विभावी-विभवी । परिभावी-परिभवी । वेः शीङ्षिगोर्देशे ह्रस्वश्च । गुणैश्चित्ते विशेते विसिनोति वा विशयी विषयी च देशः । निपातनात्षत्वम् । ग्रहादयो द्वात्रिंशत् । ग्रहादिराकृतिगणः ॥ ९ ॥ सूत्रम्

## नाम्युपान्त्यप्रीकृगृज्ञः कः ॥ १० ॥ [ सि० ५।१।५४ ]

**नाम्युपान्त्येभ्यः प्र्यादिभ्यश्चतुर्भ्यश्च कः स्यात् । क्षिपः प्रियः किरः गिरः ज्ञः ॥ १० ॥**

**'नाम्यु०'** ककारः कित्कार्यार्थः । क्षिप इति । एवं विक्षिपः विलिखः बुधः युधः कृशः वितुदः । प्रीणातीति प्रियः । किरतीति किरः । उत्किरः । गिरति गिलः निगिलः 'नवा स्वरे' इत्यत्र व्यव-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्थितविभाषाश्रयणान्नित्यं लत्वम् । जानातीति ज्ञः । काष्ठभेद इति परत्वादण् । अत्रादिशब्दसंसर्गात् **'गेहे ग्रहः'** (५।१।५५) गेहेऽभिधेये ग्रहेः को भवति । गृहं गृहाणि । गृहाः पुंसि बहुवचनान्त एव । उपचाराद्दारा गृहाः । **दुर्ग**स्त्वेकवचनान्तमेवाह । **'उपसर्गादातो डोऽश्यः'** (५।१।५६) उपसर्गात्परात् श्यैङ्वर्जितादाकारान्ताद्धातोर्डः स्यात् आह्वयति आह्वः प्रह्वः संव्यः परिव्यः प्रव्यः अनुव्यः प्रस्थः सुग्लः सुम्लः सुत्रः व्यालः सुरः । केनैव सिद्धे ण्वृन्निषेधार्थं डविधानम् । उपसर्गादिति किम् ? णे दायः धायः । आत इति किम् ? आहर्ता । अश्य इति किम् ? णे अवश्यायः । प्रतिश्यायः । पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरानिति णो बाध्यते नाण् तेन गोसन्दाय इत्यणेव । **व्याघ्राघ्रे प्राणिनसोः** (५।१।५७) एतावेतयोरर्थयोर्यथाक्रमं डान्तौ निपात्येते । विविधमाजिघ्रति व्याघ्रः प्राणी । आजिघ्रति आघ्रा नासिका ॥ १० ॥ सूत्रम्

## घ्राध्मापाट्धेदृशः शः ॥ ११ ॥ [ सि० ५।१।५८ ]

**एभ्यः शः स्यात् । शकारः शित्कार्यार्थः । जिघ्रः उद्धमः पिब उद्धय उत्पश्यः ॥ ११ ॥**

**'घ्रा०'** एभ्य इति पञ्चभ्यः । शित्कार्यार्थ इति तेन जिघ्रधमादयः आदेशाः स्युः । जिघ्र इति । एवं विजिघ्रः उज्जिघ्रः । धमः विधमः । घ्रादिसाहचर्यात्पा इति पिबतेर्ग्रहणम् न पातेः । पिबतीति पिबः उत्पिबः । पायतेस्तु लाक्षणिकत्वान्निषेधः । ट्धेष्टकारो ङ्यर्थः । विद्धयः उद्धयः विद्धयी उद्धयी । दृश पश्यः विपश्यः उत्पश्यः । उपसर्गादेवेच्छन्त्यन्ये ॥ ११ ॥ सूत्रम्

## साहिसातिवेद्युदेजिधारिपारिचेतेरनुपसर्गात् ॥ १२ ॥ [ सि० ५।१।५९ ]

**एभ्योऽनुपसर्गेभ्यो ण्यन्तेभ्यः शः स्यात् । साहयः सातयः वेदयः उदेजयः धारयः पारयः चेतयः ॥ १२ ॥**

**'साहि०'** एभ्य इति सप्तभ्यः । सातिः सुखार्थे सौत्रो धातुः । शेषं स्पष्टम् । अनुपसर्गादिति किम् ? प्रसाहयिता छत्रधार इति परत्वादणेव । अत्रादिशब्दसन्निधानात् **'लिम्पविन्दः'** (५।१।६०) आभ्यामनुपसर्गाभ्यां शः स्यात् । लिम्पतीति लिम्पः । विन्दतीति विन्दः । मुचादित्वादित्वाच्छे नागमः । अनुपसर्गादित्येव । प्रलिपः । **'निगवादेर्नाम्नि'** (५।१।६१) यथासङ्ख्यं निपूर्वाल्लिम्पेर्गवादिपूर्वाद्विदेः शः स्यात् । नाम्नि संज्ञायाम् । निलिम्पतीति निलिम्पा नाम देवाः । गा विन्दतीति गोविन्दः । कुविन्दस्तन्तुवायः । अरविन्दश्चक्रावयवविशेषः । अब्जे तु क्लीबत्वम् **कश्चि**त्त्वब्जेऽपि पुंस्त्वमाह । कुरुविन्दः । नाम्नीति किम् ? निलिपः । **'वा ज्वलादि दुनीभूग्रहास्रोर्णः'** (५।१।६२) ज्वलादेर्गणात् दुनीभूग्राहिभ्य आङ्पूर्वाच्च स्रवतेरनुपसर्गाण्णो वा स्यात् । षहिपर्यन्ता ज्वलादयः प्रागुक्ता एव । ज्वलः ज्वालः । चलः चालः निपातः । उत्क्रोश इति बहुलाधिकारात् सोपसर्गादपि । दवः दावः । नयः नायः । दुनीभ्यां नित्यमेवेत्येके । भवः भावः । व्यवस्थितविभाषेयम् । तेन ग्राहो मकरादिः । ग्रहः सूर्यादिः । आस्रवः आस्रावः । अनुपसर्गादित्येव । प्रज्वलः । प्रद्रवः प्रणवः प्रभवः प्रग्रहः । **'अवहृसासंस्रोः'** (५।१।६३) अवपूर्वाभ्यां हृसाभ्यां सम्पूर्वाच्च स्रवतेर्णः स्यात् । अवहारः अवसायः । संस्रावः । संस्रव इत्यपि कश्चित् । **'तन्व्यधीण्श्वसातः'** (५।१।६४) तनादिभ्यश्चतुर्भ्य आदन्तेभ्यश्च णः स्यात् । तानः । उत्तानः अवतानः । व्याधः । प्रत्यायः अत्यायः अन्तरायः । अतिपूर्वादेवे ण इत्येके । श्वासः । आश्वासः । आदन्त, अवश्यायः प्रतिश्यायः । ग्लायः म्लायः । कथं दरः दधः । दृदिद्भ्योरचा सिद्धम् ॥ १२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## नृत्खन्रञ्जः शिल्पिन्यकट् ॥ १३ ॥ [ सि० ५।१।६५ ]

**एभ्यः शिल्पिनि कर्त्तर्यकट् स्यात् । नर्तकः खनकः रजकः ॥ १३ ॥**

**'नृत्खन०'** शिल्पिनीति शिल्पं कर्म कौशलं तद्वान् शिल्पी । प्रत्ययस्य टित्त्वात् ङ्यियामणयेत्येति ङीः नर्तकी खनकी रजकी । शिल्पिनीति किम् ? नर्त्तिका खानकः रञ्जकः ॥ १३ ॥ सूत्रम्

## गस्थकः [५।१।६६] टनण् च ॥ १४ ॥ [ सि० ५।१।६७ ] ॥ १५ ॥

**गः शिल्पिनि कर्त्तर्येतौ स्याताम् । गाथकः । 'आत ऐः कृञ्ञौ', गायनी ॥ १४ ॥ १५ ॥**

**'गस्थकः' 'टनण्'** सूत्रद्वयं स्पष्टम् । गाङःप्रत्यये शिल्पी न गम्यते शब्दशक्तिस्वाभाव्यात्ततो गायतेर्ग्रहणम् । टनणष्टित्त्वं स्त्रीलिङ्गे ङ्यर्थम् । णित्त्वं 'आत ऐः कृञ्ञौ' इत्येवार्थं ततो गायनीति सिद्धम् । पृथग्योगस्तु टनणोऽग्रेतनसूत्रेऽनुवृत्त्यर्थः । आदिशब्दानुवृत्तेः **'हः कालव्रीह्योः'** ( ५।१।६८ ) जहातेर्जिहीतेर्वा कालव्रीह्योः कर्त्रोष्टनण् स्यात् । जहाति जिहीते वा भावान् हायनः, संवत्सरः । जह- त्युदकं दूरोत्थानाज्जिहते वा द्रुतं हायना नाम व्रीहयः । कालव्रीह्योरिति किम् ? हाता । **'प्रसृल्वोऽकः साधौ'** ( ५।१।६९ ) एभ्यः साधुत्वविशिष्टेऽर्थे वर्त्तमानेभ्योऽकः स्यात । साधु प्रवते इति प्रवकः । एवं सरकः लवकः । साधाविति किम् ? प्रावकः सारकः लावकः । **'आशिष्यकन्'** ( ५।१।७० ) इष्टप्रार्थनमाशीस्तस्यां गम्यायां धातोरकन् स्यात् । जीवतादित्याशास्यमानो जीवकः । एवं नन्दकः भवकः । आशिषीति किम् ? जीविका नन्दिका भाविका । नकार इच्चापुंसोऽनित्क्याप्परे इत्यत्र व्युदासार्थः । तेन जीवका नन्दका भवका ॥ १४ ॥ १५ ॥

## तिक्कृतौ नाम्नि ॥ १६ ॥ [ सि० ५।१।७१ ]

**आशीर्विषये संज्ञायां गम्यायां तिकृतश्च सर्वे प्रत्ययाः स्युः ॥ १६ ॥**

**'तिकृ०'** ॥ १६ ॥ अत्रोपयोगि सूत्रम् ।

## अहन्पञ्चमस्य क्विक्ङिति ॥ १७ ॥ [ सि० ४।१।१०७ ]

**हन्वर्जपञ्चमान्तस्य क्वौ धुडादौ क्ङिति च दीर्घः स्यात् । शम्यादित्याशास्यमानः शान्तिः । वर्धतामित्याशास्यमानो वर्धमानः ॥ १७ ॥**

**'अह०'** क्वौ यथा प्रशान् प्रतान् प्रदान् । प्रशामौ प्रदामौ प्रतामौ । क्विति शान्तः शान्तवान् शान्त्वा शान्तिः । एवं दान्तः तान्तः । ङिति शंशान्तः तन्तान्तः दन्दान्तः । पञ्चमस्येति ओदनपक् । पक्त्वा । अहन्निति किम् ? वृत्रहणि भ्रूणहनि हन्वर्जनादुपदेशावस्थायां पञ्चमो गृह्यते तेन सुगण् इत्यत्र दीर्घो न । क्विक्ङिति इति किम् ? गन्ता रन्ता । धुटीत्येव । यम्यते यंयम्यते । कश्चित्त्वाचारक्वावपि दीर्घत्वमिच्छति । कमिवाचरति कामति । शम् शामति । किम् कीमति । इदम् इदामति । प्रकृते शान्तिरिति । **क्वचित्तिकीति 'न तिकि दीर्घश्चेति'** ( ४।२।५९ ) यमिरमिनमिगमिहनिमनि- वनतितनादीनां तिकि प्रत्यये परे नलुक् दीर्घश्च न स्याताम् । यथा यन्तिः रन्तिः गन्तिः हन्तिः मन्तिः वन्तिः तन्तिरिति । सूत्रं चैतत्प्रागुव्याख्यातम् । रन्तिरिति रमतामित्याशंसितः । तन्यात् तन्तिः । सन्यात् सन्तिः । कृत्—वीरो भूयात् वीरभूः मित्रभूः इति । क्विप्—अग्निरस्य भूयात् अग्नि- भूतिः । एवं देवभूतिः अश्वभूतिः सोमभूतिः । कुमारोऽस्य दुरितानि नयतात् एवमाशंसितः कुमार-



Jain Education International For Personal & Private Use Only www.jainelibrary.org

नीतिः । मित्रमेनं वर्द्धिषीष्ट मित्रवृद्धिः इति क्तिः । देवा एनं देयासुः देवदत्तः यज्ञदत्तः विष्णुरेनं श्रूयादिति विष्णुश्रुतः । शर्व एनं वृषीष्ट शर्ववर्मा मन् । गङ्गा एनं मियात् गङ्गामित्रः त्रक् । वर्धिषीष्ट वर्द्धमानः ॥ १७ ॥

अथ **कर्मोपपदाद्धातोः कर्त्तरि** प्रत्ययानिरूपयति । सूत्रम्

## कर्मणोऽण् ॥ १८ ॥ [ सि० ५।१।७२ ]

**कर्मणः पराद्धातोरण् स्यात् । कुम्भं करोतीति कुम्भकारः ॥ १८ ॥**

**'कर्मण०'** कर्मण इति निर्वर्त्यविकार्यप्राप्यरूपात्कर्मणः पराद्धातोरण् स्यात् । अजाद्यपवादः । **निर्वर्त्यात्** कुम्भकारः नगरकारः । **विकार्यात्** काण्डलावः । **प्राप्यात्** वेदाध्यायः चर्चापारः भारहारः सूत्रधारः भारवाहः द्वारपालः उष्ट्रप्रणायः कमण्डलुग्राहः । आदित्यं पश्यति हिमवन्तं शृणोति ग्रामं गच्छतीत्यादौ प्राप्यात् कर्मणोऽनभिधानान्न भवति । महान्तं घटं करोतीति सापेक्षत्वादनभिधानाच्च । तथा च बहुलाधिकारात् निर्वर्त्यविकार्याभ्यां क्वचिन्न भवति । संयोगं जनयति । स्रजं विरचयति । वृक्षं छिनत्ति । कन्यां मण्डयति । णकारो वृद्ध्यर्थः । आदिशब्दसांनिध्यात् **'शीलिकामिभक्ष्याचरीक्षिक्षमो णः'** ( ५।१।७३ ) कर्मणः परेभ्य एभ्यः षड्भ्यो णः स्यात् । धर्मं शीलयति धर्मशीलः । एवं धर्मकामः । वायुभक्षः । आङ्पूर्वश्चरिः कल्याणाचारः । सुखप्रतीक्षः । बहुक्षमः । अलुघन्तैः शीलादिभिर्बहुव्रीहौ सति धर्मशीलादयः सिद्ध्यन्ति । अण् वा बाधनार्थं तु वचनम् । अणि हि सति स्त्रियां ङीः स्यात्ततश्च धर्मशीलीत्याद्यनिष्टं स्यात् । णे तु आपि धर्मशीलेत्याद्यभीष्टं रूपं स्यात् । एवंप्रायेषु च बहुव्रीहावाश्रीयमाणेऽम्भोतिगमेति स्यात्, अम्भोतिगामीति चेष्यते । अयं भावः । अतिगम्यते युवर्णेत्यलि बहुव्रीहौ अनिष्टं रूपम् । अम्भः कर्म अतिगच्छतीति वाक्ये तु कर्मणोऽणित्यणिष्टं रूपमिति । कामीति ण्यन्तस्योपादानादण्यन्तादणेव । पयस्कामीति ण्यन्तस्य तु णे सति पयःकामेति भवति । अत एव ण्यन्तनिर्देशादण्यन्तनिर्देशे कृमिकंसेत्यादौ केवलस्य कमेर्ग्रहणं तेन णे सति रोः सकारादेशो न भवति । **गायोऽनुपसर्गाट्टक्'** ( ५।१।७४ ) कर्मणः परादित्यनुवर्त्तते । वक्रं गायति वक्रगः । प्रत्ययस्य टित्त्वात् स्त्रियां ङीः । वक्रगी सामगी । वक्रादयो गीतिविशेषाः । अनुपसर्गादिति किम् ? वक्रसंगायः अणेव । गायतिनिर्देशो गाङ्निवृत्त्यर्थः । **सुरासीधोःपिबः'** ( ५।१।७५ ) आभ्यां कर्मभ्यां परादनुपसर्गात् पिबतेष्टक् स्यात् । सुरापः । सुरापी स्त्री । सीधुपः । सीधुपी । आभ्यामिति किम् ? क्षीरपा बाला । उत्तरसूत्रेण डः । पिबः इति किम् ? सुरां पाति सुरापा । कथं संज्ञायां सुरापा सुरापीति ङीविकल्पः । पाति पिबत्यो रूपद्वयं न च धात्वर्थभेदः । संज्ञायां धात्वर्थस्य व्युत्पत्तिमात्रार्थत्वात् ॥ १८ ॥ सूत्रम्

## आतोडोऽह्वावामः ॥ १९ ॥ [ सि० ५।१।७६ ]

**कर्मणः परादनुपसर्गात् ह्वावामावर्जादादन्ताद्धातोर्डः स्यात् । गोदः । अह्वावाम इति इति किम् ? स्वर्गह्वायः । तन्तुवायः । धान्यमायः ॥ १९ ॥**

**'आतो०'** गां ददाति इति गोदः । एवं पार्ष्णित्रं अङ्गुलित्रं ब्रह्मज्यः वपुर्वीतवान् वपुर्व्यः । अनिर्दिष्टार्थास्त्विष्वपि कालेषु भवन्तीत्यत्र भूतेऽपि डः । तन्तुवाय इति वातिवायत्योरकर्मकत्वान्न ग्रहणम् । धान्यं माति मिमीते मयते वा धान्यमायः; अत्राणेव । मित्रह्व इति तु 'क्वचित्' ( ५।१।१७१ )

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यनेन डप्रत्यये सिद्धम् । अनुपसर्गादिति किम् ? गोसंदायः । 'उपसर्गो न व्यवधायी'त्यण् । ज्ञापकं त्वस्य 'गायोऽनुपसर्गाट्टक्' इत्यत्रोपसर्गवर्जनमन्यथोपसर्गव्यवधानप्राप्तेरेवाभावे उपसर्गवर्जनमनर्थकं स्यात् । अत्रादिशब्दसंसर्गात् । **'समः ख्यः'** ( ५।१।७७ ) कर्मणः परात् सम्पूर्वात् ख्या इत्येतस्माड्डः स्यात् । गाः सङ्ख्याति संचष्टे वा गोसङ्ख्यः । उपसर्गार्थं च वचनम् । एवमग्रिमसूत्रद्वयेऽपि । **'दश्चाङः'** ( ५।१।७८ ) कर्मणः परादाङ्पूर्वात् ददातेः ख्या इत्येतस्माच्च डः स्यात् । दायमादत्ते दायादः । स्त्रियमाचष्टे स्त्र्याख्यः । प्रियाख्यः । **प्राज्ज्ञश्च** ( ५।१।७९ ) कर्मणः परात् प्रपूर्वाज्जानातेर्दारूपाच्च डः स्यात् । पन्थानं जानातीति पथिप्रज्ञः । प्रपाप्रदः । इह सूत्रे दारूपं गृह्यते न संज्ञा, ज्ञाख्यासाहचर्यात्, तेन दांवृदैवोरपि ग्रहस्तेन केदारप्रदो भाजनप्रदश्चेति सिद्धम् । पूर्वसूत्रे तु दाग एव ग्रहणम् तस्यैवाङा योगात्तेन स्तनौ प्रधयतीति स्तनप्रधाय इत्यणेव ॥ १९ ॥ सूत्रम्

## आशिषि हनः ॥ २० ॥ [ सि० ५।१।८० ]

**कर्मणः पराद्धन्तेराशिषि गम्यायां डः स्यात् । शत्रुहः ॥ २० ॥**

**'आशि०'** शत्रुं वध्यादिति शत्रुहः । एवं पापहः दुःखहः । गतावपीति **कश्चित्** । क्लेशं हन्ति क्लेशहः ॥ २० ॥ सूत्रम् ।

## क्लेशादिभ्योऽपात् ॥ २१ ॥ [ सि० ५।१।८१ ]

**क्लेशादेः कर्मणः परादपपूर्वाद्धन्तेर्डः स्यात् । क्लेशापहः तमोपहः ॥ २१ ॥**

**'क्लेशा०'** क्लेशमपहन्ति क्लेशापहः । एवं तमोपहः दुःखापहः ज्वरापहः दर्पापहः दोषापहः रोगापहः । वातपित्तकफापहः । विषाग्निदर्पापहः । बहुवचनाद्यथादर्शनमन्येभ्योऽपि स्यात् । कथं दार्वाघाटः । चार्वाघाटः । घटतेरणि संज्ञायां भविष्यति । दारुः सारसः । चारुस्तु जीवभेदस्तमा घटते सम्बध्नातीति । चारु आहन्तीति चार्वाघातः । दार्वाघातोऽपि तर्हि स्यादसंज्ञायामिष्यते एव । एवमसंज्ञायां समूपूर्वाभ्यां घटिहनिभ्यां वर्णसंघाटः वर्णसंघात इत्यादि सिद्धम् । हन्तेरेव वा पृषोदरादित्वात् वर्णविकारः । अत्रायं विशेषः **'कुमारशीर्षाण्णिन्'** ( ५।१।८२ ) आभ्यां कर्मभ्यां पराद्धन्तेर्णिन् स्यात् । कुमारं हन्ति कुमारघाती शीर्षघाती । अत एव निपातनाच्छिरसः शीर्षभावः । शीर्षशब्दोऽकारान्तः प्रकृत्यन्तरं वा । तथा च 'शीर्षे स्थितं पृष्ठतः' इति ॥ २१ ॥ सूत्रम्

## अचित्ते टक् ॥ २२ ॥ [ सि० ५।१।८३ ]

**कर्मणः पराद्धन्तेरचित्तवति कर्त्तरि टक् स्यात् । वातघ्नं तैलम् । अचित्त इति किम् ? पापघातो यतिः ॥ २२ ॥**

**'अचि०'** वातं हन्ति वातघ्नम् । एवं पित्तघ्नं घृतम् । श्लेष्मघ्नं मधु । रोगघ्नमौषधम् । पतिघ्नी पाणिरेखा । सर्वकर्मघ्नी शैलेशी । क्षुघ्नो नगरम् । शतघ्नी शस्त्रविशेषः । हस्तघ्नो ज्याघातत्रो(घ्नः ?) वध्रेपट्टः । बहुलाधिकारात् क्षुघ्नादयः संज्ञायाम् । पापघातो यतिरिति । एवं चोरघातो राजा । आखुघातो बिडालः । मत्स्यघातो बकः । सस्यघातो वृषभः । आदिशब्दात् **'जायापतेश्चिह्नवति'** ( ५।१।८४ ) आभ्यां कर्मभ्यां पराद्धन्तेश्चिह्नवति कर्त्तरि टक् स्यात् । चिह्नं शुभाशुभसूचकं शरीरस्थं लक्षणम् । जायाघ्नो ब्राह्मणः । पतिघ्नी कन्या दुर्लक्षणा इत्यर्थः ॥ २२ ॥ सूत्रम् ।

## ब्रह्मादिभ्यः ॥ २३ ॥ [ सि० ५।१।८५ ]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एभ्यः कर्मभ्यः पराद्धन्तेष्टक् स्यात् । ब्रह्मघ्नः गोघ्नः पापी ॥ २३ ॥**

**'ब्रह्म०'** स्पष्टम् । ब्रह्म हन्ति ब्रह्मघ्नः । एवं कृतघ्नः शत्रुघ्नः वृत्रघ्नः भ्रूणघ्नः बालघ्नः । शशघ्नी पक्षिजातिः । बहुलाधिकारात्सम्प्रदानेऽपि गां हन्ति यस्मै आगताय दातुं स गोघ्नोऽतिथिः । बहुवचनाद्यथादर्शनमन्येभ्योऽपि स्यात् । अत्रामी विशेषाः—**'हस्तिबाहुकपाटाच्छक्तौ'** (५।१।८६) एभ्यः पराद्धन्तेः शक्तौ गम्यायां टक् स्यात् । हस्तिनं हन्तुं शक्तो हस्तिघ्नः पुमान् । बाहुघ्नो मल्लः । कपाटघ्नश्चौरः । शक्ताविति किम् ? हस्तिनं विषेण हन्ति हस्तिघातो रसदः । अणेव । **'नगरादगजे'** (५।१।८७) अस्मात्पराद्धन्तेर्गजवर्जिते कर्त्तरि टक् स्यात् । नगरघ्नो व्याघ्रः । गजस्तु नगरघातः । जायापतेरित्यादयश्चत्वारो योगाश्चित्तवत्कर्त्रर्थाः ॥ २३ ॥ सूत्रम्

## राजघः ॥ २४ ॥ [ सि० ५।१।८८ ]

**निपातोऽयम् ॥ २४ ॥**

**'राज०'** (५।१।८८) निपातोऽयमिति । राज्ञः कर्मणः पराद्धन्तेष्टक् घादेशश्च निपात्यते । राजानं हन्ति राजघः । 'रराज नीराजनया स राजघः' **नैषधीये** । आदिशब्दात् **'पाणिघताडघौ शिल्पिनि'** (५।१।८९) एतौ शिल्पिनि कर्त्तरि निपात्येते । पाणिं हन्ति पाणिघः ताडघः शिल्पी । पाणिना ताडेन हन्तीति करणादपि **केचित्** । टक् घादेशश्च निपातनात् । शिल्पिनीति किम् ? पाणिघातः ताडघातः ॥ २४ ॥ सूत्रम्

## कुक्ष्यात्मोदराद्भृगः खिः ॥ २५ ॥ [ सि० ५।१।९० ]

**एभ्यः कर्मभ्यः पराद्भृगः खिः स्यात् । ख इत् ॥ २५ ॥**

**'कुक्ष्या०'** स्पष्टम् ॥ २५ ॥ अत्रोपयोगिसूत्रम् ॥

## खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च ॥ २६ ॥ [ सि० ३।२।१११ ]

**स्वरान्तस्यानव्ययस्यारुषश्च खित्प्रत्ययान्ते उत्तरपदे मोऽन्तो यथासम्भवं ह्रस्वश्च स्यात् । कुक्षिम्भरिः आत्मम्भरिः उदरम्भरिः ॥ २६ ॥**

**'खित्य०'** अरुर्ग्रहणादव्ययानां स्वरान्तत्वं लभ्यते । अव्ययप्रतिषेधात् खित्प्रत्ययान्तग्रहणम्, नह्यव्ययात्परः खित्सम्भवति । ननु यथाव्ययात् खिन्न सम्भवति, तथानव्ययादपि न सम्भवति ? नैवम् अनव्ययद्धातोः सम्भवति, ततश्च धातोः खिति प्रत्यये परे मोऽन्ते ज्ञंमन्य इत्यादौ मन्यस्य मोऽन्तप्रसङ्गः स्यात्पर्युदासाश्रयेणानव्ययसदृशस्य ज्ञादिशब्दस्य खित्प्रत्ययान्ते उत्तरपदे मोन्तः स्यादित्यर्थो लभ्यत इति । ततः खितीति खित्प्रत्ययान्ते परे इत्यर्थः । यथा ज्ञंमन्यः पण्डितंमन्यः क्ष्मंमन्या खट्वंमन्या रात्रिंमन्यमहः दुर्गिंमन्यः ग्रामणिमन्यः वधुंमन्यः खलपुंमन्यः । एषु 'मन्याण्णिन्' (५।१।११६) इति सूत्रात्मन्यादित्यनुवर्त्त्य 'कर्तुः खश्' (५।१।११७) इति खश्परत्वात्पुंवद्भावो ह्रस्वत्वेन बाध्यते । कालिंमन्या हरिणिंमन्या । अरुस् बहुविध्वरुरिति खश् मोऽन्ते सति 'संयोगस्यादा'-विति स लोपः अरुन्तुदः । खितीति किम् ? पण्डितमानी । अनव्ययेति किम् ? दोषामन्यमहः । दिवामन्या रात्रिः । अरुःशब्दोपादानादनव्ययस्य व्यञ्जनान्तस्य मो न भवति । गीर्मन्यः । नन्वत्र मोऽन्तेपि 'पदस्येति' (२।१।८९) लोपो भविष्यति किं प्रतिषेधेन ? उच्यते—'रात्सः' (२।१।९०) इति नियमाल्लोपो न स्यादिति प्रतिषेधः । 'स्वरस्य ह्रस्वदीर्घप्लुताः' इति स्वरस्यैव ह्रस्वः । कृद्ग्रहणे सति गतिकारकस्यापीति कूलमुद्रुजः । कूलमुद्वह इत्यत्रापि भवति । अत्रादिशब्दसंनिधानात् **'सत्यागदास्तोः**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कारे'** ( ३।२।११२ ) सत्यादिभ्यः कारशब्दे उत्तरपदे परे मोऽन्तः स्यात् । सत्यङ्कार अगदङ्कारः । अस्तुंकारः । अस्त्विति निपातः क्रियाप्रतिरूपकोऽभ्युपगमे वर्त्तते । **'लोकंपृणमध्यंदिनानभ्याशमित्यम्'** ( ३।२।११३ ) एते कृतपूर्वपदमान्ता निपात्यन्ते । लोकं पृणति लोकस्य वा पृणः लोकम्पृणः । मध्यं दिनस्य, मध्यं च तद्दिनं चेति वा मध्यंदिनम् । अश्नोतेर्घञ्यभ्याश इति रूपम् । अनभ्याशं दूरमित्यं गतंव्यमस्य अनभ्याशमित्यः दूरात्परिहर्त्तव्यः । अनभ्याशेन दूरेण इत्यः प्राप्योनत्वन्तिकेनेत्यनभ्याशमित्य इति वा । **अन्ये** तु प्रीणातेर्णिगन्तस्य अचि ह्रस्वत्वं निपात्य लोकम्प्रिण इति मन्यन्ते । लोकस्य प्रीणक इत्यर्थः । **केचि**त्त्वकृतह्रस्वमेव मन्यन्ते लोकंप्रीण इति । **'भ्राष्ट्राग्नेरिन्धे'** ( ३।२।११४ ) आभ्यामिन्धे उत्तरपदे मोऽन्तः स्यात् । भ्राष्ट्रमिन्धः । अग्निमिन्धः । **'अगिलाद्गिलगिलगिलयोः'** ( ३।२।११५ ) गिलान्तवर्जितात् पूर्वपदात्परे गिले गिलगिले चोत्तरपदे मोऽन्तः स्यात् । तिमिङ्गिलतीति तिमिङ्गिलः । एवं मत्स्यङ्गिलः । बालङ्गिलो राक्षसः । तिमीनां गिलगिलः तिमिङ्गिलगिलः । गिलगिलशब्देऽखण्डे गिलशब्दोनोत्तरपदमिति गिलगिलोपादानम् । गिलशब्दस्य स्वरान्तस्य पर्युदासेन व्यञ्जनान्तान्न भवति । धूर्गिलः । अगिलादिति किम् ? तिमिंगलं गिलति तिमिंगिलगिलः । गिलं गिलति गिलगिल इत्यत्र गिलगिलेति निर्देशादेव मोऽन्तो न स्यात् । अगिलादिति निषेधो गिलान्तस्यापि निवृत्त्यर्थः । अपिशब्दात्केवलस्यापि निवृत्तिः । **'भद्रोष्णात्करणे'** ( ३।२।११६ ) आभ्यां करणशब्दे उत्तरपदे मोऽन्तः स्यात् । भद्रस्य करणं भद्रंकरणम् । एवमुष्णंकरणम् । **'धेनोर्भव्यायाम्'** ( ३।२।११८ ) धेनुशब्दाद्भव्याशब्दे उत्तरपदे मोऽन्तो वा स्यात् । धेनुश्चासौ भव्या च धेनुम्भव्या । **के**चित्तु नित्यमिच्छन्ति ॥ २६ ॥ सूत्रम्

## अर्होऽच् ॥ २७ ॥ [ सि० ५।१।९१ ]

**कर्मणः परादर्हेरच् स्यात् । पूजार्हः साधुः । पूजार्हा साध्वी ॥ २७ ॥**

**'अर्हो०'** पूजामर्हतीति पूजार्हः साधुः । साध्वी तु पूजार्हा 'आत्' ( २।४।१८ ) इत्याप् ॥ २७ ॥ सूत्रम्

## धनुर्दण्डत्सरुलाङ्गलाङ्कुशर्ष्टियष्टिशक्तितोमरघटाद्ग्रहः ॥२८॥ [ सि० ५।१।९२ ]

**एभ्यो दशभ्यः कर्मभ्यः पराद्ग्रहेरच् स्यात् । धनुर्ग्रहः ॥ २८ ॥**

**'धनु०'** धनुर्गृह्णातीति धनुर्ग्रहः । एवं दण्डग्रहः त्सरुग्रहः लाङ्गलग्रहः अङ्कुशग्रहः ऋष्टिग्रहः यष्टिग्रहः शक्तिग्रहः तोमरग्रहः घटग्रहः । नामग्रहणे लिङ्गविशिष्टस्यापि इति घटीग्रहः । अणपीत्येके । दण्डग्राह इत्यादि । आदिशब्दानुवृत्तेः **'सूत्राद्धारणे'** ( ५।१।९३ ) सूत्रं कर्पासादिमयं लक्षणसूत्रं वाविशेषेण गृह्यते । सूत्रात्कर्मणः पराद्ग्रहणपूर्वके धारणेऽच् स्यात् । सूत्रं गृह्णाति सूत्रग्रहः प्राज्ञः सूत्रधारो वा । सूत्रमुपादाय धारयतीत्यर्थः । **अन्ये** त्ववधारणे एवेच्छन्ति । तन्मते सूत्रग्रहः प्राज्ञ एवोच्यते । यस्तु सूत्रं गृह्णाति न तु धारयति स सूत्रग्राह एव । सूत्रधारोऽपि प्रयोजने एव सूत्रं गृह्णाति न तु सदेति सोपि सूत्रग्राह एव ॥ २८ ॥ सूत्रम् ।

## आयुधादिभ्यो धृगोऽदण्डादेः ॥ २९ ॥ [ सि० ५।१।९४ ]

दण्डादिवर्जादायुधादेः परादू धृगोऽच् स्यात् । धनुर्धरः । भूधरः । अदण्डादेरिति किम् ? दण्डधारः ॥ २९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'आयु०' धनुर्धरति धनुर्धरः । एवं शक्तिधरः । चक्रधरः । वज्रधरः । शूलधरः । हलधरः । आदिग्रहणात् भूधरः जलधरः विषधरः शशधरः विद्याधरः श्रीधरः जटाधरः पयोधरः । बहुवचनाद्यथादर्शनमन्येभ्योऽपि । दण्डधार इति । एवं कुण्डधारः काण्डधारः कर्मधारः सूत्रधारः छत्रधारः ॥ २९ ॥ सूत्रम्

## हृगो वयोऽनुद्यमे ॥ ३० ॥ [ सि० ५।१।९५ ]

**कर्मणः पराद्धृगो वयस्यनुद्यमे गम्येऽच् स्यात् । अस्थिहरः श्वा । उद्यम उत्क्षेपणमाकाशस्थस्य वा धारणं तदभावे मनोहरा स्रक् । उद्यमे तु भारहारः ॥ ३० ॥**

'हृगो०' अस्थिहरः श्वेति श्वशिशुः । एवं कवचहरः क्षत्रियकुमारः । वयसि क्रियमाणः सम्भाव्यमानो वा उद्यम उच्यमानो वयो गमयतीत्युद्यमार्थं वयोग्रहणम् । अयमर्थः–यत्र वयो गम्यते तत्रोद्यमे सप्तमी भवतीत्यर्थः । संज्ञायां टोऽपीति कश्चित् मनोहरी विषहरी मणिः ॥ ३० ॥ सूत्रम्

## 'आङः शीले' ॥ ३१ ॥ [ सि० ५।१।९६ ]

**पुष्पाहरः ॥ ३१ ॥**

'आङः०' ( ५।१।९६ ) कर्मणः परादाङ्पूर्वाद्धरतेः शीले गम्यमानेऽच् स्यात् । शीलं फलनिरपेक्षा स्वाभाविकी प्रवृत्तिः । पुष्पाण्याहरतीत्येवंशीलः पुष्पाहरः सुखाहरः । पुष्पाहरः सुखाहर इत्यनुद्यमेऽर्थे तु पूर्वेणाच् । [1]लिहादिप्रपञ्चकरणमिदम् ॥ ३१ ॥ सूत्रम्

## दृतिनाथात्पशाविः ॥ ३२ ॥ [ सि० ५।१।९७ ]

**दृतिहरिः श्वा । नाथहरिः सिंहः ॥ ३२ ॥**

'दृति०' आभ्यां कर्मभ्यां पराद्धरतेः पशोः कर्त्तरि इः स्यात् । दृतिं हरति दृतिहरिः श्वा । एवं नाथहरिः सिंहः । पशाविति किम् ? दृतिहारो व्याधः । नाथहारी गश्री ॥ ३२ ॥ सूत्रम्

## रजः फलेमलाद्ग्रहः ॥ ३३ ॥ [ सि० ५।१।९८ ]

**एभ्यः कर्मभ्यः पराद्ग्रहेरिः स्यात् । रजोग्रहिः फलेग्रहिः मलग्रहिः ॥ ३३ ॥**

'रज०' स्पष्टम् । फलं गृह्णाति फलेग्रहिर्वृक्षः । सूत्रनिर्देशादेत्वम् । रजोमलाभ्यां केचिदेवेच्छन्ति ॥ ३३ ॥ सूत्रम्

## देववातादापः ॥ ३४ ॥ [ सि० ५।१।९९ ]

**आभ्यामाप इः स्यात् । देवापिः वातापिः ॥ ३४ ॥**

'देव०' देवानाप्नोति देवापिः । एवं वातापिः ॥ ३४ ॥ सूत्रम्

## शकृत्स्तम्बाद्वत्सव्रीहौ कृगः ॥ ३५ ॥ [ सि० ५।१।१०० ]

**आभ्यां कर्मभ्यामनयोः कर्त्रोः कृग इः स्यात् । शकृत्करिः वत्सः । स्तम्बकरिर्व्रीहिः ॥३५॥**

'शकृ०' स्पष्टम् ॥ ३५ ॥ सूत्रम्

---

१ ननु लिहादिगणे एव धातूपपदनियमः क्रियतां किममीभिः सूत्रैः इत्यस्योत्तरमिदम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## किंयत्तद्बहोरः ॥ ३६ ॥ [ सि० ५।१।१०१ ]

**किङ्करः यत्करः तत्करः बहुकरः ॥ ३६ ॥**

**'किं०'** ( ५।१।१०१ ) एभ्यः कर्मभ्यः परात्कृगः अः प्रत्ययः स्यात् । किङ्करः किङ्करा । एवं यत्करा तत्करा बहुकरा । बहुकरीति संख्यावचनादुत्तरेण टः । चौर्ये तस्करः, वर्चस्कादित्वात्साधुः ॥ ३६ ॥

## सङ्ख्याऽहर्दिवाविभानिशाप्रभाभाश्चित्रकर्त्राद्यन्तानन्तकारबाहुरुर्धनुर्नान्दीलिपिलिबिबलिभक्तिक्षेत्रजङ्घाक्षपाक्षणदारजनिदोषादिनदिवसाट्टः ॥ ३७ ॥ [ सि० ५।१।१०२ ]

**एभ्योऽष्टाविंशतेः परात् कृगष्टः स्यात् । सङ्ख्याकर इत्यादि ॥ ३७ ॥**

**'सङ्ख्या०'** सङ्ख्येत्यर्थप्रधानमपि तेनैकादि परिग्रहः । अहेत्वाद्यर्थ आरम्भः । सङ्ख्याकरोति । सङ्ख्याकरः एककरः द्विकरः त्रिकरः अहस्करः दिवाकरः विभाकरः निशाकरः प्रभाकरः भास्करः चित्रकरः कर्तृकरः आदिकरः अन्तकरः अनन्तकरः कारकरः । कारं करोति वर्चस्कादित्वात् कारस्करः । बाहुकरः अरुष्करः धनुष्करः नान्दीकरः लिपिकरः लिबिकरः बलिकरः भक्तिकरः क्षेत्रकरः जङ्घाकरः क्षपाकरः क्षणदाकरः रजनिकरः रजनीकरः दोषाकरः दिनकरः दिवसकरः । टकारो ङ्यर्थः । सङ्ख्याकरी । आदिशब्दानुवृत्तेः **'हेतुतच्छीलानुकूलेऽशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदात्'** ( ५।१।१०३ ) हेतुः प्रतीतशक्तिकं कारणम् । तच्छीलस्तत्स्वभावः । अनुकूलश्चित्तानुवर्त्ती । एषु कर्तृषु शब्दादिवर्जितात् कर्मणः परात् कृगष्टः स्यात् । **हेतुः** यशस्करी विद्या, शोककरी कन्या । **तच्छीले** क्रीडाकरः श्रद्धाकरः । **अनुकूले,** वचनकरः । हेत्वादिष्विति किम् ? कुम्भकारः । शब्दादिनिषेधः किम् ? शब्दकारः श्लोककारः कलहकारः गाथाकारः वैरकारः चाटुकारः सूत्रकारः मन्त्रकारः पदकारः । तच्छीले ताच्छिलिकश्च प्रत्यय उदाहार्यः । **'भृतौ कर्मणः'** ( ५।१।१०४ ) कर्मन्शब्दात्कर्मणः परात्कृगः भृतौ गम्यायां टः स्यात् । भृतिर्वेतनम् । कर्म मूल्यम् । कर्मकरो भृतकः । कर्मकरी दासी । भृताविति किम् ? कर्मकारः ॥ ३७ ॥ सूत्रम्

## क्षेमप्रियमद्रभद्रात् खाऽण् ॥ ३८ ॥ [ सि० ५।१।१०५ ]

**एभ्यश्चतुर्भ्यः परात्कृगः खाऽणौ स्याताम् । क्षेमङ्करः क्षेमकारः ॥ ३८ ॥**

**'क्षेम०'** प्रियङ्करः प्रियकारः । मद्रङ्करः मद्रकारः । भद्रङ्करः भद्रकारः । भद्रात्केचिदेवेच्छन्ति । खित्प्रत्यये मोऽन्तः । एवमन्यत्रापि । एभ्य इति किम् ? तीर्थकरः । हेत्वादिषु टः । तीर्थंकरस्तीर्थकार इत्यपि कश्चित् । खो वेति सिद्धे अण्ग्रहणं हेत्वादिष्वपि टबाधनार्थम् । कथं योगक्षेमकरो नाथ इत्यत्र क्षेमशब्दात् खाणौ नेति ? अत्रोच्यते । उपपदविभक्तिषु तदन्तविधिरेनाश्रयणात् । अत एव 'सङ्ख्यादि' (५।१।१०२) सूत्रेऽन्तग्रहणे सत्यप्यनन्तग्रहणम् । उत्तरत्र च भये सत्यप्यभयग्रहणम् ॥ ३८ ॥ सूत्रम्

## मेघर्तिभयाऽभयात्खः ॥ ३९ ॥ [ सि० ५।१।१०६ ]

**एभ्यश्चतुर्भ्यः परात्कृगः खः स्यात् । मेघङ्करः । ऋतिंकरः । भयङ्करः । अभयङ्करः ॥ ३९ ॥**

**'मेघः०'** स्पष्टम् ॥ ३९ ॥ सूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## प्रियवशाद्वदः ॥ ४० ॥ [ सि० ५।१।१०७ ]

**प्रियंवदः वशंवदः ॥ ४० ॥**

**'प्रिय०'** प्रियं वदति प्रियंवदः । वशंवदः ॥ ४० ॥ सूत्रम्

## द्विषन्तपपरन्तपौ ॥ ४१ ॥ [ सि० ५।१।१०८ ]

**निपातौ ॥ ४१ ॥**

**'द्विष०'** द्विषत्परशब्दाभ्यां परा ( ५।१।१०७ ) ण्यन्तात्तपतेः खप्रत्ययो ह्रस्वत्वं द्विषत्तकारस्य नकारश्च निपात्यते । द्विषतस्तापयति द्विषन्तपः । परन्तपः । निपातनस्येष्टविषयत्वात् स्त्रियामनभिधानं द्विषतीतापः । अनन्त्यस्य च न स्यात् । द्विषतः परान्तश्च तपति द्विषत्तापः परतापः । सूत्रं

## परिमाणार्थमितनखात्पचः खः ॥ ४२ ॥ [ सि० ५।१।१०९ ]

**प्रस्थम्पचः मितम्पचः नखम्पचः ॥ ४२ ॥**

**'परि०'** सर्वतोमानं परिमाणं, तदर्थाः प्रस्थादयः शब्दाः । एभ्यो मितनखाभ्यां च कर्मभ्यां परात्पचेः खः स्यात् । प्रस्थम्पच इति । पञ्चद्रोणम्पचः । मितम्पच इति । एवमल्पम्पचा नखम्पचा यवागूः ॥ ४२ ॥ सूत्रम्,

## कूलाभ्रकरीषात्कषः खः ॥ ४३ ॥ [ सि० ५।१।११० ]

**कूलङ्कषा अभ्रङ्कषा करीषङ्कषा ॥ ४३ ॥**

**कूला०** ( ५।१।११० ) कूलं कषतीति कूलङ्कषा नदी । एवमभ्रङ्कषो गिरिः । करीषङ्कषा वात्या ॥ ४२ ॥ सूत्रम्

## सर्वात्सहश्च ॥ ४४ ॥ [ सि० ५।१।१११ ]

**सर्वपूर्वात्सहेः कषेश्च खः स्यात् । सर्वंसहः सर्वंकषः ॥ ४४ ॥**

**'सर्वा०'** सर्वं सहते सर्वंसहो मुनिः । सर्वंकषः खलः । आदिशब्दात् । **'भृवृजितृतपदमेश्च नाम्नि'** ( ५।१।११२ ) कर्मणः परेभ्य एभ्यः षड्भ्यः सहश्च खः स्यात् । नाम्नि । विश्वं बिभर्त्ति विश्वम्भरा भूमिः । जि, शत्रुञ्जयो गिरिः । धनञ्जयः पार्थः । तॄ, रथन्तरं साम । तप, शत्रुंतपो राजा । दमिरन्तर्भूतण्यर्थोऽण्यर्थश्च गृह्यते । बलिं दाम्यति दमयति वा बलिंदमः कृष्णः । अरिंदमः । सह, शत्रुंसहः । एतौ राजानौ । नाम्नीति किम् ? कुटुम्बं बिभर्ति कुटुम्बभारः । केचित्तु रथेन तरति रथन्तरं सामेत्यकर्मणोपीच्छन्ति । **'धारेर्धर् च'** ( ५।१।११३ ) कर्मणः पराद्धारयतेः संज्ञायां खो धर् इत्यादेशश्च स्यात् । वसु धारयति वसुन्धरा भूः । युगन्धरः सीमन्धरः तीर्थकरावेतौ । नाम्नीत्येव । छत्रधारः । **'पुरन्दरभगन्दरौ'** ( ५।१।११४ ) एतौ नाम्नि निपात्येते । पुरं दारयति पुरन्दरः शक्रः । एवं भगन्दरो व्याधिः । दारयतेर्हस्वो पुरोऽमन्तता च निपातनात् । पुरशब्दपूर्वस्य तु पुरदार इति स्यात् [ निपातस्येष्टविषयत्वात् ] । **'वाचंयमो व्रते'** ( ५।१।११५ ) व्रतं शास्त्रोक्तो नियमस्तस्मिन् गम्यमानेऽयं निपात्यते । वाचं यच्छति नियमयति वाचंयमो व्रती । वाग्यामोऽन्यः ॥ ४४ ॥ सूत्रम्

## मन्याण्णिन् ॥ ४५ ॥ [ सि० ५।१।११६ ]

**कर्मणः परात्मन्यतेर्णिन् स्यात् । पण्डितमानी बन्धोः ॥ ४५ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'मन्या०'** पण्डितमानी बन्धोः इति । एवं दर्शनीयां मन्यते भार्यां दर्शनीयमानी भार्यायाः । श्यनिर्देश उत्तरार्थः [ मन्यतेर्निवृत्त्यर्थश्च ] ॥ ४५ ॥

## कर्त्तुः खश् ॥ ४६ ॥ [ सि० ५।१।११७ ]

**प्रत्ययार्थात्कर्त्तुः कर्मणः परान्मन्यतेः खश् स्यात् । आत्मानं पण्डितं मन्यते इति पण्डितंमन्यः ॥ ४६ ॥**

**'कर्त्तु०'** कर्त्तुः कर्मण इति । यदा प्रत्ययार्थः कर्त्ता आत्मानमेव दर्शनीयत्वादिना धर्मेण विशिष्टं मन्यते तदायं कर्म तत्रायं विधिः । तथैवोदाहरति—आत्मानमिति । एवं पट्वीमात्मानं मन्यते पट्वीमन्या विद्वन्मन्यः विदुषींमन्या । असरूपत्वाण्णिन्नपि । पण्डितमात्मानं मन्यते पण्डितमानी पटुमानिनी विद्वन्मानी । विद्वन्मानिनी । कर्त्तुरिति किम् ? दर्शनीयमानी चैत्रस्य । पूर्वेण णिन्नेव । शकारः शित्कार्यार्थः ॥ ४६ ॥

## एजेः ॥ ४७ ॥ [ सि० ५।१।११८ ]

**कर्मणः परादेजेः खश् स्यात् । जनमेजयः ॥ ४७ ॥**

**'एजे०'** जनमेजयति जनमेजयः । अंगान्येजयति अङ्गमेजयः । एवमरिमेजयः ॥ ४७ ॥

## शुनीस्तनमुञ्जकूलास्यपुष्पात् ट्धेः ॥ ४८ ॥ [ सि० ५।१।११९ ]

**एभ्यः परात् ट्धेः खश् स्यात् । शुनीन्धयः ॥ ४८ ॥**

**'शुनी०'** शुनीं धयति शुनींधयः । एवं स्तनंधयः मुञ्जंधयः कूलंधयः आस्यंधयः पुष्पंधयः । मुञ्जादिभ्यः केचिदेवेच्छन्ति । ट्धेष्टकारो ङ्यर्थः । शुनींधयी स्तनंधयी सर्पजातिः ॥ ४८ ॥

## नाडीघटीखरीमुष्टिनासिकावाताद् ध्मश्च ॥ ४९ ॥ [ सि० ५।१।१२० ]

**एभ्यः षड्भ्यो ध्मः ट्धेश्च खश् स्यात् । नाडींधमः नाडींधयः ।**

**'नाडी०'** नाडीं धमयति धयति वा नाडींधमः नाडींधयः । घटींधमः घटींधयः । खरींधमः खरींधयः । मुष्टिंधमः मुष्टिंधयः । नासिकंधमः २ । वातंधमः २ । ङ्यन्तनिर्देशस्तदभावे खश्निवृत्त्यर्थः । नाडिं धमति धयति वा नाडिध्मः नाडिधः घटध्मः २ । खरध्मः २ । सूत्रम्

## पाणिकरात् ॥ ५० ॥ [ सि० ५।१।१२१ ]

**ध्मः खश् पाणिंधमः । वहाभ्राल्लिहः ( ५।१।१२३ ) वहंलिहः अभ्रंलिहः । बहुविंध्वरुस्तिलात्तुदः ( ५।१।१२४ ) बहुंतुदः । ललाटवातशर्धात्तपाजहाकः ( ५।१।१२५ ) ललाटंतपः । असूर्योग्राद् दृशः ( ५।१।१२६ ) असूर्यंपश्या राजदाराः । कूलादुद्रुजोद्वहः ( ५।१।१२२ ) कूलमुद्रुजो गजः । कूलमुद्वहा नदी । इरंमदः ( ५।१।१२७ ) निपातोऽयम् ॥ ५० ॥**

**'पाणि०'** आभ्यां कर्मभ्यां पराद्धमः खश् स्यात् । ट्धेरपि कश्चित् । पाणिंधयः करंधयः । पाणिंधमा करंधमा नाडिंधमाः पन्थान इति तादृश[पाणिंधमादि]पुरुषयोगात् मञ्चाः क्रोशन्तीतिवत् । **'वहा०'** ( ५।१।१२३ ) वहं स्कन्धं लेढि वहंलिहो गौः । एवमभ्रंलिहो गिरिः । **'बहु०'** ( ५।१।१२४ ) बहुं तुदति बहुंतुदः । विधुंतुदो राहुः । अरुस्तुदति अरुंतुदो मर्मस्पृक् । मान्ते 'संयोगस्ये'ति सलुक् । एवं तिलंतुदः । **'लला०'** ( ५।१।१२५ ) ललाटादिभ्यः कर्मभ्यः परेभ्यो यथासङ्ख्यं तप अज जहाक् इत्येतेभ्यो खश् स्यात् । ललाटं तपति ललाटंतपः सूर्यः । वातमजन्ति



Jain Education International For Personal & Private Use Only www.jainelibrary.org

वातमजा मृगाः । शर्द्धं जहति शर्द्धंजहा माषाः । खशः शित्त्वादजेर्वी न भवति । हाक इत्युक्तेर्हाङो निवृत्तिः । **'असू०'** ( ५।१।१२६ ) आभ्यां कर्मभ्यां परो दृशः खश् । शित्त्वात् पश्यादेशः । सूर्यमपि न पश्यन्ति असूर्यंपश्या राजदाराः । दृशिना सम्बन्धस्य नञः सूर्येण सहासामर्थ्येऽपि गमकत्वात्समासः । उग्रं पश्यति उग्रंपश्यः । **'कूला०'** ( ५।१।१२२ ) कूलात्कर्मणः पराभ्यामुद्रुज उद्वह इत्येताभ्यां परः खश् स्यात् । 'रुजोंत् भङ्गे' । कूलमुद्रुजति कूलमुद्रुजो गजः । कूलमुद्वहति कूलमुद्वहा नदी । **इति कर्मोपपदप्रकरणं समाप्तम् ।**

**'इरं०'** ( ५।१।१२७ ) [कर्मण इति निवृत्तम्–निपातनाद्धातोरकर्मकत्वाद्वा] इरापूर्वान् माद्यतेः खश् स्यात् । इरा सुरा तया माद्यति इरंमदः । श्याभावश्च निपातनात् ॥ ५० ॥

## नग्नपलितप्रियान्धस्थूलसुभगाढ्यतदन्ताच्व्यर्थेऽच्वेर्भुवः खिष्णुखुकञौ ॥ ५१ ॥ [ सि० ५।१।१२८ ]

**नग्नादिभ्यः सप्तभ्यस्तदन्तेभ्यश्चाच्व्यन्तेभ्यश्च्व्यर्थवृत्तिभ्यः पराद्भुवः खिष्णुखुकञौ स्याताम् । अनग्नो नग्नो भवतीति नग्नंभविष्णुः नग्नंभावुकः । तदन्ते, सुनग्नंभविष्णुः सुनग्नंभावुक इत्यादि ॥ ५१ ॥**

**'नग्न०'** सुनग्नंभावुक इत्यादि इति । पलितानि सन्त्यस्य पलितः । अपलितो पलितो भवतीति पलितंभविष्णुः पलितंभावुकः । अन्धंभविष्णुः २ । स्थूलंभविष्णुः २ । सुभगंभविष्णुः २ । आढ्यंभविष्णुः २ । च्व्यर्थ इति किम् ? नग्नो भविता । अच्वेरिति किम् ? आढ्यभविता तृच् । उपपदविधिषु तदन्तविधिर्नाश्रित इति तदन्तग्रहणम् ॥ ५१ ॥

## कृगः खनट् करणे ॥ ५२ ॥ [ सि० ५।१।१२९ ]

**नग्नादिसप्तकादच्व्यन्ताच्च्व्यर्थवृत्तेः परात्कृगः करणे खनट् स्यात् । अनग्नः नग्नः क्रियतेऽनेनेति नग्नंकरणं द्यूतम् सुनग्नंकरणम् ॥ ५२ ॥**

**'कृगः०'** करण इति कर्त्तरीत्यस्यापवादः । सुनग्नंकरणमिति । एवं पलितंकरणं तैलम् । प्रियंकरणं शीलं । अन्धंकरणो लोभः । स्थूलंकरणं दधि । सुभगंकरणं रूपम् । आढ्यंकरणं वित्तम् । तदन्तेभ्योऽपि । अनग्नो नग्नो क्रियतेऽनेन नग्नंकरणः पटः । अपलितंकरणो रसः । [च्व्यर्थ इत्येव । नग्नं करोति द्यूतेन । नात्र प्रकृतिविकारभावो विवक्ष्यते] अच्वेरित्येव । नग्नीकुर्वन्त्यनेन अत्र खनट्प्रतिषेधसामर्थ्यादनडपि न भवति । नहि नग्नीकरणमित्यत्रानट्खनटो रूपे समासे स्त्रियां वा विशेषोऽस्ति । केचित्तु च्व्यन्तपूर्वादपि खनटमिच्छन्ति । नग्नीकरणं द्यूतम् । आदिशब्दात् **'भावे चाशिताद्भुवः खः'** ( ५।१।१३० ) आशितशब्दात्पराद्भवतेर्भावकरणे चाभिधेये खः स्यात् । आशितेन तृप्तेन भूयते भवता आशितंभवो वर्त्तते भवतः । आशितो भवत्यनेन आशितंभव ओदनः । असरूपत्वादनडपि । आशितस्य भवनं आशितभवनम् । न घञ् सरूपत्वात् । आशित इति निर्देशादश्नातेः कर्त्तरि क्तो [ शील्यादिलात् ] दीर्घत्वं च । आङ्पूर्वाद्वाऽविवक्षितकर्मकात्कर्त्तरि क्तः [गत्यर्थाकर्मक०' इत्यनेन] ॥ ५२ ॥

## नाम्नो गमः खड्डौ च विहायसस्तु विहः ॥ ५३ ॥ [ सि० ५।१।१३१ ]

**नाम्नः पराद्गमेः खड्डखाः स्युः विहायसो विहश्च । तुरङ्गः विहङ्गः । तुरगः विहगः । तुरङ्गमः विहङ्गमः ॥ ५३ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'**नाम्नो०**' खड् तुरो गच्छति तुरङ्गः । 'भुजंत् कौटिल्ये' । भोजनं (भुजः ?) स्थादित्वात्कः । भुजेन कौटिल्येन गच्छति भुज्यन्तेऽनेन भुजः पाणिः । भुजेन भुज इवागच्छति भुजङ्गः सर्पः । प्रवेण प्लवेन गच्छति प्रवङ्गः प्लवङ्गः । विहायसा गच्छति विहङ्गः । ड, तुरगः भुजगः प्रवगः प्लवगः विहग अत्यन्तगः सर्वगः सर्वत्रगः अनन्तगः परदारगः ग्रामगः गुरुतल्पगः प्रतीपगः पुरोगः पीठगः तीरगः । अग्रादिभ्यस्तदन्तेभ्योऽपि अग्रगः सेनाग्रगः, आदिगः पङ्क्त्यादिगः, मध्यगः गृहमध्यगः, अन्तगः शाखान्तगः, अध्वगः ग्रामाध्वगः । दूरगः अदूरगः पारगः वेदपारगः अगारगः रूयगारगः इत्यादि । अथ **संज्ञायाम्**, खे गच्छति खगः पक्षी । न गच्छत्यगो वृक्षः पर्वतश्च । उरसा गच्छत्युरगः पृषोदरादित्वात् सलोपः । पतो गच्छति पतङ्गः । **क्षीरस्तु** पतत्यनेन 'पुन्नाम्नि०' (५।३।१३०) इति घे पतः पक्षस्तेन गच्छति पतगः पक्षी । पद्भ्यां न गच्छति पन्नं गच्छति वा पन्नगः सर्पः । आपोऽत्र सन्ति ज्योत्स्नाद्यण् । अपामयमाधारत्वेन 'तस्येदम्' (६।३।१६०) इत्यण्वा आप्यत नदीभिरिति भावे धञ्वा आपमब्धिं गच्छतीत्यापगा नदी । आशु गच्छति आशुगः शरो वायुश्च । निम्नगा समुद्रगा सततगा इत्यादि । अगो वृषलः शीतेनेत्यसंज्ञायामपि । अथ **खः** । सुतं सुतेन वा गच्छति सुतङ्गमो नाम मुनिर्यस्य सौतङ्गमिः पुत्रः । मितं गच्छति मितङ्गमोऽश्वः । मितङ्गमा हस्तिनी । जनङ्गमश्चण्डालः । पूर्वंगमाः पन्थानः । हृदयंगमा वाचः । तुरंगमोऽश्वः । भुजङ्गमः सर्पः । प्रवङ्गमः कपिः । प्लवङ्गमो भेकः । विहङ्गमो नभसङ्गमश्च, पक्षी । नभसशब्दोऽकारान्तोऽप्यस्ति । उरङ्गम इत्यपि कश्चित् । बहुलाधिकाराद्यथाप्रयोगदर्शनव्यवस्था । आदिशब्दात् '**सुगदुर्गमाधारे**' (५।१।१३२) एतौ डप्रत्ययान्तौ निपात्येते । सुखेन दुःखेन गम्यतेऽस्मिन् सुगः दुर्गः पन्थाः । असरूपत्वादनडपि सुगमनः दुर्गमनः । सुगमो दुर्गम इति खल् कर्मणि । '**निर्गो देशे**' (५।१।१३३) । डप्रत्ययान्तोऽयं निपात्यते । निर्गम्यतेऽस्मिन् देशे इति निर्गो देशः । '**शमो नाम्न्यः**' (५।१।१३४) शमः पराद्धातोरः स्यात् । शमित्यव्ययं सुखार्थे । तत्र भवति शम्भवोऽर्हन् । शं करोति शङ्करः । शंवदः । स्वः पश्यतीत्यादिष्वव्ययानां कर्मत्वदर्शनात् शमि कर्मणि हेत्वादिष्वपि परत्वात् कृगष्टो बाध्यते । शङ्करा नाम परिव्राजिका [शकुनिकेति च बृहद्वृत्तौ] तच्छीला च । नाम्नीति किम् ? शङ्करी जिनदीक्षा । '**पार्श्वादिभ्यः शीङः**' (५।१।१३५) अः स्यात् । पार्श्वाभ्यां शेते पार्श्वशयः । एवं पृष्ठशयः उदरशयः । दिग्धेन सह शेते दिग्धसहशयः । दिग्धसहात्तृतीयासमासात् शीङोऽकारः पश्चादुपपदसमासः । बहुवचनाद्यथादर्शनमन्येभ्योपि । आधारार्थ आरम्भः । '**ऊर्ध्वादिभ्यः कर्त्तुः**' (५।१।१३६) कर्तृवाचिभ्य एभ्यः परात् शीङ अः स्यात् । ऊर्ध्वः शेते ऊर्ध्वशयः । एवमुत्तानशयः । बहुवचनं प्राग्वत् । '**आधारात्**' (५।१।१३७) अस्मात्परात् शीङः अः स्यात् । खे शेते खशयः । फणगर्त्तेति पुंस्त्रीत्वात् गर्त्ते शेते गर्त्तशयः गुहाशयः हृच्छयः बिलेशयः मनसिशयः कुशेशयः । सप्तम्या अलुप् । गिरिश इति संज्ञायां लोमादित्वाच्छः । क्रियार्थत्वे तु गिरिशय इति स्यात् । '**चरेष्टः**' (५।१।१३८) आधारात्पराच्चरेष्टः स्यात् । कुरुषु चरति कुरुचरः मद्रचरः निशाचरः वनेचरः । टकारो ङ्यर्थः । निशाचरी । '**भिक्षासेनादायात्**' (५।१।१३९) अनाधारार्थ आरम्भः । भिक्षां चरति भिक्षाचरः । सेनां चरति परीक्षते सेनाचरस्तापसव्यञ्जनः । सेनाया वा चरति सेनाचरः । आदाय गृहीत्वा चरति आदायचरः । किमादायेत्यविवक्षैव । '**पुरोऽग्रतोऽग्रे सर्तेः**' (५।१।१४०) एभ्यस्त्रिभ्यः परात्सर्तेष्टः स्यात् । पुरः सरति पुरःसरः पुरःसरी । अग्रतः सरति अग्रसरः । आद्यादित्वात्तस् (७।२।८४) । अग्रे सरति अग्रेसरः । सप्तम्यलुप ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एकारान्तमव्ययं वा । सूत्रनिपातनाद्वा एकारः । तत्र अग्रं सरति अग्रेण वा सरति अग्रेसर इत्यपि भवति । **पूर्वात्कर्तुः** ( ५।१।१४१ ) अस्मात्परात्सर्तेष्टः स्यात् । पूर्वः सरति पूर्वसरः पूर्वो भूत्वा सरतीत्यर्थः । कस्मात्पूर्व इत्यविवक्षैव । पूर्वसरी । कर्तुरिति किम् ? पूर्वं देशं सरति पूर्वसारः । **'स्थापास्नात्रः कः'** ( ५।१।१४२ ) नाम्नः परेभ्य एभ्यः कः स्यात् । समे तिष्ठति समस्थः विषमस्थः कूटस्थः । कपित्थः दधित्थः मद्दित्थः अश्वत्थः कुलत्थः । द्विपः पादपः कच्छपः अनेकपः कटाहपः । नदीष्णः । आतपत्रं घर्मत्रम् । परत्वादयं 'शमो नाम्न्य' इत्यप्रत्ययं बाधते । शंस्थो नाम कश्चित् । शंस्था इत्यसरूपत्वात् क्विप् ॥ ५३ ॥ सूत्रम्

## शोकापनुदतुन्दपरिमृजस्तम्बेरमकर्णेजपं प्रियालसहस्ति-सूचके ॥ ५४ ॥ [ सि० ५।१।१४३ ]

**एते चत्वार एषु चतुर्ष्वर्थेषु निपात्याः ॥ ५४ ॥**

**'शोका०'** शोकमपनुदति शोकापनुदः प्रियः पुत्रादिः । तुन्दं परिमार्ष्टि तुन्दपरिमृजोऽलसः । स्तम्बे रमते स्तम्बेरमो हस्ती । कर्णे जपति कर्णेजपः सूचकः । एष्विति किम् ? शोकापनोदो धर्माचार्यः । तुन्दपरिमार्जं आतुरः । स्तम्बेरन्ता पक्षी । कर्णेजपिता मन्त्री । अत्रादिशब्दानुवृत्तेः **'मूलविभुजादयः'** ( ५।१।१४४ ) एते कप्रत्ययान्ता नियतार्थधातूपपदा यथाशिष्टप्रयोगं निपात्यन्ते । मूलानि विभजते मूलविभुजो रथः । उर्व्यां रोहति उर्वीरुहो वृक्षः । कौ मोदते कुमुदम् । महीं धरति महीध्रः । उषसि बुध्यते उषर्बुधोऽग्निः । आपो बिभर्त्ति अब्भ्रं मेघः । सरसि रोहति सरसिरुहं पद्मम् । नखानि मुञ्चन्ति नखमुचानि धनूंषि । काकेभ्यो गूहनीयाः काकगूहास्तिलाः । धर्माय प्रददाति धर्मप्रदः । एवं कामप्रदः स्वर्गप्रदः । शास्त्रेण प्रजानाति शास्त्रप्रज्ञः । एवमागमप्रज्ञः ॥ ५४ ॥ सूत्रम्

## दुहेर्डुघः ॥ ५५ ॥ [ सि० ५।१।१४५ ]

**नाम्नः पराद्दुहेर्डुघः स्यात् । कामदुघा ॥ ५५ ॥**

**'दुहे०'** कामान् दुग्धे पूरयति कामदुघा जिनार्चा । धर्माय दुग्धे धर्मदुघा । असरूपत्वात् क्विप् कामधुक् धर्मधुक् ॥ ५५ ॥

## भजो विण् ॥ ५६ ॥ [ सि० ५।१।१४६ ]

**नाम्नः पराद्भजो विण् स्यात् । अर्द्धं भजतीति अर्द्धभाक् ॥ ५६ ॥**

**'भजो०'** अर्द्धभागिति । एवं पादभाग् दूरभाग् प्रभाग् विभाग् । णकारो वृद्ध्यर्थः । वा क्विप् न भवति [ विण्क्विपोः सारूप्यार्थत्वात् ] ॥ ५६ ॥

## मनवन्क्वनिप्विच् ॥ ५७ ॥ [ सि० ५।१।१४७ ]

**क्वचिन्नाम्नः पराद्धातोरेते यथालक्ष्यं स्युः । सुदामा ॥ ५७ ॥**

**'मनव०' मन्** इन्द्रं शृणोति इन्द्रशर्म्मा सुशर्मा सुवर्मा सुदामा अश्वत्थामा । क्वचिद्ग्रहणात्केवलादपि शर्म वर्म हेम दामा पामा । **वन्** भूरिदावा । घृतं पिबति घृतपावा । अग्रेवावा । विजायते इति विजावा ॥ ५७ ॥ अत्रोपयोगिसूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## वन्याऽऽङ् पञ्चमस्य ॥ ५८ ॥ [ सि० ४।२।६५ ]

**वनि पञ्चमस्य आङ् स्यात् । विजायते इति विजावा । क्वनिप् सुधीवा । विच् शुभंयाः ॥ ५८ ॥**

**'वन्या०'** आङ् इति आकारान्तरप्रश्लेषादननुनासिकोऽनुनासिकश्चायमादेशः । अन्यथा **'लितौ'** (१।३।६६) इति ज्ञापकादनुनासिकः स्यात् । खन् विखावा, क्रम् दधिक्रावा, घुण घावा । घूर्ण घूरावा । ओणृ अवावा । 'इवु व्याप्तौ च' । नागमे 'य्वोः प्वय०' ( ४।४।१२१ ) इति वलोपे नकारस्यात्वे वावा । ङित्करणं घावेत्यादौ गुणनिषेधार्थम् । **क्वनिप्,** इकार उच्चारणार्थः । इणक् प्रातरेतीति प्रातरित्वा प्रातरित्वानौ; कित्त्वाद्गुणाभावः । पित्त्वात्तद्गुणः । सुष्ठु दधाति सुधीवा सुपीवा 'ईर्व्यञ्जनेऽयपि' इति ईः । केवलादपि, कृत्वा कृत्वानौ धीवा पीवा । **विच्** कीलालपाः । शुभं यातीति शुभंयाः । 'रुशं रिशंत् हिंसायाम्' । पाप्मानं रुशति रिशतीति विचि गुणे 'यजसृज०' इति शस्य षत्वे 'धुटस्तृतीय' इति डत्वे पाप्मरोट् । केवलादपि रोट् रेट् । जागर्त्तीति विचि गुणे जागः ॥५८॥

## क्विप् ॥ ५९ ॥ [ सि० ५।१।१४८ ]

**नाम्नः पराद्धातोर्यथालक्ष्यं क्विप् स्यात् । स्रंसध्वंसेत्यादिना दत्वे, उखास्रत् । प्रशाम्यतीति मो नो म्वोश्चेति नत्वे प्रशान् ॥ ५९ ॥**

**'क्विप्'** उखेन उखया स्रंसते उखास्रत् । पुंसे वर्त्तमान उखाशब्दः पुंल्ली, स्थाल्यां नित्यस्त्रीति **वैयाकरणा** मन्यन्ते । वहात् भ्रश्यति वहाभ्रट् । 'घञ्युपसर्गस्य बहुलम्' इति बहुलग्रहणादुखवहयोर्दीर्घः । पर्णानि ध्वंसते पर्णध्वत् । शकान् ह्वयति शकहूः । परिव्ययति परिवीः । यवलूः खलपूः अक्षद्यूः मित्रभूः प्रतिभूः कटचिकीः । केवलादपि; पाः वाः कीः गीः ऊः लूः । कुङ् य(प?)क् । सदिसूद्विषद्रुहदुहयुजविदभिदछिदजिनीराजिभ्यश्च १२ । दिवि सीदति सप्तम्या अलुप् भीरुष्ठानादित्वात्षत्वम् । दिविषत् द्युसत् । अन्तरिक्षषत् । सभासत् । प्रसीदति प्रसत् । उपसत् । अण्डं सूते अण्डसूः, शतसूः प्रसूः । मित्रं द्वेष्टि मित्रद्विट्, प्रद्विट् । द्वेषो जेऽनीयिषीष्ट वो धर्मः । मित्राय द्रुह्यति मित्रध्रुक् प्रध्रुक् विध्रुक् । गां दोग्धि गोधुक् कामधुक् । अश्वेन युनक्ति अश्वेन युज्यते वा अश्वयुक्, प्रयुक् । युङ् युञ्जौ । तत्त्ववित् वेदवित् प्रवित् । 'निर्विवेदे विदांवरः' । विदेरविशेषेण ग्रहणम् । लाभार्थान्नेच्छन्त्येके । काष्ठं भिनत्ति काष्ठभित् बलभित् गोत्रभित् प्रभित् भित् । रज्जुं छिनत्तीति रज्जुच्छित् । तमश्छित् भवच्छित् प्रच्छित् छित् । शत्रुं जयति शत्रुंजित् प्रसेनजित् कर्मजित् प्रजित् अभिजित् । सेनां नयति सेनानीः अग्रणीः ग्रामणीः प्रणीः । नीः नियौ नियः । विश्वस्मिन् राजते विश्वाराट् । 'विश्वस्य वसुराटोः' इति दीर्घः । राट् सम्राट् । अञ्चेः दध्यञ्चति दध्यङ् । देवमञ्चति देवद्र्यङ् । प्राङ् । केवलान्न भवति । ऋतुं ऋतौ ऋतवे ऋतुप्रयोजनो यजते ऋत्विग् । 'ऋत्विज्०' इत्यादिसूत्रेण गत्वम् । धृष्णोति दधृग् प्रगल्भः । दधृगिति निर्देशात् द्वित्वम् । उत्स्निह्यति उत्स्नह्यति वा उष्णिक् छन्दः । उष्णिगिति निर्देशात् दलोपषत्वादिकम् । **कथं** दिश्यते दिक्, सृज्यते इति स्रक् ? ऋत्सम्पदादित्वात् क्विप् । ककारः कित्कार्यार्थः । पकारः पित्कार्यार्थः । इकार उच्चारणार्थः । **'स्पृशोऽनुदकात्'** ( ५।१।१४९ ) उदकवर्जान्नाम्नः परात् स्पृशेः क्विप् स्यात् । घृतं स्पृशति घृतस्पृक् । एवं मर्मस्पृक् व्योमस्पृक् । मन्त्रेण स्पृशति मन्त्रस्पृक् । कर्मोपपदादेवेच्छन्त्यन्ये । अनुदकादिति किम् ? उदकस्पर्शः । अनुदकादिति पर्युदासादुदकसदृशमनुपसर्गं नाम गृह्यते । उपस्पृशति । **'अदोऽनन्नात्'** ( ५।१।१५० ) अन्नव-

जोन्नान्नः परादर्दः क्विप् स्यात् । आममत्ति आमात् । सस्यात् । अनन्नादिति किम्? अन्नादः । बहुलाधिकारात् कणादः पिप्पलादः । क्विप्सिद्धोऽन्नप्रतिषेधार्थं वचनम् । **'क्रव्यात्क्रव्यादावामपक्वादौ'** (५।१।१५१) एते यथासङ्ख्यं क्विबणन्तौ साधू यथामात्पक्वाद्याभिधेयौ । क्रव्यात् आममांसाशी क्रव्यादः पक्वमांसाशी । क्रव्याद इति नेच्छन्त्यन्ये । आममांसवाच्यपि क्रव्यशब्दः । क्रव्याद इति निपातनसामर्थ्यात् वृत्तौ पक्वमांसे वर्त्तते । अथवा कृत्तविकृत्तशब्दस्य पक्वमांसार्थस्य पृषोदरादित्वात् क्रव्यादेशः । सिद्धौ प्रत्ययौ विषयनियमार्थं वचनम् ॥ ५९ ॥ सूत्रम्

## दिद्युद्दृज्जगज्जुहूवाक्प्राड्धीश्रीशतद्रूस्रूज्वायतस्तूकटप्रूपरिव्राड्भ्राजादयः क्विपः ॥ ६० ॥ [ सि० ५।२।८३ ]

**एते क्विबन्ता निपात्याः । तत्त्वप्राट् तत्त्वप्राशौ ॥ ६० ॥**

**'दिद्यु०'** एते इत्यादि । शीलादौ सत्यर्थे एते निपात्यन्ते । इदं हि सूत्रं शीलाद्यर्थाधिकारपर्यन्ते वर्त्तते । क्विप्प्रत्ययप्रक्रमाच्चेह लिखितम् । तत्र द्योतते इत्येवंशीलः दिद्युत् दिद्युतौ । दृणातीति दद्दृत् दद्दृतौ । गच्छतीति जगत् जगतौ जगतः; क्रियाशब्दोऽयम्; विष्टपवाचकस्तु क्लीबलिङ्गः । गमेर्डिद्दे चेति उणादौ वा साधुः । जगत् जगती जगन्ति । तथोक्तम्—**अनेकार्थसङ्ग्रहे** 'जगल्लोके-ङ्गवायुषु' लोको विष्टपं तत्र क्लीबे । इङ्गं जङ्गमं तत्र वाच्यलिङ्गः । वायौ पुंसि । तत्र लोके यथा 'परस्परं स्त्रीधनलोलुपं जगत्' । इङ्गे यथा 'त्वं मुनीन्द्र जगत्तीर्थे' वायौ यथा 'जगज्जगति भ्रमतीति वित्तम्' । जुहोतीति जुहूः । एषु द्वित्वं दृणातिजुहोत्योर्ह्रस्वत्वदीर्घत्वे च । वक्तीति वाक् । पृच्छतीति प्राट् प्राशौ । शब्दप्राट् । दधाति ध्यायति वा धीः । श्रयतीति श्रीः । शतं द्रवतीति शतद्रूः । स्रवतीति स्रूः । जवतीति जूः; सौत्रो धातुः । जूः राक्षसः । आयतं स्तौति आयतस्तूः । कटं प्रवते इति कटप्रूः । परिव्राट् परिव्राजौ । एषु दीर्घत्वं दधातेराकारस्य ध्यायतेर्याशब्दस्य च ईकारः । बहुलाधिकाराच्छीलादावपि । धीः सुधीः प्रधीः आधीः । भ्राजादि विभ्राजते इति विभ्राट् विभ्राजौ । भासते इति भाः भासौ । पिपर्त्तीति पूः पुरौ । धूर्वतीति धूः धुरौ । विद्योतते इति विद्युत् विद्युतौ । ऊर्जयतीति ऊर्क् ऊर्जौ ऊर्जः । ग्रावाणं स्तौति ग्रावस्तुत् । पचतीति पक् । शक्नोतीति शक् । भिनत्तीति भित् । वेत्तीति वित् । शोकच्छित् । भुवः संज्ञायामेव भूः पृथ्वी । शम्भूः शिवः । आत्मभूः कामः, मनोभूः स एव । स्वयम्भूः ब्रह्मा । स्वभूर्विष्णुश्च । मित्रभूः नाम कश्चित् । प्रतिभूः उत्तमाधमर्णयोरन्तरस्थः । दृन्भूः व्यसनसहायः । कारभूः पण्यमूल्यादिनिर्णेता । वर्षाभूर्दर्दुरः औषधिश्च । पुनर्भूः पुनरूढा ओषधिश्च । संज्ञाया अन्यत्र भविता । शीलादिष्वसरूपविधिर्नास्ति तेन तृन्नादीनां शीलादिप्रत्ययानां पक्षे असरूपोऽपि सामान्यक्विप् न प्राप्नोतीति पुनरनेन विहितः । केचित्तु संज्ञाशब्दानां शीलाद्यर्थेषु कामचारस्ते यथाकथञ्चिद् व्युत्पादनीया इति मन्यन्ते ॥ ६० ॥ सूत्रम्

## त्यदाद्यन्यसमानादुपमानाद्व्याप्ये दृशष्टक्सकौ च ॥ ६१ ॥ [ सि० ५।१।१५२ ]

**एभ्य उपमानेभ्यो व्याप्येभ्यः परात् दृशेर्व्याप्य एव टक्सकौ क्विप् च स्युः ॥ ६१ ॥**

**'त्यदा०'** स्य इव दृश्यते इति वाक्ये टगागमे ॥ ६१ ॥ उपयोगिसूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अन्यत्यदादेराः ॥ ६२ ॥ [ सि० ३।२।१५२ ]

अन्यस्य त्यदादेश्च दृगादावुत्तरपदे आः स्यात् । स इव दृश्यते इति त्यादृशः त्यादृशी । त्यादृक्षः त्यादृक्षी । त्यादृक् । एवमन्यादृशः । ईदृक् ॥ ६२ ॥

'अन्य०' अनेन आत्वे त्यादृशः । टकारः स्त्रियां ङ्यर्थः । ककारः कित्कार्यार्थः । स्त्रियां त्यादृशी । सगागमे 'यजसृज०' इति षत्वे, 'षढोः कः सि' इति तस्य कत्वे त्यादृक्षः । स्त्रियां त्यादृक्षा केचित् । सकमपि टितं मन्यन्ते त्यादृक्षी । क्विबागमे त्यादृक् ६ । एवं तादृशः तादृशी तादृक्षः तादृक्षा तादृक्षी तादृक् ६ । यादृशः अन्यादृशः ६ ॥ ६२ ॥ समानशब्दस्य विशेषमाह । सूत्रम्

## दृग्दृशदृक्षे ॥ ६३ ॥ [ सि० ३।२।१५१ ]

समानस्य सः स्यात् । सदृक् ६ । सदृशः ६ । ईदृशः ६ । कीदृशः ॥ ६३ ॥

'दृग्०' स्पष्टम् । सदृशः ६ ॥ ६३ ॥ इदंकिमोर्विशेषमाह । सूत्रम्

## इदंकिमीत्की ॥ ६४ ॥ [ सि० ३।२।१५३ ]

दृगादावुत्तरपदे इदंकिमौ ईत्कीरूपौ स्याताम् । ईदृक् ३ । कीदृक् ३ ॥ ६४ ॥

'इदं०' स्पष्टम् । ईदृशः ६ । कीदृशः ६ । एतादृशः ६ । अमूदृशः ६ । त्वादृशः ६ । युष्मादृशः ६ । मादृशः ६ । अस्मादृशः ६ । भवादृशः ६ । एकद्विशब्दयोस्तु बाहुलकादनभिधानाद्वा । एते प्रयोगा न दृश्यन्ते । एभ्य (पृ० ८५४-पं० ३१) इति किम् ? वृक्ष इव दृश्यते । उपमानादिति किम् ? स दृश्यते । व्याप्ये वर्त्तमानादिति किम् ? तेनेव दृश्यते । तस्मिन्निव दृश्यते । व्याप्य एवेति किम् ? तमिव पश्यतीत्यत्र कर्त्तरि न स्यात् । वचनभेदान्न यथासङ्ख्यम् ॥ ६४ ॥ सूत्रम्

## कर्त्तुर्णिन् ॥ ६५ ॥ [ सि० ५।१।१५३ ]

कर्त्रर्थादुपमानात्पराद्धातोर्णिन् स्यात् । उष्ट्रक्रोशी ॥ ६५ ॥

'कर्त्तु०' कर्त्रर्थादिति । कर्तृवाचिन उपमानभूतान्नाम्नः परात् णिन् स्यात् । कृत्त्वात् कर्तरि उष्ट्र इव क्रोशतीति उष्ट्रक्रोशी ध्वाङ्क्षरावी खरनादी सिंहनादी सिंहनर्दी । कर्त्तुरिति किम् ? शालीनिव कोद्रवान् भुङ्क्ते । उष्ट्रमिवाश्वमारोहति । उपमानभूतादित्येव उष्ट्रः क्रोशति । अशीलार्थो जात्यर्थश्चारम्भः ॥ ६५ ॥ सूत्रम्

## अजातेः शीले ॥ ६६ ॥ [ सि० ५।१।१५४ ]

अजातिवाचिनो नाम्नः पराद्धातोः शीलेऽर्थे वर्त्तमानाण्णिन् स्यात् । उष्णभोजी । अजातेरिति किम् ? शालीन् भोक्ता ॥ ६६ ॥

'अजाते०' अजातिवाचिनो नाम्नः पराद्धातोः शीलेऽर्थे वर्त्तमानाण्णिन् स्यात् । उष्णं भुङ्क्ते इत्येवंशीलः उष्णभोजी शीतभोजी । अजातेरिति प्रसज्यनिषेधादसत्त्ववाचिनोऽप्युपसर्गाद्भवति । उदासरतीत्येवं शील उदासारी प्रत्यासारी प्रस्थायी प्रतिबोधी प्रयायी । प्रतीतेरिति किम् ? यायी । उदाङ्भ्यां परं सर्तिं वर्जयित्वाऽन्यस्माद्धातोरुपसर्गपदान्नेच्छन्त्यन्ये । तथोक्तं **कौमुद्याम्** । इह **वृत्तिकारेणो**पसर्गभिन्न एव सुपि णिनिरिति व्याख्याय उत्प्रतिभ्यामाङि सर्त्तेरुपसङ्ख्यानमिति पठितम्, **हरदत्तमाधवा**दिभिश्च तदेवानुसृतम्; एतच्च **भाष्य**विरोधादुपेक्ष्यं प्रसिद्धश्चोपसर्गोऽपि ३२

Jain Education International For Personal & Private Use Only www.jainelibrary.org

णिनिः । स बभूवोपजीविनां अनुयायिवर्गः । पतत्यधो धाम विसारि सर्वतः । न वञ्चनीयाः प्रभवोऽनुजीविभिरित्यादौ । अजातेरिति किम् ? ब्राह्मणानामंत्रयिता । शालीन् भोक्ता प्रभोक्ता उपभोक्ता सम्भोक्तेति । बहुलाधिकारान्न भवति । शील इति किम् ? शीलभोज आतुरः ॥ ६६ ॥ सूत्रम्

**साधौ ॥ ६७ ॥ [ सि० ५।१।१५५ ]**

**तथा । साधुकारी ॥ ६७ ॥**

तथेति । नाम्नः परात्साधावर्थे वर्त्तमानाद्धातोर्णिन् स्यात् । अशीलार्थ आरम्भः । साधु करोति साधुकारी साधुदायी चारुनर्त्ती सुष्ठुगामी । बहुलाधिकारात् साधु वादयति वादको वीणाम् । साधु गायतीत्यादौ न भवति । अत्रादिशब्दानुवृत्तेः '**ब्रह्मणो वदः**' ( ५।१।१५६ ) णिन् स्यात् । ब्रह्म ब्रह्माणं वा वदति ब्रह्मवादी । अयमप्यशीलार्थ आरम्भः । जात्यर्थोऽसरूपविधिनिवृत्त्यर्थश्च । '**व्रताभीक्ष्ण्ये**' ( ५।१।१५७ ) व्रतं शास्त्रोक्तो नियमः । आभीक्ष्ण्यं पौनःपुन्यं तयोर्गम्ययोः नाम्नः पराद्धातोर्णिन् । श्राद्धं पितृदैवत्यं कर्म तदुद्दिश्य कृतं पिण्डाद्यपि श्राद्धम् । अश्राद्धभोजी अलवणभोजी स्थण्डिलशायी स्थण्डिलवर्त्ती वृक्षमूलवासी पार्श्वशायी । तदन्यवर्जनमिह व्रतं गम्यते । आभीक्ष्ण्ये पुनः २ क्षीरं पिबन्ति क्षीरपायिण उशीनराः । उश्यते स्थादित्वात्कः, गौरादित्वाङ्कीः, उशी नगरी; तस्या नराः । तक्रपायिणः सौराष्ट्राः; सुराष्ट्रशब्दमेकवचनान्तं केचिन्मन्यन्ते इति 'बहुविषयेभ्यः' ( ६।३।४५ ) इति नाकञ्, अन्यथा सौराष्ट्रका इति स्यात् । कषायपायिणो गान्धाराः । गन्धारस्य इमे गान्धाराः । सौवीरपायिणो वाह्लीकाः । व्रताभीक्ष्ण्ये इति किम् ? स्थण्डिले शेते स्थण्डिलेशयः । बहुलाधिकारादाभीक्ष्ण्येऽपीह न भवति । कुल्माषादाश्चौलाः । अशीलार्थं जात्यर्थं वचनम् ॥ ६७ ॥

**इत्यनिर्दिष्टकालाः प्रत्यया उक्ताः । अथ भूतकालविहिता प्रत्यया उच्यन्ते । सूत्रम्**

**ब्रह्मभ्रूणवृत्रात् क्विप् ॥ ६८ ॥ [ सि० ५।१।१६१ ]**

**एभ्यस्त्रिभ्यः कर्मभ्यः पराद्भूतार्थाद्धन्तेः क्विप् स्यात् । ब्रह्म हतवान् ब्रह्महा ॥ ६८ ॥**

'**ब्रह्म०**' ब्रह्महेति । एवं भ्रूणहा वृत्रहा । क्विपित्यनेनैव सिद्धे नियमार्थं वचनम् । चतुर्विधश्चात्र नियमः । ब्रह्मादिभ्य एव हन्तेर्भूते क्विप् नान्यस्मात् । पुरुषं हतवान् पुरुषघातः । मधुहा अहिहा गोत्रहा हिमहा तमोपहा असुरहा आखुहा इत्यादिषु वर्त्तमानभविष्यतोः कालमात्रे वा 'क्विप्' इत्यनेनैव क्विप् । तथा ब्रह्मादिभ्यो हन्तेरेव भूते नान्यस्माद्धातोः क्विप् । ब्रह्माधीतवान् ब्रह्माध्याय इत्यणेव, न तु क्विप् । ब्रह्मविदादयस्तु भूताविवक्षायाम् । तथा ब्रह्मादिभ्यो हन्तेर्भूते क्विबेव नान्यप्रत्ययः । ब्रह्माणं हतवान् ब्रह्महा इति क्विबेव भवति, नाण्-णिनौ । वृत्रघ्नादयस्तु कालसामान्येन 'ब्रह्मादिभ्यः' इति टक्प्रत्यये साधवः । कथं वृत्रस्य हन्तुः कुलिशमिति ? केवलादेव हन्तेस्तृच्, पश्चाद्वृत्रेण सम्बन्धः । मध्येऽपवादा पूर्वान् विधीन् बाधन्ते नोत्तरानिति क्विपाऽणादिरेव बाध्यते न क्तक्तवतू । तथा ब्रह्मादिभ्यो हन्तेः क्विप् भूत एव नान्यस्मिन् । ब्रह्माणं हन्ति हनिष्यति ब्रह्मघात इत्यणेव । 'ब्रह्मादिभ्यः' इति टक्प्रसङ्गे बहुलमण् । तदेतत्सर्वं बहुलाधिकाराल्लभ्यते ॥ ५६ ॥ सूत्रम्

***कृगः सुपुण्यपापकर्ममन्त्रपदात् ॥ ६९ ॥ [ सि० ५।१।१६२ ]**

**सोः पुण्यादेः कर्मणश्च पराद्भूतार्थात्कृगः क्विप् स्यात् ॥ ६९ ॥**

'**कृग०**' सोरिति सुशब्दात्पुण्यादिभ्यश्च कर्मभ्यः परात्करोतेर्भूते वर्त्तमानात् क्विप् स्यात् ॥६९॥

अत्रोपयोगिसूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ह्रस्वस्य तः पित्कृति ॥ ७० ॥ [ सि० ४।४।११३ ]

**ह्रस्वान्तस्य धातोः पिति कृति तोऽन्तः स्यात् । सुष्ठु कृतवान् सुकृत् ॥ ७० ॥**

**'ह्रस्व०'** स्पष्टम् । अनेन तागमे सुष्ठु कृतवान् सुकृत् पुण्यं कृतवान् पुण्यकृत् । एवं पापकृत् । कर्मकृत् । मंत्रकृत् पदकृत् । [*]इदमपि नियमार्थं वचनम् । त्रिविधश्चात्र नियमः । एभ्यः कृग एव भूते क्विप् नान्यस्माद्धातोः ।१। मन्त्रमधीतवान् मन्त्राध्यायः इत्यण्क्ता एव भवन्ति, न क्विप् । अण् च क्तौ च अण्क्ताः । क्तवतुर्दर्शित एव । क्तस्तु आरम्भे यः क्तः स गृह्यते । अन्यस्य भावकर्मणोर्विधानात् 'गत्यर्था०' इत्यस्य तु सकर्मकत्वादप्राप्तिः । मन्त्रवित् पापनुत् इत्यादौ तु भूताविवक्षायां क्विप् । एभ्यः कृगो भूत एव क्विप् ।२। इह न भवति कर्म करोति करिष्यति वा कर्मकारः, मंत्रकारः पदकारः । तथा एभ्यः परात्कृगो भूते कृगः क्विबेव नान्यप्रत्ययः ।३। तेन कर्म कृतवान् कर्मकार इति न भवति । एभ्य एव भूते कृगः क्विबिति धातुनियमो नेष्यते । तेन शास्त्रकृत् तीर्थकृत् वृत्तिकृत् सूत्रकृत् भाष्यकृदित्यादयः सिद्धाः । अत्रादिशब्दसन्धानात् **'सोमात्सुगः'** ( ५।१।१६३ ) सोमं सुतवान् सोमसुत् । अत्रापि चतुर्द्धा नियमः । [1]सोमादेवेति नियमात्सुरां सुतवान् सुरासाव इत्यण् । सुरासुदिति भूताविवक्षायाम् । [2]सुग एवेति नियमात् सोमं पीतवान् सोमपा इति विच् । [3]भूत एवेति नियमात् सोमं सुनोति सोष्यते वा सोमसाव इत्यण् । [4]क्विबेवेति नियमात् सोमं सुतवानित्यण् न भवति । **'अग्नेश्चेः'** ( ५।१।१६४ ) अग्निं चितवान् अग्निचित् । अत्रापि चतुर्द्धा नियमः । [1]अग्नेरेवेति नियमात् कुड्यं चितवान् कुड्यचाय इत्यण् । [2]चेरेवेति नियमात् अग्निं कृतवानग्निकारः । [3]भूत एवेति नियमादग्निं चिनोति चेष्यति वा अग्निचायः । [4]क्विबेवेति नियमादग्निं चितवानित्यण् न भवति । **'कर्मण्यग्न्यर्थे'** ( ५।१।१६५ ) कर्मणः पराद्भूतेऽर्थे वर्त्तमानाच्चिनोतेः कर्मणि कारकेऽग्न्यर्थेऽभिधेये क्विप् स्यात् । श्येन इव चीयते श्येनचित् । एवं कङ्कचित् रथचक्रचित् । अग्न्यर्थ इष्टकाचय उच्यते । बहुलाधिकारात् रूढिविषय एवायं द्रष्टव्यः । केचित्तु संज्ञाशब्दात्कालत्रयेऽप्ययं भवतीत्याहुः । श्येन इव चीयते चितश्चेष्यते वा अग्निचित् । **'करणाद्यजो भूते'** ( ५।१।१५८ ) करणवाचिनः पराद्भूते वर्त्तमानाद्यजेर्णिन् स्यात् । अग्निष्टोमेनेष्टवान् अग्निष्टोमयाजी । भवति हि सामान्यविशेषयोर्भेदविवक्षायां सामान्ययजौ विशेषयजिरग्निष्टोमः करणम् । भूत इति किम् ? अग्निष्टोमेन यजते । करणादिति किम् ? गुरूनिष्टवान् । **'निन्द्ये व्याप्यादिन्विक्रियः'** ( ५।१।१५९ ) व्याप्यात्पराद्विपूर्वात् क्रीणातेर्भूते वर्त्तमानात्कुत्सिते कर्तरीन् स्यात् । सोमं विक्रीतवान् सोमविक्रयी । एवं तैलविक्रयी ब्राह्मणः । निन्द्य इति किम् ? धान्यविक्रायः वणिक् । (व्याप्यादिति किम् ? ग्रामे विक्रीतवान् ) भावेऽलन्तस्य मत्वर्थीयेनेना सिद्ध्यति कुत्सायामण्बाधनार्थं वचनम् । **'हनो णिन्'** ( ५।१।१६० ) व्याप्यात्पराद्भूते वर्त्तमानात् हन्तेर्निन्द्ये कर्त्तरि णिन् स्यात् । पितृव्यं हतवान् पितृव्यघाती । असरूपत्वादणपि पितृव्यघातः । केचित्त्वसरूपविधिं नेच्छन्ति । निन्द्य इति किम् ? शत्रुं हतवान् शत्रुघातः । व्याप्यादित्येव दण्डेन हतवान् । घञन्तान्मत्वर्थीयेनेना सिद्धे भूतकुत्साभ्यामन्यत्र मत्वर्थीयनिवृत्त्यर्थं वचनम् । अन्यत्रापीच्छत्यन्यः । एवं पूर्वसूत्रेऽपि ॥ ७० ॥ सूत्रम्

## दृशः क्वनिप् ॥ ७१ ॥ [ सि० ५।१।१६६ ]

**व्याप्यात्पराद्भूतार्थाद्दृशः क्वनिप् स्यात् । बहुदृश्वा ॥ ७१ ॥**

**'दृश०'** बहु दृष्टवान् बहुदृश्वा । एवं मेरुदृश्वा विश्वदृश्वा परलोकदृश्वा ॥ ७१ ॥



Jain Education International For Personal & Private Use Only www.jainelibrary.org

अत्रोपयोगिसूत्रम्,

**णस्वराघोषाद्वनो रश्च ॥ ७२ ॥ [ सि० २।४।४ ]**

**एतदन्तात् विहितो यो वन् तदन्तात् स्त्रियां ङीः स्यात् । तद्योगे नस्य रश्च । बहुदृश्वरी ॥७२॥**

**'णस्वरा०'** वन इति वन्क्वनिप्ङ्वनिपामविशेषेण ग्रहणम् । एभ्य इति णकारान्तात् स्वरान्तादघोषान्ताच्च यो विहितो वन् तदन्तात् स्त्रियां ङीः स्यात् । वनोऽन्तस्य तु तत्सन्नियोगे रः स्यात् । **ण** 'ओणृ अपनयने' ओणति स्म स्त्री अवावरी । **स्वर** धीवरी । पा पीवरी । कृ सहकृत्वरी सुत्वरी । **अघोष** दृश् दृश्वरी मेरुदृश्वरी । णस्वराघोषादिति किम् ? युध् सहयुध्वा । युज्वा स्त्री । विहितविशेषणं किम् ? शृणातीति शर्वरी । स्वराद्विहिताद्गुणे कृते घोषवतो यथा स्यात् । वन इति किम् ? श्वयतेः 'श्वन्मातरिश्वन्' इत्यादिनाऽनि अन्तलोपे च श्वन्; अत्र न भवति शुनी । नान्तत्वादेव ङीसिद्धस्तन्नियमार्थं रविधानार्थं च वचनम् । अत्रायं विशेषः **'वा बहुव्रीहेः'** (२।४।५) णस्वराघोषाद्विहितो यो वन् तदन्तात् बहुव्रीहेः स्त्रियां ङीर्वा स्यात् । ङीयोगे रोऽन्तादेशश्च । प्रियावावरी प्रियावावा स्त्री । बहुधीवरी बहुधीवा । बहुमेरुदृश्वरी बहुमेरुदृश्वा । णस्वरादित्येव । बहुयज्वा स्त्री ॥ ७२ ॥ सूत्रम्

**सहराजभ्यां कृग्युधेः ॥ ७३ ॥ [ सि० ५।१।१६७ ]**

**आभ्यां कर्मभ्यां पराद्भूतार्थात्कृगः क्वनिप् स्यात् । सहकृत्वा सहयुध्वा । राजकृत्वा राजयुध्वा ॥ ७३ ॥**

**'सह०'** सह कृतवान् सहकृत्वा सहकृत्वानौ । सह युद्धवान् सहयुध्वा सहयुध्वानौ । राजानं कृतवान् राजकृत्वा राजकृत्वानौ । राजानं योधितवान् राजयुध्वा राजयुध्वानौ । युधिरन्तर्भूतण्यर्थः । सकर्मकः । कर्मण इत्येव । राज्ञा युद्धवान् । प्रत्ययान्तर[अणादेः]बाधनार्थोऽयमप्यारम्भः । स्त्रियां ङ्यां वनो नस्य रत्वे 'महासिवेम्नः सहकृत्वरी बहु'मिति **नैषधीये** । बहुव्रीहौ प्रियसहकृत्वरी प्रियसहकृत्वा ॥ ७३ ॥ अत्रादिशब्दसंसर्गात्

**अनोर्जनेर्डः ॥ ७४ ॥ [ सि० ५।१।१६८ ]**

**कर्मणः परादनुपूर्वाज्जनेर्भूतेऽर्थे वर्त्तमानात् डः स्यात् । आत्मानुजः ॥ ७४ ॥**

**अनोर्ज०** कर्मणः परादनुपूर्वाज्जनेर्भूतेऽर्थे वर्त्तमानात् डः स्यात् । पुमांसमनुजातः पुमनुजः । 'पदस्य' ( २।१।८९ ) इति पुंसः सलोपः । स्त्र्यनुजः आत्मानुजः अनुपूर्वो जनिर्जननोपसर्जनायां प्राप्तौ वर्त्तमानः सकर्मकः । पुमांसमनुजननेन प्राप्तवानित्यर्थः ॥ ७४ ॥

**सप्तम्याः ॥ ७५ ॥ [ सि० ५।१।१६९ ]**

**सप्तम्यन्ताद्भूतेऽर्थे वर्त्तमानाज्जनेर्डः स्यात् । उपसरजः मन्दुरजः । अप्सुजातं अब्जम् । ( पञ्चम्यास्तथा ) बुद्धिजः ॥ ७५ ॥**

**'सप्तम्याः०'** सप्तम्यन्तात्पराद्भूतेऽर्थे वर्त्तमानाज्जनेर्डः स्यात् । उपसरे जातः उपसरजः । मन्दुरे मन्दुरायां वा जातः मन्दुरजः । अप्सु जातं अप्सुजं अब्जम् । **'अजातेः पञ्चम्याः'** ( ५।१।१७० ) पञ्चम्यन्तादजातिवाचिनो नाम्नः पराद्भूतेऽर्थे जनेर्डः स्यात् । बुद्धेर्जातो बुद्धिजः संस्कारः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

संस्कारजा स्मृतिः । सन्तोषजं सुखम् । कौशल्याया जातः कौशल्याजः । संज्ञाशब्दोत्रोपपदम् । अजातेरिति किम् ? हस्तिनो जातः ॥ ७५ ॥ सूत्रम्

## क्वचित् ॥ ७६ ॥ [ सि० ५।१।१७१ ]

**यथालक्ष्यं जनेर्डः स्यात् । अनुजः किञ्जः ॥ ७६ ॥**

यथालक्ष्यमिति । उक्तादन्यत्रापि । क्वचिल्लक्ष्यानुसारेण डः स्यादित्यर्थः । उक्तान्नाम्नोऽन्यतोपि किं जातेन किञ्जः । केन जातः किञ्जोऽनिर्ज्ञातपितृकः । अलं जातेन अलञ्जः । द्विर्जातो द्विजः । न जातोऽजः । अधिजातोऽधिजः । उपजः परिजः । प्रजाताः प्रजाः । अभिजः । कर्मणोपि अनुजः । जातेरपि ब्राह्मणजः पशुवधः । क्षत्रियजं युद्धम् । स्त्रीजमनृतम् । उक्ताद्धातोरन्यतोपि ब्रह्मणि जीनवान् ब्रह्मज्यः । उक्तान्नाम्नो धातोश्चान्यतोपि वरमाहृतवान् वराहः । उक्तान्नाम्नो धातोः कारकाच्चान्यतोपि । परिखाता परिखा आखाता आखा । उपखाता । नामधातुकालान्यत्वे मित्रं ह्वयति मित्रह्वः । अणोपऽवादो डः । धातुकारकान्यत्वे पटे हन्यतेस्म पटहः । धातुकालान्यत्वे वार्चरति वार्चो हंसः । 'वाहर्पत्यादयः' इति निषेधे 'चटते सद्वितीये' रस्य न शः । नामकारकान्यत्वे पुंसानुजातः पुंसानुजः । नामाभावे उक्तधातुकालान्यत्वे अटति अतति वा अः कायति कामयते वा कः । भातीति भं नक्षत्रम् । नामाभावे उक्तधातुकालकारन्यत्वे च खम्यते इति खम् । **'सुयजो-र्ङ्वनिप्'** ( ५।१।१७२ ) सुनोतेर्यजतेश्च भूतार्थवृत्तेरयं प्रत्ययः स्यात् । सुतवान् सुत्वा सुत्वानौ । इष्टवान् । यज्वा यज्वानौ । क्वनिप्वनभ्यां सिद्धे भूते नियमार्थं वचनम् । मन्त्रादिसूत्रस्थस्य क्वचिद्ग्रहणस्यैव प्रपञ्चः । ङकारो गुणनिषेधार्थः । पकारः पित्कार्यार्थः । इकार उच्चारणार्थः । **'जॄषोऽतृः'** ( ५।१।१७३ ) जीर्यतेर्भूतेऽर्थे अतृः स्यात् । जीर्यति स्म जरन् जरती । असरूपत्वाज्जीर्णः । 'श्लिषशीङ्स्था०' इति कर्त्तरि क्तः । जीर्णवान् । ऋकारो दीर्घत्वनिषेधार्थः ॥ ६४ ॥

## क्तक्तवतू ॥ ७७ ॥ [ सि० ५।१।१७४ ]

**भूतार्थाद्धातोरेतौ स्याताम् । तत्र तत्साप्यानाप्यात्कर्मभावे कृत्यक्तखलर्थाश्चेति वचनात् क्तः कर्मणि भावे च । क्रियतेस्म कृतः कटश्चैत्रेण । स्थितं चैत्रेण ॥ क्तवतुश्च कर्त्तरि । करोति स्म करोति स्म कृतवान् । प्रकृतः कटं चैत्रः । स्थितवांश्चैत्रः ॥ ७७ ॥**

'क्त०' प्रकृतः कटं देवदत्तः । प्रकृतवान् कटं देवदत्तः । अत्र समुदायस्याभूतत्वेऽपि कटैकदेशे कटत्वोपचारात्तस्य च निर्वृत्तत्वाद्भूत एव धात्वर्थः । इत्यादिकर्मण्यप्यनेनैव क्तक्तवतू सिद्धौ ॥ ७७ ॥

## श्लिषशीङ्स्थासवसजनरुहजॄभजेः क्तः ॥ ७८ ॥ [ सि० ५।१।९ ]

**एभ्यो नवभ्यः कर्त्तरि क्तो वा स्यात् । आश्लिष्टः कान्तां चैत्रः । आश्लिष्टा कान्ता चैत्रेण । अतिशयितो गुरुं शिष्यः । अतिशयितो गुरुः शिष्येण । उपस्थितो गुरुं शिष्यः । उपस्थितो गुरुः शिष्येण । उपासितो गुरुं सः । उपासितो गुरुस्तेन । अनूषितो गुरुं सः । अनूषितो गुरुस्तेन । अनुजातः तं सः । अनुजातः सः तेन । आरूढोऽश्वं सः । आरूढोऽश्वस्तेन । अनु-जीर्णस्तं सः । अनुजीर्णः स तेन । विभक्ताः स्वं ते । विभक्तं स्वं तैः ॥ ७८ ॥**

'श्लिष०' 'भव्यगेयजन्यरम्यपात्याप्लाव्यं नवा' ( ५।१।७ ) सुत्राधिकारोऽनुवर्त्तनीयः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अकर्मका अप्युपसर्गयोगात्सकर्मका भवन्तीति शीङादिग्रहणम्, अन्यथा 'गत्यर्थाकर्मक०' इतिसूत्रेण क्तः सिद्ध्यत्येव । विकल्पपक्षे विवक्षायां कर्मणि क्तः । आश्लिष्टः कान्ता चैत्रेणेत्यादि । कर्माविवक्षायां तु सर्वत्र भावे क्तः । आश्लिष्टं चैत्रेण । अतिशयितं शिष्येण । अनूषितं तेन । उपस्थितं शिष्येण । उपासितं तैः । अनूषितं तेन । अनुजातं तेन । आरूढं तैः । अनुजीर्णं तेन । विभक्तं तैः ॥ ७८ ॥

## आरम्भे ॥ ७९ ॥ [ सि० ५।१।१० ]

**आरम्भार्थाद्धातोः कर्त्तरि क्तो वा स्यात् । प्रकृताः कटं ते । प्रकृतः कटस्तैः ॥ ७९ ॥**

**'आरम्भे'** आरम्भे आदिकर्मणि भूतादित्वेन विवक्षिते वर्त्तमानाद्धातोर्यैः क्तो विहितः स कर्त्तरि वा स्यात् । प्रकृतः कटं भवान् । प्रकृतः कटो भवता । प्रकृतं भवता । कर्त्तुमारब्धः कृतः । अनेन क्तः । कर्त्तुमारभ्यते स्म 'क्तक्तवतू' इति क्तः । एवं प्रभुक्त ओदनं चैत्रः । प्रभुक्त ओदनश्चैत्रेण । भूतादित्वेनेत्यत्रादिशब्दाद्वर्त्तमानत्वभविष्यत्वयोरपि परिग्रहः । यथा ज्ञातुमारभते प्रज्ञातः । कर्षितुमारप्स्यते प्रकृष्टः ॥ ७९ ॥ सूत्रम्

## गत्यर्थाऽकर्मकपिबभुजेः ॥ ८० ॥ [ सि० ५।१।११ ]

**एभ्यः कर्त्तरि क्तो वा स्यात् । गतोऽसौ ग्रामं । गतो ग्रामस्तैः । आसितोऽसौ । आसितं तैः । पीताः पयस्ते । पीतं पयस्तैः । इदं भुक्तास्ते । इदं भुक्तं तैः ॥ ८० ॥**

**'गत्य०'** एभ्य इति भूतादौ यः क्तो विहितः स गत्यर्थेभ्योऽकर्मकेभ्यश्च धातुभ्यः पिबभुजिभ्यां च कर्त्तरि वा स्यात् ।क्रमेणोदाहरणानि–गतोऽसौ ग्राममित्यादीनि कर्तृकर्मणोरुदाहरणानि भवतु मैत्रेण गतं चैत्रेण इत्यादि विवक्षितकर्मत्वेपि पठितो भवान् । एवं प्रख्यातो विहितः । अविवक्षितकर्मभ्यो नेच्छन्त्येके । तन्मते कृतो देवदत्त इत्यादि कर्त्तरि न भवति । कालाध्वभावैश्च कर्मभिः सकर्मका अप्यकर्मका उक्तास्तेन त्रैरूप्यं भवति । सुप्तो भवान् मासम्, सुप्तो भवता मासः, सुप्तं भवता मासम्। एवमोदनपाकं सुप्तो भवानित्यादि [ उपलक्षणादेशेनापि सुप्तो भवान् कुरूनित्यादि ] । **'अद्यर्थाच्चाधारे'** ( ५।१।१२ ) अद्यर्थादाहारार्थाद्धातोर्गत्यर्थाकर्मकपिबभुजेश्च भूते यः क्तः स आधारे वा स्यात् । इदमेषां जग्धमित्यादि । अद्यर्थादित्यत्रार्थग्रहणात् इदमेषामभ्यवहृतम्, इदं तैरभ्यवहृतम् । इदं तेषामशितम् । इदं तैरशितम् । आरम्भे तु कर्त्तर्यपि भवति। इह ते अन्नं प्राशिताः । इह ते मधु प्रलीढाः । गत्यर्थादिभ्यः खल्वपि-इदं तेषां यातं । इहमहेः सृप्तम् । इदमेषां आशितम् । इदमेषां शयितम् । इदं गवां पीतम् । इदं तेषां भुक्तम् । पक्षे कर्तृकर्मभावेषु गत्यर्थाकर्मकेति सूत्रोक्तान्येवोदाहरणानि । **कौमुद्यां** तु 'मुकुन्दस्यासितमिदमिदं यातं रमापतेः । भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः ।' पक्षे आसेरकर्मकत्वात्कर्त्तरि भावे च आचिते च मुकुन्दः आसितं तेन । गत्यर्थेभ्यः कर्त्तरि कर्मणि च रमापतेरिदं यातः । तेनेदं यातं । कथं ब्राह्मण्या भुक्ता इति भुक्तमस्त्येषामिति मत्वर्थीयोऽच् ॥ ८० ॥

**एवं भूतार्थे क्तप्रत्ययमभिधाय वर्त्तमानात् क्तप्रत्ययं निर्दिशति ।** सूत्रम्—

## ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः क्तः ॥ ८१ ॥ [ सि० ५।२।९२ ]

**एभ्यः सदर्थेभ्यः क्तः स्यात् । राज्ञां ज्ञातः इष्टः पूजितः मिन्नः शीलितो रक्षितः ॥ ८१ ॥**

ज्ञाने० एभ्य इति । ज्ञानार्थेभ्यः इच्छार्थेभ्यः अर्चा पूजा तदर्थेभ्यो ञीद्भ्यः शील्यादिभ्यश्च धातुभ्यः सत्यर्थे वर्त्तमानेभ्यः क्तः स्यात् । पूर्ववच्चार्थस्य कर्तृकर्मार्थनिर्देशः । अयं भावः । कर्त्तरि कर्मणि भावे च यथा प्रत्ययोऽभिहितस्तथैव केवलं वर्त्तमानकाल एव । **ज्ञानार्थः** राज्ञां ज्ञायते इति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

राज्ञां ज्ञातः । एवं बुद्धः विदितः अवगतः । **इच्छार्थे** राज्ञां इष्टः । तैरिष्यमाण इत्यर्थः । एवं मतः **अर्चार्थे** राज्ञां पूजित इति एवमर्चितः । ञीत् ञिमिदाङ् मिन्नः । ञिक्ष्विदाङ् क्ष्विण्णः । ञिष्विदाङ् खिन्नः । ञिधृषाद् धृष्टः । ञित्वरिष् तूर्णः । ञिष्वपंक् सुप्तः । ञिभींक् भीतः । ञिइन्धैपी इद्धः । ञितृषच् तृषितः । शीलादि 'शीलितो रक्षितः क्षान्तः आक्रुष्टो जुष्ट उद्यतः । संयतः शयितस्तुष्टो रुष्टो रुषित आसितः ॥ १ ॥ कान्तोऽभिव्याहृतो हृष्टः तृप्तः सृप्तः स्थितो भृतः । अमृतो मुदितः पूर्त्तः स(श ?)क्तोऽक्तः श्रान्तविस्मितौ ॥ २ ॥ संरब्धारब्धदयिता दिग्धः स्निग्धोऽवतीर्णकः । आरूढो मूढ आयस्तः क्षुधिताक्रांतव्रीडिताः ॥ ३ ॥ मत्तश्चैवं तथा क्रुद्धः श्लिष्टः सुहित इत्यपि । लिप्तदृ(ह ?)प्तौ च विज्ञेयौ सति लभादयस्तथा ॥ ४ ॥ बहुलाधिकाराद्यथाभिधानमेभ्यो भूतेऽपि क्तो भवति । तथा च तद्योगे तृतीयासमासो पि सिद्धः । 'अर्हद्भ्यस्त्रिभुवनराजपूजितेभ्यः' । एवं शीलितो मैत्रेण रक्षितो मैत्रेण । आक्रुष्टश्चैत्रेणेत्यादि द्रष्टव्यम् । वर्त्तमानक्ते तु षष्ठ्येव । कान्तो हरिश्चन्द्र इव प्रजानामिति । **अन्ये** तु ज्ञानाद्यर्थेभ्यस्तक्रकौण्डिन्यन्यायेन भूते क्तस्य बाधनात् वर्त्तमानक्तेन च योगे कर्त्तरि षष्ठीविधानात् त्वया ज्ञातो मया ज्ञात इत्यादिरपशब्द इति मन्यन्ते ॥ ८१ ॥ क्तादिप्रत्ययानां कार्यविशेषमाह । सूत्रम्

## ॠल्वादेरेषां तो नोऽप्रः ॥ ८२ ॥ [ सि० ४।२।६८ ]

**पृवर्जात् ॠदन्तात् ल्वादिभ्यश्च परेषां क्तिक्तक्तवतूनां तो नः स्यात् । तीर्णः तीर्णवान् । लूनः लूनवान् । अप्र इति किम् । पूर्तः पूर्तवान् ॥ ८२ ॥**

**'ॠल्वा०'** ल्वादिभ्यश्चेति 'पूग्श् पवने' इत्यारभ्य वृल्वादिरिति पर्यन्तो द्वाविंशतिकः क्र्याद्यन्तर्गणः प्वादिगणस्तत्राद्यं विहाय लूग्श् छेदने इत्यारभ्य वृल्वादिरिति पर्यन्तः एकविंशतिकः प्वाद्यन्तर्गणो ल्वादिर्गणः । ल्वादिषु ये ॠकारान्ताः स्तॄतॄप्रभृतयस्तेषां ॠग्रहणेनैव सिद्धे ल्वादिषु पाठः प्वादिकार्यार्थः । तीर्णः तीर्णवानिति, क्तौ तु तीर्णिः । कॄ कीर्णः कीर्णवान् कीर्णिः । गॄ गीर्णः गीर्णवान् गीर्णिः । ल्वादि लूनः लूनवान् लूनिः । धूनः धूनवान् धूनिः । लीनः लीनवान् लीनिः । पूर्त्तः पूर्त्तवान्, क्तौ तु पूर्त्तिः । पूर्णिरित्यपि **कश्चित्** ॥ ८२ ॥ सूत्रम्

## रदादमूर्छमदः क्तयोर्दस्य च ॥ ८३ ॥ [ सि० ४।२।६९ ]

**मूर्छमदवर्जाद्रदन्तात्परयोः क्तयोस्तस्य तद्योगे धातोर्दस्य च नः स्यात् । पूर्णः पूर्णवान् । दूनः दूनवान् । भिन्नः भिन्नवान् ॥ ८३ ॥**

**'रदा०'** पूर्णः पूर्णवान् । पूरैचि इत्यस्य रूपम् । गुरैः आगूर्णः आगूर्णवान् । भिद् भिन्नः २ । छिद् छिन्नः २ । रदादिति किम् ? चितः चितवान् । अमूर्च्छमद इति **किम् ?** अत्र विशेषसूत्रम्

## राल्लुक् ॥ ८४ ॥ [ सि० ४।१।११० ]

**रात्परयोश्छ्वोर्लुक स्यात् । अनुनासिकादौ कौ धुडादौ च । शूटोऽपवादः । हूर्णः २ । तूर्णः २ । घूर्णः २ ॥ ८४ ॥**

**'राल्लुक्'** स्पष्टम् । अनुनासिकादौ यथा 'मूर्च्छा मोहसमुच्छ्राययोः' । हुर्च्छा कौटिल्ये । मनि अनेन छलोपे गुणे कर्त्तव्ये, 'भ्वादेर्नामिन०' इति शास्त्रमसदिति गुणे मोर्मा होर्मा । एवं तुर्वैं धुर्वैं । अनेन वलोपे गुणे तोर्मा धोर्मा । कौ मूः मुरौ मुरः । हूः हुरौ । तूः तुरौ । धूः धुरौ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

घुडादौ हूर्ण इति । प्रकृतम्—अत्रादित्वात् क्तयोरिड्निषेधः । तूर्णः धूर्णः इत्यत्र ऐदित्त्वादिड्निषेधः । सर्वत्र पूर्वेण क्तयोस्तस्य नः । क्तौ तु मूर्त्तिः हूर्त्तिः तूर्त्तिः धूर्त्तिः । धूर्त्त इति चौणादिकः । मूर्त्त इति 'मूर्च्छिते मूर्त्तमूर्च्छालौ' इत्य**भिधानचिन्तामणौ** । कृतस्यापत्यं कार्तिरित्यत्रासिद्धं बहिरङ्गमन्तरङ्गे इति न भवति । क्तयोरिति किम् ? पूर्तिः भित्तिः । **कथं** चूर्णिरिति ? चूरेरौणादिको णिः । रदान्तस्येति किम् ? चरितं मुदितम् । कृतः कृतवानित्यत्र तु वर्णैकदेशानां वर्णग्रहणेनाग्रहणान्न भवति । रेफात्परेण स्वरभागेण व्यवधानाद्वा । ऋकारस्य हि मध्येऽर्द्धमात्रो रेफः, अग्रे पश्चाच्च तुरीयः स्वरभागः प्रतिज्ञायते । भिन्नवद्भ्यामित्यत्र प्रत्ययदकारस्य परेऽसत्त्वात् सूत्रे चाश्रुतत्वान्न भवति । कथं चीर्णः चीर्णवानिति ? चॄ इति धात्वन्तरं चरतिसमानार्थं क्तक्तवतू विषयमामनन्ति । अत्रामी विशेषाः **'ह्लादो ह्रद् क्तयोश्च'** (४।२।६७) 'ह्लादैङ् सुखे च' इत्येतस्य क्तक्तवत्वोः क्तौ च ह्रद् आदेशः स्याद् । रदादमूर्च्छेति क्तयोस्तस्य धातोर्दस्य च नत्वे ह्रन्नः ह्रन्नवान् ह्रन्तिः । क्तयोश्चेति किम् ? ह्लादयित्वा । **'भित्तं शकलम्'** । (४।२।८१) भिदेः परस्य क्तस्य नत्वाभावो निपात्यते । शकलमिति भित्तशब्दश्चेत् शकलपर्यायः स्यात् । शकलमिति किम् ? भिन्नम् । शकलपर्यायनिर्देशः किम् ? भिदिक्रियाविवक्षायां शकले विषये भिन्नमित्येव यथा स्यात् । भिन्नं शकलम् । भिन्नं भित्तं 'शशभृद्भित्तनिरङ्कभित्तयः' **नैषधीये । 'वित्तं धनप्रतीतम्'** (४।२।८२) विन्दतेः परस्य क्तस्य नत्वाभावो निपात्यते । धनपर्यायः प्रतीतपर्यायश्चेद्वित्तशब्दो भवति । विद्यते लभ्यते इति वित्तम् धनम् । विद्यते उपलभ्यतेऽसाविति वित्तः प्रतीतः । 'ख्याते प्रतीतप्रज्ञातवित्तप्रथितविश्रुता' इत्य**भिधानचिन्तामणौ** । अत्र कारिका 'वेत्तेर्विदितं, विन्तेर्विन्नं वित्तं च, विद्यतेर्विन्नं । वित्तं धने प्रतीते च विन्दतेर्वित्तमन्यत्र' ॥ १ ॥ 'ऋह्रीघ्राध्रा०' (४।२।७६) इति विकल्पेन नत्वे 'विन्नं विचारिते' इत्य**भिधानचिन्तामणौ । 'निर्विण्णः'** (२।३।८९) निरपूर्वाद्विदेः सत्तालाभविचारार्थात्परस्य क्तनकारस्य णत्वं निपात्यते । निर्विण्णः प्राव्राजीत् । कश्चित्तु वेत्तेरपीच्छति निर्विण्णवानिति च ॥ ८४ ॥

## सूयत्याद्योदितः ॥ ८५ ॥ [ सि० ४।२।७० ]

**सूयत्यादिभ्यो नवभ्य ओदिभ्यश्च परयोः क्तयोस्तो नः स्यात् । सूनः सूनवान् । दूनः दूनवान् । लग्नः लग्नवान् ॥ ८५ ॥**

**'सूय०'** सूयत्यादिभ्यो नवभ्य इति षूङौच् सूनः सूनवान् । दूङ्च् दूनः २ । दीङ्च् दीनः २ । धीङ्च् धीनः २ । मीङ्च् मीनः २ । रीङ्च् रीणः २ । लीङ्च् लीनः २ । डीङ्च डीनः २ । व्रीङ्च् व्रीणः २ । इति सूयत्यादयः । **ओदित्** ओलजैङ् ओलस्जैति वा लग्नः २ । ओविजैति उद्विग्नः २ । ओप्यायैङ् पीनः २ । ट्वोश्वि शूनः २ । ओव्रश्चौत् वृक्णः २ । एभ्य इति किम् ? पीतः । सूयतीति श्यनिर्देशः सूतिसुवत्योर्निवृत्त्यर्थः ॥ ८५ ॥

## व्यञ्जनान्तस्थातोऽख्याध्यः ॥ ८६ ॥ [ सि० ४।२।७१ ]

**व्यञ्जनात्परा या अन्तस्था तदन्तस्य ख्याध्यावर्जस्य क्तयोस्तो नः स्यात् । स्त्यानः स्त्यानवान् । द्राणः २ । ग्लानः २ । अख्याध्य इति किम् ? ख्यातः २ । ध्यातः २ ॥ ८६ ॥**

**'व्यञ्जना०'** व्यञ्जनादित्यादि । अयमर्थः । ख्याध्यावर्जितस्य धातोर्यद्व्यञ्जनं तस्मात्परा या अन्तस्था तस्याः परो य आकारस्तस्मात्परस्य क्तयोस्तकारस्य नः स्यात् । 'ष्ट्यैं स्त्यैं संघाते' । स्त्यानः स्त्यानवान् । 'द्रैं स्वप्ने' निद्राणः २ । 'ग्लैं हर्षक्षये' ग्लानः २ । 'म्लैं गात्रविनामे' म्लानः २ । व्यञ्ज-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नेति किम्? यातः २। अन्तस्थेति किम्? स्नात २। आत इति किम्? च्युतः २। द्रुतः २। प्लुतः २। धातुना व्यञ्जनविशेषणादिह न भवति। निर्यातः २। द्विर्भावेऽप्यन्तस्थेत्यभेदाश्रयणाद् बहिरङ्गत्वेनासिद्धेश्च न स्यात्। अरूयाध्य इति रूयाध्यावर्जनात् रूयात इत्यादौ तो नो न स्यात्। आतः परस्येति किम्? दरिद्रितः २। अत्रामी विशेषाः। **'प्रसमः स्त्यः स्ती'** (४।१।९५) प्रसम् इति समुदायपूर्वस्य स्त्यायतेः क्तयोः पुरतः स्तीत्यमादेशः स्यात्। प्रसंस्तीतः प्रसंस्तीतवान्। प्रसम इति किम्? संप्रस्त्यानः २। स्त्यानः २। प्रसमो नेच्छन्त्यन्ये। एतत्सूत्रं न कुर्वन्तीत्यर्थः। **'प्रात्तश्च मो वा'** (४।१।९६) प्रस्तीमः प्रस्तीमवान्। **'श्यः शीर्द्रवमूर्त्तिस्पर्शे नश्चास्पर्शे'** (४।१।९७) द्रवस्य मूर्त्तिः काठिन्यं तस्मिन्, स्पर्शे च वर्त्तमानस्य श्यायतेः क्तयोः पुरतः शी इत्यादेशः स्यात्। तत्सन्नियोगे च क्तयोस्तकारस्यास्पर्शविषये नकारादेशो भवति। शीनं शीनवद् घृतम्। शीनं शीनवन्मेदः। द्रवावस्थायाः काठिन्यं गतमित्यर्थः। स्पर्शे शीतं वर्त्तते। शीतो वायुः। गुणमात्रे तद्वति चार्थे स्पर्शविषयो भवति। द्रवमूर्त्तिस्पर्श इति किम्? संश्यानो वृश्चिकः। शीतेन सङ्कुचित इत्यर्थः। 'व्यञ्जनान्तस्थात०' इति नत्वम्। **'प्रतेः'** (४।१।९८) प्रतेः परस्य श्यायतेः क्तयोः परतः प्रागुक्तं स्यात् प्रतिशीनः प्रतिशीनवान्। प्रतिपूर्वोऽयं रोगे वर्त्तते। 'प्रतिश्यायस्तु पीनस इति वचनात्' इति पूर्वेणाप्राप्ते वचनम्। **'वाऽभ्यवाभ्याम्'** (४।१।९९) अभि अव इत्येताभ्यां परस्य श्यायतेः परतः प्रागुक्तं वा स्यात्। अभिशीनः २। अभिश्यानः २। अवशीनः २। अवश्यानः २। द्रवमूर्त्तिस्पर्शयोरप्यनेन विकल्पः। अभिशीनं अभिश्यानं घृतम्। अवशीनं अवश्यानं हिमम्। अभिशीतो अवशीतो वायुः। स्पर्शत्वान्न नत्वम्। अभिश्यानोऽवश्यानो वायुः। 'व्यञ्जनान्तस्थात' इति स्पर्शेऽपि नत्वम्। अभ्यवाभ्यामिति किम्? संश्यानः २। केचित्तु समा व्यवधानेऽपीच्छन्ति। अभिसंशीनः २। अभिसंश्यानः २। अवसंशीनः २। अवसंश्यानः २। तन्मतसंग्रहार्थं अभ्यवाभ्यामिति तृतीया व्याख्येया। समस्ताभ्यामपीत्यन्ये। अभ्यवशीनः २। अभ्यवश्यानः २। विपर्यासे प्रयोगो नास्ति। वाशब्दस्य व्यवस्थितविभाषार्थत्वादन्योपसर्गान्ताभ्यां न भवति। समभिश्यानः २। समवश्यानः २। अत्रादिशब्दात् **'पूदिव्यञ्चेर्नाशाद्यूतानपादाने'** (४।२।७२) पू दिव् अञ्च इत्येतेभ्यो यथासङ्ख्यं नाशे द्यूतेऽनपादाने चार्थे परस्य क्तयोस्तकारस्य नः स्यात्। पूना यवा विनष्टा इत्यर्थः। आद्यूनः परिद्यूनः। समक्नौ शकुनेः पक्षौ सङ्गतावित्यर्थः। नाशाद्यूतानपादान इति किम्? पूतं धान्यम्। द्यूतं वर्त्तते। उदक्तमुदकं कूपात्। कथं व्यक्तम्? अञ्जेर्भविष्यति। **'सेर्ग्रासे कर्मकर्त्तरि'** (४।२।७३) सिनोतेः सिनातेर्वा परस्य क्तयोस्तकारस्य ग्रासे कर्मणि कर्तृत्वेन विवक्षिते नकारः स्यात्। सिनो ग्रासः स्वयमेव। ग्रास इति किम्? सितं कर्म स्वयमेव। कर्मकर्त्तरीति किम्? सितो ग्रासो मैत्रेण। सितो गलो ग्रासेन ॥ ८६ ॥

## क्षेः क्षी चाऽध्यार्थे ॥ ८७ ॥ [ सि० ४।२।७४ ]

**क्षेस्तो नस्तद्योगे क्षेः क्षीश्च न तु ध्यार्थे। क्षीणः क्षीणवान्। अध्यार्थे इति किम्? भावकर्मक्ते क्षितमस्य ॥ ८७ ॥**

**'क्षेः०'** ध्यार्थो ध्यणर्थौ भावकर्मणी। ततोऽन्यस्मिन्नर्थे विहितयोः क्तयोस्तकारस्य 'क्षिं क्षये' इत्येतस्मात्परस्य नः स्यात्। तत्सन्नियोगे चास्य क्षी इत्ययमादेशो क्षीणः क्षीणवान् मैत्रः। अधिकरणे इदमेषां क्षीणम्। अध्यार्थ इति किम्?। क्षितमस्य भावे क्तः। 'क्षिणश् हिंसाया'मित्यस्य तु सानु-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बन्धत्वान्न ग्रहणम् । **अन्यस्तु** तस्यापि ग्रहणमिच्छति । अत्रायं विशेषः । **'वाऽऽक्रोशदैन्ये'** ( ४।२।७५ ) आक्रोशे दैन्ये च गम्यमाने क्षेः परस्य अव्यार्थे क्तयोस्तकारस्य नकारो वा स्यात् । तत्सन्नियोगे च क्षी इत्ययमादेशः स्यात् । आक्रोशे क्षीणायुः क्षितायुर्जाल्मः । दैन्ये च क्षीणकः क्षितकस्तपस्वी । अव्यार्थ इत्येव । क्षितं जाल्मस्य, क्षितं तपस्विनः । **कश्चित्तु** भावेऽपि विकल्पमिच्छति । क्षीणमनेन क्षितमनेन । क्षेर्भावकर्मणो भाषायां क्त एव नास्तीति **कश्चित्** ॥ ८७ ॥ सूत्रम्

## ऋह्रीघ्राघ्रात्रोन्दनुदविन्तेर्वा ॥ ८८ ॥ [ सि० ४।२।७६ ]

**एभ्योऽष्टाभ्यः क्तयोस्तोन्वा स्यात् । ऋणं ऋतम् । ह्रीणः ह्रीणवान् । ह्रीतः ह्रीतवान् ॥८८॥**

**'ऋह्री०'** एभ्योऽष्टाभ्य इति । 'ऋं प्रापणे च', 'ऋं गतौ वा' । ऋणं ऋतम् । 'ह्रींक् लज्जायाम्' ह्रीणः २ । ह्रीतः २ । 'ह्रीतह्रीणौ तु लज्जिते' **इत्यभिधानचिन्तामणौ** । घ्रां घ्राणः २ । घ्रातः २ । 'घ्रैं तृप्तौ' घ्राणः २ । घ्रातः २ । 'त्रैङ् पालने' त्राणः २ त्रातः २ । 'उन्दैप् क्लेदने' समुन्नः २ समुन्तः २ । 'णुदंत् प्रेरणे' नुन्नः २ नुतः २ । 'विदिंप् विचारणे' विन्नः २ वित्तः २ । विदः अनिर्देशात् विद्यतेर्विन्दतेश्च नित्यं नकारः । विन्नः २ । प्रथमाभ्यामप्राप्ते घ्रादिभ्यस्तु प्राप्ते विकल्पः । तेन दकारान्तानां दस्यापि पूर्वेण नत्वं न भवति, तकारनत्वाभावपक्षे च सन्नियोगशिष्टत्वाद्दस्यापि नकारो न भवति । व्यवस्थितविभाषेयम्; तेन ऋणमित्युत्तमर्णाधमर्णयोरेव, अन्यत्र ऋतं सत्यम् । त्रायतेस्तु संज्ञायां न भवति त्रातः देवदत्तः, अन्यत्र तु नत्वं त्राणः । उभयत्रमित्येके । आदिशब्दोपादानात् **'दुगोरूच'** ( ४।२।७७ ) दुगु इत्येताभ्यां परस्य क्तयोस्तस्य नः स्यात् । तत्सन्नियोगे अनयोरूकारश्चान्तादेशः 'दुदुंद् उपतापे' स्वादिः । 'गुंत् पुरीषोत्सर्गे' कुटादिः । दुयतेस्स दूनः २ । गुवतिस्स गूनः २ । **कौमुद्यां** तु दुग्व्यो दीर्घश्च दुर्गतौ दूनः २ । 'दुदु उपतापे' इत्ययं तु न गृह्यते सानुबन्धकत्वात् । 'मृदुतया दुतयेति **माघः**' । एवं प्रहाण इति । अत्र सूत्रम् **'स्वरात्'** ( २।३।८५ ) अदुरुपसर्गान्तःशब्दस्थाद्रषृवर्णात्परस्य कृद्विषयस्य नकारस्य स्वरादुत्तरस्य णो भवति । प्रहाणः २ । प्रहीणः २ । परिहीणः २ । प्रगूणः २ । प्रयाणं परियाणं प्रवयणं परिवयणं । प्रयायमाणं २ । प्रयायिणौ परियायिणौ । अप्रयाणिः अपरियाणिः । प्रयाणीयं परियाणीयं । प्रवहणीयं परिवहणीयम् । यथासम्भवं क्त क्तवतु अन आन इन् अनि अनीय इत्येते सप्त प्रत्ययाः प्रयोजयन्ति । स्वरादिति किम् ? प्रभुग्नः २ । अदुरित्येव दुर्यानः पन्थाः । कृतीत्येव । प्रवापेन । अलचटतवर्गशसान्तर इत्येव । प्रकुप्यमानं परिकुप्यमानम् । प्रेण्वनं प्रेन्वनम् । प्रदानं प्रधानम् ॥ ८८ ॥ सूत्रम्

## क्षैशुषिपचो मकवम् ॥ ८९ ॥ [ सि० ४।२।७८ ]

**एभ्यस्त्रिभ्यः क्तयोर्यथासङ्ख्यं मकवाः स्युः । क्षामः क्षामवान् । शुष्कः शुष्कवान् । पक्वः पक्ववान् । निर्वाणमवाते ( ४।२७९ ) निपातोऽयम् । निर्वाणो मुनिः । वाते तु कर्त्तरि । निर्वातो वातः । एवं *क्षीवादयो निपाताः ज्ञेयाः ॥ ८९ ॥**

**'क्षै०'** स्पष्टम् । 'खितिखी०' उरु इति सूत्रे प्रक्रमे च व्याख्यातम् ( पृष्ठ १०१ ) । अत्रादिशब्दानुवृत्तेः **'निर्वाणमवाते'** ( ४।२।७९ ) निरपूर्वाद्वातिधातोः परस्य क्तयोस्तकारस्य नकारो निपात्यते । अवाते कर्त्तरि वातश्चेन्निर्वाति क्रियायाः कर्त्ता न भवति । निर्वाणो मुनिः । निर्वाणो दीपः । अवात इति किम् ? निर्वातो वातः । निर्वातं वातेन । भावेपि वात एव कर्त्ता । निर्वाणः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रदीपो वातेनेत्यत्र तु प्रदीपः कर्त्ता, वातस्तु हेतुः करणं वेति प्रतिषेधः । केचिन्निर्वाणं वातेनेतीच्छन्ति । तेषां वाते कर्त्तरि प्रत्यये प्रतिषेधः इति द्रष्टव्यम् । एवं *क्षीवादय इति वार्त्तिकम् अत्र सूत्रम् **'क्षीवोल्लाघकृशपरिकृशफुल्लोत्फुल्लसंफुल्लाः'** ( ४।२।८८ ) अनुपसर्गाः क्तप्रत्ययान्ता एते निपात्यन्ते । 'क्षीवृङ् मदे' । 'उत्पूर्वो लाघृङ् सामर्थ्ये' 'कृशच् तनुत्वे' केवलः, परिपूर्वश्च; एभ्यः परस्य क्तकारस्य लोपः इडभावश्च निपात्यते क्षीव उल्लाघः कृशः परिकृशः 'ञिफला विशरणे' इत्यस्मात्केवलादुत्संपूर्वाच्च परस्य क्तस्य लादेशो भावारम्भविवक्षायामिडभावश्च निपात्यते । फुल्लः उत्फुल्लः संफुल्लः । केचित्तु क्षीववान् उल्लाघवान् कृशवान् परिकृशवान् फुल्लवान् उत्फुल्लवान् संफुल्लवान् इति क्तवतावपि रूपमिच्छन्ति । तदर्थं क्तक्तवत्वोस्तशब्दावधेर्निपातनं द्रष्टव्यम् । एतदर्थमेव बहुवचनम् । अनुपसर्गा इति किम् ? प्रक्षीवितः प्रोल्लाघितः प्रकृशितः सम्परिकृशितः प्रफुल्लः । निपातनस्येष्टविषयत्वात् 'फल निष्पत्तौ' फलितः २ । क्षीवादयः शब्दाः केनाऽचापि च सिद्ध्यन्ति, प्रक्षीवित इत्यादिरूपनिवृत्त्यर्थं वचनम् । कथं प्रक्षीवः ? प्रगतः क्षीवः प्रक्षीव इति प्रादिसमासाद्भविष्यति ॥ ८९ ॥ अथैतेषामेव कार्यविशेषमाह । सूत्रम्

## क्षुधवसस्तेषाम् ॥ ९० ॥ [ सि० ४।४।४३ ]

**आभ्यां परेषां क्तक्तवतुक्त्वामिट् स्यात् । क्षुधितः २ । उषितः २ ॥ ९० ॥**

**'क्षुध०'** क्षुधित इति द्विकेनाङ्केन सर्वत्र क्तक्तवतू रूपं ज्ञेयम् । क्त्वायां तु क्षुधित्वा उषित्वा । यङ्लुपि वावसितः २ वावसित्वा । अत्र ग्रहणनिर्देशात् 'यजादि वचेः' इति न य्वृत् । वात्रस्तः २ । वावस्त्वा । वसिति वसतेर्ग्रहणं वस्तेस्त्विडस्त्येव । अत्रादिशब्दादनुवृत्तेः क्तयोः **'निष्कुषः'** ( ४।४। ३९ ) परयोः क्तयोरादिरिट् नित्यं स्यात् । निष्कुषितः । निष्कुषितवान् ॥ ९० ॥ सूत्रम्

## लुभ्यञ्चेर्विमोहार्चे ॥ ९१ ॥ [ सि० ४।४।४४ ]

**आभ्यां यथासङ्ख्यं विमोहपूजार्थाभ्यां क्तक्तवतुक्त्वामिट् स्यात् । विलुभितः २ । अञ्चितः २ ॥ ९१ ॥**

**'लुभ्य०'** आभ्यामिति । 'लुभच् गार्ध्ये' 'अञ्चू गतौ च' इत्येताभ्याम् । विमोहनपूजार्थाभ्यामिति विमोहो विमोहनमाकुलीकरणम्, पूजा अर्चा । विलुभितः सीमन्तः । विलुभिताः केशाः । विलुभितानि पदानि । विलुभितवान् । लुभित्वा लोभित्वा केशान् गतः । अञ्चिताः गुरवः । उच्चैरञ्चितलाङ्गूलः । अञ्चितवान् गुरून् । शिरोऽञ्चित्वैव संवहन् । विमोहार्चे इति किम् ? लुब्धो जाल्मः । लुब्धवान् लुब्ध्वा लुभित्वा लोभित्वा । उक्तमुदकं कूपात् । अक्त्वा अञ्चित्वा । लुभेः क्त्वं सहेलुभेत्यादिनाञ्चेश्चोदितो वेति विकल्पे उभयोश्च 'वेटोपतः' इति क्तयोर्नित्यं निषेधे प्राप्ते वचनम् ॥ ९१ ॥ सूत्रम्

## ऋवर्णश्र्यूर्णुगः कितः ॥ ९२ ॥ [ सि० ४।४।५७ ]

**ऋवर्णान्तादेकस्वराद्धातोः श्रेरूर्णोश्च कित इट् न स्यात् । वृतः, श्रितः, ऊर्णुतः । एकस्वरादिति किम् ? जागरितः ॥ ९२ ॥**

**'ऋवर्ण०'** एकस्वरादिति विशेषणं ऋवर्णान्तस्यैव न तु श्रयतेरूर्णुगश्च अव्यभिचारादसम्भवाच्च । तथैवाह--ऋवर्णान्तादेकस्वरादिति । वृतः २ । क्त्वायां वृत्वा । स्तृतः २ । स्तृत्वा २ । तॄ तीर्णः तीर्णवान् तीर्त्वा । पॄ पूर्तः २ पूर्त्वा । श्रि श्रितः २ श्रित्वा । उवर्णादिति सिद्धे ऊर्णुक् ग्रहणमनेकस्वरार्थं ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

ऊर्णुतः २ । ऊर्णुत्वा । गित्वाद्यङ्लुपि न भवति ऊर्णोनवित्वा । एकस्वरादित्येव । जागरितः २ । जागरित्वा । कित इति किम्? वरिता तरिता श्रयिता ऊर्णुविता ऊर्णविता । विहितविशेषणात् तीर्णः पूर्तः इत्यत्र कृतेऽपीरुरादेशे निषेधो भवति ॥ ९२ ॥ सूत्रम्

## उवर्णात् ॥ ९३ ॥ [ सि० ४।४।५८ ]

**उवर्णान्तादेकस्वराद्धातोर्विहितस्य कित इट् न भवति । युतः २ । भूतः २ ॥ ९३ ॥**

**'उव०'** स्पष्टम् । क्त्वायां युत्वा । एवं यूनः २ लूनः २ । लुत्वा । कित इत्येव । यविता लविता ॥ ९३ ॥ सूत्रम्

## पूङ्क्लिशिभ्यो नवा ॥ ९४ ॥ [ सि० ४।४।४५ ]

**पूङ्क्लिशिभ्यां च क्तक्तवतुक्त्वामिट् वा स्यात् । पूतः २ । पवितः २ । क्लिष्टः २ । क्लिशितः २ ॥ ९४ ॥**

**'पूङ्०'** क्त्वायां पूत्वा पवित्वा । क्लिष्ट्वा क्लिशित्वा । पूङिति ङकारः पूगो निवृत्त्यर्थः । तस्य हि 'न डीङ्शीङ्०' इत्यादिना कित्त्वप्रतिषेधाभावात् पुवित इत्यनिष्टं रूपमासज्येत । बहुवचनं क्लिश्यति क्लिश्नात्योर्ग्रहणार्थम् । पूङ उवर्णादिति नित्यं निषेधे प्राप्ते, क्लिश्यतेर्नित्यमिटि क्लिश्नातेश्चौदित्त्वात् क्त्वायां विकल्पे सिद्धेऽपि क्तयोर्नित्यं प्रतिषेधे (प्राप्ते ?) विकल्पार्थं वचनम् ॥ ९४ ॥ सूत्रम् ।

## डीयश्व्यैदितः क्तयोः ॥ ९५ ॥ [ सि० ४।४।६१ ]

**दिवादिकस्य डीयतेः श्वेरैदिद्भ्यश्च धातुभ्यः परयोः क्तक्तवत्वोरिट् न स्यात् । त्रस्तः २ । डीनः २ । श्वितः २ । लग्नः २ ॥ ९५ ॥**

**'डीय०'** डीयतेरिति दैवादिकस्येत्यर्थः । त्रस्तः २ । ऐदित्त्वादिण्निषेधः । एवं ओलजै लग्नः २ । ओविजै उद्विग्नः २ । यतै यत्तः २ । दीपै दीप्तः २ । डीयेति श्यनिर्देशात् डयतेरिडेव डयितः २ । क्तयोरिति किम्? डयिता श्वयिता लज्जिता उद्विजिता । कृतै नृतै चृतै इत्येषां वेट्त्वेन क्तयोरिट्प्रतिषेधे सिद्धे ऐदित्त्वं यङ्लुबर्थम् । तेन चरीकृतः २ । नरीनृतः २ । चरीचृतः २ इत्यत्रानेकस्वरत्वेऽपीट्प्रतिषेधः ॥ ९५ ॥ सूत्रम्

## वेटोऽपतः ॥ ९६ ॥ [ सि० ४।४।६२ ]

**पतिवर्जितात्क्वचिद्विकल्पेटो धातोरेकस्वरात्परयोः क्तयोरिट् न स्यात् । 'नशौच् नाशे' नष्टः २ । अपत इति किम्? पतितः ॥ ९६ ॥**

**'वेटो०'** अपत इति अयं भावः । पतिवर्जिताद्यत्र कचिद्विकल्पितेटो धातोरेकस्वरात्परयोः क्तयोरिट् न स्यात् । नशौच् नष्टः २ । रधौच् रद्धः २ । अञ्जौप् व्यक्तः २ । गुहौ गूढः २ । 'धूगौदितः' ( ४।४।३८ ) इति विकल्पितेट् । शमू शान्तः २ । असू अस्तः २ । केचिदस्यतेर्भावे क्ते नित्यमिटमिच्छन्ति । असितमनेन । उदितो वेति विकल्पितेट् । सह सोढः २ सहलुभेति विकल्पितेट् । पतित इति इवृधीति सनि वेट्त्वात् इण्निषेधे प्राप्ते प्रतिप्रसवार्थं प्रतिषेधः । अत्रादिशब्दानुवृत्तेः **'संनिवेरर्दः'** ( ४।४।६३ ) सम्निविपूर्वादर्दतेः परयोः क्तयोरादिरिड् न स्यात् । समर्ण्णः समर्ण्णवान् । न्यर्ण्णः २ । व्यर्ण्णः २ । सन्निवेरिति किम्? अर्दितः प्रार्दितः । **कश्चित्केवलाद**पीच्छति । अर्णः २ । **'अविदूरे भेः'** ( ४।४।६४ ) विदूरं विप्रकृष्टं ततोऽन्यदविदूरम् । अभि-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पूर्वादर्दः परयोरविदूरे आदिरिड् न स्यात् । अभ्यर्णमविदूरमित्यर्थः । अभ्यर्णा शरत् । अभ्यर्णं शेते । अविदूर इति किम् ? अभ्यर्दितो वृषलः शीतेन बाधित इत्यर्थः । **'वृत्तेर्वृत्तं ग्रन्थे'** ( ४।४।६५ ) वृत्तेर्ण्यन्तात् क्ते वृत्तमिति ग्रन्थविषये निपात्यते । गुणाभावेट्प्रतिषेधौ णिलुक् च निपातनात् वृत्तो गुणश्छात्रेण । वृत्तं पारायणं चैत्रेण । वृत्तेरन्तर्णयर्थस्यैतत् सिद्ध्यति । वर्तेस्तु ग्रन्थविषये वर्तितमिति प्रयोगनिवृत्त्यर्थं वचनम् । ग्रन्थे इति किम् ? वर्त्तितं कुङ्कुमम् । **अन्ये** तु ग्रन्थेपि वर्त्तितमिति प्रयोगमाद्रियन्ते । **'धृषशसः प्रगल्भे'** ( ४।४।६६ ) प्रगल्भो जितसभः, अविनीत इत्यन्ये । आभ्यां परयोः क्तयोरादिः प्रगल्भ एवार्थे इड् न स्यात् । धृष्टः विशस्तः प्रगल्भ इत्यर्थः । प्रगल्भ इति किम् ? धृषितः विशसितः । धृषेः 'आदित' ( ४।४।७२ ) इति शसेरप्यूदित्वाद् 'वेटोपत' इति प्रतिषेधे सिद्धे नियमार्थं वचनम् । **अथ** भावारम्भयोर्नित्यार्थं धृषेरुपादानं कस्मान्न भवति ? धृषेर्भावारम्भे स्वभावात् प्रगल्भार्थानभिधानात् । **'कषः कृच्छ्रगहने'** ( ४।४।६७ ) कृच्छ्रं दुःखं तत्कारणं च । गहनं दुरवगाहम् । अनयोरर्थयोः कषेः परयोः क्तयोरादिरिड् न स्यात् । कष्टं वर्त्तते कष्टोऽग्निः । कष्टानि वनानि । कृच्छ्रगहन इति किम् ? कषितं स्वर्णम् । **'घुषेरविशब्दे'** ( ४।४।६८ ) विशब्दनं विशब्दः—नानाशब्दनं प्रतिज्ञानं वा । ततोऽन्यत्रार्थे वर्त्तमानात् घुषेः परयोः क्तयोरादिरिड् न स्यात् । घुष्टा रज्जुः सम्बद्धावयवेत्यर्थः । घुष्टवान् । अविशब्द इति किम् ? अवघुषितं वाक्यमाह । नानाशब्दितं प्रतिज्ञातं वा वाक्यं ब्रूते इत्यर्थः । अत एव विशब्दनप्रतिषेधात् ज्ञाप्यते—घुषेर्विशब्दनार्थस्यानित्यश्चुरादेर्णिजिति; तेनायमपि प्रयोग उपपन्नो भवति 'महीपालवचः श्रुत्वा जुघुषुः पुष्पमाणवाः' । स्वाभिप्रायं नानाशब्दैराविष्कृतवन्त इत्यर्थः । **'बलिस्थूले दृढः'** ( ४।४।६९ ) बलिनि स्थूले चार्थे दृहेर्दृंहेर्वा क्तान्तस्य दृढ इति निपात्यते । इडभावः क्तस्य ढत्वं धातुहनयोर्लोपश्च निपातनात् । दृढो बली स्थूलो वा । परिदृढ्य गतः । पारिदृढी कन्या । बलिस्थूल इति किम् ? दृहितम् दृंहितम् । **'क्षुब्धविरिब्धस्वान्तध्वान्तलग्नम्लिष्टफाण्टबाढपरिवृढं मन्थस्वरमनस्तमःसक्ताऽस्पष्टाऽनायासभृशप्रभौ'** ( ४।४।७० ) क्षुब्धादयः क्तान्ताः मन्थादिष्वर्थेषु यथासङ्ख्यमनिटो निपात्यन्ते । क्षुभेर्मन्थेऽर्थे क्तान्तस्येडभावो निपात्यते । मथ्यते इति मन्थः, कर्मणि घञ्, क्तोऽपि क्षुभेः कर्मण्येव । तत्समानाधिकरण्यात् क्षुब्धः समुद्रः मथित इति मथ्यमानः क्षोभं गत इति वार्थः, अन्तर्भूतण्यर्थत्वाद्भ्रमित इत्यर्थः । मन्थनं वा मन्थः । तस्मिन्नभिधेये क्षुब्धं बलवेन विलोडनं कृतमित्यर्थः । अथवा द्रवद्रव्यसंपृक्ताः सक्तवो रूढ्या मन्थशब्देनोच्यन्ते । तद्द्रव्याभिधाने क्षुब्धशब्दो मन्थपर्यायो भवति । यदा तु क्षोभं प्रवृत्तिनिमित्तीकृत्य मन्थे वर्त्तते तदा क्षुब्धो मन्थ इति सामानाधिकरण्यम्, सञ्चलितो मन्थ इत्यर्थः । मन्थेऽभिधेय इति किम् ? क्षुभितं समुद्रेण, क्षुभितं मन्थेन । क्षुभितः समुद्रो मन्थेन । **अन्यस्तु** दध्यादिकं येन मथ्यते स मन्थो मन्थानक इत्याह । 'अमृतं नाम यत्सन्तो मन्त्रजिह्वेषु जुह्वति । शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना' ।। १ ।। इति । विपूर्वात्सौत्राद्रिभेर्विरिब्ध इति भवति । स्वरो ध्वनिश्चेत् । रेभेर्वा इत्वस्यापि निपातनात् विरिभितं विरेभितमन्यत् । स्वनेः स्वान्तमिति मनश्चेत् । मनःपर्यायः स्वान्तशब्दः । विषयेष्वनाकुलं मनः स्वान्तमित्यन्ये । अन्यत्र स्वनितो मृदङ्गः । स्वनितं मनसा घट्टितं स्पृष्टमिति यावत् । ध्वनेर्ध्वान्तमिति तमश्चेत् । तमःपर्यायो ध्वान्तशब्दः । अनालोकं गम्भीरं तमो ध्वान्तमित्यन्ये । अन्यत्र ध्वनितं तमसा, ध्वनितो मृदङ्गः । लगेर्लग्नमिति सक्तं चेत् । म्लेच्छेर्म्लिष्टमिति अस्पष्टं चेत् । इत्वमपि निपातनात् । फणेः फाण्टमिति अनायाससाध्यं चेत् । यदश्रपितमपिष्टमुदकसंपर्कमात्राद्विभक्तरस-

मौषधं कषायादि तदेवमुच्यते । अग्निना तप्तं यदीषदुष्णं तत्फाण्टमित्यन्ये । अविद्यमानायासः पुरुषो वा सामान्येन फाण्टशब्देनाभिधीयते । फाण्टाश्चित्राल्पपाणयः । वाहेर्बाढमिति भृशं चेत् क्रियाविशेषणमेवैतत् स्वभावात् । बाढविक्रमा इति तु विस्पष्टपटुवत् समासः । वाहितमन्यत् । परिपूर्वस्य वृहेर्बृंहेर्वा परिवृढ इति प्रभुश्चेत् । परिवृढः प्रभुः । परिव्रढय्य गतः । पारिवृढी कन्या । अन्यत्र परिवृहतम् । केचित्तु लग्नविरिब्धम्लिष्टफाण्टबाढानि धात्वर्थस्य सक्ताद्यर्थविषयमात्रे भवन्तीत्याहुः । तेषां लग्नं सक्तेनेत्याद्यपि भवति । यथा लोम्नि हृष्टमिति ॥ ९६ ॥ सूत्रम्

## न डीङ्शीङ्पूङ्धृषिक्ष्विदिस्विदिमिदः ॥ ९७ ॥ [ सि० ४।३।२७ ]

**एभ्यः सप्तभ्यः परौ सेटौ क्तौ किद्वन्न स्याताम् । डयितः २ । शयितः २ । पवितः २ । डीङ् भूवादिकः ॥ ९७ ॥**

**'नडी०'** इटः कित्त्वाभावाद्गुणे डयतेर्भौवादिकस्य डयितवान् । शीङ् शयितः २ । पूङ् पवितः २; 'उवर्णादि'ति नित्यं निषेधे प्राप्ते 'पूङ्क्लिशि'ति वेट् धृष आदित इति नित्यं निषेधे प्राप्ते धर्षितुमारब्धः प्रधृष्यतेऽस्मेति वा वाक्ये क्ते 'नवा भावारम्भे' (४।४।७२) इतीट् प्रधर्षितः २ । क्ष्विद् प्रक्ष्वेदितः २ । प्रस्वेदितः २ । मिद् प्रमेदितः २ । डीङ्शीङ्पूङामनुबन्धनिर्देशो यङ्लुब्निवृत्त्यर्थः । डेडियितः २ । शेशियितः २ । पोपुवितः २ । पोपूयतेस्म कर्मणि क्तः । अनेकस्वरत्वादिट्, उवर्णादिति न प्रतिषेधः । पूङ्क्लिशीति विकल्पोऽपि न । आदिशब्दानुवृत्तेः **'मृषः क्षान्तौ'** (४।३।२८) क्षान्तौ वर्त्तमानान्मृषः 'मृषीच् तितिक्षायां' इत्यस्मात्परौ सेटौ क्तक्तवतू किद्वन्न भवतः । मर्षितः २ । क्षान्ताविति किम्? अपमृषितं वाक्यमाह । सासूयमित्यर्थः । सेटावित्येव 'मृषू सहने' मृष्टः २ । ऊदित्त्वात् 'वेटोऽपत' इति क्तयोरिड्निषेधः ॥ ९७ ॥ सूत्रम्

## उति शवर्हाद्भ्यः क्तौ भावारम्भे ॥ ९८ ॥ [ सि० ४।३।२६ ]

**उत्युपान्त्ये सति शवर्हेभ्योऽदादिभ्यश्च परौ भावारम्भे क्तक्तवतू सेटौ वा किद्वत्स्याताम् । रुदितं रोदितमेभिः । प्रद्युदितः २ । प्रद्योदितः २ । प्ररुदितः २ प्ररोदितः २ । शवर्हाद्भ्य इति किम्? प्रगुधितः इत्यादि ॥ ९८ ॥**

**उति०** उकारे उपान्त्ये सति शवर्हेभ्योऽदादिभ्यश्च धातुभ्यो भावे आरम्भे चादिकर्मणि विहितौ क्तौ क्तक्तवतू सेटौ वा किद्वद्भवतः । कुचितमनेन कोचितमनेन प्रकुचितः प्रकोचितः । प्रकुचितवान् प्रकोचितवान् । द्युतितमनेन द्योतितमनेन प्रद्युतितः प्रद्योतितः । मुदितमनेन मोदितमनेन प्रमुदितः प्रमोदितः । अद्भ्यः, रुदितं रोदितमनेन प्ररुदितः प्ररोदितः । प्ररुदितवान् प्ररोदितवान् । उतीति किम्? श्वितितमनेन श्वितितः । शवर्हाद्भ्य इति किम्? 'गुधच् परिवेष्टने' । गुधितमनेन प्रगुधितः । भावारम्भ इति किम्? रुचिता कन्या । क्ताविति किम्? प्रद्योतिषीष्ट । सेटावित्येव । रूढमनेन प्ररूढः प्ररूढवान् ॥ ९८ ॥ सूत्रम्

## आदितः ॥ ९९ ॥ [ सि० ४।४।७१ ]

आदितो धातोः परयोः क्तयोरिट् न स्यात् । भिन्नः २ ॥ ९९ ॥

**'आदि०'** भिन्न इति । एवं ञिक्ष्विदा क्ष्विण्णः २ । ञिष्विदा स्विन्नः । श्विता श्वित्तः । आदितां धातूनां भावारम्भे वेट्त्वादन्यत्र 'वेटोऽपत' इत्यनेनैव नित्यमिट्प्रतिषेधे सिद्धे योगविभागो

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध' इति न्यायज्ञापनार्थम्, तेन 'विदक् ज्ञाने' विदितः २। हृषितः २। तुष्ट इत्यर्थ इत्यादि सिद्धम् ॥ ९९ ॥ सूत्रम्

## नवाऽनयोः[1] ॥ १०० ॥ [ सि० ४।४।७२ ]

**भावारम्भयोः क्ते तु वा। मिन्नं मेदितम् २ ॥ १०० ॥**

**'नवा०'** अनयोरिति भावारम्भयोरित्यर्थः। आरम्भ आदिक्रिया। आदितोर्भावे आरम्भे च विहितयोरादीड् वा न भवति। मिन्नमनेनेति भावे क्तः। प्रमिन्न इति आरम्भे क्तः। पूर्वेण नित्यं प्राप्ते विकल्पः। आदिशब्दानुवृत्तेः **'शकः कर्मणि'** ( ४।४।७३ ) शकेर्धातोः कर्मणि विहितयोः क्तयोरादिरिड्वा न स्यात्। शकः शकितो वा घटः कर्तुं चैत्रेण। कर्मणि क्तवतुर्नास्तीति नोदाह्रियते। कर्मणीति किम्? शक्तः कटं कर्तुं चैत्रः ॥ १०० ॥ सूत्रम्

## श्वसजपवमरुषत्वरसंघुषास्वनामः ॥ १०१ ॥ [ सि० ४।४।७५ ]

**एषामष्टानां क्तयोरिड्वा स्यात्। श्वस्तः २ श्वसितः २। जप्तः २ जपितः २। अहन्पञ्चमस्येति दीर्घे, वान्तः २ वमितः २। रुष्टः २ रुषितः २। तूर्णः २ त्वरितः २। संघुष्टः २ संघुषितः २। आस्वान्तः २ आस्वनितः २। अभ्यान्तः। अभ्यमितः २ ॥ १०१ ॥**

**'श्वस०'** श्वसित इति। एवं प्रश्वस्तः २ प्रश्वसितः २। आश्वस्तः २ आश्वसितः २। विश्वस्तः २ विश्वसितः २। व्याङ्भ्यामेव **केचि**द्विकल्पमिच्छन्ति। तन्मते श्वसितः २। निश्वसितः २। प्राङ्भ्यो नित्यमिड् निषेध इत्य**न्ये**। प्रश्वस्तः २। आश्वस्तः २। श्वसेः कर्त्तर्ययं विकल्पो भावेऽधिकरणे च नित्यमेवेट्। जपिवम्योर्नित्यमिट् निषेधः इत्य**न्ये**। जप्तः २। वान्त २। रुषित इति 'सहलुभ०' इति वेट्त्वाद्रुषेर्नित्यं निषेधे प्राप्ते वचनम्। संघुष्ट इति संघुष्टं संघुषितं वाक्यम्। संघुष्टौ संघुषितौ दम्यौ। संघुष्टवान् संघुषितवान् वाक्यम्। आस्वन् आस्वान्त आस्वनितश्चैत्रः संघुषास्वनिभ्यां परत्वादयमेव विकल्पः। तेनाविशब्देनापि संघुष्टा रज्जुः संघुषिता रज्जुः। मनस्यपि आस्वनितं मनः आस्वातं मन इति भवति। अभ्यसित इति व्याधितोऽभ्यमितोऽभ्यान्तो रोगीत्यर्थः। आन्त अमित इति **कौमुद्याम्** ॥ १०१ ॥

## आः खनिसनिजनः ॥ १०२ ॥ [ सि० ४।२।६० ]

**खातः २। सातः २। जातः २ ॥ १०२ ॥**

**आः** खनिसनिजन इति स्पष्टम्। प्राग् व्याख्यातम् ( पृष्ठ ७९९ ) ॥ १०२ ॥ सूत्रम्

## णौ दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञतम् ॥ १०३ ॥ [ सि० ४।४।७४ ]

**एते णौ क्तान्ता वा निपात्यन्ते। दान्तः २ दमितः २। शान्तः २ शमितः २। पूर्णः २ पूरितः २। दस्तः २ दासितः २। स्पष्टः २ स्पशितः २। छन्नः २ छादितः २। ज्ञप्तः २ ज्ञापितः २ ॥ १०३ ॥**

**'णौ०'** स्पष्टम्। आदिशब्दानुवृत्तेः **'अपचितः'** ( ४।४।७७ ) अपपूर्वस्य चायतेः क्तान्तस्येड्भावश्चिरादेशश्च वा निपात्यते अपचितः अपचायितः। 'नमस्यितो नमसितापचिता वश्चितोऽर्चितः

---

१ 'नवा भावारम्भे' ( ४।४।७२ ) इत्यस्य स्थाने।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्य**भिधानचिन्तामणौ**। चिनोतेः पूजार्थो नास्तीतीदं निपातनम्। **'हृषेः केशलोमविस्मयप्रतीघाते'** (४।४।७६) हृषेः केशादिष्वर्थेषु क्तयोरादिरिड्वा न स्यात्। हृष्टाः हृषिताः केशाः। हृष्टं हृषितं केशैः। हृष्टानि हृषितानि लोमानि। हृष्टं हृषितं लोमभिः। हृष्टो हृषितश्चैत्रो विस्मित इत्यर्थः। हृष्टा हृषिता दन्ताः प्रतिहता इत्यर्थः। व्याख्यातं चैदं प्राक्। 'अपाश्वतुष्पा०' (४।४।९५) इति (पृष्ठ ५९८) सूट् प्रक्रमे ॥ १०३ ॥ सूत्रम्

## सेट्क्तयोः ॥ १०४ ॥ [ सि० ४।३।८४ ]

**सेट्क्तयोः परयोर्णेर्लुक् स्यात्। कारितः २ । गणितः गणितवान्। 'स्फायः स्फी वा' (४।१।९४) स्फीतः २ स्फातः २ ॥ १०४ ॥**

**'से०'** अयमस्यार्थः। सेट्कयोः क्तयोः परतो णेर्लुक् स्यात्। कारित इति। एवं हारितः २। गणितः संज्ञपितः पशुः। सेडिति किमर्थम्। इटि कृते लोपो यथा स्यात्। शाकितः २। अन्यथेड् न स्यात् एकस्वरत्वात् 'एकस्वरादनुस्वारेत' इतीड्निषेधात्। नचैकस्वराद्विहिताभावादेवेड् निषेधो स न भविष्यतीति वाच्यम्। यतो विषय एव णिलोपापेक्षयेदं द्रष्टव्यम्। **'स्फा०'** अस्यायमर्थः। स्फायतेः क्तयोः परतः स्फी इत्ययमादेशो वा स्यात्। स्फीत इति। एवं संस्फीतः संस्फीतवान्। स्फातः स्फातवान्। संस्फातः २। क्तयोरित्येव। स्फातिः। विकल्पं नेच्छन्त्यन्ये। कथं स्फीतिरिति? उच्यते। स्फायतेस्स स्फीतः। स्फीत इवाचरिति कर्तुः क्विप् स्फीततीति 'स्वरेभ्य इः' ॥ १०४ ॥ सूत्रम्

## क्तयोरनुपसर्गस्य ॥ १०५ ॥ [ सि० ४।१।९२ ]

**अनुपसर्गस्य प्यायः क्तयोः पीः स्यात्। पीनम् २। पीनवन्मुखम्। अनुपसर्गस्येति किम्? प्रप्यानो मेघः ॥ १०५ ॥**

**'क्तयो०'** स्पष्टम्। अत्रायं विशेषः। **'आङोन्धूधसोः'** (४।१।९३) आङः उपसर्गात्परस्य प्यायतेरन्धौ ऊधसि चार्थे क्तयोः परतः पीरादेशः स्यात्। आपीनोऽन्धुः। आपीनमूधः। अन्धुर्व्रणमूधसो वा पर्यायः। आङ इति किम्? प्राप्यानोऽन्धुः। परिप्यानमूधः। अन्धूधसोरिति किम्? आप्यानश्चन्द्रः। आङ एवेति नियमात् प्राप्यानमूध इत्यत्राङन्तादुपसर्गान्न भवति। अनुपसर्गस्य तु पूर्वेण भवत्येव। पीनः पीनवानन्धुः। पीनं पीनवदूधः। **अन्ये** तु प्यायतेः केवलस्याङ्पूर्वस्य आङन्तोपसर्गपूर्वस्यैव प्रयोगमिच्छन्ति, नान्यपूर्वस्य। तन्मते प्रप्यानपरिप्यानादयोऽप्रयोगाः। आदिशब्दसंसर्गात् **'श्रः शृतं हविः क्षीरे'** (४।१।१००) श्रातेः श्रायतेश्च क्तप्रत्यये हविषि क्षीरे चाभिधेये शृभावो निपात्यते। शृतं हविः शृतं क्षीरं स्वयमेव। श्रातिश्रायती हि अकर्मकौ कर्मकर्तृविषयस्य पचेरर्थे वर्त्तेते। तयोश्चैतन्निपातनम्। हविः क्षीर इति किम्? श्राणा यवागूः। **श्रपेः प्रयोक्तैक्ये** (४।१।१०१) श्रातेः श्रायतेश्च ण्यन्तस्यैकस्मिन् प्रयोक्तरि क्ते परतो हविषि क्षीरे चाभिधेये शृभावो निपात्यते। श्राति श्रायति वा हविः स्वयमेव तच्चैत्रेण प्रायुज्यत शृतं हविश्चैत्रेण। यदा तु द्वितीयप्रयोक्तरि णिगुत्पद्यते तदा न भवति। श्रपितं हविश्चैत्रेण मैत्रेणेति। क्षीर इत्येव। श्रपिता यवागूः। **अन्ये** तु श्रपिं चुरादावदन्तं पठन्ति। तस्यैव श्रपेर्निपातनम्। प्रयोजकण्यन्तस्य त्वेकस्यापि प्रयोगं नेच्छन्ति। तन्मते कर्मकर्तृ हविः श्रातुं चैत्रः प्रयुक्तवानिति प्रयोजकव्यापारे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

णिगिति अपितं हविश्चैत्रेणेत्येत्येव भवति । अपरे तु सकर्मकावपि श्रातिश्रयती इच्छन्ति, तन्मते तयोः सकर्मकयोरप्यण्यन्तयोर्निपातनं भवति । शृतं हविश्चैत्रेण । ण्यन्तयोस्तु न भवत्येव; श्रपितं हविः चैत्रेण मैत्रेणेति ॥ १०५ ॥ सूत्रम्

## प्राद्दागस्त आरम्भे क्ते ॥ १०६ ॥ [ सि० ४।४।७ ]

**आरम्भार्थस्य प्रपूर्वस्य दागः क्ते परे त्त वा स्यात् । प्रदातुमारब्धः प्रत्तः । पक्षे दत् आदेशः । प्रदत्तः ॥ १०६ ॥**

**'प्राद्दा०'** आरम्भे आदिकर्मणि वर्त्तमानस्य प्रशब्दादुत्तरस्य दागः स्थाने क्ते परे त्त इत्यादेशो वा स्यात् । प्रत्तः । पक्षे इति विकल्पपक्षे सूत्रम् **'दत्'** ( ४।४।१० ) अस्यायमर्थः । धावर्जितस्य दासंज्ञकस्य तादौ किति परे दत् इत्ययमादेशः स्यात् । दत्तः दत्तवान् दत्तिः दत्त्वा । द्यतेः परत्वादित्वं दितः दितवान् । द इत्येव । दातं बर्हिः अवदातं मुखम् । अध इत्येव । धीतः धीतवान् धीत्वा धीतिः । एवं चानेन सूत्रेण आरम्भे क्तेऽपि दत् आदेशे प्रदत्त इति । तथा चाह औत्सर्गिको दत्त्यादिति । प्रदत्तः दातुमारब्धवानित्यर्थः । प्रादिति किम् ? परीत्तं उत्तरेण नित्यं त्तादेशः । दाग इति किम ? दाँच् प्रत्तम् । आरम्भ इति किम् ? अन्यत्र नित्यमेव । प्रकर्षेण दीयते स्म प्रत्तम् । क्त इति किम् ? प्रत्तवान् दातुं प्रवृत्त इत्यर्थः । द्वितकार आदेशः सर्वादेशार्थः । अकार उच्चारणार्थः ॥ १०६ ॥ सूत्रम्

## निविस्वन्ववात् ॥ १०७ ॥ [ सि० ४।४।८ ]

**एभ्यो दागः क्ते त्तो वा स्यात् ॥ १०७ ॥**

**'निवि०'** एभ्य इत्यादि स्पष्टम् ॥ १०७ ॥ अत्रोपयोगिसूत्रम्

## दस्ति ॥ १०८ ॥ [ सि० ३।२।८८ ]

**दो यस्तादिरादेशस्तस्मिन् परे नाम्यन्तस्योपसर्गस्य दीर्घः स्यात् । नीत्तं २ निदत्तम् २ । वीत्तम् विदत्तम् । सूत्तं सुदत्तम् । अनूत्तं अनुदत्तम् । अवत्तं अवदत्तम् ॥ १०८ ॥**

**'दस्ति'** दो यस्तादिरिति । दा इत्येतस्य यस्तकारादिरादेशस्तस्मिन् परे नाम्यन्तस्योपसर्गस्य दीर्घः स्यात् । नीत्तं निदत्तमित्यादि स्पष्टम् । एवं नीत्तवान् निदत्तवान् । वीत्तवान् २ । सूत्तवान् २ । अनूत्तवान् २ अवत्तवान् २ । परीत्तं परीत्तवान् । परीत्रिमं प्रणीत्रिमम् । द इति इति किम् ? वितीर्णम् । तीति किम् ? सुदत्तम् । नामिन इत्येव प्रत्तमवत्तम् ॥ १०८ ॥ सूत्रम्

## स्वरादुपसर्गाद्दस्ति कित्यधः ॥ १०९ ॥ [ सि० ४।४।९ ]

**स्वरान्तादुपसर्गात्परस्य धावर्जस्य दासंज्ञकस्य तादौ किति त् नित्यं स्यात् । प्रत्तः ॥ १०९ ॥**

**'स्वरा०'** प्रत्त इति । एवं प्रत्तवान् । अवपरीत्तः २ । परीत्रिमम् । प्रणीत्रिमम् त्रिमक् । द्यतेरपीत्वं बाधित्वा उपसर्गादिति विशेषविधानात् त्तत्वमेव भवति । अत एव विशेषविधानादुत्तरत्र 'दत्' ( ४।४।१० ) इति सूत्रे सामान्यम् । अवत्तः अवत्तवान् अवत्तिः । उपसर्गादिति किम् ? दधि दत्तम् । स्वरादिति किम् ? निर्दत्तम् दुर्दत्तम् । निर्दितम् । दुर्दितम् । द इति किम् ? प्रदाता व्रीहयः । निदातानि भाजनानि । कितीति किम् ? प्रदाता । तीति किम् ? प्रदाय । अध इति किम् ? धांगू निहितः । दूर्धे निधीतः ॥ १०९ ॥ सूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## दत् ॥ ११० ॥ [ सि० ४।४।१० ]

**अधो दासंज्ञस्य तादौ किति दत् स्यात् । दत्तः ( पृष्ठे व्याख्यातम् ) ॥ ११० ॥**

## दोसोमास्थ इः ॥ १११ ॥ [ सि० ४।४।११ ]

**एषां तादौ किति इः स्यात् । निर्दितः २ । सितः २ । मितः २ । स्थितः २ ॥ १११ ॥**

**'दोसो०'** अस्यायमर्थः । एषां तादौ किति इरन्तादेशः स्यात् । द्यतेर्दद्भावस्य शेषाणां 'ईर्व्यञ्जनेऽयपी'ति ईत्वस्यापवादः । दो निर्दितः २ । दित्वा दितिः । सो अवसितः २ । सित्वा सितिः । मितः २ मित्वा मितिः । गामादाग्रहणेष्वविशेष इति माङ्मेङोर्ग्रहणम् । अन्यस्तु माङ्मेङोरेवेच्छति । मातेस्तु मातो मातवान् प्रस्थः स्थाल्याम् । स्था स्थितः २ स्थित्वा स्थितिः । दोसो इत्योकारनिर्देशो दैवादिकयोरेव परिग्रहार्थः । तीत्येव यङ्लुपि इट् दादितः २ । 'इडेत्पुसी'त्यातो लुक् । कितीत्येव । अवदाता अवसाता ॥ १११ ॥ सूत्रम्

## छाशोर्वा ॥ ११२ ॥ [ सि० ४।४।१२ ]

**छो शो इत्येतयोस्तादौ किति प्रत्यये इः स्यात् । अवच्छितः अवच्छातः । निशितः निशातः ॥ ११२ ॥**

**'छा०'** छो शो इत्येतयोस्तादौ किति प्रत्यये इः स्यात् । अवच्छितः इत्यादि स्पष्टम् । अत्रायं विशेषः **'शो व्रते'** ( ४।४।१३ ) श्यतेः क्तप्रत्यये व्रतविषये प्रयोगे नित्यमित्वं स्यात् । संशितं व्रतम् । असिधारातीक्ष्णमित्यर्थः । संशितव्रतः साधुः । संशितः साधुः व्रते यत्नवानित्यर्थः । **ननु** व्रते इत्वं प्रत्यपादि इत्युक्तार्थत्वात् व्रतस्याप्रयोगः प्राप्नोति । **मैवम्** । संशितशब्दोऽन्यत्राप्यस्तीति व्रतमिति विशेषणम् । ततो व्रतः व्रतस्योक्तार्थत्वम् । नित्यार्थं वचनम् । ततो व्रतविषये संशात इति न भवति । व्रत इति किम् ? निशातः ॥ ११२ ॥ सूत्रम्

## धागः ॥ ११३ ॥ [ सि० ४।४।१५ ]

**तादौ किति हिः स्यात् । विहितः २ । पिहितः २ ॥ ११३ ॥**

**'धा०'** तादौ कितीत्यादि । अयं भावः । दधातेस्तादौ कितिप्रत्यये हिरादेशो भवति । विहित इति । एवं हित्वा हितिः । गकारः द्र्धेनिवृत्त्यर्थः । धीतः २ । धीत्वा धीतिः । तीत्येव प्रधाय । यङ्लुपि इट् दाधितः २ । दाधित्वा । **केचित्तु** दोसोहाकुधागां यङ्लुपि 'आगमशासनमनित्यम्' इति न्यायादिटं नेच्छन्ति, इत्वहित्वविधिं च निषेधन्ति । तन्मते दत्तः दत्तवान् । परमात्रस्यैव दद्भाव इति **मते** निर्दादत्तः २ । अवसासीतः २ । जाहातः २ । दाधीतः २ । इत्येव भवति ॥ ११३ ॥ अत्रोपयोगिसूत्रम्

## वाऽवाप्योस्तनिक्रीधाग्नहोर्वपी ॥ ११४ ॥ [ सि० ३।२।१५६ ]

**अवस्योपसर्गस्य तनिक्रीणात्योः परयोरपिशब्दस्य धाग्नहोः परयोर्यथासङ्ख्यं वपी इत्यादेशौ वा स्याताम् । अवतंस वतंसः । अवक्रयः वक्रयः । अपिधानं पिधानम् । अपिनद्धम् पिनद्धम् ॥ ११४ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'वाऽवा०'** अवस्येति । अवशब्दस्योपसर्गस्य तनिक्रीणात्योः परयोरपिशब्दस्य धाञ्नहोः परयोर्यथासङ्ख्यं व पि इत्यादेशौ वा स्याताम् । वतंस इत्यादि स्पष्टम् । एवं पिधानम् अपिधानम् । पिदधाति अपिदधाति । पिनद्धं अपिनद्धम् । धातुनियमं नेच्छन्त्येके । **तथाहुः** 'वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः । आपं चैव हसा(ल ?)न्तानां यथा वाचा निशा दिशा' ॥ १ ॥ ॥ ११४ ॥ सूत्रम्

## यपि चादो जग्ध् ॥ ११५ ॥ [ सि० ४।४।१६ ]

**तादौ किति यपि चादो जग्ध् स्यात् । जग्धः २ । यजादिवचेरिति य्वृति, इष्टं उप्तं ऊढं उक्तं उषितं आहूतः ऊतः सुप्तः ॥ ११५ ॥**

**'यपि०'** तादौ कितीत्यादि व्यक्तम् । जग्ध इति । एवं जग्ध्वा जग्धिः । प्रजग्ध्य । यपि चेति किम् ? अदनम् । तीत्येव । अद्यात् । कितीत्येव । अतव्यम् । **कथमन्नं ? अनितेरौणादिको नः ।** 'अदोऽनन्नात्' (५।१।१५०) इति ज्ञापकाद्वा अद्यते तदित्यन्नम् । एकपदाश्रयत्वेनान्तरङ्गत्वाद्यबादेशात्प्रागेव जग्धादेशे सिद्धे यप्ग्रहणमन्तरङ्गानपि विधीन् यबादेशो बाधते इति ज्ञापनार्थं तेन प्रशम्य प्रपृच्छ्य प्रदीव्य प्रखन्य प्रस्थाय प्रपाय प्रदाय प्रधाय प्रपठ्येत्यादौ । दीर्घत्वं शत्वमूत्वमात्वमीत्वं हित्वमिद्त्वं यपा बाध्यते । तथोक्तम् 'तादौ किति जग्धि सिद्धे यपि चेति यदुच्यते । ज्ञापयत्यन्तरङ्गाणां यथा भवति बाधनम्' । 'यजादिवचेः' इत्यादि स्पष्टम् ॥ ११५ ॥

**॥ इति क्तक्तवतुप्रकरणम् ॥**

अथ भूतकाल एव विहितौ क्वसुकानप्रत्ययौ निरूपयितुमाह । सूत्रम्

## तत्र क्वसुकानौ तद्वत् ॥ ११६ ॥ [ सि० ५।२।२ ]

**परोक्षायां विषये धातोः क्वसुकानौ स्याताम् । तौ च परोक्षावत् । चकृवान् चक्राणः ॥११६॥**

**'तत्र क्वसु०'** तत्रेति परोक्षामात्रविषये । तौ च परोक्षावदिति परोक्षावद्व्यपदिश्येते । तत्र क्वसुः परस्मैपदत्वात्कर्त्तरि । कानस्त्वात्मनेपदत्वात् भावकर्मणोरपि । शुश्रुवान् सेदिवान् उपसेदिवान् प्रसेदिवान् आसेदिवान् ऊषिवान् अनूषिवान् अध्यूषिवान् पेचिवान् । पाचयाञ्चकृवान् पपिवान् पेचानः चक्राणः । परोक्षावद्भावाद्द्विर्वचनादि । परोक्षावद्भावादेव कित्त्वे सिद्धे कित्करणं संयोगान्तधात्वर्थं तेन आजिवान् बभज्वान् सस्वजानः । एषु कित्त्वान्नलोपः । अन्यथा 'इन्ध्यसंयोगात्०' इत्यसंयोगान्तादेव कित्त्वेऽत्र लोपो न स्यात् । ऋदन्तानां 'स्कृच्छ्रतोऽकि परोक्षायाम्' (४।३।८) इति प्राप्तगुणप्रतिषेधार्थं च । शिशीर्वान् । तितीर्वान् पुपूर्वान् कर्मणि शिशिराणः तितिराणः । भावे शिशिराणं । बहुलाधिकारात् श्रुसदवसिभ्यः कानो न भवति । **केचित्तु** एभ्य एव क्वसुकानेभ्यः, (?) कानस्तु प्रत्यय एव नेष्यत इत्याहुः । **अपरे** तु सर्वधातुभ्यः क्वसुमेवेच्छन्ति न कानम् । **कौमुद्यां** तु इह भूतसामान्ये छन्दसि लिट् । तस्य विधीयमानौ क्वसुकानवावपि छन्दसाविति **त्रिमुनिमतं कवयस्तु** बहुलं प्रयुञ्जते । 'तं तस्थिवांसं नगरोपकण्ठे श्रेयांसि सर्वाण्यधिजग्मुषस्ते' इत्यादि इत्युक्तमिति । भूताधिकारेणैवोक्तपरोक्षाविषयत्वे लब्धे तत्रग्रहणं परोक्षामात्रप्रतिपत्त्यर्थम् । तेन पपाचेति वक्तव्ये पेचिवान् इत्यादि सिद्धम् । अन्यथा भूताधिकारेऽनुवर्त्तमानेऽपरोक्ष एवातीते स्यात्, परोक्षे तु परोक्षा स्यादिति ।

अत्रायं विशेषः । **'वेयिवदनाश्वनूचानम्'** (५।२।३) एते शब्दा भूतेऽर्थे क्वसुकानान्ताः ३३



Jain Education International For Personal & Private Use Only www.jainelibrary.org

कर्त्तरि वा निपात्यन्ते । इणः क्वसुर्निपात्यते । ईयिवान् समीयिवान् उपेयिवान् । तथान्यत्पूर्वादश्नातेः क्वसुरिडभावश्च निपात्यते अनाश्वान् । 'घृतं जयमतेरनाशुष' इति **भारविः** । तथा वचेर्ब्रूगादेशाद्वा अनुपूर्वात् कानो निपात्यते । अनूचानः अनुवचनं कृतवानित्यर्थः । निपातनस्येष्टविषयत्वात् कर्तुरन्यत्र अनुक्तमित्याद्येव भवति । ब्रूग एवेच्छन्त्यन्ये । वावचनात् पक्षेऽद्यतन्यादयोऽपि अगात् उपैत् उपेयाय नाशीत् नाश्नात् नाश अन्ववोचत् अन्ववक् अन्वब्रवीत् अनूवाच । यत्तु 'उपेयिवाननाश्वाननूचानश्चे'ति **पाणिनीयसूत्रम्** । तत्र उपेत्य विवक्षितमिति **कौमुद्याम्** । किञ्च '**श्रुसदवसभ्यः परोक्षा वा**' (५।२।१) भूते इत्यनुवर्त्तते । एभ्यो भूतार्थवृत्तिभ्यः परोक्षा वा स्यात् । उपशुश्राव उपससाद अनूवास । वावचनात् यथा स्वकालमद्यतनी ह्यस्तनी च । उपाश्रौषीत् उपाशृणोत् । उपासीदत् उपासदत् । अन्ववात्सीत् अन्ववसत् । एवं शुश्रुवे अश्रावि । अश्रूयतेत्यादि । **अन्ये** तु श्वादिभ्यो भूतमात्रे क्वसुमेवेच्छन्ति न परोक्षाम् । तथोक्तं **कौमुद्याम्**—भाषायां सदवसश्रुवः सदादिभ्यो भूतसामान्ये लिड् वा स्यात् । तस्य च नित्यं क्वसुः । 'निषेदुषीमासनबन्धधीरः अध्यूषुषस्तामभवन् जनस्य' । शुश्रुवान् । ह्यस्तनीमपीच्छत्यन्यः । बहुवचनं व्याप्त्यर्थम् । तेन भूतानद्यतनेऽपीयं ह्यस्तन्या न बाध्यते । असरूपत्वादेवाद्यतन्या वावचनम् । विभक्तिष्वसरूपोत्सर्गविभक्तिसमावेशनिषेधार्थम् ॥ ११६ ॥ अत्रोपयोगिसूत्रम्

## घसेकस्वरातः क्वसोः ॥ ११७ ॥ [ सि० ४।४।८२ ]

**घसेरेकस्वरादादन्ताच्च धातोः परस्य क्वसोरिट् स्यात् । जक्षिवान् । आदिवान् । ययिवान् । पेचिवान् । पेचानः ॥ ११७ ॥**

**'घसे०'** आदिवानिति । एवमाशिवान् । द्वित्वदीर्घत्वयोः कृतयोः एकस्वरत्वं ऊचिवान् । एत्वे दीर्घत्वे चैकस्वरत्वं पेचिवानिति । एवं शेकिवान् उपसेदिवान् । इणोऽर्तेश्च द्विर्वचने कृतेऽपि समानदीर्घत्वे रादेशे च सत्येकस्वरसद्भावादिड्नित्य इति पूर्वमेव भवति । तेन ईयिवान् समीयिवान् आरिवान् । आत् पपिवान् तस्थिवान् जग्लिवान् । घसेकस्वरात इति किम् ? विभिद्वान् चिच्छिद्वान् । बभूवान् उपशुश्रुवान् । नित्यत्वाद्द्वित्वे कृतेऽनेकस्वरत्वम् । विहितविशेषणं चात्र नाश्रीयते । क्वसोरिति किम् ? बिभिदिव बिभिदिम । वमयोर्नियमो न भवति । घस्याद्ग्रहणमनेकस्वरार्थम् । ज्ञापनार्थम् इटि सत्याकारलोप उपान्त्यलोपश्च भवति । दरिद्रातेस्त्वामा भवितव्यम् । दरिद्राञ्चकवान् । 'स्क्रसृवृभृस्तुद्रुश्रुस्रोर्व्यञ्जनादेः परोक्षाया' इति इटि सिद्धे नियमार्थं वचनम् । एभ्य एव क्वसोरादिरिट् नान्येभ्य इति ॥ ११७ ॥ अत्र विशेषमाह

## गमहनविद्लृविशदृशो वा ॥ ११८ ॥ [ सि० ४।४।८३ ]

**एषां पञ्चानां क्वसोरिड्वा स्यात् । जग्मिवान् । जगन्वान् । जघ्निवान् जघन्वान् । विविदिवान् विविद्वान् । विविशिवान् विविश्वान् । ददृशिवान् ददृश्वान् ॥ ११८ ॥**

**'गम०'** लृकारो लाभार्थस्य विदेर्ग्रहणार्थः । तेन ज्ञानार्थस्य विविद्वानित्येव भवति । सत्ताविचारणार्थयोस्त्वात्मनेपदित्वात् क्वसुर्नास्त्येव ॥ ११८ ॥

अथ वर्त्तमानकाले प्रत्ययानाह

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## शत्रानशावेष्यति तु सस्यौ ॥ ११९ ॥ [ सि० ५।२।२० ]

**वर्त्तमाने धातोः शत्रानशौ स्याताम् । भविष्यत्काले तु तौ सस्यौ । यान् । शयानः । यास्यन् ॥ ११९ ॥**

'**शत्रा०**' भविष्यत्काले त्विति एष्यन्मात्रे भविष्यन्तीति विषयेऽर्थे, सस्यौ स्यप्रत्ययसहितौ, शत्रानशौ भवतः । स्योऽपि प्रत्ययत्वाद्धातोरेव । यान् यान्तौ यान्तः । शयानौ शयानः । कुर्वन् कुर्वाणः । एकविषयत्वाद्वर्त्तमानापि याति यातः यान्ति । एवं सर्वत्र । तथा सन् सन्ति । अधीयानः अधीते । विद्यमानः विद्यते । जुह्वत् जुहोति । विदन् वेत्ति । जानन् जानाति । तथा तरादौ प्रत्यये, पचत्तरः पचत्तमः । पचतितरां पचद्रूपः पचतिरूपम् । जल्पत्कल्पः जल्पतिकल्पं । पश्यद्देश्यः पश्यतिदेश्यम् । पठद्देश्यः पठतिदेशीयम् । एवं पचमानतरः पचमानतमः पचतेतरामित्यादि । द्वितीयाद्यन्तसामानाधिकरण्यसम्बोधनतरादिवर्जिततद्धितप्रत्ययोत्तरपदक्रियालक्षणहेतुषु एषु षट्सु वर्त्तमानाया अन्वयायोगाच्छत्रानशावेव । पचन्तं पचमानं पश्य । पचता पचमानेन कृतम् । पचते पचमानाय देहि । पचतः पचमानाद्भीतः । पचतः पचमानस्य स्वम् । पचति पचमाने गतः । सम्बोधने हे पचन् हे पचमान । तराद्यन्यतद्धिते कुर्वतोऽपत्यं कौर्वतः पाचतः वैक्ष्यमाणिः कुर्वत्पाश्यः । कुर्वच्चरः । उत्तरपदे, भज्यत इति भक्तिः । कुर्वन् भक्तिरस्य कुर्वद्भक्तिः कुर्वाणभक्तिः । क्रियाया लक्षणं ज्ञापकम् । तत्र तिष्ठन्तो गणका अनुशासति, अनुशासनक्रियया गणका लक्ष्यन्ते । सा चानुशासनक्रिया उपविष्टे गच्छति चेत्युभयविषयत्वेन दुर्लक्षा । अतः स्थानक्रियया लक्ष्यते । ननु अनुशासतीत्यत्रापि वर्त्तमाना न प्राप्नोति यतोऽनयापि गणका लक्ष्यन्ते । नैवम् । क्रियालक्ष्यक्रियायां वर्त्तमाना न स्यात् । गणकादिद्रव्यलक्षकक्रियायां भवत्येव । यथा 'शयानां भुञ्जते यवनाः' । बहुषु मूत्रयत्सु कश्चैत्र इति पृष्टः कश्चिदाह यस्तिष्ठन्मूत्रयति । एवं यो गच्छन् भक्षयति, शयानो भुङ्क्ते, योऽधीयान आस्ते, तथा पठन् पिबति, स मैत्रः । एवं यः पचन् पठति । योऽधीयान आस्ते, य आसीनोऽधीते, तथा फलन्ती वर्द्धते द्राक्षा, पुष्यन्ती वर्द्धतेऽब्जिनी । शयाना वर्द्धते दूर्वा आसीनं वर्द्धते बिसम् । क्रियाया हेतुर्जनकस्तत्र जनयन् वसति । अधीयानो वसति । **भविष्यति** तु सस्यौ । यास्यन् इति । एवं शयिष्यमाणः । पक्ष्यन् पक्ष्यमाणः । यास्यति शयिष्यते पक्ष्यते भविष्यन् इति । अध्येष्यमाणः अध्येष्यते इत्यादि । पक्ष्यत्तरः पक्ष्यमाणतमः । पक्ष्यतितमामित्यादि सर्वेष्वेकविषयत्वात् भविष्यन्त्यपि । पक्ष्यन् व्रजति । पक्ष्यमाणो व्रजतीति क्रियायां क्रियार्थायां एकविषयत्वाच्च भविष्यन्त्यादयोपि । पक्ष्यामीति व्रजति । पाचको व्रजति । पक्तुं व्रजति । पूर्ववदेव द्वितीयाद्यन्तसमानाधिकरण्यादिषु भविष्यन्त्याः समन्वयाभावाद्भावः । पक्ष्यन्तं पश्य । पक्ष्यमाणं पश्य । हे पक्ष्यन् हे पक्ष्यमाण ब्राह्मण । पाक्ष्यतः पाक्ष्यमाणिः पक्ष्यमाणपाशः पक्ष्यद्भक्तिः पक्ष्यमाणप्रियः । जल्पिष्यन्तो ज्ञास्यन्ते पण्डिताः । अध्येष्यमाणा वेत्स्यन्तीत्यादि । सदेष्यतोरभावे तु श्वः पक्ता । बहुलाधिकारात् द्रव्यगुणयोर्लक्षणे हेतुमद्भावद्योतके त्यादियोगे च न भवति । यो कम्पते सोऽश्वत्थः । यत्तरति तल्लघु । हन्तीति पलायते । वर्षतीति धावति । करिष्यतीति व्रजति । हनिष्यतीति नश्यति । पचत्यतो लभते विजयतेऽतः पूज्यते । क्रियाया अपि लक्षणे [ न केवलं द्रव्यगुणयोर्लक्षणे ] चादियोगे न भवति । यः पचति च पठति च स चैत्रः । योऽधीते चास्ते च स चैत्रः । शकारः शित्कार्यार्थः । ऋकारो ङ्यावर्थः ॥ ११९ ॥ अत्रोपयोगि सूत्रम् ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अतो म आने ॥ १२० ॥ [ सि० ४।४।११४ ]

**धातोर्विहिते आनेऽतो मोऽन्तः स्यात् । पचमानः शयिष्यमाणः । 'आसीनः' (४।४।११५) निपातोऽयम् ॥ १२० ॥**

'**अतो०**' पचमान इति । आम इति निरनुबन्धग्रहणात् शानेपि कवचमुद्वहमानः । अत इति किम् ? भुञ्जानः । आन इति किम् ? पचन् । पूर्वान्तकरणं ( मोऽन्तकरणं ? ) 'मन्यस्याः' इत्याकार-निवृत्त्यर्थम् । सूत्रम् '**आसीनः**' ( ४।४।११५ ) आस्तेः परस्य नस्यादेरीकारो निपात्यते । आसीन इति । एवं उदासीनः ॥ १२० ॥ **स्त्रीक्लिबयोः कार्यविशेषमाह** । सूत्रम् ।

## अवर्णान्तादश्नोऽन्तो वाऽतुरीड्योः ॥ १२१ ॥ [ सि० २।१।११५ ]

**श्नावर्जादवर्णात्परस्य अतुरीङ्योः परयोरन्त वा स्यात् । तुदती तुदन्ती । भाती भान्ती । 'श्यशवश्च' ( ५।२।१६ ) नित्यम् । दीव्यन्ती पचन्ती ॥ १२१ ॥**

'**अव०**' अतुरिति । शतृ अतृच् अतृ इत्येषां ग्रहणम् । ईङ्योरित्यत्र नपुंसकलिङ्गे 'औरीः' इति विहित ईः, ङी स्त्रीप्रत्ययः । तथा चोदाहृतिः । तुदती तुदन्ती कुले स्त्री वा । अवर्णादित्युक्तत्वादा-कारादपि भान्ती भाती कुले स्त्री वा । एवं करिष्यन्ती करिष्यती । कुले स्त्री वा । अवर्णादिति किम् ? अन्येभ्यः अतुरन्तस्यापि न स्यात् अदती । एवं सुन्वती तन्वती कुले स्त्री वा एषु शतृः । अधीयती कुले स्त्री वा अत्रातृश । जरती कुले स्त्री वा अत्रातृः । (अश्न इति किम् ? क्रीणती स्त्री लुनती स्त्री कुले वा ) ईङ्योरिति किम् ? तुदता कुलेन । अवर्णादिति विशेषणादश्न इति प्रतिषेधाच्च लोपदीर्घाभ्यां पूर्वमेवानेनान्त् । भूतपूर्वतया वा पश्चात् । ददती कुले स्त्री वा इत्यत्र तु कृतेप्यन्तादेशे 'अन्तो नो लुक्' इति नलोपः । अत्र विशेषसूत्रम् '**श्यशवः**' ( २।१।११६ ) अस्यायमर्थः । श्यात् शवश्च परस्यातुरीङ्यो परतः अन्त् इत्यादेशो नित्यं स्यात् । दीव्यन्ती पचन्ती इति । एवं चोरयन्ती धारयन्ती शास्त्रम् स्त्री कुले वा । श्यशव इति किम् ? जरती कुले स्त्री वा । ईङ्योरित्येव । दीव्यता सीव्यता भवता ॥ १२१ ॥ अत्र विशेषसूत्रम्

## तौ माङ्याक्रोशेषु ॥ १२२ ॥ [ सि० ५।२।२१ ]

**माङ्युपपदे आक्रोशे गम्ये तौ शत्रानशौ स्याताम् । मा पचन् जाल्मो ज्ञास्यति । मा पच-मानः । 'वा वेत्तेः क्वसुः' ( ५।२।२२ ) वर्त्तमाने तत्त्वं विद्वान् विदन् ॥ १२२ ॥**

'**तौ मा०**' बहुवचनादसत्यपि । ये केचित् सत्यसति वा आक्रोशास्तेषु शत्रानशौ भवत इति भावः । मापचमानोऽसौ मर्तुकामः । 'माजीवन् यः परावज्ञादुःखदग्धोपि जीवति' । शत्रानशोरनुवृत्तावपि तौग्रहणमवधारणार्थम्; तेनात्र विषये असरूपविधिनाप्यद्यतनी न भवति । भवतीत्यपि **कश्चित्** । सूत्रम् '**वा वेत्तेः क्वसुः**' वर्त्तमाने इति सत्यर्थे वर्त्तमानाद्वेत्तेः क्वसुर्वा स्यात् । पक्षे यथाप्राप्तम् । विद्वान् साधुः । तत्त्वं विद्वान् विदन् वेत्ति । विदुषा कृतम् । विदता कृतम् । हे विद्वन् हे विदन् ।

---

१ ननु तुदन्ती भान्ती इत्यादौ ईङ्योरनपेक्षत्वेन वर्णमात्राश्रयत्वेन चान्तरङ्गत्वात् 'लुगस्यादेत्यपदे' इति 'समानानां' इति च अकारलोपदीर्घत्वयोः कृतयोरवर्णात्परत्वं शतृप्रत्ययस्य नास्ति; तत्कथमकारावर्णशतृप्रत्ययङीभावापेक्षत्वेन बहिरङ्गोऽन्त इत्यादेशः इत्याह—अवर्णादिति । २ 'वार्णात्प्राकृतम् बलीय' इति तु नेहोपतिष्ठते भिन्नकालत्वात्, तथाहि—ईङ्योः सद्भावेऽन्तादेशः प्राप्नोति, लोपदीर्घौ तु ततः प्रागेव । यत्र हि वार्णप्राकृतयोर्युगपत्प्राप्तिः कारक इत्यादौ तत्रेदमुपतिष्ठते इति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वैदुषः वैदतः । विद्वद्भक्तिः । विद्वानास्ते । विदन्नास्ते । विद्वल्ँलभते विदल्ँलभते । द्वितीयाद्यन्तपदसामानाधिकरण्यादिषु पूर्ववदनन्वयादेव न वर्त्तमाना । ककारः कित्कार्यार्थः । उकारो ङ्याद्यर्थः । आदिशब्दादनुवृत्तेः 'पूङ्यजः शानः' (५।२।२३) सत्यर्थे वर्त्तमानाभ्यामाभ्यां कर्त्तरि शानः स्यात् । पवते पवमानः मलयं पवमानः । यजति यजते वा यजमानः । आनशा न षष्ठीसमासो न च यजेरफलवति कर्त्तरि सोऽस्तीति वचनम् । एवमुत्तरत्रापि । शकारः शित्कार्यार्थः ॥१२२॥ सूत्रम्

## वयःशक्तिशीले ॥ १२३ ॥ [ सि० ५।२।२४ ]

**एषु गम्येषु सत्यर्थे वर्त्तमानाद्धातोः शानः स्यात् । वयः, कतीह शिखण्डं वहमानाः । शक्तिः, कतीह स्त्रियं गच्छमानाः । शीलम्, कतीह परान् निन्दमानाः ॥ १२३ ॥**

**'वयः०'** सत्यर्थे वर्त्तमानाद्धातोरेषु गम्येषु शानः स्यात् । क्रमेणोदाहरणानि—तत्र कालकृता प्राणिनां बाल्याद्यवस्था वयः; कतीह शिखण्डं वहमानाः । शक्तिः सामर्थ्यम्; कतीह हस्तिनं निघ्नानाः । शीलं स्वभावः; कतीहात्मानं वर्णयमानाः परान्निन्दमानाः । अभिधानाश्रयासरूपः शतृः ॥ १२३ ॥ सूत्रम् ।

## धारीङोऽकृच्छ्रेऽतृश् ॥ १२४ ॥ [ सि० ५।२।२५ ]

**सुखसाध्येऽर्थे वर्त्तमानयोरनयोरतृश् स्यात् । धारयन्नाचारागमम् । अधीयंस्तत्त्वार्थम् ॥ १२४ ॥**

**'धारीङो०'** अनयोरिति । अकृच्छ्रे सत्यर्थे वर्त्तमानाद्धारेरिङश्च परोऽतृश् स्यात् । अकृच्छ्रे इति किम् ? कृच्छ्रेणाधीते पूर्वगतम् । ईङ् आनशि प्राप्ते धारेरुभयप्राप्तौ वचनम् । आदिशब्दात् **'सुग्द्विषार्हः सत्रिशत्रुस्तुत्ये'** ( ५।२।२६ ) सत्यर्थे वर्त्तमानात्सुनोतेर्द्विषोऽर्हश्च यथासङ्ख्यं सत्रिणि शत्रौ स्तुत्ये च कर्त्तर्यतृश् स्यात् । सत्री यजमानः । सर्वे सुन्वन्तः यज्ञस्वामिन इत्यर्थः । चौरं चौरस्य वा द्विषन् शत्रुरित्यर्थः । पूजामर्हन् प्रशस्य इत्यर्थः । एष्विति किम् ? सुरां सुनोति, भार्यां द्वेष्टि परं पश्यन्तीम्, वधमर्हति चौरः ॥ १२४ ॥ सूत्रम्

## तृन् शीलधर्मसाधुषु ॥ १२५ ॥ [ सि० ५।२।२७ ]

**शीलादिषु सदर्थाद्धातोस्तृन् स्यात् । कर्ता कटं । शीलादिसदर्थोऽधिकारसमाप्तिं यावदनुवर्त्तते ॥ १२५ ॥**

**'तृन्०'** शीलादिष्विति शीले धर्मे साधौ च सत्यर्थे वर्त्तमानाद्धातोस्तृन् स्यात् । कर्त्ता कटं । एवं वदिता जनापवादान् । 'तृन्नुदन्ते'ति षष्ठीनिषेधात्कर्मणि द्वितीया । करणं वदनं चास्य शीलमित्यर्थः । धर्मः कुलाद्याचारः । वधुमूढां मण्डयितारः श्राविष्ठायनाः । श्रविष्ठाया अपत्यानि वृद्धानि 'अश्वादेरायनञ्' ( ६।१।४९ ) । श्राद्धे सिद्धमन्नमपहर्त्तार आह्वरकाः । मुण्डनादि तेषां कुलधर्म इत्यर्थः । साधौ, गन्ता खेलः । कर्त्ता विकटः । साधु गच्छति साधु करोति इत्यर्थः । नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृशब्दा औणादिकाः पितृमात्रादिवत् । अत एवैषामाविधौ पृथगुपादानम् । शीलादिष्विति किम् ? कर्त्ता कटस्य । बहुवचनं 'सन्भिक्षाशंसेरुः' इत्यादौ यथासङ्ख्यपरिहारार्थम् । नकारः सामान्यग्रहणाविघातार्थस्तेन 'निरनुबन्धग्रहणे न सानुबन्धस्य' इति न्यायो नोपतिष्ठते । निरनुबन्धग्रहणे सामान्येन ग्रहणं इति चोपतिष्ठते । ततश्च तृ इत्युक्ते तृच् तृनादीनां सर्वेषां सामान्येन ग्रहणं स्यात् ॥ १२५ ॥ सूत्रम्

## भ्राज्यलंकृग्निराकृग्भूसहिरुचिवृति-
## वृधिचरिप्रजनापत्रप इष्णुः ॥ १२६ ॥ [ सि० ५।२।२८ ]

एभ्य एकादशभ्य इष्णुः स्यात् । भ्राजते इत्येवंशीलो भ्राजिष्णुः । अलंकरिष्णुः । निराकरिष्णुः । भविष्णुः । सहिष्णुः । रोचिष्णुः । वर्तिष्णुः । वर्धिष्णुः । चरिष्णुः । प्रजनिष्णुः । अपत्रपिष्णुः ॥ १२६ ॥

'**भ्राज्य०**' भ्राजिष्णुरिति । भ्राजनशीलो भ्राजनधर्मा साधु भ्राजते वा भ्राजिष्णुः । एवं सर्वत्र अलंपूर्वः कृग् । अलंकरिष्णुः । निर् आङ् पूर्वः कृग् निराकरिष्णुः । प्रपूर्वो जनिः प्रजनिष्णुः । अपपूर्वः त्रपिः अपत्रपिष्णुः । भ्राजेर्नेच्छन्त्येके ॥ १२६ ॥

## उदः पचिपतिपदिमदेः ॥ १२७ ॥ [ सि० ५।२।२९ ]

उत्पूर्वेभ्य एभ्य इष्णुः स्यात् । उत्पचिष्णुः । '**भूजेः ष्णुक्**' (५।२।३०) भूष्णुः जिष्णुः । '**स्थाग्लाम्लापचिपरिमृजिक्षेः स्नुः**' (५।२।३१) स्थास्नुः । ग्लास्नुः म्लास्नुः । पक्ष्णुः । परिमार्क्ष्णुः । क्षेष्णुः । '**त्रसिगृधिधृषिक्षिपः क्नुः**' (५।२।३२) त्रस्नु गृध्नुः धृष्णुः क्षिप्नुः ॥ १२७ ॥

'**उद०**' स्पष्टम् । उत्पचिष्णुरिति । एवमुत्पतिष्णुः उत्पदिष्णुः उन्मदिष्णुः । '**भूजेः०**' (५।२।३०) सुगमम् । प्रत्ययस्य कित्त्वाद्गुणाभावः । '**स्थाग्ला०**' (५।२।३१) पक्ष्णुरिति । 'चजः कगम्' इति चस्य कत्वे 'नाम्यन्तस्था०' (२।३।१५) इति सस्य षत्वे कषयोगे क्षः । परिमार्क्ष्णुरिति प्रत्ययस्य कित्त्वाभावाद्गुणे 'मृजोऽस्य वृद्धिः' (४।३।४२) इत्यकारस्यात्वे 'यजसृजे'ति षत्वे 'षढोः कस्सि' (२।१।६२) इति कत्वे 'नाम्यन्तस्थे'ति प्रत्ययसकारस्य षत्वे कषयोगे क्षः । 'धूगौदितः' (४।४।३८) इतीड्विकल्पे परिमार्जिष्णुरित्यपि । म्लादिभ्य **केचिदेवे**च्छन्ति । '**त्रसि०**' (५।२।३२) स्पष्टम् । प्रत्ययस्य कित्त्वाद्गुणाभावः । गृध्नुरित्यादि ॥ १२७ ॥

## सन्भिक्षाशंसेरुः ॥ १२८ ॥ [ सि० ५।२।३३ ]

सन्नन्ताद्भिक्षाशंसिभ्यां च उः स्यात् । लिप्सुः भिक्षुः आशंसुः । '**शॄवन्देरारुः**' (५।२।३५) विशरारुः । वन्दारुः । '**शीङ्श्रद्धानिद्रातन्द्रादयिपतिगृहिस्पृहेरालुः**' (५।२।३७) शयालुः । आमन्तालवाय्येत्नयादेशे, पतयालुः स्पृहयालुः ॥ १२८ ॥

'**सन्०**' लिप्सुरिति । एवं चिकीर्षुः जिहीर्षुः । आशंसिति 'आङः शासूङ् इच्छायाम्' इत्यस्य ग्रहणं न तु 'शंसू स्तुतौ च' इत्यस्य । तत्राङ्योगस्यानित्यत्वात् । आशंसुः स्तुत्यर्थस्यापीच्छत्य**न्यः** । '**विन्द्विच्छू**' (५।२।३४) शीलादौ सत्यर्थे वेत्तेरिच्छतेश्च उः प्रत्ययो यथासङ्ख्यं नोपान्त्यछकारोऽन्तादेशौ च निपात्येते । वेदनशीलो विन्दुः । एषणशीलो इच्छुः । कथमपां बिन्दुः ? 'बिदु अवयवे' इत्यस्मात् औणादिक उः । **अन्ये** त्वस्यैव निपातनम्, क्रियानिमित्तस्तु बि(वि?)न्दुरित्यनागमिक एवेत्याहुः । सर्वविदीनां सर्वेषीणां च निपातनमिदमित्य**न्यः** । '**शॄ०**' (५।२।३५) शृणातीत्येवंशीलः शरारुः । विशीर्यते इति विशरारुः । वन्दते वन्दारुः । '**दाद्धेसिशदसदो रुः**' (५।२।३६) देति दारूपाधातवः । ददाति दयते यच्छति **य**ति दाति दायति वेत्येवंशीलो दारुः । कथं द्यति तदिति दारु काष्ठमिति औणा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दिकः कर्मणि रुः । धयति धारुर्वत्सो मातरम् । सिनोति सेरुः । शीयते शद्रुः । सीदति सद्रुः । एभ्य इति दधातीत्येवंशीलो दधिर्गाः । दृधेग्रहणादारूपमिह गृह्यते न संज्ञा । 'शीङ्०' (५।२।३७) शेते शयालुः । श्रद्धत्ते श्रद्धालुः । निद्राति निद्रायति वा निद्रालुः । तत् द्राति द्रायति वा तन्द्रालुः । निपातनात्तदो दस्य नत्वम् । तन्देति सौत्रौ वा । दयते दयालुः । पतिगृहिस्पृहयोऽदन्ताश्चौरादिका पतिगृहि सौत्राविकारान्तौ वा । पतयति पतयालुः । गृहयति गृहयालुः । स्पृहयति स्पृहयालुः । मृगयतेरपि कश्चित् । मृगयालुः लज्जालुः ईर्ष्यालुः शलालुप्रभृतयस्त्वौणादिकाः । कृपालुहृदयालू मत्वर्थीयान्तौ ॥ १२८ ॥

## ङौ सासहिवावहिचाचलिपापति ॥ १२९ ॥ [ सि० ५।२।३८ ]
## सस्रिचक्रिदधिजज्ञिनेमि ॥ १२९ ॥ [ सि० ५।२।३९ ]

**एते ङ्यन्ता निपाताः । 'शृकमगमहनवृषभूस्थ उकण्' (५।२।४०) 'लषपतपदः' (५।२।४१) तथा । शारुकः कामुकः । अभिलाषुकः ॥ १२९ ॥**

'ङौ०' शीलादौ सत्यर्थे वर्त्तमानानां सहिवहिचलिपतीनां यङन्तानां ङौ सति यथासङ्ख्यमेते निपात्यन्ते । अत एव वचनात् ङिरपि । सासह्यते इत्येवंशीलः सासहिः वावह्यते वावहिः । चाचल्यते चाचलिः । पनीपत्यते पापतिः । निपातनान्नागमाभावः । ङाविति ङकारस्तु तृन्नुदन्ताव्ययेत्यत्र विशेषणार्थः । **'सस्रि०'** (५।२।३९) एते इत्यादि । एते शीलादौ सत्यर्थे कृतद्विर्वचना ङिप्रत्ययान्ता निपात्यन्ते । सरतीत्येवंशीलः सस्रिः । करोति चक्रिः । जायते जानाति वा जज्ञिः । नमति नेमिः । द्विर्वचनमेत्वं च निपातनात् । **शॄ०** (५।२।४०) शीलादौ सत्यर्थे वर्त्तमानेभ्य एभ्य उकण् स्यात् । शृणातीत्येवंशीलः शारुकः प्रशारुकः शरः । कामुकः कामुकी रिरंसुः । 'भाजगोण०' इत्यादिना ङीः । कामुका या इच्छां विना कामयते । कामुका अन्यस्य स्त्रियो भवन्ति । 'अकमेरुकस्य' (२।२।९३) इत्यत्र कमिवर्जनात् न षष्ठीनिषेधः । गामुकः आगामुकः स्वगृहम् । घातुकः आघातुको व्याधः । वर्षुकः प्रवर्षुकः पर्जन्यः । भावुकः प्रभावुकः क्षत्रियः । स्थायुकः प्रमत्तः । उपस्थायुको गुरुम् । गुणानधिष्ठायुकः । **'लषपतपदः'** (५।२।४१) तथेति उकण् स्यादित्यर्थः । अपलषतीत्येवंशीलः अपलाषुकं नीचसाङ्गत्यम् । अभिलाषुकः । उत्पातुकं ज्योतिः । प्रपातुका गर्भाः । उपपादुका देवाः । आदिशब्दानुवृत्त्या **'भूषाक्रोधार्थजुसृगृधिज्वलशुचश्चानः'** (५।२।४२) भूषार्थेभ्यः क्रोधार्थेभ्यो जुप्रभृतिभ्यः पञ्चभ्यः लषपतपदिभ्यश्च शीलाद्यर्थेऽनः स्यात् । भूषार्थः भूषयतीत्येवंशीलो भूषणः कुलस्य । एवं मण्डनः प्रसाधनः । **क्रोधार्थ,** क्रोधनः कोपनः रोषणः । जवतिः सौत्रो वेगाख्ये संस्कारे वर्त्तते, तेन चलत्यर्थद्वारेण न सिद्ध्यतीति पृथगिहोपादानम् जवनः । सरणः । गृधू गर्द्धनः । एवं ज्वलनः शोचनः अभिलषणः पतनः । पदेरिदित्वादुत्तरेणैव सिद्धे सकर्मकार्थं वचनम् । अर्थस्य पदनः । ग्रन्थस्य पदनः । उत्तरत्र सकर्मकेभ्योऽपि विधिरिति **एकेषां** दर्शनम् । तथा चोकणा बाधितोऽप्यसरूपत्वात्पदेरनो भविष्यतीति चेदेवं तर्हि शीलादिप्रत्ययेष्वसरूपविधिर्नास्तीति ज्ञापनार्थं पदिग्रहणम् । तेन चिकीर्षिता कटम् । अलंकर्त्ता कन्यार्थमिति न भवति । **कथं** तर्हि गन्ता खेलः । आगामुकः । भविता भावुकः । जागरिता जागरूकः । विकत्थनः । विकत्थी । भासनं भासुरं । वर्द्धनः वर्द्धिष्णुः । अपलाषुकः अपलापी । कम्पना कम्प्रा शाखा । कमना कामुका युवतिः । क्वचित् समावेशोऽपि भवति । एतदर्थमेव च 'न णिङ्या–' (५।२।४५) इत्यादि सूत्रे दीपिग्रहणम् । अन्यथारेणानोऽस्य बाध्यते

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति तदनर्थकं स्यात् । अनस्यैव समावेश इति एके । **'चलशब्दार्थादकर्मकात्'** ( ५।२।४३ ) चलनार्थाच्छब्दार्थाच्च धातोः शीलादौ सत्यर्थेऽकर्मकादविवक्षितकर्मकाद्वा नः स्यात् । चलतीत्येवंशीलः चलनः कम्पनः चोपनः चेष्टनः । शब्दयतीत्येवं शीलः शब्दनः रवणः आक्रोशनः । अकर्मकादिति किम् ? पठिता विद्याम् । **'इङितो व्यञ्जनाद्यन्तात्'** ( ५।२।४४ ) व्यञ्जनमदिरन्तश्च यस्य स व्यञ्जनाद्यन्तः । इदनुबन्धात् ङानुबन्धात् च व्यञ्जनाद्यन्ताद्धातोः प्रागुक्तार्थेऽनः स्यात् । इदित, स्पर्द्धि स्पर्द्धनः । ङित् वृतुङ् वर्त्तनः । वृधूङ् वर्द्धनः । णेरतश्च विषय एव लोपे व्यञ्जनान्तत्वादिहापि स्यात् । चितिण् चेतनः । गुपि जुगुप्सनः । मानि मीमांसनः । इङित इति किम् ? स्वप्ता । व्यञ्जनाद्यन्तादिति किम् ? एधिता शयिता । अकर्मकादित्येव वसिता वस्त्रम् । सेविता विषयान् । **कथमुत्कण्ठावर्द्धनैरिति । नायं** कर्मषष्ठीसमासो वृधेरकर्मकत्वात् किन्तु तृतीयासमासः । उत्कण्ठया वर्द्धमानैः । वर्द्धमानोत्कण्ठैरिति यावत् । **अन्ये** त्वकर्मकादेवेति नेच्छन्ति । **'न णिङ्य-सूददीपदीक्षः'** ( ५।२।४५ ) णिगन्तेभ्यो यान्तेभ्यः सूदादिभ्यश्चोक्तार्थे नो न स्यात् । भावयिता हस्तयिता उत्पुच्छयिता क्ष्मायिता कूयिता दयिता सूदिता दीपिता दीक्षिता । मधुसूदनारिसूदनबलसूदनादयो नन्द्या( णिङ्या ?)दिषु द्रष्टव्याः ॥ १२९ ॥ सूत्रम्

## द्रमक्रमो यङः ॥ १३० ॥ [ सि० ५।२।४६ ]

**यङन्ताभ्यामाभ्यामनः स्यात् । दन्द्रमणः । चङ्क्रमणः ॥ १३० ॥**

**'द्रम०'** स्पष्टम् । कुटिलं द्रमति क्रामतीत्येवं दन्द्रमणः चङ्क्रमणः । सकर्मकार्थं वचनम्, य इति प्रतिषेधनिवृत्त्यर्थं च । 'अत' इति हिलुक्प्रत्यये विषयभूतेऽपि भवति ॥ १३० ॥ सूत्रम्

## यजिजपिदंशिवदादूकः ॥ १३१ ॥ [ सि० ५।२।४७ ]

**यङन्तेभ्य एभ्यश्चतुर्भ्यः ऊकः स्यात् । यायजूकः । जञ्जपूकः । दन्दशूकः । वावदूकः ॥ १३१ ॥**

**'यजि०'** एभ्यो यङन्तेभ्य ऊकः स्यात् । भृशं पुनः पुनर्वा यजतीत्येवंशीलो यायजूकः । गर्ह्यं जपति जञ्जपूकः । एवं दन्दशूकः । अन्येभ्योऽपीति **केचित्** । दन्दशूकः पापयूकः निजागदूकः नानशूकः पंपशूकः ॥ १३१ ॥ सूत्रम्

## जागुः ॥ १३२ ॥ [ सि० ५।२।४८ ]

**तस्मादुकः स्यात् । जागरुकः । 'शमष्टकात् घिनण्' (५।२।४९) वक्तव्यः । युँजादिभ्यश्च ॥ १३२ ॥**

**'जागुः'** यङ् इति निवृत्तम् । जागर्त्तीत्येवंशीलो जागरुकः । **शमष्टकादित्यादि वार्त्तिकं स्पष्टम्** । शमति शाम्यतीत्येवंशीलः शमी । एवं दमी तमी श्रमी भ्रमी क्षमी प्रमादी उन्मादी क्लमी । घञन्तान्मत्वर्थीयेन सिद्ध्यति । तृन्बाधनार्थं तु वचनम् । अष्टकादिति किम् ? असिता । णकारो वृद्ध्यर्थः । घकारो यथास्थानं गत्वकत्वार्थः । अभिधानाद् घिनण् अकर्मकेभ्यस्तेनेह न भवति–अरण्यं भ्रमिता । सकर्मकेभ्यस्तु यथादर्शनं दर्शयिष्यन्ति । युँजादिभ्यश्चेति अत्र सूत्रम् । **'युजभुजभजत्यजरञ्जद्विषदुषद्रुहदुहाभ्याहनः'** ( ५।२।५० ) एभ्यो दशभ्यः उक्तार्थे घिनण् स्यात् । युज्यते युनक्ति वेत्येवंशीलो योगी । भुङ्क्ते भुनक्ति भुजतीति वा भोगी । एवं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भागी कल्याणभागी । त्यागी प्राणत्यागी । रागी । 'अकद्‌घिनोश्च रञ्जेः' (४।२।५०) इति नलुक् । द्वेषी दोषी द्रोही दोही अभ्याघाती । अकर्मकादित्येव । गोदोग्धा शत्रूनभ्याहन्ता ॥१३२॥

अत्रोपयोगि सूत्रम्

## क्तेऽनिटश्चजोः कगौ घिति ॥ १३३ ॥ [ सि० ४।१।१११ ]

**क्तेऽनिटो धातोश्चजोर्घिति प्रत्यये परे कगौ स्याताम् । शमी । योगी । भोगी । क्ते इति किम् ? अर्च्यः ॥ १३३ ॥**

**'क्तेऽनि०'** क्तेऽनिटो धातोश्चजोर्घिति प्रत्यये परे कगौ स्यातामित्यर्थः । यथा पाकः । सेकः पाक्यं सेक्यम् । त्यागः रागः । भोग्यं योग्यम् । सम्पर्की संसर्गी क्तेऽनिट इति किम् ? सङ्कोच एवं कूजः खर्जः(र्ज्यः ?) गर्जः(र्ज्यः ?) पारिव्राज्यं उदाजः समाजः । नन्वजेः क्तेऽनिट्त्वाद्गत्वं प्राप्नोति । नैवं क्तेनिट् इति विद्यमानस्य विशेषणमजेस्तु वींभावेनासत्त्वाद्गत्वं न भवति । क्त इति किम् ? अर्चः अर्च्यम् याच्यं रोच्यम् । अर्चादयो ह्यर्कः याञ्ञारुक्ममिति प्रयोगेष्वनिटोऽपि क्ते सेट इति कत्वं न भवति । योगी भोगीत्युदाहरणदिक् । अत्रायं विशेषः । **'न्यङ्कूद्‌गमेघादयः'** (४।१।११२) न्यङ्कादयः कृतकत्वा उद्गादयः कृतगत्वा मेघादयः कृतघत्वा निपात्यन्ते । न्यञ्चेरुप्रत्यये न्यङ्कुः । तञ्चिवञ्चिशुचीनां रकि तक्रं वक्रं शुक्रं । शुक्रः । शुचिरुच्योर्घञि शोकः । रोकः । क्ते सेट्त्वान्न प्राप्नोति । घञोऽन्यत्र शोच्यम् । रोच्यम् । श्वपाकः मांसपाकः पिण्डपाकः कपोतपाकः उलूकपाकः । पचेः कर्मणोऽणित्यणि सति अणभावे श्वपच इत्यादि । नीचेपाकः दूरेपाकः फलेपाकः क्षणेपाकः । पचेर्नीचे पच्यते स्वयमेवेति कर्मकर्त्तर्यचि दीर्घत्वं निपातनात् । 'तत्पुरुषे कृति' (३।२।२०) इति बहुलाधिकारात् सप्तम्या अलुप् । उकारान्ता अपि गणे पठ्यन्ते । नीचेपाकुः ४ अत एव निपातनादुकारः । नीचेपाका दूरेपाका फलेपाका क्षणेपाका इत्याबन्ता अपि । अनुब्रवीतीत्यच् अनुवाकः पाठविशेषः । सोमं प्रवक्तीत्यण् सोमप्रवाकः । उचेः न्युच्यति स समवेतीति लिहाद्यचि न्योको वृक्षः शकुन्तो वा । उब्जेर्घञि उद्गः न्युद्गः अभ्युद्गः क्ते सेट्त्वाद्गत्वमुपान्त्यस्य दत्वं निपात्यते । सृजेः कर्त्तर्यचि विसर्गः । अवसर्गः उपसर्गः । षञ्जेरपि व्यतिषङ्गः । व्यतिषजतीति क्रियाव्यतिहारे व्यतिषजते इति वाच् । 'स्थासेनि०' (२।३।४०) इति षत्वं अनुषङ्गः । मस्जेरुः मद्गुः । अत्र जस्य गत्वे कृते 'तृतीयस्तृतीयचतुर्थे' इति दन्त्यसस्य तृतीयो दः । भ्रस्जेः कुः सलोपश्च भृगुः । युजेः कर्मणोऽणित्यणि गोयोगः । मिहेरचि संज्ञायां हस्य घत्वं मेघः । अन्यत्र मेहः । वहेरनुपसर्गस्य घस्योकारश्च । वहत्योघः प्रवाहः । अनुपसर्गस्येति किम् ? प्रवहः निवहः । संज्ञायामित्येव । वहः । दहेर्न्यवाभ्यां घञि निदाघः ऋतुविशेषः । अवदाघः केवलपानीयपक्वोऽपूपः । संज्ञायामित्येव । निदाहः । अर्हतेर्घञि अर्घो मूल्यं पूजाद्रव्यं च । संज्ञायामित्येव अर्हः । एवमविहितलक्षणानि कत्वगत्वघत्वानि द्रष्टव्यानि । आदिशब्दादनुषङ्गात् । **'आङः क्रीडमुषः'** (५।२।५१) घिनण् स्यात् । आक्रीडत इत्याक्रीडी । आमुष्णातीत्यामोषी । शीलादिप्रत्ययान्ताः प्रायेण रूढिप्रकारा यथादर्शनं प्रयुज्यन्ते । इत्युपसर्गान्तराधिक्ये न स्यादेवमुत्तरत्रापि । **'प्राच्च यमयसः'** (५।२।५२) प्रादाङश्च पराभ्यामाभ्यां घिनण् स्यात् । प्रयच्छतीत्येवंशीलः प्रयामी आयामी प्रयासी आयासी । **'मथलपः'** (५।२।५३) चानुकृष्टं नानुवर्त्तते । इत्याङ् नानुवर्त्तते । प्रात्पराभ्यामाभ्यां घिनण् स्यात् । प्रमथतीति प्रमाथी प्रलापी । **'वेश्च द्रोः'** (५।२।५४)



Jain Education International For Personal & Private Use Only www.jainelibrary.org

वेः प्राच्च पराद् द्रवतेर्घिनण् स्यात्। विद्रवतीति विद्रावी प्रद्रावी। **'विपरिपरात्सर्तेः'** (५।२।५५) घिनण् स्यात् विसरन्तीत्येवंशीलो विसारी परिसारी । **'समः पृचैप् ज्वरेः'** (५।२।५६) समः पराभ्यां पृणक्तिज्वरिभ्यां घिनण् स्यात्। सम्पृणक्तीति सम्पर्की। पित्निर्देशात् आदादिकस्याग्रहणम्। सम्पर्चिता। संज्वरतीति संज्वारी। **केचिद्** ण्यन्तादपीच्छति। संज्वरी। त्वरयतेरपि **कश्चित्** संत्वरी। अकर्मकाविलेव सम्पृणक्ति शाकम्। **'संवेः सृजः'** (५।२।५७) तथा। संसृजतीत्येवंशीलः संसृज्यते वा संसर्गी विसर्गी। **'संपरिव्यनुप्राद्वदः'** (५।२।५८) तथा संवदतीति संवादी परिवादी विवादी अनुवादी प्रवादी। परिपूर्वाण्ण्यन्तादपीति **केचित्**। **'वेर्विचकत्थस्रम्भकषकसलसहनः'** (५।२।५९) एभ्यः सप्तभ्यो विपूर्वेभ्यो घिनण्। विनक्तीति विवेकी विकत्थी विस्रम्भी विकाषी विलासी विघाती। **'व्यपाभेर्लषः'** (५।२।६०) घिनण्। विलषतीति विलाषी अपलाषी अभिलाषी। **'संप्राद्वसात्'** (५।२।६१) आभ्यां पराद्वसतेर्घिनण्। संवसतीति संवासी प्रवासी। शव्निर्देशात् वस्तेर्न स्यात्। **'समत्यपाभिव्यभेश्चरः'** (५।२।६२) एभ्यः पञ्चभ्यः पराच्चरेर्घिनण् स्यात्। संचरतीति संचारी इत्यादि। **'समनुव्यवाद्रुधः'** (५।२।६३) एभ्यश्चतुर्भ्यः पराद्रुधो घिनण् स्यात्। संरुद्धे इत्येवंशीलः संरोधी अनुरोधी। **'वेर्दहः'** (५।२।६४) विपूर्वाद्दहेर्घिनण् स्यात्। विदहतीति विदाही। **'परेर्देविमुहश्च'** (५।२।६५) देवीति देवृधातोरण्यन्तस्य ण्यन्तस्य च ग्रहणम्। परिपूर्वाभ्यां देविमुहाभ्यां दहश्च घिनण् स्यात्। परिदेवयते परिदेवयति वा परिदेवी। ण्यन्तान्नेच्छन्त्यन्ये। परिमोही परिदाही। **'क्षिपरटः'** (५।२।६६) परिपूर्वाभ्यामाभ्यां घिनण्। परिक्षिप्यति परिक्षिपति वा परिक्षेपी परिक्षेप्यम्भसाम्। परिराटी। **इति घिनण्प्रत्ययप्रकरणम्। 'वादेश्च णकः'** (५।२।६७) परिपूर्वाच्छीलादौ सत्यर्थे वर्त्तमानाद्वादयतेः क्षिपरटिभ्यां च णकः स्यात्। परिवादयतीत्येवंशीलः परिवादकः। वदेरपि **केचित्**। परिक्षेपकः। परिराटकः। असरूपत्वात् 'णकतृचौ' इति णके सिद्धे पुनर्विधानं शीलादिकृत्प्रत्ययेष्वशीलादिकृत्प्रत्ययोऽसरूपत्वविधिना न स्यादिति ज्ञापनार्थम्, 'तेनालङ्कारकः परिक्षिपः परिरटः इत्यादिशीलाद्यर्थे न भवति। बाहुलकात् क्वचिद्भवत्यपि। 'क्रामक्रोधौ मनुष्याणां खादितारौ वृकाविव'। अत्र णकविषये तृन्। **'निन्दहिंसक्लिशखादविनाशिव्याभाषासूयानेकस्वरात्'** (५।२।६८) एभ्यो णकः स्यात्। निन्दतीत्येवंशीलो निन्दकः हिंसकः। क्लिश्नाति क्लिश्यते वा क्लेशकः। खादकः। विनाशयति विनाशकः। व्याभासकः। असूयः कण्ड्वादौ असूयकः। दरिद्रायकः। चकासकः गणकः चुलुम्पकः। अनेकस्वरत्वादेव सिद्धे असूयग्रहणं कण्ड्वादिनिवृत्त्यर्थम्। तेन कण्डूयिता मन्तूयिता। तृन्नेव। विनाशिग्रहणं त्वन्यस्य ण्यन्तस्य निवृत्त्यर्थम्। कारयिता। अनेकस्वरान्नेच्छन्त्यन्ये। क्लिशेरविशेषेण ग्रहणाद्दैवादिकादित्येष्यनो न स्यात्। **'उपसर्गाद्देवृदेविक्रुशः'** (५।२।६९) उपसर्गात्परेभ्यो णकः स्यात्। आदेवते इत्येवंशीलः आदेवकः परिदेवकः। देवीति दीव्यतेर्देवतेर्वा ण्यन्तस्य ग्रहणम्। आदेवयतीति आदेवकः परिदेवकः आक्रोशकः परिक्रोशकः। उपसर्गादिति किम्? देवनः देवयिता क्रोष्टा। देवतेर्ण्यन्तादेवेति **कश्चित्**। **इति शीलाद्यर्थप्रकरणम्। एतत्प्रकरणद्वयं च आदिशब्देन सङ्गृहीतम्** ॥ १३३ ॥

अथ प्रसिद्धप्रयोगान् कांश्चित् शीलाद्यर्थप्रत्ययान् कण्ठतो निर्दिशति। सूत्रम्

**वृङ्भिक्षिलुण्टिजल्पिकुट्टाट्टाकः ॥ १३४ ॥ [ सि० ५।२।७० ]**

स्पष्टम्। वराकः। भिक्षाकः ॥ १३४ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'वृङ्भि०' एभ्यः शीलादौ सत्यर्थे वर्त्तमानेभ्यष्टाकः स्यात् । 'वृङ्श संभक्तौ' । वृणीते इत्येवंशीलो वराकः । प्रत्ययस्य टित्त्वात् स्त्रियां ङीः वराकी । भिक्षाकः २ । जल्पाकः २ । कुट्टाकः २ । आदिशब्दानुवृत्तेः 'प्रात्सूजोरिन्' (५।२।७१) प्रात्पराभ्यां सुवतिजुभ्यामिन् स्यात् । सू इति निरनुबन्धग्रहणात् सुवतेर्ग्रहणं न सूतिसूयत्योः । प्रसुवति-प्रजवतीत्येवंशीलः प्रसवी प्रजवी । 'जीणृदृक्षिविश्रिपरिभूवमाभ्यमाव्यथः' (५।२।७२) एभ्य इन् स्यात् । जयतीत्येवंशीलो जयी । इण् अत्ययी उदयी । दृ, आदरी । क्षीति क्षिंक्षितोर्ग्रहणम् । क्षयी । विश्रि विश्रयी । परिभू परिभवी । वम् , वमी । अभ्यम् अभ्यमी । अव्यथ् न व्यथते अव्यथी ॥ १३४ ॥ सूत्रम्

## सृघस्यदो मरक् ॥ १३५ ॥ [ सि० ५।२।७३ ]

सृमरः । घस्मरः । अद्मरः ॥ १३५ ॥

'सृघ०' एभ्यो मरक् स्यात् । सरतीत्येवंशीलः सृमरः प्रसृमरः । घस्मरः अद्मरः ॥ १३५ ॥

## भञ्जिभासिमिदो घुरः ॥ १३६ ॥ [ सि० ५।२।७४ ]

घुरः । भङ्गुरम् । भासुरम् । मेदुरम् ॥ १३६ ॥

'भञ्जि०' भज्यते स्वयमेवेत्येवंशीलं भङ्गुरम् काष्ठम् । भासुरम् वपुः । मेदते मेद्यते वा मेदुरः । घकारो गत्वार्थः ॥ १३६ ॥

## वेत्तिच्छिद्भिदः कित् ॥ १३७ ॥ [ सि० ५।२।७५ ]

घुरः । विदुरः । छिदुरः । भिदुरः ॥ १३७ ॥

'वेत्ति०' वेत्तीत्येवंशीलो विदुरः । छिद्यते भिद्यते स्वयमेव छिदुरः भिदुरः । कित्त्वाद्गुणाभावः । वेत्तीति तिवा निर्देश इतरविदित्रयव्युदासार्थः । व्याप्ये घुरकेलिमकृष्टपच्यम् (५।१।४) इति वक्ष्यमाणसूत्रादयं घुरप्रत्ययः । कर्मकर्त्तरीति ज्ञेयम् । भासमिदिविदां कर्त्तर्येव घुरः कर्मकर्त्तुरसम्भवात् । भासते इत्येवंशीलः भासुरः मेदुरः विदुरः । केचिच्छिदिभिदोरपि कर्त्तरि घुरमिच्छन्ति । 'दोषान्धकारभिदुरो' 'दृप्तारिवक्षच्छिदुर' इति ॥ १३७ ॥

## भियो रुरुकलुकम् ॥ १३८ ॥ [ सि० ५।२।७६ ]

भीरुः । भीरुकः. भीलुकः ॥ १३८ ॥

'भियो०' बिभेतीत्येवंशीलो भीरुः भीरुकः भीलुकः । ऋफिडादित्वाल्लत्वं प्रयोगानुसरणाद्वरीय इति लाघवार्थं लुकप्रत्ययविधानम् ॥ १३८ ॥

## सृजीणृनशष्ट्वरप् ॥ १३९ ॥ [ सि० ५।२।७७ ]

एभ्यः कित् ट्वरप् स्यात् । प्रसृत्वरः । जित्वरः । इत्वरः । नश्वरः । 'गत्वरः' (५।२।७८) निपातोऽयम् ॥ १३९ ॥

'सृजी०' सरतीत्येवं शीलः सृत्वरः सृत्वरी । जित्वरः २ । इण् इत्वरः २ । सर्वत्र 'ह्रस्वस्य तः पित्कृति' इति तोन्तः । नश्वरः २ । 'गत्वरः' गमेष्ट्वरप् मकारस्य च तकारो निपात्यते ॥ १३९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## स्म्यजसहिंसदीपकम्पकमनमो रः ॥ १४० ॥ [ सि० ५।२।७९ ]

**एभ्यः सप्तभ्यो रः स्यात् । अजस्रम् । हिंस्रः । दीप्रः । कम्प्रः । कम्रः । नम्रः ॥ १४० ॥**

**'स्म्य०'** स्मयते इत्येवंशीलं स्मेरं मुखम् । अजस्रमिति 'जसूच् क्षेपणे' नञ्पूर्वः । न जस्यत्यजस्रं श्रवणम् । अजस्रा प्रवृत्तिः । अजस्रः पाकः । अजस्रं पचति । अजस्रशब्दोऽयं स्वभावात्सातत्यविशिष्टां क्रियामाह, तेन धात्वर्थ एव कर्त्तरि रः प्रत्ययोऽन्यथा क्रियाभिधानानुपपत्तेः, तेनाजस्रो घट इति न भवति । अजस्रमिति अव्ययमपि नित्यार्थं क्रियाविशेषणमस्ति । 'हिंस्र हिंसागत्योः' । हिंस्रो व्याधः । एवं दीप्रः कम्प्रः । कामयते कम्रा युवतिः । बहुलाधिकारात् कर्मण्यपि । कम्यते कम्रः । तत एव कमितेत्यपि । नमतीति नम्रः । अजसिकमिनमिभ्यः कर्मकर्त्तर्येवेच्छन्त्येके ॥ १४० ॥

## तृषिधृषिस्वपो नजिङ् ॥ १४१ ॥ [ सि० ५।२।८० ]

**एभ्यो नजिङ् प्रत्ययः स्यात् । तृष्णक् धृष्णक् । स्वप्नक् ॥ १४१ ॥**

**'तृषि०'** इकारङकाराविति । तत्र इकार उच्चारणार्थः । ङकारो गुणप्रतिषेधार्थः । तृष्यतीत्येवंशीलः तृष्णक् धृष्णक् स्वप्नक् ॥ १४१ ॥

## स्थेशभासपिसकसो वरः ॥ १४२ ॥ [ सि० ५।२।८१ ]

**स्पष्टम् । स्थावरः । ईश्वरः । भास्वरः । पेस्वरः । विकस्वरः ॥ १४२ ॥**

**'स्थेश०'** एभ्यो वरः स्यात् । तिष्ठतीत्येवंशीलः स्थावरः स्थावरा । एवं ईश्वरः २ । भास्वरः २ । पेस्वरः २ । विकस्वरः २ । अत्रायं विशेषः **'यायावरः'** ( ५।२।८२ ) यातेर्धातोः शीलादौ सत्यर्थे वर्त्तमानाद्यङन्ताद्वरः प्रत्ययो निपात्यते । यायायते इत्येवंशीलः यायावरः कुटिलं यातीत्यर्थः । अत्र 'दिद्युद्दद्‌ज्जगज्जुहू०' ( ५।२।८३ ) इत्यादि सूत्रेण शीलादि सदर्थे क्विप् विधीयते । स सामान्यक्विबधिकारे ( पृष्ठ ८५४ ) उक्त एतत्सूत्रमपि तत्रैवोक्तमिति । ततोऽनुसन्धेयम् । **इति शीलादिसदर्थप्रकरणम् ।** एवमित्यादि डुश्च इत्रश्च त्रश्च त्रत्रदूक्ता एते च वर्त्तमानेभ्यो धातुभ्यो यथासूत्रं भवन्ति । तत्र प्रथमं डुप्रत्ययसूत्रं कण्ठतो निर्दिशति ॥ १४२ ॥

## शंसंस्वयंविप्राद्भुवो डुः ॥ १४३ ॥ [ सि० ५।२।८४ ]

**एभ्यः पराद्भुवो डुः स्यात् । शम्भुः । सम्भुः । स्वयम्भुः । विभुः । प्रभुः ॥ १४३ ॥**

**'शंसं०'** एभ्यः पराद्भुवः सत्यर्थे वर्त्तमानात् डुः स्यात् । शं सुखं तत्र भवति शम्भुः शङ्करः । सम्भुर्जनयिता । स्वयम्भुर्ब्रह्मा, विभुर्व्यापकः । प्रभुः स्वामी । बहुलाधिकारात् शम्भुः संज्ञायामन्ये त्वसंज्ञायामपि । मितद्रु आदयस्त्वौणादिकाः मितद्रुः समुद्रः । शेषप्रत्ययसूत्राणि त्वेवम् । **'पुव इत्रो दैवते'** ( ५।२।८५ ) सामान्यनिर्देशात्पुवतेः पुनातेश्च देवतायां कर्त्तरि सत्यर्थे इत्रः स्यात् । पुनाति पवते वा पवित्रोऽर्हन् । स मां पुनातु । करणेऽप्यन्ये । **'ऋषिनाम्नोः करणे'** (५।२।८६) पुव इत्रः । पूयतेऽनेनेति पवित्रोऽयमृषिः । नाम्नि दर्भः पवित्रः । बर्हिः पवित्रम् । यज्ञोपवीतं पवित्रम् । ओघोपकरणं पवित्रम् । पवित्रा नदी । दर्भादीनां पवित्रमिति संज्ञा । ऋषौ कर्त्तर्यपि केचित् ।

**'लूधूसूखनचरसहार्त्तेः'** ( ५।२।८७ ) एभ्यः सप्तभ्यः सत्यर्थे वर्त्तमानेभ्यः करणे इत्रः स्यात् । लुनात्यनेन लवित्रम् । धुवत्यनेन धवित्रम् । धुनोतेरपि **कश्चित् ।** धवित्रम् । सुवत्यनेन सवित्रम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निरनुबन्धग्रहणात् धूग्सूङोर्न भवति । खनित्रं चरित्रं सहित्रम् । ऋच्छतीयर्तिर्वानेनारित्रम् । वहेरपि कश्चित् वहित्रम् । **'नीदांव्शसूयुयुजस्तुतुदसिसिचमिहपतपानहस्त्रट्'** (५।२।८८) एभ्यः सत्यर्थे वर्त्तमानेभ्यः करणे त्रट् स्यात् । नीयतेऽनेन नेत्रम् । दांव् दान्त्यनेन दात्रम् । शस् शस्त्रम् । यु, योत्रम् । युज, योक्त्रम् । स्तु, स्तोत्रम् । तुद्, तोत्रम् । सि, सेत्रम् । सिच्, सेक्त्रम् । मिह् मेढ्रम् । पत् पत्त्रम् । पा, पात्रम् । नहः नध्रः नध्री । टकारो ङ्यर्थः । **'हलक्रोडास्ये पुवः'** (५।२।८९) पुवो हलास्ये क्रोडास्ये च करणे त्रट् स्यात् । पुनाति पवते वानेन पोत्रं हलस्य सूकरस्य च मुखमुच्यते । **'दंशेस्त्रः'** (५।२।९०) दंशेः सत्यर्थे वर्त्तमानात् करणे त्रः स्यात् । दशत्यनया दंष्ट्रा प्रत्ययान्तकरणभावर्थम् । **'धात्री'** (५।२।९१) ट्धेर्दधातेर्वा कर्मणि त्रट् स्यात् । धयति तां धात्री स्तनदायिनी । दधति तां भैषज्यार्थं धात्री आमलकी ॥ १४३ ॥

> ज्योतिर्द्योतितचित्रमत्कृतिगलज्जाड्यामयं वाङ्मयम्
> निस्तन्द्रं प्रणिधाय सद्गुरुकृपाप्राप्तानवद्योद्यमः ।
> नानार्थप्रगुणैरुणादिभिरथोद्यत्प्रत्ययैः प्रत्ययैः
> प्रव्यक्तान् प्रयते विवेक्तुमनघान् शब्दप्रयोगानिह ॥ १ ॥

## उणादयः ॥ १४४ ॥ [ सि० ५।२।९३ ]

**बहुलमिति वर्त्तते । सत्यर्थे वर्त्तमानाद्धातोरुणादयः प्रत्ययाः बहुलं स्युः ॥ १४४ ॥**

बहुलमिति वचनात् प्रायः संज्ञाशब्दाः केचित्त्वसंज्ञाशब्दा अपि, तथा सति विहिता उणादयः कचिद्भूतेऽपि दृश्यन्ते । भसितं तदिति भस्म । कषितोऽसौ कषिः । ततोऽसौ ततिः । वृत्तं तदिति वर्त्म । चरितं तदिति चर्म । अद्भ्यः सरन्ति स्म अप्सरसः । **'भीमादयोऽपादाने'** (५।१।१४) एते अपादाने साधवः स्युः । बिभेत्यस्मादिति भीमः । एवं भीष्मः । भयानकः । चरन्त्यस्मादिति चरुः । 'उन्दैप् क्लेदने' । समुदन्त्यार्द्रीभवन्त्यस्मात्तटवनानीति समुद्रः 'स्रुं गतौ' । स्रवतीत्याह विरिति स्रुवः । स्रुक् । रक्षः । संकसुकः । खलति । उणादिप्रत्ययान्ता एते सम्प्रदानाच्चान्यत्रोणादयः इति निषेधेनाप्राप्ता निपात्यन्ते । **'संप्रदानाच्चान्यत्रोणादयः'** (५।१।१५) संप्रदानादपादानाच्चान्यत्र कारके भावे चोणादयः स्युः । कृत्त्वात्कर्त्तर्येव प्राप्ताः कर्मादिष्वपि कथ्यन्ते । कषितोऽसाविति कर्मणि कषिः । तन्यतेऽसाविति तनुः । ऋचन्ति तयेति रिक् । वृत्तं तत्रेति वर्त्म । अत्र **श्रीसूरयः** सम्प्रदायानुरोधात्पूर्वमुण्प्रत्ययमभिधाय स्वरादिक्रमेण प्रत्ययानभिधास्यन्ति । तत्रापि पूर्वं केवलोकारः प्रत्ययः । ततः स एव कादिक्रमेण व्यञ्जनोपहितो यथा कः प्रत्ययः खः प्रत्ययः इत्यादि । ततस्त एव कादिप्रत्ययाः क्रमेण स्वरादयो यथा अक आक इक ईक इत्यादि । ततस्त एव अनेकवर्णादयो यथा एलक आतृक इत्यादि । एवं खादयोऽपि । ततः केवल इकारप्रत्ययस्ततः स क्रमेण व्यञ्जनोपहित इत्यादि सर्वं यथासम्भवं तथैव यावदौदन्ताः स्वरास्ततः क्रमेण व्यञ्जनान्ताः प्रत्यया यथा किप् प्रत्यय **इत्याद्याचार्यचक्रवर्त्तिनो रचनाचातुरी कियद्विवेक्तुं शक्यत इति ।**

**कृवापाजिस्वदिसाध्यशौदृस्नासनिजानिरहीणभ्य उण् । (१)**

डुकृंग् कृंग्ट् वा, निरनुबन्धग्रहणे सामान्यग्रहणात् । करोति कृणोति वा कारुः । नापितादिः ।

वांक् (ओ)वैं वा वाति वायति वा द्रव्याणि वायुः । **पां** पिबन्त्यनेन तैलादिद्रव्यम् पायुः अपानमुपस्थश्च, पातिपायत्योस्त्वर्थासङ्गतेर्न ग्रहणम् । **जिं** जयत्यनेन रोगान् श्लेष्माणं वा जायुः औषधं पित्तं वा । **ष्वदि** स्वदते इदमनेन वा स्वादुः रुच्यं स्वदनं वा । **साधंट्** क्षमादिभिः साध्नोति, परमपदं साधयति वा साधुः । **अशौटि** अश्नुते तेजसा सर्वं केदारं वा आशुः सूर्यो व्रीहिश्च, अशनं वा आशु, क्षिप्रं अश्नुते इति वा आशुः शीघ्रगामी शीघ्रकारी च । **दॄ** दॄश् वा दरति दृणाति दीर्यते वा दारु काष्ठं भव्यं च । **ष्णैं** स्नायति स्नायुः अस्थिनहनम् । **षन** षणूयी वा सनति सनोति वा मृगानीति सानुः पर्वतैकदेशः । **जनैचि** जायतेऽनेनाकुञ्चनादि जानु ऊरुजङ्घासन्धिः । जानीत्याकारनिर्देशात् 'न जनवधः' ( ४।३।५४ ) इति वृद्धिनिषेधो न स्यात् । **रह** रहति गृहीत्वा सूर्याचन्द्रमसौ राहुः । **इणक्** एति आयुः पुरुषः शकटं औषधं जीवनं वृत्तिर्जलं चेत्यर्थः । पुरूरवः पुत्रो वा । जरायुर्गर्भवेष्टनं शैवालम् । जटायुः पक्षी । धनायुर्देशः । रसायुर्भ्रमरः ॥१॥ **अः** (२) सर्वस्माद्धातोरः प्रत्ययः स्यात् । भवः भषः तरः वरः प्लवः शरः शयः परः करः चरः स्तवः वदः ॥ २ ॥ **म्लेच्छीडेर्ह्रस्वश्च वा** (३) म्लिच्छः मूकः । म्लेच्छः कुमनुष्यजातिः । ईड इडश्च देवताविशेषौ मेदिनी च ॥ ३ ॥ **नञः क्रमिगमिशमिखन्याकमिभ्यो डित्** (४) अः स्यात् । न **क्रा**मति नक्रः जलचरो ग्राहः । नगो वृक्षो गिरिश्च । **शमूच्** नशः यक्षः । **खनूग्** नखः । नास्य खमस्तीति वा । **कमि** नाकः स्वर्गः, नात्राकं दुःखमस्तीति वा । सर्वत्र नखादित्वान्नञस्तादवस्थ्यम् ॥ ४ ॥ **तुदादिविषिगुहिभ्यः कित्** (५) अः स्यात् । तुदः नुदः क्षिपः । '**षुरत्** ऐश्वर्यदीप्त्योः' सुरः । 'बुध अवगमे' बुधः । शिवः । तुदादिर्न धातुगणः किन्त्वन्य एव तेन बुधादीनां ग्रहणम् । तुदादीनां यथासम्भवं कारकविधिः । **वे**वेष्टि विषं प्राणहरं द्रव्यम् । **गू**हति गुहः स्कन्दः । गुहा दरी ॥ ५ ॥ **विन्देर्न लुक् च** (६) 'विदु अवयवे' । अस्मात्कित् अस्तद्योगे च नलुक् स्यात् । विदः गोत्रकृदृक्षजातिश्च ॥ ६ ॥ **कृगो द्वे च** (७) अस्मात् कित् अः स्यात् । इतः सूत्रादारभ्य द्वादशसु सूत्रेषु अः प्रत्ययः स्यात् । धातोश्च द्वे रूपे भवत इति द्वयमनुवर्त्तनीयम् । विशेषो यथास्थानं वक्ष्यते । चक्रं रथाङ्गमायुधं च ॥ ७ ॥ **कनिगदिमनेः सरूपे** (८) किदिति निवृत्तम् । एषां च समाने द्वे रूपे स्याताम् । **कन**ति दीप्यते कङ्कनः कान्तः । अव्यक्तं **गद**ति गद्गदोऽव्यक्तवाक् । अव्यक्तं गद्यते गद्गदमव्यक्तवचनम् । **मन्**मनोऽस्पष्टवाक् । सरूपग्रहणं 'व्यञ्जनस्यानादेर्लुक्' ( ४।१।४४ ) इत्यादिकार्यनिवृत्त्यर्थम् ॥ ८ ॥ **ऋतष्टित्** (९) **दॄश्** दीर्यतेऽनेन श्रोत्रमिति दर्दरो वाद्यविशेषः पर्वतश्च । दर्दरी सस्थलुण्टिः । **कृत्** कर्करः क्षुद्राश्मा । कर्करी गलन्तिका । **वृग्श्** वर्वरः म्लेच्छजातिः, वर्वरी केशजातिः । **भृश्** भर्भरः छद्मवान्, भर्भरी श्रीः । **जॄष्च् झॄष्च्** जर्जरः अदृढः, जर्जरी स्त्री । झर्झरः वाद्यविशेषः, झर्झरी झल्लरिका । **गॄत्** गर्गरो राजर्षिः । गर्गरी महाकुम्भः । **मृश्** मर्मरः शुष्कपत्रप्रकरः । तद्धर्मान्योऽपि क्षोदासहिष्णुः दानवश्च । मर्मरायां दूर्वायामित्यादौ टित्त्वेऽपि ङीर्न बहुलाधिकारात् । तत एव ऋकारान्तादपि । **घृं** घर्घरः सघोषोऽव्यक्तवाक् । घर्घरी किङ्किणिका ॥ ९ ॥ **किच्च** (१०) ऋकारान्ताद्यथादर्शनं कित् अः स्यात् । **मृश्** मूर्यतेऽनेन मुर्मुरः ज्वलदङ्गाल [ र ] चूर्णम् । **पृश्** पूर्यते जलघातेन पुर्पुरः फेनः । **तॄ** तीर्यतेऽनेनास्मिन्वा तिर्त्तिरः सेतुः । **भृश्** भूर्यते सञ्चीयते भुर्भुरः सञ्चयः । **शृश्** शीर्यते समन्तात् शिर्शिरः पुञ्जः ॥ १० ॥ **पॄपलिभ्यां टित् पिप् च पूर्वस्य** (११) आभ्यां टित् अः द्वित्वे पूर्वस्य पिप् आदेशः । **पृ**णाति छायया पिप्परी वृक्षजातिः । '**पल** गतौ' पलति आतुरम् पिप्पली

Jain Education International For Personal & Private Use Only www.jainelibrary.org

औषधजातिः । टित्वात् ङीः ॥ ११ ॥ **क्रमिमथिभ्यां चन्मनौ च** (१२) द्वित्वे पूर्वस्य स्थाने यथासङ्ख्यं चन् मन् इत्यादेशौ स्याताम् । क्रामति सुखेनानेनाऽस्मिन्वा चङ्क्रमः सङ्क्रमः । मथे मथति चित्तं रागिणां मन्मथः ॥ १२ ॥ **गमेर्जम् च वा** (१३) द्वित्वे पूर्वस्य जमित्यादेशो वा स्यात् । गच्छति पादविहरणं करोति जङ्गमः चरः । गच्छत्यमाभ्यर्थ्यं गङ्गमश्चपलः ॥ १३ ॥ **अदुपान्त्यऋद्भ्यामश्चान्ते** (१४) अकारोपान्त्यादृकारान्ताच्च अः स्यात् । द्वित्वे पूर्वस्यान्तेऽकारः स्यात् । शल सल गतौ शलशलः सलसलः । 'हल विलेखने' हलहलः । 'कलि शब्दसङ्ख्यानयोः' कलकलः । 'मलि धारणे' मलमलः । घटिष् घटघटः । वद् वदवदः । पदिंच् पदपदः । ऋदन्त, डुकृंग् करकरः । मृंत् मरमरः दॄत् दरदरः । सृं सरसरः । वृंग्ट् वरवरः । अनुकरणशब्दा एते ॥ १४ ॥ **मषमसेर्वा** (१५) द्वित्वे पूर्वस्यान्ते अकारो वा । 'मष हिंसायाम्' मषमषः । मष्मषः ॥ मसमस मस्मसः ॥ १५ ॥ **हृसृफलिकषेरा च** (१६) द्वित्वे पूर्वस्य आकारोऽन्ते स्यात् । हरति नयति शस्त्राण्यस्खलन् लक्ष्यम् हराहरो योग्याचार्यः । धावति वायुना नीयमानः समन्तात् सरासरो मृगः । फलति निष्पादयति नानापुष्पफलानि फलाफलमरण्यम् । कषति विदारयति कषाकषः कृमिजातिः ॥ १६ ॥ **इदुदुपान्त्याभ्यां किदिदुतौ च** (१७) इकारोपान्त्यादुकारोपान्त्याच्च कित् अः स्यात् । पूर्वस्य यथासङ्ख्यमिकारोकारौ चान्ते स्याताम् । 'किलत् श्वैत्यक्रीडनयोः' किलिकिलः । 'हिलत् हावकरणे' हिलिहिलः । 'शिलत् सिलत् उञ्छे' सिलिसिलः । 'छुरत् छेदने' छुरुछुरः । 'मुरत् संवेष्टने' मुरुमुरः । 'घुरत् भीमार्थशब्दयोः' घुरुघुरः । 'पुरत् अग्रगमने' पुरुपुरः । 'सुरत् ऐश्वर्यदीप्त्योः' सुरुसुरः । 'कुरत् शब्दे' कुरुकुरः । 'चुरण् स्तेये' चुरुचुरः । 'हुल हिंसासंवरणयोश्च हुलुहलः । 'गुजत् शब्दे' गुजुगुजः । 'गुडत् रक्षायाम्' गुडुगुडः । 'कुटत् कौटिल्ये' कुटुकुटः । 'पुटत् संश्लेषणे' पुटुपुटः । 'कुणत् शब्दोपकरणयोः' कुणुकुणः । 'मुणत् प्रतिज्ञाने' मुणुमुणः । अनुकरणशब्द एते ॥ १७ ॥ **जजलतितलकाकोलीसरीसृपादयः** (१८) एते निपात्यन्ते । 'जल घात्ये' द्वित्वे पूर्वस्य जभावे जजलो यस्य जाजलिः पुत्रः । 'तिलत् स्नेहने' पूर्वस्य तिभावे धातोरिकारस्य अकारे तितलः प्रीतिकरः । 'कुल बन्धुसंस्त्यानयोः' अस्य द्वित्वे पूर्वस्य काभावे काकोली क्षीरकाकोली च वल्लीजातिः दुधेलीप्रसिद्धिः । 'सृप्लृं गतौ' द्वित्वे गुणाभावे पूर्वस्य सरीभावे सरीसृपः उरगजातिः । आदिग्रहणाद्यथादर्शनमन्येऽपि ॥ १८ ॥ **बहुलं गुणवृद्धी चादेः** (१९) धातो किदः द्वित्वे पूर्वस्य चैकारोकारावन्ते स्याताम् । यथादर्शनं च गुणवृद्धी । केलिकिलः कैलिकिलश्च हसनशीलः । हेलिहिलः हैलिहिलश्च विलसनशीलः । शेलिशिलः शैलिशिलश्च । शोभते पुनः पुनरिति शोभुशुभः शौभुशुभः । नुदति पुनः पुनरिति नोदुनुदः नौदुनुदः । 'गुडत् रक्षायाम्' गुडति भ्राम्यति पुनः पुनरिति गोलुगुलः गौलुगुलः । 'बुलण् निमज्जने' बोलयति पुनः पुनरिति बोलुबुलः बौलुबुलः । तत्तद्धात्वर्थास्तच्छीला अनुवादविशेषा वा एते ॥ १९॥ **णेर्लुप्** (२०) अप्रत्ययसन्नियोगे बहुलम् । वज्रं धारयति वज्रधरः इन्द्रः । जलधरो मेघः । बाहुलकात् प्रत्ययान्तरेऽपि । देवयतीति द्यौः व्योम स्वर्गश्च । पुण्यं कारयन्तीति पुण्यकृतो देवाः । पर्णं शोषयतीति पर्णशुट् । 'वान्ति पर्णशुषो वातास्ततः पर्णमुचः परे । ततः पर्णरुहः पश्चात् ततो देवः प्रवर्षति' । तथा कारयाञ्चकुराक्रन्दानिति प्राप्ते महतश्चकुराक्रन्दानिति स्यात् । 'महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः' । घोषयाञ्चक्रुरित्यर्थः ॥ २० ॥ इत्यकरणमेकोनविंशत्या सूत्रैः । **भीण्शलिवलिकल्यतिमर्च्यर्चिमृजिकुतुस्तुदाधाराज्ञाकापानिहानश्रुशुभ्यः कः** (२१) बिभेति दुन्दुभात्सर्पविशेषात्परस्माच्च भेको मण्डूकः

कातरश्च । बिभेति वायोरिति मेघः । इणूक् एत्यद्वितीय इत्येकः असहाय उपादेयः सङ्ख्याप्रधानमसमानः अन्यश्च । शल शलन्त्यात्मरक्षणाय तमिति शल्कः शरणम् । शलति त्यक्तं बहिरिति शल्कं गृहीतरसं शकलम् । शल्कः काष्ठत्वक् मलिनं च काष्ठं मुद्गरः करणं च । 'वलि संवरणे' वल्कः दशनः वासस्त्वक् च । कलि, कल्कः कषायः दम्भः पिष्टपिण्डश्च । अतति, अत्कः आत्मा वायुर्व्याधितः चन्द्रः उत्पातश्च । मर्च सौत्रः मर्कः देवदारुः वायुः दानवः मनः पन्नगः विघ्नकारी च 'चजः कगम्' (२।१।८६) इति कत्वम् अर्च, अर्कः सूर्यः पुष्पजातिः डाट [ झाट ] जातिश्च । मृजौक्, मार्कः वायुः । कुंक् कोकः चक्रवाकः । तुंक्, तोकमपत्यम् । ष्टुंक् स्तोकमल्पं च । डुदांग्क्, दाकः यजमानः यज्ञश्च । डुधांग्क् धाक ओदनः अनड्वान् अम्भः स्तम्भश्च । रांक्, राकः दाता अर्थः सूर्यश्च । राका पूर्णिमा कुमाररजस्वला च । त्रैङ्, त्राकः धर्मः शरणस्थानीयश्च । कैं काकः । पा पांक् वा, पाको बालः असुरः पर्वतश्च । ओहांक्, निहाको निःस्नेहः । निर्मोचकश्च । निहाका गोधा । शुं गतौ, न शवतीति अशोकः ॥ २१ ॥ **विचिपुषिमुषिशुष्यविसृवृशुसुभूधूमूनीवीभ्यः** (२२) कित् कः स्यात् । विचृंपी, विक्कः विंशतिवर्षः करी । पुषंच् पुष्कश्चन्द्रः । मुषश् मुष्कश्चौरो मांसलो वा मुष्कौ वृषणौ । शुषंच्, शुष्कं विगतरसम् । 'अव रक्षणादिषु' । ऊकः कुन्दुमः । सृं, सृकः वायुः बाणः सृगालो बको निरयश्च । सृका आयुधविशेषः । वृगट्, वृङश् वा वृकः मृगजातिः आदित्यो धूर्त्तः जाठरश्चाग्निः । शुं शुकः कीर ऋषिश्च । षुंगट्, सुको निरामयः । भू, भूकः कालः छिद्रं च । धूत धूगट् धूगश् वा धूको वायुर्व्याधिश्च । धूका पताका । मूङ् मूकः अवाक् । णींग् नीकः खगः ज्ञाता च । नीका सारणी ज्ञातिश्च । वींक्, वीकः वायुः नाशः अर्थः मनः वसन्तश्च, वीका पक्षिजातिर्नेत्रमलं च ॥ २२ ॥ **कृगो वा** (२३) असात्कः, स च किद्वा । कर्कः अग्निः सारङ्गः दर्भः श्वेताश्वश्च । कृकः शिरोग्रीवम् ॥ २३ ॥ **घुयुहिपितुशोर्दीर्घश्च** (२४) एभ्यः कित्कः, एषां च दीर्घः । 'घु शब्दे' घूकः कौशिकः । युक् यूका क्षुद्रजन्तुः । हिंट्, हीकः पक्षी । 'पिंत् गतौ' पीक उपस्थ जलाश्रयश्च । तुंक् तूक उपस्थ पर्वतश्च । शुं, शूकः किंशारुः अभिषवः शोकश्च । शूका हृल्लेखः ॥ २४ ॥ **ह्रियो रश्च लो वा** (२५) ह्रियः कित्कः रस्य लो वा स्यात् । ह्रीकः ह्लीकः लज्जापरः नकुलश्च । ह्लीको लिङ्गमपि ॥२५॥ **निष्कतुरुष्कोदर्कालर्कशुल्कश्वफल्ककिञ्जल्कोल्कावृक्कछेककेकायस्कादयः** (२६) एते कप्रत्ययान्ता निपात्यन्ते । नेः सीदतेर्डिच्च निषीदन्ति गुणा अस्मिन्निति निष्कः सुवर्णादि । तूरैचि तूर्यते पान्थोपकाराय, प्रायेण हिंसायैव । ह्रस्व उपश्चान्तः तुरुष्कः वृक्षो म्लेच्छश्च । उदः परादृर्तेः उदियर्त्ति क्रियायाः सकाशात् उदर्कः क्रियाफलम् । 'अली भूषणादौ' अल्यते वार्यते कष्टेन अस्मादर् चान्तः अलर्क उन्मत्तः श्वा, मदालसात्मजश्च । शल गताविलस्योपान्त्योत्वम् शुल्कं रक्षानिर्वेशः । शुनः परात्फा(फ?)लेर्ह्रस्वश्च श्वफल्कः अन्धकविशेषः । किमः परात् जृषो रस्य लश्च किञ्जल्कः पुष्परेणुः । ज्वलेरुलादेशश्च, उलेः सौत्रस्य वा उल्का उत्पातिकं ज्योतिः अग्निज्वाला च । वृजैकि अगुणत्वं च । वृज्यते (वर्ज्यते ?) मांसभक्षकैरपि वृक्को मुष्कः । छ्यति सन्देहात् छेकः मनीषी । कायति मयूरः केका । यमेर्मस्य सः यस्कः । आदिग्रहणात् स्पृश्यते गन्धार्थिभिः । स्पृक्का गन्धद्रव्यविशेषः । ढौकते प्रयाणकाले ढक्का ॥ २६ ॥ इति कप्रत्ययः षड्भिः सूत्रैः । **दृकनसृभृधृवृमृस्तुकुक्षुलङ्किचरिचटिकटिकणिटचणिचषिफलिवमितम्यविदेविबन्धिकनिजनिमशिक्षारिकुरिवृतिवल्लिमल्लिसल्ल्यलिभ्योऽकः** (२७) दृश् दृणाति धार्ष्ट्यं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दरकः भीरुः । कृत्, कीर्यते जलमस्मिन् करको जलभाजनं कमण्डलुश्च, करका वर्षोपलः । नृश् नृणाति दुःखं नरकः । सृं सरकः मद्यविशेषः कंसभाजनविशेषश्च, सरका मधुपानवारः । टुडु-भृंग्क् भरकः गोण्यादिः । धृङ् धरकः सुवर्णोन्माननियुक्तस्तुलाधारी । 'वृग्ट् वरणे' । वरकः वधूजानिसहायः वाजसनेयभेदश्च । मृंत् मरकः जनोपद्रवः । ष्टुंग्क् स्तूयते भ्रमरैः स्तबकः पुष्पगुच्छः । कुंक् कवकं अभक्ष्यद्रव्यविशेषः । क्षुक् क्षवकः राजसर्षपः । लघुङ् लङ्घकः रङ्गो-पजीवी । 'चर भक्षणे' चरकः मुनिः । चटण् भेदे चटकः पक्षी । कटे कटकः वलयः । कटु गतौ कण्टकः । 'चण् शब्दे' चणकः मुनिः धान्यविशेषश्च । चषी चषकः पानभाजनम् । फल फलकः खेटकम् । टुवमू वमकः कर्मकरः । तमूच् तमकः व्याधि क्रोधश्च । अव अवका शैवलम् । देवृङ् देवका अप्सराः, देविका नदी । बन्धंश् बन्धकः चारपालकः । कनै कनकं स्वर्णम् । जनैचि जनकः सीतापिता । 'मश रोषे च' मशति कर्णाभ्यर्णे मशकः । क्षर क्षारयति मरन्दं क्षारकं बाल-मुकुरम् । कुरत् कुरन्ति भृङ्गा अत्रेति कोरकं प्रौढमुकुलम् । वृतुङ् वर्त्तका वर्त्तिका वा शकुनिः । वल्लि वल्लते शोकं वल्लकी वीणा । मल्लि मल्लते तैलादि मल्लकः शरावः, मल्लिका पुष्पजातिः दीपा-धारश्च । सल्लः सौत्रः सल्लकी वृक्षः । सत्कृत्य लक्ष्यते स्वाद्यते गजैरिति वा । अली अलति रूयादिकं अलकः केशविन्यासः, अलका पुरी ॥२७॥ **को रुरुण्टिरण्टिभ्यः** (२८) कोः परेभ्यो एभ्योऽकः स्यात् । रुक् कुरवकः । रुटु कुरुण्टकः वर्णगुच्छः । रण्टि सौत्रः । कुरण्टकः स एव ॥ २८ ॥ **ध्रुधून्दिरुचितिलिपुलिकुलिक्षिपिक्षुपिक्षुभिलिखिभ्यः कित्** (२९) एभ्यः कित् अकः स्यात् । ध्रुं ध्रुवकः स्थिरः । तिष्ठन्ति व्रीह्यादयोऽस्यामिति ध्रुवका आवपनविशेषः । धूत् धुवकं धूननम्, धुवकः प्रधानम्, स्त्री धुवका आवपनविशेषः । उन्दैप् उद्यते ओदनाद्यनेन उदकम् । रुचि शोभते रुयाद्यनेन रुचक आभरणविशेषः । तिलत् तिलन्ति स्निह्यन्ति वेश्यादयः पक्षिणो वास्मिन् तिलकः विशेषकः वृक्षविशेषश्च । 'पुलण् समुच्छ्राये' 'पुल महत्त्वे' वा पोलति शरीरमस्मिन् पुलकः रोमाञ्चः । कुल कोलन्ति संहतीभवन्ति रूपाण्यस्मिन् कुलकं संयुक्तम् । क्षिपति तृणादिकं क्षिपको वायुः, क्षिपका आयुधम् । क्षुपः सौत्रः क्षोपन्ति ह्रस्वीभवन्ति शाखादयोऽस्मिन् क्षुपकः गुल्मः । क्षुभच् क्षुभकः पाञ्चालकः, पाञ्चालेषु भवः 'बहुविषयेभ्यः' ( ६।३।४५ ) इत्यञ् । लिखत् लिखकः चित्रकरः ॥२९॥ **छिदिभिदिपिटेर्वा** (३०) एभ्योऽकः स च किद्वा छिदकः खड्गः क्षुरश्च, छेदकः परशुः । भिदकं जलं भेदकं वज्रम् । 'पिट शब्दे च' पिटकः स्फोटकः पेटकं संघातम् ॥३०॥ **कृषेर्गुणवृद्धी च वा** (३१) कर्षकः कृषकः परशुः । कार्षकः कृषकः कुटुम्बी ॥३१॥ **नञः पुंसेः** (३२) नञः परात् 'पुंसण् आमर्दने' इत्यस्मात् कित् अकः स्यात् । नपुंसकम् । नखादित्वान्नञस्तादवस्थ्यम् ॥३२॥ **कीचकपेचकमेचकमेनकाभकधमकवधकलघकजहकैरकैडकाश्मकलमकक्षुल्लकवदवका-ढकादयः** (३३) एतेऽकप्रत्ययान्ता निपात्यन्ते । कचि अस्योपान्त्यस्येत्वम् कचते वायुं कीचकः वंश-विशेषः । डुपचींष् मचि मनिंच् एषामुपान्त्यस्य एत्वं पेचकः करिजघनभागः । मेचकः कर्णः । मेनका अप्सराः । अर्तेर्भश्चान्तः । अर्भकः बालः । ध्मां अस्य धमादेशश्च धमकः कीटः कर्मारश्च । अन्यत्रापि धमादेशो दृश्यते । के धान्तः । हन्तेर्वधश्च वधकः हन्ता व्याधिश्च, वधकं पद्मबीजम् । अन्यत्रापि दृश्यते । वृत्रं हन्ति अचि, वृत्रवधः शक्रः । वधिता निर्मोचकः । वध्यः वधनम् । लघुङ् नलुक् च लघकः असमीक्ष्यकारी । जहातेर्द्वे रूपे अन्तलुक् च जहकः कालः क्षुद्रश्च । ईरिक् ईडिक् अनयोर्गुणश्च एरका उदकतृणजातिः, एडका अविजातिः । अशौटि अस्य मोऽन्तः अश्मकः



Jain Education International For Personal & Private Use Only www.jainelibrary.org

जनपदः । **रमिं**, अस्य लमादेशे लमकः ऋषिविशेषः । **क्षुदृंपी** अस्य क्षुल्लादेशश्च । क्षुद्यतेऽनायासेन क्षुल्लकः दभ्रः । क्षुधं लातीति क्षुल्लः स एव क्षुल्लक इति वा । **वट** अस्य अवोन्तश्च । वेष्टते बहिः प्रवेशं वटवकस्तृणपुञ्जः । आङ् पूर्वात् **ढौकतेर्डिच्च** आढौकते मानकाले आढकं मानम् । आदिग्रहणात् बृहत्तत्रात् कला आपिबन्तीति शास्त्राणि । कथयतीति कथकः तोटकाख्यायिकादीनां वर्णयिता । उम्भति मनोरथात् उपकः ऋषिविशेषः । चपति सान्त्वयति मानिनीः चम्पकः । फलति रक्षा अनेन हे फलहकः ॥ ३३ ॥ इलकप्रत्ययः सप्तभिः सूत्रैः । **शलिबलिपतिवृतिनभिपटितटितडिगडिभन्दिवन्दिमन्दिनमिकुदुपूमनिखजिभ्य आकः** (३४) शलति पूर्णभावं शलति तन्तुरनया शलाका एषणी पूरणरेखाभूतोपकरणं सूची च । 'बल प्राणने' प्राणिति पयसा बलाका जलचरी शकुनिः । **पत्लृ** गच्छति सैन्येन सह पताका । **वृतूङ्** वर्ताका शकुनिजातिः । **णभच्** नभाकः चक्रवाकजातिः काकश्च । **पट** गतौ पटति सैन्येन सह पटाका वैजयन्ती पक्षिजातिश्च । '**तट** उच्छ्राये' तटति उच्छ्रयं करोति वर्षाभिः तटाकं सरः । **तडण्** आघाते आहन्यते जलैः तडाकं तदेव । '**गड** सेचने' गड्यते तैलादिना गडाकः शाकजातिः । **भदुङ्** भन्दते सुखयति आदेशकारिणः भन्दाकं शासनमागमः । ताम्रपत्रलिखितं च । **मदुङ्** मन्दाका ओषधिः । **णमं** नमस्यार्येभ्यः नमाका म्लेच्छजातिः । **कुङ्** कवतेऽव्यक्तं शब्दं करोति कवकः पक्षी । **टुदुंट्** दुनोति धार्मिकान् दवाकः म्लेच्छः । **पूङ्**, पवते धान्यादि पवाका वात्या । **मन्यते** उपादेयतया राजभिः मनाका हस्तिनी । **खज** मथ्यतेऽसौ खजाकः आकरः । मथ्यतेऽनेन मन्था दर्विः । मथ्यते पक्षिभिः खजाकं आकाशम् । मथ्नाति युवमनः खजाकः बन्धकी । मथ्यते रोगैः खजाकं शरीरम् । मथ्यते विपक्षपक्षिभिः खजाकः पक्षी ॥ ३४ ॥

**शुभिगृहिविदिपुलिगुभ्यः कित्** (३५) आकः । **शोभते** व्योम्नि शुभाका पक्षिजातिः । **गृह्यते** गृहाकः । **वेत्ति** चेतयते शरीरं विदाका भूतग्रामः । **पोलति** महान् भवति पुलाकः अर्द्धस्विन्नधान्यविशेषः । **गुङ्** गुंत् वा गूयते उपादेयतया गूयतेऽनेन वा गुवाकं पूगफलम् ॥ ३५ ॥ **पिषेः पिन्पिण्यौ च** (३६) अस्मादाकः एतौ चास्यादेशौ स्याताम् । पिष्यते दानवकुलमनेन पिनाकमैशं धनुः शूलं च । पिष्यन्तेऽनेन वृक्षपत्राणि पिनाकः दण्डः । पिष्यते महिष्यादिदानाय पिण्याकस्तिलादिखलः ॥३६॥ **मवाकश्यामाकवार्ताकवृन्ताकज्योन्ताकगूवाकभद्राकादयः** (३७) एते आकप्रत्ययान्ता निपात्यन्ते । **मव्य** यलोपः मव्यति सम्बध्नाति वस्त्रादिकं मवाकः रेणुः । **श्यैङ्**, श्यायते भोज्यभावमृषीणां मोऽन्ते श्यामाकः जघन्यो व्रीहिः । वृतेर्वृद्धिश्च वर्तते काशनाशाय वार्ताकी शाकविशेषः तत्फलं वार्ताकम् । स्वरान्नोऽन्तश्च । वृन्ताकी उपबृहती तत्फलं वृन्ताकम् । **ज्युङ्** न्तश्च प्रत्ययादिः । ज्यवतेऽस्मिन् स्विद्यमानः ज्योन्ताकं स्वेदसद्मविशेषः । **गुंत्** गुंङ् वा ऊवादेशश्च गूवाकं पूगफलम् । **भदुङ्** भन्दते सुखं जनाभं भद्राकः अकुटिलः । आदिग्रहणात् सीव्यति पुष्पादिकं स्योनाकः वृक्षः । चर्वति तत्त्वं चार्वाकः नास्तिकः । पिपर्ति परभावं पराकः परकीयः ॥३७॥ इलाकप्रत्ययं चतुर्भिः सूत्रैः ।

**क्रीकल्यलिदलिस्फटिदूषिभ्य इकः** (३८) **क्री**णातीति क्रयिकः । कलन्ते शब्दायन्ते भृङ्गा अस्यां कलिका कोरकम् । उत्प्राबल्येन शब्दायते उत्कलिका तरङ्गः । **अली** (अलयते) भूष्यते तिलकादिना अलिकं ललाटम् । **दल्यते** कुठारादिना दलिकं दारु । '**स्फट** स्फुटृ विशरणे' स्फटति विकसति प्रतिबिम्बमस्मिन् स्फटिकः मणिः । **दूषयति** चक्षू दूषिका नेत्रमलः ॥ ३८ ॥ **आङः पणिपनिपदिपतिभ्यः** (३९) इकः । आपण्यते स्तूयते ग्राम्यैः आपणिकः पत्तनवासी व्यवहारको वा ।

Jain Education International　For Personal & Private Use Only　www.jainelibrary.org

आपनायति आपनिकः स्तावकः । आपनाय्यते परीक्षिकैः आपनिकः इन्द्रनीलमणिः इन्द्रकीलो वा । आपद्यते परीक्षिकैः आपदिकः इन्द्रनीलमणिः इन्द्रकीलो वा । आपतति ग्रामादिकं सर्पादीन् वा आपतिकः पैन्थः मैयूरः, श्येनः, कौलो वा । आपणिकादयश्चत्वारो वणिजोऽपि ॥ ३९ ॥ **णसि-वसिकसिभ्यो णित्** (४०) इकः । 'णसि कौटिल्ये' नसते कुटिलीभवत्यह्याादिदर्शनादिति नासिका । वसति सौगन्ध्यमस्यां वसतिः । वसति तक्षपार्श्वे वा वासिका माल्यदामविशेषः छेदनोपकरणं च । 'कस गतौ' (कसति) गच्छति पत्रादिसमृद्धिं कासिका वनस्पतिः ॥४०॥ **पापुलिकृषिकुशिव्रश्चिभ्यः कित्** (४१) इकः । पिबति विरहिणां रक्तं पिकः । पोलति प्रभया पुलिकः मणिः । कृषति भूमिं कृषति पशुक्षुधं कृषिकश्च ( कुशं कुशिक क्रोष्टुक उलूकश्च । ओव्रश्चौत् वृश्चिकः सविषकीटो राशिश्च नक्षत्रपादनवकरूपः ) ॥ ४१ ॥ **प्राङः पणिपनिकषिभ्यः** (४२) कित् इकः । प्रकर्षेणापणायति प्रापणिकः वणिक् । पनि स्तुतौ प्रापनायते वृक्षादिकं प्रापनिकः पथिकः । 'कष हिंसायाम्' । प्राकषति सूक्ष्मजन्तून् सदाचारं विरहिजनं पुष्पादिभिर्दुर्गन्धं प्राकषिकः वायुः खलः नर्तकः मालाकारश्च । प्रपूर्वात्पणेराङ्पूर्वाच्च कषेरिच्छन्त्यन्ये । प्रपणिकः गन्धविक्रयी । आकषति विधीयमानः आकषिकः न कर्त्तव्यः ॥ ४२ ॥ **मुषेर्दीर्घश्च** (४३) मुषेरिकः स्वरस्य च दीर्घः । मुष्णाति भक्ष्यादिकं मूषिकः आखुः ॥४३॥ **स्यमेः सीम् च** (४४) स्यमेरिकः अस्य च सीम् इत्यादेशः । 'स्यमू शब्दे' । स्यमन्ति पक्षिणोऽस्मिन् स्यमति कष्टेनास्यां सत्यां जन इति सीमिकः वृक्षः उदकं कृमिश्च । सीमिका उपजिह्विका । स्यमन्ति सर्प्पादयोऽस्मिन् सीमिकं वल्मीकम् । केचित् सिम् इति ह्रस्वोपान्त्यमादेशं प्रत्ययस्य दीर्घत्वमिच्छन्ति । सिमीकः सूक्ष्मकृमिः ॥ ४४ ॥ **कुशिकहृदिकमक्षिकेतिकपिपीलिकादयः** (४५) एते किदिकप्रत्ययान्ता निपात्यन्ते । कुषेः श च, कुष्णाति दुष्कृतं कुशिकः मुनिः । हृगो दोऽन्तश्च हरति शत्रुप्राणान् हृदिको यादवः । मषेः सोन्तश्च, मष्यते हिंस्यते लूतादिभिर्मक्षिका क्षुद्रजन्तुः । एतेस्तोन्तश्च, एति सद्गतिं इतिकः मुनिः । पीलेर्द्वे च, पिपीलिका मध्यक्षामा कीटजातिः । आदिशब्दात् गदत्यव्यक्तं गद्दिकः पुरुषविशेषः । अथवा गद्यते उपादेयतया गद्दिका आस्तरणविशेषः । यस्य गादीति प्रसिद्धिः । बिभर्त्याश्रितान् भुरिकः भुलिकः इत्यादयो ज्ञेयाः ॥ ४५ ॥ इति इकप्रत्ययोऽष्टाभिः सूत्रैः । **स्यमिकषिदूष्यनिमनिमलिवल्यलिपालिकणिभ्य ईकः** (४६) व्युत्पत्तिर्यथासम्भवं प्राग्वत् । स्यमू स्यमीकः वृक्षः वल्मीकः नृपगोत्रं च, स्यमीकं जलम्, स्यमीका कृमिजातिः । कषति जन्तून् कषीका कुद्दालिका । दुषंच् ण्यन्तः दूषयति चक्षुः दूषीका नेत्रमलः वीरणजातिः वर्त्तिः लता च । अनिति नद्या समूहिभिः अनन्ति वीरा अस्मिन् अनीकं सेनासमूहः सङ्ग्रामश्च । मन्यते सूक्ष्मतया मनीकः सूक्ष्मः । मल्यतेऽक्ष्णा मलते धारयति प्रद्वेषमलीकमञ्जनः मरिश्च । 'वलि संवरणे' । वलीकः बलवान् पटलान्तश्च वलीकं वेश्मदारु । अली वारयति सद्गतिं अलीकमसत्यम् । भूषयति स्वमलीका पण्यस्त्री । वारयति स्नेहं भूषयति स्त्रीं व्यलीकमागः । व्यलीका लज्जा । पलण् पालयति यशः पालीकं तेजः । कण्यते उपादेयतया कणीकः पटवासः । कणीका भिन्नतन्दुलावयवः वनस्पतिबीजं च ॥ ४६ ॥ **जृपृदृशृभृम्भ्यो द्वे रश्चादौ** (४७) एभ्यः ईकः एषां द्वे रूपे आदौ च रः स्यात् । जीर्यति कालेन जर्जरीका शतपत्री । पूर्यते जलेन पृणाति लोकान् पर्परीका जलाशयः सूर्यश्च । पृणाति शीतार्त्तं पूर्यते पितृभ्यां पृणाति भक्षकं पूर्यते मृगार्थिभिः पर्परीकः अग्निः कुररः भक्ष्यः कुर्कुरश्च । दृणाति पित्तं शत्रून् कर्णं दर्दरीकः दाडिमः इन्द्रः वादित्रविशेषः वादित्रभाण्डं च । शीर्यते क्षिप्रं शृणात्यश्वं शर्शरीकः कृमिः दुष्टाश्वश्च । शृणात्यमङ्गलं शर्शरीका

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मङ्गल्याभरणम् । **वृग्ट्** [१]व्रीयतेऽनेन, [२]व्रियते वृकेण, [३]व्रियते शबरैः, [४]व्रियते पुष्पादिना वर्वरीकः [१]संवरणं [२]उरणः [३]पक्षी [४]केशसंघातश्च । याच्यते विज्ञैः वर्वरीका सरस्वती । **मृंत्** म्रियन्ते क्षुद्रजन्तवोऽस्मिन् म्रियतेऽनेन युद्धे, म्रियतेऽस्मिन् पारापतादिः मर्मरीकः अग्निः शूरः श्येनश्च ॥ ४७ ॥ **ऋच्यृजिहृषीषिदृशिमृडिशिलिनिलीभ्यः कित्** (४८) ईकः । '**ऋचत्** स्तुतौ' ऋच्यते विज्ञैः ऋचीकः ऋषिः । '**ऋजि** गतिस्थानादिषु' गच्छतीन्द्रहस्ते, गम्यतेऽस्मिन् ऋजीकं वज्रं बलं स्थानं च । [ खलं स्थालं च, मूलप्रतौ ] **हृषू** हृषच् वा हर्षत्यलीकं भवति दोषैः हृष्यति सत्यदर्शनाद्वा हृषीकमिन्द्रियम् । **इष ईष ईषि** इष्यते २ वाचार्थिभिः इषीका, ईषीका तृणशलाका । **दृश्यते** आसक्त्या दृशीकं मनोज्ञम् । दृश्यते हेयतया दृशीका रजस्वला । **मृडत्** सुखने मृडीकं सुखकृत्सुखं च । '**शिलत्** उञ्छे' शिल्यतेऽर्थिभिः शिलीकः सस्यविशेषः । **निलीयतेऽस्मिन्** पुष्पादिकं निलीकं वृत्तम् बाहुलकादीलुक् ॥ ४८ ॥ **मृदेर्वोन्तश्च वा** (४९) मृद्यते रसार्थिभिः मृद्वीका मृदीका च द्राक्षा ॥ ४९ ॥ **सृणीकास्तीकप्रतीकपूतीकसमीकवाहीकवाल्हीकवल्मीककल्मलीकतिन्तिडीककङ्कणीककिङ्किणीकपुण्डरीकचञ्चरीकफर्फरीकझर्झरीकघर्घरीकादयः** (५०) एते किदीकप्रत्ययान्ता निपात्यन्ते । सर्त्तेर्णोन्तश्च । धावतीति, धावति वायुवशात्, धावति दानवान्प्रति, धावति निष्कारणं सृणीकः वायुः अग्निः अशनिः उन्मत्तश्च । सरति मुखे सृणीका लाला । अस्तेस्तोन्तश्च । **स**न्ति गुणा अस्मिन् अस्तीकः जरत्कारुसुतः । प्रातेस्तोऽन्तो ह्रस्वश्च, **प्राति** शरीरं प्रतीकः अवयवः सुखं च । सुप्रतीकः दिग्गजः । पुवस्तोऽन्तश्च **पूयते** तृणार्थिभिः पूतीकं तृणजातिः । सम्पूर्वस्य एतेर्लुक् च । **सं**यन्ति शूरा अस्मिन् समीकं सङ्ग्रामः । वलिवल्ह्योर्दीर्घश्च । '**वलि** वल्हि प्राधान्ये' वल्हते न्यायैः वाहीकः वाल्हीकः एतौ देशौ । वलेर्मोऽन्तश्च वलते कृम्यादिकं वल्मीकः नाकुः । कलेर्मलश्चान्तः **कलते** शब्दायते वायुना कल्मलीकं ज्वाला । **तिमेस्तिड्** चान्तः । तिम्यति शिशुस्नेहेन तिम्यति मुखमस्मात् तिन्तिडीकः पक्षी वृक्षाम्लश्च, तन्तिडीक इति पूर्वस्यैत्वं नेच्छन्त्येके । **चङ्कण्यतेः** कङ्कण् च कङ्कणीकः घण्टाजालम् । किमः परात् कणेः किण् च किमपि **कणति** किङ्किणीका घण्टिका । पुणेर्डर् चान्तः, **पुण्डतेर्वा** अर् । पुणति शोभते विपुण्डति प्रमर्दयति वान्यमदं विकासेन नैर्मल्येन शौर्येण वा पुण्डरीकं पद्मं छत्रं व्याघ्रश्च । चञ्चेरर् चान्तः '**चञ्चू** गतौ' चञ्चति पुष्पाणि चञ्चरीकः भ्रमरः । पिपर्त्तेर्गुणो द्वित्वं पकारयोः फत्वं रश्चान्तः पूर्वस्य **पि**पर्त्ति पालयति विरहिणं पादौ शब्दविशेषं वा फर्फरीकं, पल्लवं पादुका मर्द्दलिका च । झीर्यतेर्द्वित्वं तृतीयाभावः **झी**र्यति कालेन झर्झरीकं देहः । झर्झरीका वाद्यविशेषः । **घरति** ददाति घर्घरीका घण्टिका । आदिशब्दादन्येऽपि ॥ ५० ॥ इति ईकप्रत्ययः पञ्चभिः सूत्रैः । **मिवमिकटिभल्लिकुहेरुकः** (५१) डुमिंग्ट् **मी**यते रविणा मयुकः आतपः । **बाहुलकात्** मिगूमीगो इति नात्वम् । **वमति** जलं वमुकः मेघः । **कटे** कटति आवृणोति श्लेष्माणं कटुकः रसविशेषः । **भलि** भल्लि हिंस्यते लुब्धकैः भल्लुकः ऋक्षः । **कु**हणि कुहयते जनं कुहुकमाश्चर्यम् ॥ ५१ ॥ **संविभ्यां कसेः** (५२) उकः । **कस** गतौ । संकसति मृदुत्वं दुष्टभावं सङ्गच्छते हविरादिना संकसुकः सुकुमारः परापवादशीलः श्राद्धाग्निश्च । **संकस्यते** व्यक्ताव्यक्ततया संकीर्णतया वा संकसुकं व्यक्ताव्यक्तं संकीर्णं च । विकसन्ति गुणा अस्मिन् विकसत्यङ्गैः विकसुकः गुणवादी परिश्रान्तश्च ॥५२॥ **क्रमेः क्रम् च वा** (५३) क्रमेरुकः क्रम् चादेशो वा स्यात् क्रामति बन्धनाय क्रामन्त्यत्र पक्षिणः क्रमुको क्रमुकः बन्धनः । पूगतरुश्च ॥ ५३ ॥ **कमितिमेर्दोन्तश्च** (५४) आभ्यामुको दोन्तश्च स्यात् । **काम्यते** स्त्र्यादिना कन्दुकः क्रीडनकम् । **तिमच्**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तिम्यति** जलधरेण तिन्दुको वृक्षविशेषः ॥५४॥ **मण्डेर्मड्डु च** (५५) मण्डेरुकः, अस्य मड्डु आदेशः स्यात् । **मड्डु** मड्डुकः वाद्यविशेषः ॥ ५५ ॥ **कण्यणेर्णित्** (५६) उकः । कणति विस्वरं काणुकः काकः । कणति प्राणी अस्मिन् व्रति काणुकः हिंस्रः । **कण्यते अण्यते** अक्षिदूषकतया काणुकं आणुकं च अक्षिमलम् ॥ ५६ ॥ **कञ्चुकांशुकनंशुकपाकुकहिबुकचिबुकजम्बुकचुलुकचूचुकोल्मुकभावुकपृथुकमधुकादयः** (५७) एते किदुकप्रत्ययान्ता निपात्यन्ते । कचि अशौटि नशौच् एषां स्वरान्नोऽन्तः **कच्यते**ऽङ्गेन **अश्नुते**ऽङ्गं कञ्चुकः अंशुकम् । **नश्यति** गजमदादिना नश्यति चौरदर्शनात् नश्यति चन्द्रदर्शनमस्मिन् नंशुकः रणरेणुः प्रवासी चन्द्रप्रावरणं च । **पचेः** पाक् च शीघ्रं पचति पच्यते पचति हव्यं पाकुकः लधुपाची सूपः । सूपकारोऽध्वर्युश्च । हिनोतिचिनोतिजमतीनां बोऽन्तश्च । गच्छति **चतुर्थभावं** अगाधतां हिबुकं लग्नाच्चतुर्थं स्थानं रसातलं च । चीयते श्मश्रुभिः चिबुकं मुखाधोभागः । जमति बदिरादीनि जम्बुकः शृगालः । **चुलुम्पः** सौत्रः अन्त्यस्वरादिलोपश्च चुलुम्पतीति चुलुकः करकोशः । **च्यते**श्चूच् याच्यते स्तनन्धयेन चूचुकः स्तनाग्रभागः । **ज्वले**रुल्म च ज्वलति वायुना उल्मुकमलातम् । **भा**तेर्वोन्तश्च भाति प्रियया भावुकः भगिनीपतिः । **प्रथे**र्पृथ प्रथते क्रीडया स्वादेन पृथुकः बालः व्रीह्याद्यभ्यूषश्च । **मचि** धश्चान्तादेशः मच्यते मिश्रीक्रियते औषधेन मधुकं यष्टीमधु । आदिग्रहणात् वलते पित्तमनेन वल्यते जलेन वालुकी वालुका इत्यादयः ॥ ५७ ॥

इत्युकप्रत्ययः सप्तभिः सूत्रैः । **मृमन्यञ्जिजलिबलितलिमलिमल्लिभालिमण्डिबन्धिभ्य ऊकः** (५८) **म्रियते** पुलिन्दादिदर्शनात् म्रियते संग्रामे दवाग्निना मरूकः मयूरः मृगः निदर्शनेभः तृणं च । **मन्यते** क्षुद्रतया मनूकः कृमिजातिः । अञ्जौप् **अनक्ति** हिंसायाम् अञ्जूकः हिंस्रः । 'जल घात्ये' जलूका जलतन्तुः । **बल**त्युत्पलमस्मिन् बलति जले बलूकः उत्पलमूलं मत्स्यश्च । **'तलण्** प्रतिष्ठायाम्' तलूकः त्वक्कृमिः । मलि **मल्यते** सरोजैः मलूकः सरोजशकुनिः । **मल्ल्यते** हेयभावं मल्लूकः कृमिजातिः । 'भलिण् आभण्डने' भल्यते शबरादिना भालूकः ऋक्षः । **मण्डति** सरः मण्डूकः । **बध्नाति** साधुपुष्पाणि बन्धूकः बन्धुजीवः ॥ ५८ ॥ **शल्यणेर्णित्** (५९) ऊकः । शलति जलं संग्रामादिकं वा शालूकः कन्दविशेषः बलवांश्च । अण्यतेऽक्षिदूषणतया आणूकमक्षिमलम् ॥ ५९ ॥ **कणिभल्लेर्दीर्घश्च वा** (६०) कण्यते धान्यावयवतया कणति पक्ष्यन्तरदर्शनात् कणन्ति प्राहरिका अस्मिन् कणूकः धान्यावयवः । काणूकः पक्षी । काणूकमक्षिमलं समो वा । भल्ल्यते हिंस्यते शबरादिना भल्लूकः भाल्लूकश्च ऋक्षः ॥ ६० ॥ **शम्बूकशाम्बूकवृधूकमधूकोलूकोरुवूकवरूकादयः** (६१) एते ऊकप्रत्ययान्ता निपात्यन्ते । शमेर्बोन्तो दीर्घश्च । **शाम्यति** अशिवमनेन शम्बूकः शङ्खः । शाम्बूकः स एव । **वृश्**, अस्य वृधभावश्च । वृणाति मातुः म्रियते तृषार्तैः वृधूकः मातृवाहकः । वृधूकं जलम् । मदेर्धश्च **मदयति** मधूकः । **अले**रूश्चोपान्त्यस्य अल्यते वार्यते दिवा काकैः उलूकः । उरुपूर्वात् वातेः किच्च उरु **वाति** उरुवूक एरण्डः । वृषेर्लोपश्च वर्द्धते इति वरूकः तृणजातिः । आदिग्रहणात् अनूकवावदूकादयो ज्ञेयाः ॥ ६१ ॥ इत्यूकप्रत्ययश्चतुर्भिः सूत्रैः । **किरोऽङ्को रोलश्च वा** (६२) कृत् करङ्कः समुद्रः । कलङ्कः लाञ्छनम् ॥ ६२ ॥ **रालापाकाभ्यः कित्** (६३) अङ्कः । रांक्, रङ्कः निर्बलः । लांक्, लङ्का पुरी । पांक्, पङ्कः कर्दमः । कैं, कङ्कः पक्षी ॥ ६३ ॥ इत्यङ्कप्रत्ययो द्वाभ्यां सूत्राभ्याम् । **कुलिचिरिभ्यामिङ्कक्** (६४) 'कुल बन्धुसंस्त्यानयोः' कुलिङ्कः चटका । चिर हिंसायां सौत्रः चिरिङ्कं जलयन्त्रम् ॥६४॥ **कलेरविङ्कः** (६५) कलते शब्दायते कलविङ्कः गृहचटका ॥६५॥ **क्रमेरेलकः** (६६) क्रमते शीघ्रं क्रमेलकः करभः ॥६६॥ **जीवेरातृको**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जैवृ च** (६७) जीवेरातृकः प्रत्ययः अयं चास्यादेशः जैवातृकः आयुष्मान् चन्द्र आम्रः वैद्यः मेघश्च । जैवातृका जीवद्वत्सा स्त्री ॥ ६७ ॥ **हृभूलाभ्य आणकः** (६८) एभ्य आणकः । हृंग्, हराणकः चौरः । भू भवाणकः गृहपतिः । लांक्, लाणकः हस्ती ॥ ६८ ॥ **प्रियः कित्** (६९) आणकः । प्रींग्श् प्रियाणकः पुत्रः ॥६९॥ **धाल्लूशिङ्घिभ्यः** (७०) एभ्य आणकः । योगविभाग उत्तरार्थः । डुधांग्क् धाणकः दीनारद्वादशभागः हविषां ग्रहः छिद्रपिधानं च । लूग्श् लवाणकः कालः तृणजातिः दात्रं च । शिघु शिङ्घाणकः नासिकामलः ॥ ७० ॥ **शीभीराजेश्चानकः** (७१) एभ्यो धाप्रभृतिभ्यश्चानकः स्यात् । शीङ् शयानकः अजगरः शैलश्च । ( ञिभींक् विभेत्यस्मादिति भयानको भीमो व्याघ्रो वराहो राहुश्च । राजृग् राजानकः क्षत्रियः । डुधांग्क् धानका हेमादिपरिमाणम् ) लूग्श् लवानकः दात्रं देशविशेषश्च । शिङ्घत्यनेनेति शिङ्घानकः श्लेष्मा आयुः पुरीषं च ॥ ७१ ॥ **अणेर्डित्** (७२) आनकः । 'अण शब्दे' । आनकः पटहः ॥ ७२ ॥ **कनेरीनकः** (७३) कनै कनीनकः कनीनिका चाक्षितारिका ॥ ७३ ॥ **गुङ ईधुकएधुकौ** (७४) 'गुङ् शब्दे' । अस्मादेतौ स्याताम् । गवीधुकं नगरं, गवेधुका तृणजातिः ॥ ७४ ॥ **वृतेस्तिकः** (७५) वृतूङ् । वर्त्तिका चित्रकारोपकरणं शकुनिर्द्रव्यगुटिका च ॥ ७५ ॥ **कृतिपुतिलतिभिदिभ्यः कित्** (७६) कृतैत्, कृत्तिका नक्षत्रम् । पुतिलती सौत्रौ पुत्तिका मधुमक्षिका । लत्तिका वाद्यविशेषः गौः गोधा च । गोपूर्वात् गोलत्तिका गृहगोलिका । अवपूर्वात् अवलत्तिका गोधा । आलत्तिका गानप्रारम्भः । भिदृंपी, भित्तिका कुड्यं माषादिचूर्णं शतावरी च नदी ॥ ७६ ॥ **इष्यशिमसि** (७७) एभ्यस्तकक् ॥ इषत् इष्टका मृद्विकारः । अशौटि अष्टकास्तिस्रोष्टम्यः पितृदैवत्यं च । मसैच्; मस्तकं शिरः ॥७७॥ **भियो द्वे च** (७८) अस्मात्तकक् । अस्य च द्वे रूपे स्याताम् । बिभीतकः अक्षः ॥७८॥ **हृरुहिपिण्डिभ्य ईतकः** (७९) हरन्ति रोगान् हरीतकी पथ्या । रोहत्यनेन व्रणादिकं रोहीतकः वृक्षविशेषः । पिडुङ्, पिण्डीतकः करहाटः ॥७९॥ **कुषेः कित्** (८०) ईतकः । कुषीतक ऋषिः ॥८०॥ **बलिबिलिशलिदमिभ्य आहकः** (८१) बल बलाहकः मेघः वातश्च । 'बिलत् भेदने' बिलाहकः वज्रः बाहुलकान्न गुणः । शल शलाहकः वायुः । दमूच् दमाहकः शिष्यः ॥८१॥ **चण्डिभल्लिभ्यामातकः** (८२) चडुङ् कोपे, चण्डातकं नर्त्तक्यादिवासः । भल्लि भल्लातकः वृक्षविशेषकः ॥ ८२ ॥ **श्लेष्मातकाम्रातकामिलातकपिष्टातकादयः** (८३) एते आतकप्रत्ययान्ता निपात्यन्ते । श्लिषेर्मश्च परादिः श्लेष्मातकः कफेलुः । अमेर्वृद्धीरश्चान्तः आम्रातको वृक्षविशेषः । नञः परस्य म्लायतेर्मिल् च अमिलातकं कर्णपुष्पम् । पिषेस्तोन्तश्च पिष्टातकं वर्णचूर्णम् । आदिग्रहणात् कोशातक्यादयो भवन्ति ॥ ८३ ॥ इति इक्कादयो विंशतिसूत्रैः । एवं इति कोपान्त्यप्रत्ययप्रकरणं त्रिषष्ट्या सूत्रैः । **शमिमनिभ्यां खः** (८४) शमूच् शङ्खः कम्बुः निधिश्च । मनिंच् मङ्खः मागधः कृपणः चित्रपटश्च । मङ्खा मङ्गलम् ॥८४॥ **श्यतेरिच्च वा** (८५) शोंच्, शिखा चूडा ज्वाला च । विशिखा आपणः । विशिखः बाणः । शाखा विटपः । विशाखा नक्षत्रम् । विशाखः स्कन्दः ॥ ८५ ॥ **पूमुहोः पुन्मूरौ च** (८६) पूङ् मुहौच् इत्येताभ्यां खः अनयोश्च यथासंभवमिमादेशौ स्याताम् । पुङ्खः बाणबध्नभागः मङ्गलाचारश्च । मूर्खः ॥ ८६ ॥ **अशोर्डित्** (८७) खः अश्नुत इति खमाकाशमिन्द्रियं च । नास्ति खमस्मिन् नखः । शोभनानि खान्यस्मिन् सुखम् । दुष्टानि खान्यस्मिन् दुःखम् ॥८७॥ **उषेः किल्लुक् च** (८८) 'उषू दाहे' अस्मात् कित्खप्रत्ययो लुक् चान्तस्य स्यात् । उषन्त्यस्यामिति उखा स्थाली ऊर्द्धक्रिया वा ॥८८॥ **महेरुच्चास्य वा** (८९) 'मह

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पूजायाम्' इत्यस्मात् खः कित् अन्त लुक् अकारस्य च उकारादेशौ वा स्याताम् । मुखमाननम् । मखः यज्ञ अध्वर्युः इतरश्च ॥ ८९ ॥ **न्युङ्खादयः** (९०) एते खप्रत्ययान्ता निपात्यन्ते । नयतेः खः उन् चान्तः । न्युङ्खाः षडोंकाराः । आदिग्रहणादन्येऽपि ॥ ९० ॥ **मयैधिभ्यामूखेखौ** (९१) मयि एधिभ्यां यथासङ्ख्यमेतौ स्याताम् । मयते उपादेयतां मयूखः रश्मिः । एधते पाल्यमानः एधिखः वराहः ॥ ९१ ॥ इति खोपान्त्यप्रत्ययप्रकरणमष्टाभिः सूत्रैः । **गम्यमिरम्यजिगद्यदिछागडिखडि-गृभृवृस्तृभ्यो गः** (९२) गच्छति मार्गत्रयेण गङ्गा । अमत्यात्मनो भोगहेतुत्वं चन्द्रदर्शनाद्वायुना पराक्रमेण च वृद्धिं अङ्गं देहस्तदवयवश्च । अङ्गः समुद्रः वह्निः राजा च । अङ्गा जनपदः । रमते-ऽस्मिन् रङ्गा नृत्यस्थानम् । अजेर्वी गुणे वेगः त्वरा रेतश्च । गद गद्गः अव्यक्तवाक् । अद्यते अग-स्त्येन अद्गः समुद्रः अग्निः पुरोडाशश्च । छोंच् छागो बस्तः । गड सिञ्चति मूत्रेण भूमिं गड्गः मृग-जातिः । 'खडण् भेदने' । खड्यते शृङ्गार्थिभिः खड्यते शत्रुरनेन खड्गः मृगविशेषः असिश्च । गिरति निरवद्यमन्नं गर्गः ऋषिः । बिभर्ति गौरीं पुष्णाति पद्मानि भर्गः रुद्रः सूर्यश्च । व्रियते बहुभिः वर्गः समूहः । औस्वृ स्वरति पुण्याढ्यान् स्वर्गः ॥९२॥ **पूमुदिभ्यां कित्** (९३) गः । पूग्श् पूगः सङ्घः क्रमुकश्च । मोदतेऽनेन पथ्याशी मुद्गः धान्यविशेषः ॥ ९३ ॥ **भृवृभ्यां नोऽन्तश्च** (९४) आभ्यां किद्गः नोऽन्तश्च स्यात् । भ्रियते पुष्पादिभिः भृङ्गः पक्षी भ्रमरः वर्णविशेषः लवङ्गश्च । वृग्ट् वृङ्ग उप-पतिः ॥९४॥ **द्रमो णिद्वा** (९५) अस्माद्गः स च णित् । द्रमति सत्वरं द्राङ्गं शीघ्रं द्राङ्गः प्रांशुः । द्रङ्गो नगरम् द्रङ्गा शुल्कशाला ॥९५॥ **शृङ्गशार्ङ्गादयः** (९६) एते गप्रत्ययान्ता निपात्यन्ते । शृश् , इत्यस्य नोन्तो ह्रस्वश्च । शृङ्गं विषाणं शिखरं च । तस्यैव नोन्तो वृद्धिश्च । शार्ङ्गः पक्षी । आदिशब्दात् ह्रंग् , ह्रार्गः परितोषः । मृत्, मार्गः पन्थाः ॥९६॥ **तडेरागः** (९७) 'तडण् आघाते' तड्यतेऽनिला-दिना तडागं सरः ॥९७॥ **पतितमितम्पृकृशृल्वादेरङ्गः** (९८) पत्लृ पतङ्गः शलभः सूर्यः शालिवि-शेषश्च । तमूच् तमङ्गः हर्म्यनिर्यूहः । तॄ तरङ्गः । पॄ परङ्गः खगः वेगश्च । कृत् करङ्गः कर्मशीलः । शृश् , शरङ्गः पक्षिविशेषः । लूग्श् लवङ्गः सुगन्धिवृक्षः । आदिग्रहणादन्येभ्योऽपि ॥९८॥ **सृवृनृभ्यो णित्** (९९) गः । सारङ्गः हरिणः चातकः शबलवर्णश्च । वृग्ट् वारङ्गः काण्डखड्गयोः शल्यं शकुनिश्च नृश् नारङ्गः वृक्षविशेषः ॥९९॥ **मनेर्मतमातौ च** (१००) मन्यते संसारमसारं, मन्यते राजभिः मतङ्ग ऋषिः हस्ती च । मातङ्गः हस्ती अन्त्यजातिश्च ॥१००॥ **विडिविलिकुरिमृदिपिशिभ्यः कित्** (१०१) एभ्यः किदङ्गः स्यात् । 'विड आक्रोशे' विडङ्गः वृक्षजातिः गृहावयवश्च । 'विलत् वरणे' 'वि(बि)लत् भेदने' वा विलङ्गः औषधम् । कुरत् कुरङ्गः मृगः । कुरङ्गी भोजकन्या । मृदश् मृदङ्गः मुरजः । पिशत् पिशङ्गः वर्णः ॥ १०१ ॥ **स्फुलिकलिपल्याभ्य इङ्गक्** (१०२) स्फुल्यादिभ्य आदन्तेभ्यश्च इङ्गक् स्यात् । 'स्फुलत् सञ्चये च' । स्फुल्यतेऽग्निना वायुवशात् । स्फुलिङ्गः स्फुलिङ्गा च अग्निकणः । कलि, कलिङ्गः राजा । कलिङ्गाः जनपदः । पल पलिङ्गः ऋषिः शिला च । आदन्त-पातेः पिङ्गः भातेः भिङ्गः द्वावपि वर्णविशेषौ । ददाते ददाति निर्णयं दिङ्गोऽध्यक्षः । दधाति ऐश्वर्यं धिङ्गः श्रेष्ठी । लाते लायते लिङ्गी अनेन लिङ्गं स्त्रीत्वादि हेतुश्च । आलायते वादकैः आलिङ्गः वाद्य-विशेषः । श्यतेः शिङ्गः वनस्पतिः किशोरश्च ॥ १०२ ॥ **भलेरिदुतौ चातः** (१०३) भलिण् अस्मादिङ्गक् आकारस्य इकारोकारौ स्याताम् । भल्यतेऽङ्गारादिकमनेन भिलिङ्गः कर्मारोपकरणम् । भालयते तत्त्वं भुलिङ्गः ऋषिः पक्षी (च) । भुलिङ्गाः साल्वावयवाः ॥१०३॥ **अदेर्णित्** (१०४) इङ्गक् । अत्ति वियोगिप्राणान् आदिङ्गः वाद्यजातिः ॥१०४॥ **उचिलिङ्गादयः** (१०५) एते इङ्गक्प्रत्ययान्ता

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निपात्यन्ते । उत्पूर्वाद्वलेरस्य इत्त्वं च । उच्चलति पित्तमस्मिन् उच्चिलिङ्गः दाडिमी । आदिग्रहणादन्येऽपि ॥१०५॥ **माङस्तुलेरुङ्गक् च** (१०६) माङ्पूर्वात्तुलण् इत्यस्मादुङ्गक्इङ्गक्प्रत्ययौ स्याताम् । मातोलिकलिङ्गलिंकादिफलेन सदृशं फलमाकारि मातुलुङ्गः मातुलिङ्गश्च बीजपूरः ॥ १०६ ॥ **कमितमिशमिभ्यो डित्** (१०७) उङ्गक् । कमूङ्, कङ्गा जनपदः । तमूच् तुङ्गः महावर्ष्मा । शमूच् शुङ्गः मुनिः । शुङ्गाः कन्दल्यः नवांकुराः । शुङ्गा वनिता ॥१०७॥ **सर्त्तेः सुर् च** (१०८) अस्मादुङ्गः । सुर्चास्यादेशः । सुरङ्गा गूढमार्गः ॥ १०८ ॥ इति गोपान्त्यप्रकरणं सप्तदशभिः सूत्रैः । **स्थार्तिजनिभ्यो घः** (१०९) ष्ठां स्थाघः गाधः । ऋं, अर्घः मूल्यं मानप्रमाणं पादोदकादि च । जनैचि जङ्घा देहावयवः ॥१०९॥ **मघाघङ्घाघदीर्घादयः** (११०) एते घान्ता निपात्याः । 'मघुङ् कैतवे' । मंघेर्नलोपश्च । मघा नक्षत्रम् । हन्तेर्हस्य घश्च । घङ्घः घस्मरः । घङ्घा काङ्क्षा । अमेर्लुक् च अघं पापम् । दृणातेर्दीर् च दीर्घः आयत उच्चश्च । आदिशब्दादन्येपि ॥ ११० ॥ **सर्तेरघः** (१११) सरति मधुपटलं सरघा मधुमक्षिका ॥ १११ ॥ इति घोपान्त्यप्रत्ययप्रकरणं त्रिभिः सूत्रैः । **कुपूसमिणभ्यश्चट् दीर्घश्च** (११२) टकारो ङ्यर्थः । कुङ् कूचः हस्ती । कूची प्रमदा चित्रभाण्डं उदश्विद्विकारश्च । पूग्श्, पूचः पूची मुनिः । इण्क्, समीच ऋत्विक् । समीचं मिथुनयोगः । समीची पृथ्वी उदीची च । दीर्घवचनाद्गुणो न स्यात् ॥११२॥ **कूर्चचूर्चादयः** (११३) एते चट्प्रत्ययान्ता निपात्यन्ते । कवतेः किरतेः करोतेर्वा ऊरादेशश्चान्तस्य । कूर्चं श्मश्रु आसनं तन्तुवायोपकरणं यतिपवित्रकं च । कूर्चमिव कूर्चकः कूर्चिकेति च भवति । चरतेश्चोरयतेर्वा चूरादेशश्च । चूर्चः बलवान् । आदिशब्दादन्येऽपि ॥ ११३ ॥ **कल्यविमदिमणिकुकणिकुटिकृभ्योऽचः** (११४) कलि, कलचः गणकः । अव, अवचः उच्चैस्तरः । मदैच् मदचः मत्तः । मण मणचः शकुनिः । कुङ् कवचं चर्म । कणन्त्यनेन कणचः कणयः । कुटत्, कुटचः वृक्षजातिः । कृत्, करचः धान्यावपनम् ॥ ११४ ॥ **क्रकचादयः** (११५) एते अच्प्रत्ययान्ता निपात्यन्ते । क्रमेः कश्च । क्रकचः करपत्रः । आदिशब्दादन्येपि ॥ ११५ ॥ **पिशेराचक्** (११६) पिशक् पिशाचः व्यन्तरजातिः ॥ ११६ ॥ **मृत्रपिभ्यामिच्** (११७) म्रियन्ते हारीताः पक्षिणोऽनेन मरिचं ऊषणम् । त्रपौषि त्रपिचा कुथा ॥ ११७ ॥ **म्रियतेरीचण्** (११८) म्रियते रावणेन विना मारीचः रावणमातुलः ॥ ११८ ॥ **लषेरुचः कश्च** (११९) लष्यते भृङ्गैः लकुचः वृक्षजातिः ॥ ११९ ॥ **गुडेरूचट्** (१२०) गुडत्, गडूची छिन्नरुहा । कुटादित्वात् ङित्त्वम् ॥१२०॥ **सिवेर्डित्** (१२१) ऊचट् । सीव्यति परदोषान् सीव्यति वृक्षादिना सूचः पिशुनः स्तिभिः पल्लवाङ्कुर इति । सूची सन्धानकरणी ॥ १२१ ॥ **चिमेर्डोचडश्चौ** (१२२) आभ्यां प्रत्येकमेतौ स्याताम् । वचनभेदान्न यथासङ्ख्यम् । चिंग्ट्, चोचः वृक्षविशेषः । चोचं वल्कं च वल्कलम् । चञ्चा तृणमयः पुरुषः । डुमिंग्ट्, मोचा कदली । मञ्चः पर्यङ्कः ॥ १२२ ॥ **कुटिकुलिकल्युदिभ्य इञ्चक्** (१२३) कुटेः, कुटिञ्चः क्षुद्रकर्कटः । कुलिञ्चः राशिः । कलेः, कलिञ्चः उपशाखावयवः । 'उद आघाते' सौत्रः । उदिञ्चः कोणः वीणादिवादनं परपुष्टश्च ॥ १२३ ॥ इति चोपान्त्यप्रत्ययप्रकरणं द्वादशभिः सूत्रैः । **तुदिमदिपद्यदिगुगमिकचिभ्यश्छक्** (१२४) तुच्छः स्तोकः । मच्छः मत्स्यः प्रमत्तश्च । मत्ता स्त्री । पद्यते गृहाद्यर्थिभिः पच्छः शिला । अत्ति मलं अच्छः निर्मलः । गुङ्, गुच्छः स्तबकः । गच्छः क्षुद्रवृक्षः । कचते गतिं कच्छः कूर्मपादः कुक्षिः नद्यवकुटारश्च । कच्छा जनपदः । बाहुलकात् कत्वाभावः ॥ १२४ ॥ **पीपूङो ह्रस्वश्च** (१२५) पीङ् च, पिच्छं पक्षिपत्रम् । पिच्छः गुणविशेषः । यद्वशात् पिच्छल उच्यते ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुच्छः वालधिः ॥ १२५ ॥ **गुलुञ्छपिलिपिञ्छैधिच्छादयः** (१२६) एते छप्रत्ययान्ता निपात्यन्ते । 'गुडत् रक्षायाम्' गुडेर्ल उम् चान्तः । गुलुञ्छः स्तबकः । 'पील प्रतिष्टम्भे' । पीलेरपि नोऽन्तो ह्रस्वश्च । पिलिपिञ्छः रक्षोविशेषः । एधेरिट् च एधिच्छः नगः । आदिग्रहणात् पिञ्छादयोऽपि भवन्ति ॥ १२६ ॥ इति छोपान्त्यप्रत्ययास्त्रिभिः सूत्रैः । **वियो जक्** (१२७) वींक् वीयते जायतेऽङ्कुराद्यनेन बीजं उत्पत्तिहेतुः ॥ १२७ ॥ **पुवः पुन् च** (१२८) पूग् इत्यस्माज्जक् पुन् इति चास्यादेशः । पूयते स्वामिना पुञ्जः राशिः ॥ १२८ ॥ **कुवः कुब्कुनौ च** (१२९) कुङ् इत्यस्माज्जक् इमौ चास्यादेशौ स्याताम् । कुब्जः खर्वः गुच्छश्च । कुञ्जः हनुः पर्वतैकदेशश्च । निकुञ्जः गहनम् ॥ १२९ ॥ **कुटेरजः** (१३०) कुटत् कुटजः वृक्षविशेषः । कुटादित्वात् ङित्वम् कुटजी ॥ १३० ॥ **भिषेर्भिषभिष्णौ च वा** (१३१) भिषिः सौत्रः । अस्मादजः इमौ चास्यादेशौ स्याताम् । भिषजः । आदेशबलान्न गुणः । भिष्णजः वैद्यः । भैषजमौषधम् ॥ १३१ ॥ **मुर्वेर्मुर् च** (१३२) मुर्वे इत्यस्मादजः मुर् चादेशः । मुरजः मृदङ्गः ॥ १३२ ॥ **बलेर्वोन्तश्च वा** (१३३) बल्वजः मुञ्जविशेषः । बलजा सबुसो धान्यपुञ्जः ॥ १३३ ॥ **उटजादयः** (१३४) एतेऽजप्रत्ययान्ता निपात्यन्ते । वटेर्वस्योत्वं च । उटजं मुनिकुटीरः । आदिशब्दात् भूर्जरुजादयो भवन्ति ॥ १३४ ॥ **कुलेरिजक्** (१३५) कुलन्ति संहतीभवन्ति कुलिजं मानम् ॥ १३५ ॥ **कृगोऽञ्जः** (१३६) करोति पापापनयं करञ्जः वृक्षजातिः ॥ १३६ ॥ इति जोपान्त्यप्रत्यया दशभिः सूत्रैः । **झमेर्झः** (१३७) 'झमू अदने' । इत्यस्मात् झः । झमति सन्तापं झञ्झा वृष्टियुग्वातः । ॥ १३७ ॥ इति झोपान्त्यप्रत्यय एकेन सूत्रेण । **लुषेष्टः** (१३८) 'लुष स्तेये' । अस्मात् टः स्यात् । लोष्टः मृत्पिण्डः ॥ १३८ ॥ **नमितनिजनिवनिसनो लुक् च** (१३९) एभ्यष्टः । एषामन्तस्य च लुक् स्यात् । णमं नटः । तनूयी तटं कूलम् । जनैचि जटा ग्रथितकेशसंघातः । वन वटः न्यग्रोधः । षण सटा अग्रथितः केशसंघातः ॥ १३९ ॥ **जनिपणिकिजुभ्यो दीर्घश्च** (१४०) एभ्यः टः दीर्घश्चैषां गुणापवादः स्यात् । जाण्टः पाण्टः पक्षिविशेषावेतौ । किजू सौत्रौ । कीटः क्षुद्रजन्तुः । जूटः मौलिः ॥ १४० ॥ **घटाघाटाघण्टादयः** (१४१) एते टान्ता निपात्याः । हन्तेर्यथा घघाघनश्च । घटा वृन्दम् । घाटा स्वाङ्गम् । घण्टा वाद्यविशेषः । आदिग्रहणात् छटादयोऽपि ॥ १४१ ॥ **दिव्यविश्रुकुकर्बिशकिकङ्किकृपिचपिचमिकम्येधिकर्किमर्किकक्खितृकृसृभृवृभ्योऽटः** (१४२) दिवूच् देवटः देवकुलविशेषः शिल्पी च । अवन्ति गच्छन्ति विरक्ता जलार्थिनो वाऽस्मिन् अवटः प्रपातः कूपश्च । श्रुंट् श्रूयते राजचिह्नतया श्रवटः छत्रम् । कुक् कवटः उच्छिष्टम् । 'कर्ब गतौ' कर्बटं क्षुद्रपत्तनम् । शक्लृंट् शकटम् अनः । 'ककुङ् गतौ' कङ्कटः सन्नाहः । कङ्कटं सीमा । कृपौङ् कर्पटं वासः । चप (चपति) सान्त्वयति धातुवादिनः चपटः रसः । चमू चमटः वत्सरः । कमूङ् काम्यते हास्यप्रियैः कमटः वामनः । एधि एधटः वल्मीकः । कर्किमर्की सौत्रौ । कर्कटः कपिलः कुलीरश्च, कर्कटी त्रपुसी, मर्कटः कपिः क्षुद्रजन्तुश्च । 'कक्ख हसने' कक्खति मृदून् कक्खटः कर्कशः । तॄ, तरटः पीनः । डुकृंग् करटः काकः करिकपोलश्च । सृं सरटः कृकलासः । टुडुभृंग्क् भरटः प्लवविशेषः भृत्यः कुलालश्च । वृगट् वरटः क्षुद्रधान्यं प्रहारश्च ॥ १४२ ॥ **कुलिविलिभ्यां कित्** (१४३) अटः । कुल कुलटा बन्धकी । विलत् विलटा नदी ॥ १४३ ॥ **कपटकीकटादयः** (१४४) एते अटान्ता निपात्यन्ते । कम्पेर्नलोपश्च । कम्पते सदाचारोऽनेन कपटं दम्भः । ककेरत ईच 'ककि लौल्ये' ककते धनविषये कीकटः कृपणः । आदिग्रहणात् लघट-



Jain Education International For Personal & Private Use Only www.jainelibrary.org

पर्पटादयः । लंघते निःस्पृहत्वम् ॥ १४४ ॥ **अनिशृपृवृललिभ्य आटः** (१४५) अनक् अनाटः शिशुः । शृश् शराटः शकुन्तः । पृश् पराटः आयुक्तः । वृङ्श् वराटः सेवकः । 'ललिण् ईप्सायाम्' । लल्यते तिलकादिना ललाटम् ॥ १४५ ॥ **सृसृपेः कित्** (१४६) आटः । सृं सृाटः पुरःसरः सेवकः । सृप्लं सृपाटः अल्पः कुमुदादिपत्रं च । सृपाटी उपानत् कुप्यं अल्पपुस्तकश्च ॥ १४६ ॥ **किरो लश्च वा** (१४७) किरतेः किदाटः रस्य लो वा । किलाटः भक्ष्यविशेषः । किराटः वणिक् म्लेच्छश्च ॥ १४७ ॥ **कपाटविराटशृङ्गाटप्रपुनाटादयः** (१४८) एते आटान्ता निपात्याः । कम्पेर्नलोपश्च । कपाटः अररिः 'जपादीनां पो वः' ( २।३।१०५ ) इति वत्वे कवाटः । वृङ इत्वं च विराटः राजा । श्रयतेः शृङ्ग् च शृङ्गाटं जलविशेषः विपणिमार्गश्च । प्रपूर्वात् पुर्णेनश्च । 'पुणत् शुभे' प्रपुनाटः एडगजः । आदिशब्दात् खल्वाटादयः । खलन्ति बिल्वादीन्यस्मिन् ॥ १४८ ॥ **चिरेरिटो भ् च** (१४९) चिरेः सौत्रादिटो भश्चान्तादेशः स्यात् । चिरिणोति हिनस्ति पित्तं च चिर्भिटी वालुङ्की ॥ १४९ ॥ **टिण्टश्चर् च वा** (१५०) चिरेष्टित् इण्टश्चर् इति वा स्यात् । हिनस्ति कामुकान् चरिण्टी चिरिण्टी च प्रथमवयाः स्त्री ॥ १५० ॥ **तृकृकृपिकम्पिकृषिभ्यः कीटः** (१५१) एभ्यः कित् ईटः स्यात् । तिरीटः कूलवृक्षः मुकुटं वेष्टनं च । कृत् किरीटं मुकुटं हिरण्यं च । कृपौङ् कृपीटं हिरण्यं जलं च । कपूङ् कम्पीटं कम्पः कम्प्रं च । कृषींत् कृषीटं जलम् ॥ १५१ ॥ **खञ्जेररीटः** (१५२) 'खजु गतिवैकल्ये' खञ्जरीटः खञ्जनः ॥ १५२ ॥ **गृजृदृवृभृभ्य उट उडश्च** (१५३) भिन्नविभक्तिकनिर्देश उटस्योत्तरत्रानुवृत्त्यर्थः । अप्रकृतस्याप्युडस्येह विधानं लाघवार्थम् । 'गृश् शब्दे' गरुटः गरुडश्च गरुत्मान् । जृष् च जरुटः जरुडश्च वनस्पतिः । दृश् दरुटः दरुडश्च बिडालः । 'वृश् भरणे' । वरुटः वरुडः मेषः । 'भृश् भर्जने च' । भरुटः भरुडश्च मेष एव ॥ १५३ ॥ **मङ्केर्मकमुकौ च** (१५४) 'मकुङ् मण्डने' । इत्यस्मात् उटः प्रत्यय इमावादेशौ च स्याताम् । मकुटः मुकुटश्च ॥ १५४ ॥ **नर्कुटकुक्कुटोत्कुरुटमुरुटपुरुटादयः** (१५५) एते उटान्ता निपात्यन्ते । नृतेः कश्च । नर्कुटः बन्दी । कुकेः कोन्तश्च । कुक्कुटः कृकवाकुः । उत्पूर्वात्कुगः कुर् च । उत्कुरुटः कचवरपुञ्जः । मुरिपुर्योर्गुणाभावश्च । मुरुटः यद्वेण्वादिमूलमृजु कर्तुं न शक्यते । पुरुटः जलतन्तुः । आदिशब्दात् स्थपुटादयः ॥ १५५ ॥ **दुरो द्रः कूटश्च दुर् च** (१५६) दुर् पूर्वात् द्रणातेः कित् ऊट पुटश्च प्रत्ययौ दुर् चास्यादेशः स्यात् । दुर्दुरूटः दुर्मुखः । दुर्दुरुटः अदेशकालवादी ॥ १५६ ॥ **बन्धेः** (१५७) बन्धंश्, अस्मात् किदूतः । बध्नाति भोगान् ब(व)धूटी ॥ १५७ ॥ **चपेरेटः** (१५८) चप्यते शान्तः क्रियतेऽनेन चपेटः हस्ततलाहतिः ॥ १५८ ॥ **ग्रो णित्** (१५९) गृत् अस्मात् णिदेटः । गारेटः ऋषिः ॥ १५९ ॥ **कृशाकृशाखेरोटः** (१६०) करोटः भृत्यः शिरः कपालं च । करोटं च भाजनविशेषः । शकोटः बाहुः । 'शाखृ व्याप्तौ' शाखोटः वृक्षविशेषः ॥ १६० ॥ **कपोटबकोटाक्षोटकर्कोटादयः** (१६१) एते ओटान्ता निपात्यन्ते । 'कबृङ् वर्णे' । पश्च । कपोटः वर्णः कितवश्च । वचेः कश्च । बकोटः बकः । अश्नातेः सश्च परादिः । अक्षोटः फलवृक्षः । कृगः कोऽन्तश्च । कर्कोटः नागः । आदिशब्दादन्येपि ॥ १६१ ॥ इति टोपान्त्यप्रत्ययप्रकरणं चतुर्विंशत्या सूत्रैः । **वनिकणिकाशृयुषिभ्यष्ठः** (१६२) 'वन भक्तौ' वन्यते स्वामी अनेन वण्ठः अनिविष्टः । 'कण शब्दे' । कण्ठः कन्धरा । काशृङ्, काशतेऽग्निसंपर्कात् काष्ठं दारु । काष्ठा दिग् अवस्था च । 'उषू दाहे' । ओष्ठः दन्तच्छदः ॥ १६२ ॥ **पीविशिकुणिपृषिभ्यः कित्** (१६३) ठः । पीङ्च् पीठमासनम् । विशंत् विष्ठा पुरीषम् । कुणत्,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कुण्ठः अतीक्ष्णः । पृषू पृष्ठः अङ्कुशः शरीरैकदेशश्च ॥ १६३ ॥ **कुषेर्वा** (१६४) ठः । कित् । कुष्ठं व्याधिः गन्धद्रव्यं च । कोष्ठः कुसूल उदरं च ॥ १६४ ॥ **शमेर्लुक् च वा** (१६५) शमूच् इत्यस्मात् ठः लुक् चान्तस्य वा स्यात् । शठः धूर्तः । शण्ठः स एव । नपुंसकं च ॥ १६५ ॥ **पष्ठैधिठादयः** (१६६) एते ठान्ता निपात्यन्ते । पुषेः कित् ठः षषादेशश्च । पष्ठः प्रस्थः पर्वतश्च । एधतेरिठः एधिठं वनम् । एधिठः गिरिसरिद्ध्रदः । आदिशब्दादन्येऽपि ॥ १६६ ॥ **मृजॄशॄक-म्यमिरमिरपिभ्योऽठः** (१६७) मृंत् मरठः दध्यतिद्रवीभूतं, कृमिजातिः, कण्ठः, प्राणश्च । 'जॄष्च् जरसि' । जरठः कठोरः । शॄश् शरठः आयुधं पापं क्रीडनशीलश्च । कमूङ् कमठः भिक्षा-भाजनं कूर्मास्थि कच्छपः मयूरो वामनश्च । अम, अमठः प्रकर्षगतिः । रमिं, रमठः देशः कृमि-जातिः क्रीडनशीलः म्लेच्छः देवश्च चिलातानाम् । 'रप व्यक्ते वचने' । रपठः विद्वान् मण्डूकश्च ॥ १६७ ॥ ठोपान्त्याः षड्भिः सूत्रैः । **पञ्चमाड्डः** (१६८) पञ्चमान्ताद्धातोर्डः स्यात् । 'षन भक्तौ' षण्डः वनं वृषभश्च । बाहुलकात्सत्वाभावः । भण भण्डः प्रहसनकरः बन्दी च । चण् चण्डः क्रूरः । पणि पण्डः शण्ढः । गणण् गण्डः पौरुषयुक्तः पुरुषः । 'मण शब्दे' मण्डः रश्मिरग्रमन्न-विकारश्च । वन वण्डः अल्पशेफः निश्चर्माग्रशिश्नश्च । शमूच् शण्डः उत्सृष्टः पशुः ऋषिश्च । दण्डः वनस्पतिप्रतानः राजशासनं नालं प्रहरणं च । रमिं रण्डः पुरुषः रण्डा स्त्री, रण्डमन्तःकरणम् । त्रयमपि (स्व) संबन्धिशून्यमेवमुच्यते । तमेस्तनेर्वा तण्डः ऋषिः । वितण्डा तृतीयकथा । गमेर्गण्डः कपोलः । भामि भाण्डमुपस्करः ॥ १६८ ॥ **कण्यणिखनिभ्यो णिद्वा** (१६९) 'कण शब्दे' काण्डः शरः फलसंघातः पर्व च । कण्डं भूषणं पर्व च । आण्डः मुष्कः, अण्डः स एव योनि-विशेषश्च । खाण्डः कालेक्षुरसाश्रयो गुडः । खण्ड इक्षुविकारोऽन्यः । खण्डं शकलम् ॥ १६९ ॥ **कुगुहुनीकुणितुणिपुणिमुणिशुन्यादिभ्यः कित्** (१७०) डः । कुङ् कुडः घटः हलं च । गुङ् गुडः गोल इक्षुविकारश्च, गुडा सन्नाहः । हुंक् हुडः मूर्खः मेषश्च । णींग् नीडः कुलायः । कुणत् कुण्डं भाजनं जलाधारविशेषश्च । कुण्डः भर्त्तरि जीवति जारेण जातः अपक्लिन्द्रियश्च । 'तुणत् कौटिल्ये' तुण्डं मुखम् । 'पुणत् शुभे' पुण्डः भिन्नवर्णः । 'मुणत् प्रतिज्ञाने' मुण्डः परिवापितकेशः । 'शुनत् गतौ' शुण्डा सुरा हस्तिहस्तश्च । आदिशब्दादन्येभ्योऽपि स्यात् ॥ १७० ॥ **ऋसृतॄव्या-लिह्यविचमिवमियमिचुरिकुहेरडः** (१७१) ऋंक् अरडः तरुः । सृं, सरडः भुजपरिसर्प-स्तरुश्च । तॄ, तरडः वृक्षजातिः । व्येंग् व्याडः दुःशीलः हिंस्रः पशुः भुजगश्च । लिहींक् लेहडः श्वा चौर्यग्रासी च । अव अवडः क्षेत्रविशेषः । चमू चमडः पशुजातिः । टुवमू वमडः लूताजातिः । यमू यमडः वनस्पतिः युगलं च । चुरण् चोरडः चौरः । कुहणि कुहडः उन्मत्तकः ॥ १७१ ॥ **विहडकहोडकुरडकेरडक्रोडादयः** (१७२) एते डान्ता निपात्यन्ते । विपूर्वात् हन्तेरनो लुक् च । विहडः शकुनिः गूढचित्तश्च । कषेर्हः प्रत्ययोऽकारस्य चौकारः कहोडः ऋषिः । कुरेर्गुणाभावश्च कुरडः मार्जारः । किरतेः केर् च । केरडः त्रैराज्ये राजा । क्रमः कित्प्रत्ययोऽकारस्य चौकारः क्रोडः किरिः अङ्कश्च । आदिग्रहणात् लहोडादयः ॥ १७२ ॥ **जॄकॄतॄशॄसृभृवृभ्योऽण्डः** (१७३) जॄष् जरण्डः अतीतवयाः । कॄत् करण्डः समुद्रः कृमिजातिश्च । तॄ तरण्डः प्लवः वायुश्च । शॄश् शरण्डः हिंस्रः आयुधं च । सृ सरण्डः कृमिजातिः इषीका वायुः भूतसंघातः तृणसमवायश्च । डुडुभृंगक् भरण्डः भाण्डजातिः पक्षी च । वृग्ट् वरण्डः कुड्यं तृणकाष्ठादिभारश्च ॥ १७३ ॥ **पूगो गादिः** (१७४) अस्माद्गादिरण्डः स्यात् । पोगण्डः विकलाङ्गः युवा च ॥ १७४ ॥ **वनेस्त च** (१७५)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अस्मादण्डस्तकारश्चान्तादेशः स्यात् । वतण्डः ऋषिः ॥ १७५ ॥ **पिचण्डैरण्डखरण्डादयः** (१७६) एते डप्रत्ययान्ता निपात्यन्ते । पिचेरगुणत्वं च पिचण्डः लघुलगुडः । ईरेर्गुणश्च एरण्डः पञ्चाङ्गुलः । खाद, अन्त्यस्वरादेररादेशश्च खरण्डः सर्वर्तुः । आदिग्रहणात् कूष्माण्डशयण्डशयाण्डादयः ॥ १७६ ॥ **लगेरुडः** (१७७) लगे सङ्गे अस्मादुडः स्यात् । लगुडः यष्टिः । गृ जृ दृ वृ भृभ्यस्तु डडो विहित एव ॥ १७७ ॥ **कुसेरुण्डक्** (१७८) 'कुसच् श्लेषे' अस्मादुण्डक् । कुस्यति शरेण कुसुण्डः वपुष्मान् ॥ १७८ ॥ इति डोपान्त्या एकादशभिः सूत्रैः । **शमिषणिभ्यां ढः** (१७९) शण्ढः नपुंसकम् । षण्ढः स एव । बाहुलकात् सत्वाभावः ॥ १७९ ॥ **कुणेः कित्** (१८०) ढः । कुणत् कुण्ढः धूर्त्तः । बाहुलकान्न दीर्घः ॥ १८० ॥ **नञः सहेः षा च** (१८१) नञ्पूर्वात् सहेर्ढः षा चास्यादेशो भवति । आषाढं नक्षत्रम् ॥ १८१ ॥ इति ढोपान्त्यास्त्रिभिः सूत्रैः । **इणुर्विशावेणिपृकृवृतृजृदृसृपिपणिभ्यो णः** (१८२) इणक् । एणः कुरङ्गः । उवैं उर्णा मेषादिलोम भ्रुवोरन्तरावर्त्तश्च । शोंच् शाणः परिमाणं शस्त्रतेजनं च । वेणृग् वेण्णा कृष्णवेण्णा च नाम नदी । पृश् पर्णम् । कृत् कर्णः श्रवणं कौन्तेयश्च । वृग्श्, वर्णः शुक्लादिः ब्राह्मणादिः अकारादिः यशः स्तुतिः प्रकारश्च । तृ तर्णः वत्सः । जृष्च् जर्णः चन्द्रमाः वृक्षः कर्कः क्षयधर्मा शकुनिश्च । दृंङ्त् दर्णः पर्णम् । सृप्लं सर्णः सरीसृपजातिः । पणि पण्णं व्यवहारः ॥ १८२ ॥ **घृवीह्वाशुष्युषितृषिकृष्यर्त्तिभ्यः कित्** (१८३) णः । घृ घृणा कृपा । वींक् वीणा वल्लकी । ह्वेंग् हूणः म्लेच्छजातिः । शुषंच् शुष्णः निदाघः । उषू उष्णः स्पर्शविशेषः । ञितृषच् तृष्णा पिपासा । कृषींत् कृष्णो विष्णुः वर्णः मृगश्च । ऋंक् ऋणं वृद्धिधनं जलदुर्गभूमिश्च ॥ १८३ ॥ **द्रोर्वा** (१८४) णः कित् । द्रुणा ज्या । द्रोणः चतुराढकः पाण्डवाचार्यश्च । द्रोणी गौरादित्वात् ङीः ॥ १८४ ॥ **स्थाक्षुतोरूच** (१८५) एभ्यो णः ऊकारश्चैषामन्तादेशः । ष्ठां स्थूणा तन्तुधारिणी तन्तुवायोपकरणम्, गृहधारिणी स्थूणा स्तम्भ; शरीरधारिणी स्थूणा शिरा । तिष्ठति पूजकगृहे स्थूणा लोहप्रतिमा । तिष्ठतः अपथ्यादिषु स्थूणा व्याधिविशेषौ । टुक्षुक् क्षूणं अपराधः । तुंक् तूणा इषुधिः ॥ १८५ ॥ **भ्रूणतृणगुणकार्कर्णतीक्ष्णश्लक्ष्णाभीक्ष्णादयः** (१८६) एते णप्रत्ययान्ता निपात्यन्ते । भृगो भ्रू च । भ्रूणः निहीनः अर्भकः स्त्रैणगर्भश्च । तरतेर्ह्रस्वश्च तृणं शष्पादिः । गायतेर्गमेर्गृणातेर्वा गुभावश्च गुणः उपकारः आश्रितः अप्रधानं ज्या च । कृगो वृद्धिः कोऽन्तश्च कार्कर्णः शिल्पी । तिजेर्दीर्घः सश्च परादिः तीक्ष्णं निशितम् । श्लिषेः सोन्तोचेतः श्लक्ष्णं अकर्कशं सूक्ष्मं च । अभिपूर्वादिषेः किच्च सोन्तः अभीक्ष्णं अजस्रम् । आदिग्रहणादन्येऽपि ॥ १८६ ॥ **तृकृशृपृभृवृश्रुरुरुहिलक्षिविचक्षिचुक्किबुक्कितङ्ग्यङ्गिमङ्किकङ्किचरिसमीरेरणः** (१८७) (एभ्योऽणः) तरणम् । करणम् । शरणम् गृहम् । परणम् । भरणम् । वरणः वृक्षः सेतुबन्धश्च । वरणं कन्याप्रतिपादनम् । श्रुंट् श्रवणः कर्णः भिक्षुश्च । रुक् रुङ् वा रवणः करभः अग्निः द्रुमः वायुः भृङ्गः शकुनिः सूर्यः घण्टा च । रुहं रोहणः गिरिः । लक्षीण् लक्षणं व्याकरणं शुभाशुभसूचकं रेखातिलकादि अङ्कनं च । विपूर्वः चक्षिक् विचक्षणः विद्वान् । 'चुक्कण् व्यथने' चुक्कणः व्यायामशीलः । 'बुक्क भाषणे' बुक्कणः श्वा वावदूकश्च । 'तगु गतौ' तङ्गणा जनपदः । अगु अङ्गणं अजिरम् । मकुङ् मङ्कण ऋषिः । ककुङ् कङ्कणं प्रतिसरः । चर चरणः पादः । समपूर्वक ईरिक् समीरणः वायुः ॥ १८७ ॥ **कृगृपृकृपिवृषिभ्यः कित्** (१८८) । अणः । किरणः रश्मिः । गिरणः मेघः आचार्यः ग्रामश्च । पुरणः समग्रयिता समुद्रः पर्वतविशेषश्च । कल्प्यते धनरक्षार्थे कृपणः कीनाशः । वृषू वृषणः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुष्कः ॥ १८८ ॥ **धृषिवहेरिश्चोपान्त्यस्य** (१८९) आभ्यां किदणः इश्चोपान्त्यस्य स्यात् । ञिधृषाट् धिषणः बृहस्पतिः । धिषणा बुद्धिः । विहणः ऋषिः पाठश्च ॥ १८९ ॥ **चिक्कणकुक्कणकृकणकुङ्कणत्रवणोल्वणोरणलवणवङ्क्षणादयः** (१९०) एते किदणन्ता निपात्यन्ते । चिनोतेश्चिक् च । चिक्कणः पिच्छलः । कुकिक्कगोः कोऽन्तश्च । कुक्कणः शकुनिः । कृकणः ऋषिः । कुकेः स्वरान्नोऽन्तश्च । कुङ्कणा जनपदः । त्रपेर्वश्च । त्रवणः देशः । वलेर्वस्य उत् चोऽन्तश्च । उल्वणः स्फारः । अर्त्तेरुर् च उरणः मेषः । लीयते श्लिष्यते स्वयतेर्वा लवादेशश्च लवणं गुणः द्रव्यं च । वङ्क्षेः सः परादिः नलोपाभावश्च वङ्क्षणः ऊरु अङ्कमूलसन्धिश्च । आदिशब्दात् द्योततेस्स ज्योतिरिङ्गणः खद्योतः । तुरतेः तुरणः त्वरावान् । बिभर्त्ति सामान्यविशेषौ भुरणः इत्यादयः ॥ १९० ॥ **कृषिविषिवृषिधृषिमृषियुषिद्रुहिग्रहेराणक्** (१९१) कल्पते छेदनाय कृपाणः खड्गः । विषू विषाणं शृङ्गं करिदन्तश्च । वृषू सेचने वर्षतीति वृषाणः देवः । धृषाणो देवः । मृषू मर्षतीति मृषाणः । 'युषि सेचने' सौत्रः युषाणः । द्रुह्यति मौनाय द्रुहाणः मुखरः । गृह्णातीति गृहाणः । वृषाणादयः स्वप्रकृत्यर्थवाचिनः सर्वेऽपि कर्त्तरि कारके ज्ञेयाः ॥ १९१ ॥ **पषो णित्** (१९२) आणक् । पषी पाषाणः ॥ १९२ ॥ **कल्याणपर्याणादयः** (१९३) एते आणकान्ता निपात्यन्ते । कलेर्योन्तश्च । कल्यते उपादेयतया कल्याणं श्रेयः । परिपूर्वादिणो लुक् च । पर्याणं अश्वादीनाम् पृष्ठच्छदः । आदिशब्दात् द्रेकाणबोकाणकेक्काणादयः ॥ १९३ ॥ **द्रुहृवृहिदक्षिभ्य इणः** (१९४) एभ्यः इणः प्रत्ययो भवति । द्रुं द्रविणं द्रव्यम् । हृंग् हरिणो मृगः । वृह बर्हिणो मयूरः । दक्षि दक्षिणः कुशलः अनुकूलश्च । दक्षिणा दिक् ब्रह्मदेयं च ॥ १९४ ॥ **ऋद्रुहेः कित्** (१९५) इणः । ऋश् इरिणं ऊषरं कुञ्जः वनदुर्गं च । द्रुह्यति दानवेभ्यः सदाचारं वा द्रुहिणः ब्रह्मा क्षुद्रजन्तुश्च ॥ १९५ ॥ **ऋकृवृधृदारिभ्य उणः** (१९६) ऋंक् अरुणः सूर्यस्तत्सारथिः उषा वर्णश्च । कृत् करुणा दया । करुणः करुणाविषयः । करुणं दैन्यम् । वृश् वरुणः प्रचेताः । धृग् धरुणः धर्त्ता आयुक्तो लोकश्च । दृश् णौ दारुणः उग्रः ॥ १९६ ॥ **क्षः कित्** (१९७) क्षैं । अस्मात् किदुणः । क्षुणो व्याधिः क्षामः क्रोध उन्मत्तश्च ॥ १९७ ॥ **भिक्षुणी** (१९८) भिक्षेरुणः ङीश्च निपात्यते । भिक्षुणी व्रतिनी ॥ १९८ ॥ **गादाभ्यामेष्णक्** (१९९) गैं गेष्णः मेष उद्गाता रङ्गोपजीवी च । गेष्णं साम मुखं च । रात्रिगेष्णः रङ्गोपजीवी । सुगेष्णा किन्नरी । डुदांग्क् देष्णः बाहुः दानशीलश्च । चारुदेष्णः सात्यभामेयः । सुदेष्णा विराटपत्नी ॥ ॥ १९९ ॥ इति णोपान्त्यप्रत्यया अष्टादशभिः सूत्रैः । **दम्यमितमिमावापूधूगृजृहसिवस्यसिवितसिमसीणभ्यस्तः** (२००) दन्तः दशनः हस्तिदंष्ट्रा च । अन्तः अवसानं धर्मः समीपं च । तन्तः खिन्नः । मांक् मातं अन्तःप्रविष्टम् । वांक् वातः वायुः । पूग्श् पोतः नौः अग्निः बालश्च । धूग्श् धोतः धूमः शठः वातश्च । गृत् गर्त्तः श्वभ्रम् । जृष्च् जर्त्तः प्रजननं राजा च । हसे, हस्तः करः नक्षत्रं च । वसूच् स्तम्भे वस्तः छागः । असूच् अस्तः गिरिः । तसूच् विपूर्वः वितस्ता नदी । मसैच् मस्तः मूर्धा । इण्क् एतः हरिणः वर्णः वायुः पथिकश्च ॥ २०० ॥ **शीरीभूदूमूघृपाधागचित्यर्त्यञ्झिपुसिमुसिवुसिविसिरमिधुर्विपुर्विभ्यः कित्** (२०१) तः । शीङ्क् शीतं स्पर्शविशेषः । रीश् रीतं सुवर्णम् । 'भू सत्तायाम्' भूतः ग्रहः । भूतं पृथिव्यादि । दूङ्च् दूतः वचोहरः । मूङ् मूतः दध्यर्थं क्षीरे तक्रसेकः वस्त्रावेष्टनबन्धनं आचमनी आलानपाशः बन्धनमात्रं धान्यादिपुटश्च । घृं घृतं सर्पिः । पां पीतं वर्णविशेषः । डुधांग्क् 'धागः' (४।४।१५) इति हिः हितं उपकारि । चितै चित्तं मनः । ऋंक् ऋतं सत्यम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अञ्जौप् अक्तः म्रक्षितो व्यक्तीकृतः परिमितः प्रेतश्च । 'पुसच् विभागे' पुस्तः लेख्यपत्रसंघातः लेप्यादिकर्म च । मुसच् मुस्ता गन्धद्रव्यं । बुसच् बुस्तः प्रहसनम् । विसच् विस्तं सुवर्णमानम् । रमिं सुरतं मैथुनम् । धुर्वै धूर्तः शठः । पूर्वै पूरणे पूर्तः पुण्यम् ॥ २०१ ॥ **लूम्रो वा** (२०२) आभ्यां तः । स च किद्वा । लूग्श् लूता क्षुद्रजन्तुः । लोतः बाष्पं लवनं वस्तः कीटजातिश्च । मृंत् मृतः गतप्राणः । मर्त्तः ऋषिः प्राणी पुरुषश्च ॥ २०२ ॥ **सुसितनितुसेर्दीर्घश्च वा** (२०३) एभ्यः कित्तः दीर्घश्चैषां वा स्यात् । षूग्ट् सूतः सारथिः । सुतः पुत्रः । षिंग्ट् सीता जनकात्मजा । सस्यं हलमार्गश्च । सितः वर्णः । तनूयी तातः पिता पुत्रेष्टनाम च । ततं विस्तीर्णं वाद्यविशेषश्च । 'तुस शब्दे' तूस्तानि वस्त्रदशाः । तुस्ता जटा प्रदीपनं च ॥ २०३ ॥ **पुतपित्तनिमित्तोतशुक्ततिक्तलिप्तसूरतमुहूर्त्तादयः** (२०४) एते कित्तप्रत्ययान्ता निपात्यन्ते । पूङो ह्रस्वश्च । पुतः स्फिक् । पीङस्तोन्तश्च पित्तं मायुः । निपूर्वात् मिनोतेर्मित् च निमित्तं हेतुः दिव्यज्ञानं च । उभेर्लुक् च उत आशङ्काद्यर्थमव्ययम् । शकेः शुचेर्वा शुक्भावश्च शुक्तं कल्कजातिः । ताडयतेस्तकतेस्तिजेर्वा तिक् च । तिक्तो रसविशेषः । लीयतेः पोन्तः ह्रस्वश्च लिप्तं विश्लेषः अंशदेशश्च । सुपूर्वाद्रमेः सोर्दीर्घश्च सूरतः दमितो हस्ती अन्यो वा दान्तः । हुर्छेर्मुश्च धात्वादिः । 'राल्लुक्' ( ४।१।११० ) इति छलुक् 'भ्वादेः०' ( २।१।६३ ) इति दीर्घश्च । मुहूर्तः कालविशेषः । आदिग्रहणात् अयुतनियुतादयः ॥ २०४ ॥ **कृगो यङः** (२०५) यङन्तात्कृगः कित्तः स्यात् । चेक्रीयितः, पूर्वेषां यङ्प्रत्ययसंज्ञा ॥ २०५ ॥ **इवर्णादिर्लुपि** (२०६) करोतेर्यङ्लुपि इवर्णादिस्तः स्यात् चर्करितं चर्करीतं यङ्लुबन्तस्याख्ये ॥ २०६ ॥ **दृपृभृमृशीयजिखलिवलिपर्विपच्यमिनमितमिदृशिहर्यिकङ्किभ्योऽतः** (२०७) दृङ्त् दरतः आदरः । पृंक् परतः कालः । भृंग् भृंग्क् भरतः आदिचक्री हिमवत्समुद्रमध्ये क्षेत्रं च । मृंत् मरतः मृत्युः अग्निः प्राणी च । शीङ्, शयतः निद्रालुः चन्द्रः स्वप्नः अजगरश्च । यजीं यजतः यज्वा अग्निश्च । खल खलतः शीर्णकेशशिराः । वलि, वलतः कुसूलः । 'पर्व पूरणे' पर्वतः गिरिः । डुपचींष् पचतः अग्निः आदित्यः पाल इन्द्रश्च । अम अमतः मृत्युः जीव आतङ्कश्च । णमं नमतः नटः देवः ऊर्णास्तरणं ह्रस्वश्च । तमूच् तमतः निर्वेदी आकाङ्क्षी धूमश्च । दृशृं दर्शतः द्रष्टाग्निश्च । हर्य हर्यतः वायुः अश्वः कान्तः रश्मिः यज्ञश्च । ककुङ् कङ्कतः केशमार्जनम् ॥ २०७ ॥ **पृषिरञ्जिसिकिकालावृभ्यः कित्** (२०८) अतः । पृषू पृषतः मृगः । रञ्जी रजतं रूप्यम् । सिकिः सौत्रः सिकता वालुका । कैं कतः गोत्रकृत् । लांक् लता वल्ली । वृग्ट् व्रतं शाश्वतो नियमः ॥ २०८ ॥ **कृवृकल्यलिचिलिविलीलिलानाथिभ्यः आतक्** (२०९) कृत् किरातः शबरः । वृग्ट् व्रातः समूहः उत्सेधजीविसंघश्च । कलि कलातः ब्रह्मा । अली अलातं उल्मुकम् । चिलत् चिलाता म्लेच्छाः । विलत्, विलातः शवाच्छादनवस्त्रम् । इलत्, इलातः नगः । लांक् लातः मृत्तिकादानभाजनम् । नाथृङ् नाथातः आहारः प्रजापतिश्च ॥ २०९ ॥ **हृश्यारुहिशोणिपलिभ्य इतः** (२१०) हृंग् हरितः वर्णः । श्यैङ् श्येतः वर्णः मृगः मत्स्यः श्येनश्च । रुहं रोहितः वर्णः मत्स्यः मृगजातिश्च । लस्वे लोहितः वर्णः । लोहितमसृक् । शोणृ शोणितं रुधिरम् । पल पलितं श्वेतकेशः ॥ २१० ॥ **नञ आपेः** (२११) इतः । नापितः कारुविशेषः ॥ २११ ॥ **कुशिपिशिपृषिकुषिकुस्युचिभ्यः कित्** (२१२) इतः । कुशं कुशितं पापम् । पिशत् पिशितं मांसम् । पृषू पृषितं वारिबिन्दुः । कुषश् कुषितं पापम् । 'कुसच् श्लेषे' कुसित ऋषिः । कुसितं ऋणम् । उचत् उचितं स्वभावयोग्यं चिरानुयातं श्रेष्ठं च ॥ २१२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**हृग ईतण्** (२१३) हारीतः पक्षी ऋषिश्च ॥ २१३ ॥ **अदो भुवो डुतः** (२१४) अद् विस्मितं भवति तेन तस्मिन् वा मनः अद्भुतं आश्चर्यम् ॥ २१४ ॥ **कुलिमयिभ्यामूलक्** (२१५) कुल कुलूता जनपदः । मयि मयूता वसतिः ॥ २१५ ॥ **जीवेर्मू च** (२१६) जीवन्ति प्राणिनोऽस्मिन् जीमूतः मेघः गिरिश्च ॥ २१६ ॥ **कबेरोतः पू च** (२१७) कबृङ् अस्मादोतः पश्चान्तादेशः स्यात् कपोतः पक्षी वर्णश्च ॥ २१७ ॥ **आस्फायेर्डित्** (२१८) आङः पूर्वादस्मात् डिदोतः स्यात् । आस्फोता नाम ओषधिः ॥ २१८ ॥ **जॄविशिभ्यामन्तः** (२१९) जरन्तः भूतग्रामः वृद्धः महिषश्च । वेशन्तः पल्वलं वल्लभः अप्राप्तापवर्गः आकाशं च ॥ २१९ ॥ **रुहिनन्दिजीविप्राणिभ्यष्टिदाशिषि** (२२०) एभ्य आशिषि टिदन्तः स्यात् । रोहतात् रोहन्तः वृक्षः । रोहन्त्योषधिः । नन्दतात् नन्दन्तः सखा । नन्दन्ती सखी । जीवतात् जीवन्तः आयुष्मान् । जीवन्ती शाकः । प्राण्यात् प्राणन्तः वायुः रसायनं च । प्राणन्ती स्त्री ॥ २२० ॥ **तॄजिभूवदिवहिवसिभासिसाधिमदिगडिगण्डिमण्डिनन्दिरेविभ्यः** (२२१) टिदन्तः । आशिषीत्येके । तरन्तः आदित्यः भेकश्च । तरन्ती स्त्री । जयन्तः रथरेणुः ध्वजः इन्द्रपुत्रः जम्बूद्वीपपश्चिमद्वारं पश्चिमानुत्तरविमानं च । जयन्ती उदयनपितृष्वसा । भवन्तः कालः । भवन्ती । वदन्तः । वदन्ती । वहन्तः रथः अनड्वान् रथरेणुः वायुः । वहन्ती वसन्त ऋतुः । भासन्तः सूर्यः । भासन्ती । ण्यन्तोपि । भासयन्तः सूर्यः । अदन्तः । अदन्ती । साधन्तः भिक्षुः । ण्यन्तोऽपि साधयन्तः भिक्षुः । साधयन्ती । मदैच् । णौ । मदयन्तः । मदयन्ती पुष्पगुल्मजातिः । 'गड सेचने' । गडन्तः जलदः । ण्यन्तोऽपि गडयन्तः । गडयन्ती । गडु ण्यन्तः गण्डयन्तः मेघः । मडु ण्यन्तः मण्डयन्तः प्रसाधकः अलङ्कारः आदर्शश्च । टुनदु नन्दयन्तः सुखकृत् राजा हिरण्यं सुखं च । नन्दयन्ती । 'रेवृङ् पवि गतौ' रेवन्तः । अनुक्तार्था धात्वर्थकर्त्रर्थाः ॥ २२१ ॥ **सीमन्तहेमन्तभदन्तदुष्वन्तादयः** (२२२) एतेऽन्तान्ता निपात्यन्ते । सिनोतेः सीम च । सीमन्तः केशमार्गः ग्रामक्षेत्रान्तश्च । दन्तेर्हिनोतेर्वा हेम च । हेमन्तः ऋतुः । भन्दतेर्न लुक् च । भदन्तः निर्ग्रन्थेषु शाक्येषु च पूज्यः । दुषेर्वोऽन्तश्च । दुष्वन्तः राजा । आदिग्रहणादन्येऽपि ॥ २२२ ॥ **शकेरुन्तः** (२२३) शकुन्तः ॥ २२३ ॥ **कषेर्डित्** (२२४) कष हिंसायाम् । अस्मात् डित् उन्तः । कुन्तः आयुधम् ॥ २२४ ॥ इति तोपान्त्यप्रत्ययाः पञ्चविंशत्या सूत्रैः । **कमिप्रुगार्त्तिभ्यस्थः** (२२५) कन्था प्रावरणं नगरं च । प्रोथः प्रियो युवा सूकरमुखो घोणा च । प्रोथमस्य नासिका । गैं गाथा श्लोक आर्या वा । ऋक् अर्थः जीवाजीवादिपदार्थः प्रयोजनं अभिधेयं धनं याच्यानिवृत्तिश्च ॥ २२५ ॥ **अवाद्गोच्च वा** (२२६) अवपूर्वाद्गायतेस्थः प्रत्ययोऽश्चान्तादेशो वा स्यात् । अवगथः अवगाथोऽक्षसंघातः प्रातःसवनं रथयानं साम पन्थाश्च ॥ २२६ ॥ **नीनूरमितॄतुदिवचिरिचिसिचिश्विहनिपागोपावोद्गाभ्यः कित्** (२२७) थः । णींग् नीथं जलम् । सुनीथो नाम राजा नीतिमान् धर्मशीलः ब्राह्मणश्च । णूत् नूथं तीर्थम् । रमिं रथः स्यन्दनः । तॄ तीर्थं जलाशयावगाहनमार्गः पुण्यक्षेत्रमाचार्यश्च । तुदींत् तुत्थं चक्षुष्यो धातुविशेषः । वचंक् उक्थं शास्त्रं सामवेदश्च । उक्थानि सामानि । रिचृम्पी रिक्थं धनम् । षिचींत् सिक्थं मदनं पुलाकश्च । ट्वोश्वि शूथः यज्ञप्रदेशः । हनंक् हथः पन्थाः कालश्च । पां पीथं बालघृतपानं अम्भः नवनीतं च । पीथः मकरः रविश्च । गोपूर्वात् गोपीथः तीर्थविशेषः । गोनिपातं जलद्रोणी कालविशेषश्च । गैं अवगीथं यज्ञकर्मणि प्रातःशंसनम् । उद्गीथः शुनामूर्ध्वमुखानां विरावः सामगानं प्रथमोच्चारणं च ॥ २२७ ॥ **न्युद्भ्यां शीङः** (२२८)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

थः । निशीथः अर्द्धरात्रः रात्रिः प्रदोषश्च । उच्छीथः स्वप्नः टिट्टिभश्च ॥ २२८ ॥ **अवभृनिःकुसमिण्भ्यः** (२२९) अवपूर्वाद्बिभर्त्तेर्निपूर्वाद्दर्तेः समपूर्वादेतेश्च कित्थः स्यात् । अवभृथः यज्ञावसानं तत्स्नानं च । निःकृथः निकायः । निःकृथं स्थानम् । समिथः सङ्गमः गोधूमपिष्टं च । समिथं समूहः ॥ २२९ ॥ **सर्त्तेर्णित्** (२३०) सार्थः समूहः ॥ २३० ॥ **पथयूथगूथकुथतिथनिथसूरथादयः** (२३१) एते थान्ता निपात्यन्ते । पलतेर्लो लुक् च । पथः पन्थाः । यौतेर्गुंवतेश्च दीर्घश्च यूथं तिर्यक्समूहः । गूथममेध्यं विष्ठा च । किरतेः करोतेर्वा कुश्च । कुथः कुथा वा आस्तरणम् । तनोतेस्तिष्ठतेर्वा तिश्च । तिथः कालः । तिम्यतेस्तिथः प्रावृट्कालः । नयतेर्ह्रस्वश्च निथः पूर्वक्षत्रियः कालश्च । सुपूर्वाद्रमेः सोर्दीर्घश्च किच्च सूरथः दान्तः । आदिग्रहणान्निपूर्वाद्रौतेः दीर्घत्वं च । निरूथः दिक् । निरूथं पुण्यक्रमनियतम् । एवं संगीथप्रगाथादयोऽपि ॥ २३१ ॥ **भृशीशपिशमिगमिरमिवन्दिवञ्चिजीविप्राणिभ्योऽथः** (२३२) भरथः कैकेयीसुतः अग्निः लोकपालश्च । शयथः अजगरः प्रदोषः मत्स्यः वराहश्च । शपी शपथः प्रत्ययकरणमाक्रोशश्च । शमूच् शमथः समाधिः आश्रमपदं च । गम्लृं गमथः पन्थाः पथिकश्च । रमिं रमथः प्रहर्षः । वदुङ् वदथः स्तोता स्तुत्यश्च । वञ्चू वञ्चथः अध्वा कोकिलः काकदम्भश्च । जीव जीवथोऽअर्थवान् जलं अन्नं वायुः मयूरः कूर्मः धार्मिकश्च । प्राणथः बलवान् ईश्वरः प्रजापतिश्च ॥ २३२ ॥ **उपसर्गाद्वसः** (२३३) अथः । आवसथः गृहम् । उपवसथं उपवासः । संवसथः संवासः । सुवसथः सुवासः । निवसथः निवासः ॥ २३३ ॥ **विदिभिदिरुदिद्रुहिभ्यः कित्** (२३४) अथः । विदथः ज्ञानी अध्वर्युः संग्रामश्च । भिदथः । शरः । रुदथः बालः असत्त्वः श्वा च । द्रुह्यति दानवेभ्यः द्रुहथः शत्रुः ॥ २३४ ॥ **रोर्वा** (२३५) अस्मादथः किद्वा । रुवथः शकुनिः शिशुश्च । रवथः आक्रन्दः शब्दकारश्च ॥ २३५ ॥ **जॄवृभ्यामूथः** (२३६) जरूथः शरीरं अग्रमांसं अग्निः संवत्सरः मार्गः कल्मषं च । वृग्श् वरूथः वर्म सेनाङ्गं बलसंघातश्च ॥ २३६ ॥ इति थोपान्त्यप्रत्यया द्वादशभिः सूत्रैः । **शाशपिमनिकनिभ्यो दः** (२३७) शोंच् शादः कर्दमः तरुणतृणं मृदुबन्धः सुवर्णं च । शपीं शब्दः श्रोत्रग्राह्योऽर्थः । मनिंच् मन्दः अलसः बुद्धिहीनश्च । कनै कन्दः मूलम् ॥ २३७ ॥ **आपोऽप् च** (२३८) आप्लृंट् अस्माद्दः अस्य च अप् इत्यादेशः स्यात् । अब्दं वर्षम् ॥ २३८ ॥ **गोः कित्** (२३९) गुंत् अस्मात् किद्दः स्यात् । गुदम् ॥ २३९ ॥ **वृतुकुसुभ्यो नोऽन्तश्च** (२४०) एभ्यः किद्दः स्यात् । नकारश्चान्तो भवति । वृग्ट् वृन्दं समूहः । तुंक् तुन्दं जठरम् । कुङ् कुन्दः पुष्पजातिः । षुंग्ट् सुन्दः दानवः ॥ २४० ॥ **कुसेरिदेदौ** (२४१) 'कुसच् श्लेषे' । अस्मात् इद ईद इत्येतौ कितौ स्याताम् । कुसिदं ऋणम् । कुसीदं वृद्धिजीविका ॥ २४१ ॥ **इङ्ग्यर्विभ्यामुदः** (२४२) इगु गतौ इङ्गुदः वृक्षजातिः । अर्ब गतौ अर्बुदः पर्वतः अक्षिव्याधिः सङ्ख्याविशेषश्च । निपूर्वात् न्यर्बुदं सङ्ख्याविशेषः ॥ २४२ ॥ **ककेर्णिद्वा** (२४३) उदः । 'ककि लौल्ये' । काकुदं तालु । ककुदं स्कन्धः ॥ २४३ ॥ **कुमुदबुद्बुदादयः** (२४४) एते उदन्ता निपात्यन्ते । कमेः कुम् च । कुमुदं कैरवम् । बुन्देः किद्बोऽन्तश्च । बुद्बुदो जलस्फोटः । बुद्बुदं नेत्रजो व्याधिः । आदिग्रहणात् दुर्दीक् प्रत्ययादेरत्वे । दोहदः अभिलाषविशेषः । एवमन्येऽपि ॥ २४४ ॥ **ककिमकिभ्यामन्दः** (२४५) 'ककि लौल्ये' मकि सौत्रः । ककन्दः मकन्दश्च राजानौ । यकाभ्यां निर्वृत्ता काकन्दी माकन्दी च पुरी ॥ २४५ ॥ **कलिअलिपुलिकुरिकुणिमणिभ्य इन्दक्** (२४६) कलिन्दः पर्वतः यतो यमुना प्रभवति । अली अलिन्दः प्रघाणः भाजनस्थानं च । पुल पुलिन्दः शबरः । कुरत् कुरिन्दः सस्यम-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लहरणोपकरणं तेजनोपकरणं च । कुणत् कुणिन्दः म्लेच्छजातिः शब्द उपकरणं च । 'मण शब्दे' मणिन्दः अश्वबलवः ॥ २४६ ॥ **कुपेर्वं च वा** (२४७) कुपच् । अस्मादिन्दक् वश्चान्तादेशो वा स्यात् । कुपिन्दः कुविन्दः तन्तुवायः ॥ २४७ ॥ **पूपलिभ्यां णित्** (२४८) इन्दक् । पूश् पारिन्दः पालिन्दः द्वावपि वृक्षगाथकौ । पारिन्दः मुख्यः पूज्यश्च । पालिन्दः नृपतिः । रक्षकश्चेत्येके ॥ २४८ ॥ **यमेरुन्दः** (२४९) यमुन्दः क्षत्रियविशेषः ॥ २४९ ॥ **मुचेर्डुकुन्दकुकुन्दौ** (२५०) अस्मात् डित् उकुन्दः कित् उकुन्दश्च प्रत्ययौ स्याताम् । मुकुन्दः विष्णुः । मुचुकुन्दः राजा वृक्षविशेषश्च ॥ २५० ॥ इति दोपान्त्यप्रत्ययाश्चतुर्भिः सूत्रैः । **स्कन्धमिभ्यां धः** (२५१) स्कन्धः बाहुमूर्धा ककुदं विभागश्च । बाहुलकादस्य लुक् । अन्धः चक्षुर्विकलः ॥ २५१ ॥ **नेः स्यतेरधक्** (२५२) निपूर्वात् षोंच् अस्मादधक् स्यात् । निषधः पर्वतः । निषधा जनपदः ॥ २५२ ॥ **मङ्गेर्न-लुक् च** (२५३) अस्मादधक् नकारस्य च लुग्भवति । मगधा जनपदः ॥ २५३ ॥ **आरगेर्वधः** (२५४) आङ्पूर्वात् 'रगे शङ्कायाम्' अस्माद्वधः स्यात् । आरग्वधः वृक्षजातिः ॥ २५४ ॥ **पराच्छ्रो डित्** (२५५) परपूर्वात् शृश् अस्माड्डिद्वधः स्यात् । परश्वधः परशुः ॥ २५५ ॥ **इषेरुधक्** (२५६) इषत्, इषुधः याच्ञा ॥ २५६ ॥ **कोरन्धः** (२५७) कुङ्, अस्मादन्धः । कबन्धः छिन्न-मूर्द्धा देहः ॥ २५७ ॥ इति धोपान्त्यप्रत्ययाः सप्तभिः सूत्रैः ॥ **प्याधापन्यनिस्वदिस्वपिवस्यज्यति-सिविभ्यो नः** (२५८) प्यैङ्, प्यानः समुद्रः चन्द्रश्च । डुधांग्क्, धाना भृष्टो यवः अङ्कुरश्च । पनि, पन्नं नीचैःकरणं सन्नं जिह्वा च । अनक्, अन्नं भक्ष्यमाचारश्च । ष्वदि, स्वन्नं रुचितम् । ञिष्वपंक् स्वप्नः मनोविकारः निद्रा च । वसं, वस्नं वासः मूल्यं मेढ्रः आगमश्च । अज, वेनः प्रजापतिः ध्यानी राजा वायु यज्ञः प्राज्ञः मूर्खश्च । अत्, अत्न आत्मा वायुर्मेघः प्रजापतिश्च । षिवूच्, स्योनं सुखं तन्तुवायसूत्रं सन्तानः समुद्रः सूर्यः रश्मिः आस्तरणं च ॥ २५८ ॥ **षसेर्णित्** (२५९) षसक्, सास्ना गोगलकम्बलः निद्रा च ॥ २५९ ॥ **रसेर्वा** (२६०) अस्मान्नः, स च णित् वा । रस शब्दे । रास्ना धेनुः ओषधिजातिश्च । रस्नं द्रव्यजातिः । रस्ना जिह्वा । रस्नः तुरङ्गः दण्डश्च ॥ २६० ॥ **जीणशीदीबुध्यविमीभ्यः कित्** (२६१) नः । जिं जिनः अर्हन् बुद्धश्च । इण्क्, इनः स्वामी सन्निपातः ईश्वरः राजा सूर्यश्च । शीङ्क्, शीनः पीलुः । दीङ्च्, दीनः कृपणः खिन्नश्च । बुधिंच्, बुध्नः मूलं पृष्ठान्तः रुद्रश्च । अव, ऊनमपरिपूर्णम् । 'मव्यविश्रिविज्वरित्वरिरुपान्त्येन' (४।१।१०९) इत्युपान्त्येन सह ऊटि कित्त्वाद्गुणाभावे च सिद्धिः । मीङ्च । मीनः मत्स्यः राशिश्च ॥२६१॥ **सेर्वा** (२६२) किन्नः । षिग्ट्, सिनः कालः बलं बन्धश्च । सेना चमू ॥२६२॥ **सोरू च** (२६३) षुंग्ट्, अस्मान्नः ऊकारश्चान्तादेशः स्यात् । सूना घातस्थानं दुहिता पुत्रः प्रकृति आघाट-स्थानं च ॥ २६३ ॥ **रमेस्त च** (२६४) अस्मान्नस्तश्चान्तादेशः स्यात् । रत्नं वज्रादिः ॥ २६४ ॥ **क्रुशेर्वृद्धिश्च** (२६५) क्रुशं अस्मान्नः, अस्य च वृद्धिः स्यात् । क्रौश्नः श्वापदः ॥ २६५ ॥ **द्युसु-निभ्यो माङो डित्** (२६६) एतत्पूर्वात् माङ्क् अस्मात् डित् नः स्यात् । द्युम्नं द्रव्यम् । सुम्नं सुखम् । निम्नं नतम् ॥ २६६ ॥ **शीङः सन्वत्** (२६७) अस्माड्डिन्नः स च सन्वद्भवति । शिश्नं शेपः ॥ २६७ ॥ **दिननग्नफेनचिह्नब्रध्नधेनस्तेनच्योत्नादयः** (२६८) एते नप्रत्ययान्ता निपात्यन्ते । दीव्यतेः कित् लुक् च । दिनं अहः । नञ्पूर्वाद्वसेर्गोन्तो धातोर्लुक् च । न वस्ते नग्नः अवस्त्रः । फणेः फलेः स्फायेर्वा फे भावश्च । फेनः बुद्बुदसंघातः । चहेरिश्चोपान्त्यस्य । चिह्नं अभि-ज्ञानम् । बन्धेर्ब्रध् च । ब्रध्नः रविः प्रजापतिः स्वर्गः ब्रह्मा पृष्ठान्तश्च । धयतेरेत्वं च धेना सरस्वती



Jain Education International For Personal & Private Use Only www.jainelibrary.org

माता च । धेनः समुद्रः । ईत्वं चेत्येके धीना । स्त्यायतेः स्तेः च । स्तेनः चौरः । च्यवतेर्वृद्धिः कोऽन्तश्च । च्यौकमक्षस्थानमनुजः क्षीणपुण्यश्च । च्यौक्नी कांस्यादिपात्री । आदिशब्दादन्येऽपि ॥ २६८ ॥ **युसिरसिरुचिजिमस्जिदेविस्यन्दिचन्दिमन्दिमण्डिमदिदहिवह्यादेरनः** (२६९) युक्, यवना जनपदः । यवनं मिश्रणम् । असूच्, असनः बीजकः । रसण्, रसना जिह्वा । रुचि, रोचना गोपित्तम् । रोचनः चन्द्रः । विपूर्वात् विरोचनः अग्निः सूर्यः इन्दुः दानवश्च । जिं, जयनं ऊर्णापटः । मस्जोंत्, मज्जनं स्नानं तोयं च । देवृङ् देवनः अक्षः कितवश्च । स्यन्दौङ् स्यन्दनः रथः । चदु, चन्दनं गन्धद्रव्यम् । मदुङ् । मन्दनं स्तोत्रम् । मडु, मण्डनं अलङ्कारः । मदैच्, मदनः वृक्षः कामः मधूच्छिष्टं च । दहं, दहनः अग्निः । वहीं, वहनं नौः । आदिग्रहणात् पचेः पचनः अग्निः । पुनातेः पवनः । बिभर्तेः, भरणं साधनम् । नयतेः, नयनं नेत्रम् । द्युतेः, द्योतनः । रचेः रचना वैचित्र्यम् । गृञ्जेर्गृञ्जनं अभक्ष्यद्रव्यविशेषः । प्रस्कन्दनः प्रपतन इत्यादयो भवन्ति ॥ २६९ ॥ **अशो रश्चादौ** (२७०) रशना मेखला । रशिमेके प्रकृतिमुपदिशन्ति स च राशि रशना रश्मि इत्यत्र प्रयुज्यत इत्याहुः ॥ २७० ॥ **उन्देर्नलुक् च** (२७१) ओदनः ॥ २७१ ॥ **हनेर्घतजघौ च** (२७२) घतनः रङ्गोपजीवी पापकर्मा निर्लज्जश्च । जघनं श्रोणिः ॥ २७२ ॥ **तुदादिवृजिरञ्जिनिधाभ्यः कित्** (२७३) अनः । तुदींत् तुदनः । क्षिपींत् क्षिपणः । सुरत् सुरणः । बुधिंच् बुधनः । षिवूच् सिवनः । एषां यथासम्भवं कारकमुच्यते । लबुङ् लम्बनः शकुनिः । वृजैकि वृजनः अन्तरिक्षं निवारणं मण्डनं च । रञ्जीं रंजनं हरिद्रा । महारजनं कुसुम्भम् । रंजनः रङ्गविशेषः । डुधांग्क् निपूर्वः निधनमवसानम् ॥ २७३ ॥ **सूधूभ्रस्जिभ्यो वा** (२७४) एभ्यो नः, स च किद्वा । षूत् सुवनः अङ्कुरः आदित्यः प्रादुर्भावश्च । सुवनं चन्द्रप्रभा । सवनं यज्ञः, पूर्वाह्णापराह्णमध्याह्नकालश्च । त्रिषवणम् । धूत् धुवनः धूमः वायुः अग्निश्च । धुवनः मेघः । धवनम् । भू भवनं जगत् । अवनं गृहम् । भ्रस्जींत् भृज्जनं अन्तरिक्षं अम्बरीषः पाकश्च । भ्रज्जनः पावकः ॥ २७४ ॥ **विदनगगनगहनादयः** (२७५) एते किदनप्रत्ययान्ता निपात्यन्ते । विदु विदनः । गोत्रकृत् । गमेर्ग च । गगनं नभः । गाहौङ्, ह्रस्वश्च । गहनं दुर्गमं । आदिशब्दात् काञ्चनकाननादयः ॥ २७५ ॥ **संस्तुस्पृशिमन्थेरानः** (२७६) समपूर्वात् स्तोः स्पृशेश्च, समपूर्वाभ्यां स्तुस्पृशिभ्यां वा, मन्थेश्चानः स्यात् । संस्तवानः सोमः होता महर्षिः वाग्मी च । स्पर्शानः मनः । संस्पर्शानः मनः अग्निः । मन्थश् मन्थानः खजकः ॥ २७६ ॥

**युयुजियुधिबुधिमृशिदृशीशिभ्यः कित्** (२७७) आनः । युक्, युवानः तरुणः । युजंपी, युजानः सारथिः । युधानः रिपुः । बुधानः आचार्यः पण्डितो वा । मृशंत् मृशानः । दृशृं दृशानः लोकपालः । युजादिप्रसिद्धकर्त्रर्था एते । (ईशिक्) ईशान ईश्वरः ॥२७७॥ **मुमुचानयुयुधानशिश्विदानजुहुराणजिह्रियाणाः** (२७८) एते आनप्रत्ययान्ता निपात्यन्ते । मुचेर्द्वित्वं च मुमुचानः मेघः । 'युधिंच् सम्प्रहारे' युयुधानः साहसिकः राजा च कश्चित् । श्विताङ् अस्य दश्च शिश्विदानः दुराचारो द्विजः । हुर्च्छा अस्यान्तलुक् जुहुराणः कुटिलहृदयः कुटिलः अग्निः अध्वर्युः अनड्वांश्च । ह्रींक् जिह्रियाणः नीतिमान् । सर्वे एवैते मुच्यादिप्रसिद्धक्रियाकर्तृवचना इत्येके । अन्ये तु मुमुक्षादि सन्नन्तप्रकृतीनामेतन्निपातनं तेन सन्नन्तक्रियाकर्तृवचना इत्याहुः ॥ २७८ ॥ **ऋञ्जिरञ्जिमन्दिसह्यर्हिभ्योऽसानः** (२७९) 'ऋजुङ् भर्त्सने' । ऋञ्जसानो महेन्द्रः मेघः श्मशानं च । रञ्जीं, रञ्जसानः धर्मः मेघश्च । मदुङ् हंसः मन्दसानः चन्द्रः सूर्यः जीवः स्वप्नः अग्निश्च । षहि, सहसानः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दढः मयूरः यजमानः क्षमावांश्च । अर्हं अर्हसानः चन्द्रः तुरङ्गश्च ॥ २७९ ॥ **रुहियजेः कित्** (२८०) असानः । रुहसानः विटपः । इजसानः धर्मः ॥२८०॥ **वृधेर्वा** (२८१) असानः । किद्वा । वृधसानः गर्भः । वर्धसानः गिरिः गर्भः मृत्युः पुरुषश्च ॥२८१॥ **श्याकठिखलिनल्यविकुण्डिभ्य इनः** (२८२) श्यैङ्, श्येनः पक्षी अभिचारयज्ञश्च । 'कठ कृच्छ्रजीवने' कठिनं अमृदु । खल खलिनं अश्वमुखसंयमनम् । 'णल गन्धे' नलिनं पद्मम् । अव अविनं जलं मृगः नाशः अग्निः राजा अध्वर्युः विधानं गुप्तिश्च । कुडुङ् कुण्डिनः ऋषिः, कुण्डिनं नगरम् ॥ २८२ ॥ **वृजितुहिपुलिपुटिभ्यः कित्** (२८३) इनः । वृजैकि वृजिनं कुटिलं पापं च । 'तुहृ अर्दने' तुहिनं हिममन्धकारश्च । पुल, पुटत्, पुलिनं पुटिनं च नदीतीरवालुकासंघातः ॥ २८३ ॥ **विपिनाजिनादयः** (२८४) किदिनान्ता निपात्यन्ते । टुवपीं टुवेपृङ् वा । इत्वोपान्त्यस्य । विपिनं वनं अब्जं जलदुर्गं च । अज अस्य वीभावाभावश्च अजिनं चर्म । आदिग्रहणादन्येऽपि ॥ २८४ ॥ **महेर्णिद्वा** (२८५) माहिनं राज्यं जलं च । महिनं राज्यं शयनं च । महिनः माहात्म्यवान् ॥ २८५ ॥ **खलिहिंसिभ्यामीनः** (२८६) खलीनं कवियम् । हिंसीनः श्वापदः ॥ २८६ ॥ **पठेर्णित्** (२८७) ईनः । पाठीनः मत्स्यः ॥ २८७ ॥ **यम्यजिशक्यर्जिशीयजितृभ्य उनः** (२८८) यमूं यमुना नदी । अज विभावे वयुनं विज्ञानं अङ्गं च । वियुनः विद्वान् चन्द्रः यज्ञश्च । शक्लृंट् शकुनः पक्षी । अर्जे अर्जुनः ककुभः वृक्षः पार्थः श्वेताश्वः श्वेतवर्णः कार्तवीर्यश्च । अर्जुनी गौः । अर्जुनं तृणं श्वेतसुवर्णं च । शीङ्, शयुनः अजगरः । यजीं यजुना क्रतुद्रव्यम् । तॄ तरुणं समर्थः युवा वायुश्च । ऋफिडादित्वाल्लत्वे तलुनः ॥ २८८ ॥ **लषेः शू च** (२८९) लषी, अस्मादुनः । तालव्यशकारश्चान्तादेशः स्यात् । लशुनं कन्दजातिः ॥ २८९ ॥ **पिशिमिथिक्षुधिभ्यः कित्** (२९०) उनः । पिशत्, पिशुनः खलः । पिशुनं मैत्रीभेदकरं वचः । मिथृग् मिथुनं स्त्रीपुंसद्वन्द्वं राशिश्च । क्षुधंच्, क्षुधनः कीटकः ॥ २९० ॥ **फलेर्गोन्तश्च** (२९१) फल्गुनः अर्जुनः । फल्गुनी नक्षत्रम् ॥ २९१ ॥ **वीपतिपदिभ्यस्तनः** (२९२) वींक् वेतनं भृतिः । 'पत्लृ गतौ' 'पट गतौ' पत्तनं पट्टनं नगरविशेषः । 'पट्टनं शकटैर्गम्यं घोटकैर्नौभिरेव च । नौभिरेव तु यद्गम्यं पत्तनं तत्प्रचक्षते' ॥ २९२ ॥ **पृपूभ्यां कित्** (२९३) तनः । पृङ्क् पृतना सेना । पूग्श् पूतना राक्षसी ॥ २९३ ॥ **कृत्यशौभ्यां स्नक्** (२९४) कृतैत् कृत्स्नं सर्वम् । अशौटि अक्ष्णं नेत्रं व्याधिः रज्जुः तेजनं अखण्डं च ॥ २९४ ॥ **अर्त्तेः शसानः** (२९५) तालव्यादिः । अर्शसानः पन्थाः इषुः अग्निश्च ॥ २९५ ॥ इति नोपान्त्यप्रत्यया अष्टत्रिंशद्भिः सूत्रैः । **भापाचणिचमिविषिसृपृतॄशीतल्यलिशमिरमिवपिभ्यः पः** (२९६) भांक्, भापः आदित्यः ज्येष्ठश्च भ्राता । पांक्, पापं कल्मषम् । पापो घोरः । 'चण् हिंसादानयोः' । चण्पा नगरी । चण्पः वृक्षः । चमू चम्पा नगरी । विष्लृंकी, वेष्पः परमात्मा स्वर्गः आकाशश्च । निपूर्वः, निवेष्पः अपां गर्भः कूपः वृक्षजातिः अन्तरिक्षं च । सृं सर्पः अहिः । पृश्, पर्पः प्लवः शङ्खः समुद्रः शस्त्रं च । तॄ, तर्पः उडुपः नौश्च । शीङ् शेपः पुच्छम् । तलण् तल्पं शयनं अङ्गं दारा युद्धं च । अली अल्पं स्तोकम् । शमूच् शम्पा विद्युत् काञ्ची च । विपूर्वाद् विशम्पः दानवः । रमिं, रम्पा चर्मकारोपकरणम् । टुवपीं वप्पः पिता ॥२९६॥ **युसुकुरुतुच्युस्त्वादेरूच** (२९७) युक् यूपः यज्ञपशुबन्धनकाष्ठम् । षुंगट्, सूपः मुद्गादिभिन्नकृतः । कुक् कूपः प्रहिः । रुक् रूपं श्वेतादि लावण्यं स्वभावश्च । तुंक् तूपः आयतनविशेषः । च्युंङ् च्यूपः आदित्यः वायुः संग्रामश्च । ष्टुंगक्, स्तूपः बोधिसत्त्वभवनं उपायतनं च । आदिशब्दादन्येऽपि ॥ २९७ ॥ **कृगॄस्तॄभ्य ऊः चान्तस्य**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(२९८) कृत्, कूर्पं भ्रुवोर्मध्यम् । शृश् शूर्पः धान्यादिनिष्पवनभाण्डं सङ्ख्या च । सृं सूर्पः भुजङ्गमः मत्स्यजातिश्च ॥ २९८ ॥ **शदिबाधिखनिहनेः ष च** (२९९) एभ्यः पः षश्चान्तादेशः । शदूं शष्पं बालतृणम् । शष हिंसायामित्यस्य रूपं वा । बाधृङ् रोटने बाष्पः अश्रु धूमाभासं च मुखपानीयादौ । खनूयी खष्पः बलात्कारः दुर्मेधाः कूपश्च । खष्पं खलीनं जनपदविशेषः अङ्गारश्च । हनंक् हृष्पः प्रावरणजातिः ॥ २९९ ॥ **पम्पाशिल्पादयः** (३००) पान्ता निपात्यन्ते । पांक्, मोऽन्तो ह्रस्वश्च । पम्पा पुष्करिणी । शीलयतेः शलतेः शेतेर्वा शिलादेशश्च । शिल्पं विज्ञानं, आदिशब्दादन्येऽपि ॥ ३०० ॥ **क्षुचुपिपूभ्यः कित्** (३०१) पः । टुक्षुक्, क्षुपः गुच्छः । चुप, चुप्पं मन्दगमनम् । पूगश्, पूपः पिष्टमयः ॥ ३०१ ॥ **नियो वा** (३०२) णींग्, अस्मात् पः, स च किद्वा । नीपः कदम्बवृक्षः । नेपः नयः पुरोहितः वृक्षः भृतकश्च । नेपमुदकं यानं च ॥ ३०२ ॥ **उभ्यवेर्लुक् च** (३०३) आभ्यां कित् पः लुक् चान्तस्य । 'उभत् पूरणे' । 'अव रक्षणादौ' । उप अप च अव्यये ॥ ३०३ ॥ **दलिवलितलिखजिध्वजिकचिभ्योऽपः** (३०४) दल दलपः प्रहरणविशेषः रणमुखं विदलं दलविशेषश्च । दलपं व्रणमुखत्राणम् । वल वलपः कर्णिका । तलण् तलपः हस्तप्रहारः । खज, खजपः मन्थः । खजपं दधि घृतं उदकं च । ध्वज ध्वजपः ध्वजः । कचि कचपः शाकपर्णं बन्धश्च ॥ ३०४ ॥ **भुजिकुतिकुटिविटिकुणिकुष्युषिभ्यः कित्** (३०५) ऽपः । भुजंप्, भुजपः राजा यजमानपालनादग्निश्च । कुतिः सौत्रः, कुतपः छागलोम्नां कम्बलः आस्तरणं श्राद्धकालश्च । कुटत्, कुटपः प्रस्थचतुर्भागः नीडं च । शकुनीनाम् । विट शब्दे, विटपः शाखा । कुणत् कुणपः मृतकं कुषितं शब्दार्थसारूप्यं च । कुषश् कुषपः विन्ध्यः संदंशश्च । उषू उषपः दाहः सूर्यः वह्निश्च ॥ ३०५ ॥ **शसेः श इच्चातः** (३०६) अस्मादपस्तालव्यशकारोऽन्तादेशोऽकारस्य चेकारः । शिंशपा वृक्षविशेषः ॥ ३०६ ॥ **विष्टपोलपवातपादयः** (३०७) किदपान्ता निपात्यन्ते । विषेस्तोन्तश्च विष्टपं जगत् सुकृतिस्थानं च । वलेरुल् । उलपं पर्वततृणं पङ्कजं जलं च । उलपः ऋषिः । वातेस्तोन्तश्च । वातपः ऋषिः । आदिग्रहणात् खरपादयः ॥ ३०७ ॥ **कलेरापः** (३०८) कलापः काञ्ची समूहः शिखण्डश्च ॥ ३०८ ॥ **विशेरिपक्** (३०९) विशिपः राशिः । विशिपं तृणं वेश्म आसनं पद्मं च ॥ ३०९ ॥ **दलेरीपो दिल् च** (३१०) दिलीपः राजा ॥ ३१० ॥ **उडेरूपक्** (३११) 'उड संघाते' इति सौत्रः । उडुपः प्लवः । जपादित्वात् वत्वे उडुवः ॥ ३११ ॥ **अश ऊपः पश्च** (३१२) अशौटि, अस्मादूपः पश्चान्तादेशः । अपूपः पक्वान्नविशेषः ॥ ३१२ ॥ **सर्त्तेः षपः** (३१३) सर्षपः रक्षोघ्नं द्रव्यं शाकं च ॥ ३१३ ॥ इति पोपान्त्यप्रत्यया अष्टादशभिः सूत्रैः । **रीशीभ्यां फः** (३१४) 'रीङ् च श्रवणे' । रेफः कुत्सितः । शीङ् च शेफः मेढ्रः ॥ ३१४ ॥ **कलिगलेरस्योच्च** (३१५) आभ्यां फः अस्य च उकारः । कुल्फः गुल्फः जङ्घाङ्घ्रिसन्धिः । गुल्फः पादोपरिग्रन्थिः ॥ ३१५ ॥ **शफकफशिफाशोफादयः** (३१६) फान्ता निपात्यन्ते । श्यतेः कायतेश्च ह्रस्वश्च । शफः खुरः प्रियंवदश्च । कफः श्लेष्मा । श्यतेरित्त्वमोत्त्वं च । शिफा वृक्षजटा । शोफः श्वयथुः खुरश्च । आदिशब्दात् रायते उपादेयतया रिफा औषधिविशेषः । नह्यते रोगाद्यैः नफा । सुनह्यते तिथिविशेषेण सुनफा इत्यादयः ॥ ३१६ ॥ इति फोपान्त्यास्त्रिभिः सूत्रैः । **वलिनितनिभ्यां बः** (३१७) वल्बः वृक्षः । निपूर्वः तनूयी नितम्बः श्रोणिः पर्वतैकदेशः नटश्च ॥ ३१७ ॥ **शम्यमेर्णिद्वा** (३१८) बः । शम्बः वज्रः कर्षणविशेषः वेणुदण्डः तोत्रं अरित्रम् । शम्बशाम्बौ जाम्बवतेयौ । अम, अम्बा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

माता । आम्बः अपह्नवः ॥ ३१८ ॥ **शल्यलेरुच्चातः** (३१९) शल अली आभ्यां बः । अकारस्य चोकारो भवति । शुल्बं ताम्रम् । उल्बं रजतम् गर्भवेष्टनम् । शुल्बं बभ्रुस्तरक्षुश्च ॥ ३१९ ॥ **तुम्बस्तम्बादयः** (३२०) बप्रत्ययान्ता निपात्यन्ते । ताम्यतेरत उत्वं च । तुम्बं अलाबु चक्राङ्गं च । स्तम्भेर्लुक् च । स्तम्बः तृणं विटपः संघातः अङ्कुरः समुदायः स्तबकः पुष्पापीडश्च । आदिशब्दात् कुशाम्बादयः ॥ ३२० ॥ **कृकडिकटिवटेरम्बः** (३२१) करम्बः दध्योदनः दधिसक्तवः पुष्पं च । 'कडत् मदे' । कडम्बः जातिविशेषः जनपदविशेषश्च । कटे, कटम्बः पकान्नविशेषः वादित्रं च । कडम्बकटम्बौ वृक्षौ च । वट वटम्बः शैलः तृणपुञ्जः ॥ ३२१ ॥ **कदेर्णिद्वा** (३२२) अम्बः । 'कद वैक्लव्ये' इति सौत्रादम्बः; स च णिद्वा । कादम्बः कदम्बः वृक्षजातिः ॥ ३२२ ॥ **शिलविलादेः कित्** (३२३) अम्बः । 'शिलत् उञ्छे' शिलम्बः ऋषिः तन्तुवायश्च । विलत् वरणे, विलम्बः वेषविशेषः रङ्गावसरश्च । आदिग्रहणादन्येऽपि ॥ ३२३ ॥ **हिण्डिविलेः किम्बो न लुक् च** (३२४) 'हिडुङ् गतौ' 'विलत्', आभ्यां कित् इम्बोऽन्तस्य च लुक् स्यात् । हिडिम्बः विलिम्बश्च राक्षसौ ॥ ३२४ ॥ **डीनीबन्धिशृधिचलिभ्यो डिम्बः** (३२५) एभ्यो डित् इम्बः स्यात् । डीङ्, डिम्बः राजोपद्रवः । णींग् निम्बः वृक्षः । बन्धश् बिम्बं प्रतिच्छन्दकः देहश्च । बिम्बी वल्लिजातिः । शृधूङ् शिम्बः मृगः । शिम्बी निष्पाववल्ली च । 'चल कम्पने', चिम्बा यवागूः ॥ ३२५ ॥ **कुट्युन्दिचुरितुरिपुरिमुरिकुरिभ्यः कुम्बः** (३२६) एभ्यः कित् उम्बः । कुटत् कुटुम्बं दारादयः । उन्दैप् उदुम्बः समुद्रः । चुरण् (स्तेये), 'तुर त्वरणे' सौत्रः चुरुम्बः तुरुम्बः गहनम् । पुरत् पुरुम्ब आहारः । 'मुरत् संवेष्टने' । मुरुम्बः मृद्यमानपाषाणचूर्णम् । कुरत् कुरुम्बः । निपूर्वात् निकुरुम्बः राशिः ॥ ३२६ ॥ इति बोपान्त्या दशभिः सूत्रैः । **गृदृरमिहनिजन्यर्तिदलिभ्यो भः** (३२७) गृत्, गर्भः जठरस्थः प्राणी । दृश्, दर्भः कुशः । रमिं, रम्भा अप्सराः कदली च । हनंक् हम्भा गोनादः । जनैचि जम्भः दानवः दन्तश्च । जम्भा मुखविदारणम् । ऋक्, अर्भः शिशुः । दल्भः ऋषिः वल्कलं विदारणं च ॥ ३२७ ॥ **इणः कित्** (३२८) भः । इभः हस्ती ॥ ३२८ ॥ **कृशृगृशलिकलिकडिगर्दिरासिरमिवडिवल्लेरभः** (३२९) कृत्, करभः त्रिवर्ष उष्ट्रः । शृश्, शरभः अष्टापदः । गृत्, गरभः जठरस्थः प्राणी । शल शलभः पतङ्गः । कलि कलभः हस्ती यौवनाभिमुखः । 'कडत् मदे' कडभः हस्तिपोतः । 'गर्द शब्दे' गर्दभः खरः । 'रासृङ् शब्दे' रासभः स एव । रमिं, रमभः प्रहर्षः । वडः सौत्रः । वडभी वेश्माग्रभूमी । ऋफिडादित्वात् लत्वे वलभी । वल्लि वल्लभः स्वामी दयितश्च ॥३२९॥ **सनेर्डित्** (३३०) अभः । 'षण भक्तौ' । सभा पर्षत् शाला च ॥ ३३० ॥ **ऋषिवृषिलुसिभ्यः कित्** (३३१) अभः । 'ऋषैत् गतौ' । 'वृषू (सूचने)' ऋषभः वृषभश्च पुङ्गवः भगवांश्चादितीर्थंकरः । ऋषभः वायुः । लुसि सौत्रः । लुसभः हिंस्रः मत्तहस्ती वर्ग च ॥ ३३१ ॥ **सिटिकिभ्यामिभः सैरटिट्टौ च** (३३२) आभ्यामिभः प्रत्ययो दन्त्यादिः सैरः टिट्टश्च आदेशौ यथासङ्ख्यं स्याताम् । षिंगट् सैरभः महिषः । टिट्टिभः पक्षी ॥ ३३२ ॥ **ककेरुभः** (३३३) ककि, ककुभः अर्जुनः ॥ ३३३ ॥ **कुकेः कोऽन्तश्च** (३३४) 'कुकि आदाने' इत्यस्मादुभः कोऽन्तश्च कुक्कुभः पक्षिविशेषः ॥ ३३४ ॥ **दमो दुण्डू च** (३३५) दमूच्, अस्मादुभः अस्य च दन्त्यादिष्टवर्गतृतीयान्तो दुण्डू इत्यादेशः स्यात् । दुण्डुभः निर्विषाहिः ॥ ३३५ ॥ **कृकलेरम्भः** (३३६) करम्भः दधिसक्तवः । कलम्भः ऋषिः ॥ ३३६ ॥ **काकुसिभ्यां कुम्भः** (३३७) आभ्यां कित् उम्भः । कैं कुम्भः घटः राशिश्च । कुसच् कुसुम्भः महारजनम् ॥ ३३७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति भोपान्त्या एकादशभिः सूत्रैः । **अर्तीरिस्तुसुहुसृघृधृशृक्षियक्षिभावाव्याधापायावलिपदिनीभ्यो मः** (३३८) ऋंक्, अर्मः अक्षिरोगः ग्रामः स्थलं च । ईरिक्, ईर्मं व्रणः । ष्टुंगक्, स्तोमः समूहः यज्ञः स्तोत्रं च । षुंगट् सोमः चन्द्रः वल्ली च । हुंक्, होमः आहुतिः । सृं, सर्मः नदः कालश्च । सर्मं स्नानं सुखं च । घृं, घर्मः ग्रीष्मः । धृंङ्त् स्थाने, धर्मः (उत्तम) क्षमादिर्न्यायश्च । शृश् शर्मः सुखम् । क्षित् क्षेमं कल्याणम् । 'यक्षिण् पूजायाम्' यक्ष्मः व्याधिः । भांक् भामः क्रोधः । भामा स्त्री । वांक् वामः प्रतिकूलः सव्यश्च । व्येंग् व्यामः वक्षः भुजायतिः । डुधांग्क् धामं निलयः तेजश्च । पां, पामा कच्छूः । यांक् यामः प्रहरः । वलि वल्मः ग्रन्थिः । पदिंच् पद्मं कमलम् । णींग् नेमः अर्धः समीपश्च ॥ ३३८ ॥ **ग्रसिहाग्भ्यां ग्राजिह्मौ च** (३३९) आभ्यां म इमौ चानयोरादेशौ यथासङ्ख्यं स्याताम् । ग्रामः समूहादिः । जिह्मः कुटिलः ॥ ३३९ ॥ **विलिभिलिसिधीन्धिधूसूश्याध्यारुसिविशुषिमुषीषिसुहियुधिदसिभ्यः कित्** (३४०) मः । विलत्, विल्मं प्रकाशम् । भिलिः सौत्रः भिल्मं भास्वरम् । षिधू सिध्मं त्वग्रोगः । ञिइन्धैपि इध्मं इन्धनम् । धूग्श् धूमः । षूङौच्, सूमः कालः श्वयथुः रविश्च । सूममन्तरिक्षम् । श्यैङ् श्यामः वर्णः । श्यामं नभः । श्यामा रात्रिः ओषधिश्च । ध्यैं, ध्यामः अव्यक्तवर्णः । 'रुक् शब्दे', रुमा लवणखानिः । षिवूच् स्यूमः रश्मिः दीर्घः सूत्रतन्तुश्च । स्यूमं जलम् । शुषंच्, शुष्मं बलं जलं संयोगश्च । मुषश् मुष्मः मूषिकः । 'ईष उञ्छे' ईष्मः वसन्तः बाणः वातश्च । 'षुहच् शक्तौ', सुह्मा जनपदः । सुह्मः राजा । युधिंच् युध्मः शरत्कालः शूरः शत्रुः संग्रामश्च । 'दसूच् उपक्षये' दस्मः हीनः वह्निः यज्ञश्च ॥ ३४० ॥ **क्षुहिभ्यां वा** (३४१) आभ्यां मः । स च किद्वा । टुक्षुक्, क्षुमा अतसी । क्षोमं वस्त्रम् । हिंट्, हिमं तुषारः । हेमं सुवर्णम् ॥ ३४१ ॥ **अवेर्हस्वश्च वा** (३४२) अव, इत्यस्मात् कित् मः ऊटो ह्रस्वश्च वा स्यात् । उमा गौरी अतसी कीर्त्तिश्च । ऊमं ऊनं आकाशं नगरं च ॥ ३४२ ॥ **सेरी च वा** (३४३) षिंग्ट् अस्मात् कित् मः ईकारश्चान्तादेशः स्यात् । सीमः ग्रामगोचरभूमिः क्षेत्रमर्यादा हयश्च । सिमः स एव, सर्वार्थश्च ॥ ३४३ ॥ **भियः षोऽन्तश्च** (३४४) अस्मात् कित् मः षोन्तश्च वा स्यात् । भीष्मः भयानकः । भीमः स एव ॥ ३४४ ॥ **तिजियुजेर्ग् च** (३४५) आभ्यां कित् मः गश्चान्तादेशः स्यात् । तिजि तिग्मं तीक्ष्णं दीप्तं तेजश्च । युजूंपी युग्मं युगलम् ॥ ३४५ ॥ **रुक्मग्रीष्मकूर्मसूर्मजाल्मगुल्मघ्रोमपरिस्तोमसूक्ष्मादयः** (३४६) किन्मप्रत्ययान्ता निपात्यन्ते । रोचतेः क् च । रुक्मं सुवर्णं रूप्यं च । ग्रसेः ग्रीष् च ग्रीष्मः ऋतुविशेषः । कुरुतेर्दीर्घश्च कूर्मः कच्छपः । षृत्, अस्य रोन्तश्च सूर्मी लोहप्रतिमा चुल्लिश्च । 'जल घात्ये' दीर्घश्च जाल्मो निकृष्टः । गुप्चू लश्च गुल्मः व्याधिः तरुसमूहः वनस्पतिः सेनाङ्गं च । गुल्मं आयस्थानम् । जिघ्रतेरोत्वं च घ्रोमः यज्ञाङ्गलक्षणः सोमः । परिपूर्वात् स्तौतेः षत्वाभावो गुणश्च परिस्तोमः यज्ञविशेषः । सूचण् कत्वं षोन्तश्च सूक्ष्मः निपुणः । सूक्ष्मं अणुः । आदिग्रहणात् क्ष्मादयो भवन्ति ॥ ३४६ ॥ **सृपृप्रथिचरिकडिकर्देरमः** (३४७) सरमा देवशुनी । परमः उत्कृष्टः । प्रथमः आद्यः । चरमः पश्चिमः । कडमः शालिः । ऋफिडादित्वात् लत्वे कलमः स एव । 'कर्द कुत्सिते शब्दे' कर्दमः पङ्कः ॥ ३४७ ॥ **अवेर्ध् च वा** (३४८) अस्मादमः धश्चान्तादेशो वा स्यात् । अधमः अवमश्च हीनः ॥ ३४८ ॥ **कुट्टिवेष्टिपूरिरिपिषिसिचिगण्यर्पिवृमहिभ्य इमः** (३४९) कुट्टण् कुट्टिमं संस्कृतभूतलम् । वेष्टि वेष्टिमं पुष्पबन्धविशेषः भक्ष्यविशेषश्च । पूरैचि, पूरिमं मालाबन्धविशेषः भक्ष्यविशेषश्च । पिष्लृंप्, पेषिमं भक्ष्य-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विशेषः । षिचीं त्, सेचिमं मालाविशेषः । गणण्, गणिमं गणितम् । ऋक्, णौ पौ अर्पिमं बालवत्साया दुग्धम् । वृगृट् वरिमं तुलोन्मेयम् । मह महिमं पूजनीयम् ॥ ३४९ ॥ **वयिमखचिमादयः** (३५०) इमान्ता निपात्यन्ते । वेंग्, वयादेशे वयिमं माल्यं कन्दुकः तन्तुवायदण्डश्च । खनूग् चश्च । खचिमं मणिलोहविद्धं घृतविहीनं च दधि । आदिशब्दादन्येऽपि ॥ ३५० ॥ **उद्घटिकुल्यलिकुथिकुरिकुटिकुडिकुसिभ्यः कुमः** (३५१) उत्पूर्वात् घटेः कुल्यादिभ्यश्च कित् उमः । घट उद्घटुमः परिक्षेपः । कुल, कुलुम उत्सवः । अली अलुमः प्रसाधनं नापितः अग्निश्च । कुथच्, कुथुमः ऋषिः । कुथुमं मृगाजिनम् । कुरत् कुरुमः कारुः भाजनं च । कुटत् कुटुमः प्रेष्यः । कुडत् कुडुमा भूमिः । 'कुसच् श्लेषे' कुसुमं पुष्पं च ॥ ३५१ ॥ **कुन्दुमलिन्दुमकुङ्कुमविद्रुमपट्टुमादयः** (३५२) एते कुमान्ता निपात्यन्ते । कुकि स्वरान्नो दश्च । कुन्दुमः निचयः गन्धद्रव्यं च । लीङ्च् लिन्दभावश्च । लिन्दुमः गन्धद्रव्यम् । कुकेः स्वरान्नोन्तश्च । कुङ्कुमं घुसृणम् । विद्लृंती रोन्तश्च, विद्रुमः प्रवालः । पदेष्टोन्तश्च । पट्टुमं नगरम् । आदिग्रहणादन्येऽपि ॥ ३५२ ॥ **कुथिगुधेरूमः** (३५३) कुथच्, कोथूमः ऋषिः । 'गुधच् परिवेष्टने' गोधूमः धान्यविशेषः ॥ ३५३ ॥ **विहाविशापचिभिद्यादेः केलिमः** (३५४) विपूर्वाभ्यां ओहांक् शोंच् इत्येताभ्यां पच्यादिभ्यश्च कित् एलिमः स्यात् । विहीयते त्यज्यतेऽशुचिशरीरमस्मिन्निति विहेलिमः स्वर्गः । विश्यति तनूभवति मासि मासि कलाभिः हीयमान इति विशेलिमः चन्द्रः स्वर्गश्च । डुपचींष् पचत्यसावन्नमिति पचेलिमः अग्निः आदित्यः अश्वश्च । भिदूंपी भिदेलिमः तस्करः । आदिशब्दात् दृशूं दृशेलिमः । अदं प्सांक् अदेलिमम् । हनंक् घ्नेलिमम् । डुयाचृग्, याचेलिमम् । पांक्, पेलिमम् । डुकृंग्, केलिममित्यादयः ॥ ३५४ ॥ **दो डिमः** (३५५) 'दां दाने' इत्यस्मात् डिमः स्यात् । दाडिमः दाडिमी वा वृक्षजातिः ॥ ३५५ ॥ **डिमेः कित्** (३५६) डिमेः सौत्रात् कित् डिमः स्यात् । डिण्डिमः वाद्यविशेषः ॥ ३५६ ॥ इति मोपान्त्या एकोनविंशत्या सूत्रैः । **स्थाछामासासूमन्यनिकनिषसिपलिकलिशलिशकीर्ष्यसहिबन्धिभ्यो यः** (३५७) स्थायः स्थानम् । स्थाया भूमिः । छों, छाया तमः प्रतिरूपकं कान्तिश्च । मांक् माया छद्म दिव्यानुभावदर्शनं च । षोंच्, सायं दिनावसानम् । 'षूत् प्रेरणे' सव्यः वामः दक्षिणश्च । मनिंच् मन्या धमनिः । अनक्, अन्यः परः । कनै कन्या कुमारी । षसक् सस्यं क्षेत्रस्थं गोधूमादि । पल, पल्यः कटकुसूलः । कलि कल्यः नीरोगः । शल, शल्यमन्तर्गतं लोहादि । शकॢट् शक्यमसारम् । 'ईर्ष्य ईर्ष्यार्थः' ईर्ष्यति ईर्ष्यणं वा ईर्ष्या मात्सर्यम् । षहि, सह्यः पश्चादर्णवपार्श्वशैलः । बन्धंश्, बन्ध्या अप्रसूतिः ॥ ३५७ ॥ **नञो हलिपतेः** (३५८) नञ्पूर्वाभ्यामाभ्यां यः स्यात् । 'हल विलेखने' । अहल्या गौतमपत्नी । पत्ल, अपत्यं पुत्रसन्तानः ॥ ३५८ ॥ **सञ्ञेर्ध च** (३५९) अस्माद्यः धश्चान्तादेशः । सन्ध्या दिननिशान्तरम् ॥ ३५९ ॥ **मृशीपसिवस्यनिभ्यस्तादिः** (३६०) यः । मृत्, मर्त्यः मनुष्यः । शीङ्, शेत्यः शकुनिः संवत्सरः अजगरश्च । पसिर्निवासे सौत्रो दन्त्यान्त्यः । पस्त्यं गृहम् । वसं वस्त्यः गुरुः । अनक् अन्त्यः निरवसितश्चण्डालादिश्च ॥ ३६० ॥ **ऋशिजनिपुणिकृतिभ्यः कित्** (३६१) 'ऋश् गतौ स्तुतौ वा' स्वरादिस्तालव्यान्तः । ऋश्यः मृगजातिः । जनैचि, जन्यं संग्रामः । जाया पत्नी । 'ये नवा' (४।२।६२) इत्यात्वम् । 'पुणत् शुभे' पुण्यं सत्कर्म । कृतैत्, कृन्तति कृत्या दुर्गा ॥३६१॥ **कुलेड्ड च वा** (३६२) अस्माद्यः डश्चान्तादेशो वा स्यात् । कुड्यं भित्तिः । कुल्या सारणी ॥ ३६२ ॥ **अगपुलाभ्यां स्तम्भेर्डित्** (३६३) यः । अगस्त्यः पुलस्त्यश्च ऋषिः ॥ ३६३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**शिक्यास्याढ्यमध्यविन्ध्यधिष्ण्याघ्न्यहर्म्यसत्यनित्यादयः** (३६४) यान्ता निपात्यन्ते । शोंचू इकश्चान्तः । शिक्यं लम्बमानः पिठर्याद्याधारः परिव्राड्भिक्षाभोजनस्थानं असारं च । असूच् दीर्घत्वम् । आस्यं मुखम् । आङ् पूर्वात् ढौकते ङित् च । आढ्यः धनवान् । 'मव बन्धने' धू च । मध्यं गर्भः । विधत्, स्वरान्नोन्तश्च । विन्ध्यः पर्वतः । ञिधृषाद्, णोन्तो धिष् च । धिष्ण्यं भवनमासनं च । धिष्ण्या उल्का । नञ्पूर्वात् हन्तेरुपान्त्यलोपश्च । अघ्न्यः धर्मः गोपतिश्च । अघ्न्या गौः । हरतेर्मोन्तश्च । हर्म्यं सौधम् । अस्तेः सत् च । सत्यं अमृषा । निपूर्वाद्यमेस्तोन्तो धातुलुक् च । नित्यं ध्रुवम् । आदिग्रहणात् लिह्यदुह्यादयः ॥ ३६४ ॥ **कुगुवलिमलिकणितन्याम्यक्षेरयः** (३६५) कुंक्, कवयः ऋषिः पुरोडाशश्च । गुङ्, गवयः गवाकृतिपशुविशेषः । वलि वलयः कटकः । मलि मलयः गिरिः । 'कण शब्दे' कणयः आयुधविशेषः । तनूयी, तनयः पुत्रः । अमण् णिचि आमयः रोगः । अक्षौ अक्षयः विष्णुः ॥ ३६५ ॥ **चायः केक् च** (३६६) चायृग् केकयः क्षत्रियः ॥ ३६६ ॥ **लादिभ्यः कित्** (३६७) अयः । लांक् लयः । पां पयः । ष्णांक् स्नयः । दैङ् दयः । ट्धें, धयः । मेंङ्, मयः कैं, कयः । खैं, खयः । श्रांक् श्रयः । क्षैं जैं सैं । क्षयः जयः । सयः । त्रैं त्रयः । ओवैं वयः इत्यादि ॥ ३६७ ॥ **कसेरलादिरिच्चास्य** (३६८) 'कस गतौ' । अस्मादलादिरयः । अकारस्येत् स्यात् । किसलयं प्रवालम् ॥ ३६८ ॥ **वृङः शषौ चान्तौ** (३६९) वृङ्श् वृशयं देशनाम आकाशं आसनं शयनं च । वृषयः आशयः ॥ ३६९ ॥ **गयहृदयादयः** (३७०) अयान्ता निपात्यन्ते । गमेर्डिच्च । गयः प्राणः । गया तीर्थम् । हरतेर्दोन्तश्च । हृदयं मनः स्तनमध्यं च । आदिशब्दात् गणेरेयः । गणेयं गणनीयम् इत्यादि ॥ ३७० ॥ **मुचेर्घयघुयौ** (३७१) अस्मात् घितौ अय उय इत्येतौ स्याताम् । मुकयः मुकुयश्च अश्वतरादश्वायां जातः । घित्करणं कत्वार्थम् ॥ ३७१ ॥ **कुलिलुलिकलिकषिभ्यः कायः** (३७२) एभ्यः कित् आयः स्यात् । कुल कुलायः नीडम् । लुलिः सौत्रः, लुलायः महिषः । कलि कलायः त्रिपुटः । कषायः कल्कादिः ॥ ३७२ ॥ **श्रुदक्षिगृहिस्पृहिमहेराय्यः** (३७३) श्रुंट् श्रावय्यः यज्ञपशुः । 'दक्षि हिंसागत्योः' दक्षाय्यः अग्नि गृध्रः वैनतेयः दक्षतमः । गृहणि गृहयाय्यः वैनतेयः गृहकर्मकुशलश्च । स्पृहण् स्पृहयाय्यः स्पृहयालुः घृतं च । स्पृहयाय्यानि तृणानि अह्नानि च । महण् महयाय्यः अश्वमेधः ॥ ३७३ ॥ **दधिषाय्यदीधीषाय्यौ** (३७४) निपात्यौ । दधिपूर्वात् स्यतेः षत्वं च । दधिषाय्यं पृषदाज्यं मृषावादी च । दीध्यतेः दीधीष् च दीधीषाय्यं तदेव ॥ ३७४ ॥ **कौतेरियः** (३७५) कुंक्, कवियं खलीनम् ॥ ३७५ ॥ **कृगः कित्** (३७६) इयः । क्रियः मेषः ॥ ३७६ ॥ **मृजेर्णालीयः** (३७७) णिदालीयः । मार्जालीयं पापशोधनम् । मार्जालीयः अग्निः । 'मृजोऽस्य वृद्धिः' (४।३।४२) इति णकार उत्तरार्थः ॥ ३७७ ॥ **वेतेस्तादिः** (३७८) वींक्, अस्मात् तादिर्णिदालीयः । वैतालीयं छन्दोजातिः ॥ ३७८ ॥ **धाग्राजिशृरमियाज्यर्तेरन्यः** (३७९) डुधांग्क् । धान्यं सस्यजातिः । राजृग् राजन्यः ज्योतिः अग्निः क्षत्रियश्च । शृश्, शरण्यः त्राता । रमिं रमण्यं शोभनम् । यजीं णिगन्तः याजन्यः क्षत्रियः यज्ञश्च । ऋंक्, अरण्यं वनम् ॥ ३७९ ॥ **हिरण्यपर्जन्यादयः** (३८०) निपात्यन्ते । हरतेरिच्चातः । हिरण्यं सुवर्णादिद्रव्यम् । परिपूर्वस्य 'पृषू सेचने' इत्यस्य उपसर्गान्तलोपो धातोश्च समग्रस्य ज इत्यादेशः पर्जन्य इन्द्रः मेघः शङ्कुः पुण्यं कुशलं च कर्म । आदिशब्दादन्येऽपि ॥ ३८० ॥ **वदिसहिभ्यामान्यः** (३८१) वदान्यः दाता गुणवान् चारुभाषी च । सहान्यः शैलः ॥ ३८१ ॥ **वृङ**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एण्यः** (३८२) वरेण्यः परं ब्रह्म धाम श्रेष्ठः प्रजापतिः अन्नं च ॥ ३८२ ॥ **मदेः स्यः** (३८३) मत्स्यः मीनः धूर्त्तश्च ॥ ३८३ ॥ **रुचिभुजिभ्यां किष्यः** (३८४) कित् इष्यः । रुचिष्यः वल्लभः सुवर्णं च । भुजिष्यः सेवकः आचार्यः भोक्ता अन्नं मृद्धोदनः दाम च । भुजिष्यं धनम् ॥ ३८४ ॥ **वच्यर्थिभ्यामुष्यः** (३८५) वचुष्यः वक्ता । अर्थुष्यः अर्थी ॥ ३८५ ॥ **वचोऽथ्य उत् च** (३८६) वचंक् इत्यस्मादथ्योऽस्य च उत् इत्यादेशः स्यात् । उतथ्यः ऋषिः ॥ ३८६ ॥ इति योपान्त्यास्त्रिंशता सूत्रैः । **भीवृधिरुधिवज्यगिरमिवमिवपिजपिशकिस्फायिवन्दीन्दिपदिमदिमन्दिचन्दिदसिघसिनसिहस्यसिवाशिदहिसहिभ्यो रः** (३८७) भेरः भेदः करभः शरः मण्डूकः दुन्दुभिः कातरश्च । ऋफिडादित्वाल्लत्वे भेलः चिकित्साग्रन्थकारः शरः मण्डूकः प्रहीणः अप्राज्ञश्च । वर्ध्रश्चर्मविकारः चन्द्रः मेघश्च रोध्रवृक्षः । 'वज गतौ' वज्रं कुलिशं रत्नविशेषश्च । 'अग गतौ', अग्रः प्राग्भागः श्रेष्ठश्च । रम्रः कामुकः । वम्रः धूम्रः—धर्मविशेषश्च । वम्री उपदेहिका । वप्रः केदारः वास्तुभूमिश्च । जप्रः ब्राह्मणः ( मण्डूकश्च ) । शक्लृंट् शक्रः इन्द्रः । स्फारं विस्तीर्णं प्रभूतं च । वदुङ् वन्द्रः बन्दी केतुः कामश्च । इदु इन्द्रः शक्रः । पद्रं ग्रामादिसन्निवेशः शून्यं च । मद्राः जनपदः । मद्रं सुखम् । ( मन्द्रो मधुरस्वरः, मन्द्रं गम्भीरम् । चन्द्रः शशी सुवर्णं च । दस्रः शिशिरं चन्द्रमाः अश्विनोर्ज्येष्ठश्च । दस्रावश्विनौ । घस्रो दिवसः ) 'णस कौटिल्ये' नस्रः नासिकापुट ऋषिश्च । हसे हस्रः दिनम् घातकः हर्षुलश्च । हस्रं बलाधानं सन्निपातश्च । सहस्रं दशशतानि । असू अस्रं अश्रु । वासिच् । वाश्रः पुरुषः शब्दः संघातः शरभः रासभः पक्षी च । वाश्रा धेनुः । दहं दह्रः अग्निः शिशुः सूर्यश्च । षहि सह्रः शैलः ॥ ३८७ ॥ **ऋज्यजितञ्चिवञ्चिरिपिसृपितृपिदृपिचुपिक्षिपिक्षुपिक्षुदिमुदिरुदिछिदिभिदिखिदुन्दिदम्भिशुभ्युम्भिदंशिचिसिवहिविसिवसिशुचिसिधिगृधिवीन्धिश्वितिवृतिनीशीसुसूभ्यः कित्** (३८८) रः । 'ऋजि गत्यादिषु' ऋज्रः नायकः इन्द्रः अर्थश्च । अजेर्वीभावे वीरः शूरः । तञ्चू वञ्चू तक्रं उदश्वित् । वक्रः कुटिलः अङ्गारकः विष्णुश्च । उभयत्र न्यङ्कादित्वात्कत्वम् ॥ रिपिः सौत्रः रिप्रं कुत्सितम् । सृप्लृं सृप्रः चन्द्रः । सृप्रं मधु । सृप्रा नाम नदी । तृपौच् तृप्रं मेघान्तघर्मः आज्यं काष्ठं पापं दुःखं च । दृपौच् दृप्रं बलं दुःखं च । दृप्रा बुद्धिः । 'चुप मन्दायां गतौ' चुप्रः वायुः । क्षिपींत् क्षिप्रं शीघ्रम् । 'क्षुपिः सादने' सौत्रः, क्षुप्रं तुहिनं कण्टकिगुल्मश्च । क्षुदृंपी क्षुद्रं अणु जलगर्तश्च । क्षुद्रा मधुकर्यः । क्षुद्रः हिंस्रः । 'मुदि हर्षे' मुद्रा चिह्नकरणम् । रुदक्, रुद्रः शम्भुः । छिदृंपी छिद्रं विवरम् । भिदृंपी, भिद्रं अदृढम् । भिद्रः शरः । 'खिदंत् परिघाते' खिद्रं विघ्नः । खिद्रः विषाणः विषादः चन्द्रः दीनश्च । उन्दैप् उद्रः ऋषिः जलमार्जारश्च । सम्पूर्वात् समुदन्ति आर्द्रीभवन्ति वेलाकाले नद्योऽस्मादिति समुद्रः सागरः । भीमादित्वादपादाने । दम्भूद, दभ्रः अल्पः चन्द्रः कुशः कुलिशः सूर्यश्च । शुभि, शुभ्रः अवदातः । उम्भत् उभ्रः मेघः पेलवश्च । दशं, दभ्रः दन्तः सर्पश्च । चिंगूद्, चिरं अशीघ्रम् । षिंग्ट्, सिरा रुधिरस्रोतोवाहिनी नाडी । वहीं उह्रः अनड्वान् । विसच् विस्रम् आमगन्धिकम् । वस उस्रः रश्मिः । बाहुलकात्षत्वं न स्यात् । उस्रा गौः । शुच् शुक्रः ग्रहः मासः शुक्लश्च । शुक्रं रेतः । लत्वे शुक्लः वर्णः । कत्वं न्यङ्कादित्वात् । षिधू सिध्रः साधुः वृक्षः मांसप्रभेदश्च । गृधूच् गृध्रः श्येनः लुब्धकः कङ्कश्च । ञिइन्धैपि विपूर्वः वीध्रः अग्निः वायुः नभः निर्मलः पूर्णचन्द्रमण्डलं च । श्विताङ् श्वित्रं श्वेतकुष्ठम् । वृतूङ्, वृत्रः दानवः बलवांश्च । वृत्रं पापम् ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

णींग् नीरं जलम् । शीङ्, शीरः अजगरः । षुंग्द् सुरः देवः । सुरा मद्यम् । षूङौच् सूरः आदित्यः रश्मिश्च ॥ ३८८ ॥ **इणधाग्भ्यां वा** (३८९) आभ्यां रः, स च किद्वा । इरा मदनीयपानविशेषः मेदिनी च । एरा एडका । धीरः सत्ववान् धृतिमांश्च । धारा जलयष्टिः खड्गावयवः अश्वगतिविशेषश्च ॥ ३८९ ॥ **चुम्बिकुम्बितुम्बेर्नं लुक् च** (३९०) एभ्यः किद्रः नकारस्य चैषां लुक् स्यात् । चुबु, चुब्रं वक्त्रम् । चुब्रः रश्मिः । 'कुबु आच्छादने' कुब्रं सङ्कटं भग्नपृष्ठः फल्गुहस्ती चर्म गृहाच्छादनं च । तुबु, तुब्रं कुटिलम् ॥ ३९० ॥ **भन्देर्वा** (३९१) अस्माद्रः नकारस्य च लुग्वा स्यात् । भद्रं भन्द्रं च, कल्याणं सुखं च ॥ ३९१ ॥ **चिजिशुसिमितम्यम्यर्दे दीर्घश्च** (३९२) चीरं जीर्णवस्त्रं वल्कलं च । जीरः अजाजि अग्नि वायुः अश्वश्च । जीरमन्नम् । लत्वे जीलः चर्मपुटः । 'शुं गतौ' । शूरः विक्रान्तः । षिंग्ट् सीरं हलम् । सीरा हलविलेखनलेखा । डुमिंग्ट् मीरः समुद्रः । मीरं जलम् । मीरा मांसपचनी देवसीमा च । तमूच् ताम्रः शुल्वं वर्णश्च । अम् आम्रः वृक्षविशेषः । अर्दे, आर्द्रं सरसम् ॥ ३९२ ॥ **चकिरमिविकसेरुच्चास्य** (३९३) चकि चुक्रः अम्लो रसः बीजपूरमिञ्झिकासुरः निमन्त्रणं च । रमिं रुम्रः सुन्दरः आदित्यसारथिः ब्राह्मणः विनाशश्च । विकुस्रः चन्द्रः । विकुस्रं पुष्पितम् । बाहुलकात् विकसे(रु)र्विकल्पः विकस्रः ॥ ३९३ ॥ **शदेरूच्च** (३९४) शद्लृ, अस्माद्रः अकारस्य ऊः स्यात् शूद्रः चतुर्थो वर्णः ॥ ३९४ ॥ **कृतेः क्रूकृच्छ्रौ च** (३९५) अस्माद्रः इमौ चादेशौ स्याताम् । क्रूरमम‍ृदु । क्रूरः पापकर्मा कृच्छ्रं दुःखम् ॥ ३९५ ॥ **खुरक्षुरदूरगौरविप्रकुप्रश्वभ्राभ्रधूम्रान्ध्ररन्ध्रशिलिन्ध्रौड्रपुण्ड्रतीव्रनीव्रशीघ्रोग्रतुग्रभुग्रनिद्रातन्द्रासान्द्रगुन्द्राराज्रादयः** (३९६) (एते रान्ता) निपात्यन्ते । खुरत् क्षुरत्, अनयोरकारलोपो गुणाभावश्च । खुरः शफः । क्षुरः नापितभाण्डम् । ननु च खुरक्षुरशब्दौ 'नाम्युपान्त्यप्रीकृ०' (५।१।५४) इति केन सिद्धयतः । सत्यम् । तत्र कर्तृत्वार्थे इह तु संप्रदानाचान्यत्रोणादयः इत्यर्थभेदः । असर्वविषयत्वं वा अनयोर्ज्ञाप्यते; यथा अदेः परोक्षायां वा घस्लादेशवचनेन घसेः । एवमन्यत्रापि स्वयमूह्यम् । दूरपूर्वादिणो लुक् च । दूरं विप्रकृष्टम् । गवतेर्वृद्धिश्च । गौरः अवदातः । विपूर्वात् पातेर्लुक् च । विप्रः ब्राह्मणः । विविधं प्रातीति वा विप्रः । गुपच्, आदेः कत्वम् । कुप्रं गहनं गृहाच्छादनं च । ट्वोश्वि अकारः भोन्तश्च श्वभ्रं बिलमाकाशं च । आप्लंट् अभादेशश्च अभ्रं मेघः । धूरश् मोन्तश्च । धूम्रः वर्णविशेषः । अहुङ् धश्च । अन्ध्रः क्षत्रजातिः (रधेः स्वरान्नोन्तश्च रन्ध्रं छिद्रम् । ञिइन्धैपि अस्य च तालव्यादिशिलश्चादिः शिलिन्ध्रमुद्भिद्विशेषः । ओणेर्डश्च ओड्रः क्षत्रजातिः) पुणेः स्वरान्नोन्तो डश्च पुण्डेर्वा रूपम् । पुण्ड्रः क्षत्रजातिः तिलकश्च । तिजेर्वो दीर्घश्च तीवतेर्वा तीव्रः तीक्ष्णः उत्कृष्टश्च । नियो वोन्तश्च नीवतेर्वा नीव्रं गृहच्छदिरुपान्तः । श्यैङ् ईत्वं यलोपो घश्चान्तः शीघ्रः त्वरितः । उचेरुषेर्वा गः किच्च उग्रः रुद्रः रौद्रश्च । तुदींत् गः कित्त्वम् तुग्रं शृङ्गम् । भुजंप् गः किच्च भुग्रः रश्मिसमूहः । णिदु, किन्नलोपश्च । निद्रा स्वापः । तमूच् दोन्तश्च । तन्द्रा आलस्यम् । षद्लं, स्वरान्नोन्तो वृद्धिश्च सान्द्रं घनम् । गुदेः स्वरान्नोन्तश्च गुन्द्रा जलतृणविशेषः । राजे रज्जेर्वा किच्च इश्चोपान्त्यस्य रिज्र नायकः । आदिग्रहणादन्येऽपि ॥ ३९६ ॥ **ऋच्छिचटिवटिकुटिकठिचठिमव्यडिशीकृशीभृकदिवदिकन्दिमन्दिसुन्दिमन्थिमञ्जिपञ्जिपिञ्जिकमिसमिचमिवमिभ्रम्यमिदेविवासिकास्यर्तिजीविवर्बिकुशुदोररः** (३९७) ऋछत् ऋच्छरः त्वरावान् । ऋच्छरा वेश्या कुलटा त्वरा अङ्गुलिश्च ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चटण् चटरः तस्करः । वट वटरः मधुकण्डरा । कुटत् कोटरं छिद्रम् । बाहुलकात् गुणः । कठ, कठरः दरिद्रः । 'वठ स्थौल्ये' वठरः मूर्खः बृहद्देहश्च । 'मठ मदनिवासयोश्च' । मठरः ऋषिः अज्ञानी गोत्रं अलसश्च । अड, अडरः वृक्षः । शीकृङ् शीकरः जललवः । 'शीभृङ् कत्थने' शीभरः हस्तिहस्तमुक्तो जललवसेकः । कदिः सौत्रः, कदरो वृक्षविशेषः । 'बद स्थैर्ये' बदरी फलवृक्षविशेषः । कदुङ् कन्दरः गिरिगर्त्तः । मदुङ् मन्दरः शैलः । सुन्दिः सौत्रः, सुन्दरः मनोज्ञः । मन्थश् मन्थरः मन्दः खर्षश्च । मञ्जिपञ्जी सौत्रौ, मञ्जरी आम्रादिशिखा । गौरादित्वात् ङीः । पञ्जरः शुकाद्यवरोधसद्म । पिञ्जुण् पिञ्जरः पिशङ्गः । कमूङ् कमरः अरण्यपशुः मूर्खः कार्मुकं कोमलः चौरः कान्तश्च । षम, समरः संग्रामः । चमू चमरः अरण्यपशुः । टुवमू वमरः दुर्मेधाः । भ्रमूच् भ्रमरः षट्पदः । अम अमरः सुरः । देवृङ्, देवरः पत्यनुजः । वसं णौ वासरः दिवसः कामः अग्निः प्रावृट् च । अन्ये 'वाशिच् शब्दे' अस्मादपि तालव्यान्तादिच्छन्ति । वाशरः अग्निः मेघः दिवसश्च । कासृङ् कासरः महिषः । ऋंकू, अररः कपाटः बुधः भ्रमणः गृहं हरणं शलाका च । जीव जीवरः दीर्घायुः । बर्ब गतौ । बर्बरः म्लेच्छजातिः । बर्बरी कुञ्चिताः केशाः । कुंक् कबरः वर्णः । कबरी वेणिः । 'शुं गतौ' । शबरः म्लेच्छजातिः । शव गताविल्यस्यान्ये । टुदुंट् दवरः गुणः ॥ ३९७ ॥ **अवेर्धं च वा** (३९८) अव अस्मादरः धकारश्चान्तादेशो वा स्यात् । अधरः हीनः उपरिभावस्य प्रतियोगी दन्तच्छदश्च । अवरः परप्रतियोगी ॥ ३९८ ॥ **मृद्युन्दिपिठिकुरिकुहिभ्यः कित्** (३९९) अरः । मृदश्, मृदरः व्याधिः अतिकायः क्षोदश्च । उन्दैप्, उदरं जठरं व्याधिश्च । 'पिठ हिंसासंक्लेशयोः' पिठरं भाण्डम् । कुररः जलपक्षिजातिः । कुहणि कुहरं गम्भीरगर्त्तः ॥ ३९९ ॥ **शाखेरिदेतौ चातः** (४००) 'शाखृ व्याप्तौ' । अस्मादरः अकारस्य इकार एकारौ स्याताम् । शिखरमग्रम् । शेखरः आपीडः ॥ ४०० ॥ **शपेः फश्च** (४०१) अस्मादरः फश्चान्तादेशः स्यात् । शफरः क्षुद्रमत्स्यः ॥ ४०१ ॥ **दमेर्णिद्वा दश्च डः** (४०२) दमूच्, डामरः भयानकः । डमरः स एव ॥४०२॥ **जठरक्रकरमकरशंकरकर्परकूर्परतोमरपामरप्रामरप्राघ्नरसगरनगरतगरोर्दरादरशृदरदृदरकुदरकुकुन्दरगोर्वराम्बरमुखरखरडहरकुञ्जराजगरादयः** (४०३) किदरप्रत्ययान्ता निपात्यन्ते । जनेष्ठ च जठरं कोष्ठः । क्रमेः क च क्रकरः गौरतित्तिरः । मङ्केर्नलोपश्च मकरः ग्राहः । शम्पूर्वात् किरतेर्डिच्च शङ्करः रुद्रः । कृपेरुपान्त्यस्य ऊर् च वा कर्परं कपालम् कूर्परं कुफणी । ताम्यतेरत ओच्च तोमरः आयुधम् । पातेर्मोन्तश्च पामरः ग्रामीणः । प्रपूर्वादमतेः प्रामरः ग्राम्यः मन्दः । प्रपूर्वादत्तेर्मोन्तश्च प्राघ्नरः नरपशुः । सहिनशोर्ग च सगरः द्वितीयश्चक्रवर्ती । नगरं पुरम् । 'तगु गतौ' नलोपश्च तगरः वृक्षविशेषः । ऊर्जः परात् दृणातेर्डित् जलुक् च ऊर्जा बलेन दृणाति बिभेति ऊर्दरः दुर्बलः । 'अदु बन्धने' नलुक् च अदरं वृक्षः संग्रामश्च चञ्चुसमूहः मातृवाहश्च । शृश् दृश् अनयोर्ह्रस्वत्वं दश्चान्तः । शृदरः सर्पः । दृदरं विषं भयं च । डुकृंग् दोन्तश्च कुदरः वृक्षः सर्वकर्मप्रवृत्तो दस्युजनः कुसूलश्च । कुपूर्वात् 'स्कुदुङ् आप्रवणे' सलोपश्च कुकुन्दरं श्रोणीकूपः । गोपूर्वाद् वृगो डित् रश्चादिः गोर्वरः करीषः । अमेर्बोन्तश्च अम्बरं वस्त्रमाकाशं च । मुहेः ख च मुखरः वाचालः । खनेर्डिच्च खरः रासभः । दहेर्दोर्डेश्च डहरं हृत्कमलम् । कूज ह्रस्वत्वं स्वरान्नोन्तश्च । कुञ्जरः हस्ती । अजेरगश्चान्तः वीभावाभावश्च । अजगरः शयुः । आदिग्रहणात्कोटरः अडङ्गर शाङ्गर पाण्डर वानरादयो भवन्ति ॥ ४०३ ॥ **मुदिगूरिभ्यां दिद्गजौ चान्तौ** (४०४) आभ्यां दिदरः । गजौ चान्तौ यथासङ्ख्यं स्याताम् । मुद्गरः प्रहरण-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विशेषः । गुद्गरी स्त्री । गूरैचि, गूर्जरः सौराष्ट्रादिः । गूर्जरी स्त्री ॥ ४०४ ॥ **अग्यङ्गिमदिमन्दिकडिकसिकासिमृजिकञ्जिकलिमलिकचिभ्य आरः** (४०५) अग अगारं वेश्म । 'अगु गतौ' अङ्गारःनिर्वातज्वालो निर्वाणश्चोल्मुकावयवः भूमिसुतश्च । मदैच् मदारः पानशौण्डः वराहः हस्ती अलसश्च । मदुङ् मन्दारः वृक्षः । कडत्, कडारः पिङ्गलः विषमदशनश्च । कस कसारः हिंस्रः । 'कासृङ् शब्दकुत्सायाम्' । कासारः पल्वलम् । मृजौक् मार्जारः बिडालः । कञ्जिः सौत्रः, कञ्जारः कुसूलजातिः यूपः व्यञ्जनम् । कलि कलारः विषमरूपः । मलि मलारः अलसः । मलमिव आरातोदोस्ये(ति) वा मलारः । कचि कचारः अपनेयतृणबुसपांशुविकारः ॥ ४०५ ॥ **त्रः कादिः** (४०६) आरः । तॄ तर्कारः वृक्षः ॥ ४०६ ॥ **कृगो मादिश्च** (४०७) कादिश्चारः स्यात् । कर्मारः लोहकारः कर्कारः वृक्षः ॥ ४०७ ॥ **तुषिकुठिभ्यां कित्** (४०८) आरः । तुषंच् तुषारः हिमम् । कुठिः सौत्रः, कुठारः परशुः ॥ ४०८ ॥ **कमेरत उच्च** (४०९) कमूङ् कुमारः महासेनः अभ्रष्टः बालश्च ॥ ४०९ ॥ **कनेः कोविदकर्बुदकाञ्चनाश्च** (४१०) कनै असादारः त्रयश्चैते आदेशाः स्युः । कोविदारः कर्बुदारः काञ्चनारश्च वृक्षविशेषाः ॥ ४१० ॥ **द्वारशृङ्गारभृङ्गारकह्लारकान्तारकेदारखारडादयः** (४११) निपात्यन्ते । उभत् द्वादेशश्च । द्वारं द्वाः । श्रयतेस्तालव्यादिः शृङ्गश्च शृङ्गाररसविशेषः विदग्धता च । भृगो भृङ्ग च भृङ्गारः हस्तिमुखगलन्तिका । कलेर्हश्च स्वरात्परः कह्लारं उत्पलविशेषः । कमेस्तोन्तो दीर्घश्च कान्तारमरण्यं । कदेः सौत्रस्यात एव केदारः वप्रः । खनेर्डिंच खारी चतुर्द्रोणा । खारडिति टकारो ङ्यर्थः । आदिग्रहणात् शिशुमारादयः ॥ ४११ ॥ **मदिमन्दिचन्दिपदिखदिसहिवहिकुसृभ्य इरः** (४१२) मदैच् मदिरा सुरा । मदुङ् मन्दिरं वेश्म नगरं च । चदु, चन्दिरः चन्द्रमाः हस्ती च । चन्दिरं चन्द्रिकावत् जलं च । पदिंच् पदिरः मार्गः । 'खद हिंसायां च' खदिरः वृक्षः । षह सहिरः पर्वतः । वर्हि वहिरः बलीवर्दः । कुक् कुविरः अक्षिकोणः । सृं सरिरं जलम् । लत्वे सलिलम् ॥ ४१२ ॥ **शवशशेरिचातः** (४१३) आभ्यामिरः अकारस्य इच । 'शव गतौ' तालव्यादिः । शिबिरं सैन्यसन्निवेशः । शश शिशिरं शीतलं ऋतुश्च ॥ ४१३ ॥ **श्रन्थेः शिथ् च** (४१४) अस्मादिरो शिथ् इत्यस्यादेशः स्यात् । श्रथुङ् शिथिरं श्लथं लत्वे शिथिलम् ॥ ११४ ॥ **अशोर्णित्** (४१५) अश्नोतेरश्नातेर्वा णित् इरः स्यात् । आशिरः विष्णुः आदित्यश्च । प्राशिरः बह्वाशी ॥ ४१५ ॥ **शुषीषिबन्धिरुधिरुचिमुचिमुहिमिहितिमिमुदिखिदिछिदिभिदिस्थाभ्यः कित्** (४१६) इरः । शुषंच् शुषिरं छिद्रम् । इषत् इषिरं तृणम् । इषिरः अग्निः आहारः क्षिप्रः सेव्यश्च । बंधंश् बधिरः श्रुतिविकलः । रुधृंपी रुधिरं द्वितीयो धातुः । रुचि रुचिरं दयितं दीप्तिमच्च । मुच्लृंती, मुचिरः धर्मः सूर्यः मेघश्च । मुहौच्, मुहिरः कन्दर्पः सूर्यश्च । मुहिरं तमः । मिहं, मिहिरः मेघः सूर्यश्च । मिहिरं तोयम् । तिमच् । तिमिरं तमस्तोयं रोगश्च कश्चित् । मुदि मुदिरः मेघः सूर्यश्च । खिदंत् खिदिरः त्रासः तस्करश्च । छिदृंपी छिदिरः उन्दुरः अग्निश्च । छिदिरं शस्त्रम् । भिदृंपी, भिदिरः अशनिः भेदश्च । ष्ठां स्थिरः अचलः ॥ ४१६ ॥ **स्थविरपिठिरस्फिराजिरादयः** (४१७) एते निपात्यन्ते । तिष्ठतेर्वोऽन्तो ह्रस्वश्च । स्थविरः वृद्धः । पचतेरत इत्वं ठश्च । पिठिरं साधनभाण्डम् । पिठेर्वा रूपम् । स्फायतेर्डिंच स्फिरः स्फारः वृद्धिश्च । अजेर्वीभावाभावश्च अजिरमङ्गणं नगरं देवः वेश्म च । आदिग्रहणादन्येऽपि ॥ २० ॥ ॥ ४१७ ॥ **कृगॄपॄपूगमञ्जिकुटिकटिपटिकण्डिशौण्डिहिंसिभ्य ईरः** (४१८) कृ, करीरः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वनस्पतिविशेषः वंशाद्यङ्कुरश्च । शॄश्, शरीरं वपुः । पॄ, परीरं बलं लाङ्गलमुखं च । पूग्श् पवीरं रङ्गस्थानं फलं पवित्रं बीजावपनं च । मञ्जिः सौत्रः मञ्जीरं नूपुरः । कुटत्, कुटीरमालयः कर्कटकः चन्द्राश्रयराशिश्च । कोटीरं मुकुटः । बाहुलकाद्गुणः । कटे कटीरं जनपदः जघनं जलं च । पट, पटीरः कन्दर्पः । पटीरं कार्मुकम् स्फिक् च । 'कडु मदे' कण्डीरं हरीतकम् । 'शौडृ गर्वे' । शौण्डीरः गर्वितः सत्त्ववान् तीक्ष्णश्च । हिंसुप् हिंसीरः श्वापदः हिंस्रश्च ॥ ४१८ ॥ **घसिवशिपुटिकुरिकुलिकाभ्यः कित्** (४१९) ईरः । घस्लृं क्षीरं दुग्धं मेघश्च । वशक्, उशीरं वीरणीमूलम् । पुटत्, पुटीरः कूर्मः । कुरत् कुरीरं मैथुनं वेश्म च । कुरीरः मालाविशेषः कम्बलश्च ( कुल कुलीरः कर्कटः । कैं कीरः शुकः काश्मीरकश्च ) ॥ ४१९ ॥ **कशेर्मोन्तश्च** (४२०) कश, इत्यस्मात्तालव्यान्तादीरः मश्चान्तः स्यात् । कश्मीरा जनपदः ॥४२०॥ **वनिवपिभ्यां णित्** (४२१) ईरः । 'वन भक्तौ' । वानीरः वेतसः । टुवपीं वापीरः मेघः अमोघनिष्पत्ति च क्षेत्रम् ॥ ४२१ ॥ **जम्बीराभीरगभीरगम्भीरकुम्भीरभडीरभण्डीरडिण्डीरकिर्मीरादयः** (४२२) ईरान्ता निपात्यन्ते । जनेर्बोन्तश्च जम्बीरः वृक्षः । आप्नोतेर्भश्च आभीरः शूद्रजातिः । गमेर्भः स्वरान्नस्तु वा गभीरः अगाधः । गम्भीरः स एव । स्कुम्भेः सौत्रात् सलोपश्च कुम्भीरः जलचरः । भदुङ्, अस्य नलुक् च वा । भडीरः भण्डीरश्च योद्धृवचनौ । डीङो डित् द्वित्वं पूर्वस्य नोऽन्तश्च डिण्डीरः फेनः । किरो मोन्तश्च किर्मीरः कर्बुरः । आदिग्रहणात्तूणीरनासीरमन्दीरकरवीरादयो भवन्ति ॥ ४२२ ॥ **वाश्यसिवासिमसिमथ्युन्दिमन्दिचतिचङ्क्यङ्किकर्बिचकिबन्धिभ्य उरः** (४२३) वाशिच्, वाशुरः शकुनिः गर्दभश्च । वाशुरा रात्रिः । असूच्, असुरः दानवः । 'वासण् उपसेवायाम्' । वासुरा रात्रिः । मसैच्, मसुरा पण्यस्त्री । मसुरं चर्मासनं धान्यविशेषश्च । मथे मथुरा नगरी । उन्दैप् उन्दुरः मूषिकः । मदुङ् मन्दुरा वाजिशाला । चतेग्, चतुरः विदग्धः । चङ्किः सौत्रः, चङ्कति चेष्टते चङ्कुरः रथः अनवस्थितश्च । 'अकुङ् लक्षणे' अङ्कुरः प्ररोहः तरुप्रतानभेदश्च । घञ्युपसर्गस्य बहुलवचनाद्दीर्घत्वे अङ्कूरः । 'कर्ब गतौ' कर्बुरः शबलः । 'चकि तृप्तिप्रतिघातयोः' चकुरः दशनः । बन्धंश् बन्धुरः मनोज्ञः नम्रश्च ॥ ४२३ ॥ **मङ्केर्नलुक् वोच्चास्य** (४२४) मकुङ्, अस्मादुरः नकारस्य लुक्, अकारस्य च उकारो वा स्यात् । मुकुरः आदर्शः मुकुलं च । मकुरः आदर्शः कल्कः बालपुष्पं च ॥ ४२४ ॥ **विधेः कित्** (४२५) उरः । विधत् विधुरं वैशसम् ॥ ४२५ ॥ **श्वशुरकुकुन्दुरदर्दुरनिचुरप्रचुरचिकुरकुकुरकुक्कुरकुर्कुरशर्कुरनूपुरनिष्ठुरविथुरमद्गुरवागुरादयः** (४२६) किदुरप्रत्ययान्ता निपात्यन्ते । आशुपूर्वात् शुपूर्वाद्वाश्नोतेरश्नातेर्वा आकारलोपश्च । श्वशुरः दम्पत्योः पिता । कुपूर्वात् 'स्कुदुङ् आप्रवणे' इत्यस्मात् सलुक् च । कुकुन्दुरौ नितम्बकूपौ । दृणातेर्दोन्तश्च दर्दुरो मण्डूको मेघश्च । निपूर्वात् प्रपूर्वाच्चिनोतेश्चरतेर्वा डित् च । निचुरः तरुः, लत्वे निचुलः । प्रचुरं प्रायः । चकेरित्वास्य चिकुरं युवतीनामीषन्निमीलितमक्षि । चिकुराः केशाः । कुकेः कोऽन्तो वा । कुकुरः यादवः । कुक्कुरः श्वा । किरः कुर् कोऽन्तश्च । कुर्कुरः श्वा । शॄश् गुणः कोन्तश्च । शर्कुरः तरुणः । णूत् पोऽन्तश्च । नूपुरः तुलाकोटिः । निपूर्वात् तिष्ठतेः, निष्ठुरः कर्कशः । निष्ठूरं काहलम् । व्यथेर्विथ् च । व्यथन्तेऽस्माज्जना इत्यपादाने विथुरः राक्षसः । मदिवाल्योर्गोऽन्तश्च मद्गुरः मत्स्यविशेषः । वागुरा मृगानायः । आदिग्रहणान्मन्यतेर्धश्च मधुरः रसविशेषः इत्यादि ॥ ४२६ ॥ **मीमसिपशिखटिखडिखर्जिकर्जिसर्जिकृपिवल्लिमण्डिभ्य ऊरः** (४२७) 'मीङ् हिंसायाम्' । मयूरः । मह्यां रौतीति मयूर इति पृषोदरादिसंज्ञा शब्दानामनेकधा व्युत्पत्तिं लक्षयति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मसैच् मसूरः धान्यः चर्मासनं च । पशिः सौत्रः, पश्यते गम्यते इति पशूरः ग्रामः । 'खट काङ्क्षे' खटूरः मणिविशेषः । 'खडण् भेदे' खडूरः खुरलीस्थानम् । 'खर्ज मार्जने च' खर्जूरः वृक्षः । 'कर्ज व्यथने' । कर्जूरः स एव मलिनश्च । 'सर्ज अर्जने' । सर्जूरः अहः । कृपौङ्, कर्पूरः गन्धद्रव्यम् । वल्लि वल्लूरः शुष्कमांसम् । मडु मण्डूरः धातुविशेषः ॥ ४२७ ॥ **महिकणिचण्यणिपल्यलितलिमलिशलिभ्यो णित्** (४२८) ऊरः । मह माहूरः शैलः । 'कण गतौ' काणूरः नागः । चण चाणूरः मल्लो विष्णुहतः । अण आणूरः ग्रामः । पल पाल्लूरं नाम नगरं अन्ध्रराज्ये । अली, आल्लूरः विटः । तलण्, ताल्लूरः जलावर्त्तः । मलि माल्लूरः दानवः बिल्वश्च । शल शाल्लूरः दर्दुरः ॥ ४२८ ॥ **स्थाविडेः कित्** (४२९) ऊरः । ष्ठां स्थूरः वठर उष्ट्रश्च । स्थूरा जङ्घाग्रदेशः । विड विडूरः वालवाये ग्रामः ॥ ४२९ ॥ **सिन्दूरकर्चूरपत्तूरधुत्तूरादयः** (४३०) ऊरान्ता निपात्यन्ते । स्यन्देः सिन्दू च सिन्दूरं चीनपिष्टः । करोतेश्चोन्तश्च कर्चूर औषधविशेषः । पतेस्तोन्तश्च पत्तूरं गन्धद्रव्यम् । धुवो द्विरुक्तस्तोन्तो ह्रस्वश्च । धुत्तूरः उन्मत्तकः । दधातेर्धत्तूरमित्यन्ये । आदिग्रहणात् कस्तूरहारहूरादयः ॥ ४३० ॥ **कुगुपतिकथिकुथिकठिकुठिकुटिगडिगुडिमुदिमूलिदंशिभ्यः केरः** (४३१) किदेरः । कुङ् कुबेरः धनदः । गुंत् गुबेरं युद्धम् । पत्लृ पतेरः पक्षी पवनश्च । कथण् कथेरः कथकः कुहकः शकुन्तश्च । कुथच् कुथ्यति पानीयसंपर्केण कुथेरः शिडाकीसम्भारः । कठ कठेरः दरिद्रः । कुठिः सौत्रः, कुठेरः निस्सृतसारः अर्जकश्च । कुटत्, कुटेरः शठः । गड गडेरः मेघः प्रस्रवणशीलश्च । गुडत् गुडेरः राजा पण्यं च बालभक्ष्यम् । मुदि मुदेरः हर्षः । 'मूल प्रतिष्ठायाम्' मूलेरः वनस्पतिः मूलेरं पण्यं च । 'दंशं दशने' दशेरः सर्पः जनपदश्च ॥ ४३१ ॥ **शतेरादयः** (४३२) केरप्रत्ययान्ता निपात्यन्ते । शद्लृ तश्च शतेरः वायुः तुषारश्च । आदिशब्दाद्गुधेरशृङ्गबेरनालिकेरादयः ॥ ४३२ ॥ **कठिचकिसहिभ्य ओरः** (४३३) कठ कठोरः अमृदुः चिरन्तनश्च । 'चक तृप्तौ' चकोरः पक्षिविशेषः पर्वतविशेषश्च । षहिं सहोरः विष्णुः पर्वतश्च ॥ ४३३ ॥ **कोरचोरमोरकिशोरपोरहोरादोरादयः** (४३४) ओरप्रत्ययान्ता निपात्यन्ते । कायतेश्चरतेर्म्रियतेश्च डिच्च । कोरः बालपुष्पम् । चोरः तस्करः । मोरः मयूरः । कृशेरिच्चोपान्त्यस्य किशोरः तरुणः बालश्च । हन्तेर्डित् घश्च । घोरं कष्टम् । हंग् होरा निमित्तवादिनां चक्ररेखा । डुदांग्क् दोंच् दोरः कटिसूत्रं तन्तुगुणः । आदिग्रहणादन्येऽपि ॥ ४३४ ॥ **किशॄवृभ्यः करः** (४३५) किः सौत्रः, केकरः वक्रदृष्टिः । शॄश् शर्करा मत्स्यण्डिकादिः कर्कशः क्षुद्रपाषाणकणिकाश्च । वृग्ट् वर्करः छागः शिशुः ॥ ४३५ ॥ **सूपुषिभ्यां कित्** (४३६) षूत् सूकरः वराहः । पूषंच् पुष्करं पद्मं तूर्यमुखं हस्तिहस्ताग्रं आकाशं मुरजः तीर्थनाम च ॥ ४३६ ॥ **अनिकाभ्यां तरः** (४३७) अनक्, अन्तरं बहिर्योगोपसंव्यानयोः छिद्रमध्यविरहविशेषेषु च । कैं कातरः भीरुः ॥ ४३७ ॥ **इणपूभ्यां कित्** (४३८) तरः, इतरः निर्दिष्टप्रतियोगी । पूग्श् पूतरः जलजन्तुः ॥ ४३८ ॥ **मीज्यजिमामद्यशौवसिकिभ्यः सरः** (४३९) मीङ्श्, मेसरः वर्णविशेषः । जिं जेसरः शूरः । अज वेसरः अश्वतरः । वेस्तृ गताविलस्य वा 'जठर०' (४०३) इत्यादिनिपातनादरे रूपम् ॥ मांक् मासरः आयामः । मदैच् मत्सरः क्रोधः । अशौटि अक्षरं वर्णः मोक्षपदमाकाशं च । अक्षेर्वा अरेरूपम् । वसं वत्सरः संवत्सरः परिवत्सरः वर्षाभिधानानि । इडामानेन वसन्त्यत्र कालावयवा इति इड्वत्सरः, इडया मानेन वसन्त्यत्रेति इडावत्सरः; वर्षविशेषाभिधाने । परिवत्सरादीन्यपि वर्षविशेषाभिधानानि इत्येके । कि इत्यदादौ स्मरन्ति केसरः सिंहसटः पुष्पावयवः बकुलश्च ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बाहुलकान्न षत्वम् ॥ ४३९ ॥ **कृधूतन्यृषिभ्यः कित्** (४४०) सरः । कृसरः कृसरा वा विलेपिकाविशेषः वर्णविशेषश्च । धूत् धूसरः भिन्नवर्णः वायुः धान्यविशेषश्च । तनूयी, तसरः कौशेयसूत्रम् । ऋषैत् । ऋक्षरः कण्टकः ऋत्विक् च । ऋक्षरा तोयधारा ॥ ४४० ॥ **कृगृशृदृवृ-गृचतिखटिकटिनिषदिभ्यो वरट्** (४४१) एभ्यः टिद्वरः । कृत्, कर्बरः व्याघ्रः विष्किरः अञ्जलिश्च । कर्बरी भूमिः शिवा च । गृत् गर्वरः अहंकारः महिषश्च । गर्वरी महिषी सन्ध्या च । शृश् शर्वरः सायाह्नः रुद्रः हिंस्रश्च । शर्वरं तमः अन्नं च । शर्वरी रात्रिः । दृश् दर्वरं वज्रम् । दर्वरी सेवा । वृग्ट्, वर्वरः कामः चन्दनं लुब्धकश्च । वर्वरी नदी भार्या च । चतेग्, चत्वरं चतुष्पथं अरण्यं च । चत्वरी रथ्या देवता वेदिका च । 'खट काङ्क्षे' खट्वरं रससंकीर्णशाकपाकः । कटे, कट्वरः व्यालाश्वः । कट्वरी दधिविकारः । षद्लं निपूर्वः निषद्वरः कर्दमः वह्निः कर्मकरः कन्दर्पः इन्द्रश्च । निषद्वरमासनम् । निषद्वरी प्रपा रात्रिः प्रमदा इन्द्राणी च ॥ ४४१ ॥ **अश्नो-तेरीश्चादेः** (४४२) अशौटि अस्माद्वरः ईश्चादेः ईश्वरः विभुः । ईश्वरी स्त्री ॥ ४४२ ॥ **नीमीकुतु-चेर्दीर्घश्च** (४४३) एभ्यो वरट् दीर्घश्चैषाम् । णींग् नीवरः पुरुषकारः । मींग्श् मीवरः हिंस्रः समुद्रश्च । कुङ्, कूवरः रथावयवः । तुंक्, तूवरः मन्दश्मश्रुश्च अजननीकश्च । चिंग्ट् चीवरं मुनि-जनवासः निःसारकन्था च ॥ ४४३ ॥ **तीवरधीवरपीवरछित्वरछत्वरगह्वरोपह्वरसंयद्व-रोदुम्बरादयः** (४४४) एते वरट्प्रत्ययान्ता निपात्यन्ते । तिम्यतेस्ती च तीवतेर्वा । तीवरं जलं व्यञ्जनं च । ध्यायतेर्धी च । धीवरः कैवर्तः । प्यायः प्यैङो वा पी च पीवतेर्वा किद्वरः पीवरः मांसलः । छिनत्तेस्तः किच्च । छित्वरः शठः जर्जरः पिटकश्च । छादेर्णिलुकि ह्रस्वश्च । छत्वरः भर्त्सकः निकुञ्जकश्च । छत्वरं कुड्यहीनं गृहं शयनप्रच्छदः छदिश्च । गुहेरश्चोतः । गह्वरं महाबिलं भयानकं प्रत्यन्तदेशश्च । उपपूर्वात् ह्वो वादेर्लुक् च । उपह्वरं सन्धिः समीपं रहःस्थानं च । सम् पूर्वाद्यमेर्दश्च । संयद्वरो रणः संयमी नृपश्च । उन्देः किदुम् चान्तः । उदुम्बरः वृक्षविशेषः । आदिग्रहणादुम्बरशबरादयः ॥ ४४४ ॥ **कडेरेवराङ्करौ** (४४५) कडत् अस्मात् एवरः अङ्कर इति प्रत्ययौ स्याताम् । कडेवरम् मृतशरीरम् । लत्वे कलेवरम् । कडङ्करः वनस्पतिः ॥ ४४५ ॥ **त्रट्** (४४६) सर्वधातुभ्यः स्यात् । छादयतीति छत्रम् छत्री च घर्मवारणम् । पातीति पात्रं ऊर्जितगुणाधारः साध्वादिः । पात्री भाजनम् । स्नायतेः, स्नात्रं स्नानम् । राजत इति राष्ट्रं देशः । शिष्यतेऽनेन शास्त्रम् । असूच्, अस्त्रं धनुः ॥ ४४६ ॥ **जिभृसृभ्रस्जिगमिनमिन-हयशिहनिभृषेर्वृद्धिश्च** (४४७) एभ्यस्त्रट्, वृद्धिश्चैषां स्यात् । जिं जैत्रः जयनशीलः । जैत्रं द्यूतम् । डुभृंग्क् भात्रे पौषो यश्च भृतिं गृहीत्वा वहति । सृं सात्रं आलयः । भ्रस्जींत् भ्राष्ट्रं अम्बरीषम् । गम्लृं गात्रं मनः शरीरं लोकश्च । णमं नात्रं शिरः शाखा वैचित्र्यं च । नशौच् "नशो धुटि" (४।४।१०९) इति नोऽन्तः । नांष्ट्रा यातना । अश्नोतेरश्नातेर्वा । आष्ट्रं आकाशं रश्मिश्च । हनंक् हात्रं रक्षः युद्धं वधश्च । विष्लृंकी, वैष्ट्रः विष्णुः वायुश्च । वैष्ट्रं त्रिदिवं वेश्म च ॥ ४४७ ॥ **दिवे-द्यौ च** (४४८) अस्मात् त्रट् । अयं चास्यादेशः स्यात् । द्यौत्रं त्रिदिवं ज्योतिः विमानं प्रमाणं प्रतोदश्च ॥ ४४८ ॥ **सूमूखन्यूषिभ्यः कित्** (४४९) त्रट् । षूत् सूत्रं तन्तुः शास्त्रं च । मूङ् मूत्रं प्रस्रावः । खनूग्, खात्रं कुद्दालः तडाकं ग्रामः धान्यमृत् चौरकृतं च छिद्रम् । उषू उष्ट्रः क्रमेलकः ॥ ४४९ ॥ **स्त्री** (४५०) स्यतेः सूतेः स्त्यायतेः स्तृणातेर्वा त्रट् (डिच्च) स्त्री योषित् ॥४५०॥ **हुया-माश्रुवसिभसिगुवीपचिवचिधियम्यमिमनितनिसदिछादिक्षिक्षदिलुपिपतिधू-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भ्यस्त्रः (४५१) हुंक् होत्रं हवनम् । होत्रा ऋक् । यांक्, यात्रा प्रस्थानं यापनं उत्सवश्च । मांक्, मात्रा प्रमाणं कालविशेषः स्तोकः गणनं च । श्रुंट् श्रोत्रं कर्णः । वसिक् वस्त्रं वासः । भसिं जुहोत्यादौ स्मरन्ति । भस्त्रा चर्ममयमावपनं उदरं च । गुङ् गोत्रः पर्वतः । गोत्रा पृथ्वी । गोत्रमन्वयः । वींक् वेत्रं वीरुद्विशेषः । डुपचींष् पाके पक्त्रं पिठरं गार्हपत्यं च । वचंक् वक्त्रमास्यं छन्दोजातिश्च । 'धृङ्त् स्थाने' धत्त्रः धर्मः वृक्षः रविश्च । धत्त्रं नभः गृहसूत्रं च । धत्त्रा द्यौः । यमूं यन्त्रं शरीरसन्धानं अरघट्टादि च । अम अन्त्रं पुरीतत् । मनिंच् मन्त्रः छन्दः । तनूयी तन्त्रं प्रसारितास्तन्तवः शास्त्रं समूहः कुटुम्बं च । षद्लृं सत्त्रं यज्ञसदः दानं छद्म योगविशेषश्च । छदण् छादयतीति छात्रः शिक्षकः । क्षिंत् क्षेत्रं कर्षणभूमिः भार्या शरीरं आकाशं च । 'क्षद संवरणे' सौत्रः, क्षत्त्रं राजबीजम् । लुप्लृंती लोप्त्रमपहृतं द्रव्यम् । पत्लृं, पत्त्रं पर्णं यानं च । धूग्श् धोत्रं रज्जुः ॥ ४५१ ॥ **श्वितेर्वश्च मो वा** (४५२) 'श्विताङ् वर्णे' इत्यस्मात् त्रः प्रत्ययो वकारस्य च मकारो वा स्यात् । श्मेत्रं श्वेत्रं च रोगौ ॥ ४५२ ॥ **गमेरा च** (४५३) अस्मात् त्रः, आकारश्चान्तादेशः स्यात् । गात्रं शरीरं । गात्रा खट्वावयवः ॥४५३॥ **चिमिदिशंसिभ्यः कित्** (४५४) त्रः स्यात् । चिंग्ट्, चित्रमाश्चर्यं आलेख्यं वर्णश्च । ञिमिदाच् मित्रं सुहृत् । अमित्रः शत्रुः । मित्रः सूर्यः । शंसू शस्त्रं स्तोत्रं आयुधं च ॥ ४५४ ॥ **पुत्रादयः** (४५५) त्रप्रत्ययान्ता निपात्यन्ते । पुनाति पवते वा पितृपूतिमिति पुत्रः । यदाहुः । 'पूतीति नरकस्याख्या दुःखं च नरकं विदुः' । पुन्नाम्नो नरकात् त्रायते इति व्युत्पत्तिस्तु संज्ञाशब्दानामनेकधा व्याख्यानं लक्षयति । आदिग्रहणादन्येऽपि ॥ ४५५ ॥ **वृग्नक्षिपचिवच्यमिनमिवमिवपिवधियजिपतिकडिभ्योऽत्रः**(४५६) वृग्ट् वरत्रः चर्मरज्जुः । 'णक्ष गतौ' नक्षत्रमश्विन्यादि । डुपचींष्, पचत्रं रन्धनस्थाली । वचंक् वचत्रं वचनम् । अम अमत्रम् ( भाजनम् ) । णमं नमत्रम् कर्मारोपकरणम् । टुवमू वमत्रं प्रक्षेपः । टुवपीं वपत्रं क्षेत्रम् । 'वधि बन्धने' वधत्रमायुधं वस्त्रं विषं शूरश्च । यजीं यजत्रः यज्वा । यजत्रमग्निहोत्रम् । पत्लृ पतत्रं बर्हं वाहनं व्योम च । कडत् कडत्रं दाराः, लत्वे कलत्रं दारा जघनं च ॥ ४५६ ॥ **सोर्विदः कित्** (४५७) सुपूर्वाद्विदः किदत्रः स्यात् । सुष्ठु वेत्ति विन्दति विद्यते वा सुविदत्रं कुटुम्बं धनं मङ्गलं च ॥ ४५७॥ **कृतेः कृन्त च** (४५८) कृतैत्, अस्मादत्रः अस्य कृन्त इत्यादेशः स्यात् । कृन्तत्रः मशकः । कृन्तत्रं छेदनं लाङ्गुलाग्रं च ॥ ४५८ ॥ **बन्धिवहिकट्यश्यादिभ्य इत्रः** (४५९) बन्धंश् बन्धित्रं मन्थः । वहीं वहित्रं वाहनं ( वहनं च ) । कटे कटित्रं लेख्यकर्म । अशौटि, अशश, अश्नुते आकाशं, अश्नाति तिमिरमशित्रं रश्मिः हविः अग्निः अन्नपानं च । आदिग्रहणात् लवित्रं कर्मद्रव्यम् । पुनातेः पवित्रं मङ्गल्यम् । भटतेर्भटित्रं शूले पक्वमांसम् । कंडतेः कडित्रं कटित्रमेव । अमतेः अमित्रः रिपुः इत्यादि ॥ ४५९ ॥ **भूगृवदिचरिभ्यो णित्** (४६०) भू भावित्रं त्रैलोक्यं निधानं भद्रं च । गृत् गारित्रं नभः अन्नपानं आचार्यश्च । वद वादित्रं वाद्यम् । चर चारित्रं वृत्तं स्थित्यभेदश्च ॥ ४६० ॥ **तनितॄलापात्रादिभ्य उत्रः** (४६१) तनूयी तनुत्रं कवचम् । तॄ तरुत्रः प्लवः ( घासहारी च ) । लांक् लोत्रं अपहृतद्रव्यम् । पां पोत्रं हलसूकरयोर्मुखम् । त्रैङ् त्रोत्रमभयक्रिया । आदिग्रहणात् वृणोतेः वरुत्रमभिप्रेतमित्यादयः । इति रोपान्त्या पञ्चसप्तत्या सूत्रैः ॥ ४६१ ॥ **श्यामाश्याशक्यम्ब्यमिभ्यो लः** (४६२) शोंच् शाला सभा । मांक् माला स्रक् । श्यैङ् श्यालः पत्नीभ्राता । शकंट्, शक्लः मनोज्ञदर्शनः मधुरवाक् शक्तश्च । 'अबुङ् गतौ' 'अम' अम्बलः अम्लः रसविशेषः ॥ ४६२ ॥ **शुकशीमूभ्यः कित्** (४६३) लः । 'शुक गतौ' शुक्लः वर्णविशेषः । शीङ्, शीलं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वभावः व्रतं समाधिश्च । मूङ् मूलं वृक्षपादावयवः आदिहेतुश्च ॥ ४६३ ॥ **भिल्लाच्छभल्लसौविदल्लादयः** (४६४) किल्लप्रत्ययान्ता निपात्यन्ते । भिदेर्लेः, भिल्लः अन्त्यजातिः । अच्छपूर्वाद्भलेः अच्छभल्लः ऋक्षः । सुपूर्वाद्विदेरल्लोऽन्तः सोश्च वृद्धिः सौविदल्लः कञ्चुकी । आदिग्रहणादल्लपल्लीरल्लादयः ॥ ४६४ ॥ **मृदिकन्दिकुण्डिमण्डिमङ्गिपटिपाटिशकिकेवृदेवृकमियमिशलिकलिपलिगुधवञ्चिचञ्चिचपिवहिदिहिकुहितृसृपिशितुसिकुस्यनिद्रमेरलः** (४६५) मृदश् मर्दलः मुरजः । कदु कन्दलं प्ररोहः । कुडुङ् कुण्डलं कर्णाभरणम् । मडु मण्डलं देशः परिवारश्च । मगु मङ्गलं शुभम् । पट पटलं छदिः समूहः आवपनं नेत्ररोगश्च । ण्यन्तात् पाटलः वर्णः । शक्लृट्, शकलं भित्तमसारं च । 'केवृग् सेचने' केवलं परिपूर्णमसहायं च । देवृङ् देवलः ऋषिः देवत्रातः क्रीडनश्च । कमूङ् कमलं पद्मम् । णिङि कामलो नेत्ररोगः । यमूं यमलं युग्मम् । शल शललं सेधाङ्गरुहशङ्कुः । कलि कललं गर्भप्रथमावस्था । पल पललं भृष्टतिलातसीचूर्णम् । गुङ् गवलः महिषः । धूगश् धवलः श्वेतः । अञ्चू, अञ्चलः वस्त्रान्तः । चञ्चू चञ्चलः अस्थिरः । चप चपलः स एव । वहीं, वहलः सान्द्रम् । दिहींक्, देहली द्वाराधःपट्टः । कुहणि कोहलः भरतसूनुः । वाहुलकाद्गुणः । तॄ तरलः अधीरः हारमध्यमणिश्च । सृं सरलः ऋजुः वृक्षविशेषश्च । पिशत् पेशलः मनोज्ञः । तुस तोसला जनपदः । कुसच् कोसला जनपदः । अनक् अनलः अग्निः । द्रम द्रमिलं जलम् ॥ ४६५ ॥ **नहिलङ्गेर्दीर्घश्च** (४६६) आभ्यामलः दीर्घश्चानयोः स्यात् । नहींच् नाहलः म्लेच्छः । लगु लाङ्गलं हलम् ॥ ४६६ ॥ **ऋजनेर्गोन्तश्च** (४६७) आभ्यामलः गोऽन्तश्च स्यात् । अर्गला परिघः । जनैचि जङ्गलं निर्जलो देशः ॥ ४६७ ॥ **तृपिवपिकुपिकुशिकुटिवृषिमुसिभ्यः कित्** (४६८) अलः । तृपौच् तृपला लता । तृपलं शुष्कपर्णं शुष्कतृणं च । टुवपीं उपलः पाषाणः । कुपच् कुपलः प्रवालः पल्लवः । कुशच् कुशलः मेधावी । कुशलं आरोग्यम् । कुटत् कुटलः ऋषिः । वृषू वृषलः दासजातिः । मुसच् मुसलम् अवहननम् ॥ ४६८ ॥ **कोर्वा** (४६९) कुङ् असादलः स च किद्वा । कुवलं बदरम् । कुवली क्षुद्रबदरी । कवलः ग्रासः ॥ ४६९ ॥ **शमेर्व च वा** (४७०) शमूच्, असादलः मस्य च वो स्यात् । शवलः कल्माषः । शमलं पुरीषं दुरितम् ॥ ४७० ॥ **छोर्डग्गादिर्वा** (४७१) छोंच्, असादलः स च डगादिर्गादिश्च वा । छगलः छागः । छागलः ऋषिः । छलं वचनविघातोऽर्थविकल्पोपपत्त्या ॥ ४७१ ॥ **मृजिखन्याहनिभ्यो डित्** (४७२) अलः । मृजौक् मलं बाह्यरजः अन्तर्दोषश्च । खनूग् खलः दुर्जनः निष्पीडितरसं पिण्याकादि । खलं सस्यग्रहणभूमिः । हनंक् आङ्पूर्वो आहलः विषाणं नखरश्च ॥ ४७२ ॥ **स्थो वा** (४७३) असादलः डिद्वा । स्थलं प्रदेशविशेषः । स्थालं भाजनम् ॥ ४७३ ॥ **मुरलोरलविरलकेरलकपिञ्जलकज्जलेञ्जलकोमलभ्रमलसिंहलकाहलशूकलपाकलयुगलभगलविदलकुन्तलोत्पलादयः** (४७४) अलान्ता निपात्याः । मुर्व्युर्व्योर्वलोपश्च किच्च मुरला जनपदः । उरलः उत्कटः । विपूर्वाद्रमेर्डिच्च । विरलः असंहतः । किरः केरू च । केरला जनपदः । कम्पेरिञ्जोऽन्तो नलोपश्च । कपिञ्जलः गौरतित्तिरः । कषीषोर्जोऽन्तो जश्च । कज्जलं मषी । इज्जलः वृक्षः । कमेरत ओच्च कोमलं मृदुः । भ्रमेर्भ्रम् च भ्रमलः वायुः कृमिजातिश्च । भ्रमलं चक्रं । हिंसेराद्यन्तविपर्ययः सिंहला जनपदः । कणेर्हो दीर्घश्च काहलः अव्यक्तवाक् । काहला वाद्यविशेषः । शकेरूचास्य शूकलः अश्वाधमः । पचेः पाक् च पाकलः हस्तिज्वरः । युजेः कित् च युगलं युग्मम् । भातेर्गोन्तो ह्रस्वश्च भगलः मुनिः । विन्देर्नलोपश्च विदलं वेणुदलम् । कनेरत उत् तोन्तश्च । कुन्तला



Jain Education International For Personal & Private Use Only www.jainelibrary.org

जनपदः केशाश्च । उत्पूर्वात् पिबतेर्ह्रस्वश्च । उत्पलं पद्मम् । आदिग्रहणात् सुवर्चलामुद्गलपुद्गलादयः ॥ ४७४ ॥ **ऋकृमृवृतनितमिचषिचपिकपिकीलिपलिबलिपञ्चिमङ्गिगण्डिमण्डिचण्डितण्डिपिण्डिनन्दिनदिशकिभ्य आलः** (४७५) ऋक् अरालं वक्रम् । डुकृंग् करालं उच्चम् । मृंत् मरालः हंसः मदश्च । वृग्ट् वरालः । तनूयी तनालं जलाशयः । तमूच् तमालः वृक्षः व्यालश्च । 'चषी भक्षणे', चषालं यूपशिरसि द्रव्यम् । चप चपालं यज्ञद्रव्यम् । कपिः सौत्रः । कपालं घटाद्यवयवः शिरोऽस्थि च । 'कील बन्धे' कीलालं मद्यं जलं असृक् च । पल पलालं अकणो व्रीह्यादिः । बल बलालः वायुः । पचुङ् पञ्चालः ऋषिः राजा च । पञ्चाला जनपदः । मगु मङ्गालः देशः । गडु गण्डालः मत्तहस्ती । मडु मण्डालः ऋषिः । 'चडुङ् कोपे' चण्डालः श्वपचः । "अकृतज्ञमकार्यज्ञं दीर्घरोषमनार्जवम् । चतुरो विद्धि चण्डालाञ्जन्मना चेति पञ्चमम्" ॥ १ ॥ तडुङ् तण्डालः क्षुपः । पिडुङ् पिण्डालः कन्दजातिः । टुनदु नन्दालः राजा । णद् नदालः नादवान् । शक्लृट् शकाला जनपदः मूर्खधनी च ॥ ४७५ ॥ **कुलिपिलिविशिविडिमृणिकुणिपीप्रीभ्यः कित्** (४७६) आलः । कुल कुलालः कुम्भकारः । 'पिलण् क्षेपे' पिलालं श्लिष्टम् । विशंत् विशालं विस्तीर्णम् । विड बिडालः मार्जारः । लत्वे बिलालः स एव । मृणत् मृणालं बिसम् । कुणत् कुणालः कृतमालः कटविशेषश्च । कुणालं नगरं कठिनं च । पीङ् च पियालः वृक्षः । पियालं शाकं वीरुच्च । 'प्रीङ्च् प्रीतौ' । प्रियालः ॥ ४७६ ॥ **भजेः कगौ च** (४७७) भजीं अस्मात् किदालः कगौ चान्तादेशौ । भकालं भगालं उभयं कपालम् ॥ ४७७ ॥ **सर्तेर्गोन्तश्च** (४७८) सृं अस्मात् किदालः गोन्तश्च स्यात् । सृगालः क्रोष्टा ॥ ४७८ ॥ **पतिकृलूभ्यो णित्** (४७९) आलः । पत्लृ पातालं रसातलम् । डुकृंग् कारालं लेपद्रव्यम् । लूग्श् लावालः उद्दन्तः ॥ ४७९ ॥

**चात्वालकङ्कालहिन्तालवेतालजम्बालशब्दालममापालादयः** (४८०) आलान्ता निपात्यन्ते । चतेर्वोन्तो दीर्घश्च चात्वालः यज्ञगर्त्तः । कचेः स्वरान्नोऽन्तः कश्च कङ्कालः कलेवरम् । हिंसेस्तश्च हिन्तालः वृक्षविशेषः । वियस्तोऽन्तो गुणश्च वेतालः निशाचरविशेषः । जनेर्बोन्तश्च जम्बालः कर्दमः शैवलं च । शमेर्ऋषेर्वा शब्दभावश्च । शब्दालः शब्दनशीलः । ममेर्वलोपो मापश्चान्तः । ममापालः मतिः स्नेहः पुत्रादिषु स्नेहनिबन्धनं च । आदिशब्दाच्चक्रवालकरवालालवालादयः ॥ ४८० ॥ **कल्यनिमहिद्रमिजटिभटिकुटिचण्डिशण्डितुण्डिपिण्डिभूकुकिभ्य इलः** (४८१) कलि कलिलं गहनं पापं आत्माधिष्ठितं च शुक्रार्तवम् । अनक् अनिलः वायुः । मह महिला स्त्री । द्रम द्रमिला त्रैराज्यवासिनः । 'जट झट संघाते' जटिलः जटावान् । भट भटिलः श्वा सेवकश्च । कुटत् कुटिलं वक्रम् । चडुण् चण्डिलः श्वा क्रोधनः नापितश्च । शडुङ् शण्डिलः ऋषिः । तुडुङ् तुण्डिलः वाग्जाली । पिडुङ् पिण्डिलः मेघः हिंस्रः हिमः गणकश्च । भू भविलः मुनिः समर्थः गृहं बहुनेता च । कुकि कोकिलः परभृतः ॥ ४८१ ॥ **भण्डेर्न लुक् च वा** (४८२) भडुङ्, अस्मादिलः नस्य च लुग्वा स्यात् । भडिलः ऋषिः पिशाचः शत्रुश्च । भण्डिलः श्वा दूतः ऋषिश्च ॥ ४८२ ॥ **गुपिमिथिभ्रुभ्यः कित्** (४८३) इलः । गुपौ, गुपिलं गहनम् । मिथृग् मिथिला नगरी । भ्रुं, भ्रुविलः ऋषिः ॥ ४८३ ॥ **स्थण्डिलकपिलविचकिलादयः** (४८४) इलान्ता निपात्यन्ते । स्थलेः स्थण्ड् च, स्थण्डिलं वृत्तिशयनवेदिका । कवेः प् च । कपिलः वर्णः ऋषिश्च । विचेरकोन्तश्च । विचकिलः मल्लिकाविशेषः । आदिग्रहणात् गोभिलनिकुम्भिलादयः ॥ ४८४ ॥ **कृषिवृतिचटिपटिशकिशङ्कितण्डिम-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**हृषुल्कपिलभ्य उलः** (४८५) 'हृषच् हृष्टौ', 'हृषू अलीके', हर्षुलः हर्षवान् कामी मृगश्च । वृतूङ्, वर्त्तुलः । चटण्, चटुलः चञ्चलः । पट पटुलः वाग्मी । शक्लृंट्, शकुलः मत्स्यः । शकुङ्, शङ्कुला क्रीडनशङ्कुः बन्धनभाण्डमायुधं च । तडुङ्, तण्डुलः निस्तुषो व्रीह्यादिः । मगु, मङ्गुलं न्यायापेतम् । कठुङ् उत्पूर्वः उत्कण्ठुलः उत्कण्ठावान् ॥ ४८५ ॥ **स्थावङ्किबंहिविन्दिभ्यः किन्नलुक् च** (४८६) एभ्यः किदुलः नलुक् च स्यात् । ष्ठां, स्थुलं पटकुटीविशेषः । वकुङ् वकुलः केसरः ऋषिश्च । बहुङ् बहुलं बहु । बहुलः प्रासकः कृष्णपक्षश्च । बहुलाः कृत्तिकाः । बहुला गौः । विदु विदुलः वेतसः ॥ ४८६ ॥ **कुमुलतुमुलनिचुलवञ्जुलमञ्जुलपृथुलविशंस्थुलाङ्गुलमुकुलशष्कुलादयः** (४८७) उलान्ता निपात्यन्ते । कमितम्योरत उच्च । कुमुलं कुसुमं हिरण्यम् । कुमुलः शिशुः कान्तश्च । तुमुलं व्यामिश्रयुद्धम् संकुलं च । निजेः किच्च । निचुलः वञ्जुलः । वजेः स्वरान्नोऽन्तश्च वञ्जुलः निचुलः । मञ्जिः सौत्रः मञ्जुलः मनोज्ञः । प्रथेः पृथ् च पृथुलः विस्तीर्णः । विपूर्वात् शंसेः स्थोऽन्तश्च विशंस्थुलः व्यग्रः । अञ्जेर्गश्च । अङ्गुलमष्टयवप्रमाणम् । मुचेः कित्कश्च । मुकुलं अविकसितपुष्पम् । शकेः स्वरात् षोन्तश्च । शष्कुली भक्ष्यविशेषः कर्णावयवश्च । आदिग्रहणाल्लकुलवल्गुलादयः ॥ ४८७ ॥ **पिञ्जिमञ्जिकण्डिगण्डिबलिवधिवञ्चिभ्यः ऊलः** (४८८) पिजुण्, पिञ्जूलः हस्तिबन्धनपाशः राशिः कुलपतिश्च । मञ्जिः सौत्रः । मञ्जूला मित(मृदु ?) भाषिणी । कडुङ् कण्डूलः अशिष्टो जनः । गड, गण्डूलः कृमिजातिः । बल, बलूलः ऋषिः मेघः मासश्च । वधि वधूलः हस्तिघातकः रसायनं तन्त्रकारश्च । वञ्चिण् वञ्चूलः हस्ती मत्स्यमारपक्षी च ॥ ४८८ ॥ **तमेर्बोन्तो दीर्घस्तु वा** (४८९) ताम्बूलं तम्बूलं उभयं पूगपत्रचूर्णयोगः ॥ ४८९ ॥ **कुलपुलकुसिभ्यः कित्** (४९०) कुल कुलूलः कृमिजातिः । पुल, पुलूलः वृक्षः । कुसच्, कुसूलः कोष्ठः ॥ ४९० ॥ **दुकूलकुकूलबब्बूललाङ्गूलशार्दूलादयः** (४९१) ऊलान्ता निपात्यन्ते । दुक्नोः कोन्तश्च दुकूलं क्षौमं वासः । कुकूलं कारीषोऽग्निः । वधेर्बोन्तो बश्च । बब्बूलः वृक्षः । लंगेर्दीर्घश्च लाङ्गूलं वालधिः । शृणातेर्दोन्तो वृद्धिश्च शार्दूलः व्याघ्रः । आदिग्रहणात् मार्जूलकञ्जूलादयः ॥ ४९१ ॥ **महेरेलः** (४९२) महेला स्त्री ॥ ४९२ ॥ **कटिपटिकण्डिगण्डिशकिकपिचहिभ्य ओलः** (४९३) कटे, कटोलः कटविशेषः वादित्रविशेषश्च । कटोला ओषधिः । पट पटोला वल्लिविशेषः । कडु कण्डोलः विदलभाजनविशेषः । गडु गण्डोलः कृमिविशेषः । शक्लृंट्, शकोलः शक्तः । कपिः सौत्रः, कपोलः गण्डः । 'चह कल्कने' । चहोलः उपद्रवः ॥ ४९३ ॥ **ग्रह्यादिभ्यः कित्** (४९४) ग्रहेरादन्तेभ्यश्च कित् ओलः स्यात् । गृहोलः बालिशः । कायतेः कोलः बदरी वराहश्च । गायतेः गोलः वृत्ताकृतिः । गोला गोदावरी बालरमणकाष्ठं च । पातेः पोला तालाख्यं कपाटबन्धनं परिखा च । लातेः लोलः चपलः । ददातेर्दयतेर्द्यतेर्वा दोला प्रेङ्खणम् ॥ ४९४ ॥ **पिञ्छोलकल्लोलकक्कोलमक्कोलादयः** (४९५) ओलान्ता निपात्यन्ते । पीडेः पिञ्छ् च पिञ्छोलः वादित्रवंशः । कलेर्लोन्तश्च कल्लोलः । कचिमच्योर्कादिः कक्कोली लताविशेषः । मक्कोलः सुधाविशेषः । आदिग्रहणादन्येऽपि ॥ ४९५ ॥ **वलिपुषेः कलक्** (४९६) कित् कलः । वल्कलं तरुत्वक् । पुष्कलं समग्रं युद्धं शोभनं हिरण्यं च ॥ ४९६ ॥ **मिगः खलश्चैच** (४९७) डुमिंग्ट् अस्मात् खलकलौ प्रत्ययौ एकारश्चान्तादेशः स्यात् । मेखला गिरिनितम्बः रशना च । मेकलः नर्मदाप्रभवोऽद्रिः । मिग एत्ववचनमात्वबाधनार्थम् ॥ ४९७ ॥ **श्रो नोन्तो ह्रस्वश्च** (४९८) शृश अस्मात् खलो नोन्तो ह्रस्वश्चास्य

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्यात् । शृङ्खला लोहरज्जुः । शृङ्खलः शृङ्खलं च ॥ ४९८ ॥ **शमिकमिपलिभ्यो बलः** (४९९) शमूच्, शम्बलः पाथेयम् । कमूङ् कम्बलः ऊर्णापटः । पल पल्वलं अकृत्रिमोदकस्थानविशेषः ॥ ४९९ ॥ **तुल्वलेल्वलादयः** (५००) वलान्ता निपात्यन्ते । तुलण् इलण् अनयोर्णि गुणाभावश्च । तुल्वलः ऋषिः । यस्य तौल्वलिः पुत्रः । इल्वलः असुरो योऽगस्त्येन जग्धः, मत्स्यः यूपश्च । इल्वलास्तिस्रो मृगशिरःशिरस्तारकाः । आदिग्रहणात् शल्वलादयः ॥ ५०० ॥ **शीङस्तलक्पालवालणवलणवलाः** (५०१) शीतलमनुष्णम् । शेपालम्, जपादित्वात्पस्य वत्वे शेवालम् । शैवालम् । शेवलं शैवलम् । पङ्कमपि जलमलवाचि ॥ ५०१ ॥ **रुचिकुटिकुषिकशिशालिद्रुभ्यो मलक्** (५०२) रुक्मलं सुवर्णम् । न्यङ्क्वादित्वात् कत्वम् । कुड्मलं मुकुलम् । कुष्मलं तदेव बिलं च । 'कश शब्दे' कश्मलं मलिनम् । शाडृङ् लत्वे शाल्मः वृक्षविशेषः । द्रुं, द्रुमलं वनं जलं च ॥ ५०२ ॥ **कुशिकमिभ्यां कुलकुमौ च** (५०३) आभ्यां मलक् यथासङ्ख्यं चेमावादेशौ स्याताम् । कुलमलं छेदनम् । कुम्मलं पद्मम् ॥ ५०३ ॥ **पतेः सलः** (५०४) पत्सलः प्रहारः गोमान् आहारश्च ॥ ५०४ ॥ इति लोपान्त्यास्त्रयस्त्रिंशता सूत्रैः । **लटिखटिखलिनलिकणयशौसृशृकृगृदृपृशपिश्याशालापदिहसीणभ्यो वः** (५०५) एभ्यो वः । 'लट् बाल्ये,' लट्वा क्षुद्रचटका कुसुमं च । खट, खट्वा शयनयन्त्रम् । खल, खल्वं निम्नं खलीनं च । खल्वा दृतिः । 'णल गन्धे', नल्वः भूमानविशेषः । कण, कण्वः ऋषिः । कण्वं पापम् । अशौटि अश्वः । सृं सरत्युमां सर्वः, शम्भुः, सर्वादि च कृत्स्नार्थे । शृश् शर्वः शम्भुः । कृत् कर्वः आखुः समुद्रः निष्पत्तिक्षेत्रं च । गृत् गर्वः अहंकारः । दृश् दर्वा जनपदः । दर्वः हिंस्रः । पृश्, पर्वः रुद्रः काण्डं च । शपीं शप्वः आक्रोशः । श्यैङ् श्यावः वर्णः । शोंच् शावः तिर्यग्बालः । लांक् लावः पक्षिजातिः । पदिंच् पद्वः रथः वायुः भूर्लोकश्च । 'हस शब्दे' ह्रस्वः लघुः । इण्क् एव केवलः । एवेत्यवधारणे निपातश्च ॥ ५०५ ॥ **शीङापो ह्रस्वश्च वा** (५०६) आभ्यां वः ह्रस्वश्च वा स्यात् । शिवं क्षेमं सुखं मोक्षपदं च । शिवा हरीतकी । शेवं धनम् । शेवः अजगरः सुखकृच्च । शेवा प्रबलनिद्राविशेषः मेढ्रश्च । आप्लृंट् अप्वा देवायुधम् । आप्वा वायुः ॥ ५०६ ॥ **उर्देर्ध् च** (५०७) उर्दि अस्माद्वः धश्चान्तः । ऊर्ध्वः उद्वर्ष्मा शरीरमानं च । ऊर्ध्वं उपरि ऊर्ध्वं पुरस्तात् ॥ ५०७ ॥ **गन्धेरर् चान्तः** (५०८) 'गन्धिण् अर्दने' । अस्मात् वः अर् चान्तः । गन्धर्वः गायकः देवविशेषश्च ॥ ५०८ ॥ **लषेर्लिष् च वा** (५०९) लषी अस्माद्वः अयं चास्यादेशो वा स्यात् । लिष्वः लम्पटः कान्तः दयितश्च । लष्वः अपत्यं ऋषिस्थानं च ॥ ५०९ ॥ **सलेर्णिद्वा** (५१०) वः । 'सल् गतौ' । साल्वाः सल्वाश्च जनपदः क्षत्रियाश्च ॥५१०॥ **निघृषीष्यूषिस्रम्रषिकिणिविशिबिल्यविपृभ्यः कित्** (५११) वः । निपूर्वो घृषू संहर्षे निघृष्वः अनुकूलः स्वर्णनिकषोपलः वायुः क्षुद्रश्च । इषत् इष्वः अभिलषित आचार्यश्च । इष्वा अपत्यं सन्ततिः । 'ऋषैत् गतौ' ऋष्वः रिपुः हिंस्रश्च । रिषेर्ण्यङ्गनादेः केचिदिच्छन्ति रिष्वः । स्रुं स्रुवः हवनभाण्डम् । प्रुषू प्रुष्वा निवृत्तिर्जललवश्च । किणः सौत्रः, किण्वं सुराबीजम् । विशंत् विश्वं जगत् सर्वादि (च) । बिलत् बिल्वः मालूरः । 'अव रक्षणादौ' अवेत्यव्ययम् । पॄश् पूर्वः दिक्कालनिमित्तः प्राच्यः ॥ ५११ ॥ **नञो भुवो डित्** (५१२) वः । अभ्वमद्भुतम् ॥ ५१२ ॥ **लिहेर्जिह् च** (५१३) जिह्वा रसना ॥ ५१३ ॥ **प्रह्वाह्वायह्वास्वच्छेवाग्रीवामीवाल्वादयः** (५१४) वान्ता निपात्यन्ते । प्रपूर्वस्य ह्वयतेः वादेर्लोपो यततेर्वा ह्रादेशश्च प्रह्वः प्रणतः । आह्वयतेराह्व च । आह्वा कण्ठः । यमयसेर्वा ह

Jain Education International For Personal & Private Use Only www.jainelibrary.org

च । यद्वा बुद्धिः । अश्यतेरलोपश्च । स्व आत्मा आत्मीयं ज्ञातिः धनं च । छ्यतेश्छिदेर्वा छेभावश्च । छेवा उच्छित्तिः । ग्रन्थतेर्गिरतेर्वा ग्रीभावश्च ग्रीवा । अमेरीवान्तो दीर्घश्च वा । अमीवा बुभुक्षा । आमीवा व्याधिः । मिनोतेर्दीर्वश्च मीवा मनः उदकं च । तदेतत्रयमपि तन्त्रेणावृत्त्या वा निर्दिष्टम् । अवतेर्वलोपाभावश्च । अव्वा माता । आदिशब्दात् ध्वा शक्तिर्नामायुधं बुद्धिर्वा इत्यादयः ॥ ५१४ ॥ **वडिवटिपेवृचणिपणिपल्लिवल्लेरवः** (५१५) 'वड आग्रहणे' सौत्रः, वडवा अश्वा । 'वट वेष्टने' वटवा सैव । पेवृ पेवनं निस्सारम् । चण चणवः अवरधान्यजातिः । पणि पणवः वाद्यजातिः । 'पल्ल गतौ' पल्लवः किसलयम् । वल्लि, वल्लवः गोपजातिः ॥ ५१५ ॥ **मणिवसेर्णित्** (५१६) अवः । 'मण शब्दे' माणवः शिष्यः । वसं वासवः इन्द्रः ॥ ५१६ ॥ **मलेर्वा** (५१७) अवः । स च णिद्वा । मालवा जनपदः । मलवः दानवः ॥ ५१७ ॥ **कितिकुडिकुरिमुरिस्थाभ्यः कित्** (५१८) अवः । 'कित निवासे' कितवः द्यूतकृत् । कुडत् कुडवः मानम् । लत्वे कुलवः स एव नाडीद्वयं च । कुरत् कुरवः पुष्पवृक्षजातिः । मुरत् मुरवः मानविशेषः वाद्यजातिश्च । ष्ठां स्थवः अजावृषः ॥ ५१८ ॥ **कैरवभैरवमुतवकारण्डवादीनवादयः** (५१९) अवान्ता निपात्यन्ते । कृभृगोः कैरभैरौ च । कैरवं कुमुदम् । भैरवः भर्गः भयानकश्च । मिनोतेर्मुत् च मुतवः मानविशेषः । कृगोऽण्डोन्तो वृद्धिश्च । कारण्डवः जलपक्षी । आङ्पूर्वाद्दीङो नोन्तश्च । आदीनवः दोषः । आदिग्रहणात् कोद्रवकोटवादयः ॥ ५१९ ॥ **शृणातेरावः** (५२०) शरावः मल्लकः ॥ ५२० ॥ **प्रथेरिवट् पृथ् च** (५२१) पृथिवी भूः ॥ ५२१ ॥ **पलिसचेरिवः** (५२२) पलण्, 'षचि सेचने' । पलिवः गोप्ता । सचिवः ॥ ५२२ ॥ **स्पृशेः श्वः पार् च** (५२३) स्पृशंत् अस्मात् श्वः अयं चास्यादेशः स्यात् । पार्श्वं स्वाङ्गं समीपं च । पार्श्वस्तीर्थकृत् ॥ ५२३ ॥ **कुडितुड्यडेरुवः** (५२४) कुडत् कुडुवं, प्रसृतं हस्तमानं च । तुडत् तुडुवः अपनेयद्रव्यम् । अड अडुवः प्लवः ॥ ५२४ ॥ **नीह्लिणध्यैप्यापादामाभ्यस्त्वः** (५२५) णींग्, नेत्वं द्यावापृथिव्यौ चन्द्रश्च । हुंक् होत्वं यजमानः समुद्रश्च । इणक् एत्वम् । ध्यै, ध्यात्वं ब्राह्मणः । प्यैङ् वृद्धौ । आप्यात्वं ब्राह्मणः समुद्रः नेत्रं च । पां पात्वम् (पात्रम्) । डुदांग्क् दात्वं आयुक्तः यज्वा यज्ञश्च । मांक् मात्वं प्रमेयद्रव्यम् ॥ ५२५ ॥ **कृजन्येधिपाभ्य इत्वः** (५२६) करित्वः करणशीलः । जनैचि, जनित्वः लोकः मातापितरौ द्यावापृथिव्यौ च । जनित्वं कुलम् । एधि, एधित्वः अग्निः समुद्रः शैलश्च । पां, पेत्वं तत्रभूमिप्रदेशः अमृतं नेत्रं सुखं मानं च ॥ ५२६ ॥ इति वोपान्त्या द्वाविंशत्या सूत्रैः । **पादावम्यमिभ्यः शः** (५२७) पांक् पाशः बन्धनम् डुदांग्क् दाशः कैवर्त्तः । टुवमू वंशः वेणुः । अम् अंशः ॥ ५२७ ॥ **कृवृभृवनिभ्यः कित्** (५२८) शः । कृशः तनुः । वृग्ट्, वृशं शृङ्गबेरं मूलकं लशुनं च । डुभृंग्क्, भृशमत्यर्थम् । वन वशः आयत्तः ॥ ५२८ ॥ **कोर्वा** (५२९) कुङ्, अस्मात् शः किद्वा स्यात् । कुशः दर्भः । कोशः सारः सारं कुड्मलं च ॥ ५२९ ॥ **क्लिशः के च** (५३०) क्लिशौश्, अस्मात् शः अस्य च के इत्यादेशः । केशाः मूर्द्धजाः ॥५३०॥ **उरेरशक्** (५३१) 'उर गतौ' इत्यस्मात् सौत्रादशक् स्यात् । उरशः ऋषिः ॥ ५३१ ॥ **कलेश्चित्** (५३२) कलि अस्माच्चिदशक् स्यात् । कलशः कुम्भः । कलशी दधिमन्थनभाजनम् ॥ ५३२ ॥ **पलेराशः** (५३३) 'पल गतौ' पलाशः ब्रह्मवृक्षः ॥ ५३३ ॥ **कनेरीश्चातः** (५३४) कनै अस्मादाशः अस्याकारस्य च ईकारः स्यात् । कीनाशः कर्षकः वर्णसंकरः कदर्यश्च । तथा 'लुब्धः कीनाशः स्यात्कीनाशोऽप्युच्यते कृतघ्नश्च । योऽश्नाति आममांसं स च

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कीनाशो यमश्चैव' ॥ ५३४ ॥ **कुलिकनिकणिपलिवडिभ्यः किशः** (५३५) कित् इशः । कुल कुलिशं वज्रम् । कनै, कण, कनिशं कणिशं च सस्यमञ्जरी । पल पलिशं यत्र स्थित्वा मृगा व्यापाद्यन्ते । 'वड आग्रहणे' सौत्रः । वडिशं मत्स्यग्रहणम् ॥ ५३५ ॥ **बलेर्णिद्वा** (५३६) किशः । बल, बालिशः मूर्खः । बलिशं बडिशम् ॥ ५३६ ॥ **तिनिशेतिशादयः** (५३७) किशान्ता निपात्यन्ते । तनेरित्वातः तिनिशः वृक्षः । इणस्तोन्तश्च । इतिशः गोत्रकृदृषिः । आदिग्रहणादन्येऽपि ॥ ५३७ ॥ **मस्ज्यञ्चिभ्यामुशः** (५३८) टुमस्जोंत् । न्यंकादित्वाद्गत्वम् । मद्गुशः नकुलः । अञ्चू, अङ्कुशः सृणिः ॥ ५३८ ॥ **अर्तीण्भ्यां पिशतशौ** (५३९) यथासङ्ख्यम् । ऋंक्, अपिशमार्द्रमांसं बालवत्साया दुग्धं च । इण्क्, एतशः अश्वः ऋषिः वायुः अग्निः अर्कश्च ॥ ५३९ ॥ इति शोपान्त्यास्त्रयोदशभिः सूत्रैः । **वृकॄतॄमीङ्माभ्यः षः** (५४०) वृग्ट्, वर्षः भर्त्ता । वर्षं संवत्सरः । वर्षा ऋतुः । कृत्, कर्षः उन्मानविशेषः । तॄ तर्षः प्लवः हर्षश्च । मींङ्च् । मेषः उरभ्रः । मांक्, माषः धान्यविशेषः हेमपरिमाणं च ॥ ५४० ॥ **योरूच्च वा** (५४१) युक्, अस्मात्षः ऊकारश्चान्तादेशो वा स्यात् । यूषः पेयविशेषः । यूषा छाया । योषा स्त्री ॥ ५४१ ॥ **स्नुपूसूम्वर्कल्लूभ्यः कित्** (५४२) स्नुवादिभ्यः अर्कपूर्वाल्लुनातेश्च कित् षः स्यात् । स्नुक्, स्नुषा पुत्रवधूः । पूग्श्, पूषः पवनभाण्डम् शूर्पादिः । षूत् सूषः बलम् । मूङ् मूषा लोहक्षरण-भाजनम् । लूग्श्, अर्कलूषः ऋषिः ॥ ५४२ ॥ **श्लिषेः शे च** (५४३) श्लिषंच्, अस्मात् षः शे इत्यादेशश्चास्य स्यात् । शेषः नागराजः ॥ ५४३ ॥ **कोरषः** (५४४) कुङ्, कवषः क्रोधी शब्दकारश्च ॥ ५४४ ॥ **युजलेराषः** (५४५) युक्, यवाषः दुरालभा । 'जल घात्ये' । जलाषः जलम् ॥ ५४५ ॥ **अर्तेरिषः** (५४६) ऋंक्, इत्यस्माण्ण्यन्तादिषः प्रत्ययो भवति । अर्पिषमार्द्र-मांसम् ॥ ५४६ ॥ **मह्यविभ्यां टित्** (५४७) इषः । मह महिषः सैरिभः राजा च । महिषी राजपत्नी सैरिभी च । अव अविषः समुद्रः राजा पर्वतश्च । अविषी द्यौर्भूमिः, गङ्गा च ॥ ५४७ ॥ **रुहेर्वृद्धिश्च** (५४८) अस्मादिषः । वृद्धिश्चास्य स्यात् । रौहिषं तृणविशेषः अन्तरिक्षं च । रौहिषः मृगः । रौहिषी वाल्या मृगी दूर्वा च ॥ ५४८ ॥ **अमिमॄभ्यां णित्** (५४९) इषः । अम, आमिषं भक्ष्यम् । मृश् हिंसायाम्, मारिषः हिंस्रः ॥ ५४९ ॥ **तवेर्वा** (५५०) 'तव गतौ' । अस्मात्सौत्राट्टिदिषः स च णिद्वा स्यात् । ताविषः तविषश्च स्वर्गः । ताविषं तविषं च बलं तेजश्च । ताविषी तविषी च वाल्या देवकन्या च ॥ ५५० ॥ **कलेः किल्व च** (५५१) कलि अस्माट्टिदिषः अयं चास्यादेशः स्यात् । किल्विषं पापम् । किल्विषी वेश्या रात्रिः पिशाची च ॥ ५५१ ॥ **नञो व्यथेः** (५५२) टिदिषः । अव्यथिषः क्षेत्रज्ञः सूर्यः अग्निश्च । अव्यथिषी पृथिवी ॥ ५५२ ॥ **कृतॄभ्यामीषः** (५५३) करीषः शुष्कगोमयरजः । तरीषः समर्थः स्तम्भः प्लवश्च ॥ ५५३ ॥ **ऋजिशॄपॄभ्यः कित्** (५५४) ईषः । 'ऋजि गत्यादौ' । ऋजीषं धनम् । ऋजीषः अवस्करः शॄश् शिरीषः वृक्षः । पॄश् पुरीषं शकृत् ॥५५४॥ **अमेर्वं(ब ?)रादिः** (५५५) ईषः । अम्बरीषं भ्राष्ट्रं व्योम च । अम्बरीषः आदिनृपः ॥ ५५५ ॥ **उषेर्णोन्तश्च** (५५६) उषू अस्मादीषः णश्चास्यान्तादेशः स्यात् । उष्णीषः मुकुटं शिरोवेष्टनं च ॥ ५५६ ॥ **ऋपॄनहिहनि-कलिचलिचपिवपिकृपिहर्यिभ्य उषः** (५५७) । ऋश् । अरुषः व्रणः हयः आदित्यः वर्णः रोषश्च । पॄश् परुषः कर्कशः । णहींच् नहुषः पूर्वो राजा । हनंक् हनुषः क्रोधः राक्षसश्च । कलि कलुषमप्रसन्नं पापं च । चल, चलुषः वायुः । चप, चपुषः शकुनिः । डुवपीं वपुषः वर्णः । कृपौङ्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कल्पुषः क्रियानुगुणः । 'हय क्रान्तौ च' । हयुषा ओषधिः ॥ ५५७ ॥ **विदिपॄभ्यां कित्** (५५८) उषः । विदुषः विद्वान् । पुरुषः पुमान् आत्मा च ॥ ५५८ ॥ **अपुषधनुषादयः** (५५९) उषान्ता निपात्यन्ते । आप्नोतेर्ह्रस्वश्च । अपुषः अग्निः सरोगश्च । दधातेर्धन् च । धनुषः शैलः । आदिग्रहणात् लसुषः ऋषिः वृक्षश्च इत्यादयः ॥ ५५९ ॥ **खलिफलिवृपॄकृजॄलम्बिमञ्जिपीयिहन्यङ्गिमङ्गिगण्ड्यर्तिभ्य ऊषः** (५६०) 'खल संचये' खलूषः म्लेच्छजातिः । फलूषः वीरुत् । वृग्ट् वरूषः भाजनम् । पॄश् परूषः वृक्षविशेषः । कृत् करूषाः जनपदः । जॄष् जरूषः आदित्यः । लबुङ् लम्बूषः नीरकदम्बः निचुलश्च । 'मञ्जिः शब्दे' 'पीयिश्च पाने' सौत्रौ । मञ्जूषा काष्ठकोषः । पीयूषं प्रत्यग्रप्रसवक्षीरविकारः अमृतं घृतं च । हनंक् हनूषः राक्षसः । अगु अगूषः शकुनिजातिः हस्ती बाणः वेगश्च । मगु मङ्गूषः जलचरशकुनिः । गण्डूषः द्रवकवलः । 'ऋं प्रापणे च' । अरूषः रविः ॥ ५६० ॥ **कोरदूषाटरूषकारूषशैलूषपिञ्जूषादयः** (५६१) ऊषान्ता निपात्यन्ते । कुरेरदोन्तश्च । कोरदूषः कोद्रवः । आटेररोन्तश्च । आटरूषः वासा । अटनं रूषतीति अटरूषः इति पृषोदरादिः । कृगो वृद्धिश्च । कारूषा जनपदः । शैलेरैं चातः । शैलूषः नटः । 'पिजुण् हिंसादौ' । पिञ्जूषः कर्णशष्कुल्याभोगः । आदिशब्दात् प्रत्यूषाभ्यूषादयः ॥ ५६१ ॥ **कलेर्मषः** (५६२) कल्मषं पापम् ॥ ५६२ ॥ **कुलेश्च मासक्** (५६३) कुल कलि आभ्यां किन्मासः स्यात् । कुल्माषः अर्धस्विन्नं माषादि । कल्माषः शबलः ॥ ५६३ ॥ इति षोपान्त्याश्चतुर्विंशत्या सूत्रैः । **मावावद्यमिकमिहनिमानिकष्यशिपचिमुचियजिवृतॄभ्यः सः** (५६४) मांक्, मासः त्रिंशद्रात्रः । वांक् वासा आटरूषकः । वद, वत्सः तर्णकः ऋषिः । प्रियस्य च पुत्रस्याख्यानम् । अम, अंसः भुजशिखरम् । कमूङ् कंसः लोहजातिः विष्णोः शत्रुः हिरण्यमानं च । हनंक्, हंसः सितच्छदः । 'मानि पूजायाम्' मांसं तृतीयो धातुः । कष, कक्षः गहनारण्यं शरीरावयवश्च । अशौटि अक्षाः प्रासकाः । अक्षाणि इन्द्रियाणि रथचक्राणि च । डुपचींष्, पक्षः अर्द्धमासः वर्गः शकुन्यवयवः सहायः साध्यं च । मुच्लृती मोक्षः मुक्तिः । यजीं, यक्षः गुह्यकः । वृग्श्, वर्सः देशः समुद्रश्च । तॄ-तर्सः वीतंसः सूर्यश्च । वर्सतर्सयोर्बाहुलकान्न षत्वम् ॥ ५६४ ॥ **व्यवाभ्यां तनेरीच्च वेः** (५६५) वि अव इत्येताभ्यां परात्तनोतेः स प्रत्ययः वेरीकारश्चान्तादेशो भवति । वीतंसः शकुन्यवरोधः । अवतंसः कर्णपूरः ॥ ५६५ ॥ **प्लुषेः प्लष् च** (५६६) प्लुषू प्लक्षं नक्षत्रम् । प्लक्षः वृक्षः ॥ ५६६ ॥ **ऋजिरिषिकुषिकृतित्रश्चयुन्दिशॄभ्यः कित्** (५६७) सः । ऋजि ऋक्षं नक्षत्रम् । ऋक्षः अच्छभल्लः । 'रिष हिंसायाम्' रिक्षा यूका । लत्वे लिक्षा सैव । कुषस् कुक्षः गर्भः । कुक्षं गर्तः । कृतैत् कृत्सः गोत्रकृत् ओदनं वक्रं दुःखजातं च । ओव्रश्चौत् वृक्षः पादपः । उन्दैप् उत्सः समुद्रः आकाशं जलं जलाशयश्च । उत्सं स्रोतः । शॄश्, शीर्षं शिरः ॥ ५६७ ॥ **गुधिगृधेस्त च** (५६८) आभ्यां कित्सः तकारश्चान्तादेशोऽनयोः । गुधच्, गुत्सः रोषः तृणजातिश्च । गृधूच् गृत्सः विप्रः श्वा गृध्र अभिलाषश्च । तकारविधानमादिचतुर्थत्वबाधनार्थम् ॥ ५६८ ॥ **तप्यणिपन्यल्यविरधिनभिनम्यमिचमितमिचव्यतिपतेरसः** (५६९) (असः) तपं तपसः आदित्यः पशुः धर्मः घर्मश्च । अण अणसः शकुनिः । पनि पनसः फलवृक्षः । अली अलसः निरुत्साहः । अव अवसः भानुः राजा च । अवसं चापं पाथेयम् । रधौच् 'रध इटि तु परोक्षायाम्' (४।४।१०१) एवेति नागमे रन्धसः अन्धकजातिः । णभच्, नभसः ऋतुः आकाशः समुद्रश्च । णमं नमसः वेत्रः प्रणामश्च । अम अमसः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कालः संसारः आहारः रोगश्च । चमू चमसः सोमपात्रं मन्त्रपूतं पिष्टं च । चमसी मुद्गादिभिस्तत्कृता । तमूच् तमसः अन्धकारः । तमसा नाम नदी । 'चटण् भेदने' । चटचः चर्मपुटः । अत अतसः वायुः आत्मा वनस्पतिजातिश्च । पत्लृ पतसः पतङ्गः ॥ ५६९ ॥ **सृवयिभ्यां णित्** (५७०) असः । सृ संसारः पक्षिविशेषः । 'वयि गतौ' वायसः काकः ॥ ५७० ॥ **वहियुभ्यां वा** (५७१) आभ्यामसः स च णिद्वा । वाहसः अनड्वान् शकटं अजगरः वहनजीवश्च । वहसः अनड्वान् शकटं च । युक् यावसं भक्तं तृणं मिश्रं च । यवसं अश्वादिघासः अन्नं च ॥ ५७१ ॥ **दिवादिरभिलभ्युरिभ्यः कित्** (५७२) असः । दिव्यतेर्दिवसः दिनम् । व्रीड्यतेर्लत्वे व्रीलसः लज्जावान् । नृत्यतेः नृतसः नर्त्तकः । क्षिप्यतेः क्षिपसः योद्धा । सीव्यतेः सिवसः श्लोकः वस्त्रं च । श्रीव्यतेः श्रिवसः गतिमान् । इष्यतेः इषसः इष्वाचार्यः । 'रभिं राभस्ये' रभसः संरम्भः । डुलभिंष् लभसः याचकः प्राप्तिश्च । उरिः सौत्रः । उरसः ऋषिः ॥ ५७२ ॥ **फनसतामरसादयः** (५७३) असान्ता निपात्यन्ते । 'फण गतौ' नश्च । फनसः वृक्षः । तमेरोन्तो वृद्धिश्च । तामरसं पद्मम् । आदिशब्दात् कीकसं अस्थि । बुक्कसः चण्डाल इत्यादयः ॥ ५७३ ॥ **युबलिभ्यामासः** (५७४) युक् यवासः दुरालभा । बल बलासः श्लेष्मा ॥ ५७४ ॥ **किलेः कित्** (५७५) आसः । किलत् किलासं सिध्मम् । किलासी पाककर्प्परम् ॥ ५७५ ॥ **तलिकसिभ्यामीसण्** (५७६) तलण् तालीसं गन्धद्रव्यम् । 'कस गतौ' । कासीसं धातुजमौषधम् ॥ ५७६ ॥ **सेर्डित्** (५७७) ईषण् । षिंग्ट् सीसं लोहजातिः ॥ ५७७ ॥ **त्रपेरुषः** (५७८) त्रपौषि त्रपुसं कर्कटिका । विधानसामर्थ्यान्न षत्वम् ॥ ५७८ ॥ **पटिवीभ्यां टिसडिसौ** (५७९) आभ्यां यथासङ्ख्यं टिसो डित् इसश्च प्रत्ययौ स्याताम् । पट्टिसः आयुधविशेषः । वींक्, विसं मृणालम् ॥ ५७९ ॥ **तसः** (५८०) पटिवीभ्याम् । पट्टसः त्रिशूलम् । वेतसः वानीरः ॥ ५८० ॥ **इणः** (५८१) तसः । एतसः अध्वर्युः ॥ ५८१ ॥ **पीङो नसक्** (५८२) पीङ्च्, पीनसः श्लेष्मा ॥ ५८२ ॥ **कृकुरिभ्यां पासः** (५८३) कर्पासः पिचुप्रकृतिः (वीरुध) । कुरत्, कूर्पासः कञ्चुकः ॥ ५८३ ॥ **कलिकुलिभ्यां मासक्** (५८४) कल्मासं शबलम् । कुल्माषं अर्धस्विन्नं माषादि ॥ ५८४ ॥ **अलेरम्बुसः** (५८५) अली, अलम्बुसः यातुधानः । अलम्बुसा नाम ओषधिः ॥ ५८५ ॥ इति सोपान्त्या त्रिंशत्या सूत्रैः । **लूगो हः** (५८६) लूग्श्, लोहं सुवर्णादि ॥ ५८६ ॥ **कितो गे च** (५८७) 'कित निवासे' । अस्मात् हः अयं गश्चास्यादेशः स्यात् । गेहं गृहम् ॥ ५८७ ॥ **हिंसेः सिम् च** (५८८) हिंसुप्, अस्मात् हः अस्य च सिमित्यादेशः स्यात् । सिंहः केशरी ॥ ५८८ ॥ **कृपृकटिपटिमटिलटिदिललिपलिकल्यनिरगिलगेरहः** (५८९) कृत्, करहः धान्यावपनम् । पृश् परहः शंकरः । कटे कटहः पर्जन्यः कर्णवध कालायसभाजनम् । पट पटहः वाद्यविशेषः । 'मट सादे' सौत्रः । मटहः ह्रस्वः । 'लट बाल्ये' । लटति विलसति । लटहः विलासवान् । ललण् ललहः लीलावान् । पल पलहः आवापः आ उप्यतेऽस्मिन्निति । कलि कलहः युद्धम् । अनक् अनहः नीरोगः । रगे रगहः नरः । लगे लगहः मन्दः ॥५८९॥ **पुलेः कित्** (५९०) अहः । पुलहः प्रजापतिः ॥५९०॥ **वृकटिशमिभ्य आहः** (५९१) वृग्ट् वराहः सूकरः । कटे कटाहः कर्णवत्कालायसभाजनम् । शमूच् शमाहः आश्रमः ॥ ५९१ ॥ **विलेः कित्** (५९२) विलत् अस्मात् किदाहः । विलाहः रहः ॥ ५९२ ॥ **निर इण ऊहः** (५९३) निर्यूहः सौधादिकाष्ठनिर्गमः ॥ ५९३ ॥ **दस्त्यूहः** (५९४) दस्यतेस्त्यूहः दात्यूहः पक्षिविशेषः ॥ ५९४ ॥ **अनेरोकहः** (५९५) । अनक् अनोकहः वृक्षः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ ५९५ ॥ इति होपान्त्या दशभिः सूत्रैः । **वलेरक्षः** (५९६) वलक्षः शुक्लः ॥ ५९६ ॥ **लाक्षाद्राक्षामिक्षादयः** (५९७) अक्षान्ता निपात्यन्ते । लसेरा च । लाक्षा जतुः । रसेर्द्रा च । द्राक्षा मृद्वीका । आङ्पूर्वान्मृदेरन्त्यस्वरादेर्लुक्प्रत्ययादेरित्त्वं च । आमिक्षा हविर्विशेषः । आदिग्रहणात् चुप इत्यस्य चोक्षः ग्रामरागः शुद्धं च । पीयिः सौत्रः । पीयुक्षा इत्यादयः ॥ ५९७ ॥ इति क्षोपान्त्या द्वाभ्यां सूत्राभ्याम् ।

"क्रमेण व्यञ्जनोपान्त्या अकारान्ता निरूपिताः । एवमेव निरूप्यन्ते आकारान्तादयोऽप्यथ" ॥ १ ॥

**समिण्निकषिभ्यामाः** (५९८) सम्पूर्वादिणः निपूर्वात्कषश्च आः स्यात् । समया निकषा गिरिं नदीम् । समीपासूयावाचिनावेतौ ॥ ५९८ ॥ **दिविपुरिवृषिमृषिभ्यः कित्** (५९९) आः । दिवूच् दिवा अहः । पुरत् पुरा भूतकालवाची । वृषू वृषा प्रबलमित्यर्थः । मृषीच् मृषा असत्यम् ॥ ५९९ ॥ **वेः साहाभ्याम्** (६००) विपूर्वाभ्यां षोंच् ओहांक् इत्येताभ्यामाः स्यात् । विसा चन्द्रः बुद्धिश्च । तालव्यान्तोऽयमित्येके । विहा विहगः सूर्यश्च ॥ ६०० ॥ **वृमिथिदिशिभ्यस्थयस्थ्याश्चान्ताः** (६०१) एभ्य किदाः थयटथ्यश्चान्ता यथासङ्ख्यं स्युः । वृगट् वृथा अर्थम् । मिथृग् मिथ्या मृषा निष्फलं च । दिशींत् दिष्ट्या प्रीतिवचनम् ॥ ६०१ ॥ **मुचिस्वदेर्धं च** (६०२) आभ्यां किदाः धश्चान्तोऽस्य स्यात् । मुच्लंती मुधा निष्फलम् । ष्वदि स्वधा पितृबलिः ॥ ६०२ ॥ **सोर्ब्रूग आह च** (६०३) सुपूर्वात् ब्रूतेराः आह इत्ययं चास्यादेशः स्यात् । स्वाहा ॥ ६०३ ॥ **सनिक्षमिदुषेः** (६०४) एभ्य आः । षणूयी । सना नित्यम् । क्षमौषि क्षमा भूः क्षान्तिश्च । दूषंच् दोषा रात्रिः ॥ ६०४ ॥ **डित्** (६०५) धातोर्बहुलमाः स च डित् । मनिंच् मा निषेधे । षोंच् सा अवसानम् । अनक् आ स्मरणादौ । प्रीङ्च् । प्रा सयने । हनंक् हा विषादे । वन वा विकल्पे । रांक् रा दीप्तिः । भांक् सहपूर्वः सभा परिषत् । नाम्नि इति सहस्य सः ॥ ६०५ ॥ **स्वरेभ्य इः** (६०६) स्वरान्तेभ्य धातुभ्य इः स्यात् । जिं जयिः राजा । हिंट् हयिः कामः । रुक् रविः सूर्यः । कुंक् कविः काव्यकर्त्ता शुक्रश्च । ष्टुंग्क् स्तविः उद्गाता । लूग्श् लविः दात्रम् । पूग्श् पविः वज्रम् पवित्रं च । भू भविः सत्ता चन्द्रः विधिश्च । ऋंक् अरिः शत्रुः । हृंग् हरिः इन्द्रः विष्णुः चन्दनं मर्कटादिश्च । हरयः शुकाश्वाः । डुभृंग्क् भरिः वसुधा । सृं सरिः मेघः । पृश् परिः भूमिः । तॄ तरिः नौः । दॄ दरिः महाभिदा । मॄश् ण्यन्तः । मारिः अशिवम् । वृग्श् वरिः विष्णुः ण्यन्तात् वारिर्गजबन्धभूः वारि जलम् ॥ ६०६ ॥ **पदिपठिपचिस्थलिहलिकलिबलिवलिवल्लिपल्लिकटिचटियटिवधिगाध्यर्चिवन्दिनन्धविवशिवाशिकाशिछिर्दितन्त्रिमन्त्रिखण्डिमण्डिचण्डिथल्यञ्जिमस्यसिवनिध्वनिसनिगमितमिग्रन्थिश्रन्थिजनिमण्यादिभ्यः** (६०७) इः । पदिंच् पदी राशिः मोक्षमार्गश्च । पठ पठिः विद्वान् । पचिः अग्निः । 'ष्ठल स्थाने' स्थलिः दानशाला । हल हलिः हलः । कलि कलिः कलहः युगं च । बल बलिः देवोपहारः दानवश्च । 'वलिः वल्लि' । वलिः त्वक्तरङ्गः । वल्लिः हिरण्यशलाका लता च । पल्ल पल्लिः मुनीनामाश्रमः व्याधसंस्थायश्च । कटे कटिः स्वाङ्गम् । 'चटण् भेदे' । चटिः वर्णः । वट वटिः गुलिका तन्तुः शूना नाभिर्वर्णश्च । 'वधि बन्धने' । वधिः (क्रियाशब्दः) । गाधृङ् गाधिः विश्वामित्रपिता । अर्चे अर्चिः अग्निशिखा । वदुङ् वन्दिः ग्रहणिः । टुनदु नन्दिः ईश्वरः प्रतीहारः भेरिश्च । अव अविः ऊर्णायुः । वशक् वशिः वशिता । वाशिच् वाशिः कान्तिः रश्मिः गोमायुः अग्निः शब्दः प्रजननव्याप्ता चतुष्पाद् जलदश्च । काशृङ् काशयः जनपदः । छर्दण् छर्दिः वमनम् । तन्त्रिण् तन्त्रिः

हैं० प्रका० उत्त० ११७

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वीणासूत्रम् । मन्त्रिण् मन्त्री सचिवः । खड्डुण् खण्डिः प्रहारम् । मडु मण्डिः मृद्भाजनपिधानम् । चड्डुङ् चण्डिः भामिनी । यतैङ् यतिः भिक्षुः । अञ्जौप् अञ्जिः प्रगुणः सज्जः पेषणी पेजः बलं गतिश्च । समञ्जिः शिश्नः । मसैच्, मसिः शल्ली । असूच् असिः खड्गः । वनूयि वनिः साधुः याच्ना शकुनिः अग्निश्च । ध्वन ध्वनिः नादः । षण, सनिः संभक्ता पन्थाः दानं म्लेच्छः नदीतटं च । गम्लं, गमिः आचार्यः । तमूच् तमिः अलसः । ग्रन्थश् ग्रन्थश् ग्रन्थिः श्रन्थिश्च पर्वसन्ध्यादि । जनैचि जनिः वधूः कुलाङ्गना भगिनी प्रादुर्भावश्च । 'मण शब्दे' मणिः रत्नम् । आदिग्रहणात् वहीं वह्निः अश्वः । खाद खादिः श्वा । दधि दधि क्षीरविकारः । खल खलिः पिण्याकः । 'शचि व्यक्तायां वाचि' शची इन्द्राणी 'इतोऽक्त्यर्थात्' ( २।४।३२ ), इति गौरादित्वात् वा ङीः । इत्यादि स्यात् ॥ ६०७ ॥ **किलिपिलिपिशिचिटित्रुटिशुण्ठितुण्डिकुण्डिभण्डिहुण्डिहिण्डिपिण्डिचुल्लिबुधिमिथिरुहिदिविकीर्त्यादिभ्यः** (६०८) इः । किलत् केलिः क्रीडा । 'पिलण् क्षेपे' । पेलिः क्षुद्रपेला । पिशत् पेशिः मांसखण्डम् । चिट चेटिः दारिका प्रेष्या च । त्रुटत् ण्यन्तः त्रोटिः चञ्चुः । 'शुठु शोषणे' शुण्ठिः नागरम् । तुडुङ् तुण्डिः आस्यं प्रवृद्धा च नाभिः । कुडुङ् कुण्डिः जलभाजनम् । भडुङ् भण्डिः शकटम् । हुडुङ् हुण्डिः पिण्डित ओदनः । हिडुङ्, हिण्डिः रात्रौ रक्षाचारः । पिडुङ् पिण्डिः निष्पीडितस्नेहपिण्डः । 'चुल्ल हावकरणे', चुल्लिः रन्धनस्थानम् । बुधिच् बोधिः सम्यग्ज्ञानम् । मिथृग् मेथिः खलमध्यस्थूणा । रुहं, रोहिः सस्यं जन्म च । दिवूच् देविः भूमिः । कृतण्, णिजन्तः कीर्त्तिर्यशः । आदिग्रहणादन्येपि ॥ ६०८ ॥ **नाम्युपान्त्यकॄगॄशॄपूभ्यः कित्** (६०९) इः । लिखत् लिखिः शिल्पम् । शुच्, शुचिः पूतः विद्वान् धर्मः आषाढश्च । रुचि रुचिः दीप्तिः अभिलाषश्च । भुजंप् भुजिः अग्निः राजा कुटिलं च । कुणत् कुणिः विकलो हस्तः हस्तविकलश्च । सृजंत् सृजिः पन्थाः । द्युति, द्युतिः दीप्तिः । ऋत, ऋतिः यतिः । छिदृंपी छिदिः छेत्ता परशुश्च । 'मुदि हर्षे' मुदिः बालः । भिदृंपी भिदिः वज्रम् सूचकः भेत्ता च । ऊछृदृंपी, छृदी रथकारः । लिपींत् लिपिः अक्षरन्यासः । 'तुर त्वरणे' सौत्रः । तुरिः तन्तुवायोपकरणम् । 'दुलण् उत्क्षेपे' । दुलिः कच्छपः । त्विषीं त्विषिः दीप्तिः त्विषिमान् राजवर्चस्वी च । कृषींत् कृषिः कर्षणं कर्षणभूमिश्च । 'ऋषैत् गतौ' । ऋषिः मुनिः वेदश्च । कुषश् कुषिः शुषिरम् । शुषंच् शुषिः छिद्रं शोषणं च । हृषू, हृषिः अलीकवादी दीप्तिः तुष्टिश्च । स्नुहौच् स्नुहिः वृक्षः । कॄत् किरिः सूकरः मूषिकः गन्धर्वः गर्त्तश्च । गॄत्, गिरिः नगः कन्दुकश्च । शॄश् शिरिः हिंस्रः शोकः खङ्गः पाषाणश्च । पॄश् पुरिः नगरं राजा पूरयिता च । पूङ् पुविः वातः ॥ ६०९ ॥ **विदिवृतेर्वा** (६१०) आभ्यामिः स च किद्वा । विदक् विदिः शिल्पी । वेदिः इज्यादिस्थानम् । वृतिः कण्टकशाखावरणम् । निर्वृतिः सुखम् । वर्तिर्द्रव्यं दीपाङ्गं च ॥ ६१० ॥ **तॄभ्रम्यधाप्यिदम्भिभ्यस्तित्तिरभ्रूमाधापदेभाश्च** (६११) एभ्यः किदिः । ( एते आदेशाश्च ) तित्तिरिः शकुनिजातिः प्रवक्ता च वेदशाखायाः । भ्रमू भ्रूमिः वायुः हस्ती जलं च । बाहुलकात् भ्रूमादेशाभावे भ्रमिः भ्रमः । अदंक् अधि उपरिभावे । अध्यागच्छति । आप्लंट् अपि समुच्चयादौ प्लक्षोऽपि न्यग्रोधोऽपि । दम्भूट्, देभिः शरासनम् ॥ ६११ ॥ **मनेरुदेतौ चास्य वा** (६१२) मनिंच् अस्मादिः अकारस्य उकार एकारौ वा स्याताम् । मुनिः ज्ञानवान् । मेनिः संकल्पः । मनिः धूमवर्त्तिः ॥ ६१२ ॥ **क्रमितमिस्तम्भेरिच्च नमेस्तु वा** (६१३) एभ्यः किदिः; अकारस्य इकारः, नमेस्तु स वा स्यात् । क्रमू, क्रिमिः क्षुद्रजन्तुः । तमूच्, तिमिः महामत्स्यः । स्तम्भिः सौत्रः, स्तिम्भिः केतकादिसूची हृदयं समुद्रश्च ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

णमं निमिः राजा नमिः विद्याधराणामाद्यस्तीर्थकरश्च ॥ ६१३ ॥ **अभ्यिकुण्ठिकम्प्यंहिभ्यो न लुक् च** (६१४) एभ्यः इः नकारस्य लुक् च स्यात् । 'अभुङ् शब्दे,' अभि आभिमुख्येऽव्ययम् । अभ्यग्नि शलभाः पतन्ति । कुठ, कुठिः वृक्षः पापं वृषलः देहः गेहं कुठारश्च । कपुङ्, कपिः अग्निः वानरश्च । अहुङ् अहिः सर्पः वृत्रः वप्रश्च ॥ ६१४ ॥ **उभेर्द्वत्रौ च** (६१५) 'उभत् पूरणे' अस्मादिः अस्य च द्व त्र इत्यादेशौ स्याताम् । द्वौ द्वितीयः द्विमुनि व्याकरणस्य । त्रयस्तृतीयः त्रिमुनि व्याकरणस्य ॥ ६१५ ॥ **नीवीप्रहृभ्यो डित्** (६१६) इः । णींग् निवसति । वींक् विः तन्तुवायः पक्षी उपसर्गश्च । हृंग् प्रपूर्वः । प्रहिः कूपः उदपानं च ॥ ६१६ ॥ **वौ रिचेः स्वरान्नोऽन्तश्च** (६१७) विरिञ्चिः ब्रह्मा ॥ ६१७ ॥ **कमिवमिजमिघसिशलिफलितलितडिवजिव्रजिध्वजिराजिपणिवणिषद्सदिहदिहनिसहिवहितपिवपिभटिकंचिसंपतिभ्यो णित्** (६१८) इः । कामिः वसुकः कामी च । वामिः स्त्री । जमू, जामिः भगिनी तृणं जनपदश्चैकः । घासिः संग्रामः गर्त्तः अग्निः बहुभुक् च । शालिः व्रीहिराजः । फालिः दलम् । तलण्, तालिः वृक्षः । तडण्, ताडिः स एव । वाजिः अश्वः पुङ्खावसानं च । व्राजिः पद्धतिः पिटकजातिश्च । ध्वाजिः पताका अश्वश्च । राजिः पङ्क्तिः लेखा च । पाणिः करः । 'वण् शब्दे,' वाणिः वाक् । वादिः वाग्मी वीणा च । षद्लृं, सादिः अश्वारोहः सारथिश्च । हृदिं हादिः लूता । हनंक्, घातिः प्रहरणम् । **केचित्तु** हानिः अर्थनाश उच्छित्तिश्चेत्युदाहरन्ति । तत्र बाहुलकात् 'ञ्णिति घात्' (४।३।१००) इति न भवति । बाहुलकादेव णित्त्वविकल्पे हनिः आयुधम् । षहिँ, साहिः शैलः । वाहिः अनड्वान् । तपं, तापिः दानवः । डुवपीं, वपिः पुष्करिणी । 'भट भृतौ' । भाटिः सुरतमूल्यम् । 'कचुङ् दीप्तौ च' । काञ्चिः मेखला पुरी च । णित्करणादनुपान्त्यस्यापि वृद्धिः । संपूर्वः पत्लृ, संपातिः पक्षिराजः ॥ ६१८ ॥ **कृशृकुटिग्रहिखन्यणिकष्यलिपलिचरिवसिगण्डिभ्यो वा** (६१९) एभ्य इः स च णिद्वा । डुकृंग्, कारिः शिल्पी । करिः हस्तीविष्णुश्च । शृश्, शारिः द्यूतोपकरणं हस्तिपर्याणं शारिका च । शरिः हिंसा शूलश्च । कुटत्, कोटिः अश्रिः अग्रभागः अष्टममङ्कस्थानम् च । कुटिः गृहं शरीराङ्गं च । ग्रहीश्, ग्राहिः पतिः । ग्रहिः वेणुः । खनूग्, खानिः खनिश्च निधिः आकरः तडागं च । अण, आणिः अणिश्च द्वारकीलिका । कष, काषिः कर्षकः । कषिः निकषोपलः काष्ठमश्वकर्णः खनित्रं च । अली, आलिः पङ्क्तिः सखी च । अलिः भृङ्गः । पल, पालिः जलसेतुः कर्णपर्यन्तश्च । पलिः संस्त्यायः । चर, चारिः पशुभक्ष्यम् । चरिः प्राकारशिखरं विषयः वायुः केशोर्णा च । वसं, वासिः तक्षोपकरणम् । वसिः शय्या अग्निः गृहं रात्रिश्च । गडु, गण्डिः गण्डिका । णित्त्वपक्षेऽनुपान्त्यस्यापि वृद्धिः । गाण्डिः धनुष्पर्व ॥ ६१९ ॥ **पादाचात्यजिभ्याम्** (६२०) पादपूर्वाभ्यां केवलाभ्यां चात्यजिभ्यां णिदिः स्यात् । पादाभ्यामतति अजति वा पदातिः पदाजिः । 'पदः पादस्याज्यातिगोपहते' (३।२।९५) इति पादस्य पद्भावः । उभावपि पत्तिवाचिनौ । आतिः पक्षी । सुपूर्वात् स्वातिः नक्षत्रम् । आजिः सङ्ग्रामः स्पर्द्धावधिश्च ॥ ६२० ॥ **नहेर्भ च** (६२१) अस्माण्णिदिः भश्चास्यान्तादेशः स्यात् । नाभिः अन्त्यः कुलकरः चक्रमध्यं देहावयवश्च ॥ ६२१ ॥ **अशो रश्चादिः** (६२२) अशौटि, अस्माण्णिदिः रेफश्च धातोरादिः स्यात् । राशिः समूहः मेषादिश्च ॥ ६२२ ॥ **काय: किरिच वा** (६२३) कैं, अस्मात् किः, इकारश्चास्यान्तादेशः स्यात् । किकिः पक्षी विद्वांश्च । काकिः स्वरदोषः ॥ ६२३ ॥ **वर्धेरकिः** (६२४) 'वर्धण् छेदनपूरणयोः' । अस्मादकिः

स्यात् । वर्द्धकिः तक्षा ॥ ६२४ ॥ **सनेर्डखिः** ( ६२५ ) डित्, अखिः । षणूयी, सखा, सखायौ ॥ ६२५ ॥ **कोर्डिखिः** (६२६) 'कुङ् शब्दे,' अस्मात् डित् इखिः । किखिः लोहमसिका ॥ ६२६ ॥ **मृम्रिकण्यणिदध्यविभ्य ईचिः** (६२७) मृंत्, मरीचिः मुनिः मयूखश्च । द्वोश्वि, श्वयीचिः चन्द्रः श्वयथुश्च । कण, कणीचिः प्राणी लता चक्षुः शकटं शङ्खश्च । अण, अणीचिः वेणुः शाकटिकश्च । दृधि, दृधीचिः राजर्षिः । अव, अवीचिः नरकविशेषः ॥ ६२७ ॥ **वेगो डित्** (६२८) ईचिः । वेङ्, वीचिः ऊर्मिः ॥ ६२८ ॥ **वणेर्णित्** (६२९) ईचिः । 'वण शब्दे' वाणीचिः छाया व्याधिश्च ॥ ६२९ ॥ **कृपिशकिभ्यामटिः** (६३०) कर्पटिः निःस्वः । शकटिः शकटम् ॥ ६३० ॥ **श्रेर्ढिः** (६३१) श्रिग्, श्रेढिर्गणितव्यवहारः ॥ ६३१ ॥ **चमेरुच्चातः** (६३२) चमू, अस्मात् ढिः, अकारस्य च उः स्यात् । चुण्ढिः क्षुद्रवापी ॥ ६३२ ॥ **मुषेरुण् चान्तः** (६३३) मुषश्, अस्मात् ढिः उण् चान्तः स्यात् । मुषुण्ढिः प्रहरणम् । उणो विधानबलान्न गुणः ॥ ६३३ ॥ **कावावीक्रीश्रिश्रुक्षुज्वरितूरिचूरिपूरिभ्यो णिः** (६३४) कैं, काणिः वैलक्ष्यानुसर्पणम् । वेंग् वाणिर्व्यूतिः । वींक्, वेणिः कबरी । डुक्रींग्श्, क्रेणिः क्रयविशेषः । श्रिग्, श्रेणिः पङ्क्तिः बलविशेषश्च । मौलिभृतादिमध्ये द्वितीयं बलम् श्रेणयः अष्टादश गणविशेषाः । निपूर्वात् निश्रेणिः संक्रमः । श्रुंद्, श्रोणिः जघनम् । टुक्षुक् क्षोणिः पृथ्वी । 'ज्वर रोगे' । जूर्णिः ज्वरः वायुः आदित्यः अग्निः शरीरं ब्रह्मा पुराणश्च । तूरैचि तूर्णिः त्वरा मनः शीघ्रश्च । चूरैचि चूर्णिः वृत्तिः । पूरैचि, पूर्णिः पूरः ॥ ६३४ ॥ **ऋतघृसृकुवृषिभ्यः कित्** (६३५) ऋकारान्तेभ्यो घृप्रभृतिभ्यश्च किण्णिः स्यात् । शृश् शीर्णिः रोगः अवयवश्च । स्तृग्श् स्तीर्णिः संस्तरः । घृं, घृणिः रश्मिः ज्वाला निदाघश्च । सृं सृणिः आदित्यः वज्रं अनिलः अङ्कुशः अग्निश्च । कुंक् कुणिः विकलो हस्तः हस्तविकलश्च । वृषू, वृष्णिः वत्सः मेषः यदुविशेषश्च । पर्षतेरपीच्छन्त्येके । पृष्णिः रश्मिः ॥ ६३५ ॥ **पृषिहृषिभ्यां वृद्धिश्च** (६३६) आभ्यां णिरनयोश्च वृद्धिः स्यात् । पार्ष्णिः पादपश्चाद्भागः पृष्ठप्रदेशश्च । हृषच् हार्ष्णिः हरणम् ॥ ६३६ ॥ **हूर्णिघूर्णिभूर्णिघूर्ण्यादयः** (६३७) णिप्रत्ययान्ता निपात्यन्ते हृंग् धृंग् भू घृं, ऊत्वं रश्चान्तः । हरति प्रापयति जलं वृक्षान् हूर्णिः कुल्या । धूर्णिः धरणं । भवति कर्म अनया भवति सर्वमस्यां भूर्णिः वेतनं भूमिः कालश्च । घूर्णिः भ्रमः । आदिग्रहणादन्येऽपि ॥ ६३७ ॥ **ऋहृसृमृधृभृकृतॄग्रहेरणिः** (६३८) ऋंक्, अरणिः अग्निमथनकाष्ठम् । हृग्, हरणिः कुल्या मृत्युश्च । सृं, सरणिः ईषद्गतिः पन्थाः आदित्यः सिरासंघातश्च । मृंत्, मरणिः रात्रिः । धृंग्, धरणिः क्षितिः । डुडुभृंग्क्, भरणिः नक्षत्रम् । डुकृंग्, करणिः सादृश्यम् । तॄ, तरणिः संक्रमः आदित्यः यवागूः पतितगोरूपोत्थापनी च यष्टिः । वै दुःखार्थे । दुःखेन तीर्यते इति वैतरणी नदी । ग्रहीश्, ग्रहणिः जठराग्निः तदाधारो व्याधिः मेढ्रं मृत्युश्च ॥ ६३८ ॥ **कक्केरिचास्य वा** (६३९) ककुङ्, अस्मादणिः अकारस्य इकारो वा स्यात् । कङ्कणिः कङ्कणम् । किङ्किणिः घण्टा ॥ ६३९ ॥ **ककेर्णित्** (६४०) अणिः । 'ककि लौल्ये' । काकणिः मानविशेषः ॥ ६४० ॥ **कृषेश्च चादेः** (६४१) कृषींत्, अस्मादणिः आदेश्च चकारः स्यात् । चर्षणिः चमूः अग्निः बुद्धिः व्यवसायः वेश्या वृषश्च ॥ ६४१ ॥ **क्षिपेः कित्** (६४२) अणिः । क्षिपणिः आयुधं वडिशबन्धकः चर्मकृता पाषाणसर्जनी च ॥ ६४२ ॥ **आङः कृहृशुषेः सनः** (६४३) आङः परेभ्यो डुकृंग् हृंग् शुषंच् एभ्यः सन्नन्तेभ्यो णिः स्यात् । आचिकीर्षति विभवः आचिकीर्षणिः व्यवसायः । आहर्त्तु-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मिच्छति द्रव्यं, आजिहीर्षणिः श्रीः । आशुशुष्यन्ति काष्ठादिकमत्र आशुशुक्षणिः अग्निः वायुश्च ॥ ६४३ ॥ **वारिसत्यादेरिणिक्** (६४४) कित् इणिः । वृंग्द्, ण्यन्तः । वार्यते सस्यादिकं भक्षयन् वारिणिः पशुः पशुवृत्तिश्च । सृं, सिणिः अग्निः वज्रं च । आदिग्रहणादन्येऽपि । ॥ ६४४ ॥ **अदेस्त्रीणिः** (६४५) अदंक् अस्मात्त्रीणिः अत्त्रीणिः कृमिजातिः ॥ ६४५ ॥ **प्लुज्ञायजिषपिपदिवसिवितसिभ्यस्तिः** (६४६) प्लुङ्, प्लोतिः चीरम् । ज्ञांश्, ज्ञायते त्रैलोक्यस्य त्रातेति ज्ञातिः इक्ष्वाकुः वृषभः स्वजनश्च । यजीं, यष्टिः दण्डः लता च । 'षप समवाये', सप्तिः अश्वः । पदिंच्, पत्तिः पदातिः । वसं, वस्तिः सूत्रधारः चर्मपुटः स्नेहनोपकरणं च । तसूच्, विपूर्वः । वितस्तिः अर्धहस्तः ॥ ६४६ ॥ **प्रथेर्लुक् च वा** (६४७) प्रथिष्, अस्मात्तिरन्तस्य च लुग् वा स्यात् । वृक्षं प्रति प्रतिष्ठितः । पक्षे, प्रत्तिः प्रथनं भागश्च ॥ ६४७ ॥ **कोर्यषादिः** (६४८) इत्यस्माद्यषादिस्तिः । कुङ् कोयष्टिः पक्षिविशेषः ॥ ६४८ ॥ **ग्रो गृष् च** (६४९) गॄ अस्मात्तिः रस्य च गृष् इत्यादेशः स्यात् । गृष्टिः सकृत्प्रसूता गौः ॥ ६४९ ॥ **सोरस्तेः शित्** (६५०) सुपूर्वादसक् इत्यस्मात् शित् तिः स्यात् । स्वस्ति कल्याणम् । शित्त्वाद्भू-भावाल्लुगभावः ॥ ६५० ॥ **दृमुषिकृषिरिषिविषिशोशुच्यशिपूयीणप्रभृतिभ्यः कित्** (६५१) तिः । दृकृत्, दृतिः छागादित्वग्मयो जलाधारः । मुषश् मुष्टिः अङ्गुलिसन्निवेशविशेषः । कृषींत्, कृष्टिः पण्डितः । 'रिष हिंसायाम्' रिष्टिः प्रहरणम् । विष्लंकी, विष्टिः अवेतनकर्मकरः । शोंच् शितिः कृष्णः कृशश्च । शुच् शुक्तिः मुक्तादिः । अशौटि अष्टिः छन्दोविशेषः । पूयैङ् पूतिः दुर्गन्धः दुष्टः तृणजातिश्च । इणक्, इति हेत्वादौ । डुभृंगक् प्रपूर्वः, प्रभृतिः आदिः ॥ ६५१ ॥ **कुच्योर्नोन्तश्च** (६५२) कुङ् कुन्तिः राजा । कुन्तयः जनपदः । चिंगृद् चिन्तिः राजा ॥ ६५२ ॥ **खल्यमिरमिवहिवस्यर्तेरतिः** (६५३) खल, खलतिः खल्वाटः । अमतिः चातकः छागः प्रावृण्मार्गः व्याधिः गतिश्च । रमिं रमतिः क्रीडा कामः स्वर्गः सभा च । वहीं, वहतिर्गौः वायुः अमात्यः अपत्यं कुटुम्बं च । वसं वसतिः निवासः ग्रामसन्निवेशः । ऋक् अरतिः वायुः सरणं असुखं क्रोधः वर्म च ॥ ६५३ ॥ **दन्तेरह च** (६५४) अस्मादतिः अंह इत्यादेशः स्यात् । अंहतिः व्याधिः पन्थाः कालः रथश्च ॥ ६५४ ॥ **वृगो व्रत च** (६५५) व्रततिः वल्लिः ॥ ६५५ ॥ **अञ्जेः क च वा** (६५६) अस्मादतिः कश्चान्तादेशो वा स्यात् । अङ्कतिः वायुः प्रजापतिः अग्निश्च । अञ्जतिः अग्निः ॥ ६५६ ॥ **वातेर्णिद्वा** (६५७) अतिः । वायतिः वातः । वातिः गन्धमिश्रपवनः ॥ ६५७ ॥ **योः कित्** (६५८) अतिः । युक्, युवतिः तरुणी ॥ ६५८ ॥ **पातेर्वा** (६५९) अस्मादतिः । स च किद्वा । पतिः भर्त्ता । पातिः भर्त्ता रक्षिता प्रभुश्च ॥ ६५९ ॥ **अगिविलिपुलिक्षिपेरस्तिक्** (६६०) किदस्तिः । 'अग कुटिलायां गतौ' । अगस्तिः । विलत् । विलस्तिः । पुल पुलस्तिः । क्षिपींत्, क्षिपस्तिः । एते लौकिका ऋषयः । अगस्तिः वृक्ष-जातिः ॥ ६६० ॥ **गृधेर्गभ च** (६६१) अस्मात् किदस्ति । अयं चास्यादेशो गभस्तिः रश्मिः ॥ ६६१ ॥ **वस्यर्तिभ्यामातिः** (६६२) आभ्यामातिः । वसातयो जनपदः । अरातिः शत्रुः ॥ ६६२ ॥ **अभेर्यामाभ्याम्** (६६३) आतिः । अभियातिः अभिमातिश्च शत्रुः ॥ ६६३ ॥ **यजो य च** (६६४) अस्मादातिः यकारश्चान्तादेशः । ययातिः राजा ॥ ६६४ ॥ **वद्यविछ-दिभूभ्योऽन्तिः** (६६५) वदन्तिः कथा । अवन्तिः राजा । अवन्तयः जनपदः । छदण्, युजादे-र्विकल्पितणिजन्तत्वादण्यन्तः । छदन्तिः गृहाच्छादनद्रव्यम् । भवन्तिः कालः लोकस्थितिश्च

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ ६६५ ॥ **शकेरुन्तिः** (६६६) शकुन्तिः पक्षी ॥ ६६६ ॥ **नञो दागो ङितिः** (६६७) ङित् इति । अदितिः देवमाता ॥ ६६७ ॥ **दोङः** (६६८) ङितिः, दितिः असुरमाता ॥ ६६८ ॥ **वीसञ्ज्यसिभ्यस्थिक्** (६६९) कित् थिः । वीथिः मार्गः । षञ्जं, सक्थि ऊरुः शकटाङ्गं च । असूच्, अस्थि कीकसम् ॥ ६६९ ॥ **सारेरथिः** (६७०) सृं, अस्मात् ण्यन्तादथिः स्यात् । सारथिः यन्ता ॥ ६७० ॥ **निषञ्जेर्घित्** (६७१) निपूर्वात् षञ्जं । अस्मात् घिदथिः । निषङ्गथी रुद्रः धनुर्धरश्च । घित्करणं गत्वार्थम् ॥ ६७१ ॥ **उदर्तेर्णिद्वा** (६७२) अथिः । उदपूर्वादर्तेः । उदारथिः विष्णुः । उदरथिः विप्रः काष्ठं समुद्रः अनड्वांश्च ॥ ६७२ ॥ **अतेरिथिः** (६७३) अतिथिः पात्रतमो भिक्षावृत्तिः ॥ ६७३ ॥ **तनेर्डित्** (६७४) इथिः । तिथिः प्रतिपदादिः ॥ ६७४ ॥ **उषेरधिः** (६७५) उषू, ओषधिः उद्भिद्विशेषः ॥ ६७५ ॥ **विदो रधिक्** (६७६) विदक् । विद्रधिर्व्याधिविशेषः ॥ ६७६ ॥ **वीयुसुवह्यगिभ्यो निः** (६७७) वींक् वेनिः व्याधिः नदी च । युक् योनिः प्रजननमङ्गं उत्पत्तिस्थानं च । षुंग्ट् सोनिः सवनम् । वहीं वह्निः अग्निः बलीवर्दश्च । अग अग्निः पावकः ॥ ६७७ ॥ **धूशाशीङो ह्रस्वश्च** (६७८) एभ्यो निः ह्रस्वश्चैषां स्यात् । धूनिः नदी । शोंच्, शनिः सौरिः । शिनिः यादवः वर्णश्च ॥ ६७८ ॥ **लूधूप्रच्छिभ्यः कित्** (६७९) निः । लूनिः लवनम् । धूनिः वायुः । प्रश्निः वर्णः अल्पतनुः किरणः स्वर्गश्च ॥ ६७९ ॥ **सदिवृत्यमिधम्यश्यटिकट्यवेरनिः** (६८०) षद्लृं, सदनिः जलम् । वर्त्तनिः पन्थाः देशनाम च । अमनिः अग्निः । धमः सौत्रः शब्दे । धमनिः मन्या रसवहा च सिरा । अशौटि अशनिः वज्रम् । अटनिः चापकोटिः । कटे कटनिः शैलमेखला । अवनिः भूमिः ॥ ६८० ॥ **रञ्जेः कित्** (६८१) अनिः । रजनिः रात्रिः ॥ ६८१ ॥ **अर्तेरत्निः** (६८२) अत्निः । अरत्निः बाहुमध्यं चतुर्विंशत्यङ्गुलप्रमाणः उत्कनिष्ठश्च हस्तः ॥ ६८२ ॥ **एधेरिनिः** (६८३) एधिनी पृथ्वी ॥ ६८३ ॥ **शकेरुनिः** (६८४) शकुनिः पक्षी ॥ ६८४ ॥ **अदेर्मनिः** (६८५) अद्मनिः पशूनां भक्षणद्रोणी अग्निः जयः हस्ती अश्वः तालु च ॥ ६८५ ॥ **दमेर्दुभिदुम् च** (६८६) दमूच् अस्मात् दुभिः अस्य च दुमित्यादेशः स्यात् । दुन्दुभिः देवतूर्यम् ॥ ६८६ ॥ **नीसावृयुशृवलिदलिभ्यो मिः** (६८७) णींग्, नेमिः चक्रधारा । षोंच्, सामि अर्धवाच्यव्ययम् । वृगृट् वर्मिः वल्मीकः क्रमिः । युक् योमिः शकुनिः । शृश्, शर्मिः मृगः वल्मिः इन्द्रः समुद्रश्च । दल, दल्मिः आयुधं इन्द्रः समुद्रः शक्रः विषं च ॥ ६८७ ॥ **अशो रश्चादिः** (६८८) अशौटि, अस्मान्मिः रेफश्च धातोरादिः स्यात् । रश्मिः प्रग्रहः मयूखश्च ॥ ६८८ ॥ **सर्तेरूच्चातः** (६८९) आभ्यां मिः गुणे च कृतेऽकारस्योकारः स्यात् । सृं, सूर्मिः स्थूणा । ऋक् ऊर्मिः तरङ्गः ॥ ६८९ ॥ **कृभूभ्यां कित्** (६९०) मिः । कृमिः । भूमिः ॥ ६९० ॥ **कणेर्डयिः** (६९१) कयिः पक्षिविशेषः ॥ ६९१ ॥ **तङ्किवङ्क्यङ्किमङ्क्यंहिशद्यर्दिसद्यशौवपिवशिभ्यो रिः** (६९२) तकु, तङ्क्रिः युवा । वकुङ् वङ्क्रिः शल्यं परशुका रथः अहः कुटिलश्च । अङ्कि चिह्नं वंशकठिनिकश्च । मकुङ्, मङ्क्रिः मण्डनं शठः प्रवकश्च । अहुङ्, अंह्रिः पादः । अङ्घ्रेरप्येके । अघुङ्, अङ्घ्रिः । शद्लृं शद्रिः भस्म हस्ती वज्रं गिरिः (ऋषिः) शोभनश्च । अर्दक् अद्रिः गिरिः । षद्लृं, सद्रिः हस्ती गिरिः मेघश्च । अशौटि अश्रिः कोटिः । टुवपीं वप्रिः केदारः वशक् वश्रिः समूहः ॥ ६९२ ॥ **भूसूकुशिविशिशुभिभ्यः कित्** (६९३) रिः । भूरि प्रभूतं काञ्चनं च । षूत्, सूरिः आचार्यः पण्डितश्च । कुशच्, कुश्रिः ऋषिः । विशंत् विश्रिः मृत्युः ( ऋषिश्च ) ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शुभि शुभ्रिः यतिर्विप्रः दर्शनीयं शुभं सत्यं च ॥ ६९३ ॥ **जृषो रश्च वः** (६९४) अस्मात् क्रिः । इरि सति रेफस्य वः स्याज्जीर्त्रिः शरीरम् ॥ ६९४ ॥ **कुब्रिद्कुद्र्यादयः** (६९५) क्रिद्रि-प्रत्ययान्ता निपात्यन्ते । कुपेः कौतेर्देश्चान्तः । कुब्रिः ऋषिः । कुद्रिः पर्वतः ऋषिः समुद्रश्च । आदिग्रहणात् क्षौतेर्दोन्तः क्षुद्रिः समुद्रः । अर्त्तेर्गोन्तः । ऋग्रिः लोकनाथः । शकेः शक्रिः बलवा-नित्यादयो भवन्ति ॥ ६९५ ॥ **राशदिशाकिकव्यदिभ्यस्त्रिः** (६९६) रांक्, रात्रिः निशा । शद्लं शत्रिः कुञ्जरः क्रौञ्चश्च । शक्लृंट्, शक्त्रिः क्रौञ्चः ऋषिश्च । कद् कत्रिः । अदंक्, अत्रिः ऋषिः ॥ ६९६ ॥ **पतेरत्रिः** (६९७) पतत्रिः पक्षी ॥ ६९७ ॥ **नदिवल्ल्यर्तिकृतेररिः** (६९८) नद, नदरिः पटहः । वल्लि, वल्लरिः लता वीणा सस्यमञ्जरी च । ऋंक्, अररिः कपाटः । कृतैत्, कर्त्तरिः केशादिकर्तनयत्रम् ॥ ६९८ ॥ **मस्यसिघसिजस्यङ्गिसहिभ्य उरिः** (६९९) मसैच्, मसुरिः मरीचिः । असूच् असुरिः संग्रामः । घस्लं घसुरिः अग्निः । जसूच्, जसुरिः समाधिः अशनि अरणिः क्रोधश्च । अगु अङ्गुरिः करशाखा, लत्वे अङ्गुलिः । षहिं सहुरिः पृथ्वी अक्रोधनः (अनड्वान्) संग्रामः अन्धकारः सूर्यश्च ॥ ६९९ ॥ **मुहेः कित्** (७००) मुहुरिः सूर्यः अनड्वांश्च ॥ ७०० ॥ **धूमूभ्यां लिक्लिणौ** (७०१) धूग्श् धूलिः । मूङ् मौलिः जूटः । णित्वाद्वृद्धिः ॥ ७०१ ॥ **पाट्यञ्जिभ्यामलिः** (७०२) 'पट गतौ' ण्यन्तः । पाटलिः । अञ्जौप् अञ्जलिः पाणिपुटः प्रणामहस्तयुगं च ॥ ७०२ ॥ **माशालिभ्यामोकुलिमलि** (७०३) आभ्यां यथासङ्ख्य-मेतौ स्याताम् । मांक् मौकुलिः काकः । 'शल गतौ' । ण्यन्तः । शाल्मलिः वृक्षः ॥ ७०३ ॥ **दृपृवृभ्यो विः** (७०४) दृश् दर्विः तर्दूः । पृश् पर्विः कङ्कः हिंस्रश्च । वृग्श् वर्विः शकटं धात्री काकः श्येनश्च ॥ ७०४ ॥ **जशृस्तृजागृकृनीघृषिभ्यो ङित्** (७०५) विः । जृष्च् जीर्विः पशुः कण्टकः शकटः मनुः कायः गुल्मं शङ्का वृद्धः वृद्धभावश्च । शृश् शीर्विः (हिंस्रः) कृमिः न्यङ्कुश्च । स्तृग्श्, स्तीर्विः गर्विष्ठः अध्वर्युः भगः तनुः रुधिरं भयं तृणजातिः नभः अजश्च । जागृविः राजा अग्निः प्रबुद्धश्च । ङित्त्वान्न गुणः । डुकृंग् कृविः रुद्रः तन्तुवायद्रव्यं राजा च । यदुपज्ञं कृवय इति पुरा पञ्चालानाचक्षते । णींग् नीविः परिधानग्रन्थिः मूलधनं च । घृषू, घृषिः वराहः वायुः अग्निश्च ॥ ७०५ ॥ **छविछिविस्फविस्फिविस्थविस्थिविदविदीविकिकि-विदिदिविदीदिविकिकीदिविकिकिदीविशिव्यटव्यादयः** (७०६) ङिद्विप्रत्ययान्ता निपा-त्यन्ते । छ्यतेर्ह्रस्वश्च । छविः त्वक् तच्छाया (आवरणं च) । छिदेर्लुक् च । छिविः फल्गुद्रव्यम् । स्फायतेः स्फस्फिभावौ च । स्फविः वृक्षजातिः । स्फिविः वृक्षः उदश्विच्च । तिष्ठतेः स्थस्थिभावौ । स्थविः प्रसेवकः तन्तुवायः सीमा अग्निः अजङ्गमः स्वर्गः कुष्ठी मांसं फलं च । स्थिविः सीमा । दमेर्लुक् च । दविः धर्मशीलः दाता स्थानं फलश्च । दीव्यतेर्दीर्घश्च । दीविः कितवः द्युतिमान् कालः व्याघ्र-जातिश्च । कितेर्द्वित्वं पूर्वस्य चत्वाभावो लुक् च । किकिविः पक्षिविशेषः । दिवेर्द्वित्वं पूर्वदीर्घत्वं वा दिदिविः स्वर्गः । दीदिविः अन्नं स्वर्गश्च । (कितेः किकीदिभावः) कीदिविः वर्णः पक्षी च । किकि-पूर्वाद्दीव्यतेर्दीर्घश्च । किकीति कुर्वन् दीव्यति किकिदीविः चाषः । शीङो ह्रस्वश्च । शिविः राजा । अटेरत्वान्तः । अटविः अरण्यम् । आदिग्रहणादन्येऽपि ॥ ७०६ ॥ **मुषिप्लुषिशुषिकुष्यशिभ्यः सिक्** (७०७) कित् सिः । मुषू प्लुषू मुक्षिः अग्निः उदपानश्च । प्लुक्षिः अग्निः जठरं कुसूलश्च । शुषंच् शुक्षिः वायुः निदाघः यवासकः तेजश्च । कुषश् कुक्षिः जठरम् । अशौटि, अक्षि नेत्रम् ॥ ७०७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**गोपादेरनेरसिः** (७०८) गोपादिपूर्वादनक् इत्यस्मादसिः स्यात्। गोपानसिः सौधाग्रभागच्छदिः। चित्रानसिः जलचरः। एकानसिः उज्जयनी वाराणसी कासिनगरी ॥ ७०८ ॥ **वृधृपृवृसाभ्यो नसिः** (७०९) वृगूट् वर्णसिः वरुः। धृंग्, धर्णसिः शैलः लोकपालः जलं माता च। पृश् पर्णसिः जलधरः उलूखलं शाकादिश्च। वृशू वर्णसिः भूमिः। षोंच् सानसिः स्नेहः नखः हिरण्यं क्षणं सखा सनातनश्च ॥ ७०९ ॥ **व्रियो हिक्** (७१०) व्रीश्, व्रीहिः धान्यविशेषः ॥ ७१० ॥ इति इकारान्ताः पञ्चोत्तरेण सूत्रशतेन। **तृस्तृतन्द्रितन्त्र्यविभ्य ईः** (७११) तृ, तरीः नौः वायुः प्लवनश्च। स्तृश् स्तरीः तृणं धूमः नदी शय्या च। तन्द्रिः सादमोहनयोः सौत्रः, तन्द्रीः मोहनिद्रा। तन्त्रिण् तन्त्रीः शुष्कस्नायुः वादित्री आलस्यं च। अव, अवीः प्रकाशः आदित्यः भूमिः पशुः राजा स्त्री च ॥ ७११ ॥ **नडेर्णित्** (७१२) गत्यर्थात् नडेः सौत्रात् णित् ईः। नाडीः आयतशुषिरं द्रव्यमर्धमुहूर्त्तश्च ॥ ७१२ ॥ **वातात् प्रमः कित्** (७१३) वातपूर्वात्पदात् प्रेणोपसृष्टात् मांक् अस्मात् किदीः स्यात्। वातप्रमीः वात्याः अश्वः वातमृगः पक्षी शमी च वृक्षः ॥ ७१३ ॥ **यापाभ्यां द्वे च** (७१४) आभ्यां किदीरनयोश्च द्वे रूपे स्याताम्। यांक् ययीः मोक्षमार्गः दिव्यदृष्टिः आदित्यः अश्वश्च। पां पपीः रश्मिः सूर्यः हस्ती च ॥ ७१४ ॥ **लक्षेर्मोन्तश्च** (७१५) लक्षीण् अस्मादीः मकारश्चान्तः स्यात्। लक्ष्मीः श्रीः ॥ ७१५ ॥ इति ईकारान्ताः पञ्चभिः सूत्रैः। **भृमृतृत्सरितनिधन्यनिमनिमस्जिशीवटिकटिपठिगडिचक्ष्यसिवसित्रपिशृस्वृस्निहिक्लिदिकन्दीन्दिविन्द्यन्धिवन्ध्यणिलोष्टिकुन्थिभ्य उः** (७१६) डुडुभृंग्क् भृंग् वा भरुः समुद्रः वर्णनभर्त्ता च। मृंत् मरुर्निर्जलो देशः गिरिश्च। तॄ तरुः वृक्षः। 'त्सर छद्मगतौ'। त्सरुः आदर्शः खड्गादिग्रहणप्रदेशः वञ्चकः क्षुरिका च। तनूयी तनुः देहः सूक्ष्मश्च। धन धान्ये सौत्रः, धनुः अस्त्रं दानमानं च। अनक् अनुः प्राणः, अनु पश्चादाद्यर्थेऽव्ययम्। मनिंच् मनुः प्रजापतिः। टुमस्जोंत् मद्गुः जलवायसः। शीङ् शयुः अजगरः स्वप्नः आदित्यश्च। वट वटुः माणवकः। कटे कटुः रसविशेषः। 'पट गतौ'। पटुः दक्षः। 'गड सेचने' गडुः घाटामस्तकयोर्मध्ये मांसपिण्डः स्फोटश्च। 'चक्षू गतौ' चक्षुः पक्षिमुखम्। असूच् असवः प्राणाः। वसं वसु द्रव्यं तेजो देवता च। वसुः कश्चिद्राजा। त्रपौषि त्रपु लोहविशेषः। शृश् शरुः क्रोधः आयुधं हिंस्रश्च। औस्वृ स्वरुः प्रतापः वज्रः वज्रास्फालनं च। ष्णिहौच् स्नेहुः चन्द्रः सन्निपातजो व्याधिविशेषः पित्तं वनस्पतिश्च। क्लिदौच् क्लेदुः क्षेत्रं चन्द्रः भगः शरीरभङ्गश्च। क्लेदयतीति क्लेदुः चन्द्र इत्यन्ये। कदु कंदु पाकस्थानं सूत्रोतं च क्रीडनम्। इदु इन्दुः चन्द्रः। 'विदु अवयवे' विन्दुः विप्रुट्। अन्धण् अन्धुः कूपः व्रणश्च। बन्धंश् बन्धुः स्वजनः। बन्धु द्रव्यम्। 'अण शब्दे' अणुः पुद्गलः सूक्ष्मः रालकादिश्च धान्यविशेषः। 'लोष्टि सङ्घाते' लोष्टुः मृत्पिण्डः। 'कुन्थश् संक्लेशे' कुन्थुः सूक्ष्मजन्तुः ॥ ७१६ ॥ **स्यन्दिसृजिभ्यां सिन्धरज्जौ च** (७१७) आभ्यामुः अनयोश्च यथासङ्ख्यमिमावादेशौ स्याताम्। स्यन्दौङ् सिन्धुः नदी समुद्रश्च। सृजंत् (सृजिच् वा), रज्जुः दवरकः ॥७१७॥ **पंसेर्दीर्घश्च** (७१८) 'पसुण् नाशने' अस्मादुः दीर्घश्चास्य स्यात्। पांसुः पार्थिवं रजः ॥ ७१८ ॥ **अशेराङ्गोन्तश्च** (७१९) अशौटि अस्मादुः अकाराच्च परोऽस्य नोन्तः स्यात्। अंशुः रश्मिः सूर्यश्च। प्रांशुर्दीर्घश्च। चकारात्पूर्वपर्यायौ ॥ ७१९ ॥ **नमेर्नाक् च** (७२०) णमं। अस्मादुः अयं चास्यादेशः स्यात्। नाकुः व्यलीकं वनस्पतिः ऋषिः वल्मीकश्च ॥ ७२० ॥ **मनिजनिभ्यां धतौ च** (७२१) आभ्यामुः अनयोश्च यथासङ्ख्यं धतौ स्याताम्। मनिंच्, मधु क्षौद्रं सीधु च।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मधुः असुरः मासश्च चैत्रः । जनैचि, जतु लाक्षा ॥ ७२१ ॥ **अर्जेर्ऋज्** (७२२) 'अर्ज अर्जने' । अस्मादुः अयं चास्यादेशः स्यात् । ऋजु अकुटिलम् ॥ ७२२ ॥ **कृतेस्तर्क् च** (७२३) कृतैत् कृतैप् वा अस्मादुरयं चास्यादेशः स्यात् । तर्कुः चुन्दः सूत्रवेष्टनशलाका च ॥ ७२३ ॥ **नेरञ्चेः** (७२४) निपूर्वादञ्चेरुः स्यात् । न्यङ्कुः मृगः ऋषिश्च ॥ ७२४ ॥ **किमः श्रो णित्** (७२५) किम्पूर्वात् शॄश्, अस्माण्णिदुः स्यात् । किंशारुः शुकः धान्यशिखा हिंस्रः इषुश्च ॥ ७२५ ॥ **मिवहि-चरिचटिभ्यो वा** (७२६) एभ्य उः स च णिद्वा । डुमिंग्ट् मायुः पित्तं मानं शब्दश्च । गोमायुः सृगालः । मयुः किन्नरः उष्ट्रः प्रक्षेपः आकूतं च । बाहुलकादात्वाभावः । वहीं । बाहुः भुजः, बहु प्रभूतम् । चर चारु शोभनम् । चरन्त्यस्माद्देवपितृभूतानि भीमादित्वादपादानेऽपि चरुः देवतो-द्देशेन स्थालीपाकः स्थाली च । चटण् चाटुः प्रियाचरणम् पटुजनः प्रियवादी स्फुटवादी च दर्व्यग्रं शिष्यश्च । चटुः प्रियाचरणम् ॥ ७२६ ॥ **ऋतॄगॄमॄश्रादिभ्यो रो लश्च** (७२७) एभ्यो णिदुः रस्य च लः स्यात् । ऋक् ऋं वा । आलुः श्लेष्मातकः कन्दविशेषश्च । तॄ तालुः काकुदम् । शॄश् शालुः कषायः हिंस्रश्च । मॄत् मालुः पत्रलता यस्या मालुधानीति प्रसिद्धिः । डुडुभृंग्क् भालुः इन्द्रः । आदिग्रहणादन्येऽपि ॥ ७२७ ॥ **कृकस्थूराद्वचः कु च** (७२८) आभ्यां वचो णिदुः कश्चान्तादेशः स्यात् । कृकवाकुः कुक्कुटः कृकलासः खञ्जरीटश्च । एवं स्थूरवाकुः उच्चध्वनिः ॥ ७२८ ॥ **पॄकाहृषिधृषीषिकुहिभिदिविदिमृदिव्यधिगृध्यादिभ्यः कित्** (७२९) उः । पॄश् पुरुः महान् लोकः समुद्रः यजमानः राजा च कश्चित् । कैं कुः पृथ्वी । हृषंच् हृषू वा हृषुः तुष्टः अलीकः सूर्याग्निशशिनश्च । ञिधृषाद् धृषुः प्रगल्भः सन्तापः उत्साहः पर्वतश्च । इषत् इषुः शरः । कुहणि कुहुः नष्टचन्द्रामावास्या । भिन्दृपी भिदुः वज्रः कन्दर्पश्च । विदक् विदुः हस्तिमस्तकैकदेशः । मृदश् मृदुः अकठिनः । व्यधंच् विधुः चन्द्रः वायुः अग्निश्च । गृधूच् गृधुः कामः । आदिग्रहणात् 'पूरैचि आप्यायने' पूरण् वा । पूरितमनेन यशसा सर्वमिति पुरुः । एवमन्येऽपि ॥ ७२९ ॥ **रभिप्रथि-भ्यामृच रस्य** (७३०) आभ्यां किदुः रेफस्य च ऋकारः स्यात् । 'रभि राभस्ये' ऋभवः देवाः । प्रथिष् पृथुः राजा विस्तीर्णश्च ॥ ७३० ॥ **स्पशिभ्रस्जेः स्लुक् च** (७३१) स्पशिः सौत्रो गत्यर्थस्तालव्यान्तः । पशुस्तिर्यङ् मक्षवध्यश्च जनः । भ्रस्जीत् भृगुः प्रपातः ब्राह्मणश्च सुतः । कित्त्वाद् 'ग्रहव्रश्चभ्रस्जप्रच्छः' (४।१।८४) इति य्वृत् । 'न्यङ्कूद्गमेघादयः' (४।१।११२) इति गत्वम् ॥ ७३१ ॥ **दुःस्वपवनिभ्यः स्थः** (७३२) एभ्यः परात् ष्ठां अस्मात् किदुः स्यात् । दुःष्ठु अशोभनम् । सुष्ठु सातिशयम् । अपष्ठु वामम् । वनिष्ठुः वपासंनिहितोऽवयवः अश्वः संभक्तः अपानं च ॥ ७३२ ॥ **हनियाकृभृपॄतॄत्रो द्वे च** (७३३) एभ्यः किदुः एषां च द्वे रूपे स्याताम् । हनंक् जघ्नुः इन्द्रः वेगवांश्च । यांक् ययुः अश्वः यायावरः स्वर्गमार्गश्च । डुकृंग् चक्रुः कर्मठः वैकुण्ठश्च । डुडुभृंग्क् भृंग् वा । बभ्रुः ऋषिः राजा वर्णश्च । पॄश् पुपुरुः समुद्रः चन्द्रः लोकश्च । तॄ तितिरुः पतङ्गः । त्रैङ् तत्रुः नौका ॥ ७३३ ॥ **कृग्र ऋत उर् च** (७३४) कृत् कुरुः राजर्षिः । कुरवः जनपदः । गॄश् गुरुः आचार्यः लघुप्रतिपक्षः पूज्यश्च जनः (जनः ?) ॥ ७३४ ॥ **पचेरिश्चातः** (७३५) अस्मादुः अकारस्य च इकारः । पिचुः निरस्थीकृतः कर्पासः ॥ ७३५ ॥ **अर्तेरूर् च** (७३६) अस्मादुः ऊर् चास्यादेशः । ऊरुः शरीराङ्गम् ॥ ७३६ ॥ **महत्युर् च** (७३७) महत्यभिधेयेऽस्मादुः उर् चास्यादेशः उरुर्विस्तीर्णम् ॥ ७३७ ॥ **उड् च भे** (७३८) अर्त्तेर्भेऽभिधेये उः उड् चास्यादेशः । उडु नक्षत्रम् ॥ ७३८ ॥ **श्लिषेः क च** (७३९) अस्मात्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

कित् उः कश्चान्तादेशः । क्लिकुः मृगास्थि सव्यवधानः व्यवसायः ज्योतिषं सेवकश्च ॥ ७३९ ॥ **रङ्घिलङ्घिलिङ्गेर्नलुक् च** (७४०) एभ्य उः नकारस्य च लुक् स्यात् । रघुः राजा । लघुः तुच्छं शीघ्रं च । 'लिगुण् चित्रीकरणे' लिगुः ऋषिः सेवकः मूर्खः भूमिविशेषश्च ॥ ७४० ॥ **पीमृगमित्रदेवकुमारलोकधर्मविश्वसुम्नाश्मावेभ्यो यः** (७४१) एभ्यः परात् 'यांक् प्रापणे' अस्मात् किदुः स्यात् । पीयुः उलूकः आदित्यः सुवर्णं कालश्च । मृगयुः व्याधः मृगश्च । मित्रयुः ऋषिः मित्रवत्सलश्च । देवयुः धार्मिकः । कुमारयुः राजपुत्रः । लोकयुः वाक्यकुशलो जनः । धर्मयुः धार्मिकः । विश्वयुः वायुः । सुष्ठु म्नातीति सुम्नः । सुम्नयुः यजमानः । अश्मयुर्मूर्खः । अवयुः काव्यम् ॥ ७४१ ॥ **पराङ्भ्यां शृखनिभ्यां डित्** (७४२) पराङ्पूर्वाभ्यां यथासङ्ख्यमाभ्यां डिदुः स्यात् । परात् शृणाति । परशुः कुठारः । आखनति आखुः मूषिकः ॥ ७४२ ॥ **शुभेः स च वा** (७४३) शुभि दीप्तावस्माड्डिदुरस्य च दन्त्यः सो वा स्यात् । सुः शुश्च पूजायाम् । सुपुरुषः शुनासीरः ॥ ७४३ ॥ **शुद्रुभ्याम्** (७४४) डिदुः । 'शंक् अभिगमे' शुः स्वर्गः क्रीडा स्वर्गश्च । द्रुं 'गतौ' द्रुः वृक्षशाखा वृक्षश्च ॥ ७४४ ॥ **हरिपीतमितशतविकुकद्भ्यो द्रुवः** (७४५) एभ्यः परात् द्रुं अस्मात् डिदुः स्यात् । हरिद्रुः वृक्षः ऋषिः पर्वतश्च । पीतद्रुः देवदारुः । मितद्रुः समुद्रः तुरगः मितंगमश्च । शतद्रुर्नाम नदः नदी च । विद्रुः दारुप्रकारः वृक्षश्च । कुद्रुः विकलपादः । कद्रुर्नागमाता वह्निजातिः गृहगोधावर्णश्च ॥ ७४५ ॥ **केवयुभुरण्यध्वर्य्वादयः** (७४६) डिदुप्रत्ययान्ता निपात्यन्ते । केवलपूर्वाद्यातेर्ललोपश्च । केवयुः ऋषिः । भूपूर्वाद्यातेर्डुरण्वादौ । भुवं याति भुरण्युः अग्निः । अध्वरं याति पूर्वपदान्तलोपे अध्वर्युः ऋत्विक् । आदिग्रहणात् चरन्याति चरण्युः । अभिपूर्वस्याश्नातेरभीशुः रश्मिः ॥ ७४६ ॥ **शः सन्वच्च** (७४७) शोंच् अस्माड्डिदुः स च सन्वत् सनीवास्मिन् द्वित्वं पूर्वस्य चेत्वं भवति । शिशुः बालः ॥ ७४७ ॥ **तनेर्ड उः** (७४८) स च सन्वत् । तितउः परिवपनम् ॥ ७४८ ॥ **कैशीशमिरमिभ्यः कुः** (७४९) कैं काकुः स्वरविशेषः । शीङ् शेकुः उद्भिद्विशेषः । शमूच् शङ्कुः कीलकः ( बाणः शूलमायुधं चिह्नं छलकश्च ) । रमिं रङ्कुः मृगः ॥ ७४९ ॥ **ह्रियः किद्रो लश्च वा** (७५०) अस्मात् कित् कुः रेफस्य च लो वा स्यात् । ह्रीकुः ह्लीकुश्च त्रपु जतुनी लज्जावांश्च । ह्रीकुर्वनमार्जारः ॥ ७५० ॥ **किरः ष च** (७५१) कृत् अस्मात् किकुः षश्चान्तादेशः स्यात् । किष्कुः छायामानद्रव्यम् । **लिङ्गानुशासनवृत्तौ तु** किष्कुः हस्तादि **यद्गौडः** किष्कुर्हस्ते वितस्तौ च प्रकोष्ठे वा नपुंसकम् । **स्वमते** तु पुंस्त्रीलिङ्गः ॥७५१॥ **चटिकठिपर्दिभ्य आकुः** (७५२) चटण् चटाकुः ऋषिः शकुनिश्च । कठ, कठाकुः कुटुम्बपोषकः । पर्दि पर्दाकुः भेकः वृश्चिकः अजगरश्च ॥ ७५२ ॥ **सिविकुटिकुठिकुकुषिकृषिभ्यः कित्** (७५३) आकुः । षिवूच् सिवाकुः ऋषिः । कुटत् कुटाकुः विटपः । कुठिः सौत्रः छेदे । कुठाकुः श्वभ्रः । कुङ् कुवाकुः पक्षी । कुषश् कुषाकुः मूषिकः अग्निः परोपतापी च । कृषींत् कृषाकुः ॥ ७५३ ॥ **उपसर्गाद्वेर्डित्** (७५४) आकुः । उपचाकुः सञ्चाकुश्च ऋषिः । निचाकुः निपुण ऋषिश्च ॥ ७५४ ॥ **शलेरङ्कुः** (७५५) शलङ्कुः ऋषिः ॥ ७५५ ॥ **सृपृभ्यां दाकुक्** (७५६) सृदाकुः दवाग्निः वायुः आदित्यः व्याघ्रः शकुनिः अश्वः सर्त्ता गोत्रकृच्च । पृंक् पृदाकुः सर्पः गोत्रकृच्च ॥ ७५६ ॥ **इषेः स्वाकुक्** (७५७) इक्ष्वाकुः आदिक्षत्रियः ॥ ७५७ ॥ **फलिवल्यमेर्गुः** (७५८) फल्गुः असारम् । वल्गु मधुरं शोभनं च । वल्गुः पक्षी । अम अङ्गु शरीरावयवः ॥ ७५८ ॥ **दमेर्लुक् च** (७५९) दमूच् अस्माद्गुः अन्तस्य च लुक् स्यात् । दगुः ऋषिः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ ७५९ ॥ **हेर्हिन् च** (७६०) हिंट् अस्माद्गुः हिन् चास्यादेशः स्यात् । हिङ्गुः रामठः ॥ ७६० ॥ **प्रीकैपैनीलेरङ्गुक्** (७६१) किदङ्गुः । प्रींग्श् प्रियङ्गुः फलिनी रालकश्च । कैं कङ्गुः अणुः । पैं पङ्गुः खञ्जः । 'नील वर्णे' । नीलङ्गुः कृमिजातिः सृगालश्च ॥ ७६१ ॥ **अव्यर्तिगृभ्यो ट्दुः** (७६२) अव अवटुः कृकाटिका । ऋक् अरटुः वृक्षः । गृत् गरटुः देशविशेषः पक्षी अजगरश्च ॥ ७६२ ॥ **शलेराटुः** (७६३) शलाटुः कोमलं फलम् ॥ ७६३ ॥ **अञ्ज्यवेरिष्टुः** (७६४) अञ्जौप् अञ्जिष्टुः भानुः अग्निश्च । अव, अविष्टुः अश्वः होता च ॥ ७६४ ॥ **तनिमनिकणिभ्यो डुः** (७६५) तण्डुः प्रथमः । मनिंच् मण्डुः ऋषिः । कण, कण्डुः वेदनाविशेषः ॥ ७६५ ॥ **पनेर्दीर्घश्च** (७६६) पनि अस्मात् डुः दीर्घश्चास्य स्यात् । पाण्डुः वर्णः क्षत्रियश्च ॥ ७६६ ॥ **पलिमृभ्यामाण्डुकण्डुकौ** (७६७) पल, पलाण्डुः लशुनभेदः । मृंत् मृकण्डुः ऋषिः । कित्त्वान्न गुणः ॥ ७६७ ॥ **अजिस्थावृरीभ्यो णुः** (७६८) अजेर्वीभावे वेणुः वंशः । ष्ठां, स्थाणुः शिवः ऊर्ध्वं च दारु । वृग्ट्, वर्णुः नदः जनपदश्च । रींश्, रेणुः धूलिः ॥ ७६८ ॥ **विषेः कित्** (७६९) विष्लृंकी अस्मात् किण्णुः । विष्णुः हरिः ॥ ७६९ ॥ **क्षिपेरणुक्** (७७०) क्षिपणुः समीरणः विद्युच्च ॥ ७७० ॥ **अञ्जेरिष्णुः** (७७१) अञ्जिष्णुः ॥ ७७१ ॥ **कृहृभूजीवि-गम्यादिभ्य एणुः** (७७२) कृंग्ट् डुकृंग् वा करेणुः हस्ती । हृंग् हरेणुः गन्धद्रव्यम् । भू भवेणुः भव्यः । जीवेणुः ओषधम् । गमेणुः गन्ता । आदिग्रहणात् शमूच् शमेणुः शमनम् । यजीं यजेणुः यज्ञादिः । डुपचींष् पचेणुः पाकस्थानम् । पदेणुः वहेणुरित्यादि ॥ ७७२ ॥ **कृसिकम्यमिगमि-तनिमनिजन्यसिमसिसच्यविभाधागाग्लाम्लाहन्हायादिकृशिपूभ्यस्तुन्** (७७३) डुकृंग् कर्तुः कर्मकरः । षिंग्ट् सेतुः नद्यादिसंक्रमः । कन्तुः कन्दर्पः कामीमनः कुसूलश्च । अन्तुः रक्षिता लक्षणं च । गन्तुः पथिकः । आगन्तुः आवास्तव्यो जनः । तन्तुः सूत्रम् । मन्तुः वैमनस्यं प्रियंवदः मानश्च । जन्तुः प्राणी । असक् अस्तुः अस्तिभावः । बाहुलकाद्भूभावाभावः । मसैच्, मस्तु दधिमूलवारि । षचि सक्तुः यवविकारः । अव ओतुः । 'अनुनासिके च०' (४।१। १०८) इति वस्य उट् । भांक् भातुः शरीरावयवः अग्निः विद्वांश्च । डुधांग्क् धातुः लोहादिः रसादिः शब्दप्रकृतिश्च । गैं, गातुः गायनः । उद्गाता । ग्लातुः सरुजः । म्लातुः हीनः । हन्तुः आयुधं हिमश्च । ओहांक् हातुः मृत्युः मार्गश्च । यांक्, यातुः पाप्मा जनः राक्षसश्च । हिंट् हेतुः कारणम् । क्रुशं, क्रोष्टा शृगालः । पूग्श् पोतुः पविता । नित्करणं 'क्रुशस्तुनस्तृच् पुंसि' (१।४।९१) इत्यत्र विशेषार्थम् ॥ ७७३ ॥ **वसेर्णिद्वा** (७७४) तुन् । वास्तु गृहं भूमिश्च । वस्तु सन्निवेशभूमिश्च ॥ ७७४ ॥ **पः पीप्यौ च वा** (७७५) पां अस्मात्तुन् अस्य च पीपि इत्यादेशौ वा स्याताम् । पीतुः आदित्यः चन्द्रः हस्ती कालः चक्षुः बालघृतपानभाजनं च । पितुः प्रजापतिः आहारश्च । पातुः रक्षिता ब्रह्मा च ॥ ७७५ ॥ **आपोप् च** (७७६) आप्लृंट् अस्मात्तुन् । अस्य अप् आदेशः स्यात् । अप्तुः देवताविशेषः कालयाजकः यज्ञयोनिश्च ॥ ७७६ ॥ **अञ्ज्यर्तेः कित्** (७७७) तुन्, अक्तुः इन्द्रः विष्णुः रात्रिश्च । ऋक् ऋतुः हेमन्तादिः स्त्रीरजस्तत्कालश्च ॥ ७७७ ॥ **चायः के च** (७७८) चायृग् केतुः ध्वजः ग्रहश्च ॥ ७७८ ॥ **वहिमहिगुह्येधिभ्यो तुः** (७७९) वहतुः विवाहः अनड्वान् अग्निः कालश्च । महतुः अग्निः । गूहतुः भूमिः । एधतुः लक्ष्मीः पुरुषः अग्निश्च ॥ ७७९ ॥ **कृलाभ्यां कित्** (७८०) अतुः । डुकृंग् क्रतुः यज्ञः । लांक् लतुः पाशः ॥ ७८० ॥ **तनेर्यतुः** (७८१) तन्यतुः विस्तारः वायुः पर्वतः सूर्यश्च ॥ ७८१ ॥ **जीवेरातुः** (७८२)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जीवातुः जीवितं औषधं अन्नं उदकं द्रव्यं च ॥ ७८२ ॥ **यमेर्दुक्** (७८३) यमू यदुः क्षत्रियः ॥ ७८३ ॥ **शीङो धुक्** (७८४) शीधुः मद्यविशेषः ॥ ७८४ ॥ **धूगो धुन् च** (७८५) धूग्श् अस्मात् धुक्, अयं चास्यादेशः स्यात् । धन्धुः दानवः ॥ ७८५ ॥ **दाभाभ्यां नुः** (७८६) डुदांग्क्, दानुः गन्ता यजमानः वायुः आदित्यः दक्षिणार्थं धनम् । भांक्, भानुः सूर्यः रश्मिश्च । चित्रभानुः अग्निः । स्वर्भानुः राहुः । विश्वभानुः आदित्यः ॥ ७८६ ॥ **धेः शित्** (७८७) नुः । शित्वात् 'आत्सन्ध्यक्षरस्य' (४।२।१) इत्यात्वं न स्यात् । ट्धें धेनुः नवप्रसूतिका गवादिः ॥ ७८७ ॥ **सुवः कित्** (७८८) नुः । षूङौक् सूनुः पुत्रः ॥ ७८८ ॥ **हो जह् च** (७८९) ओहांक् अस्मात् कित् नुरस्य चायमादेशः स्यात् । जह्नुः गङ्गापिता ॥ ७८९ ॥ **वचेः कगौ च** (७९०) वचंक् अस्मात् नुः कगौ चास्यान्तादेशौ स्याताम् । वक्नुः वग्नुश्च वाग्मी ॥ ७९० ॥ **कृहनेस्तुकनुकौ** (७९१) डुकृंग् कृतुः कर्मकरः । कृणुः कोशाकारः कारुश्च । हनंक् हतुः हिमः । हनुः वक्त्रैकदेशः । बाहुलकान्नलोपः ॥ ७९१ ॥ **गमेः सन्वच्च** (७९२) अस्मात्तुक्नुकौ सन्वद्भवतः । जिगन्तुः ब्राह्मणः । दिवसः मार्गः प्राणः अग्निश्च । जिगत्नुः प्राणः बाणः खगः मीनः वायुश्च ॥ ७९२ ॥ **दाभूक्षण्युन्दिनदिवदिपत्यादेरनुङ्** (७९३) एभ्यो ङिदनुः । डुदांग्क्, दनुः दानवमाता । भू भवनुः मेघः चन्द्रः भवितव्यता हंसश्च । क्षणूग्, क्षणनुः यायावरः । उन्दैप् उदनुः शुकः । णद, नदनुः मेघः सिंहश्च । वद, वदनुः वक्ता । पत्लृ, पतनुः श्येनः आदिग्रहणादन्येपि । कित्त्वमकृत्वा ङित्करणं वदेर्य्वृदभावार्थम् ॥ ७९३ ॥ **कृशेरानुक्** (७९४) कृशच् कृशानुः वह्निः ॥ ७९४ ॥ **जीवेरदानुक्** (७९५) जीरदानुः । कित्करणं गुणप्रतिषेधार्थम् । वलोपे हि नाम्यन्तत्वाद्गुणः स्यात् ॥ ७९५ ॥ **वचेरक्नुः** (७९६) वचक्नुः वाग्मी आचार्यः ब्राह्मणः ऋषिश्च ॥ ७९६ ॥ **हृषिपुषिघुषिगदिमदिनन्दिगडिमण्डिजनिस्तनिभ्यो णेरित्नुः** (७९७) एभ्यो ण्यन्तेभ्यः इत्नुः । हृषंच् हृषू वा । हर्षयित्नुः आनन्दः स्वजनः रङ्गोपजीवी प्रियंवदश्च । पुषंच् पोषयित्नुः भर्त्ता मेघः कालश्च । 'घुषृण् विशब्दने' घोषयित्नुः कोकिलः शब्दश्च । 'गदण् गर्जे' गर्दयित्नुः पर्जन्यः वावदूकः भ्रमरः कामश्च । मदैच् मदयित्नुः मदिरा सुवर्णमअलङ्कारश्च । टुनदु, नन्दयित्नुः पुत्रः आनन्दः प्रमुदितश्च । गडयित्नुः बलाहकः । मडु, मण्डयित्नुः मण्डयिता कामुकः । जनैचि, जनयित्नुः पिता । स्तनण् स्तयित्नुः मेघः तद्गर्जितं च ॥ ७९७ ॥ **कस्यर्तिभ्यामिपुक्** (७९८) कस कसिपुः भोजनम् । रिपुः शत्रुः ॥ ७९८ ॥ **कम्यमिभ्यां बु** (७९९) कम्बुः शङ्खः । अम्बु जलम् ॥ ७९९ ॥ **अभ्रेरमुः** (८००) अभ्रमुः देवहस्तिनी ॥ ८०० ॥ **यजिशुन्धिदहिदसिजनिमनिभ्यो युः** (८०१) यज्युः अग्निः अध्वर्युः यज्वा शिष्यश्च । 'शुन्ध शुद्धौ' शुन्ध्युः अग्निः आदित्यः पवित्रं च । दहं, दह्युः अग्निः । 'दसूच् उपक्षये' दस्युः चौरः । जनैचि जन्युः अपत्यं पिता प्रादुर्भावः वायुः प्रजापतिः प्राणी च । मनिंच् । मन्युः क्रोधः कृपा शोकः क्रतुश्च ॥ ८०१ ॥ **भुजेः कित्** (८०२) युः । भुजंप् भुज्युः अग्निः आदित्यः गरुडः भोगः ऋषिश्च ॥ ८०२ ॥ **सर्तेरयवन्यू** (८०३) अस्मात् अयु अन्यु एतौ स्याताम् । सरयुः नदी वायुश्च । दीर्घान्तमिममिच्छन्त्येके । सरयूः श्लिष्टनिर्देशात्तदपि सङ्गृहीतम् । सरण्युः मेघः आश्विनोर्माता समेघो वायुश्च ॥ ८०३ ॥ **भूक्षिपिचरेरन्युक्** (८०४) भुवन्युः । ईश्वरः अग्निश्च । क्षिपींत्, क्षिपन्युः वायुः वसन्तः विद्युत् अर्थः कालश्च । चरः चरण्युवायुः ॥ ८०४ ॥ **मुस्त्युक्** (८०५) मृत्, मारयति, मृत्युः कालः मरणं च ॥ ८०५ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**चिनीपीम्यशिभ्यो रुः** (८०६) चिंग्ट् चेरुः मुनिः । णींग् नेरुः जनपदः । पीङ्च् पेरुः सूर्यः
गिरिः कलविङ्कश्च । मीङ्च् मेरुः देवाद्रिः । अशौटि अश्रु नेत्रजलम् । ॥ ८०६ ॥ **रुपूभ्यां कित्**
(८०७) रुः । रुंक् रुरुः मृगः । पूग्श् पूरुः राजा ॥ ८०७ ॥ **खनो लुक् च** (८०८) अस्मात्
रुः अन्तस्य च लुक् स्यात् । खरुः दर्प्पः क्रूरः मूर्खः हयः गीतविशेषश्च ॥ ८०८ ॥ **जनिहृ-
निशयर्तेस्त च** (८०९) एभ्यो रुः तकारश्चान्तादेशः स्यात् । जत्रुः शरीरावयवः मेघः घर्मा-
वसानं च । हृत्रुः हिंस्रः । शद्लृं शत्रुः रिपुः । बाहुलकात्तादेशविकल्पे शद्रुः पुरुषः अत्रुः क्षुद्रजन्तुः ।
॥ ८०९ ॥ **श्मनः शीङो डित्** (८१०) श्मन् पूर्वात् शीङ् अस्मात् डित् रुः स्यात् । श्मश्रु
मुखलोमानि ॥ ८१० ॥ **शिग्रुगेरुनमेर्वादयः** (८११) रुप्रत्ययान्ता निपात्यन्ते । 'शिंग्ट् निशाने'
कित् गोन्तश्च । शिग्रुः शोभाञ्जनकः हरितकविशेषश्च । गिरतेरेच । गेरुर्धातुः । नमेर्नङ्पूर्वस्य
मयतेर्वा; एच्च । नमेरुः देववृक्षः । आदिग्रहणादन्येपि ॥ ८११ ॥ **कटिकुट्यर्तेररुः** (८१२)
कट, कटरुः शकटम् । कुटत् कुटरुः पक्षिविशेषः मर्कटः वृक्षः । ऋंक्, अररुः असुरः आयुधं
मण्डलं च ॥ ८१२ ॥ **कर्करारुः** (८१३) कर्कः सौत्रादारुः । कर्कारुः क्षुद्रचिर्भिटी ॥ ८१३ ॥
**उर्वेरादेरूदेतौ च** (८१४) 'उर्वै हिंसायाम्' इत्यस्मादारुप्रत्यय आदेशश्च ऊकार एकारौ स्याताम् ।
उर्वव्यर्त्तिमिति । ऊर्वारुः कटुचिर्भिटी । एर्वारुः चारुचिर्भिटी ॥ ८१४ ॥ **कृपिक्षुधिपीकुणिभ्यः
कित्** (८१५) आरुः । कृपौङ् कृपारुः दयाशीलः । क्षुधारुः क्षुधमसहमानः । लत्वे, कृपालुः
क्षुधालुः । पींङ्च् पियारुर्वृक्षः । कुणत् कुणारुः वनस्पतिः ॥ ८१५ ॥ **श्यः शीत च** (८१६)
श्यैङ् अस्मादारुः अस्य च शीत इत्यादेशः स्यात् । शीतारुः शीतासहः । लत्वे शीतालुः ॥ ८१६ ॥
**तुम्बेरुरुः** (८१७) 'तुबु अर्दने' अस्मादुरुः । तुम्बुरुः गन्धर्वः गन्धद्रव्यं च ॥ ८१७ ॥
**कन्देः कुन्द् च** (८१८) कदु अस्मादुरुः अयं चास्यादेशः स्यात् । कुन्दुरुः सल्लकीनिर्यासः
॥ ८१८ ॥ **चमेरूरुः** (८१९) चमूरुः चित्रकः ॥ ८१९ ॥ **शीङो लुः** (८२०) शेलुः
श्लेष्मातकः ॥ ८२० ॥ **पीङः कित्** (८२१) लुः । पीलुः हस्ती वृक्षश्च ॥ ८२१ ॥ **लस्जी-
र्ष्यिशलेरालुः** (८२२) लज्जालुः लज्जाशीलः । ईर्ष्यालुः ईर्ष्याशीलः । शलालुः वृक्षावयवः
॥ ८२२ ॥ **आपोप् च** (८२३) आप्लृंट्, अस्मादालुः अयं चास्यादेशः स्यात् । अपालुः वायुः
॥ ८२३ ॥ **गूहलुगुग्गुलुकमण्डलवः** (८२४) आलुप्रत्ययान्ता निपात्यन्ते । गूहतेर्ह्रस्वश्च
प्रत्ययादेः । गूहलुः ऋषिः । गुङ् अस्मादिर्गुग् लोपश्च प्रत्ययादेः । गुग्गुलुः वृक्षविशेषः । कमूङ्
अण्ड् अन्तः ह्रस्वश्च प्रत्ययादेः । कमण्डलुः अमत्रम् ॥ ८२४ ॥ **प्रः शुः** (८२५) पृश् पर्शुः वङ्क्रिसंज्ञं
वक्रास्थि ॥ ८२५ ॥ **मस्जीष्यशिभ्यः सुक्** (८२६) कित् सुः । 'मस्जेः सः' ( ४।४।११० )
इति नोऽन्तः । मङ्क्षुः मुनिः । 'इषश् आभीक्ष्ण्ये' । इक्षुः गुडादिप्रकृतिः । अशौटि अक्षुः समुद्रः
वप्रश्च ॥ ८२६ ॥ **तॄपलिमलेरक्षुः** (८२७) तरक्षुः श्वापदविशेषः । 'पल गतौ' । 'मलि धारणे' ।
पलक्षुः मलक्षुश्च वृक्षः ॥ ८२७ ॥ **उलेः कित्** (८२८) अक्षुः । 'उल दाहे' उलक्षुः तृणजातिः
॥ ८२८ ॥ इत्युकारान्ता एकादशेन सूत्रशतेन । **कृषिचमितनिधन्यन्दिसर्जिखर्जिभर्जिलस्जी-
र्ष्यिभ्यः ऊः** (८२९) कर्षूः कुल्या ( अङ्गारः परिखा गर्तश्च ) । चमूः सेना । तनूः शरीरम् । 'धन शब्दे',
'धन धान्ये' सौत्रो वा । धनूः धान्यराशिः ज्या वरारोहा च स्त्री । अदु, अन्दूः पादकटकः । 'सर्ज अर्जने'
सर्जूः अर्थः क्षारः वनस्पतिर्वणिक् च । 'खर्ज मार्जने च' । खर्जूः कण्डूः विद्युच । भृजैङ् भ्रर्जीत्
वा । भर्जूः यवविकारः । लज्जूः लज्जालुः । ईर्ष्यूः ईर्ष्यालुः ॥ ८२९ ॥ **फलेः फेल् च** (८३०) फेलूः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

होमविशेषः ॥ ८३० ॥ **कषेण्डछौ च षः** (८३१) अस्मात् ऊः षकारस्य च ण्ड छ इत्यादेशौ स्याताम् । कण्डूः, कच्छूः, पामा ॥ ८३१ ॥ **वहेर्ध च** (८३२) अस्मात् ऊः धकारश्चान्तादेशः स्यात् । वधूः । पतिमुपसंपन्ना कन्या जाया च ॥ ८३२ ॥ **मृजेर्गुणश्च** (८३३) अस्मादूः अस्य च गुणः स्यात् । मर्जूः शुद्धिः नद्यास्तीरं रजकः शिला च । गुणे सिद्धे गुणवचनमकारस्य वृद्धि-बाधनार्थम् ॥ ८३३ ॥ **अजेर्जोन्तश्च** (८३४) अज्जूः जननी ॥ ८३४ ॥ **कसिपद्यर्त्यादिभ्यो णित्** (८३५) ऊः । कासूः शक्तिर्नामायुधं वाग्विकलः बुद्धिः व्याधिः विकला च वाक् । पादूः पादुका । आरूः वृक्षविशेषः । कच्छूः गतिः पिङ्गलश्च । आदिग्रहणात् कचतेः काचूः । शलतेः शालूरित्यादयः ॥ ८३५ ॥ **अणेर्डोन्तश्च** (८३६) आण्डूः जलभृङ्गारः ॥ ८३६ ॥ **अडो ल च वा** (८३७) 'अड उद्यमे' अस्माण्णिदूः लश्चान्तादेशः । आलूः भृङ्गारः करकश्च । आडूः दर्वी टिट्टिभः वनस्पतिः जलाधारभूमिः पादभेदनं च ॥ ८३७ ॥ **नञो लम्बेर्नलुक् च** (८३८) नञ्पूर्वात् 'लबुङ् अवस्रंसने' । अस्माण्णिदूः नकारस्य च लुक् स्यात् । अलाबूः तुम्बी ॥ ८३८ ॥ **कफादीरेल् च** (८३९) कफपूर्वादीरीक् अस्मादूर्लश्चान्तादेशः स्यात् । कफेलूः श्लेष्मातकः यवलाजा मधुपर्कं छादिषेयं च तृणम् ॥ ८३९ ॥ **ऋतो रत् च** (८४०) ऋत, अस्मात् ऊः रत् इति चास्यादेशः स्यात् । रतूः नदीविशेषः सत्यवाक् दूतः कृमिविशेषश्च ॥ ८४० ॥ **दृभिचपेः स्वरान्नोन्तश्च** (८४१) 'दृभैत् ग्रन्थे' दृन्भूः सर्पजातिः वनस्पतिः वज्रः ग्रन्थकारः (दर्भणं च) । बाहुलकात् 'स्रां धुड् वर्गेऽन्त्योऽपदान्ते' (१।३।३९) इति न स्यात् । 'चप सान्त्वने' चम्पूः कथाविशेषः ॥ ८४१ ॥ **धृषेर्दिधिषदिधीषौ च** (८४२) अस्मादूः इमौ चान्तादेशौ स्याताम् । ञिधृषाद् दिधिषूः पूर्वपरिणीता पुंश्चली च । दिधीषूः ऊढायाः कनिष्ठायाः अनूढा ज्येष्ठा पुनर्भूः आहुतिश्च । **अभिधानचिन्तामणौ** तु दिधिषूस्तु पुनर्भूर्द्विरूढास्या दिधीषूः पतिरित्युक्तम् ॥ ८४२ ॥ **भ्रमिगमितनिभ्यो डित्** (८४३) ऊः । भ्रमूच् भ्रूः अक्ष्णोरुपरि रोमराजिः । गम्लृं अग्रे गच्छति अग्रेगूः पुरस्सरः । तनूयी, कुत्सितं तन्यते कुतूः चर्ममयमावपनम् ॥ ८४३ ॥ **नृतिशृधिरुषिकुहिभ्यः कित्** (८४४) ऊः । नृतैच्, नृतूः नर्त्तकः कृमिजातिः प्लवः प्रकृतिश्च । शृधूङ्, शृधूः शर्द्धनः कृमिजातिः अपानं बलिश्च दानवः । रुषच्, रुषूः भर्त्सकः । कुहणि कुहूः अमावास्या ॥ ८४४ ॥ **तृखडिभ्यां डुः** (८४५) तर्डूः द्रोणी प्लवः । 'खडण् भेदे' खड्डूः बालानामुपकरणं स्त्रीणां पादाङ्गुष्ठाभरणं च ॥ ८४५ ॥ **तृदृभ्यां दूः** (८४६) तर्दूः दर्वी । दृश्, दर्दूः कुष्ठभेदः ॥ ८४६ ॥ **कमिजनिभ्यां बूः** (८४७) कम्बूः भूषणं आदर्शः त्सरुः कुविन्दश्च । जम्बूः वृक्षजातिः ॥ ८४७ ॥ **शकेरन्धूः** (८४८) शकन्धूः वनस्पतिः देवताविशेषश्च ॥ ८४८ ॥ **कृगः कादिः** (८४९) अन्धूः । कर्कन्धूः बदरी व्रणः (यवलाजा मधुपर्कं विष्टम्भश्च) ॥ ८४९ ॥ **योरागूः** (८५०) युक्, यवागूः द्रवौदनः ॥ ८५० ॥ **काच्छीङो डेरूः** (८५१) कपूर्वात् शीङ् डित् एरूः स्यात् । कशेरूः कन्दविशेषः वीरुच ॥ ८५१ ॥ इत्यूकारान्तास्त्रयोविंशत्या सूत्रैः । **दिव ऋः** (८५२) दिवूच्, देवा देवरः पितृव्य स्त्री अग्निश्च ॥ ८५२ ॥ **सोरसेः** (८५३) सुपूर्वादसूच् अस्मात् ऋः । स्वसा भगिनी ॥ ८५३ ॥ **नियो डित्** (८५४) ऋः । णींग् ना पुरुषः ॥ ८५४ ॥ **सव्यात् स्थः** (८५५) सव्यपूर्वात् ष्ठां, अस्माड्डित् । सव्ये तिष्ठतीति सव्येष्ठा सारथिः भीरुष्ठानादित्वात् (२।३।३३) षत्वं सप्तम्यलुक् च ॥ ८५५ ॥ **यतिनन्दिभ्यां दीर्घश्च** (८५६) यतैङ् नञ्पूर्वात नन्देश्च ऋः दीर्घश्चास्य स्यात् । याता पितृभ्रातृभगिनी देवरभार्या

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ज्येष्ठभार्या च ॥ ननान्दा पत्युः स्वसा । नखादित्वान्नणोऽत्र स्यात् ॥ ८५६ ॥ **शासिशंसिनीरुक्षुहृभृधृमन्यादिभ्यस्तृः** (८५७) शासूक् शास्ता बुद्धः । शंसू शंस्ता स्तोता । णींग् नेता सारथिः । रुक्, रोता मेघः । टुक्षुक् क्षोता मुशलम् । हृंग् हर्ता चौरः । डुभृंगक् भर्ता पतिः । 'धृंग् अविध्वंसने' धारणे इति धातुपाठे इत्युणादिविवरणे । धर्ता धर्मः । मनिंच्, मन्ता विद्वान् प्रजापतिश्च । आदिग्रहणात् उपद्रष्टा ऋत्विक् । विशस्ता घातक इत्यादयोऽपि ॥ ८५७ ॥ **पातेरिच्च** (८५८) पांक् अस्मात्तृः आकारस्य च इत्त्वं स्यात् । पिता जनकः ॥ ८५८ ॥ **मानिभ्राजेर्लुक् च** (८५९) 'मानि पूजायाम्' माता जननी । भ्राजि भ्राता सोदर्यः ॥ ८५९ ॥ **जाया मिगः** (८६०) जाशब्दपूर्वात् डुमिंग्ट् अस्मात् तृः । जायां (प्रजायां) मिन्वन्ति तमिति जामाता दुहितृपतिः ॥ ८६० ॥ **आपोऽप् च** (८६१) आप्लृंट्, अस्मात्तृः अयं चास्यादेशः स्यात् । अप्ता यज्ञः अग्निश्च ॥ ८६१ ॥ **नमेः प् च** (८६२) णमं, अस्मात्तृः पकारश्चान्तादेशः स्यात् । नप्ता दुहितुः पुत्रस्य वा पुत्रः ॥ ८६२ ॥ **हुपूङ्गोन्नीप्रस्तुप्रतिहृप्रतिप्रस्थाभ्य ऋत्विजि** (८६३) एभ्य ऋत्विजि अभिधेये तृः । स्यात् । हुंक्, होता । पूग्श्, पोता । गैं णींग्, उत्पूर्वौ । उद्गाता । उन्नेता । ष्टुंग्क् प्रपूर्वः । प्रस्तोता । हृंग्, प्रतिपूर्वः प्रतिहर्ता । ष्ठां, प्रतिप्रपूर्वः । प्रतिप्रस्थाता । एते ऋत्विजः ॥ ८६३ ॥ **नियः षादिः** (८६४) तृः ऋत्विज्यभिधेये । नेष्टा ऋत्विक् ॥ ८६४ ॥ **त्वष्टक्षत्तृदुहित्रादयः** (८६५) तृप्रत्ययान्ता निपात्यन्ते । त्विषेरितोऽच्च । त्वष्टा देववर्धकिः प्रजापतिः आदित्यश्च । 'क्षद खदने' सौत्रः । क्षत्ता नियुक्तः अविनीतः दौवारिकः मुशलः पारशवः रुद्रः सारथिश्च । दुहेरिच्च । दुहिता तनया । आदिग्रहणादन्येऽपि ॥ ८६५ ॥ इति ऋकारान्ताः चतुर्दशभिः सूत्रैः । **रातेर्डैः** (८६६) रांक् अस्मात् डित् ऐः स्यात् । राः द्रव्यम् । रायौ रायः ॥ ८६६ ॥ एकारान्ता अप्रसिद्धाः । ऐकारान्ता एकेन सूत्रेण । **द्युगमिभ्यां डोः** (८६७) डित् ओ । 'द्युंक् अभिगमे' द्यौः स्वर्गः अन्तरिक्षं च । गौः पृथिव्यादि ॥ ८६७ ॥ इत्योकारान्ता एकेन सूत्रेण । **ग्लानुदिभ्यां डौः** (८६८) डित् औः । ग्लैं, ग्लौः चन्द्रः व्याधितः शरीरग्लानिश्च । णुदंत्, नौः जलतरणम् ॥ ८६८ ॥ इत्यौकारान्त एकेन सूत्रेण ।

'इति स्वरान्ता निर्दिष्टाः क्रमेण प्रत्यया इमे । व्यञ्जनान्ता निरूप्यन्ते क्रमेणैवाथ कादितः' ॥ १ ॥

**तोः किक्** (८६९) तुंक्, अस्मात् किक् स्यात् । ककारः कित्त्वार्थः । इकार उच्चारणार्थः । तुक् अपत्यम् ॥ ८६९ ॥ **द्रागादयः** (८७०) किक्प्रत्ययान्ता निपात्यन्ते । द्रवतेरा च । द्राक् शीघ्रम् । एवं सरतेः स्राक् स एवार्थः । इयर्तेरर्वादेशश्च । अर्वाक् अचिरन्तनम् । आदिग्रहणादन्येपि ॥ ८७० ॥ **स्रोश्चिक्** (८७१) इकारककारौ प्राग्वत् । 'स्रुं गतौ' स्रुग् जुहूप्रभृत्यग्निहोत्रभाण्डम् । स्रुचौ । स्रुचः ॥ ८७१ ॥ **तनेर्ड्वच्** (८७२) डित् वच् । त्वक् शरीरादिवेष्टनम् ॥ ८७२ ॥ **पारेरज्** (८७३) 'पारण् कर्मसमाप्तौ' अस्मादज् स्यात् । पारक् प्राकारः शाकविशेषः सुवर्णं रत्नं च । पारजौ । पारजः ॥ ८७३ ॥ **ऋधिप्रथिभिषिभ्यः कित्** (८७४) अज् । ऋधूच्, ऋधक् समीपवाच्यव्ययम् । प्रथिष् । निर्देशादेव य्वृत् । पृथक् मानार्थेऽव्ययम् । भिषः सौत्रः, भिषज् वैद्यः । भिषजौ भिषजः ॥ ८७४ ॥ **भृपणिभ्यामिज् भुर्वणौ च** (८७५) आभ्यामिज् । इमौ चानयोरादेशौ यथासङ्ख्यं स्याताम् । भृंग् भुरिक् बाहुः शब्दः (भूमिः वायुः) एकाक्षराधिकपादं चर्कछन्दः । पणि, वणिक् वैदेहिकः ॥ ८७५ ॥ **वशेः कित्** (८७६) इज् । वशक्, उशिक् कान्तः । उशीरं अग्निः गौतमश्च ऋषिः ॥ ८७६ ॥ **लङ्घेरद् नलुक्**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

च (८७७) लघुङ्, लघट् वायुः । लघु च शकटम् ॥ ८७७ ॥ **सर्तेरट्** (८७८) सरड् वृक्षविशेषः मेघ उष्ट्रजातिश्च ॥ ८७८ ॥ **ईडेरविड् ह्रस्वश्च** (८७९) इडविड् विश्रवाः ॥ ८७९ ॥ **क्विपि म्लेच्छश्च वा** (८८०) म्लेच्छेरीडेश्च क्विपि ह्रस्वो वा स्यात् । अत एव वचनात् क्विप् । म्लेच्छ म्लिट् म्लेट् । उभयं म्लेच्छजातिः । इड् स्वामी मेदिनी । ईड् स एव ॥ ८८० ॥ **तृपेः कत्** (८८१) कित् अत् । तृपत् चन्द्रः समुद्रः तृणभूमिश्च ॥ ८८१ ॥ **संश्चद्वेहत्साक्षादादयः** (८८२) कत्प्रत्ययान्ता निपात्यन्ते । सम्पूर्वात् चिनोतेर्डित् समो मकारस्यानुस्वारपूर्वः शकारश्च । संश्चत् अध्वर्युः कुहकश्च । अनुस्वारं नेच्छन्त्येके । सश्चत् कुहकः । विपूर्वात् हन्तेर्डित् वेश्च गुणः । विहन्ति गर्भमिति वेहत् गर्भघातिनी अप्रजा स्त्री अनड्वांश्च । सम्पूर्वादीक्षतेः साक्षाभावश्च । साक्षात् समक्षमित्यर्थः । आदिग्रहणात् रेहत् छन्नम् । वियत् व्योम । पुरीतत् अन्त्रम् इत्यादयः ॥ ८८२ ॥ **पटच्छपदादयोऽनुकरणाः** (८८३) एते अनुकरणशब्दा निपात्यन्ते । 'पट गतौ' पटत् । 'छुपत् संस्पर्शे' उकारस्य अकारश्च । छपत् । 'खट काङ्क्षे' खटत् । दहेः प च । दपत् । डिपेः डिपत् । खनते रश्च खरत् । खादेः खादत् । सर्वे एते कस्यचिद्विशेषस्य श्रुतिप्रत्यासत्त्यानुकरणशब्दा एते । अनुकरणमपि हि साध्वेव कर्तव्यं न यत् किञ्चित् यथा अनक्षरमिति शिष्टाः स्मरन्ति ॥ ८८३ ॥

**द्रुहिबृहिमहिपृषिभ्यः कतृः** (८८४) कित् अतृः । द्रुहौच्, द्रुहन् ग्रीष्मः । बृहन् प्रवृद्धः । बृहती छन्दः । महान् पूजितः विस्तीर्णश्च । महान्तौ । महान्तः । महती । पृषू पृषत् तत्रं जलबिन्दुः चित्रवर्णजातिः दध्युपसिक्तमाज्यं च । पृषती मृगी । स्थूलपृषतीमालभेत । ऋकारो नोऽन्तार्थो ङ्यर्थश्च ॥ ८८४ ॥ **गमेर्डिद्द्वे च** (८८५) अस्माड्डित्कतृः द्वे चास्य रूपे स्याताम् । जगत् स्थावरजङ्गमो लोकः । जगती पृथ्वी ॥ ८८५ ॥ **भातेर्डवतुः** (८८६) भवान् भवन्तौ भवन्तः । उकारो दीर्घत्वादिकार्यार्थः ॥ ८८६ ॥ **हृसृरुहियुषितडिभ्य इत्** (८८७) हृंग् हरित् हरितवर्णः ककुभ् वायुः मृगजातिः अश्वः सूर्यश्च । सृं, सरित् नदी । रुहं रोहित् वीरुत्प्रकारो मत्स्यः सूर्यः अग्निः मृगः वर्णश्च । युषः सौत्रः । योषति गच्छति पुरुषं योषित् स्त्री । 'तडण् आघाते' तडित् विद्युत् ॥ ८८७ ॥ **उदकात् श्वेर्डित्** (८८८) इत् । उदकेन श्वयति उदश्वित् अर्द्धाम्बुमथितं दधि । 'नाम्न्युत्तरपदस्य वः' ( ३।२।१०७ ) इति उदकस्य उदभावः ॥ ८८८ ॥ **मृ उत्** (८८९) मृंत्, मरुत् वायुः देवः गिरिशिखरं च ॥ ८८९ ॥ **ग्रो मादिर्वा** (८९०) गृत् अस्मादुत् स च मादिर्वा गर्मुत् गरुडः आदित्यः मधुमक्षिका तृणं सुवर्णं च । गरुत् बर्हिः अजगरः मरकतमणिः तेजसां वर्त्तिश्च ॥ ८९० ॥ **शक ऋत्** (८९१) शकृंट्, शकृत् पुरीषम् ॥ ८९१ ॥ **यजेः क च** (८९२) अस्मादृत् कश्चान्तः । यकृत् अन्त्रम् ॥ ८९२ ॥ **पातेः कृथ्** (८९३) पांक् अस्मादृथ् कित् स्यात् । पृथो नाम क्षत्रियः ॥ ८९३ ॥ **शृदृभसेरद्** (८९४) रद् । शॄश् शरद् ऋतुः । 'दॄ भये' दरद् जनपदसमानः क्षत्रियः दरदो जनपदः । 'भस भर्त्सनदीप्त्योः' भसत् जघनमास्यमामाशयस्थानं च । भषेरपीच्छन्त्येके । भषत् ॥ ८९४ ॥ **तनित्यजियजिभ्यो डद्** (८९५) डित् अद् । तद् सः । त्यद् स्यः । यद् यः । अयमुद्देशवाची ॥ ८९५ ॥ **इणस्तद्** (८९६) इणक्, अस्मात्तद् प्रत्ययः स्यात् । एतद् एषः । समीपस्थवस्तुवाची शब्दः ॥ ८९६ ॥ **प्रः सद्** (८९७) पृश् अस्मात् सत्प्रत्ययो भवति । पर्षद् सभा ॥ ८९७ ॥ **द्रो ह्रस्वश्च** (८९८) दृश्, अस्मात् सद् ह्रस्वश्चास्य स्यात् । दृषत् पाषाणः । ८९८ ॥ **युष्यसिभ्यां क्मद्** (८९९) आभ्यां कित् मद् इति प्रत्ययः स्यात् । युषः सौत्रः सेवायाम् । युष्मद् यूयम् । असूच्, अस्मद् वयम् ॥ ८९९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**उक्षितक्ष्यक्षीशिराजिधन्विपञ्चिपूषिक्लिदिस्निहिनुमस्जेरन्** (९००) [ एभ्योऽन् ] उक्ष, उक्षा वृषः । तक्षौ, तक्षा वर्धकिः । अक्षौ, अक्षा दृष्टिनिपातः । ईशिक्, ईशा परमात्मा । राजृग्, राजा भूपः । धन्वि सौत्रो गतौ । 'धवु गतौ' वा । धन्वा मरुः धनुश्च । पचुङ् पञ्च सङ्ख्या । 'पूष वृद्धौ' पूषा आदित्यः । क्लिदौच्, क्लेदा मुखप्रसेकः चन्द्रः इन्द्रश्च । ष्णिहौच्, स्नेहा स्वाङ्गं सुहृद् वशा च गौः । णुक्, नव सङ्ख्या । टुमस्जोंत्, मज्जा षष्ठो धातुः ॥ ९०० ॥ **लूपूयुवृषिदंशिद्युदिविप्रतिदिविभ्यः कित्** (९०१) अन् । लूग्श्, लुवा दात्रं (स्थावरश्च) । पूग्श् पुवा वायुः । युक्, युवा तरुणः । वृषू, वृषा इन्द्रः वृषश्च । दंशं दश संख्या । द्युंक् द्युवा अभिगमनीयः राजा सूर्यश्च । दिवूच् दिवा दिनम् । प्रतिपूर्वात्; प्रतिदिवा अहः अपराह्णश्च ॥ ९०१ ॥ **श्वन्मातरिश्वन्मूर्धन्प्लीहन्नर्यमन्विश्वप्सन्परिज्वन्महन्नहन्मघवन्नथर्वन्निति** (९०२) एतेऽन्प्रत्ययान्ता निपात्यन्ते । श्वयतेर्लुक् च । श्वा कुकुरः । मातरि अन्तरिक्षे श्वयति मातरिश्वा वायुः । अत्र 'तत्पुरुषे कृति' (३।२।२०) इति सप्तम्या अलुप् इकारलोपश्च । मूर्छेर्धश्च मूर्च्छन्त्यस्मिन्नाहताः प्राणिनः इति मूर्धा शिरः । प्लिहो दीर्घश्च; प्लीहा जठरान्तरवयवः । अरिपूर्वादमेर्ण्यन्तात्; अरीनामयतीत्यर्यमा सूर्यः । विश्वपूर्वात् प्सातेः किच्च; विश्वप्सा कालः अग्निः वायुः इन्द्रश्च । परिपूर्वात् ज्वलतेर्डिच्च; परिज्वा सूर्यः चन्द्र अग्निः वायुश्च । महीयतेरीयलोपश्च; महा महत्त्वम् । अंहेर्नलोपश्च; अंहते अहः दिनम् । मङ्हेर्नलोपो वश्चान्ते; मङ्हते इति मघवा । नञ्पूर्वात् खर्वेः खस्थश्च; अथर्वः ऋषिः वेदश्च । इतिकरणादन्येऽपि ॥ ९०२ ॥ **षप्यशौभ्यां तन्** (९०३) षप, अशौटि । सप्त । अष्ट । उभे सङ्ख्ये ॥ ९०३ ॥ **स्नामदिपद्यर्त्तिपॄशकिभ्यो वन्** (९०४) । ष्णांक्, स्नावा सिरा नदी च । मदैच्, मद्वा दृप्तः पानं कान्तिः क्रीडा मुनिः शिरश्च । मद्वरी मदिरा । बाहुलकात् ङीः; । वनो रश्च । पदिंच्, पद्वा पत्तिः वत्सः रथः पादः गतिश्च । ऋंक्, अर्वा अश्वः अशनिः आसनं मुनिश्च । पॄश्, पर्व सन्धिः पूरणं पुण्यतिथिश्च । शक्लृंट्, शक्वा समर्थः । शक्वरी नदी विद्युत् छन्दोजातिः युवतिः सुरभिश्च । शक्वरशाक्वरौ इति तु धीवरचीवरेति (४४४) वरटि साधुः ॥ ९०४ ॥ **ग्रहेरा च** (९०५) अस्माद्वन् आकारश्चान्तादेशः । ग्रावा पाषाणः पर्वतश्च ॥ ९०५ ॥ **ऋशीकुशिरुहिजिक्षिहृसृधृदृभ्यः क्वनिप्** (९०६) ऋंक् । ऋत्वा ऋषिः । शीङ् शीवा अजगरः । क्रुशंच्, कुश्वा सृगालः । रुहं, रुह्वा वृक्षः । जिं, जित्वा धर्मः इन्द्रः योद्धा जित्वरी नदी वणिजश्च । जित्वरीं वाराणसीमाहुः । क्षिं, क्षित्वा वायुः विष्णुः मृत्युश्च । क्षित्वरी रात्रिः । हृंग्, हृत्वा रुद्रः मत्स्यः वायुश्च । सृं, सृत्वा कालः अग्निः वायुः सर्पः प्रजापतिः नीचजातिश्च । सृत्वरी वेश्यामाता । 'धृंङ्त् स्थाने' धृत्वा ( विष्णुः ) शैलः समुद्रः । ( धृत्वरी ) भूमिश्च । 'दृंङ्त् आदरे' दृत्वा दृप्तः । पकारस्तागमार्थः ॥ ९०६ ॥ **सृजेः स्रजसृकौ च** (९०७) सृजंत् अस्मात् क्वनिप् इमौ चास्यादेशौ स्याताम् । स्रज्वा मालाकारः रज्जुश्च । सृक्वणी आस्योपान्त्यौ ॥ ९०७ ॥ **ध्याप्योर्धीपी च** (९०८) ध्यैं प्यैंङ् आभ्यां क्वनिप् इमौ चानयोरादेशौ स्याताम् । धीवा मनीषी निषादः व्याधिः मत्स्यश्च । पीवा पीनः ॥ ९०८ ॥ **अतेर्ध च** (९०९) अत अस्मात् क्वनिप् धकारश्चान्तादेशः । अध्वा मार्गः ॥ ९०९ ॥ **प्रात्सदिरीरिणस्तोऽन्तश्च** (९१०) प्रपूर्वेभ्य एभ्यः क्वनिप् तोऽन्तश्चैषां स्यात् । षद्लृं, प्रसत्वा मूढः वायुश्च । प्रसत्वरी माता प्रतिपत्तिश्च । रींश्, प्रीत्वा वायुः । प्रीत्वरी स्त्रीविशेषः । ईरिक् प्रेत्वा सागरः वायुश्च । प्रेत्वरी नगरी । इण्क्, प्रेत्वरी नगरीत्याहुः ॥ ९१० ॥ **मन्** (९११) सर्वधातुभ्यो बहुलं मन् स्यात् । डुकृंग्, कर्म व्यापारः । वृग्ट्, वर्म कवचम् । वृतूङ्,



Jain Education International For Personal & Private Use Only www.jainelibrary.org

वर्त्म पन्थाः । चर, चर्म अजिनम् । 'भस भर्त्सनदीप्त्योः' सौत्रः । भसितं तदिति भस्म भूतिः । जनैचि, जन्म उत्पत्तिः । शृश्, शर्म सुखम् । वसवोऽस्य दुरितं शीर्यासुरिति वसुशर्मा । मृंत्, मर्म जीवप्रदेशप्रचयस्थानं यत्र जायमाना वेदना महती भवति । नृश्, नर्म परिहासः । श्लिषंच् श्लेष्मा कफः । 'ऊष रुजायाम्' ऊष्मा तापः । डुडुभृंग्क्, भर्म सुवर्णम् । यांक्, यामा रथः । वांक्, वामा करचरणह्रस्वः । पांक्, पामा कच्छूः । वृषू, वर्ष्म शरीरम् । षद्लृं, सद्म गृहम् । विशंत्, वेश्म गृहम् । हिंद्, हेम सुवर्णम् । छदण्, छद्म माया । दीङ्च्, दाम रज्जुः माता च । डुधांग्क्, धाम स्थानं तेजश्च । ष्ठां, स्थाम बलम् । षुंग्ट्, सोम यज्ञः पेयो रसः चन्द्रमाश्च । अशौटि, अश्मा पाषाणः । लक्षीण्, लक्ष्म चिह्नम् । अयि, अग्म संग्रामः । तक, तक्मा रतिः आतपः दीपश्च । हुंक्, होम हव्यं अग्निहोत्रशाला च । 'धृंग् धारणे' धर्म पुण्यम् । विपूर्वात् विधर्मा अहितः वायुः व्यभिचारश्च । ध्यैं, ध्याम ध्यानम् ॥ ९११ ॥ **कुष्युषिसृपिभ्यः कित्** (९१२) कुष्म शल्यम् । उषू, उष्मा दाहः । सृप्लृं, सृप्मा सर्पः शिशुः यतिश्च ॥ ९१२ ॥ **बृंहेर्नोऽच्च** (९१३) बृहु शब्दे चेत्यस्मान्मन् नकारस्य च अकारः स्यात् । ब्रह्म परं तेजः अध्ययनं मोक्षः । बृहत्त्वादात्मा । ब्रह्मा भगवान् ॥ ९१३ ॥ **व्येग एदोतौ च वा** (९१४) व्येंग् अस्मान्मन् एदोतौ चान्तादेशौ वा स्याताम् । व्येम वस्त्रम् । व्येमा संसारः कुविन्दभाण्डं च । व्योम नभः । पक्षे व्याम न्यग्रोधाख्यं प्रमाणम् ॥ ९१४ ॥ **स्यतेरी च वा** (९१५) षोंच्, अस्मान्मन् ईकारश्चान्तादेशो वा स्यात् । सीमा आघाटः । पक्षे साम प्रियवचनं वामदेव्यादि च ॥ ९१५ ॥ **सात्मन्नात्मन्वेमन्रोमन्क्षोमंल्ललामन्नामन्पाप्मन्पक्ष्मन्यक्ष्मन्निति** (९१६) एते मन्प्रत्ययान्ता निपात्यन्ते । स्यतेस्तोन्तश्च । सात्म अत्यन्ताभ्यस्तं प्रकृतिभूतं अन्तकर्म च । अतेर्दीर्घश्च । आत्मा जीवः । वेग आत्वाभावश्च । वेम तन्तुवायोपकरणम् । रुहेर्लुक् च । रोम । लत्वे लोम तनूरुहम् । क्षमेरोच । क्षोम शरीरान्तरवयवः । लातेर्द्वित्वं च । ललाम भूषणादि । नमेरा च । नाम संज्ञा कीर्त्तिश्च । पातयतेः प् च । पाप्मा पापं रक्षश्च । पक्षेः कः षोन्तो नलोपश्च । पक्ष्म अक्ष्यादिलोम । यस्यतेर्यक्षिणो वा । यक्ष्मा रोगः । इतिकरणात् तोक्मशुष्मादयः ॥ ९१६ ॥ **हृजनिभ्यामिमन्** (९१७) हरिमा पापविशेषः मृत्युः वायुश्च । जनिमा धर्मविशेषः संसारश्च ॥ ९१७ ॥ **सृहृभृधृस्तृसूभ्य ईमन्** (९१८) सृं, सरीमा कालः । हृंग्, हरीमा मातरिश्वा । डुडुभृंग्क्, भरीमा क्षमी राजा कुटुम्बं च । धृंग्, धरीमा धर्मः । स्तृग्श्, स्तरीमा प्रावारः । षूत्, सवीमा गर्भः प्रसूतिश्च ॥ ९१८ ॥ **गमेरिन्** (९१९) गमिष्यतीति गमी जिगमिषुः ॥ ९१९ ॥ **आङश्च णित्** (९२०) आङ्पूर्वात्केवलाच्च गमेर्णिदिन् स्यात् । आगमिष्यतीति आगामी प्रोषितादिः । गमिष्यतीति गामी प्रस्थितादिः ॥ ९२० ॥ **सुवः** (९२१) षूङौच्, अस्मात् णिदिन् स्यात् । आसावी आसविष्यमाणः (जनिष्यमान) इत्यर्थः ॥ ९२१ ॥ **भुवो वा** (९२२) अस्मादिन् स च णिद्वा । भविष्यतीति भावी कर्मविपाकादिः । भवी भविष्यन् ॥ ९२२ ॥ **प्रपतेर्याबुधिभ्याम्** (९२३) प्रपूर्वात्प्रतिपूर्वाच्च यांक् बुधिंच् आभ्यां णिदिन् । प्रयास्यतीति । प्रयायी । प्रतियायी प्रबोधी । प्रतिबोधी बालादिः ॥ ९२३ ॥ **प्रात्स्थः** (९२४) प्रपूर्वात् ष्ठां अस्मादिन् स्यात् । प्रस्थास्यते इति प्रस्थायी गन्तुमनाः ॥ ९२४ ॥ **परमात् कित्** (९२५) परमपूर्वात्तिष्ठतेः किदिन् स्यात् । परमे पदे तिष्ठतीति परमेष्ठी अर्हदादिः । भीरुष्ठानादित्वात्षत्वम् । सप्तम्या अलुप् च ॥ ९२५ ॥ **पथिमन्थिभ्याम्** (९२६) किदिन् । पथे, पन्थाः मार्गः । पन्थानौ । मन्थश्, मन्थाः (क्षुब्धो वायुर्वज्रश्च) मन्थानौ । मथिप्रियः ॥ ९२६ ॥ **होर्मिन्** (९२७) हुंक्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

होमी ऋत्विक् घृतं च ॥ ९२७ ॥ **अर्त्तेर्मुक्षिनक्** (९२८) ऋभुक्षा इन्द्रः । ऋभुक्षाणौ ॥ ९२८ ॥ **अदेस्त्रिन्** (९२९) अत्री ऋषिः ॥ ९२९ ॥ **पतेरत्रिन्** (९३०) पतत्री पक्षी ॥ ९३० ॥ **आपः क्विप् ह्रस्वश्च** (९३१) आप्लृंट् अस्मात् क्विप् स्यात् ह्रस्वश्च । (आपोऽम्भः) स्वभावादप्-शब्दो बहुवचनान्तः ॥ ९३१ ॥ **ककुप्त्रिष्टुबनुष्टुभः** (९३२) एते क्विप्प्रत्ययान्ता निपात्यन्ते । कपूर्वात् स्कुभ्नातेः सलोपश्च । ककुप् कं वायुः ब्रह्म च । स्कुभ्नन्ति इति ककुभः दिशः । ककुप् उष्णिक् छन्दः । अनुत्रिपूर्वात् स्तुभ्नातेः सः षश्च । अनुष्टुप् त्रिष्टुप् छन्दः । बहुवचनात् निजिविजिविषां क्विप् शित् (४।१।५७) । नेनिक् प्रजापतिः । वेविक् शुचिः । वेविट् चन्द्रमाः ॥ ९३२ ॥ **अवेर्मः** (९३३) 'अव रक्षणे' अस्मात् म् इति व्यञ्जनं प्रत्ययः स्यात् । अवतीति ओम् ब्रह्म प्रणवश्च ॥ ९३३ ॥ **सोरेतेरम्** (९३४) सूपूर्वादिणूक् अस्मादम् स्यात् । स्वयमात्मना ॥ ९३४ ॥ **नशिनूभ्यां नक्तनूनौ च** (९३५) नशौच्, णूत् आभ्याममप्रत्ययः इमौ चानयोरादेशौ यथासङ्ख्यं स्याताम् । नक्तं रात्रौ । नूनं वितर्कादिषु ॥ ९३५ ॥ **स्यतेर्णित्** (९३६) षोंच् । अस्माण्णिदम् । सायं दिनावसानम् ॥ ९३६ ॥ **गमिजमिक्षमिकमिशमिसमिभ्यो डित्** (९३७) अम् स्यात् । गम्लृं, गम् । जमू, जम् । क्षम् । एतानि भार्यानामानि । कमूङ्, कम् जलम् । शमूच्, शं सुखम् । 'षम वैक्लव्ये' सम् सङ्गतार्थे ॥ ९३७ ॥ **इणो दमक्** (९३८) इदम् प्रत्यक्षनिर्देशे ॥ ९३८ ॥ **कोर्डिम्** (९३९) 'कुंक् शब्दे' अस्माड्डित् इम् स्यात् । किम् अनेनाविज्ञातं वस्तु पर्यनुयुज्यते ॥ ९३९ ॥ **तूषेरीम् णोऽन्तश्च** (९४०) 'तूष तुष्टौ' । अस्मादीम्, अस्य च णोऽन्तः स्यात् । तूष्णीम् वाग्नियमे ॥ ९४० ॥ **ईङ्कमिशमिसमिभ्यो डित्** (९४१) ईम् । 'ईङ् ईम् । कमूङ्', कीम् । शमूच्, शीम् । षम, सीम् अभिनयव्याहरणानि एतानि । ईम् सीम् अव्यक्ते । कीं संशय-प्रश्नादिषु । शीम् अमर्षपादपूरणयोः ॥ ९४१ ॥ **क्रमिगमिक्षमेस्तुमाच्चातः** (९४२) एभ्यस्तुम् अकारस्य च आकारः स्यात् । क्रान्तुं गमनम् । गान्तुं पान्थः । क्षान्तुं भूमिः । तुमर्थश्च सर्वत्र ॥ ९४२ ॥ **गॄपॄदुर्विधुर्विभ्यः क्विप्** (९४३) गॄश्, गीः वाक् । पॄश्, पूः । 'दुर्वै धुर्वै हिंसायाम्', दूः शरीरान्तरवयवः । धूः शकटाङ्गं आदिश्च ॥ ९४३ ॥ **वाद्वारौ** (९४४) क्विबन्तौ निपात्येते । वृणातेर्वृद्धिश्च । वाः पानीयम् । कर्मणि दश्च धात्वादिः । वृण्वन्ति तामिति द्वाः द्वारम् । 'वृं वरणे' । इत्यस्य च णिगन्तस्य रूपम् ॥९४४॥ **प्रादतेरर्** (९४५) प्रपूर्वात् 'अत सातत्यगमने' अस्मादर् प्रत्ययः स्यात् । प्रातः प्रभातम् ॥ ९४५ ॥ **सोरर्तेर्लुक् च** (९४६) सुपूर्वात् ऋक् अस्मात् अर् धातोश्च लुक् स्यात् । स्वः स्वर्गः ॥ ९४६ ॥ **पूसन्यमिभ्यः पुनसनुतान्ताश्च** (९४७) पूग्श् षन अम । एभ्योऽर्, एषां चैते आदेशा यथासङ्ख्यं स्युः । पुनर्भूयः । सनुतः कालवाची । अन्तर्मध्यम् ॥ ९४७ ॥ **चतेरुर्** (९४८) चतेग् अस्मादुर् । चत्वारः सङ्ख्या ॥ ९४८ ॥ **दिवेर्डिव्** (९४९) डित् इव् । दिवूच, द्यौः स्वर्गः अन्तरिक्षम् । दिवौ दिवः ॥ ९४९ ॥ **विशिविपाशिभ्यां क्विप्** (९५०) विशंत् विशः प्रजाः । विट् वैश्यः पुरीषमपत्यं च ॥ 'पशण् बन्धने' विपूर्वः । विपाशयतिस्म विशिष्टमिति विपाट् नदी ॥ ९५० ॥ **सहेः षष् च** (९५१) अस्मात् क्विप् अयं चास्यादेशः स्यात् । षट् सङ्ख्या ॥ ९५१ ॥ **अस्** (९५२) सर्वधातुभ्यो बहुलमस् स्यात् । तपं, तपः सन्तापः माघमासः निर्जराफलं च । अनशनादि सुष्ठु तपतीति सुतपाः । एवं महातपाः । णमं, नमः पूजावाची । तमूच्, तमः अन्धकारः तृतीयगुणः अज्ञानं च । इणक्, अयः कलहो लोहं च (काललोहम्?) । वींक्, वयः पक्षी प्राणिनां कालकृतावस्था च ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'वर्चि दीप्तौ' वर्चः लावण्यमन्नमलः तेजश्च । सुष्ठु वर्चते इति सुवर्चाः । 'रक्ष पालने' रक्षः निशाकरः । ञिमिदाच्, मेदश्चतुर्थो धातुः । 'रह त्यागे', रहः प्रच्छन्नम् । षहि, सहः मार्गशीर्षमासः । णभच्, नभः आकाशं श्रावणमासश्च । चितै, चेतः चित्तम् । प्रचेता वरुणः । मनिंच्, मनः नोइन्द्रियम् । ब्रूग्क्, वचः वचनम् । रुदक्, रोदः नभः । रोदसी द्यावापृथिव्यौ । रुधृंपी, रोधः तीरम् । अनक्, अनः शकटं भोजनमन्नं च । सृं, सरः तटाकम् । तॄ, तरः वेगः बलं च । 'रंहु गतौ' रंहः जवः । तिज, तेजः दीप्तिः । 'मयि गतौ' मयः सुखम् । 'महण् पूजायाम्' । महः तेजः । 'अर्चिण् पूजायाम्' अर्चः पूजा । षद्लृं, सदः सभा भवनं च । अञ्जौप्, अञ्जः स्नेहः ॥ ९५२ ॥ **पाहाक्भ्यां पयसौ च** (९५३) पां ओहांक् आभ्यामस् इमौ चानयोरादेशौ यथासङ्ख्यं स्याताम् । पयः क्षीरं जलं च । ह्यः अनन्तरातीतदिने ॥ ९५३ ॥ **छदिवहिभ्यां छन्दोधौ च** (९५४) छदण् वहीं आभ्यामस् इमौ चानयोरादेशौ यथासङ्ख्यं स्याताम् । छन्दः वेदः इच्छा वाग्बन्धविशेषश्च । ऊधः धेनोः क्षीराधारः ॥ ९५४ ॥ **श्वेः शव च वा** (९५५) ट्वोश्वि; अस्मादस् अयं चास्यादेशो वा स्यात् । शवः रोगाभिधानं मृतदेहश्च । शवसी । शवांसि । श्वयः शोफः बलं च । श्वयसी । श्वयांसि ॥ ९५५ ॥ **विश्वाद्विदिभुजिभ्याम्** (९५६) विश्वपूर्वाभ्यामाभ्यामस् । विदक्, विश्ववेदाः अग्निः । भुजंप्, विश्वभोजाः अग्निः लोकपालश्च ॥ ९५६ ॥ **चायेर्नो ह्रस्वश्च** (९५७) चायृग्, अस्मादस् नोन्तो ह्रस्वश्चास्य वा स्यात् । चणः चाणश्चान्नम् । बाहुलकाण्णत्वं नेच्छन्त्येके ॥ ९५७ ॥ **अशेर्यश्चादिः** (९५८) अशश्, अशौटि वा अस्मादस् यश्च धात्वादिः स्यात् । यशः माहात्म्यं सत्त्वं श्रीः ज्ञानं प्रतापः कीर्त्तिश्च । एवं शोभनमश्नाति अश्नुते । सुयशाः । नागमेवाश्नाति नागयशाः । बृहदेनोश्नाति बृहद्यशाः । श्रुत एनोश्नाऽति । श्रुतयशाः । एवमन्येऽपि ज्ञेयाः ॥ ९५८ ॥ **उषेर्ज च** (९५९) 'उषू दाहे' अस्मादस् जश्चान्तदेशः स्यात् । ओजः प्रभावः दीप्तिः शुक्रं च ॥ ९५९ ॥ **स्कन्देर्ध च** (९६०) स्कन्दूं, अस्मादस् । धश्चास्यान्तादेशः स्यात् । स्कन्धः स्वाङ्गम् ॥ ९६० ॥ **अवेर्वा** (९६१) अव अस्मादस् धश्चास्यान्तादेशो वा स्यात् । अधः अधरम् । अवः रक्षा ॥ ९६१ ॥ **अमेर्भंहौ चान्तौ** (९६२) अम । अम्भः जलम् । अंहः पापं अपराधः दिवश्च ॥ ९६२ ॥ **अदेरन्ध् च** (९६३) अस्मादस् अन्धादेशश्चास्य वा स्यात् । अद्यते तदिति अन्धः अन्नम् । अद्यते दृशा मनसा च तदिति अदः; अनेन प्रत्यक्षं विप्रकृष्टमपदिश्यते ॥ ९६३ ॥ **आपोऽपाप्नाप्सराब्जाश्च** (९६४) आप्लृंट्, अस्मादस् । एते चास्यादेशः स्यात् । अपः सत्कर्म । अप्नः तदेव । अप्सरसः देवगणिका । अब्जः जलजं अजयं च रूपम् ॥ ९६४ ॥ **उच्यश्चेः क च** (९६५) उचच् अंचू आभ्यामस् कश्चानयोरन्तादेशः स्यात् । ओकः आलयः जलौकसश्च । अङ्कः स्वाङ्गं रणश्च ॥ ९६५ ॥ **अङ्ग्यजियुजिभृजेर्ग च** (९६६) एभ्योऽस् गश्चान्तादेशः स्यात् । अङ्गौप् अङ्गः क्षत्रियनाम गिरिः पक्षी (गिरिपक्षी ?) व्यक्तिश्च । अज, अगः क्षेमं गिरिश्च । युजृंपी योगः मनः युगं च । भृजैङ्, भर्गः रुद्रः हविः तेजश्च ॥ ९६६ ॥ **अर्तेरुराशौ च** (९६७) ऋक्, अस्मादस् अस्य च उर् इति, अर्श इति तालव्यशकारान्तश्चादेशः स्यात् । उरः वक्षः । अर्शांसि गुदादिकीलाः ॥ ९६७ ॥ **येन्धिभ्यां यादेधौ च** (९६८) यांक् ञिइन्धैपि आभ्यामस्, इमौ चानयोरादेशौ यथासङ्ख्यं स्याताम् । यादः जलदुष्टसत्त्वम् । एधः इन्धनम् ॥ ९६८ ॥ **चक्षेः शिद्वा** (९६९)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चक्षिक् अस्मादस्, स च शिद्वा । चक्षः ख्याः; उभे अपि रक्षोनामनी । आचक्षाः वाग्मी । आख्याः प्रख्याः बृहस्पतिः । संचक्षाः ऋत्विक् । नृचक्षाः राक्षसः ॥ ९६९ ॥ **वस्यगिभ्यां णित्** (९७०) वस् वसिक् । वासः वस्त्रम् । अग, आगः अपराधः ॥ ९७० ॥ **मिथिरञ्ज्युषितॄपॄशॄभूवशिभ्यः कित्** (९७१) अस् । 'मिथृग् मेधाहिंसयोः' । मिथः परस्परं रहसि चेत्यर्थः । रञ्जी, रजः गुणः अशुभं पांशुश्च । उषू, उषाः सन्ध्या अरुणः रात्रिश्च । तॄ, तिर इति अन्तर्द्धावनृजुत्वे च । पॄश्, पुरः पूजायां । तथा च **पठन्ति**; नमः पूजायाम् पुरश्चेति । शॄश्, शृणाति तद्वियुक्तमिति शिरः उत्तमाङ्गम् । भू, भुवः लोकः अन्तरिक्षं सूर्यश्च । वशक्, उशाः रात्रिः ॥ ९७१ ॥ **विधेर्वा** (९७२) 'विधत् विधाने' । अस्मादस् स च किद्वा । वेधाः विद्वान् सर्ववित् प्रजापतिश्च । विधाः स एव ॥ ९७२ ॥ **नुवो धथादिः** (९७३) णूत् अस्मात् धकारादिस्थकारादिश्च किदस् स्यात् । नूधा नूथाः सूतमागधौ । धादौ गुणमिच्छन्त्येके । नोधाः ऋषिः ऋत्विक् ॥ ९७३ ॥ **वयःपयःपुरोरेतोभ्यो धागः** (९७४) एभ्यः परात् धागः किदस् स्यात् । वयोधाः युवा चन्द्रः प्राणी च । पयोधाः मेघः । पुरोधाः पुरोहितः । रेतोधाः जनकः ॥ ९७४ ॥ **नञ ईहेरेहेधौ च** (९७५) नञ्पूर्वात् 'ईहि चेष्टायाम्' अस्मादस् अस्य चेमावादेशौ स्तः । अनेहाः कालः इन्द्रश्चन्द्रश्च । अनेधा अग्निर्वायुश्च ॥ ९७५ ॥ **विहायस्सुमनस्पुरुदंशस्पुरूरवोऽङ्गिरसः** (९७६) असन्ता निपात्यन्ते । विपूर्वाज्जहातेर्जिहीतेर्वा योऽन्तश्च । विजहातीति विहायः आकाशम् । विजिहीते इति विहायाः पक्षी । सुपूर्वान्मानेर्ह्रस्वश्च । सुष्ठु मानयति मन्यते वा सुमनसः पुष्पाणि देवाश्च । पुरुं दशतीति पुरुदंशा इन्द्रः । पुरुपूर्वाद्रौतेर्दीर्घश्च पुरु रौतीति पुरूरवा राजाऽयमुर्वशीं चकमे । अङ्गेरिरोऽन्तश्च । अङ्गिरा ऋषिः ॥ ९७६ ॥ **पातेर्जस्थसौ** (९७७) पांक् अस्मादेतौ स्याताम् । पाजः बलम् । पाथः उदकं अन्नं च ॥ ९७७ ॥ **स्रुरीभ्यां तस्** (९७८) स्रुं स्रोतः निर्झरणम् । सुष्ठु स्रवतीति सुस्रोताः नदी । रींश् रेतः शुक्रम् ॥ ९७८ ॥ **अर्तीणूभ्यां नस्** (९७९) ऋंक् अर्णः जलम् । इणूक् एनः पापमपराधश्च ॥ ९७९ ॥ **रिचेः क च** (९८०) रिचृंपी अस्मान्नस् कश्चास्यान्तादेशः स्यात् । रिक्णः धनं पापं च ॥ ९८० ॥ **रीवृभ्यां पस्** (९८१) । रींश्, रेपः पापम् । वृगूट्, वर्पः रूपम् ॥ ९८१ ॥ **शीङः फश्च** (९८२) अस्मात् पस् फस् च प्रत्ययौ स्याताम् । शेपः शेफश्च मेढ्रम् ॥ ९८२ ॥ **पचिवचिभ्यां सस्** (९८३) पक्षः चक्रम् । वक्षः उरः शरीरं च ॥ ९८३ ॥ **इणस्तशस्** (९८४) एतशः (शाः ?) सोमः अध्वर्युः वायुः अग्निः अर्कः इन्द्रश्च ॥ ९८४ ॥ **वष्टेः कनस्** (९८५) कित् अनस् । उशना शुक्रः ॥ ९८५ ॥ **चन्दो रमस्** (९८६) चदु, चन्द्रमाः ॥ ९८६ ॥ **दमेरुनसूनसौ** (९८७) अस्मादेतौ स्याताम् । दमूच् दमुनाः अग्निः । दमूनाः सूर्यः देव उपशान्तश्च ॥ ९८७ ॥ **इण आस्** (९८८) आस् । अयाः कालः आदित्यश्च ॥ ९८८ ॥ **रुच्यर्चिशुचिहुसृपिछादिछृदिभ्य इस्** (९८९) रोचिः किरणः । वसुपूर्वात् वसुरोचिः वासवः किरणः ऋतुश्च । अर्च, अर्चिः ज्वाला । शुच, शोचिः रश्मिः शोकः पिङ्गलभावः विविक्तं च । हुंक्, हविः पुरोडाशादि । सृप्लं, सर्पिः घृतम् । छदण्, छदिः 'छदेरिस्मन्त्रट्कौ' (४।२।३३) इति ह्रस्वः बाहुलकाद्दीर्घत्वे छादिः । अभयमपि गृहाच्छादनम् । 'ऊछृदृंपी दीप्तिदेवनयोः' । छर्दिर्वमनम् ॥ ९८९ ॥ **बंहिबृंहेर्नलुक् च** (९९०) 'बहुङ् वृद्धौ' । बहिः अनभ्यन्तरे । 'बृहु शब्दे च' बर्हिः शिखी दर्भश्च ॥ ९९० ॥ **द्युतेरादेश्च जः** (९९१) । द्युति, ज्योतिः तेजः सूर्यः अग्निः तारका च ॥ ९९१ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सहेर्ध च** (९९२) षहिं, अस्मादिस् धश्चास्यान्तादेशः स्यात् । सधिः सत्त्वं भूमिः संयोगः सहिष्णुः अग्निः अनड्वांश्च ॥ ९९२ ॥ **पस्योऽन्तश्च** (९९३) पां अस्मादिस् थश्चास्यान्तादेशः स्यात् । पाथिः पानं नदी आदित्यः ज्योतिः स्वर्गलोकश्च ॥ ९९३ ॥ **नियो डित्** (९९४) इस् । निः उपसर्गोऽयं पृथग्भावे; निश्चिनोति, निर्णयः ॥ ९९४ ॥ **अवेर्णित्** (९९५) इस् । अव, आविः प्राकाश्ये; आविरभूत्, आविष्करोति ॥ ९९५ ॥ **तुभूस्तुभ्यः कित्** (९९६) इस् । तुंक्, तुविः समुद्रः सरितः विवस्वान् प्रभुसंयोगश्च । भू, भुविः क्रतुः समुद्रः सरित् विवस्वांश्च । ष्टुंग्क्, स्तुविः स्तोता यज्ञश्च ॥ ९९६ ॥ **रुद्यर्तिजनितनिधनिमनिग्रन्थिपृतपित्रपिवपियजिप्रादिवेपिभ्य उस्** (९९७) रुदृक्, रोदुः अश्रुनिपातः । अरुः व्रणः । जनुः अपत्यं पिता माता जन्म प्राणी च । तनुः शरीरम् । 'धन धान्ये' सौत्रः, धनुः चापम् । मनिंच्, मनुः प्रजापतिः । 'ग्रन्थश् सन्दर्भे' ग्रन्थुः ग्रन्थः । पृश्, परुः पर्व समुद्रः धर्मश्च । तपं, तपुः त्रपुः शत्रुः भास्करः अग्निः कृच्छ्रादि च । त्रपौषि, त्रपुः त्रपु । डुवपीं, वपुः शरीरं लावण्यं तेजश्च । यजीं, यजुः अच्छन्दाः श्रुतिः यज्ञोत्सवश्च । अदंक् प्रपूर्वः । प्रादुः प्राकाश्ये उत्पत्तौ च । प्रादुर्बभूव । प्रादुरासीत् । टुवेपृङ्, वेपुः वेपथुः ॥ ९९७ ॥ **इणो णित्** (९९८) उस् । आयुर्जीवितम् । जटापूर्वादपि जटायुः अरुणात्मजः । 'तं नीलजीमूतनिकाशवर्णं स पाण्डुरोरस्कमुदारधैर्यम् । ददर्श लङ्काधिपतिः पृथिव्यां जटायुषं शान्तमिवाग्निदाहम्' ॥ १ ॥ ॥ ९९८ ॥ **दूषेर्डित्** (९९९) उस् । दुः निन्दायाम् । दुष्पुरुषः ॥ ९९९ ॥ **मुहिमिथ्यादेः कित्** (१०००) उस् । मुहौच्, मुहुः कालावृत्तिः । मिथग्, मिथुः सङ्गमः । आदिग्रहणादन्येभ्योऽपि भवन्ति ॥ १००० ॥ **चक्षेः शिद्वा** (१००१) चक्षिक् अस्मादुस् स च शिद्वा । चक्षुः परिचक्षुः अवचक्षुः । अवख्युः । बाहुलकाद्विर्वचने संचचक्षुः विचख्युः ॥ १००१ ॥ **पातेर्डुम्सुः** (१००२) पांक् अस्माद् डित् उम्सुः स्यात् । पुमान् पुमांसौ । उकार उदित्कार्यार्थः ॥ १००२ ॥ **न्युद्भ्यामञ्चेः ककाकैसष्टावच्च** (१००३) न्युद्भ्यां परादञ्चेः कितः अ आ ऐस् इत्येते प्रत्ययाः स्युः । ते च टावत् । टायामिव तेषु कार्यं स्यादित्यर्थः । तेन 'अच्च प्राग् दीर्घश्च' (२।१।१०४) इति स्यात् । नीचम् । उच्चम् । नीचा । उच्चा । नीचैः । उच्चैः । प्रसिद्धार्था एते । लाघवार्थं सन्ताधिकारेऽप्यकार-आकारप्रत्ययविधानम् । ॥ १००३ ॥ **शमो नियो डैस् मलुक् च** (१००४) शम्पूर्वात् णींग् अस्मात् डित् ऐस् शमो मस्य च लुक् स्यात् । शनैः मन्दम् ॥ १००४ ॥ **यमिदमिभ्यां डोस्** (१००५) आभ्यां डित् ओस् । यमूं, योः विषयसुखम् । दमूच् दोः बाहुः ॥ १००५ ॥ **अनसो वहेः क्विप् सश्च डः** (१००६) अनस्शब्दपूर्वात् वहीं अस्मात् क्विप्, सस्य च डः स्यात् । अनडुह्शब्दः । अनो वहति अनड्वान् वृषभः ॥ १००६ ॥ इति व्यञ्जनान्ताः अष्टात्रिंशेन सूत्रशतेन ।

एवं पञ्चोत्तरं सूत्रसहस्रं परिभावितम् । उणादिषु प्रत्ययेषु कृपावाजीतिसूत्रतः ॥ १ ॥
किञ्चित् संक्षिप्य निर्दिष्टाः प्रत्यया इत्युणादयः । हैमोणादिविवरणमनुसृत्य यथाश्रुतम् ॥ २ ॥

अथ भविष्यत्काले भावे ये विहिताः प्रत्ययास्तान् दर्शयति ।

## क्रियायां क्रियार्थायां तुम्णकच्भविष्यन्ती ॥ १४५ ॥ [ सि० ५।३।१३ ]

यस्माद्धातोस्तुमादिविधिस्तद्वाच्या क्रियाऽर्थः प्रयोजनं यस्यास्तस्यां क्रियायामुपपदे वर्त्तमानाद्
२४ दर्थाद्धातोस्तुमादयः स्युः । कर्तुम् कारकः करिष्यामीति याति ॥ १४५ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'क्रिया०'** वेति निवृत्तम् । तुमादय इति तुम् णकच् भविष्यन्तीप्रत्यया भवन्ति । कर्तुं व्रजति । कारको व्रजति । करिष्यामीति व्रजति । भोक्तुं व्रजति । भोजको व्रजति । भोक्ष्ये इति व्रजति । क्रियायामिति किम् ? भिक्षिष्ये इत्यस्य जटाः । क्रियार्थायामिति किम् ? धावतस्ते पतिष्यति वासः । अत्रास्ति धावनक्रियोपपदं न त्वसौ पतनार्थमुपात्तेति न भवति । अत्र हि धावनक्रिया देवदत्तकर्तृका पतनक्रिया च वासःकर्तृकेति भिन्नकर्तृकत्वेऽपि सूत्रप्रवृत्तिरिति प्राप्नोति । णकतृचा-५ विति सामान्येन सिद्धे क्रियार्थोपपदभाविन्या भविष्यन्त्या बाधो मा भूदिति णकच्विधानम् । असरूपविधिना णकोपि भविष्यतीति चेत् ? एवं तर्हि असरूपविधिना तृजादयो मा भूवन्निति पुनर्णक् विधानम् । तेन ओदनस्य पाचको व्रजति पक्ता व्रजति पचो व्रजति विक्षिपो व्रजतीत्यादि न भवति ।

अत्रादिशब्दानुवृत्तेः **'कर्मणोऽण्'** (५।३।१४) क्रियायां क्रियार्थायामुपपदे कर्मणः पराद्वर्त्स्यत्यर्थे वर्त्तमानाद्धातोरण् स्यात् । कुम्भकारो व्रजति । काण्डलावो व्रजति । कर्मणोऽण् इति सामान्येन विहितोऽण् णकचानेन बाध्येत, असरूपविधिश्च नास्तीति पुनर्विधीयते । सोऽपवादत्वाण्णकचं बाधते, परत्वात्सामान्यस्याणो बाधकान् टगादीनपि; तेन वक्रं गास्यतीति वक्रगादयः । एवं सुरापायः, गोदायो व्रजति । बहुलाधिकाराण्णकच्भविष्यन्त्यावपि भवतः । कर्ट कारको ओदनं भोजको काण्डानि लविष्यामि कम्बलं दास्यासीति व्रजति । **'भाववचनाः'** (५।३।१५) भाववचनाः त्त्यादयस्ते क्रियायां क्रियायार्थायामुपपदे वर्त्स्यत्यर्थे वर्त्तमानाद्धातोर्भवन्ति । क्रियार्थोपपदेन तुमा मा बाधिषतेति वचनम् । असरूपविध्यभावस्य ज्ञापितत्वात् । पाकाय पक्तये पचनाय व्रजति । वचनग्रहणाद्यो यथा विहितः स तथा भवति । यदि भावे इति क्रियेत तदा भावमात्रे एव ये विहितास्ते एव लभ्येरन्न सर्वे । वचनग्रहणेन तु येन केनापि प्रकारेणापि भावं ब्रुवाणा गृह्यन्ते एव । 'तुमोऽर्थे भाववचनात्' (२।२।६१) इति चतुर्थी ॥ १४५ ॥ अत्रोपयोगिसूत्रम्

## तुमश्च मनःकामे ॥ १४६ ॥ [ सि० ३।२।१४० ]

**तुम्समोर्मनसि कामे च परे म्लुप् स्यात् । भोक्तुमना गन्तुकामः ( पृ० २८९ ) ॥ १४६ ॥**

'तुम्०' स्पष्टम् ॥ १४६ ॥ तुम्प्रत्ययस्यार्थमाह ।

## क्त्वातुमम् भावे ॥ १४७ ॥ [ सि० ५।१।१३ ]

**एते धात्वर्थमात्रे स्युः ॥ १४७ ॥**

'क्त्वा०' स्पष्टम् ॥ १४७ ॥

अथ तुम्प्रत्ययप्रस्तावनादुपपदयोगे विहितं तुम्प्रत्ययमाह

## शकधृषज्ञारभलभसहार्हग्लाघटास्तिसमर्थार्थे च तुम् ॥ १४८ ॥ [ सि० ५।४।९० ]

**शक्याद्यर्थेषु इच्छार्थेषु च धातुषु समर्थार्थेषु च नामसूपपदेषु कर्मभूताद्धातोस्तुम् स्यात् । शक्नोति पारयति वा भोक्तुम् । इच्छति पठितुम् । समर्थो ग्रहीतुम् ॥ १४८ ॥**

**'शक०'** शक्नोति पारयति वा भोक्तुम् इति, धृष्णोत्यध्यवस्यति वा भोक्तुम्, जानाति वेत्ति वा भोक्तुं आरभते प्रक्रमते वा भोक्तुम्, लभते विन्दते वा भोक्तुम्, सहते क्षमते वा भोक्तुम्, अर्हति

प्राप्नोति वा भोक्तुम्, ग्लायति म्लायति वा भोक्तुम्, घटते युज्यते वा भोक्तुम्, अस्ति विद्यते वा भोक्तुम्, समर्थोऽलं प्रभवति ईष्टे वा भोक्तुम्। समर्थार्थप्रतीतावपि, द्रष्टुं चक्षुः, योद्धुं धनुः। शक्त्या भुज्यते सामर्थ्येन भुज्यते इत्यादौ त्वनभिधानान्न भवति। इच्छार्थेषु इच्छति भोक्तुं वाञ्छति भोक्तुम्। वष्टि अभिलषतीत्यादि समर्थार्थत्वादेव सिद्धे शकग्रहणमसमर्थार्थम्। कर्मण इति च सामर्थ्याच्छकादिष्वर्हपर्यन्तेषु इच्छार्थेषु चोपपदेषु सत्सु सम्बन्धनीयम्। **अन्ये** तु शकादिषु घटान्तेषु स्वरूपोपपदेष्वेवेच्छन्ति, न तदर्थेषु। अतादर्थ्यार्थमक्रियोपपदार्थं चेदं प्रस्तूयते ॥ १४८ ॥

अथार्थविशेषे च उपपदविशेषे च तुम्प्रत्ययमाह

## कालवेलासमये तुम्वावसरे ॥ १४९ ॥ [ सि० ५।४।३३ ]

**एषु त्रिषूपपदेष्ववसरे गम्ये धातोस्तुम्वा स्यात्। कालो भोक्तुम्। वेला भोक्तुम्। समयो भोक्तुम्। पक्षे कालो भोजनस्य ॥ १४९ ॥**

**'काल०'** कालो भोजनस्येति। ऊर्ध्वं मुहूर्त्तात्कालो भोक्तुम् 'सप्तमी चोर्ध्वमौहूर्त्तिके' (५।४।३०) इति प्राप्तानां सप्तम्यादीनामपवादस्तुम्। ऊर्ध्वं मुहूर्त्ताद्भोक्तुं स कालः। 'स्मे पञ्चमी' (५।४।३१) इत्यस्यापवादस्तुम्। अङ्गशब्दः प्रकाशे कोमलामन्त्रणे च। अवसर इति किम्? कालः पचति भूतानि। कालोऽत्र द्रव्यं नत्ववसरः ॥ १४९ ॥

अथ सामान्यतः कालत्रयेऽपि विहितान् प्रत्ययानाह। सूत्रम्

## पद्रुजविशस्पृशो घञ् ॥ १५० ॥ [ सि० ५।३।१६ ]

**एभ्यश्चतुर्भ्यो घञ्। पद्यतेऽपादि पेदे वा पादः। एवं रोगः वेशः स्पर्शः ॥ १५० ॥**

**'पद०'** एभ्यो घञ् स्यात्। कृत्वात्कर्त्तरि। (वत्स्यत्यादि निवृत्तम्) स्पर्शो व्याधिविशेषः। स्पर्शो देवदत्तः कम्बलस्य। धकारः कत्वगत्वार्थः। ञकारो वृद्ध्यर्थः। अत्रादिशब्दानुषङ्गात् **'सर्तेः स्थिरव्याधिबलमत्स्ये'** (५।३।१७) सर्तेरेषु कर्तृषु घञ् स्यात्। सरति कालान्तरमिति सारः स्थिरपदार्थः। सालसारः खदिरसारः कार्यसारः। व्याध्यादौ अतीसारो व्याधिः। सारो बलम् विसारो मत्स्यः ॥ १५० ॥ सूत्रम्

## भावाऽकर्त्रोः ॥ १५१ ॥ [ सि० ५।३।१८ ]

**भावे कर्तृवर्जिते च कारके धातोर्घञ् स्यात्। पाकः। त्यागः। दायः। आयः। भावः ॥ १५१ ॥**

**'भावा०'** भाव इति। भावे वाच्ये कर्तृवर्जिते कारके च सर्वधातुभ्यो घञ् स्यात्। पचनं पाकः। एवं रागः। कर्तृवर्जिते कारके यथा–प्रकुर्वन्ति तमिति प्राकारः। एवं प्रासः प्रसेवः समाहारः। करणाधिकरणयोरनट् तदपवादश्च व्यञ्जनान्तेभ्यो घञ् वक्ष्यते। दाशन्तेऽस्मा इति दाशः। तालव्यो-पान्त्योऽयम्। आहरन्ति तस्मादाहारः। असंज्ञायामपि, दायो दत्तः। लाभो लब्धः। कृतः कटो हृतः भार इत्यादौ बहुलाधिकारान्न भवति। अकर्त्रीति पर्युदासेन कारकाश्रयणात् सम्बन्धे न भवति। देवदत्तस्य पच्यते। भावाकर्त्रोरिति किम्? पचः। भावो भवत्यर्थः साध्यरूपः क्रियासामान्यं धात्वर्थः स धातुनैवोच्यते। तत्रैव त्यादयः क्त्वातुमम्तव्यानीयादयश्च भवन्ति। यस्तु भावो धात्वर्थधर्मः सिद्धता नाम लिङ्गसङ्ख्यायोगी स द्रव्यवद्धात्वर्थादन्यस्तत्रायं घञादिविधिः। अयं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भावः । सर्वासु क्रियासु सत्त्वमिति भवत्यर्थः साधारण एवः । स च धात्वर्थः । स धातुनैवोच्यते न प्रत्ययैः । यः पुनः सिद्धतानाम धात्वर्थस्य धर्मः स प्रत्ययैरेवाभिधीयते न धातुना । तदुक्तम् 'आख्यातसाध्यैरर्थोऽसावन्तर्भूतोऽभिधीयते । नामशब्दाः प्रवर्त्तन्ते संहरन्त इव क्रमम्' ॥ १ ॥ तत्रायं घञन्तादिविधिरिति 'क्रियायाः सिद्धतावस्था साध्यावस्था च कीर्त्तिता । सिद्धतां द्रव्यमिच्छन्ति तत्रैवेच्छन्ति घञ्विधिम् ॥ २ ॥' तेन तद्योगे लिङ्गवचनभेदः सिद्धो भवति । पाकः पाकौ पाकाः । पचनं पचने पचनानि । पक्तिः पक्ती पक्तयः इति ।

अत्रामी विशेषाः **'इङोऽपादाने तु टिद्वा'** (५।३।१९) इङो धातोर्भावाकर्त्रोर्घञ् स्यात् । अपादाने तु कारके स वा टित्स्यात् । अध्ययनमध्यायः । अधीयत इत्यध्यायः । उपेत्याधीयतेऽस्मादित्युपाध्यायः । टिद्विधानसामर्थ्यात् स्त्रियां क्तिर्बाध्यते । उपाध्यायी उपाध्याया । **श्रो वायुवर्णनिवृते ।** (५।३।२०) श्रृ इत्येतस्माद्भावाकर्त्रोर्वाय्वादिष्वर्थेषु घञ् स्यात् । शीर्यते औषधादिभिरिति शारो वायुः । मालिन्येन शीर्यते इति शारो वर्णः निवृतं निवरणं । प्रावरणमित्यर्थः । निशीर्यते शीताद्युपद्रवो येन तन्नीशारो निवृतम्, 'गौरिवाकृत नीशारः [ प्रायेण शिशिरे कृशः । निवृता द्यूतोपकरणमिति कश्चित्, नियमेन वृता इत्यन्वर्थात् ] । शारैरिव क्रीडितं । एष्विति किम्? शरः । **'निरभेः पूल्वः'** (५।३।२१) पू इति पूग्पूङोर्ग्रहणम् । निरभिपूर्वाभ्यां यथासङ्ख्यं पूल्भ्यां भावाकर्त्रोर्घञ् स्यात् । निष्पूयते निष्पावः अभिलावः । **'रोरुपसर्गात्'** (५।३।२२) भावाकर्त्रोर्घञ् । संरवणं संरावः उपरावः । उपसर्गादिति किम्? रवः । सांराविणमित्यत्र ञिन् बाधकः । कथं रावः? बहुलाधिकारात् **'उद्यमोपरमौ'** (४।३।५७) उदुपपूर्वयोर्यमिरम्योर्घञि वृद्ध्यभावो निपात्यते । उद्यमः । उपरमः । अन्यत्र 'ञ्णिति' इति वृद्धिरेव । यामः संयामः । रामः विरामः । ॥ इति घञ्प्रत्ययप्रकरणम् ॥ ॥ १५१ ॥ सूत्रम् ।

## भूश्र्यदोऽल् ॥ १५२ ॥ [ सि० ५।३।२३ ]

**एभ्यः सोपसर्गेभ्यो भावाकर्त्रोरल् स्यात् । प्रभवः । संश्रयः । विघसः ॥ १५२ ॥**

**'भू०'** प्रभव इति एवं विभवः । संश्रय इति । एवं प्रश्रयः प्रतिश्रयः । विघस इति । एवं प्रघसः । उपसर्गादित्येव; भावः श्रायः घासः । भावाकर्त्रोरिति घञ् । भूश्र्योरुपसर्गादेवेति नियमार्थं वचनम् । कथं प्रभावः विभाव अनुभावः? । बहुलाधिकारात्, प्रकृष्टो भाव इत्यादिप्रादिसमासो वा । लकारो मिग्मीगोऽखलचलीत्यत्र विशेषणार्थः । **अत्रामी विशेषाः । 'न्यादो नवा'** (५।३।२४) निपूर्वाददेरलि घस्लभावोऽकारस्य दीर्घत्वं वा निपात्यते । न्यादः निघसः । **'संनिव्युपाद्यमः'** (५।३।२५) भावाकर्त्रोरल् वा स्यात् । संयमः । पक्षे घञ् संयामः । नियमः नियामः ( इत्यादि ) **'नेर्नदगदपठस्वनक्वणः'** (५।३।२६) भावाकर्त्रोरल् वा स्यात् । निनदः निनादः । निपठः २ । **'वैणे क्वणः'** (५।३।२७) । वीणायां भवो वैणः । वैणेऽर्थे वर्त्तमानादुपसर्गपूर्वात्क्वणेर्भावाकर्त्रोरल् वा स्यात् । प्रक्वाणः प्रक्वणः । निक्वाणः २ वीणायाः । वैण इति किम्? प्रक्वाणः शृङ्खलस्य । कथं क्वणः क्वाणो वीणायाः? 'नवा क्वण०' (५।३।४८) इति सामान्येन विधानाद्वैणेऽपि भवति ॥१५२॥ सूत्रम् ।

## युवर्णवृदृवशरणगमृद्ग्रहः ॥ १५३ ॥ [ सि० ५।३।२८ ]

**इवर्णोवर्णान्तेभ्यो वृादेर्ॠदन्तेभ्यो ग्रहेश्च भावाकर्त्रोरल् स्यात् । चयः । क्रयः । रवः । लवः । वरः । आदरः ॥ १५३ ॥**

**'युव०'** वृादेरिति । वृदृवशरणगमिभ्य इत्यर्थः । उपसर्गाद्वेति च निवृत्तम् । अल् स्यादिति

है० प्रका० उत्त० १२०

Jain Education International For Personal & Private Use Only www.jainelibrary.org

घञोऽपवादोऽयम् । चय इत्यादि । एवं निश्चयः जयः क्षयः । लव इति । एवं यवः पवः नवः स्तवः । वर इति । एवं प्रवरः । आदर इति । एवं दरः । एवं वशः रणः गमः अवगमः । कॄ करः । गॄ गरः । तॄ तरः । दॄ दरः । शॄ शरः । ग्रहः । कथं वारः समूहो वारोऽवसरः वारः क्रियाभ्यावृत्तिः । बहुलाधिकारात् घञ् । परिवार इति तु ण्यन्तादचि सिद्धम् ॥ १५३ ॥ सूत्रम् ।

## वर्षादयः क्लीबे ॥ १५४ ॥ [ सि० ५।३।२९ ]

अलन्ता निपाताः ॥ १५४ ॥

**'वर्षा०'** (५।३।२९) अयमस्यार्थः । वर्षादयः शब्दा अलन्ताः क्लीबे यथादर्शनं भावाकर्त्रोर्निपात्यन्ते नपुंसके क्तानड्निवृत्त्यर्थं वचनम् । वर्षं भयं धनं खलं पदम् । युगम् अत्र रथाङ्गकालविशेषयुग्मेष्वल् गत्वगुणाभावौ च निपातनात् । अनपुंसकक्तस्त्वसरूपविधिर्नास्त्येव । वृष्यते स्म वृष्टं मेघेन । भीतं बहुना । आदिशब्दानुवृत्त्या **'समुदोऽजः पशौ'** (५।३।३०) समुद्भ्यां परादजतेः पशुविषये धात्वर्थे वर्त्तमानाद्भावाकर्त्रोरल् स्यात् । समजः पशूनाम् ( समूह इत्यर्थः, उदजः पशूनाम् प्रेरणमित्यर्थः । समुद इति किम् ? व्याजः पशूनाम् ) । पशाविति किम् ? समाजः साधूनाम् । उदाजः खगानाम् । **'सृग्लहः प्रजनाक्षे'** (५।३।३१) सर्तिग्लहिभ्यां प्रजनाक्षविषये धात्वर्थे वर्त्तमानाभ्यां भावाकर्त्रोरल् स्यात् । गवामुपसरः । पशूनामुपसरः । वीनामुपसरं दृष्ट्वा । प्रजनो गर्भग्रहणम् तदर्थं स्त्रीषु पुंसां प्रथमं सरणमुपसरमुच्यते । अक्षाणां ग्लहः ग्रहणमित्यर्थः । ग्रहेः सूत्रनिपातनाल्लत्वम् । 'ग्रहूङ् ग्लहूङ् अदने' इति प्रकृत्यन्तरं वा । प्रजनाक्ष इति किम् ? उपसारो भृत्यै राज्ञाम् । ग्रहः ग्लाहो वा पादस्य । कथं परिसरविषमेषु लीढमुक्तौ ? । अधिकरणेषु नाम्नि घेन सिद्धम् । **'पणेर्माने'** (५।३।३२) भावाकर्त्रोरल् । मूलकपणः शाकपणः । पण्यते इति पणः । मूलकादीनां संव्यवहारार्थं परिमितो मुष्टिरित्यर्थः । मान इति किम् ? पाणः । घञपवादो योगः ॥ १५४ ॥ सूत्रम् ।

## संमदप्रमदौ हर्षे ॥ १५५ ॥ [ सि० ५।३।३३ ]

निपातावित्यादि । *निघादयोऽप्येवम् ॥ १५५ ॥

**'संम०'** (५।३।३३) निपाताविति । एतौ हर्षेऽर्थेऽलन्तौ निपात्येते । संमदः कोकिलानाम् । प्रमदः कन्यानाम् । हर्ष इति किम् ? सम्मादः प्रमादः । सम्प्रान्मद इत्यनुक्त्वा निपातनं रूपनिग्रहार्थम् ; तेनोपसर्गान्तरयोगे न स्यात् । प्रसंमादः । आदिशब्दात् **'हनोऽन्तर्घनान्तर्घणौ देशे'** (५।३।३४) अन्तःपूर्वाद्धन्तेरल् घनघणौ चादेशौ निपात्येते देशेऽभिधेये भावाकर्त्रोः । अन्तर्हण्यतेऽस्मिन्निति अन्तर्घनः अन्तर्घणो वा वाहीकेषु देशविशेषः । अन्तर्घातोऽन्यः । एके त्वन्तःसंहतो देशोऽन्तर्घनः । अभ्यन्तरो देश इति केचित् । तस्मिन्नन्तर्घनेऽपश्यत् । घणिः प्रकृत्यन्तरमित्यन्ये । **'प्रघणप्रघाणौ गृहांशे'** ( ५।३।३५ ) प्रपूर्वाद्धन्तेर्गृहांशेऽभिधेयेऽल् एतौ चादेशौ निपात्येते । प्रघणः प्रघाणो द्वारालिन्दकः । प्रघातोऽन्यः । ***निघादय** इति । अत्र सूत्रम् **'निघोद्घसंघोद्घनापघनोपघ्नं निमितप्रशस्तगणात्याधानाङ्गासन्नम्'** (५।३।३६ ) हन्तेर्निघादयः शब्दाः यथासङ्ख्यं निमितादिषु वाच्येषु कृतघत्वादयोऽलन्ता निपात्यन्ते । समन्ततो मितं तुल्यमविशेषेण वा मितं परिच्छिन्नं निमितम्, तुल्यारोहपरिणाहमित्यर्थः । निर्विशेषं निश्चयेन वा हन्यन्ते ज्ञायन्ते निघा वृक्षाः । निघाः शालयः । निघा बृहतिका । निघं वस्त्रम् । निघातोऽन्यः । उत्कर्षेण हन्यते ज्ञायते उद्घः प्रशस्तः । उद्घातोऽन्यः । गणः प्राणिसमूहः । संहतिः संघः, अन्यत्र संघातः । कथं संघातो मनुष्याणां ? । अत्रापि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्राणिसमूहत्वात् संघ इति निपातः कथं नेति । अत्रोच्यते सङ्घातशब्दं समुदायमात्रे प्रसाध्य पश्चान्मनुष्यशब्देन योग इति । अत्याधीयन्ते छेदनार्थं कुट्टनार्थं वा काष्ठादीनि यत्र तदत्याधानम् । उद्धन्यतेऽस्मिन्नित्युद्घनः काष्ठोद्घनः ताम्रोद्घनः । लोहोद्घनः । घनः स्कन्धः उद्घातोऽन्यः । अङ्गं शरीरावयवः । अपहन्यतेऽनेनेत्यपघनोऽङ्गम् । व्रणिभिरपघनैर्घर्घराव्यक्तघोषान् । 'एकदेशे प्रतीकोऽङ्गावयवापघना अपि' इत्यभिधानचिन्तामणौ । पाणिः पादश्चापघनो नापरमङ्गमित्यन्ये । अपघातोऽन्यः । उपहन्यते समीप इति ज्ञायते उपघ्नः आसन्नः । गुरूपघ्नः ग्रामोपघ्नः 'उपघ्नस्त्वंतिकाश्रय' इत्यभि० । उपघातोऽन्यः । निपातनादेवोपात्तार्थविशेषे वृत्तिरसरूपप्रत्ययबाधनं च विज्ञायते ॥ १५५ ॥ सूत्रम्

## मूर्तिनिचिताभ्रे घनः ॥ १५६ ॥ [ सि० ५।३।३७ ]

**मूर्तिः काठिन्यम्, निचितं निरन्तरम्, अभ्रा मेघाः । एष्वर्थेषु हन्तेरल् घनादेशश्च । दधिघनः, घनाः केशाः । घनो मेघः ॥ १५६ ॥**

**'मूर्त्ति०'** दधिघन इति दध्नः काठिन्यमित्यर्थः । एवं अभ्रस्य घनः । लोहघनः । कथं घनं दधि ? गुणशब्दोऽयं तद्योगाद्गुणिन्यपि वर्त्तते । आदिशब्दात् **'व्ययोद्रोः करणे'** ( ५।३।३८ ) वि अयस् द्रु इत्येतेभ्यः पराद्धन्तेः करणेऽल् घनादेशश्च निपात्यते । भावस्य कारकान्तरस्य चानुप्रवेशो मा भूदिति करणग्रहणम् । विहन्यतेऽनेन तिमिरं विघनः, विघनेन्दुसमद्युतिः । वयः पक्षिणो हन्यन्तेऽनेनेति वा विघनः । अयो हन्यतेऽनेन अयोघनः । द्रुर्हन्यतेऽनेनेति द्रुघनः कुठारः । अरीहणादिपाठाण्णत्वे द्रुघणः । घणतेर्वाऽजन्तस्य रूपम् । स्त्रियां त्वनडेव । विहननी अयोहननी द्रुहननी । **'स्तम्बाद् घ्नश्च'** ( ५।३।३९ ) स्तम्बशब्दात्पराद्धन्तेरल् घ्नघनादेशौ च करणे निपात्येते । स्तम्बो हन्यतेऽनेन स्तम्बघ्नो दण्डो यष्टिश्च । स्त्रियां तु परत्वादनडेव । स्तम्बहननी यष्टिः । केचित्तु कप्रत्यये निपातनं कृत्वा स्त्रियामपि स्तम्बघ्नेतीच्छन्ति । अन्ये तु स्तम्बपूर्वस्यापि हन्तेः 'सातिहेति०' ( ५।३।९४ ) इति निपातनात् स्तम्बहेतिरितीच्छन्ति । करण इत्येव । स्तम्बहननं स्तम्बघातः । कथं स्तम्बघ्नीषिका ? करणस्यापि कर्तृत्वविवक्षया 'अचित्ते टक्' ( ५।१।८३. ) अत्यनेन टकि सिद्धम् । **'परेर्घः'** (५।३।४०) परिपूर्वाद्धन्तेरल् घादेशश्च करणे निपात्यते । परिहण्यतेऽनेन परिघोऽर्गला । लत्वे पलिघः । **'ह्वः समाह्वयाह्वयौ द्यूतनाम्नोः'** (५।३।४१) करण इति निवृत्तम् । द्यूते नाम्नि चाभिधेये यथासङ्ख्यं समाङ्पूर्वात् आङ्पूर्वाच्च ह्वयतेरल् ह्वयादेशश्च निपात्यते । समाह्वयः प्राणिद्यूतम् । आह्वयो नाम । **'न्यभ्युपवेर्वाश्चोत्'** ( ५।३।४२ ) एभ्यः परात् ह्वयतेः भावाकर्त्रोरल् तत्सन्नियोगे च वाशब्दउकारो भवति । अभेदनिर्देशः सर्वादेशार्थः । निह्वानं निहवः, एवं अभिहवः विहवः उपहवः । न्यभ्युपवेरिति किम् ? प्रह्वायः । वेति किम् ? सर्वस्य मा भूत् । तेन विजोहव इति सिद्धमन्यथा विहव इति स्यात् । भृशं विह्वयति यङ्लुपि द्वित्वे ह्व इति स्थृत् । विजोहवनमनेनाल् । अन्यथा प्रकृतिग्रहणे इति न्यायात् यङ्लुबन्तास्याप्यनेनालि ह्वो हव इति कृतद्वित्वस्यापि निपाते विहव इति स्यादित्यर्थः । जुहोतिनैव सिद्धे ह्वयते रूपान्तरनिवृत्त्यर्थम् वचनम् । **'आङो युद्धे'** ( ५।३।४३ ) आङ्पूर्वात् ह्वयतेर्युद्धेऽर्थे भावाकर्त्रोरल् स्यात् । वाशब्दश्चोकारः । आहूयन्ते योद्धारोऽस्मिन्नित्याहवो युद्धम् । युद्ध इति किम् ? आह्वाय आह्वानम् । **'आहावो निपानम्'** (५।३।४४) निपिबन्त्यस्मिन्निपानं पशुशकुनीनां पानार्थम् कृतो जलाधारः । आङ्पूर्वात् ह्वयतेर्भावाकर्त्रोरल् आहावादेशश्च निपात्यते । निपानं चेदभिधेयं स्यात् । आहूयन्ते पशवः पक्षिणः पानायास्मिन्निति पशूनां पक्षिणां वा आहावः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निपानमिति किम्? आह्वयः आह्वानम् '**भावेऽनुपसर्गात्**' (५।३।४५) अनुपसर्गात् ह्वयतेर्भावेऽल् वाशब्दश्चोकारो भवति। अकर्त्तरीत्यस्यानुप्रवेशो मा भूदिति भावग्रहणम्। ह्वानं हवः। भाव इति किम्? कर्मणि ह्वायः। अनुपसर्गादिति किम्? आह्वायः। '**हनो वा वध् च**' (५।३।४६) अनुपसर्गात् हन्तेर्भावेऽल् वा स्यात्। तत्सन्नियोगे चास्य वधादेशः। हननं वधः घातः। अनुपसर्गादित्येव। संघातः। '**व्यधजपमद्भ्यः**' (५।३।४७) एभ्योऽनुपसर्गेभ्यो भावाकर्त्रोरल् स्यात्। बहुवचनाद्भाव इति निवृत्तम्। व्यधः जपः मदः। अनुपसर्गादित्येव। आव्याधः उपजापः उन्मादः। '**नवा क्वणयमहसस्वनः**' (५।३।४८) एभ्योऽनुपसर्गेभ्यो भावाकर्त्रोरल् वा स्यात्। क्वणः क्वाणः। यमः २। हसः २। स्वनः २। अनुपसर्गादित्येव। प्रक्वाणः प्रयामः प्रहासः विष्वाणः। अप्राप्तविभाषेयम्। '**आङो रुप्लोः**' (५।३।४९) आङः पराभ्यां रुप्लुभ्यां भावाकर्त्रोरल् वा स्यात्। आरवः आरावः। आप्लवः २। आङ इति किम्? विरावः विप्लवः। रौतेर्घञि प्लवतेरलि नित्यं प्राप्ते विकल्पः। '**वर्षविघ्नेऽवाद्ग्रहः**' (५।३।५०) अवपूर्वाद्ग्रहेर्वर्षविघ्ने वाच्ये भावाकर्त्रोरल् वा स्यात्। अवग्राहः अवग्रहः। वृष्टेः प्रतिबन्ध इत्यर्थः। 'वर्षविघ्ने ग्राहग्रहाववात्' **इत्यभिधानचिन्तामणौ**। वर्षविघ्न इति किम्? अवग्रहः पदस्य। अवग्रहोऽर्थस्य। '**प्राद्रश्मितुलासूत्रे**' (५।३।५१) प्रपूर्वाद्ग्रहे रश्मौ तुलासूत्रे चार्थे भावाकर्त्रोरल् वा स्यात्। प्रगृह्यते इति प्रग्रहः प्रग्राहः। अश्वादेः संयमनरज्जुस्तुलासूत्रं चोच्यते। अन्यस्तु प्रग्राहः। '**वृगो वस्त्रे**' (५।३।५२) प्रपूर्वाद्वृणोतेर्वस्त्रविशेषे वाच्ये भावाकर्त्रोरल् वा स्यात्। प्रवृण्वन्ति तमिति प्रावरः प्रवारः 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) इति दीर्घः। अन्ये तु प्राक्पूर्व एव वृणोतिः स्वभावाद्वस्त्रविशेषे वर्त्तते। तेन प्रावारः प्रावर इति भवति। वस्त्र इति किम्? प्रवरो यतिः। '**उदः श्रेः**' (५।३।५३) उत्पूर्वात् श्रेर्भावाकर्त्रोरल् वा स्यात्। उच्छ्रयः उच्छ्रायः। नित्यमलि प्राप्ते वचनम्। '**युपुद्रोर्घञ्**' (५।३।५४) उत्पूर्वेभ्य एभ्यो वा भावाकर्त्रोर्घञ् स्यात्। अलोऽपवादः। उद्यावः उत्पावः उद्द्रावः। '**ग्रहः**' (५।३।५५) उत्पूर्वाद्ग्रहेर्भावाकर्त्रोर्घञ् स्यात्। अलोऽपवादः। उद्ग्राहः। उद इत्येव। ग्रहः विग्रहः। '**न्यवाच्छापे**' (५।३।५६) न्यवाभ्यां पराच्छापे आक्रोशे ग्रहेर्भावाकर्त्रोर्घञ् स्यात्। निग्राहः अवग्राहो ह ते वृषल भूयात्। शाप इति किम्? निग्रहश्चौरस्य। अवग्रहः परस्य। '**प्राल्लिप्सायाम्**' (५।३।५७) प्रपूर्वाद्ग्रहेर्लिप्सायां गम्यायां भावाकर्त्रोर्घञ् स्यात्। पात्रप्रग्राहेण चरत्यन्नार्थी भिक्षुः। स्रुवस्य ग्राहेण चरति दक्षिणार्थी द्विजः। लिप्सायामिति किम्? स्रुवः प्रग्रहस्य। '**समो मुष्टौ**' (५।३।५८) सम्पूर्वाद्ग्रहेर्मुष्टिविषये धात्वर्थे भावाकर्त्रोर्घञ् स्यात्। मुष्टिरङ्गुलिसन्निवेशो न परिमाणम्। तत्र 'माने' (५।३।८१) इत्येव सिद्धत्वात्। सङ्ग्राहो मल्लस्य। अहो मौष्टिकस्य सङ्ग्राहः। मुष्टेर्दार्ढ्यमुच्यते। मुष्टाविति किम्? सङ्ग्रहः शिष्यस्य। '**युदुद्रोः**' (५।३।५९) सम्पूर्वेभ्य एभ्यो भावाकर्त्रोर्घञ् स्यात्। संयावः संदावः सन्द्रावः। सम इत्येव। विद्रवः उपद्रवः। '**नियश्चानुपसर्गाद्वा**' (५।३।६०) अनुपसर्गान्नयतेर्युदुद्रोश्च घञ् वा स्यात्। भावाकर्त्रोरित्यधिकारसमाप्तेरनुवर्त्तनीयम्। नयः नायः। यवः २। दवः २। द्रवः २। अनुपसर्गादिति किम्? प्रणयः। '**वोदः**' (५।३।६१) उत्पूर्वान्नयतेर्घञ् स्यात्। उन्नायः उन्नयः। '**अवात्**' (५।३।६२) अवपूर्वान्नयतेर्नित्यं घञ्। अवनायः। '**परेर्द्यूते**' (५।३।६३) द्यूतविषये धात्वर्थे वर्त्तमानात्परिपूर्वान्नयतेर्घञ् स्यात्। परिणायेन शारीन् हन्ति समन्तान्नयनेनेत्यर्थः। 'परिणायस्तु शारीणां नयनं स्यात् समन्ततः' **इत्यभि०**। द्यूत इति किम्? परिणयः कन्यायाः। '**भुवोऽवज्ञाने वा** (५।३।६४) परिपूर्वा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

द्रवतेरवज्ञानेऽर्थे वर्त्तमानाद् घञ् वा स्यात् । अवज्ञानं सत्कारपूर्वकोऽवक्षेपः । परिभावः परिभवः । अवज्ञान इति किम् ? समन्ताद्भवनं परिभवः । 'यज्ञे ग्रहः' ( ५।३।६५ ) परिपूर्वाद्ग्रहेर्यज्ञविषये प्रयोगे घञ् स्यात् । पूर्वपरिग्राहः । उत्तरपरिग्राहः । वेदेर्यज्ञाङ्गभूताया ग्रहणविशेष एताभ्यामभिधीयते । यज्ञ इति किम् ? परिग्रहः कुटुम्बिनः । 'संस्तोः' ( ५।३।६६ ) सम्पूर्वात् स्तौतेर्यज्ञविषयेऽर्थे घञ् स्यात् । संस्तुवन्त्यत्रेति संस्तावश्छन्दोगानाम् । समेत्य स्तुवन्ति यत्र देशे छन्दोगाः स देशः संस्ताव उच्यते । यज्ञ इत्येव । संस्तवोऽन्यदृष्टेः । 'प्रात्स्रुद्रुस्तोः' (५।३।६७) प्रात् परेभ्य एभ्यो घञ् स्यात् । प्रस्रावः । प्रद्रावः । प्रस्तावः । प्रादिति किम् ? स्रवः द्रवः स्तवः । कथं स्रावः ? । बहुलाधिकारात् । 'अयज्ञे स्त्रः' (५।३।६८) प्रपूर्वात् स्तृ इत्येतस्माद्धातोर्घञ् स्यात् । अयज्ञे न चेद्यज्ञविषयः प्रयोगः स्यात् । प्रस्तारः । मणिप्रस्तारः । विमानप्रस्तारः । नयप्रस्तारः । अयज्ञ इति किम् ? बर्हिष्प्रस्तरः । 'समासेऽसमस्तस्य' (२।३।१३) इति षत्वम् ॥ १५६ ॥ सूत्रम्

## वेरशब्दे प्रथने ॥ १५७ ॥ [ सि० ५।३।६९ ]

**वेः परात् स्तृणातेरशब्दविषये विस्तीर्णत्वे घञ् स्यात् । विस्तारः पटस्य । शब्दे तु विस्तरः ॥ १५७ ॥**

'वेर०' प्रथनं विस्तीर्णता । यथा विस्तारः पटस्य । प्रथन इति किम् ? तृणस्य विस्तरः छादनमित्यर्थः । अशब्द इति किम् ? 'दधातु तुष्टिं मयि विस्तरो गिराम्' । शाब्दस्तु विस्तर इत्यभि० । आदिशब्दात् 'छन्दो नाम्नि' ( ५।३।७० ) छन्दः पद्यो वर्णविन्यासः । विपूर्वात् स्तृणातेः छन्दोनाम्नि विषये घञ् स्यात् । विष्टारपङ्क्तिः । केचित्तु वेरन्यतोऽपीच्छन्ति । आस्तारपङ्क्तिः । प्रस्तारपङ्क्तिः । छन्दो नाम । 'क्षुश्रोः' ( ५।३।७१ ) क्षौतेः शृणोतेश्च विपूर्वाद् घञ् स्यात् । विक्षावः विश्रावः । वेरित्येव । क्षवः श्रवः । 'न्युदो ग्रः' (५।३।७२) न्युद्भ्यां पराद्गिरतेर्गृणातेर्वा घञ् स्यात् । निगारः उद्गारः । न्युद इति किम् ? गरः सङ्गरः । 'किरो धान्ये' (५।३।७३) न्युत्पूर्वात् किरतेर्धान्यविषये धात्वर्थे वर्त्तमानाद् घञ् स्यात् । निकारः उत्कारो धान्यस्य, राशिरित्यर्थः । धान्य इति किम् ? फलनिकरः पुष्पोत्करः । 'नेर्वृः' (५।३।७४) निपूर्वाद्वृणातेर्वृणीतेर्वा धान्यविशेषेऽभिधेये घञ् स्यात् । निव्रियन्ते इति नीवारा नाम व्रीहिविशेषाः । 'घञ्युपसर्गस्य०' (२।३।८६) इति दीर्घत्वम् । धान्य इत्येव । निवरा कन्या । स्वभावादलन्तोऽप्ययं स्त्रियां वर्त्तते । किन्तु बहुलाधिकारान्न भवति । 'इणोऽभ्रेषे' ( ५।३।७५ ) स्थितेरचलनमभ्रेषः । निपूर्वादिणोऽभ्रेषविषये वर्त्तमानाद् घञ् स्यात् । शास्त्रलोकप्रसिद्धत्वादिना नियतमयनं न्यायः । अभ्रेष इति किम् ? न्ययं गतश्चौरः । 'परेः क्रमे' ( ५।३।७६ ) क्रमः परिपाटिः । परिपूर्वादिणः क्रमविषयेऽर्थे वर्त्तमानाद् घञ् स्यात् । तव पर्यायो भोक्तुम् । क्रमेण पदार्थानां क्रियासम्बन्धः पर्यायः । क्रम इति किम् ? पर्ययः स्वाध्यायस्य अतिक्रम इत्यर्थः । विपर्ययो मतेरन्यथाभवनमित्यर्थः । 'व्युपाच्छीङः' (५।३।७७) व्युपाभ्यां पराच्छीङो घञ् स्यात् । क्रमे, क्रमविषयश्चेद्धात्वर्थः स्यात् । तव राजविशायः ममराजोपशायः । राजनि विशायः राज्ञि उपशायः । विशाय उपशायश्च पर्यायोऽनुक्रमः क्रमः इत्यभि० । क्रमप्राप्तं पर्यायसाध्यं शयनमुच्यते । अन्ये तु शयितुं पर्याय उच्यते इत्याहुः । क्रम इति किम् ? विशयः उपशयः । 'हस्तप्राप्ये चेरस्तेये' ( ५।३।७८ ) हस्तेनोपायान्तरनिरपेक्षेण प्राप्तुं शक्यं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हस्तप्राप्यम् । तद्विषयाच्चिनोतेर्घञ् स्यात् । अस्तेये, न चेद्धात्वर्थः स्तेये चौर्ये भवति । हस्तप्राप्यशब्देन प्रत्यासत्तिः प्राप्यस्य लक्ष्यते । तेन प्रत्यासत्तिविषये धात्वर्थे विधानम् । पुष्पप्रचायः । फलावचायः । पुष्पोच्चायश्च संहतैः । उदो नेच्छन्त्यन्ये । फलोच्चयः । हस्तप्राप्य इति किम् ? पुष्पप्रचयं करोति तरुशिखरे । अस्तेय इति किम् ? स्तेयेन पुष्पप्रचयं करोति । हस्तप्राप्यशब्देन प्रमाणमप्युच्यते । यद्धस्ते सम्भवति संमाति न तद्धस्तादतिरिच्यते इति । ततश्च 'माने' ( ५।३।८१ ) इत्यनेनैव सिद्धे नियमार्थं वचनम् । अस्तेय एवेति, तेन पुष्पाणां हस्तेन प्रचयं करोति चौर इत्यत्र 'माने' इत्यनेनापि घञ् न भवति । **'चितिदेहावासोपसमाधाने कश्चादेः'** ( ५।३।७९ ) चीयते इति चितिर्यज्ञेऽग्निविशेषः तदाधारो वा । देहः शरीरम् । आवासो निवासः । उपसमाधानमुपर्युपरि राशीकरणम् । एष्वर्थेषु चिनोतेर्भावाकर्त्रोर्घञ्, तत्सन्नियोगे चादेः ककारादेशो भवति । **चितौ** आकायमग्निं चिन्वीत । **देहे** कायः शरीम् । **आवासे** ऋषिनिकायः । **उपसमाधाने** गोमयनिकायः गोमयपरिकायः कथं काष्ठनिचयः ? बहुत्वमात्रविवक्षया । एष्विति किम् ? चयः । चः क इत्येव सिद्धे आदिग्रहणमादेरेव यथा स्यात् । तेन चेर्यङ्लुपि निकेचायः इत्येव भवति । **'सङ्घेऽनूर्ध्वे'** (५।३।८०) न विद्यते कुतश्चिदूर्ध्वमुपरि किञ्चिदस्मिन् सोऽनूर्ध्वः, तस्मिन् सङ्घे प्राणिसमुदाये चिनोतेर्भावाकर्त्रोर्घञ् स्यात् । तत्सन्नियोगे चादेः कः स्यात् । वैयाकरणनिकायः । सङ्घ इति किम् ? सारसमुच्चयः । अनूर्ध्व इति किम् ? सूकरनिचयः । सूकरा उपर्युपरि चीयन्ते । **'माने'** (५।३।८१) माने गम्यमाने धातोर्भावाकर्त्रोर्घञ् स्यात् । मानमियत्ता, सा च द्वेधा–सङ्ख्या परिमाणं च । एको निघासः द्वौ निघासौ । एकस्तण्डुलावक्षायः । एकस्तण्डुलनिश्चायः । एकः कारः द्वौ कारौ त्रयः काराः । द्वौ सूर्पनिष्पावौ । समित्सङ्ग्राहः तन्दुलसङ्ग्रहः मुष्टिरित्यर्थः । मान इति किम् ? निश्चयः । अल एवायमपवादः, क्त्यादिभिस्तु बाध्यते । एका तिलोच्छ्रितिः । द्वे प्रसृती । **'स्थादिभ्यः कः'** (५।३।८२) एभ्यो भावाकर्त्रोः कः स्यात् । आखूनामुत्थानं आखूत्थो वर्त्तते । प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः सानुः । संतिष्ठन्तेऽस्यामिति संस्था । व्यवतिष्ठतेऽनयेति व्यवस्था । प्रस्नात्यस्मिन्निति प्रस्नः । प्रपिबन्त्यस्यामिति प्रपा । विध्यतेऽनेनेति विधः । आविध्यतेऽनेनेति आविधः । विहन्यतेऽनेनास्मिन्निति वा विघ्नः । आयुध्यतेऽनेनेत्यायुधम् । आध्यायन्ति तमित्याढ्यः । पृषोदरादित्वात् धस्य ढः । सर्वापवादत्वादनटमपि कप्रत्ययो बाधते । कथमाव्याधः घातः विघातः उपघातः ? बहुलाधिकारात् । बहुवचनं प्रयोगानुसरणार्थम् ॥ १५७ ॥ सूत्रम्

## ट्वितोऽथु ॥ १५८ ॥ [ सि० ५।३।८३ ]

ट्वितो धातोर्भावाकर्त्रोरथुः स्यात् । वेपथुः । वमथुः ॥ १५८ ॥

**'ट्वितो०'** वमथुरिति । एवं स्फूर्जथुः श्वासथुः नन्दथुः क्षवथुर्दवथुः । असरूपत्वाद् घञ्–लावपि । वेपः क्षवः ॥ १५८ ॥

## ड्वितस्त्रिमक् तत्कृतम् ॥ १५९ ॥ [ सि० ५।३।८४ ]

ड्वितो धातोर्भावाकर्त्रोस्त्रिमक्, तेन कृतमित्यर्थे । पाकेन कृतं पक्त्रिमम् । कृत्रिमम् । दागस्त्वादेशे, परीत्रिमम् ॥ १५९ ॥

'ड्वित०' तेन कृतमिति तेन धात्वर्थेन कृतं निर्वृत्तमित्येतस्मिन्नर्थे । करणेन निर्वृत्तं कृत्रिमम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परिदानेन निर्वृत्तं परीत्रिमम् । एवं वापेन निर्वृत्तं उप्त्रिमम् लाभेन निर्वृत्तं लब्त्रिमम् । विधानेन निर्वृत्तं विहित्रिमम् । याचित्रिमम्, द्विदसाविति कश्चित् याथुः । ककारः कित्कार्यार्थः ॥ १५९ ॥

## यजिस्वपिरक्षियतिप्रच्छो नः ॥ १६० ॥ [ सि० ५।३।८५ ]

**एभ्यो भावाकर्त्रोर्नः स्यात् । यज्ञः । स्वप्नः । यत्नः रक्ष्णः । प्रश्नः ॥ १६० ॥**

**'यजि०'** स्पष्टम् । यजनं यज्ञः । रक्षणं रक्ष्णः । 'रक्षणत्राणे' इत्यभिधानचिन्तामणौ । आदिशब्दात् **'विच्छो नङ्'** ( ५।३।८६ ) 'विच्छत् गतौ' इत्यस्माद् भावाकर्त्रोर्नङ् स्यात् । ङकारो गुणप्रतिषेधार्थः । विच्छनं विश्नः । 'अनुनासिके० च०' (४।१।१०८) इति छस्य शः ॥१६०॥

## उपसर्गाद्दः किः ॥ १६१ ॥ [ सि० ५।३।८७ ]

**सोपसर्गाद्दासंज्ञात्किः स्यात् । आदिः । निधिः ॥ १६१ ॥**

**'उप०'** निधिरिति । एवं प्रधिः आधिः विधिः सन्धिः समाधिः । कित्करणमाकारलोपार्थम् ॥ १६१ ॥

## व्याप्यादाधारे ॥ १६२ ॥ [ सि० ५।३।८८ ]

**व्याप्यपूर्वाद्दासंज्ञादाधारे किः स्यात् । जलधिः । *अन्तर्धिः ॥ १६२ ॥**

**'व्याप्या०'** जलं धीयतेऽस्मिन्निति जलधिः । एवं शरधिः इषुधिः वालधिः शेवधिः । आधारग्रहणमर्थान्तरनिषेधार्थम् । ***'अन्तर्धिः'** ( ५।३।८९ ) अन्तर्पूर्वाद्धातेर्भावाकर्त्रोः किः प्रत्ययो निपात्यते । अन्तर्द्धिः । आदिशब्दात् **'अभिव्याप्तौ भावेऽनञिन्'** ( ५।३।९० ) क्रियया स्वसम्बन्धिनः साकल्येनाभिसम्बन्धो व्याप्तिः । तस्यां गम्यायां भावे धातोरनःञिन् एतौ स्याताम् । समन्ताद्रावः संरवणं सांराविणम् । सेनायां वर्त्तते 'नित्यं ञिणोण्' (७।३।५८) इत्यण् सङ्कुटनम् । साङ्कोटिनमेषाम् । अभिव्याप्ताविति किम् ? संरावः सङ्कोटः । भावग्रहणं कर्मादिप्रतिषेधार्थम् । असरूपविधिना क्तवत्वादिनिवृत्त्यर्थमनग्रहणम् ॥ १६२ ॥ सूत्रम्

## स्त्रियां क्तिः ॥ १६३ ॥ [ सि० ५।३।९१ ]

**भावाकर्त्रोः स्त्रियां क्तिः स्यात् । कृतिः । 'ऋल्वादे०' ( ४।२।६८ ) इति नत्वे लूनिः । 'घसि चा०' ( ४।४।१६ ) इति जग्धादेशे जग्धिः ॥ १६३ ॥**

**'स्त्रि०'** स्त्रियामिति प्रत्ययार्थविशेषणम् । धातोर्भावाकर्त्रोः स्त्रीलिङ्गे क्तिः स्यात् । घञादेरपवादः । कृतिरिति । एवं हृतिः चितिः प्रीतिः नुतिः भूतिः । स्त्रियामिति किम् ? कारः चयः । आदिशब्दात् **'श्वादिभ्यः'** (५।३।९२) श्रृणोत्यादिभ्यो धातुभ्यः स्त्रियां भावाकर्त्रोः क्तिः स्यात् । वक्ष्यमाणैः क्विबादिभिः समावेशार्थं वचनम् । श्रु श्रुतिः प्रतिश्रुत् । स्तु स्तुतिः । प्रतिस्तुत् उपसर्गाणामतन्त्रत्वात् श्रुसदादिभ्यः क्तिक्विबादयोऽप्यनुज्ञाताः । पद् सम्पत्तिः सम्पत् । सद् आसत्तिः संसत् । उपनिषत् । निषदनं निषीदन्त्यस्यामिति वा निषद्या । शीङ् शेरतेऽस्यामिति शय्या । सुग् सवनं सुन्वन्त्यस्यामिति वा सुत्या । वित्तिः विद् संविद्या वेदना । लभ् लब्धिः लभा । अर्द शिरोऽर्त्तिः अर्दिका । यद्यपि णकप्रस्तावे शिरोऽर्दनं शिरोऽर्तिरित्यत्र बाहुलकाण्णको निषिद्धः, 'क्टि०' इत्यप्रत्ययोऽपि; तथापि तत्र भावे एव, अत्र त्वपादानादौ । अर्द्यतेऽस्याः 'नाम्नि पुंसि च' (५।३।१२१) इति णकः । भावे तु न, तत्रैव बाहुलकादिति भणनात् । शंस् प्रशस्तिः प्रशंसा । पच् पक्तिः पचा । कण्डूय

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कण्डूतिः कण्डूः कण्डूया । न्यवक्रुश् न्यवक्रुष्टिः न्यावक्रोशी । इष् इष्टिः इच्छा । यज इष्टिः इज्या । मन् मतिः मन्या । आस् आस्या उपास्तिः उपासना । शास् अनुशिष्टिः आशीः । भृग् भृतिः भृत्या । स्तूयते इज्यते इष्यतेऽनयेति स्तुतिः इष्टिः । इष्टिरिति संज्ञाशब्दत्वात्करणेऽपि क्तिरेव नानट् । एवं स्तुतिः । अन्यत्र तु स्पर्द्धे परत्वात् स्त्रीखलना अलो बाधकाः स्त्रियाः खलनाविति न्यायः । **'समिणाऽसुगः'** ( ५।३।९३ ) सम्पूर्वादिणः आङ्पूर्वात्सुनोतेश्च भावाकर्त्रोः स्त्रियां क्तिः स्यात् । क्यपोऽपवादः । समितिः आसुतिः । समाङोऽन्यत्र इत्या सुत्येति क्यबेव ॥ १६३ ॥ सूत्रम् ।

## सातिहेतियूतिजूतिज्ञप्तिकीर्त्ति ॥ १६४ ॥ [ सि० ५।३।९४ ]

**एते भावाकर्त्रोः स्त्रियां निपात्याः । ( †गापाधात्वोरीत्वं भावे ) गीतिः पीतिः । ( *स्थो वा ) स्थितिः आस्था ॥ १६४ ॥**

**'साति०'** सुनोतेः सिनोतेः स्यतेर्वा आत्वमित्वाभावश्च निपात्यते । सातिः । हिनोतेर्गुणे हन्तेर्वान्त्यस्वरादेरेत्वे च हेतिः । यौतेर्जवतेश्च दीर्घत्वे यूतिः जूतिः । ज्ञपयतेर्ज्ञप्तिः । कीर्त्तयतेः कीर्त्तिः । आभ्यां ण्यन्तलक्षणोऽनो न भवति । कीर्त्तनेत्यपि **कश्चित् । †'गापापचो भावे'** (५।३।९५) एभ्यो भावे स्त्रियां क्तिः स्यात् । गा इति सामान्येन ग्रहणम् । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) इति ईत्वे गीतिः प्रगीतिः सङ्गीतिः । पा इति गापचिसाहचर्यात् पिबतेर्ग्रहणम् । प्रपीतिः सम्पीतिः । पक्तिः प्रपक्तिः । भावग्रहणमर्थान्तरनिरासार्थम् । बाधकस्याङोऽपवादः । ***'स्थो वा'** ( ५।३।९६ ) तिष्ठतेर्भावे स्त्रियां क्तिर्वा स्यात् । स्थितिः प्रस्थितिः उपस्थितिः वावचनादङपि । आस्था व्यवस्था संस्था । प्राग्वदङोऽपवादः । इति क्तिप्रत्ययप्रकरणम् ॥ १६४ ॥

## आस्यटिव्रज्यजः क्यप् ॥ १६५ ॥ [ सि० ५।३।९७ ]

**एभ्यो भावे स्त्रियां क्यप् स्यात् । आस्या । अट्या । व्रज्या । इज्या ॥ १६५ ॥**

**'आस्य०'** एभ्यो भावे स्त्रियां क्यप् स्यात् । आस् आसनं आस्या । अट, अट्या–वृथाट्या खलु सा तस्याः । व्रज् इज्या । ककारः कित्कार्यार्थः । पित्करणमुत्तरत्र तागमार्थम् ॥ **अत्रायं विशेषः । 'भृगो नाम्नि'** (५।३।९८) भावे स्त्रियां क्यप् स्यात् । भरणं भृत्या । **'समजनिपन्निषदशीङ्सुगविदिचरिमनीणः'** (५।३।९९) योगविभागात् भाव एवेति निवृत्तम् । एभ्यो दशभ्यो नाम्नि भावाकर्त्रोः स्त्रियां क्यप् स्यात् । **अस्य कृत्यसंज्ञा न भवति । तत्र प्रकरणे विहितस्यैव तस्य तथाभावात् ।** समजन्त्यस्यामिति समज्या पर्षत् । संज्ञाशब्दत्वादाधारेऽपि क्यप् । निपतन्निषदेति संहितानिर्देशात्पतेः पदेश्च ग्रहणम् । निपतनं निपदनं निपद्यन्तेऽस्यामिति ( निपत्या ) निपद्या । निषदनं निषीदन्त्यस्यामिति वा निषद्या । शेरतेऽस्यामिति शय्या । सवनं सुन्वन्त्यस्यामिति वा सुत्या । वेदनं विदन्त्यस्यां तया वा हिताहितमिति विद्या । चरणम् चरन्त्यनया वा चर्या । मननं मन्यतेऽनयेति वा मन्या । अयनमेत्यनयेति वा इत्या । नाम्नीत्येव । सन्वीतिः निपत्तिः निष्पत्तिः ॥ १६५ ॥ सूत्रम्

## कृगः श च वा ॥ १६६ ॥ [ सि० ५।३।१०० ]

**कृगो भावाकर्त्रोः शः क्यप् च वा स्याताम् । क्रिया कृत्या कृतिः ॥ १६६ ॥**

**'कृगः०'** करणं कृतिः । कृत्या । पक्षे कृतिः क्रियेति यदा भावकर्मणोः शस्तदा मध्ये क्यः । यदा त्वपादानादौ शस्तदा क्यो नास्तीति रेरिकारस्येयादेशः ॥ १६६ ॥ सूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## मृगयेच्छायाच्ञातृष्णाकृपाभाश्रद्धान्तर्धा ॥ १६७ ॥ [ सि० ५।३।१०१ ]

**एते स्त्रियां निपात्याः ॥ १६७ ॥**

**'मृग०'** एते इत्यादि । तत्रेच्छा भावे एव । शेषास्तु भावाकर्त्रोः । **अन्ये** तु सर्वान् भाव एवानुमन्यन्ते । मृगयतेः शः शव् च क्यापवादो निपातः । इच्छतेः शः क्याभावश्च इच्छा, । याचितृष्योर्नङौ याच्ञा । तृष्णा । **केचित्तु** भिदादित्वात् तृषा । **स्वमते** तु कुत्सम्पदादित्वात् (५।३।११४) तृट्, कृपे रेफस्य च ऋकारः कृपा । भातेरङ् भा । श्रत्पूर्वादन्तर्पूर्वाच्च दधातेरङ् श्रद्धा अन्तर्धा ॥ १६७ ॥ :

## परेः सृचरेर्यः ॥ १६८ ॥ [ सि० ५।३।१०२ ]

**आभ्यां परिपूर्वाभ्यां यः स्यात् । परिसर्या परिचर्या ॥ १६८ ॥**

**'परेः०'** यः स्यादिति भावाकर्त्रोः । भाव इत्यन्ये । एवमग्रेतनसूत्रद्वयेऽपि । परेरिति किम्? संसृतिः चूर्तिः ॥ १६८ ॥

## वाऽटाट्यात् ॥ १६९ ॥ [ सि० ५।३।१०३ ]

**अटेर्यङन्ताद्वा यः । अटाट्या अटाटा ॥ 'जागुरश्च' (५।३।१०४) जागर्या जागरा ॥ 'शंसिप्रत्ययात्' (५।३।१०५) आशंसा । गोपाया । चिकीर्षा ॥ 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अः स्यात् । ईहा ऊहा ॥ १६९ ॥**

**'वा०'** अटाटा इति । पक्षे अः प्रत्ययः । अटाट्या । अन्ये तु क्तिप्रत्ययबाधनार्थमयङन्तस्य यप्रत्ययं द्विर्वचनम् पूर्वदीर्घत्वं च निपातयन्ति । अटनमटाट्या ॥ **'जागु०'** (५।३।१०४) जागर्तेः स्त्रियामः प्रत्ययो यश्च स्यात् ॥ **'शंसि०'** (५।३।१०५) शंसेः प्रत्ययान्तेभ्यश्च धातुभ्यः भावाकर्त्रोः स्त्रियामङ् स्यात् । गोपायेति । एवं ऋतीया मीमांसा कण्डूया लोलूया । चिकीर्षेति एवं पुत्रकाम्या पुत्रीया गवा गल्भा श्येनाया पटपटाया । शंसूः क्तेऽनिडिति वचनम् ॥ **'क्ते०'** (५।३।१०६) क्तस्येड् यस्मात् स क्तेट् । क्तेटो गुरुमतो व्यञ्जनान्ताद्धातोः स्त्रियां भावाकर्त्रोरः स्यात् । ऊहेति । एवं ईक्षा उक्षा कुण्डा हुण्डा शिक्षा भिक्षा व्यतीहा व्यतीक्षा । क्तेट इति किम्? स्रस्तिः ध्वस्तिः आप्तिः दीप्तिः अक्तिः राद्धिः । चाय् अपचितिः । स्फूर्च्छा स्फूर्तिः । मूर्च्छा मूर्तिः । गुरोरिति किम्? स्फुर् स्फूर्तिः । व्यञ्जनादिति किम्? संशीतिः ॥ १६९ ॥

## षितोऽङ् ॥ १७० ॥ [ सि० ५।३।१०७ ]

**षिद्भ्यो धातुभ्यो भावाकर्त्रोः स्त्रियामङ् स्यात् । पचा ॥ १७० ॥**

**'षितो०'** पचेति । एवं क्षमा । क्षान्तिरिति तु क्षाम्यतेः । एवं घटा त्वरा प्रथा व्यथा जरा । 'ऋवर्णदृशोऽङि' (४।३।७) इति गुणः । ङकारो ङित्कार्यार्थः ॥ १७० ॥

## भिदादयः ॥ १७१ ॥ [ सि० ५।३।१०८ ]

**एते भावाकर्त्रोः स्त्रियामङन्ता निपात्याः । भिदा । छिदा ॥ १७१ ॥**

**'भिदा०'** निपात्या इति । अत्र यथादर्शनमिति शेषः । भिदा विदारणं । छिदा द्वैधीकरणम् ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

विदा विचारणा । मृजा शरीरसंस्कारः । क्षिपा प्रेरणम् । दया अनुकम्पा । रुजा रोगः । चुरा चौर्यम् । पृच्छा प्रश्नः । एतेऽर्थविशेषे । अन्यत्र भित्तिः कुड्यम् । छित्तिः चौर्यादिकरणाद्राजापराधः । विच्छित्तिः प्रकार इत्यादि । तथा ऋकृहृधृतॄभ्यः ५ संज्ञायां वृद्धिश्च । आरा शस्त्री, ऋतिरन्या । कारा गुप्तिः कृतिरन्या । हारा मानं, हृतिरन्या । धारा प्रपातः खड्गादेर्वा, धृतिरन्या । तारा ज्योतिः तीर्णिरन्या । तथा गुहिकुहिवसिवपितुलिक्षिपिक्षि७भ्यश्च संज्ञायाम् । गुहा पर्वतकन्दरा ओषधिश्च, गूढिरन्या । कुहा नाम नदी, कुहनान्या । वसा स्नेहद्रव्यं धातुविशेषश्च, उष्टिरन्या । वपा मेदोविशेषः, उप्तिरन्या । एवं तुला उन्मानं । क्षिपा रात्रिः । क्षिया आचारभ्रंशः । तथा संज्ञायामेव रिखिलिखिशुभिसिधिमिधिगुधिभ्यो ६ गुणश्च । रिखिः लिखेः समानार्थः सौत्रः । रेखा राजिः । लेखा सैव । शोभा कान्तिः । सेधा सत्त्वम् । मेधा बुद्धिः । गोधा प्राणिविशेषः दोस्त्राणं च । भिदादिराकृतिगणः । तेन चूडेत्यऽपि सिद्धम् ।

'अकृतस्य क्रिया चैव प्राप्ते बाधनमेव च । अधिकार्थविवक्षा च त्रयमेतन्निपातनात्' ॥ १ ॥

आदिशब्दानुवृत्त्या **'भीषिभूषिचिन्तिपूजिकथिकुम्बिचर्चिस्पृहितोलिदोलिभ्यः'** (५।३।१०९) एभ्यो दशभ्यो ण्यन्तेभ्यो भावाकर्त्रोरङ् स्यात् । ण्यन्तत्वादने प्राप्ते वचनम् । भीषा भूषा चिन्ता पूजा कथा कुम्बा चर्चा स्पृहा तोला दोला । बहुवचनं यथादर्शनमन्येभ्योऽपि । पीडा ऊना ॥ **'उपसर्गादातः'** (५।३।११०) उपसर्गपूर्वेभ्यो आकारान्तेभ्यो धातुभ्यः स्त्रियां भावाकर्त्रोरङ् स्यात् । उपदा उपधा आधा प्रधा प्रदा विधा सन्धा प्रमा । श्वादित्वात् क्तौ प्रमितिः । उपसर्गादिति किम् ? दत्तिः ॥ **'णिवेत्त्यासश्रन्थघट्टवन्देरनः'** (५।३।१११) ण्यन्तेभ्यो वेत्तिप्रभृतिभ्यश्च स्त्रियां भावाकर्त्रोरनः स्यात् । कारणा हारणा धारणा पारणा । 'उपस्थिता शोणितपारणा मे' इति **रघुवंशे** । कामना लक्षणा भावना वेदना आसना उपासना श्रन्थना । ग्रन्थेरप्यन्ये । ग्रन्थना घट्टना वन्दना । वेत्तीति तिवानिर्देशो ज्ञानार्थपरिग्रहार्थः ॥ **'इषोनिच्छायाम्'** (५।३।११२) इषेरनिच्छायाम् वर्त्तमानात् स्त्रियां भावाकर्त्रोरनः स्यात् । अन्वेषणा एषणा पिण्डैषणा । अनिच्छायामिति किम् ? इष्टिः । कथं इच्छायां प्राणैषणा वित्तैषणा परलोकैषणेति ? बहुलाधिकारात् ॥ **'पर्यधेर्वा'** (५।३।११३) परि-अधिपूर्वादिषेरनिच्छायां भावाकर्त्रोः स्त्रियामनो वा स्यात् । पर्येषणा परीष्टिः । अध्येषणा अधीष्टिः । अधीष्टिरिति नेच्छन्त्यन्ये ॥ १७१ ॥ सूत्रम्

## क्रुत्सम्पदादिभ्यः क्विप् ॥ १७२ ॥ [ सि० ५।३।११४ ]

**क्रुध् । सम्पद् ॥ १७२ ॥**

**'क्रु०'** क्रुधादिभ्योऽनुपसर्गेभ्यः पदादिभ्यश्च समादिपूर्वेभ्यः स्त्रियां भावकर्त्रोः क्विप् स्यात् । क्रुधेः क्रुत् । युधेः युत् । क्षुधेः क्षुत् । तृषेः तृट् । त्विषेः त्विट् । रुषेः रुट् । रुजेः रुट् । रुचेः रुक् । शुचेः शुक् । मुदेः मुत् । मृदेः मृत् । गृ गीः । त्रै त्रा । दिशेः दिक् । सृजेः स्रक् । तथा पदेः सम्पद् विपत् आपत् व्यापत् प्रतिपद् । षद्लं, संसत् परिषद् उपश्रुत् । स्रु परिस्रुत् । विदेः निवित् । शासेः प्रशीः आशीः । श्रु प्रतिश्रुत् उपश्रुत् । स्तु परिस्तुत् । नहेः उपानत् । वृषेः प्रावृट् । प्रुषेः विप्रुट् । वृतेः नीवृत् उपावृत् । यतेः संयत् रणः । समित् । भृगः उपभृत् । इन्धेः समित् । क्रुधादिः । सम्पदादिराकृतिगणः ॥ १७२ ॥ सूत्रम्

## भ्यादिभ्यो वा ॥ १७३ ॥ [ ५।३।११५ ]

**भीः भीतिः ॥ १७३ ॥**

'**भ्यादि०**' ( ५।३।११५ ) बिभेत्यादिभ्यो धातुभ्यः स्त्रियां भावाकर्त्रोः क्विप् वा स्यात् । भीः भीतिः । ह्रीः ह्रीतिः । लूः लूतिः । भूः भूतिः । कण्डूः कण्डूया । कृत् कृतिः । भित् भित्तिः । छित् छित्तिः । तुत् तुत्तिः । दृक् दृष्टिः । नशेः नक् नष्टिः । युजेः युक् युक्तिः । ज्वरेः जूः जूर्त्तिः । त्वरेः तूः तूर्त्तिः । अवतेः ऊः ऊतिः । श्रिवेः श्रूः श्रूतिः । मवतेः मूः मूतिः । नौतेः नुत् नुतिः । शकेः शक् शक्तिः । अत्रायं विशेषः '**व्यतिहारेऽनीहादिभ्यो ञः**' ( ५।३।११६ ) परस्य कृतप्रतिकृतिर्व्यतिहारः । एतद्विषयेभ्यो धातुभ्यः ईहादिवर्जेभ्यः स्त्रियां ञः स्यात् । बाहुलकाद्भावे क्त्यादीनामपवादः । परस्परमाक्रोशनं व्यावक्रोशी । व्याक्रोशी व्यावमोषी व्यावहासी व्यावलेखी व्यातिचारी व्यावचर्ची । व्यात्युक्षी 'य्वः पदान्तात्०' ( ७।४।५ ) इति ऐकारो न । 'नञस्वाङ्गादेः' (७।४।९) इति निषेधात् । अनीहादिभ्य इति किम् ? व्यतीहा व्यतीक्षा व्यतिपृच्छा व्यवहृतिः । व्युत्सुक्षेत्यप्येके । 'नित्यं ञञिनोऽण्' ( ७।३।५८ ) इति स्वार्थेऽण् वक्ष्यते । तेन केवलस्य प्रयोगो न स्यात् । 'श्वादिभ्य' इति समावेशाभिधानात् व्यवकुष्टिः व्याकुष्टिरित्यपि भवति । स्त्रियामित्येव । व्यतिपाको वर्त्तते ॥ १७३ ॥ सूत्रम्

## नञोऽनिः शापे ॥ १७४ ॥ [ सि० ५।३।११७ ]

**नञ्पूर्वाद्धातोः शापे गम्ये भावाकर्त्रोः स्त्रियामनिः स्यात् । अजननिस्ते भूयात् ॥ १७४ ॥**

'**नञो०**' अजननिरिति । एवमजीवनिः अकरणिः । 'स्वरात्' (२।३।८५) इति णत्वे अप्रयाणिः । अगमनिस्ते वृषल भूयात् । नञ् इति किम् ? मृतिस्ते जाल्म भूयात् । शाप इति किम् ? अकृतिस्तस्य पटस्य ॥ १७४ ॥

## ग्लाहाज्यः ॥ १७५ ॥ [ सि० ५।३।११८ ]

**एभ्यो निः स्यात् । ग्लानिः । हानिः । ज्यानिः ॥ १७५ ॥**

'**ग्ला०**' स्पष्टम् । ग्लानिः । म्लानिरित्यपि कश्चित् । अत्रायं विशेषः । '**प्रश्नाख्याने वेञ्**' ( ५।३।११९ ) प्रश्ने आख्याने च गम्यमाने स्त्रियां भावाकर्त्रोर्धातोरिञ् स्यात् । वावचनाद्यथाप्राप्तं च । का त्वं कारिमकार्षीः । पक्षे कां कारिकां कां कृत्यां कां कृतिम् । आख्याने सर्वां कारिमकार्षम् । पक्षे सर्वां कारिकां क्रियां कृत्यां कृतिं । का त्वं गणिमजीगणः । पक्षे कां गणिकां गणनां सर्वां गणिमजीगणम् । सर्वां गणिकां सर्वां गणनाम् । एवं पाचिं पाचिकां पक्तिं पचां पचिं । पाठिं पाठिकां पठितिम् । प्रश्नाख्यान इति किम् ? कृतिः हृतिः ॥ १७५ ॥ सूत्रम्

## पर्यायार्हर्णोत्पत्तौ च णकः ॥ १७६ ॥ [ सि० ५।३।१२० ]

**स्पष्टम् । भवत आसिका । इक्षुभक्षिका ॥ १७६ ॥**

'**पर्या०**' अस्यायमर्थः । पर्यायादिषु चतुर्ष्वर्थेषु प्रश्नाख्यानयोश्च गम्ययोः स्त्रियां भावाकर्त्रोर्णकः स्यात् । क्त्याद्यपवादः । पर्यायः क्रमः । आसिकेति; एवं भवतः शायिका अग्रगामिका । आसितुं शयितुं अग्रे गन्तुं च भवतः क्रम इत्यर्थः । अर्हणमर्हः योग्यता । अर्हति भवान् इक्षुभक्षिकाम् ओदनभोजिकां पयःपायिकाम् । ऋणं यत्परस्मै धार्यते । इक्षुभक्षिकां मे धारयसि । उत्पत्तिर्जन्म

इक्षुभक्षिका मे उदपादि । प्रश्ने का त्वं कारिकामकार्षीः । का त्वं गणिकामजीगणः । आख्याने सर्वां कारिकामकार्षम् । सर्वां गणिमजीगणम् । बहुलाधिकारात् कचिन्न भवति । चिकीर्षा मे । बुभुक्षा मे उदपादि । प्रश्नाख्यानयोगेऽपि पर्यायादिषु परत्वात् णक एव भवति । अत्रायं विशेषः । **'नाम्नि पुंसि च'** (५।३।१२१) धातोः स्त्रियां भावाकर्त्रोर्नाम्नि संज्ञायां णकः स्यात् । यथादर्शनं पुंसि च । प्रच्छर्दनं प्रच्छर्द्यतेऽनयेति वा प्रच्छर्दिका वान्तिः । एवं प्रवाहिका अधिरजः प्रवृत्तिः । विचर्चिका प्रस्कन्दिका क्षयरोगः । विपादिका पादस्फोटः । एवमेता रोगसंज्ञाः । भज्यन्तेऽस्यां भञ्जिका । उद्दालकपुष्पाणां भञ्जिका उद्दालकपुष्पभञ्जिका । 'अकेन क्रीडाजीवे' (३।१।८१) इति समासः । एवं वारणपुष्पप्रचायिका । अभ्योषाः खाद्यतेऽस्यामित्यभ्योषखादिका । सालभञ्जिका । एवंनामानः क्रीडाः । बहुलाधिकारादिह न भवति । शिरोऽर्दनं शिरोर्त्तिः । एवं शीर्षार्त्तिः । शिरोभितप्तिः । चन्दनतक्षा क्रीडा । बहुलाधिकारादेव च अर्दिरित्यत्रार्दतेरर्दयतेश्च यथाक्रममप्रत्ययमनप्रत्ययं च बाधित्वा क्तिरेव स्यात् । पुंसि च; अरोचनं न रोचतेऽस्मिन्निति वा अरोचकः अनाशकः । उत्कन्दनं पृषोदरादित्वात्सलोपे उत्कन्दकः उत्कर्णकः ॥ १७६ ॥ सूत्रम् ।

## भावे ॥ १७७ ॥ [ सि० ५।३।१२२ ]

**धात्वर्थनिर्देशे स्त्रियां धातोर्णकः स्यात् । शायिका ॥ १७७ ॥**

इति भावे स्त्रीप्रत्ययाः ।

**'भा०'** स्पष्टम् ॥ १७७ ॥ सूत्रम्

## क्लीबे क्तः ॥ १७८ ॥ [ सि० ५।३।१२३ ]

**नपुंसके भावे क्तः स्यात् । तव हसितम् ॥ १७८ ॥**

**'क्ली०'** क्तः स्यादिति घञाद्यपवादः स्त्रियां भावाकर्त्रोरिति च निवृत्तम् । तव हसितमिति । एवं नृत्तं मयूरस्य । व्याहृतं कोकिलस्य । क्लीब इति किम् ? हसः हासः ॥ १७८ ॥ सूत्रम्

## 'अनट्' ॥ १७९ ॥ [ सि० ५।३।१२४ ]

**क्लीबे भावेऽर्थे धातोरनट् स्यात् । गमनम् ॥ १७९ ॥**

**'अन०'** स्पष्टम् । गमनमिति । एवं भोजनं वचनं हसनं छात्रस्य । टकार उत्तरत्र ङ्यर्थः । अत्रायं विशेषः **'यत्कर्मस्पर्शात्कर्त्रङ्गसुखं ततः'** (५।३।१२५) येन कर्मणा संस्पृश्यमानस्य कर्त्तुरङ्गस्य सुखमुत्पद्यते ततः कर्मणः पराद्धातोः क्लीबे भावेऽर्थेऽनट् स्यात् । पूर्वेणैव प्रत्यये सिद्धे-नित्यसमासार्थं वचनम् । पयःपानम् । ओदनभोजनं सुखम् । नित्यसमासत्वात् पयसां पानमिति न कार्यं किन्तु पयसांपीतिरिति शब्दान्तरेणार्थः कथ्यते । कर्मेति किम् ? अपादानादिस्पर्शे मा भूत् । तूलिकाया उत्थानं सुखम् । स्पर्शादिति किम् ? अग्निकुण्डस्योपासनं सुखम् । कर्त्रिति किम् ? शिष्येण गुरोः स्नापनं सुखम् । स्नापयतेर्नं गुरुः कर्त्ता किं तर्हि ? कर्म । अङ्गग्रहणं किम् ? पुत्रस्य परिष्वजनं सुखम् । पुत्रस्पर्शोऽत्र शरीरसुखम् । किं तर्हि ? मानसी प्रीतिः, अन्यथा परपुत्रपरिष्वङ्गेऽपि स्यात् । सुखमिति किम् ? कण्टकानां मर्दनम् । सर्वत्रासमासः प्रत्युदाहार्यः । अथवा तत इति सम्बध्यन्ताच्चसुः येन कर्मणा स्पृश्यमानस्य कर्त्तुरङ्गसुखमुत्पद्यते तस्मिन् कर्मण्यभिधेये सामर्थ्यात्कर्त्तुः पराद्धातोरनट् स्यादित्यपरोऽर्थः । राज्ञा भुज्यन्ते राजभोजनाः शालयः । राजाच्छादनाः प्रावाराः । राजपरिधानानि वासांसि ॥ १७९ ॥ सूत्रम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## करणाधारे ॥ १८० ॥ [ सि० ५।३।१२९ ]

**अनयोरर्थयोर्धातोरनट् स्यात् । एषणी सक्तुधानी । 'रम्यादिभ्यः कर्त्तरि' (५।३।१२६) अनट् । रमणी । *क्वचिदनप्रत्ययसम्बधिनो नकारस्य यथायोगं णत्वम् वक्तव्यम् । प्रेङ्खणम् । प्रेङ्गणम् ॥ १८० ॥**

**'कर०'** अनट् स्यादिति । घञाद्यपवादः । एषणीति । एवं लेखनी विचयनी । इध्मव्रश्चनः पलाशशातनः अविलवनः श्मश्रुकर्त्तनः । आधारे; सक्तुधानीति । एवं गोदोहनी । तिलपीडनी । शयनं आसनं अधिकरणं आस्थानम् । सूत्रम् **'रम्या०'** (५।३।१२६) रमणीति । एवं नन्दनी ह्लादनी । इध्मव्रश्चनः । पलाशशातनः । बहुवचनं प्रयोगानुसरणार्थम् । अत्र विशेषः **'कारणम्'** (५।३।१२७) कृगः कर्त्तर्यनट् वृद्धिश्च निपात्यते । करोतीति कारणम् । कर्त्तरीति किम् ? करणम् । **'भुजिपत्यादिभ्यः कर्मापादाने'** (५।३।१२८) भुज्यादिभ्यः कर्मणि पत्यादिभ्यश्चापादानेऽनट् स्यात् । भुज्यत इति भोजनम् । निरदन्तीति निरदनम् । आच्छादि, आच्छादनम् । अवस्रावि, अवस्रवत् । अधः पतत् प्रयुङ्क्ते णिगि अवस्राव्यते इति अवस्रावणम् । अवसिच्, अवसेचनम् । अश् अशनम् । वस्, वस्यते इति वसनम् । आभृग्, आभरणम् । अपादाने; पत् पतत्यस्मादिति प्रपतनः । स्कन्दि प्रस्कन्दनः । श्च्योति प्रश्च्योतनः । स्नु, प्रस्नवणः । झॄष् निर्झरणः । धृ शङ्खोद्धरणः । दाग्, अपादानम् । बहुवचनं प्रयोगानुसरणार्थम् । ***क्वचिदित्यादि वार्त्तिकं स्पष्टम्** । अत्र सूत्राण्येवम् । **'नाम्यादेरेव ने'** (२।३।८६) अदुरुपसर्गान्तःशब्दस्थाद्रषृवर्णात्परस्य नागमे सति नाम्यादेरेव धातोः परस्य कृद्विषयस्य नकारस्य णो भवति । प्रेङ्खणम् प्रेङ्गणम् । प्रेङ्खमाणः प्रेङ्गमाणः । प्रेङ्खिणौ प्रेङ्गिणौ । अप्रेङ्खणिः अप्रेङ्गणिः । प्रेङ्खणीयं प्रेङ्गणीयम् । अन आन इन् अनि अनीया प्रयोजयन्ति । नाम्यादेरेव इति किम् ? प्रमङ्गनं प्रकम्पनम् । एवकार इष्टावधारणार्थः । न एव सति नाम्यादेरिति नियमे हि प्रेहणं प्रोहणमित्यादौ 'स्वरात्' ( २।३।८५ ) इत्यनेनापि णो न स्यात् । व्यञ्जनान्तादेवायं नियमः । ण्यन्तात्तु परत्वाद्विकल्पः । **'व्यञ्जनादेर्नाम्युपान्त्याद्वा'** (२।३।८७) उक्तणत्वनिमित्तात्परो यो व्यञ्जनादिर्नाम्युपान्त्यो धातुस्ततः परस्य कृद्विषयस्य नकारस्य स्वरादुत्तरस्य णो वा स्यात् । प्रमेहणं प्रमेहनं प्रकोपणम् प्रकोपनं । प्रगुप्यमाणः प्रगुप्यमानः । प्रकोपिणौ प्रकोपिनौ । अप्रकोपणिः अप्रकोपनिः । प्रकोपणीयं प्रकोपनीयम् । व्यञ्जनादेरिति किम् ? प्रेहणं प्रोहणं । नाम्युपान्त्यादिति किम् ? प्रवपणं प्रवहणम् । स्वरादित्येव । प्रभुग्नः । अदुरित्येव । दुर्मोहनः दुर्गूहनः । अलचटतवर्गशसान्तर इत्येव । प्रभेदनं प्रभोजनम् । स्वरादित्यनेन नित्यं प्राप्ते विभाषेयम् । **'णेर्वा'** ( २।३।८८ ) पूर्वोक्तनिमित्तात्परस्य ण्यन्ताद्धातोर्विहितस्य स्वरादुत्तरस्य कृद्विषयस्य नस्य णो वा स्यात् । प्रमङ्गणा प्रमङ्गना । प्रयापणं २ । प्रयापिणौ २ । अप्रयापणिः २ । प्रयापणीयम् २ । विहितविशेषणं किम् ? प्रयाप्यमाणः २ इति क्येन व्यवधानेपि यथा स्यात् । अलचटतवर्गशसान्तर इत्येव । प्रदापनम् । प्रतियापनम् । अनाम्यादिभ्यो धातुभ्यो नागमे सति नाम्यादेरेव ने इति नियमेनाप्राप्ते शेषेभ्यस्तु स्वरादित्येव नित्यं प्राप्ते उभयत्र विभाषेयम् । ***क्वचिदिति** वचनात् क्वचिन्न स्यात् । तथा च सूत्रम् । **'न ख्यापूग्भूभाकमगमप्यायवेपो णेश्च'** ( २।३।९० ) प्रागुक्तणत्वनिमित्तात्परे ये ख्यादयो ण्यन्ताश्च धातवस्तेभ्य परस्य कृद्विषयस्य नस्य णो न स्यात् । प्रख्यानं प्रख्यायमानं प्रख्यायिनौ अप्रख्यानिः । प्रख्यानीयम् । पूग् प्रपवनं प्रपूयमानं

प्रपाविनौ अप्रपवनिः प्रपवनीयम् । भू प्रभवनम् प्रभूयमानं प्रभाविनौ अप्रभवनिः प्रभवनीयम् । भा प्रभानं प्रभायमानं प्रभायिनौ अप्रभानिः प्रभानीयम् । कम प्रकमनं प्रकममानं प्रकामिनौ अप्रकमनिः प्रकमनीयम् । गम कमवत् । प्यायू प्रप्यानः प्रप्यानवान् प्रप्यायनं प्रप्यायमानः प्रप्यायिनौ अप्रप्यायनिः प्रप्यायनीयम् । वेपृ प्रवेपनं प्रवेपमानं प्रवेपिनौ अप्रवेपनिः प्रवेपनीयम् । ण्यन्तेभ्योऽपि प्रख्यापनं प्रभावना प्रभापना प्रकामना प्रगमना प्रप्यायना प्रवेपना । अण्यन्तेभ्यो नित्यं वेपो विकल्पेन ण्यन्तेभ्यश्च विकल्पेन प्राप्ते प्रतिषेधः । पूगो गकारः पवतेर्निवृत्त्यर्थः । तेन प्रपवणं प्रपूयमाणमित्यादि । ख्यातेर्णत्वमिति कश्चित् । प्रख्याणं प्रख्यायमाणम् । तथा **'देशेऽन्तरोऽयनहनः'** (२।३।९१) अन्तःशब्दात्परस्यायनशब्दस्य हन्तेश्च सम्बन्धिनो नस्य देशेऽभिधेये णो न स्यात् । अन्तरय्यतेऽस्मिन्निति अन्तरयनो देशः । एवमन्तर्हननो देशः । देश इति किम् ? अन्तरयणं वर्त्तते । अन्तर्हणनं अन्तर्हण्यते । अन्तर्घणो देशे इति तु निपातनात् (५।३।३४) । अन्तर इति किम् ? प्रायणो प्रहणनो देशः । अयनहन इति किम् ? अन्तर्णमनो देशः ॥ १८० ॥ सूत्रम्

## पुन्नाम्नि घः ॥ १८१ ॥ [ सि० ५।३।१३० ]

**धातोः करणाधारयोर्घः स्यात् पुंसि । दन्तच्छदः । 'एकोपसर्गस्य च घे' (४।२।३४) इति ह्रस्वः । आकरः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घस्यापवादः । लेखः । रागः । 'अवात्तृस्तृभ्याम्' (५।३।१३३) अवतारः । अवस्तारः । उदङ्कोऽतोये (५।३।१३५) आनायो जाले (५।३।१३६) ॥ १८१ ॥**

**'पुन्ना'** पुंसो नाम इति संज्ञा, तत्र गम्यमाने करणाधारयोर्धातोर्घः स्यात् । करणे दन्तच्छद इति । अत्रोपयोगिसूत्रम् **'एको०'** (४।२।३४) एकोपसर्गपूर्वस्यानुपसर्गस्य च छदेर्घपरे णौ ह्रस्वः । प्रच्छाद्यतेऽनेनेति प्रच्छदः परिच्छदः उपच्छदः । छाद्यतेऽनेनेति च्छदः । सप्त च्छदाः अस्येति सप्तच्छदः । एकोपसर्गस्येति किम् ? समुपच्छादः । घ इति किम् ? प्रच्छादनम् । तनुच्छादनम् ॥ एवं उरश्छदः प्लवः प्रणवः करः प्रत्ययः शरः । आधारे एत्य कुर्वन्त्यस्मिन्नित्याकरः । एवं आलवः आपवः भवः लयः विषयः भरः प्रहरः प्रसरः अवसरः । पुंग्रहणं किम् ? विचीयतेऽनयेति विचयनी । प्रधीयते विकारोऽस्मिन्निति प्रधानम् । नाम्नीति किम् ? प्रहरणो दण्डः । बहुलाधिकारात् क्वचिन्न स्यात् । प्रसाधनः दोहनः । घकार 'एकोपसर्गस्य च घे' इत्यत्र विशेषणार्थः । सूत्रम् **'व्यञ्ज०'** (५।३।१३२) अस्यायमर्थः । व्यञ्जनान्ताद्धातोः पुन्नाम्नि करणाधारे घञ् स्यात् । लेखः । राग इति । एवं विदन्त्यनेन विन्दति विन्दते वा वेदः । चेष्टतेऽनेन चेष्टी बलम् ? एत्य पचन्त्यस्मिन्निति पाकः उत्पूर्वादपि, नद्युत्तारः । आरामः बन्धः नेगः वेशः रङ्गः क्रमः प्रासादः अपामार्गः नीमार्गः । सूत्रम् **'अवा०'** (५।३।१३३) अवपूर्वाभ्यामाभ्यां करणाधारयोः पुन्नाम्नि घञ् स्यात् । अवतरन्त्यनेनास्मिन्वेत्यवतारः अवस्तृणन्त्यनेनास्मिन्निति वा अवस्तारः । बहुलाधिकारादसंज्ञायामपि । अवतारो नद्याः । येन केनापि पथावतीर्यते स एवावतारो न तु कस्यापि संज्ञा । करणाधार इत्येव अवतरः । केचित्तु संज्ञायामसंज्ञायां च भावेऽकर्त्तरि कारके च स्त्रो नित्यं तरतेस्तु विकल्पेन घञमिच्छन्ति । द्विवचनं करणाधार इति यथासङ्ख्यनिवृत्त्यर्थम् । **'उद०'** (५।३।१३५) उत्पूर्वादञ्चतेः पुन्नाम्नि करणाधारयोर्घञ् निपात्यते । अतोये । तोयविषयश्चेद्धात्वर्थो न भवति । जलं चेत्तेन नोदच्यते इत्यर्थः । तैलोदङ्कः घृतोदङ्कः । अतोय इति किम् ? उदकोञ्चनः । व्यञ्जनान्ताद् घञ्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति सिद्धे तोये प्रतिषेधार्थं वचनम् । रूपाविशेषाद् घोऽपि न स्यात् । **'आना०'** (५।३।१३६) आङ्पूर्वान्नयतेः करणे पुन्नाम्नि घञ् निपात्यते । जालं चेद्वाच्यं स्यात् । आनायन्ति तेनानायो मत्स्यानां मृगाणां वा । आविशब्दात् । **'खनो डडरेकेकवकघं च'** (५।३।१३७) खनेः पुन्नाम्नि करणाधारयोः ड डर इक इकवक घा एते पञ्च, चकारात् घञ् चेति षट् प्रत्ययाः स्युः । आखायते आखन्यते वाऽनेनास्मिन् वा आखः आखरः आखनिकः आखनिकवकः आखनः आखानः५ ॥ १८१ ॥ सूत्रम् ।

## गोचरसञ्चरवहव्रजव्यजखलापणनिगमबकभगकषाकषनिकषम् ॥ १८२ ॥ [ सि० ५।३।१३१ ]

## न्यायावायाध्यायोद्यावसंहारावहाराधारदारजारम् ॥ १८३ ॥ [ सि० ५।३।१३४ ]

एते घघञन्ता निपात्याः ॥ १८२ ॥ १८३ ॥

**'गोच०'** एते शब्दाः करणाधारयोः पुन्नाम्नि व्यञ्जनाद् घञिति प्राप्ते घप्रत्ययान्ता निपात्यन्ते । गावश्चरन्त्यस्मिन्निति गोचरो देशः । व्युत्पत्तिमात्रं चेदम्, विषयस्य तु संज्ञा । अनेकात्मकं वस्तु गोचरः सर्वविदाम् । सञ्चरन्तेऽनेन सञ्चरः । वहन्ति तेन वहः वृषस्कन्धदेशः । व्रजन्त्यस्मिन्निति व्रजः । विपूर्वो जिः व्यजत्यनेन व्यजः । निपातनाद्वीभावाभावः । खलन्त्यस्मिन्निति खलः । एत्य पणायन्त्यस्मिन्निति आपणः । निगच्छन्ति तत्रेति निगमः । वक्तीति बकः बाहुलकात्कर्त्तरि । निपचन्त्यनेन निपकः इति कश्चित् । भज्यतेऽनेनास्मिन् वा भागः । भगमिति तु बाहुलकात् क्लीबेऽपि घः । कषत्यस्मिन्निति कषः । एवमाकषः निकषः ॥ १८२ ॥ सूत्रम्

**'न्याया०'** स्वरान्तार्थं आरंभः । एते इति एते शब्दाः *घघञन्ता इति गोचरादयो घान्ता न्यायादयश्च पुन्नाम्नि करणाधारयोरर्थे प्राप्ते घञन्ता निपात्यन्ते । निपूर्वस्येणो नीयतेऽनेनेति न्यायः । एत्य वयन्ति वायन्ति तत्रेत्यावायः । अधीयतेऽनेनास्मिन् वाध्यायः । उद्युवन्ति तेन तस्मिन् वा उद्यावः । संहरन्ति तेन संहारः । अवहरन्ति तेन तस्मिन् वावहारः । आध्रियते तत्रेत्याधारः दीर्यते एभिरिति दाराः । जीर्यतेऽनेनेति जारः । दारयन्तीति दाराः । जरयतीति जारः इति कर्त्तरि केचिन्निपातयन्ति । ननु जार इत्यस्य 'कगेवनूजॄष०' (४।२।२५) इति ह्रस्वत्वे प्राप्ते दीर्घार्थं निपातः क्रियताम्, दार इत्यस्य तु किं निपातनेन । सत्यम् । भयविवक्षायां दृधातोर्घटादित्वात् दरयतीति यदा क्रियते तदापि दीर्घो मा भूदित्येवमर्थं निपातः ॥ १८३ ॥ सूत्रम्–

## इकश्तिव स्वरूपार्थे ॥ १८४ ॥ [ सि० ५।३।१३८ ]

धातोः स्वरूपेऽर्थे च वाच्ये एते स्युः । भञ्जिः कुधिः वेत्तिः भुजिः क्रियते पचतिः वर्तते ॥ १८४ ॥

**'इकि०'** भञ्जिरित्यत्र इप्रत्ययः । कुधिरित्यत्र किप्रत्ययः, कित्त्वाद्गुणाभावः । वेत्ति इत्यत्र श्तिव्प्रत्ययः । अत्र धातोः स्वरूपेऽभिधेये एते प्रत्ययाः भञ्जिरित्यादयः एवंस्वरूपा धातव इत्यर्थः । धातोरर्थे यथा; यजेरङ्गानि यज्ञस्याङ्गानि । भुजिः क्रियते भोजनं क्रियते इत्यर्थः । केचिदेतान् प्रत्ययान्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कर्त्तरि समानयन्ति । **स्वमते** तु कर्मकर्तृभावादिविशेषानभिधानात् सामान्येन भवन्ति.। नन्वेवं 'भवतेः सिज्लुपि' (४।३।१२) 'न कवतेर्यङः' (४।१।४७) इत्यादौ शव् कथं भविष्यति । तत्र हि कर्तृविहिते शितीत्युक्तमित्यत्रोच्यते । भवतेः सिज्लुपीत्यादौ स्वरूपेऽपि सूत्रसामर्थ्यात् शव् न तु क्यः । पचतिर्वर्त्तते इत्यादौ बाहुलकाद्भावेऽपि शव् क्याभावश्च ॥ १८४ ॥ सूत्रम्

## दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात् खल् ॥ १८५ ॥ [ सि० ५।३।१३९ ]

**कृच्छ्रार्थाद्दुरोऽकृच्छ्रार्थाभ्यां स्वीषद्भ्यां च पराद्धातोः खल् स्यात् । दुःशयं त्वया । दुःकरः कटः । सुशयं सुकरः । ईषच्छयं ईषत्करः ॥ १८५ ॥**

**'दुःस्वी०'** कृच्छ्रं दुखम् । अकृच्छ्रं सुखम् । खल् स्यादिति । कृत्यादीनामपवादः । 'तत्साप्यानाप्यात्' (पृष्ठ ८२८) इतिसूत्रप्रामाण्यात् सकर्मकाद्धातोरयं कर्मणि अकर्मकाच्च भावे इति । दुःखेन शय्यते इति दुःशयम । दुःखेन क्रियते इति दुष्करः कटः । सुखेन शय्यते इति सुशयम् । सुखेन क्रियते इति सुकरः कटः । ईषत् अनायासेन शय्यते इति ईषच्छयम् । ईषत् अनायासेन क्रियते इति ईषत्करः कटः । दुःस्वीषत इति किम् ? कृच्छ्रसाध्यः सुखसाध्यः । कृच्छ्राकृच्छ्रार्थादिति किम् ? ईषल्लभ्यं धनं कृपणात् अल्पमित्यर्थः । खकारः 'खित्यनव्ययात्' (३।२।१११) इति मोऽन्तार्थः । लकारः खलर्थाश्चेत्यत्र विशेषणार्थः । इह स्त्रीप्रत्ययात्प्रभृत्यसरूपविधेरभावात् स्पर्द्धेऽलः स्त्रीप्रत्ययाः, स्त्रियास्तु खलनौ परत्वाद्भवतः । तत्र चयः जयः लवः यवः इत्यादावलोऽवकाशः, कृतिर्हृतिरित्यादौ स्त्रीप्रत्ययस्य, चितिः स्तुतिरित्यादौ तूभयं प्राप्नोति । अलोऽविशेषेणाभिधानात् । तत्र परत्वात् स्त्रीप्रत्ययो भवति । तथा दुर्भेदः सुभेद इत्यादौ खलोऽवकाशः । अलस्तु पूर्व एव । दुश्चयं सुचयं दुर्लभं सुलभमित्यादौ तु परत्वात्खल् भवति । इध्मप्रश्चनः पलाशच्छेदनः इत्यादावनस्यावकाशः । अलस्तु पूर्वक एव । पलाशशातनो अविलवन इत्यादौ तूभयप्राप्तौ परत्वादनो भवति । एवं हृतिः कृतिरित्यादौ स्त्रीप्रत्ययस्यावकाशः । दुर्भेदः सुभेद इत्यादौ खलः । दुर्भेदा सुभेदा इत्यादौ तूभयप्राप्तौ परत्वात् खल् भवति । तथा इध्मप्रश्चनः पलाशच्छेदनः इत्यादावनस्यावकाशः । कृतिरित्यादौ स्त्रीप्रत्ययस्य, सक्तुधानी तिलपीडनीत्यादौ तूभयप्राप्तौ तु परत्वादनडेव भवति । अत्रायं विशेषः । **'च्व्यर्थे कर्त्राप्याद्भूकृगः'** (५।३।१४०) कृच्छ्राकृच्छ्रार्थेभ्यो दुःस्वीषद्भ्यः पराभ्यां च्व्यर्थे वर्त्तमानाभ्यां कर्तृकर्मवाचिभ्यां शब्दाभ्यां पराभ्यां यथासङ्ख्यं भूकृग्भ्यां परः खल् स्यात् । खानुबन्धबलात् कर्तृकर्मणोरानन्तर्ये, खानुबन्धो हि मागमार्थं क्रियते । यदि चात्र कर्मकर्तृवाचिभ्यां परेभ्यो दुःस्वीषद्भ्यः पराभ्यामिति विपरीतो विशेषणविशेष्यभावः क्रियेत तदा कर्तृकर्मवाचिभ्यां दुरादिभिर्व्यवधानात् मोऽन्तो न स्यात् । दुःस्वीषद्भ्यस्तु अव्ययत्वान्नमागमप्राप्तिरिति । दुःखेनानाढ्येन भूयते दुराढ्यंभवं भवता । सुखेनानाढ्येन भूयते स्वाढ्यंभवं भवता ईषदाढ्यंभवं भवता । दुःखेनानाढ्यः आढ्यः क्रियते दुराढ्यंकरो मैत्रो भवता । सुखेनानाढ्यः आढ्यः क्रियते स्वाढ्यंकरश्चैत्रो भवता । ईषदाढ्यंकरश्चैत्रो भवता । सुखेनाकटः कटः क्रियन्ते सुकटंकराणि वीरणानि । सुकरः कटो वीरणैरिति तु करणविवक्षा । च्व्यर्थ इति किम् ? दुराढ्येन भूयते स्वाढ्येन भूयते ईषदाढ्येन भूयते । आढ्य एव सन् कञ्चिद्विशेषमापद्यते इत्यर्थः । एवं दुराढ्यः क्रियते इत्यादि । अभूतप्रादुर्भावेऽपि वा प्रकृतेरविवक्षणात् अर्थो नास्ति ॥ १८५ ॥ सूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## शासियुधिदृशिधृषिमृषातोऽनः ॥ १८६ ॥ [ सि० ५।३।१४१ ]

**कृच्छ्राकृच्छ्रार्थदुःखीषत्पूर्वेभ्य एभ्य आदन्ताच्च धातोरनः स्यात् । दुःशासनः सुशासनः ईषच्छासनः । दुर्योधनः ३ । दुर्दर्शनः ३ । दुर्धर्षणः ३ । दुर्मर्षणः ३ । दुरुत्थानम् ३ ॥ १८६ ॥**

'**शासि०**' दुःखेन शिष्यते इति दुःशासनः । सुखेन शिष्यते सुशासनः । ईषत् अनायासेन शिष्यते ईषच्छासनः । एवं दुर्योधनः सुयोधनः ईषद्योधनः इति रूपत्रयम् । त्रिकेणाङ्केन सर्वत्र ज्ञेयम् । आदन्त; दुःखेन उत्थीयते दुरुत्थानं भवता । सूत्थानं ईषदुत्थानं । दुष्पानं पयो भवता । सुपानं ईषत्पानम् । आदन्तवर्जितेभ्यः केचिद्विकल्पमिच्छन्ति । तन्मते दुःशासः दुर्दर्शः दुर्धर्षः दुर्मर्षः इत्याद्यपि भवति । कथमीषद्दरिद्रः ? आनप्रत्ययस्य विषयेप्याकारलोपेनादन्तत्वाभावात् खलेव । ननु धातोरकर्मकत्वाद्भावे प्रत्यये कथमत्र पुंस्त्वम् । दुरुत्थानमित्यादिवन्नपुंसकत्वप्राप्तिः । सत्यम् । 'कालाध्व०' ( २।२।२३ ) इत्यनेन मासादेः कर्मत्वे कर्मणि, खल्, न तु भावे, ततो यत्र मासादौ दरिद्रैर्भूयते स ईषद्दरिद्र उच्यते ॥ १८६ ॥

अथ **क्त्वा**प्रत्ययमभिधातुं प्रक्रमते । सूत्रम्

## प्राक्काले ॥ १८७ ॥ [ सि० ५।४।४७ ]

**परकालेन धात्वर्थेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानाद्धातोः सम्बन्धे क्त्वा वा स्यात् । आसित्वा भुङ्क्ते । 'हाको हि क्त्वि' ( ४।४।१४ ) हित्वा । 'उवर्णात्' ( ४।४।५९ ) इतीड् निषेधे भूत्वा । 'ईर्व्यञ्जनेऽयपि' ( ४।३।९७ ) इति पीत्वा गीत्वा । यपि तु निपाय ॥ १८७ ॥**

'**प्रा०**' आसित्वा भुङ्क्ते इति । अत्रासिक्रियाया वर्त्तमानत्वेऽपि भुजिक्रियापेक्षया प्राक्काल्यम् । अत एव क्त्वाविकल्पपक्षे आस्यते भोक्तुमित्यत्र वर्त्तमाना । एवं भुक्त्वा व्रजति । भुक्त्वा पुनर्भुङ्क्ते । स्नात्वा भूत्वा पीत्वा व्रजति । पक्षे आस्यते भोक्तुमित्यपि भवति । तुल्यकर्तृक इत्येव । भुक्तवति गुरौ शिष्यो व्रजति । प्राक्काल इति किम् ? भुज्यते पीयते चानेन । अथ यदनेन भुज्यते ततोऽयं पचति । यदनेनाधीयते ततोऽयं शेते इत्यत्र कथं क्त्वा न भवति । उच्यते । यत्र यच्छब्देन सह ततः शब्दः प्रयुज्यते तत्र ततःशब्देनैव प्राक्कालताभिधीयते इत्युक्तार्थत्वान्न भवति । यदनेन भुक्त्वा गम्यते ततोऽयमधीयते इत्यत्र भोजनगमनयोः क्रमे क्त्वा, गमनाध्ययनयोस्तु ततः शब्देनैव क्रमस्याभिधानाद्गमेर्न भवति ।

अथात्र यथास्थानमुपयोगिसूत्राण्याह । '**हा०**' ( ४।४।१४ ) ओहांक् इत्यस्य तादौ किति क्त्वाप्रत्यये परे हिः स्यात् । ककारो हाङ्निवृत्त्यर्थः । हात्वा । क्त्वि इति किम् ? हीनः । तीत्येव । प्रहाय । यङ्लुपि जहित्वा । द्वित्वे पूर्वदीर्घत्वमपीच्छन्त्येके । जाहित्वा उभयत्रेटि आतो लुक् । एवं धागोऽपि । 'धागः' (४।४।१५) इति सूत्रेण हिरादेशः । हित्वा । गकारः ट्धेनिवृत्त्यर्थः । धीत्वा । तीत्येव । प्रधाय । यङ्लुपि दाधित्वा । 'दत्' ( ४।४।१० ) इति सूत्रे धावर्जितस्य दासंज्ञस्य तादौ किति इत्यादेशे डुदांग्क् दत्वा । 'दासोमास्थ इः' ( ४।४।११ ) इति एषां तादौ किति इत्वे दित्वा सित्वा मित्वा स्थित्वा । 'छाशोर्वा' ( ४।४।१२ ) इति छित्वा छात्वा । शित्वा शात्वा । **उवर्णादित्यादिवार्त्तिकस्यायमर्थः ।** उवर्णान्तादेकस्वराद्धातोर्विहितस्य कित इड् न स्यात् । युत्वा



Jain Education International For Personal & Private Use Only www.jainelibrary.org

लूत्वा । कित इत्येव । यविता लविता । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) इत्यस्यायमर्थः । गापास्थासादामाहाकां यप्वर्जिते क्ङिति अशिति व्यञ्जनादौ प्रत्यये परे ईः स्यादिति । देति दासंज्ञाधातवः ॥ १८७ ॥ सूत्रम्

## जॄव्रश्चः क्त्वः ॥ १८८ ॥ [ सि० ४।४।४१ ]

**आभ्यां परस्य क्त्व इट् स्यात् । जरित्वा २ व्रश्चित्वा । 'ऊदितो वा' (४।४।४२) इट्, दान्त्वा दमित्वा । 'क्षुधवसस्तेषाम्' (४।४।४३) इतीटि, क्षुधित्वा उषित्वा । *लुभ्यञ्चेरिति, लुभित्वा अञ्चित्वा । 'पूङ्क्लिशिभ्यो नवा' (४।४।४५) इटि वेट्, पूत्वा पवित्वा । क्लिष्ट्वा क्लिशित्वा ॥ १८८ ॥**

'जॄ०' 'वृतो नवानाशीः०' (४।४।३५) इति दीर्घविकल्पे जरीत्वा जरित्वा इति रूपद्वयम् । व्रश्चित्वेति क्त्वा (४।३।२९) इत्यनेनाकित्त्वान्न य्वृत् । जॄ इति क्रैयादिकस्य ग्रहणम् । दैवादिकस्य तु सानुबन्धस्य जीर्त्वा । अस्यैवेच्छन्त्यन्ये । जॄ इत्यस्य 'ऋवर्णश्र्यूर्णुग'० (४।४।५८) इति प्रतिषेधे व्रश्चेरौदित्त्वाद्विकल्पे प्राप्ते वचनम् । सूत्रम् 'ऊदि०' (४।४।४२) स्पष्टम् । दान्त्वा दमित्वा इति । एवं शान्त्वा शमित्वा । तान्त्वा तमित्वा । द्यूत्वा देवित्वा । स्यूत्वा सेवित्वा । यमूंसिध्यत्योरप्राप्ते शेषाणां प्राप्ते विभाषा । 'क्षुधवस०' (४।४।४३) क्षुधवस इति आभ्यां परेषां क्तक्तवतुक्त्वामिट् स्यादिति । यङ्लुपि वावसित्वा । यङ्लुपि नेच्छन्त्यन्ये । वावस्त्वा । गणनिर्देशात् 'यजादिवचे' (४।१।७९) इति न य्वृत् । वसिति वसतेर्ग्रहणम् । वस्तेस्त्विडस्त्येव । *लुभ्यञ्चेरिति । 'लुभ्यञ्चेर्विमोहार्चे' (४।४।४४) विमोहेऽर्चायां चार्थे वर्तमानाभ्यां क्तक्तवतुक्त्वामिट् स्यात् । लुभेः क्त्वि 'सहलुभ०' इत्यादिनाञ्चेश्च 'ऊदितो वा' (४।४।४२) इति विकल्पे प्राप्ते वचनम् । लुभित्वा लोभित्वा केशान् गतः । गुरूनञ्चित्वा स्तौति । विमोहार्च इति किम् ? लुब्ध्वा लुभित्वा लोभित्वा । 'वौ व्यञ्जनादे०' (४।३।२५) इति सेटः क्त्वो वा कित्त्वम् । अक्त्वा अञ्चित्वा कूपादुदकम् । सूत्रम् 'पूङ्०' (४।४।४५) पूङ्क्लिशिभ्यां परेषां क्तक्तवतुक्त्वामिड्वा स्यात् । पूङो ङकारः पूग्निवृत्त्यर्थः । बहुवचनं क्लिश्यतिक्लिश्नात्योर्ग्रहणार्थम् । पूङ 'उवर्णात्' इति नित्यं निषेधे प्राप्ते क्लिश्यतेर्नित्यमिटि प्राप्ते क्लिश्नातेश्चौदित्त्वात् क्त्वायां विकल्पे सिद्धेऽपि क्तयोर्नित्यं प्राप्ते प्रतिषेधे विकल्पार्थं वचनम् । आदिशब्दात् **'सहलुभेच्छरुषरिषस्तादेः'** (४।४।४६) एभ्यः परस्य तकारादेस्त्याद्यशित आदिरिड्वा । सोढा सहित्वा । लुब्ध्वा लुभित्वा । इष्ट्वा एषित्वा । इच्छेतिनिर्देशात् 'इषत् इच्छायाम्' इत्यस्य ग्रहणम् । 'इषच् गतौ' 'इषश् आभीक्ष्ण्ये' इत्यनयोस्तु नित्यमिट् । प्रेषिता प्रेषितुं प्रेषितव्यम् । केचित् इषशोऽपि विकल्पमाहुः रुष्ट्वा रुषित्वा २ । रिष्ट्वा २ ॥ १८८ ॥ सूत्रम्

## क्त्वा ॥ १८९ ॥ [ सि० ४।३।२९ ]

**धातोः क्त्वा सेट् किद्वन्न स्यात् । देवित्वा ॥ १८९ ॥**

'क्त्वा०' देवित्वा इति । एवं सेवित्वा वर्त्तित्वा वर्द्धित्वा भ्रंशित्वा ध्वंसित्वा व्रश्चित्वा । कथं कुटत् कुटित्वा ? 'कुटादेर्ङिद्वदञ्णित्' (४।३।१७) इति ङिद्वद्भावात् । सेडित्येव कृत्वा इष्ट्वा शान्त्वा ॥ १८९ ॥ सूत्रम्

## स्कन्दस्यन्दः ॥ १९० ॥ [ सि० ४।३।३० ]

**आभ्यां क्त्वा किद्वन्न स्यात् । स्कन्त्वा स्यन्त्वा ॥ १९० ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'स्कन्द०'** स्यन्त्वा इति । एवं प्रस्कन्द्य प्रस्यन्द्य । **केचित्** प्रस्कद्य प्रस्यद्येति यपः किस्व-मिच्छति, तन्मतसङ्ग्रहार्थं तूक्त्वेति द्वितकारो निर्देशः, तकारादिः क्त्वा इत्यर्थः । अनिडर्थं वचनम्; सेटि तु पूर्वसूत्रेण स्यन्दित्वेत्येव भवति ॥ १९० ॥ सूत्रम् ।

## क्षुधक्लिशकुषगुधमृडमृदवदवसः ॥ १९१ ॥ [ सि० ४।३।३१ ]

**एषामष्टानां सेट् क्त्वा कित् स्यात् । 'क्षुधवस'० ( ४।४।४३ ) इतीटि क्षुधित्वा उदित्वा उषित्वा । †रुदविदेति क्त्वः किस्वे, रुदित्वा मुषित्वा गृहीत्वा सुप्त्वा पृष्ट्वा । वौ व्यञ्जनादे-रिति वा किस्वे, द्युतित्वा द्योतित्वा ॥ १९१ ॥**

**'क्षुध०'** नेति निवृत्तम् । तत आह । किद्वत्स्यादिति । क्षुधित्वेति एवं क्लिशित्वा कुषित्वा गुधित्वा मृडित्वा मृदित्वा उदित्वा । उषित्वेति क्त्वः किस्वात् यजादिवचेरिति य्वृत् । क्षुधेर्नेच्छन्त्यन्ये । क्त्वेति प्रतिषेधे 'वौ व्यञ्जनादेः०' ( ४।३।२५ ) इति विकल्पे च प्राप्ते वचनम् । †रुदविदेतीति । **'रुदविदमुषग्रहस्वपप्रच्छः सन् च'** (४।३।३२) सेडिति निवृत्तम् । एभ्यः परः सन् क्त्वा च किद्वद्भवतः । रुदविदमुषां 'वौ व्यञ्जनादे०' (४।३।२५) इति विकल्पे ग्रहेस्तु 'क्त्वा' (४।३।२९) इति प्रतिषेधे प्राप्ते वचनम् । स्वपिप्रच्छयोः सन्नर्थमेव । क्त्वा हि किदेव । **'वौ व्यञ्जनादे'रिति** वार्तिकं स्पष्टम् । प्राग् व्याख्यातम् ( पृष्ठ ८७६ ) ॥ १९१ ॥ सूत्रम्

## जनशो न्युपान्त्ये तादिः क्त्वा ॥ १९२ ॥ [ सि० ४।३।२३ ]

**जन्तान्नशेश्च न्युपान्त्ये सति तादिः क्त्वा किद्वद्वा स्यात् । रक्त्वा रङ्क्त्वा । नष्ट्वा नंष्ट्वा ॥१९२॥**

**'जन०'** रङ्क्त्वा इति । एवं भक्त्वा भङ्क्त्वा । मक्त्वा २ । 'मस्जेः सः' (४।४।११०) इति नः । नंष्ट्वेति । 'नशो धुटि' (४।४।१०९) इति नः । नीति किम् ? भुक्त्वा इष्ट्वा । उपान्त्य इति किम् ? निक्त्वा । क्त्वेति किम् ? भङ्क्ता नंष्टा । तादिरिति किम् ? विभज्य । अञ्जित्वा ॥ १९२ ॥

## ऋत्तृषमृषकृशवञ्चलुञ्चथफः सेट् ॥ १९३ ॥ [ सि० ४।३।२४ ]

**यथासम्भवं न्युपान्त्ये सत्येभ्यः सेट् क्त्वा किद्वद्वा स्यात् । ऋतित्वा अर्तित्वा तृषित्वा तर्षित्वा । मृषित्वा मर्षित्वा । कृशित्वा कर्शित्वा । वचित्वा वञ्चित्वा । लुचित्वा लुञ्चित्वा । श्रथित्वा श्रन्थित्वा ग्रथित्वा ग्रन्थित्वा । गुफित्वा गुम्फित्वा ॥ १९३ ॥**

**'ऋत्तृ०'** यथासम्भवमिति । न्युपान्त्य इति विशेषणं थफान्तानां नान्येषां सम्भवव्यभिचारा-भावात् । एभ्य इति 'ऋत घृणागतिस्पर्द्धेषु' 'तृषच् पिपासायाम्' 'मृषीच् तितिक्षायाम्' 'कृशच् तनुत्वे' 'वञ्चू चञ्चू त्वञ्चू० लुञ्च् अपनयने' 'श्रन्थ ग्रन्थश् सन्दर्भे' 'गुफ गुफत् ग्रन्थने' 'रिफत् रिंफत् हिंसायाम्' इति । गुम्फित्वेति । एवं ऋफित्वा ऋम्फित्वा । न्युपान्त्य इत्येव । कुथ् कोथित्वा । पुथ् पोथित्वा । रिफ् रेफित्वा । क्त्वेत्येव ग्रथितः २ । सेडिति किम् ? वञ्चू वंक्त्वा । मृषू, मृष्ट्वा । ऊदित्त्वात् क्त्वायां वेटौ । विहितविशेषणात् ऋफित्वेत्यत्र नलोपेऽपि किस्वाद्गुणो न भवति । क्त्वेत्यनेन किस्वप्रतिषेधे प्राप्ते विकल्पार्थं वचनम् ॥ १९३ ॥

अथ **क्त्वाप्रत्ययस्य** कार्यविशेषमाह । सूत्रम्

## अनञः क्त्वो यप् ॥ १९४ ॥ [ सि० ३।२।१५४ ]

**नञ्वर्जात्पूर्वपदात्परं यदुत्तरपदं तदवयवस्य क्त्वो यप् स्यात् । प्रकृत्य प्रदाय । अनञ इति किम् ? *अकृत्वा ॥ १९४ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'अन०'** प्रदायेति । एवमुच्चैःकृत्य नानाकृत्य । *अकृत्वेति । एवं परमकृत्वा । अनञ इति नञ्सदृशमव्ययं गृह्यते इतीह नञोऽनव्ययाच्च न भवति । उत्तरपदस्येत्येव । अलङ्कृत्वा ॥ १९४ ॥

अत्रोपयोगिसूत्राण्याह । सूत्रम्

## लघोर्यपि ॥ १९५ ॥ [ सि० ४।३।८६ ]

**लघोः परस्य णेर्यप्यय् स्यात् । प्रशमय्य ॥ १९५ ॥**

**'लघो०'** प्रशमय्येति । एवं प्रबेभिदय्य प्रगणय्य । प्रबेभिद्यमानं प्रयुङ्क्ते यङन्ताण्णिग् न यङ्लुबन्तात् । 'अतः' (४।३।८२) इत्यलोपे 'योऽशिति' (४।३।८०) यलुप् अस्य स्थानित्वाद्गुणाभावः । प्रबेभिदनं पूर्वम् । यङ्लुबन्ताद्धि णिगि गुणः स्यात् । 'न वृद्धिश्च' इति तु नोपतिष्ठते । यङः पूर्वं लोपात् । वचनसामर्थ्यादेकेन वर्णेन व्यवधानमाश्रीयते, न तु भूतपूर्वन्यायोऽत इत्यकरणात् । ननु वचनादेकवर्णव्यवधानं तदाश्रीयते यदाऽव्यवहितो न सम्भवति । अत्र तु गणय्येत्यादौ चुरादयदन्तेषु प्रबेभिदय्येत्यादौ च यङोऽकारलोपे भूतपूर्वगत्याऽव्यवहितः सम्भवतीत्यत्राह †अत इत्यकरणादिति । लघोरिति किम् ? प्रतिपाद्य गतः ॥ १९५ ॥ सूत्रम् ।

## वाऽऽप्नोः ॥ १९६ ॥ [ सि० ४।३।८७ ]

**आप्नोतेः परस्य णेर्यप्यय्वा स्यात् । प्रापय्य प्राप्य । 'मेङो वा मित्' ( ४।३।८८ ) यपि । अपमित्य अपमाय । 'क्षेः क्षी' ( ४।३।८९ ) प्रक्षीय । 'यपि चादो जग्ध्' ( ४।४।१६ ) प्रजग्ध्य ॥ १९६ ॥**

**'वा०'** प्राप्येति । पक्षे 'णेरनिटि' ( ४।३।८३ ) इति णेर्लुक् । श्रुतिनिर्देशात् इङादेशस्य न स्यात् । अध्याप्य गतः । णौ क्रीजीङः ( ४।२।१० ) इतीङ आत्वे प्राप्ते च रूपम् । 'आप्लृण् लम्भने' इत्यस्यापीच्छन्त्यन्ये । **'मेङो०'** सूत्रं स्पष्टम् । **'क्षेः०'** निरनुबन्धनिर्देशात् क्षिणूश् हिंसायामित्यस्य न भवति । प्रक्षित्य । अस्यापि ग्रहणमित्यन्ये । 'यपि चादो जग्ध' इति स्पष्टम् । प्राग् व्याख्यातं च ( पृ० ८७३ ) ॥ १९६ ॥ सूत्रम्

## यपि ॥ १९७ ॥ [ सि० ४।२।५६ ]

**यम्यादीनां यपि लुक् स्यात् । प्रहत्य ॥ १९७ ॥**

**'यपि'** यम्यादीनामिति । यमिरमिनमिगमिहनिमनिवनतितनादीनामित्यर्थः । एषामन्तस्य यपि लुक् स्यात् । 'वामः' ( ४।२।५७ ) इति वचनान्तानान्नामेवायं विधिः । प्रहत्येति । एवं प्रमत्य । वनति प्रवत्य । तनादि प्रतत्य प्रसत्य प्रक्षत्य । यपीति किम् ? हन्यते ॥ १९७ ॥ सूत्रम्

## वाऽमः ॥ १९८ ॥ [ सि० ४।२।५७ ]

**यम्यादीनाममन्तानां यपि वा लुक् । प्रयत्य । प्रयम्य ॥ १९८ ॥**

**'वा०'** प्रयम्येति । एवं विरत्य विरम्य, प्रणत्य प्रणम्य, आगत्य आगम्य । एषामित्येव । उपशम्य ॥ १९८ ॥ सूत्रम्

## निमील्यादिमेङस्तुल्यकर्तृके ॥ १९९ ॥ [ सि० ५।४।४६ ]

**तुल्यो धात्वर्थान्तरेण कर्ता यस्य तद्वृत्तिभ्यो निमील्यादिभ्यो मेङश्च धातोः सम्बन्धे क्त्वा**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वा स्यात् । अक्षिणी निमील्य हसति । मुखं व्यादाय स्वपिति । अपमित्य याचते । अपमातुं प्रतिदातुं याचते इत्यर्थः ॥ १९९ ॥**

**'निमी०'** निमील्यादिभ्य इत्यादि निमील्यादीनां समानकालार्थो मेङस्तु परकालार्थ आरम्भः । स्वभावान्मेङ् व्यतिहारे वर्त्तते । अन्ये धातवो व्यतिहारविवक्षायां व्यतिप्रयोगेऽव्यतिप्रयोगे भवन्ति । अयं केवलोऽपीति नान्यस्य व्यतिहारग्रहणं विशेषकं कर्तव्यमित्यर्थः । अक्षिणी निमील्येति । निमीलयन्नित्यर्थः । अन्तर्भूतण्यर्थः । साक्षाण्णिगन्तो वा । अन्यथा तुल्यकर्तृकत्वं न सङ्गच्छते । एवमुत्तरत्रापि । मुखं व्यादायेति । एवं प्रादौ प्रसार्य पतति । दन्तान् प्रकाश्य जल्पति । शिशुरयं मातरं भक्षयित्वोपजातः । मेङ् अपमाय अपमित्य याचते । अपमातुं प्रतिदातुं याचते इत्यर्थः । पूर्वं ह्यसौ याचते पश्चादपमयते इति । याचेस्तु पूर्वकालेऽपि क्त्वा न भवति । मेङः परभाविन्या क्त्वया याचिप्राक्कालस्योक्तत्वात् पक्षे याचित्वा । अपमयते अपमातुं याचते । तुल्यकर्तृक इति चैत्रस्याक्षिनिमीलने मैत्रो हसति । चैत्रस्यापमाने मैत्रो याचते ॥ १९९ ॥ सूत्रम्

## निषेधेऽलंखल्वोः क्त्वा ॥ २०० ॥ [ सि० ५।४।४४ ]

**निषेधार्थयोरलंखल्वोरुपपदयोर्धातोः क्त्वा वा स्यात् । अलंकृत्वा खलुकृत्वा ॥ २०० ॥**

**'निषे०'** खलु कृत्वेति । अलंकृत्वा खलुकृत्वा, न कर्त्तव्यमित्यर्थः । पक्षे यथाप्राप्तं अलं रोदनेन अलं रुदितेन अलं रुदितम् । क्त्वान्तयोग एव खलुशब्दो निषेधवाचीति पक्षे खलुशब्दो नोदाह्रियते । अन्ये तु खलु कृतेन खलु भोजनेन । खलु भोजनमित्यप्युदाहरन्ति । निषेध इति किम् ? अलंकारः स्त्रियाः । सिद्धं खलु । अलंखल्वोरिति किम् ? माकारि भवता ॥ २०० ॥

## परावरे ॥ २०१ ॥ [ सि० ५।४।४५ ]

**अस्मिन् गम्ये क्त्वा वा स्यात् । अतीत्य अप्राप्य नदीं गिरिः ॥ २०१ ॥**

**'परा०'** अस्मिन् इति परे अवरे च गम्यमाने धातोः क्त्वा वा स्यात् । अतीत्य नदीं गिरिरिति नद्याः परो गिरिरित्यर्थः । बाल्यमतिक्रम्य यौवनम् । अवरे, अप्राप्य नदीं गिरिः । नद्या अर्वाग् गिरिरित्यर्थः । अप्राप्य यौवनं बाल्यम् । नदीपर्वतयोर्बाल्ययौवनयोर्वा परावरत्वमात्रं प्रतीयते । अस्तिप्राप्यते इति वा न द्वितीया क्रियेति । तुल्यकर्तृकक्रियान्तराभावात् । 'प्राक्काले' (५।४।४७) इति न सिद्ध्यतीति वचनम् । वाधिकाराद्यथाप्राप्तम्, नद्यतिक्रमेण नद्यप्राप्त्या वा गिरिः ॥ २०१ ॥

अथ क्त्वातुमम् भावे इत्यत्र प्रक्रान्तं **ख्णम्** प्रत्ययं दर्शयति । सूत्रम्

## ख्णम् चाभीक्ष्ण्ये ॥ २०२ ॥ [ सि० ५।४।४८ ]

**आभीक्ष्ण्ये परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे धातोः ख्णम् क्त्वा च स्यात् । भोजं भोजं याति । भुक्त्वा भुक्त्वा व्रजति । 'घटादे०' (४।२।२४) इति दीर्घे, घाटं २ घटं २ । आभीक्ष्ण्यव्यक्तये द्विर्वचनम् ॥ २०२ ॥**

**'ख्णम्०'** आभीक्ष्ण्ये इति । आभीक्ष्ण्यविशिष्टे प्राक्कालेऽर्थे वर्त्तमानाद्धातोः ख्णम् स्यादित्यर्थः । भोजं २ यातीति । एवं पायं २ पीत्वा २ गच्छति । अग्रे भोजं २ व्रजति । अग्रे भुक्त्वा २ व्रजति । अत्र क्त्वाख्णमोर्हि स्वादिवत्प्रकृत्यर्थोपाधिद्योतने सामर्थ्यं नास्तीत्याभीक्ष्ण्याभिव्यक्तये द्विर्वचनं स्यात् । ननु भृशाभीक्ष्ण्ययोर्यङपि विधीयते । न तु तत्र द्विर्वचनमिह तु द्विर्वचनमित्यत्र को हेतुः ?

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उच्यते । यङ् स्वार्थिकत्वात् प्रकृत्यर्थोपाधी भृशाभीक्ष्ण्ये समर्थौ द्योतयितुमिति तदभिव्यक्तये द्विवचनं नापेक्ष्यते हिस्वादयः कर्तृकर्मभावार्थत्वेनास्वार्थिकत्वादसमर्थाः प्रकृत्यर्थोपाधी भृशाभीक्ष्ण्ये द्योतयितुमिति तदवद्योतनाय द्विवचनमपेक्षन्ते इति । **ननु** इह कस्मात् णम् न भवति । यदयं पुनः पुनर्भुक्त्वा व्रजत्यधीते एव ततः परम् । **आभीक्ष्ण्यस्य** स्वशब्देनैवोक्तत्वात् । **क्त्वापि** तर्हि न प्राप्नोति । **माभूद**भीक्ष्ण्ये प्राक्काले भविष्यति । आभीक्ष्ण्यव्यक्तये द्विर्वचनमिति । अत्रैवं सूत्रपद्धतिः ।

**भृशाभीक्ष्ण्याविच्छेदे द्विः प्राक्तमबादेः** (७।४।७३) क्रियायाः साकल्यमवयवक्रियाणां कार्त्स्न्यं फलातिरेको वा भृशार्थः । पौनःपुन्यमाभीक्ष्ण्यम् । क्रियान्तरैरव्यवधानमविच्छेदः । एषु द्योत्येषु यत्पदं वाक्यं वा वर्त्तते । तत्तमबादिभ्यः प्रागेव द्विरुच्यते । भृशे लुनीहि लुनीहीत्येवायं लुनाति । अधीष्वाधीष्वेत्येवायमधीते । आभीक्ष्ण्ये, भोजं २ भुक्त्वा २ व्रजति । अविच्छेदे, पचति २ अधीते २ । भृशादयश्च क्रियाधर्मा इति क्रियापदमेवात्र सम्बध्यते । क्रियाविशेषणस्यापि क्रियात्वेनाध्यवसायाद्भृशादियोगे द्विर्वचनं भवति । मन्दं मन्दं चलति । यदा तु क्रियारूपता न विवक्ष्यते तदा 'नवा गुणः सदृशेरित्' (७।४।८६) इति द्विर्वचनम् । मन्दं मन्दं तुदति । एष्विति किम् ? लुनीहि । भुक्त्वा व्रजति । पचति । भृशाभीक्ष्ण्ययोर्यङिति यङन्तमुक्तार्थत्वान्न द्विरुच्यते । यदा तु भृशार्थे यङ् तदाभीक्ष्ण्यार्थाभिव्यक्तयेद्विर्वचनम् । पापच्यते २ इति । यदा तु तत्प्रतिपादनाय पञ्चमी विधीयते तदा तस्या द्विर्वचनसहायाया एवाभीक्ष्ण्यप्रतिपादने सामर्थ्यम् । क्त्वाणमोरिवेति द्विर्वचनमपि भवति । पापचस्व २ । इति । प्राक्तमबादेरिति किम् ? पचति पचतितमां, तराम् । अत्र तमबादेरातिशायिकात् पूर्वमेव द्विर्वचनं पश्चात्तमबादिः । अन्यथा ह्यनियमः स्यात् । **'नानावधारणे'** (७।४।७४) नानाभूतानां भेदेनेयत्तापरिच्छेदो नानावधारणम् । तस्मिन् यच्छब्दरूपं तद्विरुच्यते । योगविभागात्प्राक् तमबादेरिति नानुवर्त्तते । अस्मात्कार्षापणादिह भवद्भ्यां माषं २ देहि । प्रत्येकं माषमात्रं देहि नाधिकमित्यर्थः । द्वौ द्वौ देहि, त्रीन् २ देहि । **'आधिक्यानुपूर्व्ये'** (७।४।७५) आधिक्यं प्रकर्षः । आनुपूर्व्यं क्रमानुल्लङ्घनम् एतयोर्वर्त्तमानं शब्दरूपं द्विरुच्यते । आधिक्ये, नमो नमः, अधिकं नम इत्यर्थः । कन्या दर्शनीया २, अहो दर्शनीया २, मह्यं रोचते २, एष तवाञ्जलिः २, मह्यं रोचतेतराम् २ । अत्र प्रागातिशयिकः पश्चात् द्वित्वम् । आनुपूर्व्ये, मूले मूले स्थूलाः । अग्रे अग्रे सूक्ष्माः । ज्येष्ठं ज्येष्ठमनुप्रवेशय । कनिष्ठं कनिष्ठमासय । मूलाद्यानुपूर्व्येणैषां स्थौल्यादय इत्यर्थः । अग्रमध्यमूलानि त्रयो भागाः तत्रैकमेव मुख्यमग्रं मूलं च । अन्येषां तु भागानामपेक्षाकृतोऽग्रमूलव्यपदेशः । अधःसन्निविष्टमपेक्ष्याग्रव्यपदेशः । उपरिसन्निविष्टमपेक्ष्य मूलव्यपदेशः । न चैकरूपं भागानां स्थौल्यं सौक्ष्म्यं वा । किं तर्हि ? यथा मूलमुपचीयते स्थौल्यम् । यथाग्रं च सौक्ष्म्यापचय इति वीप्सा नास्ति । एवं ज्येष्ठत्वकनिष्ठत्वयोरप्यापेक्षिकत्वाद्वीप्सा नास्तीति वचनम् ।

**'डतरडतमौ समानां स्त्रीभावप्रश्ने'** (७।४।७६) समानां केनचिद्गुणेन तुल्यतया सम्प्रधारितानां स्त्रीलिङ्गस्य भावस्य प्रश्ने वर्त्तमानं डतरडतमान्तं द्विरुच्यते । उभाविमावाढ्यौ कतरा कतरानयोराढ्यता । किं दैवकृता उत पौरुषकृता चेत्यर्थः । कतमा कतमा अनयोराढ्यता । किं साधनसम्बन्धकृता उतान्यसम्बन्धकृता आहोस्विदुभयसम्बन्धकृतेत्यर्थः । एवं सर्वे इमे आढ्याः कतरा २ एषामाढ्यता । यतरा २ एषां विभूतिः । ततरा २ कथ्यताम् । यतमा २ सम्पत् ततमा २ कथ्यताम् । डतरडतमाविति किम् ? उभाविमौ आढ्यौ काऽनयोराढ्यता । समानामिति किम् ? आढ्योऽयं कतरास्याढ्यता कतमास्याढ्यता । स्त्रीग्रहणं किम् ? उभाविमौ लक्ष्मीवन्तौ कतरानयोर्लक्ष्मीः कतमा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नयोर्लक्ष्मीः । लक्ष्यतेऽनया पुण्यकर्मेति लक्ष्मीः । इयं स्त्री भवति न भाव इति । प्रश्न इति किम्? उभाविमावाढ्यौ यतरानयोराढ्यता ततरा श्रूयताम् । केचित्तु डतरडतमाभ्यां स्त्रीलिङ्गाच्चान्यत्रापीच्छन्ति । उभाविमावाढ्यौ कीदृशी २ अनयोराढ्यता । कतरत् कतरदनयोराढ्यत्वम् । कतमः कतमोऽनयोर्विभवः । कतराऽनयोराढ्यतेत्यादौ प्राप्ते स्वार्थिकं द्विर्वचनम् । **'पूर्वप्रथमावन्यतोऽतिशये'** (७।४।७७) अन्यतोऽतिशये तदर्थस्य प्रकर्षे द्योत्ये एतौ द्विरुच्येते । आतिशायिकापवादः । पूर्वं २ पुष्पन्ति प्रथमं २ पच्यन्ते । अन्येभ्यः पूर्वतरं पुष्पन्ति प्रथमतरं पच्यन्त इत्यर्थः । अन्यत इति किम्? पूर्वतरं पुष्पन्ति प्रथमतरं पच्यन्ते । अत्र स्वव्यापारापेक्षोऽतिशयो गम्यते । न तावदिमे किशलयिता यावत्पुष्पिताः । न तावदिमे पुष्पिता यावत्पक्का इति । अतिशय इति किम्? पूर्वं प्रथमं पुष्पन्ति । **अन्ये**ऽतिशयमात्रेऽपि द्विर्वचनमिति । तमप्तरबर्थं विकल्पं च । **'प्रोपोत्सं पादपूरणे'** (७।४।७८) एते चत्वार उपसर्गा द्विरुच्यन्ते तेन चेत् पादः पूर्यते । प्रप्रशान्तकषायाग्नेरुपोपप्लववर्जितम् । उदुज्ज्वलं तपो यस्य संसंश्रयत तं जिनम् ॥ १ ॥ पादपूरणे इति किम्? प्रणम्य सच्छासनवर्द्धमानम् । इदं छन्दसीति **कश्चित्** [ **'सामीप्येऽधोऽध्युपरि'** (७।४।७९) अधस् अधि उपरि इत्येतानि शब्दरूपाणि द्विरुच्यन्ते सामीप्ये विवक्षिते । सामीप्यं देशकृता कालकृता वा प्रत्यासत्तिः । अधोऽधो ग्रामम् । अध्यधिग्रामं । उपर्युपरि ग्रामम् । उपर्युपरि दुःखानि । सामीप्य इति किम्? अधः पन्नगाः । अधि ब्रह्मदत्ते पाञ्चालाः । उपरि चन्द्रमाः । **कथ**मुपरि शिरसो घट इति? **अत्रौ**त्तराधर्यमात्रं विवक्षितम्, न सदपि सामीप्यमिति न भवति । यथायथामिति मकारान्तमव्ययं यथास्वमित्यर्थे आश्रीयते इति यथास्वे यथायथमिति नारभ्यते ] **'वीप्सायाम्'** (७।४।८०) पृथक् संज्ञा युक्तानां बहूनां सजातीयानामर्थानां साकल्येन प्रत्येकं क्रियया गुणेन द्रव्येण जात्या वा युगपत् प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा । तस्यां वर्त्तमानं शब्दरूपं द्विरुच्यते । वीप्सा च स्याद्यन्तेष्वेव भवतीति तेषामेव द्विर्वचनम् । वृक्षं वृक्षं सिञ्चति । ग्रामो २ रमणीयः । गृहे २ ऽश्वाः । योद्धाः २ क्षत्रियः । तथा रूपं २ पश्यति । शुक्लं शुक्लमानय क्रियां क्रियामारभते । उपचरितभेदस्यापि भवति । खिन्नः खिन्नो विश्राम्यति । क्षीणः क्षीणः पयः पिबति । व्यापकधर्मस्यापि व्याप्येनाभेदोपचारात् भेदे सति व्यापकान्तरापेक्षायां वीप्सा भवति । स एवान्योन्यः सम्पद्यते नवो नवो भवति जायमान इति । आढ्यतरं आढ्यतरमानय । अत्र द्विर्वचनात् प्रागातिशयिकः । वीप्सायामिति किम्? वृक्षं सिञ्चति । जात्येकशेषेतरेतरयोगक्रमाभिधानेषु सत्यामपि व्याप्तौ यथोक्तलक्षणवीप्साया अभावात् न भवति द्विर्वचनम् । तथाहि सम्पन्नो यवः सम्पन्ना यवा इति । जातेरेकत्वाद्बह्वर्थाभिधानं नास्ति । अस्मिन् वने वृक्षाः शोभना इत्येकशेषे साकल्येन व्याप्तिर्नास्ति । तथाहि कतिपयेष्वपि वृक्षेषु शोभनेष्वयं प्रयोगो भवति । एवमितरेतरयोगेऽपि । अस्मिन् वने धवखदिरपलाशाः शोभना इति न वीप्सा । तथा अस्मिन् वनेऽयं वृक्षः शोभनोऽयं वृक्षः शोभन इति क्रमाभिधाने साकल्येनापि व्याप्तौ यौगपद्याभावान्न भवति । अस्मिन् वने सर्वे वृक्षाः शोभना इत्यत्र तु सर्वशब्देन वीप्सार्थाभिधानान्न भवति । तथा तद्धितसमासाभ्याम्-तद्धितेन तावत्, द्वौ द्वौ पादौ भुङ्क्ते द्विपदिकां भुङ्क्ते* । अत्र वीप्साया अकल्प्रत्ययेनोक्तत्वाद्द्विर्वचनं न भवति । तथाहि **'सङ्ख्यादेः पादादिभ्यो दानदण्डे चाकल् लुक् च'** (७।२।१५२) सङ्ख्यायाः प्रकृत्यावयवात्परे ये पदादयस्तदन्तान्नाम्नो दाने दण्डे चकाराद्वीप्सायां विषयेऽकल्प्रत्ययः स्यात् । तत्सन्नियोगे च प्रकृतेरन्तस्य लुक् स्यात् । द्वौ द्वौ पादौ ददाति द्विपदिकां ददाति त्रिपदिकां ददाति । द्वे शते व्यवसृजति द्विशतिकां व्यवसृजति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

द्विमोदिकिकां त्रिमोदिकिकां त्यजति । दण्डे, द्वौ पादौ दण्डितो द्विपदिकां त्रिपदिकां द्विशतिकां त्रिशतिकां द्विमोदिकिकां दण्डितः। वीप्सायां द्वौ द्वौ पादौ भुङ्क्ते । द्विपदिकां त्रि० । द्विशतिकां त्रि० । द्विमोदिकिकां भुङ्क्ते । सङ्ख्यादेरिति किम् ? पादं ददाति पादं दण्डितः पादं पादं भुङ्क्ते । पादादिभ्य इति किम् ? द्वौ द्वौ माषौ ददाति । दानदण्डे चेति किम् ? द्वौ पादौ भुङ्क्ते । चकारो वीप्साया अनुकर्षणार्थः । लकारः स्त्रीत्वार्थः । लुग्वचनमनिमित्तलुगर्थम् । तेन पादः पद्भावो भवति । परनिमित्तायां तु लुचि स्थानिवद्भावो न स्यात् । पादादयो प्रयोगतोऽनुसर्त्तव्याः । एकैकं ददाति एकैकशो ददाति इत्यत्र तु वीप्सायां द्विवचने कृते अल्पार्थात्कारके श्शस् भवति । तथाहि **'बह्वल्पार्थात् कारकादिष्टानिष्टे श्शस्'** (७।२।१५०) बह्वर्थादल्पार्थाच्च कारकाभिधायिनो नाम्नः श्शस्प्रत्ययो भवति । यथासङ्ख्यमिष्टेऽनिष्टे च विषये । इष्टं प्राशित्रादि । अनिष्टं श्राद्धादि । ग्रामे बह्वो ददाति बहुशो ददाति, बहु धनं ददाति बहुशो धनं ददाति । विवाहे बहून् कार्षापणान् ददाति बहुशः कार्षापणान् ददाति । विवाहे बहुभिर्भुक्तमतिथिभिः बहुशो भुक्तमतिथिभिः । बहुभ्योऽतिथिभ्यो देहि बहुशोऽतिथिभ्यो देहि । बहुशो ग्रामेषु वसति । एवं भूरिशः प्रभूतशः गणशः । अल्पार्थ-अल्प आगच्छति । अल्पं धनं ददाति अल्पशो धनं ददाति । श्राद्धे-अल्पैर्भुक्तम् अल्पशो भुक्तम् । अल्पेभ्यो ददाति अल्पशो ददाति । अल्पेभ्य आगतः अल्पशः आगतः । अल्पेषु वसति अल्पशो वसति । एवं स्तोकशः कतिपयशः । बह्वल्पार्थादिति किम् ? गां ददाति । अश्वं ददाति । कारकादिति किम् ? बहूनां स्वामी । इष्टानिष्ट इति किम् ? बहु ददाति श्राद्धे । अल्पं ददाति प्राशित्रादौ । शकारः पित्कार्यार्थः ॥ *समासेनापि अर्थं अर्थं प्रति प्रत्यर्थम् । गेहं गेहमनुप्रवेशमास्ते गेहानुप्रवेशमास्ते । अत्र समासेन वीप्साया उक्तत्वाद्विर्वचनं न भवति । क्वचित्तु वीप्स्यमानमपि समासेनाभिधीयते पर्वणि पर्वणि सप्त पर्णान्यस्य सप्तपर्णः । पद्कौ पङ्क्तावष्टौ पदान्यस्य अष्टापदम् । ननु च वृक्षं वृक्षं सिञ्चतीत्यादौ वीप्सायां बह्वोऽर्थाः प्रतीयन्ते तत्र बहुषु बहुवचनं प्राप्नोति । उच्यते । पृथक्सङ्ख्यानामितिवचनात् परिगृहीतैकत्वादिसङ्ख्यानां पदार्थानां वीप्सया योग इति पुनः समुदायाद्बहुवचनं न भवति । **'आबाधे'** (७।४।८५) आबाधो मनःपीडाप्रयोक्तृधर्मस्तस्मिन् विषये वर्त्तमानं शब्दरूपं द्विरुच्यते । तत्र चादौ पूर्वपदे स्यादेः लुप् स्यात् । ऋक् २ । पूः २ । गतगता नष्टनष्टा । ननकरोमि । ऋगादेर्दुरुच्चारणादिना पीड्यमानः प्रयोक्ता एवं प्रयुङ्क्ते । अष्टमी अष्टमी कालिका २ इत्यत्र पूरणप्रत्ययान्तत्वात्कोपान्त्यत्वाच्च पुंवद्भावो न भवति । **'नवा गुणः सदृशेरित्'** (७।४।८६) गुणशब्दो मुख्यसदृशे गुणे गुणिनि वा वर्त्तमानो वा द्विरुच्यते । तत्र चादौ वर्त्तमानस्य स्यादेः लुप् भवति । सा च रित् । रित्करणं प्रतिषिद्धस्यापि पुंवद्भावस्य 'रिति' (३।२।५८) इति विधानार्थम् । शुक्लशुक्लं रूपं शुक्लशुक्लः पटः । कालककालिका । शुक्लादिसदृशमपरिपूर्णगुणमेवमुच्यते । वाग्रहणात्पक्षे जातीयरपि भवति । शुक्लजातीयः पटुजातीयः । गुण इति किम् ? अग्निर्माणवकः गौर्वाहीकः । सदागुणवाची यः स इह गृह्यते । अयं तु उपमानात् प्राग् द्रव्यवाची पश्चात्तु तैक्ष्ण्यजाड्यादिगुणवाचीति न भवति । सदृश इति किम् ? शुक्लः पटः पटुश्चैत्रः । **'प्रियसुखं चाकृच्छ्रे'** (७।४।८७) अक्लेशे वर्त्तमाने इमे द्विरुच्येते । तत्र चादौ शब्दस्य स्यादेः लुप् भवति । प्रियप्रियेण ददाति । सुखसुखेनाधीते । अकृच्छ्रेणेत्यर्थः । **'वाक्यस्य परिवर्जने'** (७।४।८८) वाक्यस्य चावयवो न पदस्य, स वर्जने वर्त्तमानो वा द्विरुच्यते । परि, परित्रिगर्त्तेभ्यो वृष्टो मेघः । वाक्यस्येति किम् ? परित्रिगर्त्तं वृष्टो मेघः । वाक्यस्यैवेत्यवधारणात्पदावयवे न भवति । **'असकृत् सम्भ्रमे'** (७।४।७२)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भयादिभिश्चित्तव्यापेक्षात्प्रयोक्तुस्त्वरणं सम्भ्रमस्तस्मिन् द्योत्ये पदं वाक्यमसकृदनेकवारं प्रयुज्यते। अहिरहिः बुद्ध्यस्व २ अहिरहिरहिः बुद्ध्यस्व बुद्ध्यस्व बुद्ध्यस्व। हस्त्यागच्छति २। लघु पलायध्वम् २। सम्भ्रमादौ पदं वाक्यं वा द्विर्भवति। न पदावयवोऽतो नासावसकृद् द्विर्वा भवति। तच्च पदं वाक्यं वा परिनिष्पन्नं सत्तत्र वर्त्तते नापरिनिष्पन्नमिति कृतेषु षत्वादिकार्येषु तदसकृद् द्विर्वा भवति। नाकृतेषु। द्रोग्धा २। द्रोढा २ इत्येव भवति। ननु द्रोग्धा द्रोढा, द्रोढा द्रोग्धा। एवं माषवापाणि २। मातुःष्वसा २। क्षीणः २। कृतद्विर्वचनानामपि रूपार्थयोरभेदेन स्थानिवद्भावेन चैकपदत्वात् कौतस्कुतः पौनःपुनिक इत्यादिषु तद्धितः सिद्धो भवति। ✤(इति सप्रसङ्गं द्विर्वचनप्रकरणम्।)✤ अथ प्रकृतम्। चाधिकारेणैव पक्षे क्त्वाप्रत्ययसिद्धौ चकारेण तस्य विधानं वर्त्तमानादिप्रत्ययान्तरनिषेधार्थम्। ननु क्त्वादिभिर्भावे विधीयमानैः कर्त्तुरनभिहितत्वात् ओदनं पक्त्वा भुङ्क्ते देवदत्त इत्यादिषु कर्त्तरि तृतीया प्राप्नोति। नैवम्। भुजिप्रत्ययेनैव कर्त्तुरभिहितत्वान्न भवति। प्रधानशक्त्यभिधाने हि गुणशक्तिरभिहितवत्प्रकाशते इति। खणम् इत्यस्य खित्वं चौरंकारमाक्रोशतीत्यादौ मागमार्थम्, णित्वं वृद्ध्याद्यर्थम्।

अत्रादिशब्दानुसन्धानात् **'पूर्वाग्रेप्रथमे'** (५।४।४९) एषूपपदेषु परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानाद्धातोः सम्बन्धे खणम् वा स्यात्। अनाभीक्ष्ण्यार्थं पक्षे वर्त्तमानादिप्राप्त्यर्थं च वचनम्। पूर्वं भोजं व्रजति। पूर्वं भुक्त्वा व्रजति। अग्रे भोजं अग्रे भुक्त्वा। प्रथमं भोजं प्रथमं भुक्त्वा व्रजति। पक्षे वर्त्तमानादयोऽपि। पूर्वं भुज्यते ततो व्रजति। एवमग्रे प्रथमम्। पूर्वादयश्चात्र व्यापारान्तरापेक्षे प्राक्काले व्रज्यापेक्षे तु क्त्वाखणमाविति नोक्तार्थता; ततश्चायमर्थोऽन्यभोक्तृभुजिक्रियाभ्यः स्वक्रियान्तरेभ्यो वा पूर्वं भोजनं कृत्वा व्रजतीत्यत्र पूर्वप्रथमसाहचर्यादग्रेशब्दः कालवाची न तु सप्तम्यन्तः॥ २०२॥ सूत्रम्

## अन्यथैवंकथमित्थमः कृगोऽनर्थकात्॥ २०३॥ [ सि० ५।४।५० ]

**एभ्यश्चतुर्भ्यः परात्तुल्यकर्तृकात् कृगोऽनर्थकाद्धातोः सम्बन्धे खणम् वा स्यात्। अन्यथाकारं एवंकारं कथंकारं इत्थंकारं भुङ्क्ते॥ २०३॥**

**'अन्य०'** पक्षे क्त्वैव। अन्यथा कृत्वा भुङ्क्ते इत्यादि। एवमुत्तरत्रापि। आनर्थक्यं करोतेरन्यथादिभ्यः पृथगर्थाभावात्। यावदुक्तं भवति अन्यथाभुङ्क्ते, तावदुक्तं भवति अन्यथाकारं भुङ्क्ते इति। अनर्थकादिति किम्? अन्यथाकृत्वा शिरो भुङ्क्ते। अन्यथाशब्दः शिरःप्रकारे करोतेश्च शिरः कर्म करोतिना विना न गम्यते इति।

अत्रामू विशेषौ। **'यथातथादीर्ष्योत्तरे'** (५।४।५१) आभ्यां परात्तुल्यकर्तृकेऽर्थे वर्त्तमानादनर्थकात्करोतेर्धातोः सम्बन्धे सति खणम् वा स्यात्। ईर्ष्यश्चेत्पृच्छते उत्तरं ददाति। कथं भवान् भोक्ष्यते इति पृष्टेऽसूयया तं प्रत्याह यथाकारमहं भोक्ष्ये। तथाकारमहं भोक्ष्ये। किं तवानेन किं ते मया यथाहं भोक्ष्ये तथाहं भोक्ष्ये इत्यर्थः। ईर्ष्योत्तरमिति किम्? यथा कृत्वाहं भोक्ष्ये तथा प्रक्ष्यसि। अनर्थकादित्येव। यथा कृत्वाऽहं शिरो भोक्ष्ये, तथा कृत्वाहं शिरो भोक्ष्ये, किं तवानेन। **'शापे व्याप्यात्'** (५।४।५२) अनर्थकादिति निवृत्तम्। शापेऽसम्भवात्। व्याप्यादिति भणनाद्वा। व्याप्यात्कर्मणः परात्तुल्यकर्तृकेऽर्थे वर्त्तमानात्करोतेर्धातोः सम्बन्धे खणम् वा स्यात्। शापे आक्रोशे गम्ये। चौरंकारमाक्रोशति। करोतिरुच्चारणे। चौरं कृत्वा चौर-



Jain Education International For Personal & Private Use Only www.jainelibrary.org

शब्दमुच्चार्य चौरोऽसीत्याक्रोशतीत्यर्थः । एवं दस्युंकारं व्याधंकारम् । शाप इति किम् ? । चौरं कृत्वा हेतुभिः कथयति ॥ २०३ ॥ सूत्रम्

## स्वाद्वर्थाददीर्घात् ॥ २०४ ॥ [ सि० ५।४।५३ ]

**स्वाद्वर्थाददीर्घान्तात् व्याप्यात्परस्मात्तुल्यकर्तृकात् कृगो धातोः सम्बन्धे ख्णम् वा स्यात् । स्वादुङ्कारं मृष्टङ्कारं भुङ्क्ते । पक्षे स्वादुंकृत्वा ॥ २०४ ॥**

'स्वाद्व०' अयमस्यार्थः । स्वादोरर्थे वर्त्तमानाच्छब्दाददीर्घान्ताद्व्याप्यात्परस्मात्तुल्यकर्तृकेऽर्थे वर्त्तमानात्करोतेर्धातोः सम्बन्धे ख्णम् वा स्यात् । मृष्टंकारं । एवं सम्पन्नङ्कारं लवणङ्कारं । पक्षे स्वादु मृष्टं सम्पन्नं लवणं कृत्वा भुङ्क्ते । अदीर्घादिति किम् ? स्वाद्वीं कृत्वा स्वादूकृत्वा सम्पन्नां कृत्वा यवागूं भुङ्क्ते । अस्वादुं स्वादुं कृत्वा स्वादुङ्कारं भुङ्क्ते इत्यत्र तु ङीच्व्योर्विकल्पितत्वान्न दीर्घ इति भवति । सम्पन्नंकारं यवागूं भुङ्क्ते इति सामान्येन पदं निष्पाद्य पश्चाद्यवाग्वा सम्बन्धे भविष्यति ॥ २०४ ॥

अथ क्त्वातुमम् भावे इत्यत्रैव प्रक्रान्तं णम्प्रत्ययं निरूपयति सूत्रम्

## विद्दृग्भ्यः कार्त्स्न्ये णम् ॥ २०५ ॥ [ सि० ५।४।५४ ]

**अतिथिवेदं भोजयति । कन्यादर्शं वरयति ॥ २०५ ॥**

'विद्दृ०' अस्यायमर्थः । कार्त्स्न्यविशिष्टाद्व्याप्यात्परेभ्यस्तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानेभ्यो विदिभ्यो दृशेश्च धातोः सम्बन्धे णम् वा स्यात् । विद्यतेरकर्मकात्तद्वर्जौस्त्रयो विदयो गृह्यन्ते । अतिथिवेदमिति । यं यमतिथिं जानाति लभते विचारयति वा तं तं सर्वं भोजयतीत्यर्थः । कन्यादर्शनमिति । यां यां कन्यां पश्यति तां तां सर्वां वरयतीत्यर्थः । बहुवचनं त्रयाणां विदीनां ग्रहणार्थमन्यथा निरनुबन्धग्रहणेन सानुबन्धस्येत्युपतिष्ठेत । कार्त्स्न्ये इति किम् ? अतिथिं विदित्वा भोजयति । कन्या दृष्ट्वा वरयति ॥ २०५ ॥ सूत्रम्

## व्याप्याच्चेवात् ॥ २०६ ॥ [ सि० ५।४।७१ ]

**व्याप्यात् कर्तुश्च उपमानात्पराद्धातोस्तस्यैव सम्बन्धे णम्वा स्यात् । सुवर्णनिधायं निहितः । काकनाशं नष्टः । †एवं यावज्जीवमधीते । ‡शुष्कपेषं पिनष्टि । *जीवग्राहं गृह्णाति इत्यादयोऽपि यथायोगं णम्प्रत्ययान्ता ज्ञेयाः ॥ २०६ ॥**

इति क्त्वादिप्रत्ययाधिकारः ।

'व्याप्या०' सूत्रे इवादिति इवार्थादुपमानादित्यर्थः । सुवर्णनिधायमिति सुवर्णमिव निहित इत्यर्थः । एवं रत्ननिधायं घृतनिधायं । शाकक्लेशं क्लिष्टः ओदनपाकं पक्वः । कर्तुरुपमानात्, काकनाशमिति काक इव नष्ट इत्यर्थः । अभ्रविलायं विलीनः अभ्रमिव विलीनः इत्यर्थः ।

***णम्प्रकरणं संक्षेपेण संगृह्णाति ।** एवं यावजीवमिति । अत्र सूत्रम् । **'यावतो विन्दजीवः'** (५।४।५५) कार्त्स्न्यविशिष्टाद्व्याप्याद्यावच्छब्दात्पराभ्यां विन्दजीविभ्यामेककर्तृकेऽर्थे वर्त्तमानाभ्यां धातोः सम्बन्धे णम्वा स्यात् । विन्देति शनिर्देशाल्लाभार्थस्य ग्रहणम् । यावद्वेदं भुंक्ते यावल्लभते तावद्भुङ्क्ते इत्यर्थः । यावज्जीवमधीते, यावज्जीवति तावदधीते इत्यर्थः । जीवेः पूर्वकालासम्भवादपूर्वकाल एव विधिः । एवमतिथिवेदं भोजयतीत्यत्राप्यपूर्वकाल एव विधिः । भोजनक्रियायामारब्धायां परिवेषणादि भोजनार्हलाभस्य समानकालत्वादिति । †**शुष्कपेषमिति । अत्र सूत्रम् 'शुष्क-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'चूर्णरूक्षातिपषस्तस्यैव'** (५।४।६०) एभ्यः कर्मभ्यः परात् पिषेर्णम्वा स्यात् । तस्यैव धातोः सम्बन्धे सति शुष्कपेषमिति शुष्कं पिनष्टीत्यर्थः । एवं चूर्णपेषं रूक्षपेषं शुष्कपेषं पिष्टः पेष्टव्यः पिष्यते । क्त्वादिभिरुक्तेऽपि व्याप्ये तदुपपदतास्त्येव प्रयोगानुप्रयोगक्रिययोरैक्यात्तुल्यकर्तृकत्वं, प्राक्कालत्वं च नास्तीत्यत्र प्रकरणे, पक्षे क्त्वा न भवति घञादयस्तु भवन्ति । शुष्कस्य पेषं पिनष्टि । सामान्यविशेषभावविवक्षया च धातुसम्बन्धः । **यदाहुः** 'सामान्यपुषेरवयपुषिः कर्म भवतीति' । कश्चित्तु सामान्यविशेषभावविवक्षयात्रापि क्रियाभेदोऽस्तीति तुल्यकर्तृकत्वं प्राक्कालत्वं च । तेन क्त्वापि निमूलं कषित्वा कषति । *जीवमाहमिति ( पृष्ठ ९७८ ) । जीवन्तं गृह्णातीत्यर्थः । अत्र 'कृग्ग्रहोऽकृतजीवात्' इति णम् । सूत्रं चैतत् गृह्णातिधातुव्याख्याने व्याख्यातम् । ( पृष्ठ ७३५ )

**उक्तशेषं णम्प्रत्ययप्रकरणम्** संक्षेपेण निर्दिशति इत्यादयोऽपीत्यादि (पृष्ठ ९७८) । तद्यथा **'चर्मोदरात्पूरेः'** (५।४।५६) आभ्यां व्याप्याभ्यां परादेककर्तृकेऽर्थे वर्त्तमानात्पूरयतेर्धातोः सम्बन्धे णम् (५।४।५७) वा स्यात् । चर्मपूरमास्ते पूरयित्वा आस्ते इत्यर्थः । एवमुदरपूरं शेते । **'वृष्टिमाने ऊलुक् चास्य वा'** व्याप्यात्परात् पूरयतेर्धातोः सम्बन्धे णम् वा स्यात् । अस्य ऊकारस्य तु लुग् वा स्यात् । समुदायेन चेद्वृष्टिमानं गम्यते । गोष्पदप्रं गोष्पदपूरं वृष्टो मेघः । एवं सीताप्रं सीतापूरं । यावता गोष्पदादि पूर्यते तावद्वृष्ट इत्यर्थः । अस्येति ग्रहणादुपपदस्य न भवति । मूषिकबिलपूरं । वृष्टो मेघः गोष्पदप्रमिति । प्रातेर्धातोः 'आतो डो ह्वावामः' (५।१।७६) इति डेन गोष्पदपूरमित्यणा च क्रियाविशेषणत्वेन सिद्ध्यति । एवं सर्वे णमन्ताः प्रयोगाः । तत्र णम् विधानमव्ययत्वेन तरामाद्यर्थमनुस्वारश्रवणार्थं च । गोष्पदप्रन्तरां गोष्पदप्रन्तमाम् । गोष्पदप्रंकल्पं रूपं देश्यं देशीयं । गोष्पदपूरंतरां तमां रूपं कल्पं देश्यं देशीयमित्यादि सिद्धं भवति । अन्यथा हि गोष्पदप्रतरं गोष्पदपूरतरमित्याद्येव स्यात् । गोष्पदप्रेण गोष्पदप्री भवति । गोष्पदपूरेण गोष्पदपूरी भवतीत्यादिप्रयोगास्तु घञादिप्रत्ययान्ता द्रष्टव्याः । **'चेलार्थात् क्नोपेः'** (५।४।५८) अस्माद्व्याप्यात्परात् क्नोपयतेस्तुल्यकर्तृकेऽर्थे वर्त्तमानाद्वृष्टिमाने गम्ये धातोः सम्बन्धे णम् वा स्यात् । चेलक्नोपं वृष्टो मेघः । एवं वस्त्रक्नोपं वसनक्नोपं यावता चेलं क्नूयते आर्द्रीभवति तावद्वृष्ट इत्यर्थः । अर्थग्रहणादत्र स्वरूपपर्यायविशेषाणां त्रयाणामपि ग्रहणम् । तेन पटिकाक्नोपं कम्बलक्नोपमित्यादि चेलविशेषादपि भवति । अयमप्यप्राक्काले विधिः । **'गात्रपुरुषात्स्नः'** ( ५।४।५९ ) आभ्यां व्याप्याभ्यां परादन्तर्भूतण्यर्थात् स्नातेस्तुल्यकर्तृकेऽर्थे वर्त्तमानाद्वृष्टिमाने गम्ये धातोः सम्बन्धे णम् वा स्यात् । गात्रस्नायं पुरुषस्नायं वृष्टो मेघः । यावता गात्रं पुरुषश्च स्नाप्यते तावद्वृष्ट इत्यर्थः । **'निमूलात्कषः'** ( ५।४।६२ ) अस्माद्व्याप्यात्परात् कषेस्तस्यैव धातोः सम्बन्धे णम्वा । निमूलमित्यत्रात्ययेऽव्ययीभावः । निर्गतानि निमूलान्यस्येति बहुव्रीहिर्वा । निमूलकाषं कषति निमूलं कषतीत्यर्थः । पक्षे निमूलस्य काषं कषति । **'हनश्च समूलात्'** ( ५।४।६३ ) अस्माद्व्याप्यात्पराद्धन्तेः कषेश्च तस्यैव धातोः सम्बन्धे णम् वा स्यात् । समूलमिति साकल्येऽव्ययीभावो बहुव्रीहिर्वा समूलघातं हन्ति समूलं हन्तीत्यर्थः । समूलकाषं कषति समूलं कषतीत्यर्थः । **'करणेभ्यः'** ( ५।४।६४ ) करणात्कारकात्पराद्धन्तेस्तस्यैव धातोः सम्बन्धे सति णम्वा स्यात् । पाणिघातं कुड्यमाहन्ति । पादघातं शिलां हन्ति । पाणिना पादेन वा हन्तीत्यर्थः । बहुवचनं व्याप्त्यर्थम् । तेन करणपूर्वाद्धिंसार्थादपि हन्तेरनेनैव णम् । ननु 'हिंसार्थादेकाप्यात्' (५।४।७४) इत्यनेन असुपघातमरीन् शरोपघातं मृगान् हन्ति । तथा च सति नित्यसमासस्तस्यैवधातोरनुप्रयोगश्च सिद्ध्यति । **'स्स्नेहार्थात्पुषपिषः'** (५।४।६५) आत्मात्मीयं ज्ञातिर्धनं च स्वम् । स्निह्यते सिच्यते येनोदकादिना तत् स्नेहनम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वार्थात् स्नेहनार्थाच्च करणवाचिनः परात्यथासङ्ख्यं पुषः पिषश्च तस्यैव धातोः सम्बन्धे सति णम्वा स्यात् । स्वपोषं पुष्णाति पुष्यति पोषति वा । एवमात्मपोषं गोपोषं महिषीपोषं पितृपोषं रैपोषम् । स्वादिभिः पुष्णातीत्यर्थः । स्नेहनार्थात् उदपेषं पिनष्टि । एवं क्षीरपेषम् । उदकादिना पिनष्टीत्यर्थः । **'कर्तुर्जीवपुरुषान्नश्वहः'** (५।४।६९) कर्तृवाचिभ्यां जीवपुरुषाभ्यां पराभ्यां यथासङ्ख्यं नशिवहिभ्यां तस्यैव धातोः सम्बन्धे णम्वा स्यात् । जीवनाशं नश्यति । जीवन्नश्यतीत्यर्थः । पुरुषवाहं वहति । पुरुषः प्रेष्यो भूत्वा वहतीत्यर्थः । कर्तुरिति किम् ? जीवेन नश्यति । पुरुषं वहति । **'ऊर्ध्वात् पूःशुषः'** (५।४।७०) कर्तृवाचिन ऊर्ध्वशब्दात् परात्पूरः शुषश्च तस्यैव धातोः सम्बन्धे णम्वा स्यात् । पूरीत्यनिर्देशात् पूरैवादिको न चौरादिकः । ऊर्ध्वपूरं पूर्यते ऊर्ध्वः पूर्यते । ऊर्ध्वशोषं शुष्यति ऊर्ध्वः शुष्यतीत्यर्थः । **'उपात् किरो लवने'** (५।४।७२) उपपूर्वात् किरतेर्लवनेऽर्थे वर्तमानस्य धातोः सम्बन्धे णम्वा स्यात् । लवन इति वचनात्तस्यैवेति निवृत्तम् । उपस्कारं मद्रका लुनन्ति विक्षिपन्तो लुनन्तीत्यर्थः ( लवन इति किम् ? उपकीर्य गच्छति ) । **'दंशेस्तृतीयया'** (५।४।७३) तृतीयान्तेन योगे उपपूर्वात्तुल्यकर्तृकेऽर्थे वर्तमानाद्दंशेरन्यस्य धातोः सम्बन्धे णम्वा स्यात् । मूलकेनोपदंशं मूलकोपदंशं भुङ्क्ते । एवमार्द्रकोपदंशम्, पक्षे मूलकेनार्द्रकेणोपदश्य भुङ्क्ते । मूलकाद्युपदंशेः कर्माणि प्रधानस्य भुजेः करणमिति तृतीयैव भवति । प्रधानक्रियोपयुक्ते हि कारके गुणक्रिया न स्वानुरूपां विभक्तिमुत्पादयितुमलमप्रधानत्वादेव । यथा पक्त्वा भुज्यते ओदन इति । यदा त्ववयवक्रियापेक्षया पूर्वकालविवक्षायां क्त्वा क्रियते । तदा क्रियाभेदात् सम्बन्धाभेदे द्वितीयापि भवति । मूलकमुपदश्य भुङ्क्ते इति । **'हिंसार्थादेकाप्यात्'** (५।४।७४) हिंसार्थाद्धातोः सम्बध्यमानेन धातुना एककर्मकात्तृतीयान्तेन योगे तुल्यकर्तृकेऽर्थे णम् वा स्यात् । दण्डेनोपघातं दण्डोपघातं गाः सादयति । खड्गेन प्रहारं खड्गप्रहारं शत्रून् विजयते । पक्षे दण्डेनोपहत्येत्यादि । हिंसार्थादिति किम् ? चन्दनेनानुलिप्य जिनं पूजयति । एकाप्यादिति किम् ? दण्डेनाहत्य चौरं गोपालो गाः खेटयति । **'उपपीडरुधकर्षस्तत्सप्तम्या'** (५।४।७५) तया तृतीयया युक्ता सप्तमी तत्सप्तमी तदन्तेन योगे उपपूर्वेभ्य एभ्यस्तुल्यकर्तृकेभ्यो वर्तमानेभ्यो धातोः सम्बन्धे णम् वा स्यात् । पार्श्वाभ्यामुपपीडं पार्श्वोपपीडं शेते । पार्श्वयोरुपपीडं पार्श्वोपपीडं शेते । व्रजेनोपरोधं व्रजोपरोधं गाः सादयति । व्रजे उपरोधं व्रजोपरोधं गाः स्थापयति । पाणिनोपकर्षं पाण्युपकर्षं धानाः पिनष्टि । पाणावुपकर्षं पाण्युपकर्षं धाना गृह्णाति । कर्ष इति शब्निर्देशाद्भौवादिकस्य । कर्षन्ति शाखां ग्राममिति द्विकर्मकस्याकर्षणार्थस्य ग्रहणम् न तु तौदादिकस्य । पञ्चभिः हलैः कृषतीति विलेखनार्थस्य, तेन भूमावुपकृष्य तिलान्वपति हलेनोपकृष्य वपतीत्यत्र न भवति । अन्ये त्वनयोरर्थभेदमप्रतिपद्यमानास्तौदादिकादपीच्छन्ति । उपेति किम् ? पार्श्वेन निपीड्य शेते । अन्ये तु उपपूर्वादेव पीडेरिच्छन्ति रुधकर्षाभ्यां तु कामचारेण तेन व्रजरोधं गाः स्थापयति हस्तरोधं दधद्धनुः व्रजेन रोधं हस्तेन रोधं । उपपूर्वादपि व्रजोपरोधम् । अन्योपसर्गपूर्वादपि व्रजानुरोधं गाः स्थापयति । एवं पाणिना कर्षं पाणौ कर्षं पाणिनाकर्षं धानागृह्णातीत्याद्यपि भवति । **'प्रमाणसमासत्त्योः'** (५।४।७६) आयाममानम् प्रमाणम् । संरम्भपूर्वकः सन्निकर्षः समासत्तिः । मनःसंक्षोभपूर्वको वा कायविकारविशेषः संरम्भः । अनयोर्गम्ययोस्तृतीयान्तेन सप्तम्यन्तेन च योगे धातोस्तुल्यकर्तृकेऽर्थे वर्तमानाद्धातोः सम्बन्धे णम्वा स्यात् । द्व्यङ्गुलेनोत्कर्षं द्व्यङ्गुलोत्कर्षम् । द्व्यङ्गुले उत्कर्षं द्व्यङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति । समासत्तौ, केशैर्ग्राहं केशग्राहं । केशेषु ग्राहं केशग्राहं युध्यन्ते । एवं हस्तग्राहं अस्त्रपनोदं युध्यन्ते । संरम्भादत्यन्तं सन्निकृष्य युद्ध्यन्ते इत्यर्थः । पक्षे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

व्यङ्गुलेन व्यङ्गुले उत्कृष्य गण्डिकां छिनत्ति । केशैर्गृहीत्वा केशेषु गृहीत्वा युद्ध्यन्ते । **'पञ्चम्या त्वरायाम्'** (५।४।७७) अस्यां गम्यायां पञ्चम्यन्तेन योगे धातोस्तुल्यकर्तृकेऽर्थे वर्त्तमानाद्धातोः सम्बन्धे णम् वा स्यात् । [ त्वरा वरीप्सा औत्सुक्यमिति यावत् ] शय्याया उत्थानं शय्योत्थानं धावति । त्वरयावश्यकादिकमपि नापेक्षते । स्तनरन्ध्रादपकर्षं स्तनरन्ध्रापकर्षं पयः पिबति । त्वरया पात्रे दोहमप्यप्रतीक्ष्य मुख एव पयः पिबतीत्यर्थः । पक्षे शय्याया उत्थाय धावति । त्वरायामिति किम् ? आसनादुत्थाय गच्छति । **'द्वितीयया'** (५।४।७८) द्वितीयान्तेन योगे धातोस्तुल्यकर्तृकेऽर्थे वर्त्तमानात् त्वरायां गम्यायां धातोः सम्बन्धे णम् वा स्यात् । लोष्टान् ग्राहं लोष्टग्राहं दण्डमुद्यामं दण्डोद्यामं युद्ध्यन्ते एवं नाम योद्धुं त्वरन्ते । यदायुधग्रहणमपि नाद्रियन्ते, यत्किञ्चिदासन्नं तद् गृह्णन्ति । पक्षे लोष्टान् यष्टीम् गृहीत्वा युद्ध्यन्ते । त्वरायामित्येव, खड्गं गृहीत्वा युध्यन्ते । योगविभाग उत्तरार्थः । **'स्वाङ्गेनाध्रुवेण'** (५।४।७९) यस्मिन्नङ्गे छिन्ने भिन्ने वा प्राणि न म्रियते तदध्रुवम् । अध्रुवेण परिभाषितस्वाङ्गेन द्वितीयान्तेन योगे धातोस्तुल्यकर्तृकेऽर्थे वर्त्तमानाद्धातोः सम्बन्धे णम्वा स्यात् । भ्रुवौ विक्षेपं भ्रूविक्षेपं जल्पति । अक्षिणी निकाणं अक्षिनिकाणं हसति । केशान् परिधायं केशपरिधायं नृत्यति । प्रतिमाया पादावनुलेपं पादावनुलेपं प्रणमति । पक्षे भ्रुवौ विक्षिप्य जल्पति । स्वाङ्गेनेति किम् ? कफमुन्मूल्य जल्पति । अध्रुवेणेति किम् ? शिर उत्क्षिप्य कथयति । **'परिक्लेश्येन'** (५।४।८०) परिसमन्तात् पीड्यमानेन द्वितीयान्तेन योगे तुल्यकर्तृकेऽर्थे वर्त्तमानाद्धातोः सम्बन्धे णम् वा स्यात् । ध्रुवांगार्थोऽयमारम्भः । उरांसि प्रतिपेषं उरःप्रतिपेषं युद्ध्यन्ते । शिरांसि छेदं शिरश्छेदं युद्ध्यन्ते । उरांसि परिपीड्यन्तः शिरांसि छिंदन्तो युध्यन्ते इत्यर्थः । पक्षे उरांसि प्रतिपिष्य शिरांसि छित्त्वा । **'विशपतपदस्कन्दवीप्साभीक्ष्ण्ये'** (५।४।८१) भुक्त्वाद्विश्यादिक्रियाभिः साकल्येनोपपदार्थानां व्याप्तुमिच्छा वीप्सा । प्रकृत्यर्थस्य पुनः पुनरासेवनमाभीक्ष्ण्यम् । यदाहुः 'सुप्सु वीप्सा तिङ्क्षु अव्ययकृत्सु चाभीक्ष्ण्यमिति' । द्वितीयान्तेन योगे विश्यादिभ्यस्तुल्यकर्तृकेऽर्थे वर्त्तमानेभ्यो वीप्सायाभामीक्ष्ण्ये च गम्यमाने धातोः सम्बन्धे णम् वा स्यात् । गेहं गेहमनुप्रवेशं गेहानुप्रवेशमास्ते । गेहं गेहमनुप्रपातं गेहानुप्रपातमास्ते । गेहमनुप्रपातमनुप्रपातं गेहानुप्रपातमास्ते । गेहं गेहमनुप्रपादं गेहानुप्रपादमास्ते । गेहमनुप्रपादमनुप्रपादं गेहानुप्रपादमास्ते । गेहं गेहमवस्कन्दं गेहावस्कन्दमास्ते । गेहमवस्कन्दमवस्कन्दं गेहावस्कन्दमास्ते । पक्षे गेहं गेहमनुप्रविश्यास्ते । गेहमनुप्रविश्यानुप्रविश्यास्ते इत्यादि । वीप्सायामुपपदस्य द्विर्वचनम् । आभीक्ष्ण्ये धातोर्द्विर्वचनम् । गेहानुप्रवेशमास्ते इत्यादौ तु वीप्साभीक्ष्ण्ये शब्दशक्तिस्वाभाव्यात् समासेनैवोक्ते इति द्विर्वचनं न भवति । आभीक्ष्ण्ये णम् सिद्ध एव, विकल्पेनोपपदसमासार्थं वचनम् । 'ख्णम् चाभीक्ष्ण्ये' (५।४।४८) इत्यनेन हि ख्णमि समासो न स्यात् । वीप्साभीक्ष्ण्य इति किम् ? गेहमनुप्रविश्यास्ते । **'कालेन तृष्यस्वः क्रियान्तरे'** (५।४।८२) क्रियामन्तरयतीति क्रियान्तरः क्रियाव्यवधायकस्तस्मिन्नर्थे वर्त्तमानाभ्यां तृष्यसूभ्यां धातुभ्यां द्वितीयान्तेन कालवाचिना योगे धातोः सम्बन्धे णम् वा स्यात् । द्व्यहं तर्षं द्व्यहतर्षं द्व्यहमत्यासं द्व्यहात्यासं गावः पिबन्ति । तर्षेणात्यासेन च गवां पानक्रिया व्यवधीयते; अद्य पीत्वा द्व्यहमतिक्रम्य पिबन्तीत्यर्थः । अन्तर्मुहूर्त्तमत्यासमन्तर्मुहूर्त्तात्यासं सम्यक् पश्यन्ति, सम्यग्दृष्टयोऽन्तर्मुहूर्त्तं मिथ्यात्वमनुभूय पुनः सम्यग्दृष्टयो भवन्तीत्यर्थः । कालेनेति किम् ? योजनं तर्षित्वा योजनमत्यस्य गावः पिबन्ति । तृष्यस्व इति किम् ? द्व्यहमुपोष्य भुङ्क्ते । क्रियान्तर इति किम् ? अहरत्यस्येषून् गतः । अहरिषूनत्यस्य गत इत्यर्थः । इहात्यासेनाहरिषवश्च व्याप्यन्ते, नतु गतिक्रिया व्यवधीयते ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'नाम्ना ग्रहादिशः'** (५।४।८३) नामशब्देन द्वितीयान्तेन योगे तुल्यकर्तृकेऽर्थे वर्त्तमानाद्ग्रहेरादिशश्च धातोः सम्बन्धे णम्वा स्यात् । नामानि ग्राहं नामग्राहमाह्वयति । नाम्नी देवदत्तो ग्राहं नामग्राहं देवदत्त आह्वयति । 'यस्य येनाभिसम्बन्धो दूरस्थस्यापि तेन सः' इति न्यायाद्देवदत्तव्यवधानेऽपि भवति । नामान्यादेशं नामादेशं ददाति । पक्षे नाम गृहीत्वा नामादिश्य दत्ते । **'कृगोऽव्ययेनानिष्टोक्तौ क्त्वाणमौ'** (५।४।८४) अव्ययेन योगे कृगस्तुल्यकर्तृकेऽर्थे वर्त्तमानादनिष्टोक्तौ गम्यायां धातोः सम्बन्धे क्त्वाणमौ स्याताम् । ब्राह्मण पुत्रस्ते जातः किं तर्हि वृषल नीचैः कृत्वा नीचैःकृत्य कथयसि किं तर्हि नीचैर्वृषल कारं वृषल नीचैःकारं कथयसि । उच्चैर्नाम प्रियमाख्येयम् । ब्राह्मण कन्या ते गर्भिणी किं तर्हि वृषल उच्चैःकृत्वा उच्चैःकृत्य कथयसि किं तर्हि उच्चैर्वृषलकारं वृषलोच्चैःकारं कथयसि नीचैर्नामाप्रियमाख्येयम् । अनिष्टोक्ताविति किम्? उच्चैः कृत्वाचष्टे । ब्राह्मण पुत्रस्ते जातः इति । नीचैः कृत्वाचष्टे ब्राह्मण कन्या ते गर्भिणी जातेति । अव्ययेनेति किम्? ब्राह्मण पुत्रस्ते जातः किं तर्हि वृषल मन्दं कृत्वा कथयसि । ब्राह्मण कन्या ते गर्भिणी जातेति । किं तर्हि वृषल तारं कृत्वा कथयसि । वाधिकारेणैव पक्षे क्त्वायाः सिद्धौ समासार्थं तद्विधानम्, अन्यथा हि णम एव पाक्षिकः समासः स्यात्, न तु क्त्वः । क्त्वा चेत्यकृत्वा णम्विधानमुत्तरत्रोभयानुवृत्त्यर्थम् । **'तिर्यचापवर्गे'** (५।४।८५) अपवर्गः क्रियासमाप्तिः समाप्तिपूर्वको वा विरामः त्यागो वा। तस्मिन् गम्यमाने तिर्यच् इत्यनेनाव्ययेन योगे करोतेस्तुल्यकर्तृकेऽर्थे वर्त्तमानाद्धातोः सम्बन्धे क्त्वाणमौ वा स्याताम् । तिर्यक्कृत्वा तिर्यक्कृत्य तिर्यक्कारमास्ते । समाप्य विरम्य वा उत्सृज्य वास्ते इत्यर्थः । अपवर्ग इति किम्? तिर्यक्कृत्वा काष्ठं गतः । **'स्वाङ्गतस्च्व्यर्थे वा नानाविनाधार्थेन भुवश्च'** (५।४।८६) स्वाङ्गमुक्तलक्षणम्, तस्प्रत्ययान्तेन स्वाङ्गेन च्व्यर्थवृत्तिभिर्नानाविनाभ्यां धार्थप्रत्ययान्तैश्च योगे भुवः कृगश्च तुल्यकर्तृकेऽर्थे वर्त्तमानाद्धातोः सम्बन्धे क्त्वाणमौ भवतः । वचनभेदाद्धातुप्रत्यययथासङ्ख्यं नास्ति । मुखतो भूत्वा, मुखतो भूय, मुखतो भावमास्ते । मुखतः कृत्वा, मुखतः कृत्य, मुखतः कारमास्ते । पार्श्वतो भूत्वा, पार्श्वतो भूय, पार्श्वतो भावं शेते । पार्श्वतः कृत्वा, पार्श्वतः कृत्य, पार्श्वतः कारं शेते । अनाना नाना भूत्वा, नानाभूय, नानाभावं गतः । अनाना नानाकृत्वा, नानाकृत्य, नानाकारं गतः । एवं विना भूत्वा, विनाभूय, विनाभावं गतः । विनाकृत्वा, विनाकृत्य, विनाकारं गतः । धार्था धा धमञ् एधा ध्यमञः । द्विधाभूत्वा द्विधाभूय द्विधाभावमास्ते । द्विधाकृत्वा ३० द्वैधं भूत्वा ३० द्वैधंकृत्वा ३० द्वैधा भूत्वा ३० द्वेधा कृत्वा ३० ऐकध्यंभूत्वा ३० ऐकध्यंकृत्वा ३० । धणस्तु प्रकारविचालवदर्थत्वेनाधार्थत्वाव्ययाधिकाराच्च निरासः । धार्थो हि प्रकारो विचालो वा । 'अधण्तस्वाद्याशसः' (१।१।३२) इति वचनात्, धण्प्रत्ययान्तस्य नाव्ययत्वम् । अस्यापि ग्रहणमित्यन्ये । अव्ययाधिकारादेव च मुखे तस्यति मुखतः कृत्वा गतः इत्यत्र न भवति । स्वाङ्गेति किम्? सर्वतो भूत्वास्ते । तसिति किम्? मुखे भूत्वा गतः । च्व्यर्थ इति किम्? नानाकृत्वा भक्ष्याणि भुङ्क्ते । द्विधाकृत्वा काष्ठानि गतः । **'तूष्णीमा'** (५।४।८७) तूष्णींशब्देन योगे भवतेर्धातोः सम्बन्धे क्त्वाणमौ भवतः । तूष्णींभूत्वा तूष्णींभूय तूष्णीभावमास्ते । **'आनुलोम्येऽन्वचा'** (५।४।८८) आनुलोम्यमनुकूलता परचित्ताराधनम् । अन्वचित्यनेनाव्ययेन योगे भुवस्तुल्यकर्तृकेऽर्थे वर्त्तमानादानुलोम्ये गम्यमाने धातोः सम्बन्धे क्त्वाणमौ भवतः । अन्वग्भूत्वा अन्वग्भूय अन्वग्भावमास्ते । अनुकूलो भूत्वा तिष्ठतीत्यर्थः । आनुलोम्य इति किम्? अन्वग्भूत्वा विजयते शत्रुम् पश्चाद्भूत्वेत्यर्थः । तिर्यचान्वचाचेतिशब्दानुकरणात्तिरश्चानूचेति न भवति । ॥ इति णम् प्रत्ययप्रकरणम् ॥ ॥ २०६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अथ भावकर्मणोः पञ्च कृत्यप्रत्ययाः ।

अथ कृत्यप्रत्ययान्निरूपयितुमाह । अथेति, भावकर्मणोरिति । 'तत्साप्यानाप्यात्कर्मभावे कृत्यक्तखलर्थाश्च' ( ३।३।२१ ) इति वचनात् पञ्च कृत्या इति । तथा च सूत्रम् **'ते कृत्याः'** ( ५।१।४७ ) ते घ्यण् तव्य अनीय य क्यप् इत्येते प्रत्ययाः कृत्यसंज्ञाः स्युः । कृत्यप्रदेशाः 'कृत्यस्य वा' ( २।२।८८ ) इत्यादयः । क्रमेण तानाह-सूत्रम्

## ऋवर्णव्यञ्जनाद् घ्यण् ॥ २०७ ॥ [ सि० ५।१।१७ ]

ऋवर्णान्ताद् व्यञ्जनान्ताच्च धातोर्घ्यण् स्यात् । कार्यम् ॥ २०७ ॥

**'ऋवर्ण०'** कार्यमिति । एवं धार्यं हार्यं पाक्यम् । णकारो वृद्ध्यर्थः । घकारः 'क्तेऽनिटः०' ( ४।१।१११ ) इत्यत्र विशेषणार्थः ॥ २०७ ॥ वाच्यमित्यादौ 'क्तेऽनिटश्चजोः कगौ घिति' ( ४।१।१११ ) इति कत्वादौ प्राप्तेऽपवादसूत्राणि

## वचोऽशब्दनाम्नि ॥ २०८ ॥ [ सि० ४।१।११९ ]

अशब्दसंज्ञायां वचेर्घ्यणि को न स्यात् । वाच्यम् । शब्दसंज्ञायां तु वाक्यम् ॥ २०८ ॥

**'वचो०'** वाच्यमित्यादौ 'क्तेऽनिटश्च' ( ४।१।१११ ) । वाच्यमाह अवाच्यमाह । वाक्यमिति सविशेषणमाख्यातं वाक्यमिति शब्दसंज्ञा ॥ २०८ ॥ सूत्रम्

## निप्राद्युजः शक्ये ॥ २०९ ॥ [ सि० ४।१।११६ ]

आभ्यां युजः शक्ये गम्ये घ्यणि गो न स्यात् । नियोज्यः प्रयोज्यः । शक्य इति किम् ? । नियोग्यः ॥ २०९ ॥

**'निप्रा०'** नियोक्तुं शक्यः नियोज्यः प्रयोज्यः । शक्य इति किम् ? नियोग्यः प्रयोग्यः ॥ २०९ ॥ सूत्रम्

## भुजो भक्ष्ये ॥ २१० ॥ [ सि० ४।१।११७ ]

भक्ष्येऽर्थे भुजो घ्यणि गो न स्यात् । भोज्यं पयः । अभक्ष्ये तु भोग्या भूः ॥ २१० ॥

**'भुज०'** अस्यायमर्थः । भुजो भक्ष्येऽर्थे घ्यणि परतो गो न स्यात् । भोज्यमन्नं । भोज्या यवागूः । भोज्यं पयः । भक्ष्य इति किम् ? भोग्यः कम्बलः प्रावरणीयः इत्यर्थः । भोग्याः भूः पालनीया इत्यर्थः । भक्ष्यमभ्यवहार्यमात्रमेव । न तु खरविशदमोहनादिकमेव खरविशदं नाम कठोरप्रत्यक्षम् । अकठिनस्य द्रव्यस्य जलादेरप्रत्यक्षस्य वाय्वादेरपि भक्ष्यत्वात् । यथा अप्भक्ष्यः । वायुभक्ष्यः ॥ २१० ॥ सूत्रम्

## त्यजयजप्रवचः ॥ २११ ॥ [ सि० ४।१।११८ ]

एषां घ्यणि कगौ न स्याताम् । त्याज्यं याज्यं प्रवाच्यः ॥ २११ ॥

**'त्य०'** याज्यमिति । अत एव प्रतिषेधात् यजेर्घ्यणपि । प्रवचिग्रहणं शब्दसंज्ञार्थम् । प्रवाच्यो नाम पाठविशेषस्तदुपलक्षितो ग्रन्थोऽप्युच्यते । उपसर्गनियमार्थं वा । प्रपूर्वस्यैव वचेरशब्दसंज्ञायां प्रतिषेधो नान्योपसर्गपूर्वस्य । दशानां रात्रीणां समाहारो दशरात्रम् । दशरात्रनिष्पाद्यो यज्ञो दशरात्रः । दशरात्रमस्यास्तीत्यभ्रादित्वादप्रत्यये वा । दशरात्रस्य यज्ञस्य यद्दाममहस्तदधिवाक्यं

नाम । यस्मिन् याज्ञिकानधिब्रुवते तस्मिन्नेवाभिधानम् । अधिवाच्यमन्यत्र । आदिशब्दसंसर्गात् **'न वञ्चेर्गतौ'** (४।१।११३) गतौ वर्त्तमानस्य वञ्चेः कत्वं न स्यात् । वञ्चेर्घञ् । वञ्चं वञ्चन्ति गन्तव्यं गच्छन्तीत्यर्थः । 'पश्यैते व्याधवार्केण्यसंकुले वित्तवत्तमाः । रात्रावपि महारण्ये वञ्चं वञ्चन्ति वाणिजाः' ॥ १ ॥ गताविति किम् ? वङ्कं काष्ठं कुटिलमित्यर्थः । **'यजेर्यज्ञाङ्गे'** (४।१।११४) यज्ञाङ्गे वर्त्तमानस्य यजेर्गत्वं न स्यात् । पञ्च प्रयाजाः । प्रेज्यन्ते एभिर्व्यञ्जनाद् घञ् । प्रयजनानि वा भावे घञि । त्रयोऽनुयाजाः । एकादशोपयाजाः । उपांशु एकान्ते यजनानि उपांशुयाजाः । पत्नीसंयाजाः । ऋतुयाजाः । घञ् याज इत्यप्यन्ये । यज्ञाङ्ग इति किम् ? प्रयागः अनुयागः यागः । **'भुजन्युब्जं पाणिरोगे'** (४।१।१२०) भुजेर्निपूर्वस्योब्जेश्च घञन्तस्य पाणौ रोगे चार्थे यथासङ्ख्यं भुजन्युब्जौ निपात्येते । भुज्यतेऽनेनेति भुजः पाणिः । न्युब्जिताः शेरतेऽस्मिन्निति न्युब्जो रोगविशेषः । 'व्यञ्जनाद् घञ्' (५।३।१३२) इति घञि गत्वाभावो भुजेर्गुणाभावश्च निपात्यते । पाणिरोग इति किम् ? भोगः न्युद्गः । **'वीरुन्न्यग्रोधौ'** (४।१।१२१) विपूर्वस्य रुहेः क्विपि न्यक्पूर्वस्य चाचि वीरुत् न्यग्रोधशब्दौ धकारान्तौ निपात्येते । विरोहतीति वीरुत् निपातनाद्दीर्घः । न्यग्रोहतीति न्यग्रोधः । अवरोध इत्यप्यन्ये ॥ २११ ॥

अथ प्रकृतम्

## उवर्णादावश्यके ॥ २१२ ॥ [ सि० ५।१।१९ ]

**अवश्यंभावे द्योत्ये उवर्णान्ताद्धातोर्घ्यण् स्यात् ॥ २१२ ॥**

**'उव०'** अवश्यस्य भावो अवश्यम्भाव इति वा । अकञि आवश्यकम् तस्मिन् द्योत्ये उवर्णान्ताद्धातोर्घ्यण् स्यात् । लाव्यं पाव्यम् । यन्नियोगात्कर्त्तव्यमर्थप्रकरणादिना निश्चितं तत्रायं प्रत्ययः । लाव्यमवश्यम् । पाव्यमवश्यम् । अवश्यलाव्यम् । अवश्यपाव्यम् । अत्रावश्यंशब्देनाप्यवश्यंभावो द्योत्यते । मयूरव्यंसकादित्वाच्च (३।१।११६) समासः । अवश्यस्तुत्य इति परत्वात् क्यप् । आवश्यक इति किम् ? लव्यम् पव्यम् ॥ २१२ ॥ अत्रोपयोगि सूत्रम् ।

## कृत्येऽवश्यमो लुक् ॥ २१३ ॥ [ सि० ३।२।१३८ ]

**कृत्यान्ते उत्तरपदेऽवश्यमो लुक् स्यात् । अवश्यलाव्यम् । 'घ्यण्यावश्यके' (४।१।११५) । चजोः कगौ न स्याताम् । अवश्ययाच्यं अवश्यरञ्ज्यम् ॥ २१३ ॥**

**'कृत्ये०'** अवश्यमो लुक् स्यादिति । षष्ठ्यान्त्यस्येति परिभाषया मो लुक् । अवश्यलाव्यमिति । एवं अवश्यकार्यं अवश्यस्तुत्यं अवश्यदेयं अवश्यकर्त्तव्यं अवश्यकरणीयम् । कृत्य इति किम् ? अवश्यंलावकः ॥ केनिट इति घत्वे प्राप्ते अपवादसूत्रम् । **'घ्यण्या०'** (४।१।११५) आवश्यकोपाधिके घ्यणि परे धातोश्चजोः कगौ न स्याताम् । अवश्यपाच्यमिति । एवं अवश्यरेच्यं अवश्यरञ्ज्यमिति । एवमवश्यभञ्ज्यम् । आवश्यक इति किम् ? पाक्यं रेक्यं रङ्ग्यं भङ्ग्यम् । अत्रादिशब्दानुवृत्त्या उक्तशेषं घ्यण्प्रत्ययप्रकरणं त्वेवम् । **'पाणिसमवाभ्यां सृजः'** (५।१।१८) पाणिपूर्वात्समवपूर्वाच्च सृजेर्घ्यण् स्यात् । ऋदुपान्त्यक्यपोऽपवादः । पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः । समवसृज्यते समवसर्ग्यः । आभ्यामिति किम् ? सृज्यं संसृज्यम् । समवेति समुदायग्रहणार्थं द्विवचनम् । **'आसुयुवपिरपिलपित्रपिडिपिदभिचम्यानमः'** (५।१।२०) आङ्पूर्वाभ्यां सुनोतिनमिभ्यां यौत्यादिभ्योऽष्टाभ्यश्च घ्यण् स्यात् । यापवादः । आसाव्यं याव्यं वाप्यं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

राप्यं लाप्यम् अभिलाप्यं । अपत्राप्यं । डेप्यम् ? दभिः सौत्रो बन्धने । ( बन्धने ) दाभ्यं । आचाम्यं । आनाम्यम् । नमिरन्तर्भूतण्यर्थः सकर्मकः । अकर्मका अपि धातवो ण्यर्थे वर्त्तमानाः सकर्मकाः स्युः । यथा नेमिं नमन्ति नमयन्तीत्यर्थः । डिपेः कुटादित्वाद्ये-गुणो न लभ्यते इति घ्यण्-विधीयते । आनमेर्नेच्छन्त्येके । **'वाधारेऽमावस्या'** (५।१।२१) अमापूर्वाद्वसतेराधारे घ्यण् पक्षे ह्रस्वश्च वा निपात्यते । सह-वसतोऽस्यां चन्द्रार्कौ इत्यमावास्या अमावस्या वा । रूढ्या तिथिविशेषः । पक्षे यमकृत्वा ह्रस्वत्वनिपातनं 'अश्च वामावास्यायाः' (६।३।१०३) इत्यत्रैकदेशस्यानन्यत्वादमावस्या-शब्दस्यापि ग्रहणार्थम् । **'सन्नाय्यकुण्डपाय्यराजसूयं क्रतौ'** (५।१।२२) एते क्रतावभिधेये घ्यणन्ता निपात्यन्ते, आधारे कर्मणि वा । निपातनादेवायादेशदीर्घत्वे अपि भवतः । सन्नीयते सोमोऽस्मिन् सन्नीयते असौ इति वा सन्नाय्यः क्रतुः । सन्नेयोऽन्यः । कुण्डैः पीयते सोमोऽस्मिन् कुण्डैः पीयते इति वा कुण्डपाय्यः क्रतुः । ससोमको हि यागः क्रतुः । कुण्डपानोऽन्यः । राजा सूयतेऽस्मिन् राज्ञा वा सोतव्यः इति राजसूयः क्रतुः । **'प्रणाय्यो निष्कामासम्मते'** (५।१।२३) प्रपूर्वान्नयतेर्घ्यण् आयादेशश्च निपात्यते । अनयोरर्थयोः । प्रणाय्योऽन्तेवासी । विषयेष्व-नभिलाषः इत्यर्थः । प्रणाय्यश्चौरः । सर्वलोकासम्मत इत्यर्थः । प्रणेयोऽन्यः । **'धाय्यापाय्यसान्नाय्यनिकाय्यमृङ्मानहविर्निवासे'** (५।१।२४) धाय्यादय ऋगादिष्वर्थेषु यथासङ्ख्यं घ्यणन्ता निपात्यन्ते । निपातनादेव सर्वत्रायादेशः । दधातेर्ऋचि, धीयते समिदग्नावनयेति धाय्या ऋक् । रूढिशब्दत्वात्काश्चिदेव ऋच उच्यन्ते । खग धाय्या धिगधैर्यधारिणः इति **नैषधीये** (द्वि. स.) । अन्यत्र धेया । मीयते येन तन्मानं । तत्र माङ आदिपत्वं च । मीयतेऽनेनेति पाय्यं मानम् । मेयमन्यत् । सम्पूर्वान्नयतेर्हविषि समो दीर्घत्वं च । सान्नाय्यं हविः । रूढ्या हविर्विशेष एव । सन्नेयमन्यत् । निपूर्वाच्चिनोतेर्निवासे आदिकत्वं च । निकाय्यो निवासः । निचेयमन्यत् । **'परिचाय्योपचाय्यानाय्यसमूह्यचित्यमग्नौ'** (५।१।२५) एतेऽग्नौ निपात्यन्ते । पर्युपपूर्वाच्चिनोतेर्घ्यण् आयादेशश्च । परिचीयते इति परिचाय्योऽग्निः । एवमुपचाय्यः । परिचेय उपचेयोऽन्यः । आङ्पूर्वान्नयतेर्घ्यण् आयादेशश्च । गार्हपत्यादानीयते इत्यानाय्यो दक्षिणाग्निः । रूढ्याऽऽहवनीयेन सहैकयोनिरेवोच्यते । आनेयोऽन्यः । आहवनीयोऽग्निर्दक्षिणाग्निश्च निर्वाणौ गार्हपत्यादेवानीयेते । अतो द्वावप्येकयोनी; गार्हपत्याग्निस्त्वरणिनिर्मथनादेवोत्पाद्यते इति न स आनाय्यः । केचिदग्निविशेषा-दन्यत्राप्यनित्यविशेष इच्छन्ति । आनाय्यो गोधुक् अनित्य इत्यर्थः । सम्पूर्वाद्वहेर्घ्यण् वशब्दस्य ऊत्वं च । समूह्यते इति समूह्यः । अन्यत्र संवाह्यः । **अन्ये** तु सम्पूर्वादूहोऽग्नावेवेति नियमार्थं घ्यणं निपातयन्ति । अग्नेरन्यत्र समूहितव्य इत्येव । वहेस्तु तन्मतेऽग्नावपि संवाह्य इति भवति । चिनोतेः क्यप् । चित्योऽग्निः । चेयोऽन्यः । **'याज्या दानर्चि'** (५।१।२६) यजेः करणे घ्यण् निपात्यते । दानर्च्यभिधेयायाम् । इज्यतेऽनयेति याज्या । 'त्यजयजप्रवचः' इति गत्वाभावः । ->> इति घ्यण्प्रत्ययप्रकरणम् <<- ॥ २१३ ॥ सूत्रम्

## तव्यानीयौ ॥ २१४ ॥ [ सि० ५।१।२७ ]

**धातोरेतौ स्तः । कर्त्तव्यः करणीयः कटः ॥ २१४ ॥**

**'तव्या०'** शयितव्यम् शयनीयम् । वस्तव्यम् वसनीयम् । कर्त्तव्यम् करणीयम् । भवता कर्त्तव्यः करणीयः कटः ॥ २१४ ॥ सूत्रम्

है० प्रका० उत्त० १२४

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## य एच्चातः ॥ २१५ ॥ [ सि० ५।१।२८ ]

**स्वरान्ताद्धातोर्यः स्यात् आत एश्च । चेयं देयम् ॥ २१५ ॥**

**'य ए०'** ऋवर्णव्यञ्जनान्ताद् घ्यणो विहितत्वात् परिशिष्टात् स्वरान्ताद्धातोर्यः स्यात् । दातुमिष्यते दित्स्यते इति दित्स्यम् धित्स्यम् । 'अत' इत्यलोपः । चेयम् । नेयम् । शेयम् । नव्यं । हव्यं । भव्यं । लव्यं । पेयं । गेयम् ॥ २१५ ॥ सूत्रम्

## शकितकिचकियतिशसिसहियजिभजिपवर्गात् ॥ २१६ ॥ [ सि० ५।१।२९ ]

**एभ्योऽष्टाभ्यः पवर्गान्ताच्च यः स्यात् । शक्यं गम्यम् ॥ २१६ ॥**

**'शकि०'** शक्यमिति । एवं तक्यं चत्यं यत्यं शस्यं सह्यं यज्यं भज्यम् । पवर्गे, गम्यमिति । एवं लप्यं लभ्यम् । यजेः 'त्यजयज०' ( ४।१।११८ ) इति प्रतिषेधाद्भजेश्च बाहुलकाद् घ्यणपि । याज्यं भाग्यम् । यजिभजिभ्यां नेच्छन्त्येके । कथमसिना वध्योऽसिवध्यः मुशलवध्यः 'न जनवधः०' ( ४।३।५४ ) इति वृद्धिप्रतिषेधे घ्यणा भविष्यति ॥ २१६ ॥

## यममदगदोऽनुपसर्गात् ॥ २१७ ॥ [ सि० ५।१।३० ]

**एभ्योऽनुपसर्गेभ्यो यः स्यात् । यम्यं मद्यं गद्यम् ॥ २१७ ॥**

**'यम०'** अनुपसर्गादिति किम् ? आयाम्यं प्रमाद्यं निगाद्यम् । पवर्गान्तत्वात् सिद्धे नियमार्थं वचनम् । अनुपसर्गादेव यथा स्यात् । बहुलवचनान् माद्यन्त्यनेनेति मद्यम् करणेऽपि, नियम्यमिति च सोपसर्गादपि ॥ २१७ ॥ सूत्रम्

## क्षय्यजय्यौ शक्तौ ॥ २१८ ॥ [ सि० ४।३।९० ]

**शक्तौ गम्यायामेतौ निपात्यौ । क्षय्यो व्याधिः । जय्यः शत्रुः । 'क्रय्यः क्रयार्थे' ( ४।३।९१ ) क्रयाय प्रसारितः क्रय्योऽर्थः ॥ २१८ ॥**

**'क्षय्य०'** क्षि जि इत्येतयोः शक्तौ गम्यायां यप्रत्ययेऽयन्तादेशो निपात्यते । शक्यः क्षेतुं क्षय्यो व्याधिः । शक्यं क्षेतुं क्षय्यं बहुना । शक्यो जेतुं जय्यः शत्रुः । शक्यं जेतुं जय्यं राज्ञा । शक्ताविति किम् ? अर्हे, क्षेयं जेयम् । सूत्रम् **'क्रय्य०'** ( ४।३।९१ ) क्रीणातेर्यप्रत्ययेऽयन्तादेशो निपात्यते । क्रयार्थे क्रयाय चेत्प्रसारितोऽभिधेयो भवति । क्रय्यो गौः । क्रय्यः कम्बलः । क्रयार्थ इति किम् ? क्रेयं नो धान्यं न चास्ति प्रसारितम् । अत्रादिशब्दसान्निध्यात् **'चरेराङस्त्वगुरौ'** ( ५।१।३१ ) अनुपसर्गाच्चरेराङ्पूर्वात्त्वगुरौ यो भवति । चर्यं भवता । चर्यो देशः । आचर्यं भवता । आचर्यो देशः । आङस्त्विति किम् ? अभिचार्यम् । अगुराविति किम् ? आचार्यो गुरुः । **'वर्योपसर्यावद्यपण्यमुपेयर्तुमतीगर्ह्यविक्रेये'** ( ५।१।३२ ) वर्यादयः शब्दा उपेयादिष्वर्थेषु यथासङ्ख्यं यान्ता निपात्यन्ते । वृणातेर्ये वर्या उपेया चेद्भवति । शतेन वर्या सहस्रेण वर्या कन्या सम्भक्तव्या मैत्रीमापादनीयेति यावत्; वृत्यान्या । वृणोतेः क्यप् । स्त्रीलिङ्गनिर्देशादिह न भवति । वार्या ऋत्विक् । अन्यस्तु 'सुग्रीवो नाम वर्योऽसौ भवता चारुविक्रम' इति प्रयोगदर्शनात् पुंलिङ्गेऽपीच्छति । सामान्यनिर्देशात्तदपि सङ्गृहीतम् । शतेन वर्यः सहस्रेण वर्यः । उपपूर्वात्सर्तेर्ये उपसर्या ऋतुमती चेत् । उपसर्या गौः । गर्भग्रहणे प्राप्तकालेत्यर्थः । अन्यत्र उपसार्या शरदि मथुरा । नञ्पूर्वाद्वदेर्ये अवद्यं गर्ह्यं चेत् । अवद्यं पापम् । अवद्या हिंसा गर्ह्येत्यर्थः । अनुद्यमन्यत् । कथमवाद्या ?

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वदेर्निरुपपदाद् घ्यण् पश्चान्नञ्समासः । पणेर्ये पण्यं विक्रेयं चेत् । पण्यः कम्बलः । पण्यो गौः विक्रेय इत्यर्थः । अन्यत्र पाण्यः साधुः । **'स्वामिवैश्येऽर्यः'** (५।१।३३) अर्तेरनयोरभिधेययोर्यो निपात्यते । अर्यः स्वामी वैश्यश्च । अन्य आर्यः । **'वह्यं करणे'** (५।१।३४) वहेः करणे यो निपात्यते । वहन्ति तेनेति वह्यं शकटम् । वाह्यमन्यत् । ✵ इति यप्रत्ययप्रकरणम् ✵
॥ २१८ ॥ सूत्रम्

## नाम्नो वदः क्यप् च ॥ २१९ ॥ [ सि० ५।१।३५ ]

**अनुपसर्गान्नाम्नः पराद्वदेः क्यप्यौ स्याताम् । ब्रह्मोद्यम् ब्रह्मवद्यम् ॥ २१९ ॥**

**'नाम्नो०'** अनुपसर्गादिति वर्त्तते । ब्रह्मोद्यमिति । एवं सत्योद्यम् सत्यवद्यम् । अनुपसर्गादित्येव । प्रवाद्यम् । अनुवाद्यम् । ककारः कित्कार्यार्थः । पकार उत्तरत्र तागमार्थः ॥ २१९ ॥

## हत्याभूयं भावे ॥ २२० ॥ [ सि० ५।१।३६ ]

**अनुपसर्गान्नाम्नः परावेतौ भावे क्यबन्तौ निपात्यौ । ब्रह्महत्या देवभूयं गतः ॥ २२० ॥**

**'हत्या०'** हन्तेः स्त्रीभावे क्यप् तकारश्चान्तादेशः । ब्रह्मणो वधः ब्रह्महत्या भ्रूणहत्या दरिद्रहत्या । भवतेर्नपुंसके भावे क्यप् । ब्रह्मणो देवस्य भवनं ब्रह्मभूयं देवभूयं गतः । ब्रह्मत्वं देवत्वं गत इत्यर्थः । भाव इति किम् ? शुना हन्यते श्वघात्या वृषली । नाम्न इत्येव । हतिः घातः भव्यम् । हन्तेर्भावे घ्यण् न भवत्यनभिधानात् । तथा[1] च बहुलाधिकारः । अनुपसर्गादित्येव । उपहतिः प्रभव्यम् ॥ २२० ॥ सूत्रम्

## अग्निचित्या [ सि० ५।१।३७ ] खेयमृषोद्ये [ सि० ५।१।३८ ] ॥ २२१ ॥ २२२ ॥

**एते निपात्याः ॥ २२१ ॥ २२२ ॥**

**'अग्नि०'** अग्नेः पराच्चिनोतेः स्त्रीभावे क्यप् । अग्नेश्चयनमग्निचित्या । **'खेय०'** (५।१।३८) अनुपसर्गादिति नाम्न इति च निवृत्तम् । एतौ क्यबन्तौ निपात्येते । खनेर्घ्यणोऽपवादः क्यप् अन्त्यस्वरादेरेकारश्च । खन्यते इति खेयम् निखेयम् उत्खेयम् । मृषापूर्वाद्वदतेः पक्षे ये प्राप्ते नित्यं क्यप् । मृषोद्यते इति मृषोद्यम् । नात्र भाव एवेति योगविभागः ॥ २२२ ॥

## कुप्यभिद्योद्ध्यसिध्यतिष्यपुष्ययुग्याज्यसूर्यं नाम्नि ॥ २२३ ॥ [ सि० ५।१।३९ ]

**एते क्यबन्ताः संज्ञायां निपात्याः ॥ २२३ ॥**

**'कुप्य०'** गुपेः क्यप् आदेः कत्वं च धनेऽर्थे । गोपाय्यते तदिति कुप्यम् धनम् । गोप्य ? (गोपाय्यं) मन्यत् । भिदेरुज्झेश्च नदेऽभिधेये क्यप् उज्झेर्धत्वं च । भिनत्ति कूलानि इति भिद्यः । उज्झत्युदकमिति उद्ध्यः । अन्यत्र भेत्ता उज्झिता । सिधितिविषिपुषिभ्यो नक्षत्रेऽभिधेये क्यप् त्विषेर्वलोपश्च । सिध्यन्ति त्वेषन्ति पुष्यन्त्यस्मिन् कार्याणीति सिध्यः तिष्यः पुष्यः । अन्यत्र सेधनः त्वेषणः पोषणः । युजेः क्यप् गत्वं च वाहनेऽभिधेये । युञ्जन्ति तदिति युग्यं वाहनम् गजाश्वादि । योग्यमन्यत् ।

१ एतदर्थमेव बहुलाधिकारोऽनुवर्तते इत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आङ्पूर्वादञ्जेर्घृतेऽर्थे क्यप् । आनजन्त्यनेनेत्याज्यं घृतम् । आञ्जनमन्यत् । सर्त्तेः क्यप् ऋकारस्योर् सुवतेर्वा क्यप् रोऽन्तश्च देवतायाम् । सरति सुवति वा कर्मसु लोकानिति सूर्यो देवता । बहुलाधिकारान्निपातनसामर्थ्याद्वानुक्तोऽपि निपातनेषु कारकविशेषोऽवगम्यते ॥ २२३ ॥

## दृवृग्स्तुजुषेतिशासः ॥ २२४ ॥ [ सि० ५।१।४० ]

एभ्यः क्यप् । आदृत्यः प्रावृत्यः स्तुत्यः जुष्यः । एतीति इणिकोर्ग्रहणम् । इत्यः अधीत्यः शासेः शिष्यः । आशासेस्तु आशास्यम् ॥ २२४ ॥

'दृवृ०' दृ, आदृत्यः प्रावृत्य इति वृगः । वृङस्तु वार्या ऋत्विजः । स्तु, स्तुत्यः अवश्यस्तुत्यः । जुष जुष्यः । इत्यः अधीत्य इति इणिकोः । अयतेरिङस्तु न भवति उपेयम् अध्येयम् । इकोऽप्यध्येयमित्येके । ईयतेरप्युपेयमिति भवति । आशास्यमिति । 'आशास्यमन्यत्पुनरुक्तभूतमिति' । कथ'मनिवार्यो गजैरन्यैः स्वभाव-इव देहिना'मिति ? । सम्भक्तेरन्यत्रापि वृङ् ॥ २२४ ॥

## ऋदुपान्त्यादक्लृपिचृदृचः ॥ २२५ ॥ [ सि० ५।१।४१ ]

कृप्यादिवर्जादृदुपान्त्यात्क्यप् स्यात् । वृत्यम् । कृप्यादिवर्जनात् कल्प्यम् ॥ २२५ ॥

'ऋदु०' वृत्यमिति । एवं वृध्यं गृध्यं शृध्यम् । कल्प्यमिति । एवं चर्त्यं अर्च्यम् ॥ २२५ ॥

## कृवृषिमृजिशंसिगुहिदुहिजपो वा ॥ २२६ ॥ [ सि० ५।१।४२ ]

एभ्यः सप्तभ्यः क्यप् वा स्यात् । कृत्यं कार्यम् । वृष्यं वर्ष्यम् । मृज्यं मार्ग्यम् । शस्यं शंस्यम् । गुह्यं गोह्यम् । दुह्यं दोह्यम् । जप्यं जाप्यम् ॥ २२६ ॥

'कृवृ०' जाप्यमिति । जपेरपि क्यबभावपक्षे घ्यण् । विकल्पसामर्थ्यात् । 'शकितकि०' इति यप्रत्यये तु विशेषाभावः । आदिशब्दादनुवृत्त्या च **'जिविपून्यो हलिमुञ्जकल्के'** (५।१।४३) जयतेर्विपूर्वाभ्यां च पूनीभ्यां यथासङ्ख्यं हल्यादिष्वर्थेषु क्यप् स्यात् । जीयते निपुणेनेति जित्या जित्यो वा हलिर्महद्धलम् । पूङ् पूग् वा विपवितव्यो विपूयो मुञ्जस्तृणविशेषः । पूगो नेच्छन्त्येके । विनेतव्यस्तैलादिना कर्त्रात्ममध्ये प्रापणीय इति विनीयः कल्कस्त्रिफलादीनाम् । हल्यादिष्विति किम् ? अन्यत् जेयम् । विपव्यम् । विनेयम् । **'पदास्वैरिबाह्यापक्ष्ये ग्रहः'** (५।१।४४) विभक्त्यन्तं पदम् । अस्वैरी परतन्त्रः । बाह्या बहिर्भवा । पक्ष्यो वर्ग्यः । एष्वर्थेषु ग्रहः क्यप् स्यात् । घ्यणोऽपवादः । प्रगृह्यते विशेषेण ज्ञायते इति प्रगृह्यं पदम् यत्स्वरेण न सन्धीयते 'अग्नी इति' । अवगृह्यते नानावयवसात्क्रियते इति अवगृह्यं पदम् । यथा पचतीत्यत्र पच् शव् तिव् इत्यवयवाः । अस्वैरिणि, गृह्यन्ते इति गृह्याः कामिनः रागादिपरतन्त्रा इत्यर्थः । बाह्यायां ग्रामगृह्या श्रेणिः, नगरगृह्या सेना बाह्येत्यर्थः । स्त्रीलिङ्गनिर्देशो लिङ्गान्तरेऽनभिधानख्यापनार्थः । पक्ष्ये, त्वद्गृह्यः मद्गृह्यः । 'गुणगृह्या वचने विपश्चितः' तत्पक्षाश्रिता इत्यर्थः । एष्विति किम् ? ग्राह्यं वचः । **'भृगोऽसंज्ञायाम्'** (५।१।४५) क्यप् । भ्रियते भृत्यः पोष्य इत्यर्थः । असंज्ञायामिति किम् ? भार्यो नाम क्षत्रियः । भार्या पत्नी । ननु च संज्ञायामपि स्त्रियां भृगो नाम्नीति क्यबस्ति । यथा कुमारभृत्या । न । तस्य भावे एव विधानात् । **'समो वा'** (५।१।४६) सम्पूर्वाद्भृगः क्यप् वा स्यात् । सम्भृत्यः सम्भार्यः । ॥ इति क्यप्प्रत्ययप्रकरणम् ॥

॥ २२६ ॥ कृत्यप्रत्ययानामर्थविशेषानाह । सूत्रम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## शक्ताऽर्हे कृत्याश्च ॥ २२७ ॥ [ सि० ५।४।३५ ]

**शक्तेऽर्हे च कर्त्तरि गम्ये धातोः कृत्याः सप्तमी च स्युः । भवता खलु भारो वाह्यः । भवान् हि शक्तः । भवता खलु कन्या वाह्या । भवानेव तदर्हति ॥ २२७ ॥**

**'शक्ता०'** गम्ये इति । नतु वाच्य एवेत्यर्थः । शक्ते कर्त्तरि गम्ये, यथा भवता खलु भारो वाह्य इति । एवं वोढव्यः वहनीय उह्येत । शक्ते कर्त्तरि वाच्ये, यथा भवान् भारं वहेत् । तथा चाह-भवान् हि शक्त इति । अर्हे कर्त्तरि गम्ये, यथा भवता खलु कन्या वाह्येति । एवं वोढव्या वहनीया । तथा चाह—भवानेव तदर्हतीति भवान् खलु कन्यां वहेत् । अत्रार्हे कर्त्तरि वाच्ये व्यक्ति-व्याख्यानादनेन सप्तमी । अन्यथार्हे कर्त्तरि 'अर्हे तृच्' इति परत्वात्तृजेव स्यात् । भावकर्मणोरस्य चरितार्थत्वात् । एवं भवता खलु छेदसूत्रं वाह्यं वोढव्यं वहनीयम् । भवान् खलु छेदसूत्रं वहेत् । भवानेतदर्हति । सप्तम्या बाधो मा भूदिति कृत्यग्रहणम् । अत्रादिशब्दसंसर्गात् **'णिन् चावश्यका-धमर्ण्ये'** ( ५।४।३६ ) अवश्यंभाव आवश्यकम् । ऋणेऽधमोऽधमर्णस्तस्य भाव आधमर्ण्यम् अनयोर्गम्ययोः कर्त्तरि वाच्ये धातोर्णिन् कृत्याश्च स्युः । अवश्यं करोति कारी । हारी । यदा त्ववश्य-मोपि प्रयोग उभाभ्यामपि द्योतनात्तदा मयूरव्यंसकादित्वात्समासः । अवश्यंकारी २ । अवश्य-शब्दप्रयोगे तु अवश्यकारी । अकारान्तोऽपि ह्यनव्ययमवश्यशब्दोऽस्ति । अवश्यं गेयो गाथको गीतस्य । अवश्यं-भव्यश्चैत्रः । आधमर्ण्ये शतं-दायी सहस्रं-दायी । कारी मे कटमसि । हारी मे भारमसि । गेयो गाथानाम् । णिना बाधो मा भूदिति कृत्यविधानम् । कृत्त्वाच्च कर्त्तरि णिनो विधानात् कृत्यानामपि कर्त्तर्येव विधानम् । भावकर्मणोस्तु सामान्येन विधानात् सिद्धा एव बाधकाभावात् । **'अर्हे तृच्'** ( ५।४।३७ ) अर्हे कर्त्तरि वाच्ये धातोस्तृच् स्यात् । भवान् कन्याया वोढा । भवान् खलु छेदसूत्रस्य वोढा । सप्तम्या बाधो मा भूदित्यर्हे तृज्विधानम् ॥ २२७ ॥

## व्याप्ये घुरकेलिमकृष्टपच्यम् ॥ २२८ ॥ [ सि० ५।१।४ ]

**घुरकेलिमौ प्रत्ययौ कृष्टपच्यशब्दश्च व्याप्ये कर्त्तरि स्युः । स्वयं भज्यते इति भङ्गुरं काष्ठम् । पचेलिमा माषाः । कृष्टपच्याः शालयः ॥ २२८ ॥**

इति श्रीमहोपाध्यायश्रीकीर्त्तिविजयगणिशिष्योपाध्यायश्रीविनयविजयगणिविरचितायां हैमलघुप्रक्रियायां तृतीया वृत्तिः समाप्ता ।

सम्पूर्णा चेयं प्रक्रिया



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## प्रशस्तिः

स्फूर्जद्रूपार्थनिधेर्हैमव्याकरणरत्नकोशस्य ।
अर्गलभिद्रचनेयं कनीयसी कुञ्चिकाद्रियताम् ॥ १ ॥
श्रीहीरविजयसूरेः पट्टे श्रीविजयसेनसूरीशाः ।
तेषां पट्टे सम्प्रति विजयन्ते विजयदेवसूरीन्द्राः ? ॥ २ ॥
श्रीविजयसिंहसूरिर्जीयाज्जयवति गुरौ गते स्वर्गम् ।
श्रीविजयप्रभसूरिर्युवराजो राजतेऽधुना विजयी ॥ ३ ॥
खेन्दुमुनीन्दुमितेऽब्दे विक्रमतो राजधन्यपुरनगरे ।
श्रीहीरविजयसूरेः प्रभावतो गुरुगुरोर्विपुलात् ॥ ४ ॥
श्रीकीर्त्तिविजयवाचकशिष्योपाध्यायविनयविजयेन ।
हैमव्याकरणस्य प्रथितेयं प्रक्रिया जीयात् ॥ ५ ॥ युग्मम् ।
भावनगरीयां प्रतौ 'कान्तिविजयाख्यगणिनः पठनकृते कृतधियः सतीर्थ्यस्य ।
विहितोऽयं यत्नः स्तात् सफलः सर्वोपकारेण ॥ ६ ॥
प्रत्यक्षरं गणनया संख्यैतस्य मयोदिता ।
अनुष्टुभां चतुस्त्रिंशत्सहस्री जयताच्चिरम् ॥ ७ ॥
ग्रंथ सं. ३४००० वे. लि. बोडा पूनमचंद

प्रत्यक्षरं गणनया ग्रन्थमानमिहोदितम् ।
अनुष्टुभां सहस्रे द्वे शतैः पञ्चभिरन्विते ॥ ८ ॥ इति अम्मदावादीयप्रतौ

। समाप्तम् ।

**'व्याप्ये०'** घुरकेलिमौ इत्यादि । तत्र 'भञ्जिभासिमिदो घुरः' (५।२।७४) 'वेत्ति-च्छिदिभिदः कित्' (५।२।७५) इति सूत्रद्वयेन विहितो घुरप्रत्ययः । केलिमोऽत एव वचनाद् ज्ञायते कृष्टपच्ये यश्च । एतेऽनेन कर्मकर्त्तरि विधीयन्ते । भिदेलिमास्तंदुलाः । 'विहाविशाप-चिभियादेः केलिमः' (३५४) इत्यौणादिकः केलिमो नियतधातुवाच्यविषयो यथासम्भवं कर्त्रादिकारके च । यथा पचत्यसावन्नमिति पचेलिमोऽग्निरादित्यश्च । भिदेलिमस्तस्करः । अयं तु यथालक्ष्यं सर्वधातुविषयः कर्मकर्त्तरि च । **कौमुद्यां** तु केलिम उपसङ्ख्यानं पचेलिमा माषाः पक्तव्याः भिदेलिमाः सरला भेत्तव्याः । कर्मणि प्रत्ययः । **वृत्तिकारस्तु** कर्मकर्त्तरि चायमिष्यते इत्याह । तद्भाष्यविरुद्धमित्ययुक्तम् । कृष्टे पच्यन्ते स्वयमेव कृष्टपच्याः शालय इति । अत्र **शालि**शब्दोपादानं प्रक्रियाग्रन्थस्य **समाप्तौ पर्यन्तमङ्गलार्थम्** । तत्र शालिशब्दः प्रशस्यधान्याभिधायित्वेन द्रव्यमङ्गलम् । **श्रीशालिभद्रमहर्षि**स्मारकत्वेन भावमङ्गलमपीति ज्ञेयम् । अत्रादिशब्दानुवृत्त्या **'सङ्गतेऽजर्यम्'** (५।१।५) सङ्गमनं सङ्गतम् तस्मिन् कर्त्तर्यभिधेये नञ्पूर्वाज्जीर्यतेर्यप्रत्ययो निपात्यते । दैवादिकस्य जॄष् इत्यस्येदं निपातनम्, न तु क्रैयादिकस्य जॄश इति । न जीर्यति अजर्यं आर्यसङ्गतम् । मृगैरजर्यं जरसोपदिष्टम् । सामान्यविशेषभावेन चोभयोरपि प्रयोगो भवति । तेन सङ्गतमार्येण रामाजर्यं कुरु द्रुतम् । अजर्यं सङ्गतम् नोऽस्तु । सङ्गतमिति किम् ? अजरः पटः । अजरिता कम्बलः । कर्त्तरीत्येव ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अजार्थं सङ्गतेन । ण्यणि रूपम् । '**रुच्याव्यथ्यवास्तव्यम्**' (५।१।६) एते कर्त्तरि निपात्यन्ते । रोचतेर्नञ्पूर्वाद् व्यथतेश्च क्यप् प्रत्ययो वसतेश्च तव्यण् निपात्यते । रोचत इति रुच्यो मोदको मैत्राय । न व्यथते इत्यव्यथ्यो मुनिः । वसतीति वास्तव्यः । '**भव्यगेयजन्यरम्यापात्याप्लाव्यं नवा**' (५।१।७) एते कर्त्तरि वा निपात्यन्ते । भावकर्मणोः प्राप्तयोः पक्षे कर्त्तरि विधानार्थमिदम् । भूगायतिरमयतिभ्यो यो यः प्रत्ययो यश्च जनेराङ्पूर्वाभ्यां च पतिप्लुभ्यां ध्यण् स कर्त्तरि वा निपात्यते । भवत्यसाविति भव्यः । पक्षे भव्यमनेन । गायतीति गेयो माणवकः साम्नाम् । गेयानि माणवकेन सामानि । जायतेऽसाविति जन्यः । जन्यमनेन । रमयत्यसौ रम्यः । रम्यते रम्यः । आपतत्यसावापात्यः । आपात्यमनेन । आप्लवतेऽसौ आप्लाव्यः । आप्लाव्यमनेन । '**प्रवचनीयादयः**' (५।१।८) एते कर्त्तर्यनीयान्ता प्रत्यया वा निपात्यन्ते । प्रवक्तीति प्रवचनीयो गुरुः शासनस्य । प्रवचनीयं गुरुणा शासनम् । एवं रमयतीति रमणीयो देशः । मदयतीति मदनीया योषित् । दीपयतीति दीपनीयं चूर्णम् । मोहयतीति मोहनीयं कर्म । ज्ञानमावृणोतीति ज्ञानावरणीयम् । एवं दर्शनावरणीयम् । उपतिष्ठत इत्युपस्थापनीयः शिष्यो गुरोः । उपस्थापनीयः शिष्येण गुरुः । इति गुरुनामोच्चारणमस्य हैमप्रकाशस्य पर्यन्तमङ्गलमिति ज्ञेयम् ॥ २२८ ॥

अर्हन्तो मङ्गलं सिद्धा मङ्गलं शुद्धचिन्मयाः ।
साधवो मङ्गलं धर्मः श्रीजिनोक्तोऽस्तु मङ्गलम् ॥ १ ॥

प्रशस्तेः **अष्टापि** आर्याः स्पष्टाः ।

यां शिष्योद्भूतकीर्त्तिकीर्त्तिविजयश्रीवाचकाहर्म्मणे
राजश्रीतनयो व्यधत्त विनयः श्रीतेजपालात्मजः ।
तस्यां शासितसाधुशब्दसरणौ स्वोपज्ञसत्प्रक्रिया-
वृत्तौ सिद्धिरमामविन्दत गुणैर्वृत्तिस्तृतीयाऽद्भुता ॥ १ ॥

**इति श्रीहैमलघुप्रक्रियावृत्तौ हैमप्रकाशाभिधायां तृतीया वृत्तिः समाप्ता ।**
तत्समाप्तौ च सम्पूर्णा हैमलघुप्रक्रिया वृत्तिः ।

## अथाऽस्याः प्रशस्तिः ।

नव्ये काव्येऽतिभव्याः प्रथितपृथुधियः पाणिनीये च हैमे
विज्ञाने वास्तुतत्त्वेऽप्यतिविशददृशः कर्कशास्तर्कशास्त्रे ।
सिद्धान्ते बुद्धिधन्या गुणिगणकगणाग्रेसरा नाटकज्ञा
निष्णाता नीतिशास्त्रे शकुननयविदो वैद्यके हृद्यविद्याः ॥ १ ॥
स्वच्छन्दं छन्दसामप्यधिगतरचनायावनीभावनीया ?
प्राप्तालङ्कारसारा रुचिरनवरसग्रन्थवीथीसमर्थाः ।
षड्भाषापद्यबन्धोद्धुरमधुरगिरोऽध्यात्मविद्याधुरीणाः
कोकेऽप्यस्तोकलोकप्रकटितयशसस्ते वयं केन जय्याः ॥ २ ॥
यावद्विद्याभिमानैरिति हृदि बहुधा मत्ततामाश्रयाम-
स्तावद्दैवादकस्मात् स्मृतिपथमगमन् हेमसूरीश्वराद्याः ।
गर्वः सर्वोऽपि खर्वः समजनि युगपत्तत्प्रणीतप्रबन्धात्
ध्यायन्तोऽर्थगंभीरानथ परिचिनुमस्तत्त्वसौहित्यलीलाम् ॥ ३ ॥ त्रिभिर्विशेषकम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रीहेमचन्द्रादिकवी(सूरी)श्वराणां पुरः स्फुरेद्यः कवितामदौघः ।
तार्क्ष्यस्य पक्षौ समुदीक्ष्य साक्षात् स मक्षिकाणामिव पक्षगर्वः ॥ ४ ॥
हैमव्याकरणार्णवं निजधिया नावावगाह्याभितो
मञ्जूषा समपूरि भूरिघृणिभिर्यैर्न्यायरत्नैरिह ।
ज्योतिस्तत्त्वविवर्त्तवार्त्तिककृतः श्रीहेमहंसाह्वया
जीयासुः सुमनोमनोरमगिरस्ते वाचकाधीश्वराः ॥ ५ ॥
हैमव्याकरणाम्भोधिं ये विगाह्य महाधियः ।
अभिज्ञानमिवाकार्षुः क्रियारत्नसमुच्चयम् ॥ ६ ॥
वैयाकरणवर्यास्ते श्रीगुणरत्नसूरयः ।
अन्येऽपि शाब्दिकप्रष्ठा विजेषीरन् महर्षयः ॥ ७ ॥ युग्मम् ।
हैमव्याकरणार्णवस्य महतस्तुच्छा मदीया मति-
द्रोणी पारमविन्दतीयमसकृत् क्रोडेऽस्य चिक्रीडयन् ? ।
यत्नामूमुदमुक्तिमौक्तिकशतैर्व्यक्तीकृतैः कोविदान्
तत्सर्वं सुगुरुप्रसादपवनप्रागल्भ्यमुज्जृम्भते ॥ ८ ॥
श्रीसूरिभिर्यानि निरूपितानि सूत्राणि तान्येव **सवृत्तिकानि**[1] ।
क्रमः परावर्त्तित एष शब्दव्युत्पत्तये मादृशबालिशानाम् ॥ ९ ॥
या श्रीहेमगुरोर्मुखांबुदभ[2]वत् **सम्यक्त्व**वाक्चातुरी–?
त्यालोच्यैव कृतो वचोभिरमलैस्तैरेव शब्दक्रमः ।
सर्वं प्राक्तनमेव नव्यमिह किं निर्दिष्टमित्यादिभि-
र्वाक्यैर्मामिह ये हसन्ति सुहृदस्तुष्यन्तु ते सज्जनाः ॥ १० ॥
हंहो कोविदकुञ्जराः किमु गिरामर्थेषु संशय्यते
वीक्षध्वे किमु साधुशब्दघटनापृच्छाविलक्षा वियत् ।
सूत्राणां विविधप्रयोगसजुषामन्वेषणे कः श्रमो
जागर्त्त्येष विशेषबोधकुशलो हैमप्रकाशो गुरुः ॥ ११ ॥
सन्तः प्रसीदन्तु सदोल्लसन्तो गुणान् परेषां कृतिनो विभाव्य ।
क्रीडाशिशोरित्यपि कौतुकान्मे प्रयत्नमेनं स्वदृशा पुनन्तु ॥ १२ ॥
चित्रं रागद्वेषौ दोषावुपकारिणाविह कृतौ मे ।
यदि मां सन्तो रागाद् द्वेषादपरे विलोकयिष्यन्ति ॥ १३ ॥
क्षुण्णं यदत्र लिखितं मया प्रमादादिचटुलचित्तेन ।
तच्छोधयन्तु सुधियो मया प्रणामाञ्जलिर्घटितः ॥ १४ ॥
श्रीविजयप्रभगणपतिपट्टाधिपविजयरत्नसूरीणाम् ।
निर्देशादिह हर्षाद्वर्षारात्रं स्थितवतो मे ॥ १५ ॥ ( संपूर्णः अयं भावनगरप्रतौ )
ऋषिवह्निजलधिशशिमितवर्षे रतलामपुरे रम्ये ।
ग्रन्थोऽयं सम्पूर्णो विजयदशम्यामिति श्रेयः ॥ १६ ॥ श्रीरस्तु । शिवमस्तु ।

---

१ शतत्रिकामि ( भांडारकर ) सवृत्तिकानि डभोई प्रतौ शुद्धं भाति । २ भवत्सामे क वाक्चातुरी उभोर भांडारकर ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# श्री हेमचन्द्राचार्यविरचित–हैमधातुपाठः ।

## अथ भ्वादयः परस्मैपदिनः

१ भू–सत्तायाम्
२ पां–पाने
३ घ्रां–गन्धोपादाने
४ ध्मां–शब्दाग्निसंयोगयोः
५ ष्ठां–गतिनिवृत्तौ
६ म्नां–अभ्यासे
७ दामू–दाने
८–९ जिं–ज्रिं–अभिभवे
१० क्षिं–क्षये
११–१५ इं दुं द्रुं श्रुं स्रुं–गतौ
१६ ध्रुं–स्थैर्ये च
१७ सुं–प्रसवैश्वर्ययोः
१८ स्मृं–चिन्तायाम्
१९–२० गृं घृं–सेचने
२१ औस्वृ–शब्दोपतापयोः
२२ ह्वृं–वरणे
२३–२४ ध्वृ ह्वृं–कौटिल्ये
२५ सृं–गतौ
२६ ऋं–प्रापणे च
२७ तॄ–प्लवनतरणयोः
२८ ट्धें–पाने
२९ दैव्–शोधने
३० ध्यैं–चिन्तायाम्
३१ ग्लैं–हर्षक्षये
३२ म्लैं–गात्रविनामे
३३ द्यैं–न्यङ्करणे
३४ द्रैं–स्वाप्ने
३५ ध्रैं–तृप्तौ
३६–३८ कैं गैं रैं–शब्दे
३९–४० ष्ट्यैं स्त्यैं सङ्घाते च
४१ खैं–खदने
४२–४४ क्षैं जैं सैं–क्षये
४५–४६ खैं श्रैं–पाके
४७–४८ पैं ओवैं–शोषणे
४९ ष्टैं–वेष्टने
५० फक्क–नीचैर्गतौ
५१ तक–हसने
५२ तकु–कृच्छ्रजीवने

५३ शुक–गतौ
५४ बुक्क–भाषणे
५५–५९ उखृ राखृ लाखृ द्राखृ ध्राखृ–शोषणालमर्थयोः
६०–६१ शाखृ श्लाखृ–व्याप्तौ
६२ कक्ख–हसने
६३–९० उख नख णख वख मख रख लख मखु रखु लखु रिखु इख इखु ईखु वल्ग रगु लगु तगु श्रगु श्लगु अगु वगु मगु स्वगु इगु उगु रिगु लिगु–गतौ
९१ लगु–कम्पने च
९२–९४ युगु जुगु वुगु–वर्जने
९५ गग्घ–हसने
९६ दघु–पालने
९७ शिघु–आघ्राणे
९८ लघु–शोषणे
९९ शुच–शोके
१०० कुच–शब्दे तारे
१०१ कुञ्च–गतौ
१०२ कुञ्च च–कौटिल्याल्पीभावयोः
१०३ लुञ्च–अपनयने
१०४ अर्च–पूजायाम्
१०५ अञ्चू–गतौ च
१०६–११६ वञ्चू चञ्चू तञ्चू त्वञ्चू मञ्चू मुञ्चू म्रुञ्चू म्रुचू म्लुचू ग्लुञ्चू षस्च–गतौ
११७–११८ ग्रुचू ग्लुचू–स्तेये
११९ म्लेच्छ–अव्यक्तायां वाचि
१२०–१२१ लछ लाच्छु–लक्षणे
१२२ वाञ्छु–इच्छायाम्
१२३ आञ्छु–आयामे
१२४ ह्रीछ–लज्जायाम्
१२५ हुर्छा–कौटिल्ये
१२६ मुर्छा–मोहसमुच्छ्राययोः
१२७–१२८ स्फुर्छा स्मुर्छा–विस्मृतौ

१२९ युछ–प्रमादे
१३०–१३८ धृज धृजु ध्वज ध्वजु ध्रज ध्रजु वज व्रज षस्ज–गतौ
१३९ अज–क्षेपणे च
१४०–१४१ कुजू खुजू–स्तेये
१४२–१४३ अर्ज सर्ज–अर्जने
१४४ कर्ज–व्यथने
१४५ खर्ज–मार्जने च
१४६ खज–मन्थे
१४७ खजु–गतिवैकल्ये
१४८ एजृ–कम्पने
१४९ ट्वोस्फूर्जा–वज्रनिर्घोषे
१५०–१५३ क्षीज–कूज गुजु–अव्यक्ते शब्दे
१५४–१५६ लज लजु तर्ज–भर्त्सने
१५७–१५८ लाज लाजु–भर्जने च
१५९–१६० जज जजु–युद्धे
१६१ तुज–हिंसायाम्
१६२ तुजु–बलने च
१६३–१७० गर्ज गजु गृज गृजु मुज मुजु मृज मृजु मज–शब्दे
१७१ गज–मर्दने च
१७२ त्यजं–हानौ
१७३ षञ्जं–सङ्गे
१७४ कटे–वर्षावरणयोः
१७५ शट–रुजाविशरणगत्यवशातनेषु
१७६ वट–वेष्टने
१७७–१७८ किट खिट–उत्त्रासे
१७९–१८० शिट षिट–अनादरे
१८१–१८२ जट झट–सङ्घाते
१८३ पिट–शब्दे च
१८४ भट–भृतौ
१८५ तट–उच्छ्राये
१८६ खट–काङ्क्षे
१८७ णट–नृत्तौ
१८८ हट–दीप्तौ
१८९ षट–अवयवे



Jain Education International For Personal & Private Use Only www.jainelibrary.org

१९० लुट–विलोठने
१९१ चिट–प्रैष्ये
१९२ विट–शब्दे
१९३ हेट–विबाधायाम्
१९४–२०० अट पट इट किट–कट कट्ट कटै–गतौ
२०१ कुट्ट–वैकल्ये
२०२ मुट–प्रमर्दने
२०३–२०४ चुट्ट चुड्ड–अल्पीभावे
२०५ वट्ट–विभाजने
२०६–२०७ रुट्ट लुट्ट–स्तेये
२०८–२०९ स्फट स्फुट्ट–विसरणे
२१० लट–बाल्ये
२११–२१२ रट रठ च–परिभाषणे
२१३ पठ–व्यक्तायां वाचि
२१४ वठ–स्थौल्ये
२१५ मठ–मदनिवासयोश्च
२१६ कठ–कृच्छ्रजीवने
२१७ हठ–बलात्कारे
२१८–२२० उठ रुठ लुठ–उपघाते
२२१ पिठ–हिंसासंक्लेशयोः
२२२ शठ–कैतवे च
२२३ शुठ–गतिप्रतिघाते
२२४–२२५ कुठु लुठु–आलस्ये च
२२६ शुठु–शोषणे
२२७–२२८ अठ रुठु–गतौ
२२९ पुड्ड–प्रमर्दने
२३० मुड्ड–खण्डने च
२३१ मड्ड–भूषायाम्
२३२ गड्ड–वदनैकदेशे
२३३ शौडृ–गर्वे
२३४ यौडृ–सम्बन्धे
२३५–२३९ मेडृ म्रेडृ म्लेडृ लोडृ लौडृ–उन्मादे
२४०–२४२ रोडृ रौडृ तौडृ–अनादरे
२४३ क्रीडृ–विहारे
२४४–२४६ तुडृ तूडृ तोडृ–तोडने
२४७–२५० हुडृ हूडृ हूडृ हौडृ–गतौ
२५१ खोडृ–प्रतीघाते
२५२ विड–आक्रोशे
२५३ अड–उद्यमे
२५४ लड–विलासे
२५५ कड्ड–मदे
२५६ कड्ड–कार्कश्ये
२५७ अड्ड–अभियोगे
२५८ चुड्ड–हावकरणे
२५९–२७२ अण रण वण भ्रण बण भण भ्रण मण धण ध्वण ध्रण कण क्वण चण–शब्दे
२७३ ओणृ–अपनयने
२७४ शोणृ–वर्णगत्योः
२७५–२७६ श्रोणृ श्लोणृ–संघाते
२७७ पैणृ–गतिप्रेरणश्लेषणेषु
२७८ चितै–संज्ञाने
२७९ अत–सातत्यगमने
२८० च्युतृ–आसेचने
२८१–२८३ चुतृ श्चुतृ श्च्युतृ–क्षरणे
२८४ जुतृ–भासने
२८५ अतु–बन्धने
२८६ कित–निवासे
२८७ ऋत–घृणागतिस्पर्धेषु
२८८–२९३ कुथु पुथु लुथु मथु मन्थ मान्थ–हिंसासंक्लेशयोः
२९४ खाद–भक्षणे
२९५ खद–स्थैर्ये
२९६ खद–हिंसायां च
२९७ गद–व्यक्तायां वाचि
२९८ रद–विलेखने
२९९–३०० णद–ञिक्ष्विदा–अव्यक्ते शब्दे
३०१ अर्द–गतियाचनयोः
३०२–३०४ नर्द णर्द गर्द–शब्दे
३०५ तर्द–हिंसायाम्
३०६ कर्द–कुत्सिते शब्दे
३०७ खर्द–दशने
३०८ अदु–बन्धने
३०९ इदु–परमैश्वर्ये
३१० विदु–अवयवे
३११ णिदु–कुत्सायाम्
३१२ टुनदु–समृद्धौ
३१३ चदु–दीप्त्याह्लादयोः
३१४ त्रदु–चेष्टायाम्
३१५–३१७ कदु क्रदु क्लदु–रोदनाह्वानयोः
३१८ क्लिदु–परिदेवने
३१९ स्कन्दृं–गतिशोषणयोः
३२० षिधू–गत्याम्
३२१ षिधौ–शास्त्रमाङ्गल्ययोः
३२२ शुन्ध–शुद्धौ
३२३–३२८ स्तन धन ध्वन चन स्वन वन–शब्दे
३२९–३३० वन षन–भक्तौ
३३१ कनै–दीप्तिकान्तिगतिषु
३३२ गुपौ–रक्षणे
३३३–३३४ तपं धूप–सन्तापे
३३५–३३७ रप लप जल्प–व्यक्ते वचने
३३८ जप–मानसे च
३३९ चप–सान्त्वने
३४० षप–समवाये
३४१ सृप्लृं–गतौ
३४२ चुप–मन्दायाम्
३४३–३५० तुप तुम्प त्रुप त्रुम्प तुफ तुम्फ त्रुफ त्रुम्फ–हिंसायाम्
३५१–३६७ पर्फ रफ रफु अर्ब कर्ब खर्ब गर्ब चर्ब तर्ब नर्ब पर्ब बर्ब शर्ब षर्ब सर्ब रिबु रबु–गतौ
३६८ कुबु–आच्छादने
३६९–३७० लुबु तुबु–अर्दने
३७१ चुबु–वक्त्रसंयोगे
३७२–३७६ षृभू षृम्भू सिभू षिम्भू भर्भ–हिंसायाम्
३७७ शुम्भ–भाषणे च
३७८–३७९ यभं जभ–मैथुने
३८०–३८४ चमू छमू जमू झमू जिमू–अदने
३८५ क्रमू–पादविक्षेपे
३८६ यमूं–उपरमे
३८७ स्यमू–शब्दे
३८८ णमं–प्रह्वत्वे
३८९–३९० षम ष्टम–वैक्लव्ये
३९१ अम–शब्दभक्तयोः
३९२–३९६ अम द्रम हम्म मीमृ गम्लृं–गतौ
३९७–३९८ हय हर्य–क्लान्तौ च
३९९ मव्य–बन्धने
४००–४०२ सूर्क्ष्य ईर्क्ष्य ईर्ष्य–ईर्ष्यार्थाः
४०३–४०४ शुच्यै चुच्यै–अभिषवे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

४०५ त्सर–छद्मगतौ
४०६ क्मर–हूर्छने
४०७–४०९ अभ्र बभ्र मभ्र–गतौ
४१० चर–भक्षणे च
४११ धोरृ–गतिचातुर्ये
४१२ खोरृ–प्रतीघाते
४१३–४१४ दल त्रिफला–विशरणे
४१५–४१८ मील श्मील स्मील क्ष्मील–निमेषणे
४१९ पील–प्रतिष्टम्भे
४२० णील–वर्णे
४२१ शील–समाधौ
४२२ कील–बन्धे
४२३ कूल–आवरणे
४२४ शूल–रुजायाम्
४२५ तूल–निष्कर्षे
४२६ पूल–संघाते
४२७ मूल–प्रतिष्ठायाम्
४२८ फल निष्पत्तौ
४२९ फुल्ल–विकसने
४३० चुल्ल–हावकरणे
४३१ चिल्ल–शैथिल्ये च
४३२–४४२ पेलृ फेलृ शेलृ षेलृ सेलृ चेहूलृ सल तिल तिल्ल पल्ल वेल्ल–गतौ
४४३–४४८ वेलृ चेलृ केलृ क्केलृखेलृ स्खल–चलने
४४९ खल–सञ्चये च
४५०–४५१ श्वल श्वल्ल–आशुगतौ
४५२–४५३ गल चर्व–अदने
४५४–४५६ पूर्व पर्व मर्व–पूरणे
४५७–४५९ मर्व भवु–शव–गतौ
४६०–४६२ कर्व खर्व गर्व–दर्पे
४६३–४६४ ष्ठिवू क्षिवू–निरसने
४६५ जीव–प्राणधारणे
४६६–४६९ पीव मीव तीव नीव–स्थौल्ये
४७०–४७८ उर्वै तुर्वै थुर्वै दुर्वै धुर्वै जुर्वै अर्व भर्वै शर्वै–हिंसायाम्
४७९–४८० मुर्वै मव–बन्धने
४८१ गुर्वै–उद्यमे
४८२–४८४ पिवु मिवु निवु–सेचने

४८५–४८७ हिवु दिवु जिवु–प्रीणने
४८८ इवु–व्याप्तौ च
४८९ अव–रक्षणगतिकान्तिप्रीतितृप्त्यवगमनप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादहनभाववृद्धिषु
४९० कश–शब्दे
४९१–४९२ मिश मश–रोषे च
४९३ शश–प्लुतिगतौ
४९४ णिश–समाधौ
४९५ दृशं–प्रेक्षणे
४९६ दंशं–दशने
४९७ घुषृ–शब्दे
४९८ चूष–पाने
४९९ तूष–तुष्टौ
५०० पूष–वृद्धौ
५०१–५०२ लूष मूष–स्तेये
५०३ षूष–प्रसवे
५०४ ऊष–रुजायाम्
५०५ ईष–उञ्छे
५०६ कृषं–विलेखने
५०७–५१९ कष शिष जष झष वष मष मुष रुष रिष यूष जुष शष चष–हिंसायाम्
५२० यूषू–संघाते च
५२१ भष–भर्त्सने
५२२–५२७ जिषू विषू मिषू निषू पृषू वृषू–सेचने
५२८ मृषू–सहने च
५२९–५३३ उषू श्रिषू श्लिषू प्रुषू प्लुषू–दाहे
५३४ घृषू–संहर्षे
५३५ हृषू–अलीके
५३६ पुष–पुष्टौ
५३७–५३८ भूष तसु–अलंकारे
५३९–५४२ तुस ह्रस ह्लस रस–शब्दे
५४३ लस–श्लेषणक्रीडनयोः
५४४ घस्लृं–अदने
५४५ हसे–हसने
५४६–५४८ पिसृ पेसृ वेसृ–गतौ
५४९ शसू–हिंसायाम्
५५० शंसू–स्तुतौ च

५५१ मिहं–सेचने
५५२ दहं–भस्मीकरणे
५५३ चह–कल्कने
५५४ रह–त्यागे
५५५ रहु–गतौ
५५६–५५८ दृह दृहु बृह–वृद्धौ
५५९–५६० बृहू बृहु–शब्दे च
५६१–५६३ उहृ तुहृ दुहृ–अर्दने
५६४–५६५ अर्ह मह–पूजायाम्
५६६ उक्ष–सेचने
५६७ रक्ष–पालने
५६८–५६९ मक्ष मुक्ष–संघाते
५७० अक्षौ–व्याप्तौ च
५७१–५७२ तक्षौ त्वक्षौ–तनूकरणे
५७३ णिक्ष–चुम्बने
५७४–५७६ तृक्ष स्तृक्ष णक्ष–गतौ
५७७ वक्ष–रोषे
५७८ त्वक्ष–त्वचने
५७९ सूर्क्ष–अनादरे
५८०–५८२ काक्षु वाक्षु माक्षु–काङ्क्षायाम्
५८३–५८५ द्राक्षु ध्राक्षु ध्वाक्षु–घोरवासिते च

## इति परस्मैभाषाः

५८६ गाङ्–गतौ
५८७ ष्मिङ्–ईषद्धसने
५८८ डीङ्–विहायसा गतौ
५८९–५९३ उंङ् कुंङ् गुंङ् घुंङ् ङुङ्–शब्दे
५९४–५९८ च्युङ् ज्युंङ् जुंङ् प्रुङ् प्लुङ् गतौ
५९९ रुंङ्–रेषणे च
६०० पूङ्–पवने
६०१ मूङ्–बन्धने
६०२ धृंङ्–अवध्वंसने
६०३ मेंङ्–प्रतिदाने
६०४–६०५ देंङ् त्रैंङ्–पालने
६०६ श्यैंङ्–गतौ
६०७ प्यैङ्–वृद्धौ
६०८ वकुङ्–कौटिल्ये
६०९ मकुङ्–मण्डने
६१० अकुङ्–लक्षणे
६११ शीकृङ्–सेचने
६१२ लोकृङ्–दर्शने

Jain Education International For Personal & Private Use Only www.jainelibrary.org

६१३ श्लोकृङ्–संघाते
६१४–६१५ द्रेकृङ् ध्रेकृङ्–शब्दोत्साहे
६१६–६१७ रेकृङ् शकुङ्–शङ्कायाम्
६१८ ककि–लौल्ये
६१९–६२० कुकि वृकि–आदाने
६२१ चकि–तृप्तिप्रतीघातयोः
६२२–६३८ ककुङ् श्वकुङ् त्रकुङ् श्रकुङ् श्लकुङ् ढौकृङ् त्रौकृङ् ष्वष्कि वस्कि मस्कि तिकि टिकि टीकृङ् सेकृङ् स्रेकृङ् रघुङ् लघुङ्–गतौ
६३९–६४० अघुङ् वघुङ्–गत्याक्षेपे
६४१ मघुङ्–कैतवे च
६४२–६४३ राघृङ् लाघृङ्–सामर्थ्ये
६४४ द्राघृङ्–आयासे च
६४५ श्लाघृङ्–कत्थने
६४६ लोचृङ्–दर्शने
६४७ षचि–सेचने
६४८ शचि–व्यक्तायां वाचि
६४९ कचि–बन्धने
६५० कचुङ्–दीप्तौ च
६५१–६५२ श्वचि श्वचुङ्–गतौ
६५३ वर्चि–दीप्तौ
६५४–६५५ मचि मुचुङ्–कल्कने
६५६ मचुङ्–धारणोच्छ्रायपूजनेषु च
६५७ पचुङ्–व्यक्तीकरणे
६५८ ष्टुचि–प्रसादे
६५९–६६१ एजृङ् भ्रेजृङ् भ्राजि–दीप्तौ
६६२ इजुङ्–गतौ
६६३ ईजि–कुत्सने च
६६४ ऋजि–गतिस्थानार्जनोर्जनेषु
६६५–६६६ ऋजुङ्भृजैङ्–भर्जने
६६७ तिजि–क्षमानिशानयोः
६६८ घट्टि–चलने
६६९ स्फुटि–विकसने
६७० चेष्टि–चेष्टायाम्
६७१–६७२ गोष्टि लोष्टि–संघाते
६७३ वेष्टि–वेष्टने
६७४ अट्टि–हिंसातिक्रमयोः
६७५–६७६ एठि हेठि–विबाधायाम्
६७७–६७८ मठुङ् कठुङ्–शोके
६७९ मुठुङ्–पलायने
६८० वठुङ्–एकचर्यायाम्
६८१–६८२ अठुङ् पठुङ्–गतौ
६८३–६८४ हुडुङ् पिडुङ्–संघाते
६८५ शडुङ्–रुजायां च
६८६ तडुङ्–ताडने
६८७ कडुङ्–मदे
६८८ खडुङ्–मन्थे
६८९ खुडुङ्–गतिवैकल्ये
६९० कुडुङ्–दाहे
६९१–६९२ वडुङ् मडुङ्–वेष्टने
६९३ भडुङ्–परिभाषणे
६९४ मुडुङ्–मज्जने
६९५ तुडुङ्–तोडने
६९६ भुडुङ्–वरणे
६९७ चडुङ्–कोपे
६९८–६९९ द्राडृङ् ध्राडृङ्–विशरणे
७०० शाडृङ्–श्लाघायाम्
७०१ वाडृङ्–आप्लाव्ये
७०२–७०३ हेडृङ् होडृङ्–अनादरे
७०४ हिडुङ्–गतौ च
७०५–७०७ घिणुङ् घुणुङ् घृणुङ्–ग्रहणे
७०८–७०९ घुणि घूर्णि–भ्रमणे
७१० पणि–व्यवहारस्तुत्योः
७११ यतैङ्–प्रयत्ने
७१२–७१३ युतृङ् जुतृङ्–भासने
७१४–७१५ विथृङ् वेथृङ्–याचने
७१६ नाथृङ्–उपतापैश्वर्याशीःषु च
७१७ श्रथुङ्–शैथिल्ये
७१८ प्रथुङ्–कौटिल्ये
७१९ कत्थि–श्लाघायाम्
७२० श्विदुङ्–श्वैत्ये
७२१ वदुङ्–स्तुत्यभिवादनयोः
७२२ भदुङ्–सुखकल्याणयोः
७२३ मदुङ्–स्तुतिमोदमदस्वप्नगतिषु
७२४ स्पदुङ्–किञ्चिच्चलने
७२५ क्लिदुङ्–परिदेवने
७२६ मुदि–हर्षे
७२७ ददि–दाने
७२८ हदिं–पुरीषोत्सर्गे
७२९–७३१ ष्वदि स्वर्दि स्वादि–आस्वादने
७३२ उर्दि–मानक्रीडयोश्च
७३३–७३५ कुर्दि गुर्दि गुदि–क्रीडायाम्
७३६ षूदि–क्षरणे
७३७ ह्रादि–शब्दे
७३८ ह्लादैङ्–सुखे च
७३९ पर्दि–कुत्सिते शब्दे
७४० स्कुदुङ्–आप्रवणे
७४१ एधि–वृद्धौ
७४२ स्पर्धि–संघर्षे
७४३ गाधृङ्–प्रतिष्ठालिप्साग्रन्थेषु
७४४ बाधृङ्–रोटने
७४५ दधि–धारणे
७४६ बधि–बन्धने
७४७ नाधृङ्–नाधृङ्वत्
७४८ पनि–स्तुतौ
७४९ मानि–पूजायाम्
७५०–७५२ तिपृङ् ष्टिपृङ् ष्टेपृङ्–क्षरणे
७५३ तेपृङ्–कम्पने च
७५४–७५७ ग्लेपृङ् केपृङ् गेपृङ् कपुङ्–चलने
७५८ ग्लेपृङ्–दैन्ये च
७५९–७६१ मेपृङ् रेपृङ् लेपृङ्–गतौ
७६२ त्रपौषि–लज्जायाम्
७६३ गुपि–गोपनकुत्सनयोः
७६४–७६५ अबुङ् रबुङ्–शब्दे
७६६ लबुङ्–अवस्रंसने
७६७ कबृङ्–वर्णे
७६८ क्लीबृङ्–आधार्ष्ट्ये
७६९ क्षीबृङ्–मदे
७७०–७७२ शीभृङ् वीभृङ् शल्भि–कत्थने
७७३ वल्भि–भोजने
७७४ गल्भि–धार्ष्ट्ये
७७५–७७८ रेभृङ् अभुङ् रभुङ् लभुङ्–शब्दे
७७९–७८१ ष्टभुङ् स्कभुङ् ष्टुभुङ्–स्तम्भे
७८२–७८४ जभुङ् जभैङ् जभुङ्–गात्रविनामे
७८५ रभि–राभस्ये
७८६ डुलभिष्–प्राप्तौ
७८७ भामि–क्रोधे
७८८ क्षमौषि–सहने
७८९ कमूङ्–कान्तौ
७९०–७९६ अयि वयि पयि मयि नयि चयि रयि–गतौ

Jain Education International For Personal & Private Use Only www.jainelibrary.org

७९७–७९८ तयि णयि–रक्षणे च
७९९ दयि–दानगतिहिंसादहनेषु च
८०० ऊयैङ्–तन्तुसन्ताने
८०१ पूयैङ्–दुर्गन्धविशरणयोः
८०२ क्नूयैङ्–शब्दोन्दनयोः
८०३ क्ष्मायैङ्–विधूनने
८०४–८०५ स्फायैङ् ओप्यायैङ्–वृद्धौ
८०६ तायृङ्–सन्तानपालनयोः
८०७–८०८ वलि वल्लि–संवरणे
८०९ शलि–चलने च
८१०–८११ मलि मल्लि–धारणे
८१२–८१३ भलि भल्लि–परिभाषण-हिंसादानेषु
८१४ कलि–शब्दसंख्यानयोः
८१५ कल्लि–अशब्दे
८१६–८१७ तेवृङ् देवृङ्–देवने
८१८–८२७ षेवृङ् सेवृङ् केवृङ् खेवृङ् गेवृङ् ग्लेवृङ् पेवृङ् प्लेवृङ् मेवृङ् म्लेवृङ्–सेवने
८२८–८२९ रेवृङ् पवि–गतौ
८३० काशृङ्–दीप्तौ
८३१ क्लिशि–विबाधने
८३२ भाषि च–व्यक्तायां वाचि
८३३ ईषि–गतिहिंसादर्शनेषु
८३४ गेषृङ्–अन्विच्छायाम्
८३५ येषृङ्–प्रयत्ने
८३६–८३९ जेषृङ् णेषृङ् एषृङ्–हेषृङ्–गतौ
८४०–८४१ रेषृङ् हेषृङ्–अव्यक्ते शब्दे
८४२ पर्षि–स्नेहने
८४३ घुषुङ्–कान्तीकरणे
८४४ स्रंसूङ्–प्रमादे
८४५ कासृङ्–शब्दकुत्सायाम्
८४६–८४८ भासि टुभ्रासि टुभ्लासृङ्–दीप्तौ
८४९–८५० रासृङ् णासृङ्–शब्दे
८५१ णसि–कौटिल्ये
८५२ भ्यसि–भये
८५३ आङः शसुङ्–इच्छायाम्
८५४–८५५ ग्रसूङ् ग्लसूङ्–अदने
८५६ घसुङ्–करणे
८५७ ईहि–चेष्टायाम्

८५८–८५९ अहुङ् प्लिहि–गतौ
८६०–८६१ गर्हि गल्हि–कुत्सने
८६२–८६३ बर्हि बल्हि–परिभाषणहिं-साच्छादनेषु
८६६–८६८ वेहृङ् जेहृङ् बाहृङ्–प्रयत्ने
८६९ द्राहृङ्–निक्षेपे
८७० ऊहि–तर्के
८७१ गाहौङ्–विलोडने
८७२ ग्लहौङ्–ग्रहणे
८७३–८७४ बहुङ् महुङ्–वृद्धौ
८७५ दक्षि–शैघ्र्ये च
८७६–८७७ धुक्षि धिक्षि–संदीपन-क्लेशनजीवनेषु
८७८ वृक्षि–वरणे
८७९ शिक्षि–विद्योपादाने
८८० भिक्षि–याच्ञायाम्
८८१ दीक्षि–मौण्ड्येज्योपनयननियम-व्रतादेशेषु
८८२ ईक्षि–दर्शने

## इति आत्मनेभाषाः

८८३ श्रिग्–सेवायाम्
८८४ णींग्–प्रापणे
८८५ हृंग्–हरणे
८८६ भृग्–भरणे
८८७ धृंग्–धारणे
८८८ डुकृंग्–करणे
८८९ हिक्की–अव्यक्ते शब्दे
८९० अञ्चूग्–गतौ च
८९१ डुयाचृग्–याच्ञायाम्
८९२ डुपचींष्–पाके
८९३–८९४ राजृग् टुभ्राजि–दीप्तौ
८९५ भजीं–सेवायाम्
८९६ रञ्जीं–रागे
८९७ रेटृग्–परिभाषणयाचनयोः
८९८ वेणृग्–गतिज्ञानचिन्तानिशामन-वादित्रग्रहणेषु
८९९ चतेग्–याचने
९०० प्रोथृग्–पर्याप्तौ
९०१ मिथृग्–मेधाहिंसयोः
९०२ मेथृग्–संगमे च
९०३ चदेग्–याचने
९०४ ऊबुन्दृग्–निशामने

९०५–९०६ णिदृग्–णेदृग्–कुत्सासं-निकर्षयोः
९०७–९०८ मिदृग् मेदृग्–मेधाहिंसयोः
९०९ मेधृग्–संगमे च
९१०–९११ शृधूग् मृधूग्–उन्दे
९१२ बुधृग्–बोधने
९१३ खनूग्–अवदारणे
९१४ दानी–अवखण्डने
९१५ शानी–तेजने
९१६ शपीं–आक्रोशे
९१७ चायृग्–पूजानिशामनयोः
९१८ व्ययी–गतौ
९१९ अली–भूषणपर्याप्तिवारणेषु
९२० धावूग्–गतिशुद्ध्योः
९२१ चीवृग्–ग्रपीवत्
९२२ दाशृग्–दाने
९२३ ग्रपी–आदानसंवरणयोः
९२४ भेषृग्–भये
९२५ भ्रेषृग्–चलने च
९२६ पषी–बाधनस्पर्शनयोः
९२७ लषी–कान्तौ
९२८ चषी–भक्षणे
९२९ छषी–हिंसायाम्
९३० त्विषी–दीप्तौ
९३१–९३२ अषी असी–गत्यादानयोश्च
९३३ दासृग्–दाने
९३४ माहृग्–माने
९३५ गुहौग्–संवरणे
९३६ भ्लक्षी–भक्षणे

## इति उभयतोभाषाः

९३७ द्युति–दीप्तौ
९३८ रुचि–अभिप्रीत्यां च
९३९ घुटि–परिवर्तने
९४०–९४२ रुटि लुटि लुठि–प्रतिघाते
९४३ श्विताङ्–वर्णे
९४४ ञिमिदाङ्–स्नेहने
९४५–९४६ ञिष्विदाङ् ञिक्ष्विदाङ्–मोचने च
९४७ शुभि–दीप्तौ
९४८ क्षुभि–संचलने
९४९–९५० णभि तुभि–हिंसायाम्
९५१ स्रम्भूङ्–विश्वासे
९५२–९५३ भ्रंसूङ् ध्वंसूङ्–अवस्रंसने

Jain Education International For Personal & Private Use Only www.jainelibrary.org

९५४ ध्वंसूङ्–गतौ च
९५५ वृतूङ्–वर्तने
९५६ स्यन्दौङ्–स्रवणे
९५७ वृधूङ्–वृद्धौ
९५८ शृधूङ्–शब्दकुत्सायाम्
९५९ कृपौङ्–सामर्थ्ये

**वृत् द्युतादयः**

९६० ज्वल–दीप्तौ
९६१ कुच–संपर्चनकौटिल्यप्रतिष्टम्भ-विलेखनेषु
९६२–९६३ पत्लृ पथे–गतौ
९६४ क्वथे–निष्पाके
९६५ मथे–विलोडने
९६६ पद्लृं–विशरणगत्यवसादनेषु
९६७ शद्लृं–शातने
९६८ बुध–अवगमने
९६९ टुवमू–उद्गिरणे
९७० भ्रमू–चलने
९७१ क्षर–संचलने
९७२ चल–कम्पने
९७३ जल–घात्ये
९७४–९७५ टल ट्वल–वैक्लव्ये
९७६ ष्ठल–स्थाने
९७७ हल–विलेखने
९७८ णल–गन्धे
९७९ बल–प्राणनधान्यावरोधयोः
९८० पुल–महत्त्वे
९८१ कुल–बन्धुसंस्त्यानयोः
९८२–९८४ पल फल शल–गतौ
९८५ हुल–हिंसासंवरणयोश्च
९८६ कुशं–आह्वानरोदनयोः
९८७ कस–गतौ
९८८ रुहं–जन्मनि
९८९ रमिं–क्रीडायाम्
९९० षहिं–मर्षणे

**वृत् ज्वलादिः**

९९१ यजीं–देवपूजासंगतिकरणदानेषु
९९२ वेंग्–तन्तुसन्ताने
९९३ व्येंग्–संवरणे
९९४ ह्वेंग्–स्पर्धाशब्दयोः
९९५ डुवपीं–बीजसन्ताने
९९६ वहीं–प्रापणे
९९७ ट्वोश्वि–गतिवृद्ध्योः
९९८ वद–व्यक्तायां वाचि
९९९ वसं–निवासे

**वृत् यजादिः**

१००० घटिष्–चेष्टायाम्
१००१ क्षजुङ्–गतिदानयोः
१००२ व्यथिष्–भयचलनयोः
१००३ प्रथिष्–प्रख्याने
१००४ म्रदिष्–मर्दने
१००५ स्खदिष्–खदने
१००६–१००८ कदुङ् क्रदुङ् क्लदुङ्–वैक्लव्ये
१००९ क्रपि–कृपायाम्
१०१० ञित्वरिष्–संभ्रमे
१०११ प्रसिष्–विस्तारे
१०१२ दक्षि–हिंसागत्योः
१०१३ श्रां–पाके
१०१४ स्मृं–आध्याने
१०१५ दॄ–भये
१०१६ नॄ–नये
१०१७–१०१८ ष्टक स्तक–प्रतिघाते
१०१९ चक–तृप्तौ च
१०२० अक–कुटिलायां गतौ
१०२१ कखे–हसने
१०२२ अग–अकवत्
१०२३ रगे–शङ्कायाम्
१०२४ लगे सङ्गे
१०२५–१०३० ह्रग ह्लगे षगे सगे-ष्ठगे स्थगे–संवरणे
१०३१–१०३२ वट भट–परिभाषणे
१०३३ णट–नृत्तौ
१०३४ गड–सेचने
१०३५ हेड–वेष्टने
१०३६ लड–जिह्वोन्मन्थने
१०३७–१०३९ फण कण रण–गतौ
१०४० चण–हिंसादानयोश्च
१०४१–१०४२ शण श्रण–दाने
१०४३–१०४६ स्नथ क्नथ क्रथ क्लथ–हिंसार्थाः
१०४७ छद–ऊर्जने
१०४८ मदै–हर्षग्लपनयोः
१०४९–१०५१ ष्टन स्तन ध्वन–शब्दे
१०५२ स्वन–अवतंसने
१०५३ चन–हिंसायाम्
१०५४ ज्वर–रोगे
१०५५ चल–कम्पने
१०५६–१०५७ ह्वल ह्मल–चलने
१०५८ ज्वल–दीप्तौ च

**वृत् घटादिः**

**इति भ्वादयो निरनुबन्धा-धातवः समाप्ताः**

१–२ अदं प्सांक्–भक्षणे
३ भांक्–दीप्तौ
४ यांक्–प्रापणे
५ वांक्–गतिगन्धनयोः
६ ष्णांक्–शौचे
७ श्रांक्–पाके
८ द्रांक्–कुत्सितगतौ
९ पांक्–रक्षणे
१० लांक्–आदाने
११ रांक्–दाने
१२ दांवक्–लवने
१३ ख्यांक्–प्रथने
१४ प्रांक्–पूरणे
१५ मांक्–माने
१६ इंक्–स्मरणे
१७ इंण्क्–गतौ
१८ वींक्–प्रजनकान्त्यसनखादने च
१९ द्युंक्–अभिगमे
२० षुंक्–प्रसवैश्वर्ययोः
२१ तुंक्–वृत्तिहिंसापूरणेषु
२२ युक्–मिश्रणे
२३ णुक्–स्तुतौ
२४ क्ष्णुक्–तेजने
२५ स्नुक्–प्रस्रवणे
२६–२८ टुक्षु रु कुंक्–शब्दे
२९ रुदृक्–अश्रुविमोचने
३० ञिष्वपंक्–शये
३१–३२ अन श्वसक्–प्राणने
३३ जक्षक्–भक्षणहसनयोः
३४ दरिद्राक्–दुर्गतौ
३५ जागृक्–निद्राक्षये
३६ चकासृक्–दीप्तौ
३७ शासूक्–अनुशिष्टौ
३८ वचंक्–भाषणे
३९ मृजौक्–शुद्धौ
४० षस्तुक्–स्वप्ने
४१ विदक्–ज्ञाने

Jain Education International For Personal & Private Use Only www.jainelibrary.org

४२ हनंक्–हिंसागत्योः
४३ वशक्–कान्तौ
४४ असक्–भुवि
४५ षसक्–स्वप्ने

**इति परस्मैभाषाः**

४६ इंङ्क्–अध्ययने
४७ शीङ्क्–स्वप्ने
४८ ह्नुङ्क्–अपनयने
४९ षूङौक्–प्राणिगर्भविमोचने
५०-५२ पृचैङ्–पृजुङ् पिजुकि–संपर्चने
५३ वृजैकि–वर्जने
५४ णिजुकि–शुद्धौ
५५ शिजुकि–अव्यक्ते शब्दे
५६ ईडिक्–स्तुतौ
५७ ईरिक्–गतिकम्पनयोः
५८ ईशिक्–ऐश्वर्ये
५९ वसिक्–आच्छादने
६० आङः शासूकि–इच्छायाम्
६१ आसिक्–उपवेशने
६२ कसुकि–गतिशातनयोः
६३ णिसुकि–चुम्बने
६४ चक्षिक्–व्यक्तायां वाचि

**इति आत्मनेभाषाः**

६५ ऊर्णुंग्क्–आच्छादने
६६ ष्टुंग्क्–स्तुतौ
६७ ब्रूंग्क्–व्यक्तायां वाचि
६८ द्विषींक्–अप्रीतौ
६९ दुहींक्–क्षरणे
७० दिहींक्–लेपे
७१ लिहींक्–आस्वादने

**इति उभयतोभाषाः**

**अथादाद्यन्तर्गणो ह्वादिः**

१ हुंक्–दानादनयोः
२ ओहांक्–त्यागे
३ ञिभीक्–भये
४ ह्रींक्–लज्जायाम्
५ पृंक्–पालनपूरणयोः
६ ऋंक्–गतौ

**इति परस्मैभाषाः**

७ ओहांङ्क्–गतौ
८ मांङ्क्–मानशब्दयोः

**इति आत्मनेभाषाः**

९ डुदांग्क्–दाने
१० डुधांग्क् धारणे च
११ डुभृंग्क् पोषणे च
१२ णिजृंकी शौचे च
१३ विजृंकी पृथग्भावे
१४ विष्लृंकी व्याप्तौ

**इति उभयतोभाषाः**

**कित् ह्वादयः**

**इति अदादयः कितो धातवः**

**: अथ दिवादयः–**

**परस्मैपदिनः**

१ दिवूच्–क्रीडाजयेच्छापणिद्युति-
स्तुतिगतिषु
२-३ जृष् झृष् च–जरसि
४ शोंच्–तक्षणे
५-६ दों छोंच्–छेदने
७ षोंच्–अन्तकर्मणि
८ व्रीडच्–लज्जायाम्
९ नृतैच्–नर्तने
१० कुथच्–पूतिभावे
११ पुथच्–हिंसायाम्
१२ गुधच्–परिवेष्टने
१३ राधंच्–वृद्धौ
१४ व्यधंच्–ताडने
१५ क्षिपंच्–प्रेरणे
१६ पुष्पच्–विकसने
१७-२० तिम तीम ष्टिम-
ष्टीमच्–आर्द्रभावे
२१ षिवूच्–उतौ
२२ श्रिवूच्–गतिशोषणयोः
२३-२४ ष्ठिवू क्षिवूच्–निरसने
२५ इषच्–गतौ
२६ ष्णसूच्–निरसने
२७ क्नसूच्–ह्रुतिदीप्त्योः
२८ त्रसैच्–भये
२९ प्युसच्–दाहे
३०-३१ षह षुहच्–शक्तौ

**अथ दिवाद्यन्तर्गणः पुषादिः**

३२ पुषंच्–पुष्टौ
३३ उचच्–समवाये
३४ लुटच्–विलोठने
३५ ञिष्विदांच्–गात्रप्रक्षरणे
३६ क्लिदौच्–आर्द्रभावे
३७ ञिमिदाच्–स्नेहने
३८ ञिक्ष्विदाच्–मोचने च
३९ क्षुधंच्–बुभुक्षायाम्
४० शुधंच्–शौचे
४१ क्रुधंच्–कोपे
४२ षिधूच्–संराद्धौ
४३ ऋधूच्–वृद्धौ
४४ गृधूच्–अभिकाङ्क्षायाम्
४५ रधौच्–हिंसासंराद्ध्योः
४६ तृपौच्–प्रीतौ
४७ दृपौच्–हर्षमोहनयोः
४८ कुपच्–कोपे
४९ गुपच्–व्याकुलत्वे
५०-५२ युप रुप लुपच्–विमोहने
५३ डिपच्–क्षेपे
५४ ष्टूपच्–समुच्छ्राये
५५ लुभच्–गार्ध्ये
५६ क्षुभच्–संचलने
५७-५८ णभ तुभच्–हिंसायाम्
५९ नशौच्–अदर्शने
६० कुशच्–श्लेषणे
६१–६२ भृशू भ्रंशूच्–अधःपतने
६३ वृशच्–वरणे
६४ कृशच्–तनुत्वे
६५ शुषंच्–शोषणे
६६ दुषंच्–वैकृत्ये
६७ श्लिषंच्–आलिङ्गने
६८ प्लुषूच्–दाहे
६९ ञितृषच्–पिपासायाम्
७०-७१ तुष हृषच्–तुष्टौ
७२ रुषच्–रोषे
७३-७५ प्युष प्युस पुसच्–विभागे
७६ बिसच्–प्रेरणे
७७ कुसच्–श्लेषे
७८ असूच्–क्षेपणे
७९ यसूच्–प्रयत्ने
८० जसूच्–मोक्षणे
८१-८२ तसू दसूच्–उपक्षये
८३ वसूच्–स्तम्भे
८४ वुसच्–उत्सर्गे
८५ मुसच्–खण्डने
८६ मसैच्–परिणामे
८७-८८ शमू दमूच्–उपशमे
८९ तमूच्–काङ्क्षायाम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

९० श्रमूच्-खेदतपसोः
९१ भ्रमूच्-अनवस्थाने
९२ क्षमौच्-सहने
९३ मदैच्-हर्षे
९४ क्लमूच-ग्लानौ
९५ मुहौच्-वैचित्ये
९६ द्रुहौच-जिघांसायाम्
९७ ष्णुहौच्-उद्गिरणे
९८ ष्णिहौच्-प्रीतौ

**वृत् पुषादिः**

**इति परस्मैभाषाः**

९९ षूङौच्-प्राणिप्रसवे
१०० दूङ्च्-परितापे
१०१ दीङ्च्-क्षये
१०२ धीङ्च्-अनादरे
१०३ मीङ्च्-हिंसायाम्
१०४ रीङ्च्-स्रवणे
१०५ लीङ्च्-श्लेषणे
१०६ डीङ्च्-गतौ
१०७ व्रीङ्च्-वरणे

**वृत् स्वादिः**

१०८ पीङ्च्-पाने
१०९ ईङ्च्-गतौ
११० प्रीङ्च्-प्रीतौ
१११ युजिंच्-समाधौ
११२ सृजिंच्-विसर्गे
११३ वृतूचि-वरणे
११४ पदिंच्-गतौ
११५ विदिंच्-सत्तायाम्
११६ खिदिंच्-दैन्ये
११७ युधिंच्-संप्रहारे
११८ अनोरुधिंच्-कामे
११९-१२० बुधिं मनिंच्-ज्ञाने
१२१ अनिच्-प्राणने
१२२ जनैचि-प्रादुर्भावे
१२३ दीपैचि-दीप्तौ
१२४ तपिंच्-ऐश्वर्ये वा
१२५ पूरैचि-आप्यायने
१२६-१२७ घुरैङ् ज्वरैचि-जरायाम्
१२८-१२९ धूरैङ् गूरैचि-गतौ
१३० शूरैचि-स्तम्भे
१३१ तूरैचि-त्वरायाम्
१३२ चूरैचि-दाहे
१३३ क्लिशिच्-उपतापे
१३४ लिशिच्-अल्पत्वे
१३५ काशिच्-दीप्तौ
१३६ वाशिच्-शब्दे

**इति आत्मनेभाषाः**

१३७ शकींच्-मर्षणे
१३८ शुचृगैच्-पूतिभावे
१३९ रञ्जींच्-रागे
१४० शपींच्-आक्रोशे
१४१ मृषींच्-तितिक्षायाम्
१४२ णहींच्-बन्धने

**इति उभयतोभाषाः**

**इति दिवादयश्चितो धातवः**

१ षुंगट्-अभिषवे
२ षिंगट्-बन्धने
३ शिंगट्-निशाने
४ डुमिंगट्-प्रक्षेपणे
५ चिंगट्-चयने
६ धूगट्-कम्पने
७ स्तृंगट्-आच्छादने
८ कृंगट्-हिंसायाम्
९ वृगट्-वरणे

**इति उभयतोभाषाः**

१० हिंट्-गतिवृद्ध्योः
११ श्रुंट्-श्रवणे
१२ टुदुंट्-उपतापे
१३ पृंट्-प्रीतौ
१४ स्मृंट्-पालने च
१५ शक्लृंट्-शक्तौ
१६-१८ तिक तिग षघट्-हिंसायाम्
१९-२० राधं साधंट्-संसिद्धौ
२१ ऋधूट्-वृद्धौ
२२ आप्लृंट्-व्याप्तौ
२३ तृपट्-प्रीणने
२४ दम्भुट्-दम्भे
२५ कृवुट्-हिंसाकरणयोः
२६ धिवुट्-व्याप्तौ
२७ ञिधृषाट्-प्रागल्भ्ये

**इति परस्मै भाषाः**

ष्टिघिट्-आस्कन्दने
अशौटि-व्याप्तौ

**इति आत्मनेभाषाः**

**इति स्वादयष्टितो धातवः**

१ तुदींत्-व्यथने
२ भ्रस्जींत्-पाके
३ क्षिपींत्-प्रेरणे
४ दिशींत्-अतिसर्जने
५ कृषींत्-विलेखने
६ मुच्लृंती-मोक्षणे
७ षिचींत्-क्षरणे
८ विदॢंती-लाभे
९ लुप्लृंती-छेदने
१० लिपींत्-उपदेहे

**इति उभयतोभाषाः**

११ कृतैत्-छेदने
१२ खिदंत्-परिघाते
१३ पिशत्-अवयवे

**वृत् मुचादिः**

१४-१५ रिंपित्-गतौ
१६ धिंत्-धारणे
१७ क्षित्-निवासगत्योः
१८ षूत्-प्रेरणे
१९ मृंत्-प्राणत्यागे
२० कृत्-विक्षेपे
२१ गृत्-निगरणे
२२ लिखत्-अक्षरविन्यासे
२३-२४ जर्च झर्चत्-परिभाषणे
२५ त्वचत्-संवरणे
२६ ऋचत्-स्तुतौ
२७ ओव्रस्चौत्-छेदने
२८ ऋछत्-इन्द्रियप्रलयमूर्तिभावयोः
२९ विछत्-गतौ
३० उछैत्-विवाहे
३१ मिछत्-उत्क्लेशे
३२ उछुत्-उञ्छे
३३ प्रछंत्-ज्ञीप्सायाम्
३४ उब्जत्-आर्जवे
३५ सृजंत्-विसर्गे
३६ रुजोंत्-भङ्गे
३७ भुजोंत्-कौटिल्ये
३८ टुमस्जोंत्-शुद्धौ
३९-४० जर्ज झर्झत्-परिभाषणे
४१ उद्झत्-उत्सर्गे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

४२ जुडत्–गतौ
४३-४४पृड् मृडत्–सुखने
४५ कडत्–मदे
४६ पृणत्–प्रीणने
४७ तुणत्–कौटिल्ये
४८ मृणत्–हिंसायाम्
४९ द्रुणत्–गतिकौटिल्ययोश्च
५० पुणत्–शुभे
५१ मुणत्–प्रतिज्ञाने
५२ कुणत्–शब्दोपकरणयोः
५३-५४ घुण घूर्णत्–भ्रमणे
५५ चृतैत्–हिंसाग्रन्थयोः
५६ णुदंत्–प्रेरणे
५७ षद्लृत्–अवसादने
५८ विधत्–विधाने
५९-६० जुन शुनत्–गतौ
६१ छुपंत्–स्पर्शे
६२ रिफत्–कथनयुद्धहिंसादानेषु
६३-६४ तृफ तृम्फत्–तृप्तौ
६५-६६ ऋफ ऋम्फत्–हिंसायाम्
६७-६८ दृफ दृम्फत्–उत्क्लेशे
६९-७० गुफ गुम्फत्–ग्रथने
७१-७२ उभ उम्भत्–पूरणे
७३-७४ शुभ शुम्भत्–शोभार्थे
७५ दृभैत्–ग्रन्थे
७६ लुभत्–विमोहने
७७ कुरत्–शब्दे
७८ क्षुरत्–विलेखने
७९ खुरत्–छेदने च
८० घुरत्–भीमार्थशब्दयोः
८१ पुरत्–अग्रगमने
८२ मुरत्–संवेष्टने
८३ सुरत्–ऐश्वर्यदीप्त्योः
८४-८५ स्फर स्फलत्–स्फुरणे
८६ कीलत्–खेलक्रीडनयोः
८७ इलत्–गतिस्वप्नप्रक्षेपणेषु
८८ हिलत्–हावकरणे
८९-९० शिल-सिलत्–उञ्छे
९१ तिलत्–स्नेहने
९२ चलत्–विलसने
९३ चिलत्–वसने
९४ विलत्–वरणे
९५ विलत्–भेदने



९६ णिलत्–गहने
९७ मिलत्–श्लेषणे
९८ स्पृशंत्–संस्पर्शे
९९-१०० रुशं रिशंत्–हिंसायाम्
१०१ विशंत्–प्रवेशने
१०२ मृशंत्–आमर्शने
१०३-१०४ लिशं ऋषैत्–गतौ
१०५ इषत्–इच्छायाम्
१०६ मिषत्–स्पर्धायाम्
१०७ कृहौत्–उद्यमे
१०८-१११ तृहौ तृंहौ–स्तृहौ—
स्तृंहौत्–हिंसायाम्
११२ कुटत्–कौटिल्ये
११३ गुंत्–पुरीषोत्सर्गे
११४ ध्रुंत्–गतिस्थैर्ययोः
११५ णूत्–स्तवने
११६ धूत्–विधूनने
११७ कुचत्–संकोचने
११८ व्यचत्–व्याजीकरणे
११९ गुजत्–शब्दे
१२० घुटत्–प्रतीघाते
१२१–१२३ चुट छुट त्रुटत्–छेदने
१२४ तुटत्–कलहकर्मणि
१२५ मुटत्–आक्षेपप्रमर्दनयोः
१२६ स्फुटत्–विकसने
१२७-१२८ पुट लुठत्–संश्लेषणे
१२९ कृडत्–घसने
१३० कुडत्–बाल्ये च
१३१ गुडत्–रक्षायाम्
१३२ जुडत्–बन्धे
१३३ तुडत्–तोडने
१३४–१३६ कुड थुड स्थुडत्–संवरणे
१३७ वुडत्–उत्सर्गे च
१३८–१३९ व्रुड भ्रुडत्–संघाते
१४०–१४२ द्रुड हुड त्रुडत्–निमज्जने
१४३ चुणत्–छेदने
१४४ डिपत्–क्षेपे
१४५ छुरत्–छेदने
१४६ स्फुरत्–स्फुरणे
१४७ स्फुलत्–संचये च

**इति परस्मैभाषाः**

१४८–१४९ कुंङ् कूङ्त्–शब्दे
१५० गुरैति–उद्यमे

**वृत् कुटादिः**

१५१पृंङ्त्–व्यायामे
१५२ दृंङ्त्–आदरे
१५३ धृंङ्त्–स्थाने
१५४ ओविजैति–भयचलनयोः
१५५–१५६ ओलजैङ् ओल-
स्जैति–व्रीडे
१५७ व्रजिंत्–सङ्गे
१५८ जुषैति–प्रीतिसेवनयोः

**इति आत्मनेभाषाः**

**इति तुदादयस्तितो धातवः**

१ रुधृंपी–आवरणे
२ रिचृंपी–विरेचने
३ विचृंपी–पृथग्भावे
४ युजृंपी–योगे
५ भिदृंपी–विदारणे
६ छिदृंपी–द्वैधीकरणे
७ क्षुदृंपी–संपेषे
८ ऊछृदृपी–दीप्तिदेवनयोः
९ ऊतृदृपी–हिंसानादरयोः

**इति उभयतो भाषाः**

१० पृचैप्–संपर्के
११ वृचैप्–वरणे
१२-१३ तञ्चू तञ्चौप्–संकोचने
१४ भञ्जौप्–आमर्दने
१५ भुजंप्–पालनाभ्यवहारयोः
१६ अञ्जौप्–व्यक्तिम्रक्षणगतिषु
१७ ओविजैप्–भयचलनयोः
१८ कृतैप्–वेष्टने
१९ उन्दैप्–क्लेदने
२० शिष्लृंप्–विशेषणे
२१ पिष्लृंप्–संचूर्णने
२२-२३ हिसु तृहप्–हिंसायाम्

**इति परस्मै भाषाः**

२४ खिदिंप्–दैन्ये
२५ विदिंप्–विचारणे
२६ ञिइन्धैपि–दीप्तौ

**इति आत्मनेभाषाः**

**इति रुधादयः पितो धातवः**

१ तनूयी–विस्तारे
२ षणूयी–दाने
३-४ क्षणूग् क्षिणूयी–हिंसायाम्
५ ऋणूयी–गतौ
६ तृणूयी–अदने

Jain Education International For Personal & Private Use Only www.jainelibrary.org

७ घृणूयी–दीप्तौ

**इति उभयतोभाषाः**

८ वनूयि–याचने

९ मनूयि–बोधने

**इति आत्मनेभाषाः**

**इति तनादयो पितो धातवः**

१ डुक्रींग्श्–द्रव्यविनिमये

२ षिंग्श्–बन्धने

३ प्रींग्श्–तृप्तिकान्त्योः

४ श्रींग्श्–पाके

५ मींग्श्–हिंसायाम्

६ युंग्श्–बन्धने

७ स्कुंग्श्–आप्रवणे

८ क्नूग्श्–शब्दे

९ द्रूग्श्–हिंसायाम्

१० ग्रहीश्–उपादाने

११ पूग्श्–पवने

१२ लूग्श्–छेदने

१३ धूग्श्–कम्पने

१४ स्तृग्श्–आच्छादने

१५ कृग्श्–हिंसायाम्

१६ वृग्श्–वरणे

**इति उभयतो भाषाः**

१७ ज्यांश्–हानौ

१८ रींश्–गतिरेषणयोः

१९ लींश्–श्लेषणे

२० व्लींश्–वरणे

२१ ल्वींश्–गतौ

२२–२४ कॄ मॄ शॄश्–हिंसायाम्

२५ पॄश्–पालनपूरणयोः

२६ वॄश्–भरणे

२७ भॄश्–भर्जनेच

२८ दॄश्–विदारणे

२९ झॄश्जॄश्–वयोहानौ

३० नॄश्–नये

३१ गॄश्–शब्दे

३२ ऋश्–गतौ

**वृत् प्वादिः**

**वृत् ल्वादिः**

३३ ज्ञांश्–अवबोधने

३४ क्षिप्श्–हिंसायाम्

३५ व्रींश्–वरणे

३६ भ्रींश्–भरणे

३७ हेठश्–भूतप्रादुर्भावे

३८ मृडश्–सुखने

३९ श्रन्थश्–मोचनप्रतिहर्षयोः

४० मन्थश्–विलोडने

४१ ग्रन्थश्–सन्दर्भे

४२ कुन्थश्–संक्लेशे

४३ मृदश्–क्षोदे

४४ गुधश्–रोषे

४५ बन्धंश्–बन्धने

४६ क्षुभश्–संचलने

४७–४८ णभ तुभश्–हिंसायाम्

४९ खवश्–हेठश्वत्

५० क्लिशौश्–विबाधने

५१ अशश्–भोजने

५२ इषश्–आभीक्ष्ण्ये

५३ विषश्–विप्रयोगे

५४-५५ प्रुष प्लुषश्–स्नेहसेचनपूरणेषु

५६ मुषश्–स्तेये

५७ पुषश्–पुष्टौ

५८ कुषश्–निष्कर्षे

५९ ध्रसूश्–उञ्छे

**इति परस्मैभाषाः**

६० वृङ्श्–संभक्तौ

**इत आत्मनेभाषाः**

**इति क्र्यादयः शितो धातवः**

१ चुरण्–स्तेये

२ पृण्–पूरणे

३ घृण्–स्रवणे

४–५ श्वल्क वल्कण्–भाषणे

६–७ नक्क धक्कण्–नाशने

८–९ चक्क चुक्कण्–व्यथने

१० टकुण्–बन्धने

११ अर्कण्–स्तवने

१२ पिच्चण्–कुट्टने

१३ पचुण्–विस्तारे

१४ म्लेच्छण्–म्लेच्छने

१५ ऊर्जण्–बलप्राणनयोः

१६–१७ तुजु पिजुण्–हिंसाबल-
दाननिकेतनेषु

१८ क्षजुण्–कृच्छ्रजीवने

१९ पूजण्–पूजायाम्

२०–२१ गज मार्जण्–शब्दे

२२ तिजण्–निशाने

२३-२४ वज व्रजण्–मार्गणसं-
स्कारगत्योः

२५ रुजण्–हिंसायाम्

२६ नटण्–अवस्यन्दने

२७-३० तुट चुट चुट्ट छुटण्–छेदने

३१ कुट्टण्–कुत्सने च

३२-३४ पुट्ट चुट्ट षुट्टण्–अल्पीभावे

३५-३६ पुट मुटण्–संचूर्णने

३७-३८ अट्ट स्मिटण्–अनादरे

३९ लुण्टण्–स्तेये च

४० स्निटण्–स्नेहने

४१ घट्टण्–चलने

४२ खट्टण्–संवरणे

४३-४४ षट्ट स्फिट्टण्–हिंसायाम्

४५ स्फुटण्–परिहासे

४६ कीटण्–वर्णने

४७ वटुण्–विभाजने

४८ रुटण्–रोषे

४९-५१ शठ श्वठ श्वठुण्–संस्कार-
गत्योः

५२ शुठण्–आलस्ये

५३ शुठुण्–शोषणे

५४ गुठुण्–वेष्टने

५५ लडण्–उपसेवायाम्

५६ स्फुडुण्–परिहासे

५७ ओलडुण्–उत्क्षेपे

५८ पीडण्–गहने

५९ तडण्–आघाते

६०-६१ खड खडुण्–भेदे

६२ कडुण्–खण्डने च

६३ कुडुण्–रक्षणे

६४ गुडुण्–वेष्टने च

६५ चुडुण्–छेदने

६६ मडुण्–भूषायाम्

६७ भडुण्–कल्याणे

६८ पिडुण्–संघाते

६९ ईडण्–स्तुतौ

७० चडुण्–कोपे

७१-७३ जुड चूर्ण वर्णण्–प्रेरणे

७४-७५ चूण तूणण्–संकोचने

७६ श्रणण्–दाने

७७ पूणण्–संघाते

७८ चितुण्–स्मृत्याम्

७९-८० पुस्त बुस्तण्–आदरानादरयोः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

८१ मुस्तण्–संघाते
८२ कृतण्–संशब्दने
८३-८४ स्वर्त पथुण्–गतौ
८५ श्रथण्–प्रतिहर्षे
८६ पृथण्–प्रक्षेपणे
८७ प्रथण्–प्रख्याने
८८ छदण्–संवरणे
८९ चुदण्–संचोदने
९० मिदुण् स्नेहने
९१ गुर्दण्–निकेतने
९२ छर्दण्–वमने
९३ बुधुण्–हिंसायाम्
९४ वर्धण्–छेदनपूरणयोः
९५ गर्धण्–अभिकाङ्क्षायाम्
९६-९७ बन्ध बधण्–संयमने
९८ छपुण्–गतौ
९९ क्षपुण्–क्षान्तौ
१०० डूपण्–समुच्छ्राये
१०१ डिपण्–क्षेपे
१०२ स्तूपण्–व्यक्तायां वाचि
१०३-१०४ डपु डिपुण्–संघाते
१०५ शूर्पण्–माने
१०६ शुल्बण्–सर्जने च
१०७-१०८ डबु डिबुण्–क्षेपे
१०९ सम्बण्–संबन्धे
११० कुबुण्–आच्छादने
१११-११२ लुबु तुबुण्–अर्दने
११३ पुर्बण्–निकेतने
११४ यमण्–परिवेषणे
११५ व्ययण्–क्षये
११६ यन्त्रुण्–संकोचने
११७ कुद्रुण्–अनृतभाषणे
११८ श्वभ्रण्–गतौ
११९ तिलण्–स्नेहने
१२० जलण्–अपवारणे
१२१ क्षलण्–शौचे
१२२ पुलण्–समुच्छ्राये
१२३ बिलण्–भेदे
१२४ तलण्–प्रतिष्ठायाम्
१२५ तुलण्–उन्माने
१२६ दुलण्–उत्क्षेपे
१२७ बुलण्–निमज्जने
१२८ मूलण्–रोहणे
१२९-१३१ कल किल पिलण्–क्षेपे
१३२ पलण्–रक्षणे
१३३ इलण्–प्रेरणे
१३४ चलण्–भृतौ
१३५ सान्त्वण्–सामप्रयोगे
१३६ धूशण्–कान्तीकरणे
१३७ श्लिषण्–श्लेषणे
१३८ लूषण्–हिंसायाम्
१३९ रुषण्–रोषे
१४० प्युषण्–उत्सर्गे
१४१ पसुण्–नाशने
१४२ जसुण्–रक्षणे
१४३ पुंसण्–अभिमर्दने
१४४-१४७ ब्रुस पिस जस बर्हण्–हिंसायाम्
१४८ ष्णिहण्–स्नेहने
१४९ म्रक्षण्–म्लेच्छने
१५० भक्षण्–अदने
१५१ पक्षण्–परिग्रहे

**अथोभयपदी क्षान्तः**

१५२ लक्षीण्–दर्शनाङ्कनयोः

**इतोऽर्थविशेषे आलक्षिणः**

१५३ ज्ञाण्–मारणादिनियोजनेषु
१५४ च्युण्–सहने
१५५ भूण्–अवकल्कने
१५६ बुक्कण्–भषणे
१५७-१६० रक लक रगलगण्–आस्वादने
१६१ लिगुण्–चित्रीकरणे
१६२ चर्चण्–अध्ययने
१६३ अञ्चण्–विशेषणे
१६४ मुचण्–प्रमोचने
१६५ अर्जण्–प्रतियत्ने
१६६ भजण्–विश्राणने
१६७-१६८ चट स्फुटण्–भेदे
१६९ घटण्–संघाते

**हन्त्यर्थाश्च। येऽन्यत्र हिंसार्थाः पठ्यन्ते तेऽप्यत्र चुरादौ वेदितव्याः।**

१७० कणण्–निमीलने
१७१ यतण्–निकारोपस्कारयोः

**निरश्च० प्रतिदाने**

१७२ शब्दण्–उपसर्गाद्भाषाविष्कारयोः
१७३ षूदण्–आश्रवणे
१७४ आङः क्रन्दण्–सातत्ये
१७५ ष्वदण्–आस्वादने
१७६ आस्वदः–सकर्मकात्

**आङ्पूर्वात्स्वदतेः सकर्मकाण्णिज् भवति**

१७७ मुदण्–संसर्गे
१७८ शृधण्–प्रसहने
१७९ कृपण्–अवकल्कने
१८० जभुण्–नाशने
१८१ अमण्–रोगे
१८२ चरण्–असंशये
१८३ पूरण्–आप्यायने
१८४ दलण्–विदारणे
१८५ दिवण्–अर्दने
१८६-१८७ पश पषण्–बन्धने
१८८ पुषण्–धारणे
१८९ घुषण्–विशब्दने

**आङः क्रन्दे**

१९०-१९१ भूष तसुण्–अलंकारे
१९२ जसण्–ताडने
१९३ त्रसण्–वारणे
१९४ वसण्–स्नेहच्छेदावहरणेषु
१९५ ध्रसण्–उत्क्षेपे
१९६ ग्रसण्–ग्रहणे
१९७ लसण्–शिल्पयोगे
१९८ अर्हण्–पूजायाम्
१९९ मोक्षण्–असने

२००-२३६ लोकृ तर्क रघु लघु लोचृ विछ अजु तुजु पिजु लजु लुजु भजु पट पुट लुट घट घट्ट वृत पुथ नद बृध गुप धूप कुप चीव दशु कुशु त्रसु पिसु कुसु दसु वर्द बृहु वल्ह अहु बहु महुण्–भासार्थाः

**इति परस्मैभाषाः**

२३७ गुपि–जुगुप्सायाम्
२३८ गृणि–विज्ञाने
२३९ वञ्चिण्–प्रलम्भने
२४० कुटिण्–प्रतापने
२४१ मदिण्–तृप्तियोगे
२४२ विदिण्–चेतनाख्याननिवासेषु
२४३ मनिण्–स्तम्भे
२४४-२४५ बलि भलिण्–आभण्डने

Jain Education International For Personal & Private Use Only www.jainelibrary.org

२४६ दिविण्–परिकूजने
२४७ वृषिण्–शक्तिबन्धे
२४८ कुत्सिण्–अवक्षेपे
२४९ लक्षिण्–आलोचने
२५०-२५१ हिष्कि किष्किण्–हिंसायाम्
२५२ निष्किण्–परिमाणे
२५३ तर्जिण्–संतर्जने
२५४ कूटिण्–अप्रमादे
२५५ त्रुटिण्–छेदने
२५६ शठिण्–श्लाघायाम्
२५७ कुणिण्–संकोचने
२५८ तूणिण्–पूरणे
२५९ भ्रूणिण्–आशंसायाम्
२६० चितिण्–संवेदने
२६१-२६२ वस्ति गन्धिण्–अर्दने
२६३-२६६ डपि डिपि डम्पि डिम्पि
डम्भि डिम्भिण्–संघाते
२६७ स्यमिण्–वितर्के
२६८ शमिण्–आलोचने
२६९ कुस्मिण्–कुस्मयने
२७० गूरिण्–उद्यमे
२७१ तन्त्रिण्–कुटुम्बधारणे
२७२ मन्त्रिण्–गुप्तभाषणे
२७३ ललिण्–ईप्सायाम्
२७४ स्पशिण्–ग्रहणाश्लेषणयोः
२७५ दंशिण्–दशने
२७६ दंसिण्–दर्शने च
२७७ भर्त्सिण्–संतर्जने
२७८ यक्षिण्–पूजायाम्

**इति आत्मनेभाषाः**

**इतोऽदन्ताः।**

२७९ अङ्कण्–लक्षणे
२८० श्लेष्कण्–दर्शने
२८१-२८२ सुख-दुःखण्–तरिक्रयायाम्
२८३ अङ्गण्–पदलक्षणयोः
२८४ अघण्–पापकरणे
२८५ रचण्–प्रतियत्ने
८२६ सूचण्–पैशून्ये
२८७ भाजण्–पृथक्कर्मणि
२८८ सभाजण–प्रीतिसेवनयोः
२८९-२९० लज लजुण्–प्रकाशने
२९१ कूटण्–दाहे
२९२-२९३ पट वटुण्–ग्रन्थे
२९४ खेटण्–भक्षणे
२९५ खोटण्–क्षेपे
२९६ पुटण्–संसर्गे
२९७ वटुण्–विभाजने
२९८-२९९ शठ श्वठण्–सम्यग्भाषणे
३०० दण्डण्–दण्डनिपातने
३०१ व्रणण्–गात्रविचूर्णने
३०२ वर्णण्–वर्णक्रियाविस्तारगुणवचनेषु
३०३ पर्णण्–हरितभावे
३०४ कर्णण्–भेदे
३०५ तूणण्–संकोचने
३०६ गणण्–संख्याने
३०७-३०९ कुण गुण केतण्–आमन्त्रणे
३१० पतण्–गतौ वा
३११ वातण्–गतिसुखसेवनयोः
३१२ कथण्–वाक्यप्रबन्धे
३१३ श्रथण्–दौर्बल्ये
३१४ छेदण्–द्वैधीकरणे
३१५ गदण्–गर्जे
३१६ अन्धण्–दृष्टयुपसंहारे
३१७ स्तनण्–गर्जे
३१८ ध्वनण्–शब्दे
३१९ स्तेनण्–चौर्ये
३२० ऊनण्–परिहाणे
३२१ कृपण्–दौर्बल्ये
३२२ रूपण्–रूपक्रियायाम्
३२३-३२४ क्षप लाभण्–प्रेरणे
३२५ भामण्–क्रोधे
३२६ गोमण्–उपलेपने
३२७ सामण्–सान्त्वने
३२८ श्रामण्–आमन्त्रणे
३२९ स्तोमण्–श्लाघायाम्
३३० व्ययण्–वित्तसमुत्सर्गे
३३१ सूत्रण्–विमोचने
३३२ मूत्रण्–प्रस्रवणे
३३३-३३४ पार तीरण्–कर्मसमाप्तौ
३३५-३३६ कत्र गात्रण्–शैथिल्ये
३३७ चित्रण्–चित्रक्रियाकदाचिद्-
दृष्टयोः
३३८ छिद्रण्–भेदे
३३९ मिश्रण्–संपर्चने
३४० वरण्–ईप्सायाम्
३४१ स्वरण्–आक्षेपे
३४२ शारण्–दौर्बल्ये
३४३ कुमारण्–क्रीडायाम्
३४४ कलण्–संख्यानगत्योः
३४५ शीलण्–उपधारणे
३४६-३४७ वेल कालण्–उपदेशे
३४८ पल्यूलण्–लवनपवनयोः
३४९ अंशण्–समाघाते
३५० पषण्–अनुपसर्गः
३५१ गवेषण्–मार्गणे
३५२ मृषण्–क्षान्तौ
३५३ रसण्–आस्वादनस्नेहनयोः
३५४ वासण्–उपसेवायाम्
३५५ निवासण्–आच्छादने
३५६ चहण्–कल्कने
३५७ महण्–पूजायाम्
३५८ रहण्–त्यागे
३५९ रहुण्–गतौ
३६० स्पृहण्–ईप्सायाम्
३६१ रूक्षण्–पारुष्ये

**इति परस्मैभाषाः**

३६२ मृगणि–अन्वेषणे
३६३ अर्थणि–उपयाचने
३६४ पदणि–गतौ
३६५ संग्रामणि–युद्धे
३६६–३६७ शूर–वीरणि विक्रान्तौ
३६८ स्थूलणि–परिबृंहणे
३६९ गर्वणि–माने
३७० गृहणि–ग्रहणे
३७१ कुहणि–विस्मापने
३७२ सत्रणि–सन्दानक्रियायाम्

**इति आत्मनेभाषाः**

३७३ युजण्–संपर्चने
३७४ लीण्–द्रवीकरणे
३७५ मीण्–मतौ
३७६ प्रीगण्–तर्पणे
३७७ धूगण्–कम्पने
३७८ वृगण्–आवरणे
३७९ जॄण्–वयोहानौ
३८०–३८१ चीक वीकण्–आमर्षणे
३८२ मार्गण्–अन्वेषणे
३८३ पृचण्–संपर्चने
३८४ रिचण्–वियोजने

Jain Education International For Personal & Private Use Only www.jainelibrary.org

३८५ वचण्–भाषणे
३८६ अर्चिण्–पूजायाम्
३८७ वृजेण्–वर्जने
३८८ मृजौण्–शौचालंकारयोः
३८९ कठुण्–शोके
३९०–३९१ श्रन्थ ग्रन्थण्–संदर्भे
३९२–३९३ क्रथ अर्दिण्–हिंसायाम्
३९४ श्रथण्–बन्धने च
३९५ वदिण्–भाषणे
३९६ छदण्–अपवारणे
३९७ आङःसदण्–गतौ

३९८ छृदण्–संदीपने
३९९ शुन्धिण्–शुद्धौ
४०० तनूण्–श्रद्धाघाते उपसर्गाद् दैर्घ्ये
४०१ मानण्–पूजायाम्
४०२ तपिण्–दाहे
४०३ तृपण्–प्रीणने
४०४ आप्लृण्–लम्भने
४०५ दभैण्–भये
४०६ ईरण्–क्षेपे
४०७ मृषिण्–तितिक्षायाम्

४०८ शिषण्–असर्वोपयोगे

विपूर्वोऽतिशये

४०९ जुषण्–परितर्कणे
४१० धृषण्–प्रसहने
४११ हिसुण्–हिंसायाम्
४१२ गर्हण्–विनिन्दने
४१३ षहण्–मर्षणे

बहुलमेतन्निदर्शनम् ।

वृत्युजादिः परस्मैभाषाः ।

इत्याचार्यश्रीहेमचन्द्रानुस्मृताः
चुरादयो णितो धातवः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## श्रीहेमहंसगणिना संगृहीतसकलसौत्रादिधातूनां संग्रहश्लोकाः

कण्ड्वादिरथ स्तम्भूस्तन्द्राः किपतिगृहिचिरिजुकुर्भूस्तर्किः ।
कक्किः कर्किः सिकिमर्किचङ्किमकिरिखिकगार्धिमर्चाश्च ॥ १ ॥

आर्यागीतिः ।

मञ्जिः पञ्जिः कञ्जीरण्टिर्घट्टमटिकुठकुडोडिवडिः ।
णडिघणिकिणिकुतिपुतिलतिसातिकथोदिक्षदिः सुन्दिः ॥ २ ॥
कदिमिधिधनिरिपिकपतिः क्षुपिड्डपिबिम्बिस्तथारिभिः स्तुम्भुः ।
स्कम्भुष्कुम्भूदभिडिमिधमिपीयिरुरिस्तुरिस्तन्द्रिः ॥ ३ ॥
चुलिरुलिलुली च सह्लिर्हह्लिभिलिधन्वितविपशिस्पशयः ।
ऋशिभिषियुषिधिपिलुसिपसिभसिलुहिरिहिचुक्षिचिक्षिश्च ॥ ४ ॥
इति सौत्रा स्युः क्नविबीजिहीलिरन्दोलिरपिच हिन्दोलिः ।
प्रेङ्खोलिरूषिरित्यादिलौकिकाः स्युश्चुलुम्पिकूचिधटिः ॥ ५ ॥
उल्लुडिरवधीर्युद्धुष्युल्लकसाद्याश्च वाक्यकरणीयाः ।
खच्योजस्फुटतुच्छस्कन्धोषत्रसाश्च तद्भिन्नाः ॥ ६ ॥
कुशुपिशुकुसुदसुसुत्रसुरित्यदर्शितार्थाश्च खेडपणविचाः ।
कर्त्तः कत्रैः कत्थः श्लत्थः शरच्छदलभाः श्रपः खोदः ॥ ७ ॥
स्तनध्वनौ स्वनस्यमौ । षमष्टमौ ललिर्मलिः ॥ ८ ॥

॥ जगौ विलासिनी छन्दः ।

आद्येऽर्द्धे भमौ विक्रान्ता; तृतीयेऽह्नौ तयौ तनुमध्या; तुर्येसभौगो वितानम् ।
छन्दस्त्रयमीलने चात्र वृत्ते उपजातिच्छन्दः, सर्वासा-
मुक्तादिजातीनां सङ्कर उपजातिरितिवृद्धा इति छन्दोऽनुशासनोक्तेः ॥ ९ ॥
गा माः किः क्षिजिरिचिर्ईर्वेवीदीधीरुदाहृताः क्षीव्रीः ।
श्रील्पीव्लीज्रीखुर्धुर्गृगूर्दृर्जृघृसृहृस्पृङ्ऋकृः ॥ १० ॥
धृश्रृपृद्दृज्योदकुतिकिटिकयः पेकिचिकवखुखक्खिः ।
लिखिघग्घिदघिसघिस्तिघिचषघिम्रुचिाद्विरचियाचिविचिः ॥ ११ ॥
चर्चिखचिगुर्चिपिच्छिलुजुध्रिजिरिजिर्नेजिमृजी वृजिर्मर्जिः ।
शौटृयौटृमेटृम्रेटृम्लेटृस्तथा लौटृः ॥ १२ ॥
स्फुड्मुड्नटिणटिरत्व्यद्तिमिण्टिसुटिशटिशलिरुठुर्वुम्युक् ।
चुड्पिडिकड्डाड्डाश्डुिडितुड्डती क्ष्वेडती अडिर्लण्डिः ॥ १३ ॥
लन्दिस्तुडिफण्यणिघृणिधणिरिन्तिज्युतिकितिः पतिर्वावृत् ।
ध्वर्त्तिः पर्थिः पार्थिः पदिः कदिः क्रदिक्लदी मन्दिः ॥ १४ ॥
खुर्दिगुधिवेदिबुन्धुर्णुदियधतीणाधूसाधिषाधिगृधिः ।
मनति-जनिक्षपित्रपिसपिहेपिस्तुपितुम्प— तुफितुम्फः ॥ १५ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रिफितृपितृम्फिः स्तुपिना स्तूपिस्तुपिश्च घर्बिकम्बी च ।
खम्बिगम्बिश्चम्बिस्तम्बिर्नेम्बिश्च पम्बिश्च ॥ १६ ॥
बम्बिः शम्बिः पम्बिः पाम्बिकुटुम्बी च सुम्भिनभिषुम्भिः ।
ष्टभुडभुडिभुदभुदिम्भिश्छबिः सामिस्तुरिघुरी च ॥ १७ ॥
गुन्द्रिस्खलिदलतिस्थलिघलिपिलिपुलिबलिचलिश्च मोलिश्च ।
पालिमली क्षीविश्वीविषान्विरशिवाशिलशिलषयः ॥ १८ ॥
दाशिखपिद्वषिशूर्षिघषुधिषिमुपिधूषिधूसिध्रषिजर्त्सिः ।
ष्णुसिना ष्णसिदासी द्विरुभ्रसिगृहिस्रंही ष्टृहिष्टृंही ॥ १९ ॥
दंहिः घृक्षिर्जक्षि-र्भक्षी ऋक्ष्याद्याश्च अन्यैरुक्ता एते सैद्धान्ताश्चाथामी ॥ २ ॥

॥ मौ सावित्री छन्दः ॥

दटिरथ विकुर्विकुर्वी उषियुहिरित्यादि सैष धातुगणः ।
लौकिकप्रभृतिर्लक्ष्या-नुरोधतः सिद्धिमध्यास्त ॥ २१ ॥

## अनुबन्धफलम् ।

उच्चारणेऽस्त्यवर्णाद्य आस्क्तयोरिण्निषेधने ।
इकारादात्मनेपदमीकाराच्चोभयं भवेत् ॥ १ ॥
उदितः स्वरान्नोऽन्तश्चोः क्त्वादाविटो विकल्पनम् ।
रुपान्त्ये ङे परेऽह्रस्व ऋकारादङ् विकल्पकः ॥ २ ॥
लृकारादङ् समायात्येः सिचि वृद्धिनिषेधकः ।
ऐस्क्तयोरिण्निषेधः स्यादोस्क्तयोस्तस्य नो भवेत् ॥ ३ ॥
औकार इड्विकल्पार्थेऽनुस्वारोऽनिड्विशेषणे ।
लृकारश्च विसर्गश्चानुबन्धौ भवतो नहि ॥ ४ ॥
कोऽदादिर्न गुणी प्रोक्तः खे पूर्वस्य मुमागमः ।
गेनोभयपदी प्रोक्तो घश्च चजोः कगौ कृतौ ॥ ५ ॥
आत्मने गुणरोधे ङ श्यो दिवादिगणो भवेत् ।
ञो वृद्धौ वर्त्तमाने क्तः टः स्वादि( रधुकारकः )ष्टद्युकारकः ? ॥ ६ ॥
त्रिमगर्थो डकारः स्याण् णचुरादिश्च वृद्धिकृत् ।
तस्तुदादौ नकारश्चापुंसीति विशेषणे ॥ ७ ॥
रुधादौ नागमे पो हि मो दामः संप्रदानके ।
यस्तनादे रकारः स्यात् पुंवद्भावार्थसूचकः ॥ ८ ॥
स्त्रीलिङ्गार्थे लकारो हि उत और्विति वो भवेत् ।
शः क्र्यादिः क्यः शिति प्रोक्तः षः पितोऽङ्विशेषणे ॥ ९ ॥
पदत्वार्थे सकारो हि नोक्ता अत्र न सन्ति च ।
धातूनां प्रत्ययानां चानुबन्धः कथितो मया ॥ १० ॥

इत्यनुबन्धफलम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अथ वृत्‌गणफलम्

द्युतादेरद्यतन्यां चाऽऽत्मनेपदमिष्यते ।
वृदादिपञ्चकेभ्यो वा स्यसनोरात्मनेपदम् ॥ १ ॥
ज्वलादेर्णो विकल्पेन (?) यजादेः संप्रसारणम् ।
घटादीनां भवेद्ध्रस्वो णौ परेऽजीघटत् सदा ॥ २ ॥
अद्यतन्यां पुषादित्वादङ् परस्मैपदे भवेत् ।
स्वादित्वाच्च क्तयोस्तस्य नकारः प्रकटो भवेत् ॥ ३ ॥
प्वादीनां गदितो ह्रस्वो ल्वादेस्तक्तयोश्च नो भवेत् ।
युजादयो विकल्पेन ज्ञेयाश्चुरादिके गणे ॥ ४ ॥
मुचादेर्नागमः शे च कुटादित्वात् सिचि परे ।
गुणवृद्धेरभावश्च कथितो हेमसूरिणा ॥ ५ ॥
अदन्तानां गुणोवृद्धिर्यङ् चुरादेश्च नो भवेत् ।
संक्षेपेण फलं चैतदीषितं वानरेण हि ॥ ६ ॥

इतिवृत्‌गणफलम् ।

## अथ अनिट्कारिकाः

श्रिश्रिडीशीयुरुक्षुक्ष्णुणुस्नुभ्यश्च वृगो वृङः ।
ऊदृदन्तयुजादिभ्यः स्वरान्ता धातवोऽपरे ॥ १ ॥
पाठ एकस्वरा स्युर्येऽनुस्वारेत इमे स्मृताः ।
द्विविधोऽपिशकिश्चैवं वचिर्विचिरिची पचिः ॥ २ ॥
ष्वञ्जिरञ्जिरुजयोर्निजिर्विजृषञ्जिभञ्जिभजयः सृजित्यजी ॥ ३ ॥
स्कन्दिविद्यविद्लृविक्तयो नुदिः खिद्यतिः शदिसदी भिदिच्छिदी ।
तुद्यदी पदिहदी खिदिक्षुदी राधिसाधिशुधयो युधिव्यधी ॥ ४ ॥
बन्धिबुध्यरुधयः क्रुधिक्षुधी सिध्यतिस्तदनु हन्तिमन्यती ।
आपिना तपिशपिक्षिपिछुपो लुम्पतिः सृपिलिपी वपिस्वपी ॥ ५ ॥
यभिरभिलभियमिरमिनमिगमयः क्रुशिलिशिरुशिरिशिदिशतिदशयः ।
स्पृशिमृशतिविशतिदृशिशिश्लिशुषय-स्त्विषिपिषिविष्लृकषितुषिदुषिपुषयः ॥ ६ ॥
श्लिष्यतिर्द्विषिरतो घसिवसती रोहतिर्लुहिरिही अनिडगदितौ ।
देग्धिदोग्धिलिह्योमिहिवहती नह्यतिर्दहिरिति स्फुटमनिटः ॥ ७ ॥

इति अनिट्कारिकाः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

Jain Education International For Personal & Private Use Only www.jainelibrary.org